TO

PROFESSOR ALBRECHT WEBER,

A TOKEN

OF SINCERE RESPECT

AND

GRATITUDE

PREFACE

TO

THE FIRST EDITION.

In preparing the present edition of the Vyâkarana-mahâbhâshya I have hitherto used the following manuscripts —

G Patanjali's Mahâbhâshya, a MS dated Samvat 1751, as reproduced by photo lithography, under the supervision of Professor T. H Goldstucker, London India Museum, 1874

D *A MS belonging to the Deccan College, undated, but apparently* written from 100 to 150 years ago It is incomplete, and portions of it, which have been pointed out in the Various Readings are very carelessly written.

C A MS belonging to the Asiatic Society of Calcutta, collated as far as page 238 of this edition The portion which I have been able to use bears no date, but the greater part of it was probably written about 80 years ago

E A MS belonging to the Elphinstone College, written about 200 years ago The leaves 103—156 of the 1st Adhyâya (pages 121, 10—204, 19) are missing

g Patanjali's Mahabhashya with Kaiyyata's Bhashyapradipa, an undated MS, as reproduced by photo lithography under the supervision of Professor T H Goldstucker, London India Museum, 1874

B A MS belonging to Dr Buhler, dated Samvat 1844

In addition to these MSS, which are all written in the Devanâgarî character, I have also had the use of a modern Devanâgarî MS of the Deccan College, and, while carrying my edition through the press, I have been able to compare with the MSS above mentioned a S'ârada MS of the Mahâbhâshya brought by Dr Buhler from Kas'mîr. With the exception of the first leaf, which is

missing, this MS. (marked K) contains the text of the first two Adhyâyas complete, but a few leaves are much injured, and the writer has frequently left empty spaces, where the original from which he was copying was probably either damaged or illegible.[1]

Generally speaking, the text of the Mahâbhâshya is the same in all the above MSS., and the differences of reading which occur are not such as to prove the existence of two or more recensions of the work. Though numerous, they rarely affect the meaning of a passage, and they are in the majority of cases accounted for by the carelessness of individual copyists, or the desire of a student to improve on the text which he was studying. There is a marked agreement between the MSS. G and D on the one hand, and between g and B on the other, and C leans more towards the first group, while the readings of E oftener accord with those of the second. The Kas'mîr MS. generally agrees with g B, but it contains also a few valuable readings which are not found in any of the other MSS.

In settling my text, I have been guided chiefly by the MS. G, which is the best of all the MSS. of the Mahâbhâshya that have come under my notice, and I have indicated in the various Readings all passages where I have departed from it. Of the other MSS. I have generally considered it sufficient to give only the more important readings, but I have throughout noted down anything which appeared to have reference to the text or the constitution of the Vârttikas, and I have also given all various readings in the examples adduced by Patanjali.

In separating the text of the Vârttikas from the bulk of Patanjali's commentary, I have strictly adhered to the principles laid down in my essay on Kâtyâyana and Patanjali. I cannot hope that my attempt to reconstruct the work of Kâtyâyana has in every particular been successful, and the list of corrections at the end of this volume will show that further consideration has made me change my views in one or two instances. Other cases

[1] While revising the text for the second edition, I have occasionally compared also the MSS. A. and K., described in the preface of Vol. II.; but I have not been able to use those MSS. throughout.

which as yet appear doubtful I intend to discuss when the whole text of the Mahâbhâshya has been printed, and I hope then also to treat the question of the annotated Kârikâs regarding which I cannot bring myself to accept the views expressed by Professor Goldstücker in his 'Pânini.'

Where a rule of Pânini's is actually quoted by Patanjali, I have given the reference in the text; where a rule is only alluded to, and where one or more rules are necessary for the formation of a particular form or for the understanding of a passage, the references have been given at the foot of the page. References to the Vârttikas and to Patanjali's commentary are distinguished by an asterisk. In giving all these references I have followed Kaiyata's *Bhâshyapradîpa* and Nâgojibhaṭṭa's *Bhâshyapradîpoddyota* wherever they render any assistance; in other cases I have had recourse to Jinendrabuddhi's *Kâśikâvivaranapanchikâ*, Bhaṭṭojîdîkshita's *S'abdakaustubha*, and other grammatical works, or have, though rarely, followed my own judgment. I regret that I have not been able to secure in India a copy of Bhartrihari's commentary on the Mahâbhâshya, and also that I could study Haradatta's *Padamanjarî* only after the completion of the text of this volume.

The figures for Pânini's rules given in the text and in the foot-notes refer to Böhtlingk's edition. It will be apparent even from the present volume of the Mahâbhâshya that the text of Pâṇini's grammar has not been handed down to us altogether in its original shape; at the same time the alterations which it has undergone do not appear to be great, and it seems safest and most convenient to follow the current text until the whole of the Mahâbhâshya has been published and thoroughly examined.

In applying the rules of Sandhi to technical terms I have, I fear, not always been consistent, and especially is this the case as regards the doubling of final ङ्, ण्, and न्, before a vowel. Sanskrit scholars are aware that Prof. Goldstücker ('Pâṇini' page 54, note 53) wished to extend the operation of this rule of euphony to technical terms under all circumstances, and that Prof. Muller (Preface to Ṛigveda IV., pag. lxxiii.) proposed the adoption of a middle course. But when we find that Haradatta in his *Padaman-*

jati distinctly tells us that in terms like सनाद्यन्ताः, and in rules like इको यणचि, न् and ण् are *not* doubled, that Hemachandra makes the same remark with regard to the term उणादि, and that moreover in grammatical *Kârikâs the final nasal remains single not only in compounds* like उणादि (see Mahâbhâshya on P. III., 3, 1) but also in simple terms like सन् (*ibid.* on P. III. 1, 7, and V. 2, 94), we may well venture to omit the doubling uniformly everywhere, and this is the course I intend to adopt in future.

Notwithstanding all the labour which this work has cost me, I am aware that it is not free from defects, and all I can hope is that I may be considered to have somewhat smoothed the way for others, and to have made some advance towards a right understanding of the Mahâbhâshya.

In conclusion, I have to thank Mr. Chatfield, the Director of Public Instruction in this Presidency, for the readiness with which he has undertaken the publication of this work for Government.

F. KIELHORN.

Deccan College, March, 1880.

॥ अथ शब्दानुशासनम् ॥

अथेत्यय शब्दो ऽधिकारार्थ प्रयुज्यते । शब्दानुशासन शास्त्रमधिकृत वेदितव्यम् ॥ केषा शब्दानाम् । लौकिकाना वैदिकाना च । तत्र लौकिकास्तावत् । गौरश्व पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति । वैदिका खल्वपि । शं नो देवीरभिष्टये । इषे त्वोर्जे त्वा । अग्निमीळे पुरोहितम् । अग्न आयाहि वीतय इति ॥

अथ गौरित्यत्र क शब्द । किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूप स शब्द । नेत्याह । द्रव्य नाम तत् ॥ यत्तर्हि तदिङ्गित चेष्टित निमिषित स शब्द । नेत्याह । क्रिया नाम सा ॥ यत्तर्हि तच्छुक्लो नील कृष्ण कपिल कपोत इति स शब्द । नेत्याह । गुणो नाम स ॥ यत्तर्हि तद्भिन्नेष्वभिन्न छिन्नेष्वच्छिन्न सामान्यभूत स शब्द । नेत्याह । आकृतिर्नाम सा ॥ कस्तर्हि शब्द । येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिना सम्प्रत्ययो भवति स शब्द ॥ अथवा प्रतीतपदार्थक । लोके ध्वनि शब्द इत्युच्यते । तद्यथा । शब्द कुरु । मा शब्द कार्षी । शब्दकार्यय माणवक इति । ध्वनि कुर्वन्नेवमुच्यते । तस्माद्ध्वनि शब्द ॥

कानि पुन शब्दानुशासनस्य प्रयोजनानि । रक्षोहागमलघ्वसदेहा प्रयोजनम् ॥ रक्षार्थं वेदानामध्येय व्याकरण लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यति ॥ ऊह खल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिता । ते चावश्यं यज्ञगतेन यथायथ विपरिणमयितव्या । तान्नावैयाकरण शक्नोति यथायथ विपरिणमयितुम् । तस्मादध्येय व्याकरणम् ॥ आगम खल्वपि । ब्राह्मणेन निष्कारणो धर्म षडङ्गो वेदो ऽध्येयो ज्ञेय इति । प्रधान च षट्स्वङ्गेषु व्याकरण प्रधाने च कृतो यत्न फलवान्भवति ॥ लघ्वर्थ चाध्येय व्याकरणम् । ब्राह्मणेनावश्य शब्दा ज्ञेया इति । न चान्तरेण व्याकरण लघुनोपायेन शब्दा शक्या ज्ञातुम् ॥ असदेहार्थ चाध्येय व्याकरणम् । याज्ञिका पठन्ति । स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति । तस्या सदेह स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि

पृषन्ति यस्याः सा स्थूलपृषतीति । तां नावैयाकरणः स्वरतो ऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः* । अथान्तोदात्तत्वं ततस्तत्पुरुष† इति ॥

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि । ते ऽसुराः । दुष्टः शब्दः । यदधीतम् । यस्तु प्रयुङ्क्ते । अविद्वांसः । विभक्तिं कुर्वन्ति । यो वा इमाम् । चत्वारि । उत त्वः । सक्तुमिव । सारस्वतीम् । दशम्यां पुत्रस्य । सुदेवो असि वरुणेति ॥

ते ऽसुराः । ते ऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः । म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् ॥ ते ऽसुराः ॥

दुष्टः शब्दः ।

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो ऽपराधादिति ॥

दुष्टाञ्शब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् ॥ दुष्टः शब्दः ॥

यदधीतम् ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् ॥ यदधीतम् ॥

यस्तु प्रयुङ्क्ते ।

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले ।
सो ऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥

कः । वाग्योगविदेव । कुत एतत् । यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव हि शब्दज्ञाने धर्म एवमपशब्दज्ञाने ऽप्यधर्मः । अथवा भूयानधर्मः प्राप्नोति । भूयांसो ऽपशब्दा अल्पीयांसः शब्दाः । एकैकस्य हि शब्दस्य बहवो ऽपभ्रंशाः । तद्यथा । गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयो ऽपभ्रंशाः । अथ यो ऽवाग्योगवित् । अज्ञानं तस्य शरणम् । नात्यन्तायाज्ञानं शरणं भवितुमर्हति । यो ह्यजानन्वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सो ऽपि मन्ये पतितः स्यात् । एवं तर्हि सो ऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः । कः । अवाग्योगविदेव । *अथ यो वाग्योगवित् । विज्ञानं तस्य शरणम् ॥ क्व पुनरिदं पठितम् ।*

---

* ६ २ १ † ६ १ २२३

भ्राजा नाम श्लोकाः । किं च भोः श्लोका अपि प्रमाणम् । किं चातः । यदि प्रमाणमयमपि श्लोकः प्रमाणं भवितुमर्हति ।

यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ।
पीतं न गमयेत्स्वर्गं किं तत्क्रतुगतं नयेदिति ॥

प्रमत्तगीत एष तत्रभवतो यस्त्वप्रमत्तगीतस्तत्प्रमाणम् ॥ यस्तु प्रयुङ्क्ते ॥

अविद्वांसः ।

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ॥ अविद्वांसः ॥

विभक्तिं कुर्वन्ति । याज्ञिकाः पठन्ति । प्रयाजाः सविभक्तिकाः कार्या इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् ॥ विभक्तिं कुर्वन्ति ॥

यो वा इमाम् । यो वा इमां पदशः स्वरशो ऽक्षरशो वाचं विदधाति स आर्त्विजीनः । आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् ॥ यो वा इमाम् ॥

चत्वारि ।

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेशेति ॥

चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादास्त्रयः काला भूतभविष्यद्वर्तमानाः । द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्त हस्तासो अस्य सप्त विभक्तयः । त्रिधा बद्धस्त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । कुत एतत् । रौतिः शब्दकर्मा । महो देवो मर्त्याँ आविवेशेति । महान्देवः शब्दः । मर्त्या मरणधर्माणो मनुष्याः । तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ॥

अपर आह ।

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । तानि विदुर्ब्राह्मणा ये मनीषिणः । मनस ईषिणो मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति । गुहायां त्रीणि निहितानि नेङ्गयन्ति । न चेष्टन्ते । न निमिषन्तीत्यर्थः । तुरीयं वाचो मनुष्या वदन्ति । तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते । चतुर्थमित्यर्थः ॥ चत्वारि ॥

उत त्वः ।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥

अपि खल्वेकः पश्यन्नपि न पश्यति वाचम् । अपि खल्वेकः शृण्वन्नपि न शृणोत्येनाम् । अविद्वांसमाहार्धम् । उतो त्वस्मै तन्वं विसस्रे । तनुं विवृणुते । जायेव पत्य उशती सुवासाः । तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुत एवं वाग्वाग्विदे स्वात्मानं विवृणुते । वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ॥ उत त्वः ॥

सक्तुमिव ।

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥

सक्तुः सचतेर्दुर्धावो भवति । कसतेर्वा विपरीताद्विकसितो भवति । तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा । धीरा ध्यानवन्तो मनसा प्रज्ञानेन वाचमक्रत वाचमकृषत । अत्रा सखायः सख्यानि जानते । अत्र सखायः सन्तः सख्यानि जानते । सायुज्यानि जानते । क्व । य एष दुर्गो मार्ग एकगम्यो वाग्विषयः । के पुनस्ते । वैयाकरणाः । कुत एतत् । भद्रैषां लक्ष्मीर्निहिताधि वाचि । एषां वाचि भद्रा लक्ष्मीर्निहिता भवति । लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति ॥ सक्तुमिव ॥

सारस्वतीम् । याज्ञिकाः पठन्ति । आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् ॥ सारस्वतीम् ॥

दशम्यां पुत्रस्य । याज्ञिकाः पठन्ति । दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति । न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम् ॥ दशम्यां पुत्रस्य ॥

सुदेवो असि ।

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥

सुदेवो असि वरुण सत्यदेवोऽसि यस्य ते सप्त सिन्धवः सप्त विभक्तयो

ऽनुक्षरन्ति काकुदम् । काकुदं तालु । काकुर्जिह्वा सास्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहत्येवं तव सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति । तेनासि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् ॥ सुदेवो असि ॥

किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित् । ओमित्युक्त्वा वृत्तान्तशः शमित्येवमादीञ्छब्दान्पठन्ति । पुराकल्प एतदासीत् । संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । तेभ्यस्तत्र स्थानकरणानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति । वेदान्नो वैदिकाः सिद्धा लोकाच्च लौकिकाः । अनर्थकं व्याकरणमिति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्रमन्वाचष्टे । इमानि प्रयोजनान्यध्येयं व्याकरणमिति ॥

उक्तः शब्दः । स्वरूपमप्युक्तम् । प्रयोजनान्यप्युक्तानि । शब्दानुशासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् । किं शब्दोपदेशः कर्तव्य आहोस्विदपशब्दोपदेश आहोस्विदुभयोपदेश इति । अन्यतरोपदेशेन कृतं स्यात् । तद्यथा । भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते । पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति । अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । तद्यथा । अभक्ष्यो ग्राम्यकुक्कुटोऽभक्ष्यो ग्राम्यशूकर इत्युक्ते गम्यत एतदारण्यो भक्ष्य इति । एवमिहापि यदि तावच्छब्दोपदेशः क्रियते गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद्गाव्यादयोऽपशब्दा इति । अथापशब्दोपदेशः क्रियते गाव्यादिषूपदिष्टेषु गम्यत एतद्गौरित्येष शब्द इति ॥ किं पुनरत्र ज्यायः । लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशो गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा । गौरित्यस्य शब्दस्य गावीगोणीगोतागोपोतलिकादयोऽपभ्रंशाः । इष्टान्वाख्यानं खल्वपि भवति ॥

अथैतस्मिञ्छब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः । गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः । नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते । बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम । बृहस्पतिश्च प्रवक्तेन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम । किं पुनरद्यत्वे यः सर्वथा चिरं जीवति स वर्षशतं जीवति चतुर्भिश्च प्रकारैर्विद्योपयुक्ता

भवत्यागमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति । तत्र चागमकालेनैवायुः पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ॥ कथं तर्हीमे शब्दाः प्रतिपत्तव्याः । किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यं येनाल्पेन यत्नेन महतो महतः शब्दौघान्प्रतिपद्येरन् । किं पुनस्तत् । उत्सर्गापवादौ । कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः । कथंजातीयकः पुनरुत्सर्गः कर्तव्यः कथंजातीयकोऽपवादः । सामान्येनोत्सर्गः कर्तव्यः । तद्यथा । कर्मण्यण् [३.२.१] । तस्य विशेषेणापवादः । तद्यथा । आतोऽनुपसर्गे कः [३.२.३] ॥

किं पुनराकृतिः पदार्थ आहोस्विद्द्रव्यम् । उभयमित्याह । कथं ज्ञायते । उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् [१. २. ५८] इत्युच्यते । द्रव्यं पदार्थं मत्वा सरूपाणाम् [१. २. ६४] इत्येकशेष आरभ्यते ॥

किं पुनर्नित्यः शब्द आहोस्वित्कार्यः । संग्रह एतत्प्राधान्येन परीक्षितं नित्यो वा स्यात्कार्यो वेति । तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि । तत्र त्वेष निर्णयो यद्येव नित्योऽथापि कार्य उभयथापि लक्षणं प्रवर्त्यमिति ॥ कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् ।

सिद्धे शब्दार्थसंबन्धे

सिद्धे शब्देऽर्थे संबन्धे चेति । अथ सिद्धशब्दस्य कः पदार्थः । नित्यपर्यायवाची सिद्धशब्दः । कथं ज्ञायते । यत्कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा । सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति । ननु च भोः कार्येष्वपि वर्तते । तद्यथा । सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति । यावता कार्येष्वपि वर्तते तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणं न पुनः कार्ये यः सिद्धशब्द इति । संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव ॥ अथवा सन्त्येकपदान्यप्यवधारणानि । तद्यथाब्भक्षो वायुभक्ष इत्यप एव भक्षयति वायुमेव भक्षयतीति गम्यत एवमिहापि सिद्ध एव न साध्य इति ॥ अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः । अत्यन्तसिद्धः सिद्ध इति । तद्यथा । देवदत्तो दत्तः सत्यभामा भामेति ॥ अथवा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः ॥ किं पुनरनेन वर्ण्येन किं न महता कण्ठेन नित्यशब्द एवोपात्तो यस्मिन्नुपादीयमानेऽसंदेहः स्यात् । मङ्गलार्थम् । माङ्गलिक आचार्यो

महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति । अयं खल्वपि नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते । किं तर्हि । आभीक्ष्ण्ये ऽपि वर्तते । तद्यथा । नित्यप्रहसितो नित्यप्रजल्पित इति । यावताभीक्ष्ण्ये ऽपि वर्तते तत्राप्यनेनैवार्थः स्याद्व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति । पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति । अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः ॥ अथ कं पुनः पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्दे ऽर्थे संबन्धे चेति । आकृतिमित्याह । कुत एतत् । आकृतिर्हि नित्या द्रव्यमनित्यम् ॥ अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः । सिद्धे शब्दे ऽर्थसंबन्धे चेति । नित्यो ह्यर्थवतामर्थैरभिसंबन्धः ॥ अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्दे ऽर्थे संबन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या । कथं ज्ञायते । एवं हि दृश्यते लोके । मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति । पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते । घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते । तथा सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति । पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते । रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते । कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव । आकृत्युपमर्देन द्रव्यमेवावशिष्यते ॥ आकृतावपि पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्दे ऽर्थे संबन्धे चेति । ननु चोक्तमाकृतिरनित्येति । नैतदस्ति । नित्याकृतिः । कथम् । न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति द्रव्यान्तरस्था तूपलभ्यते ॥ अथवा नेदमेव नित्यलक्षणं ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति । तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते । किं पुनस्तत्त्वम् । तद्भावस्तत्त्वम् । आकृतावपि तत्त्वं न विहन्यते ॥ अथवा किं न एतेनेदं नित्यमिदमनित्यमिति । यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्दे ऽर्थे संबन्धे चेति ॥

कथं पुनर्ज्ञायते सिद्धः शब्दो ऽर्थः संबन्धश्चेति । लोकतः । यल्लोके ऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते नैषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा । घटेन कार्यं करिष्यन्कुम्भकारकुलं गत्वाह कुरु घटं कार्यमनेन करिष्यामीति । न तद्वच्छब्दान्प्रयोक्ष्यमाणो वैयाकरणकुलं गत्वाह

कुरु शब्दान्प्रयोक्ष्य इति । तावत्येवार्थमर्थमुपादाय शब्दान्प्रयुञ्जते ॥ यदि तर्हि लोक एषु प्रमाणं किं शास्त्रेण क्रियते ।

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते । किमिदं धर्मनियम इति । धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः ।

यथा लौकिकवैदिकेषु ॥ १ ॥

प्रियतद्धिता दाक्षिणात्या यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते । अथवा युक्त एव तद्धितार्थः । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ॥ लोके तावदभक्ष्यो ग्राम्यकुक्कुटोऽभक्ष्यो ग्राम्यशूकर इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । तत्र नियमः क्रियत इदं भक्ष्यमिदमभक्ष्यमिति । तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियत इयं गम्येयमगम्येति ॥ वेदे खल्वपि पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्य इत्युच्यते । व्रतं च नामाभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते । तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते । यूपश्च नाम पश्वनुबन्धार्थमुपादीयते । शक्यं चानेन किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्द्धुम् । तत्र नियमः क्रियते । तथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वमिति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति । तत्र नियमः क्रियत एवं क्रियमाणमभ्युदयकारि भवतीति ॥ एवमिहापि समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेत्येवं क्रियमाणमभ्युदयकारि भवतीति ॥

अस्त्यप्रयुक्तः । सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा । ऊष तेर चक्र पेचेति । किमतो यत्सन्त्यप्रयुक्ताः । प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति य इदानीमप्रयुक्ता नामी साधवः स्युः ॥ इदं विप्रतिषिद्धं यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति । यदि सन्ति नाप्रयुक्ता अथाप्रयुक्ता न सन्ति सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह सन्ति शब्दा अप्रयुक्ता इति । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ॥ नैतद्वि-

निर्दिष्टम्। सन्तीति तावद्ब्रूमो यदेताञ्छास्त्रविदः शास्त्रेणानुविदधते। अप्रयुक्ता इति ब्रूमो यल्लोकेऽप्रयुक्ता इति। यदप्युच्यते कथेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति न ब्रूमोऽस्माभिरप्रयुक्ता इति। किं तर्हि। लोकेऽप्रयुक्ता इति। ननु च भवानप्यभ्यन्तरो लोके। अभ्यन्तरोऽहं लोके न त्वहं लोकः॥

अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ॥ २ ॥

अस्त्यप्रयुक्त इति चेत्तन्न। किं कारणम्। अर्थे शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते॥

अप्रयोगः प्रयोगान्यत्वात् ॥ ३ ॥

अप्रयोगः खल्वेषां शब्दानां न्याय्यः। कुतः। प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा। ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः। तेरेत्यस्यार्थे किं यूयं तीर्णाः। चक्रेत्यस्यार्थे किं यूयं कृतवन्तः। पेचेत्यस्यार्थे किं यूयं पक्ववन्त इति॥

अप्रयुक्ते दीर्घसत्त्रवत् ॥ ४ ॥

यद्यप्यप्रयुक्ता अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः। तद्यथा। दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च न चाद्यत्वे कश्चिदपि व्यवहरति केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते॥

सर्वे देशान्तरे ॥ ५ ॥

सर्वे खल्वप्येते शब्दा देशान्तरे प्रयुज्यन्ते। न चैत उपलभ्यन्ते। उपलब्धौ यत्नः क्रियताम्। महान्हि शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा विभिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदो वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य सन्त्यप्रयुक्ता इति वचनं केवलं साहसमात्रम्॥ एतस्मिन्नतिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद्यथा। शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु दात्रमुदी-

कुरु शब्दान्प्रयोक्ष्य इति । तावत्येवार्थमर्थमुपादाय शब्दान्प्रयुञ्जते ॥ यदि तर्हि लोक एषु प्रमाणं किं शास्त्रेण क्रियते ।

लोकतो ऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो

लोकतो ऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते । किमिद धर्मनियम इति । धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः ।

यथा लौकिकवैदिकेषु ॥ १ ॥

प्रियतद्धिता दाक्षिणात्या यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते । अथवा युक्त एव तद्धितार्थः । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ॥ लोके तावदभक्ष्यो ग्राम्यकुक्कुटो ऽभक्ष्यो ग्राम्यशूकर इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते । शक्य चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । तत्र नियमः क्रियत इद भक्ष्यमिदमभक्ष्यमिति । तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियत इयं गम्येयमगम्येति ॥ वेदे खल्वपि पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्य इत्युच्यते । व्रत च नामाभ्यवहारार्थमुपादीयते । शक्य चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते । तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते । यूपश्च नाम पश्वनुबन्धार्थमुपादीयते । शक्य चानेन किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्द्धुम् । तत्र नियमः क्रियते । तथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वमिति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सतापयति । तत्र नियमः क्रियत एव क्रियमाणमभ्युदयकारि भवतीति ॥ एवमिहापि समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थो ऽभिधेयो नापशब्देनेत्येवं क्रियमाणमभ्युदयकारि भवतीति ॥

अस्त्यप्रयुक्तः । सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा । ऊष तेर चक्र पेचेति । किमतो यत्सन्त्यप्रयुक्ताः । प्रयोगाद्धि भवाञ्शब्दानां साधुत्वमध्यवस्यति य इदानीमप्रयुक्ता नामी साधवः स्युः ॥ इद विप्रतिषिद्ध यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति । यदि सन्ति नाप्रयुक्ता अथाप्रयुक्ता न सन्ति सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह सन्ति शब्दा अप्रयुक्ता इति । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ॥ नैतद्विप्र-

तिविद्म् । सन्तीति तावद्ब्रूमो यदेताञ्छास्त्रविदः शास्त्रेणानुविदधते । अप्रयुक्ता *इति ब्रूमो यल्लोके ऽप्रयुक्ता इति । यदप्युच्यते कश्चेदानीमन्यो भवज्जातीयकः* पुरुषः शब्दानां प्रयोगे साधुः स्यादिति न ब्रूमो ऽस्माभिरप्रयुक्ता इति । किं तर्हि । लोके ऽप्रयुक्ता इति । ननु च भवानप्यभ्यन्तरो लोके । अभ्यन्तरो ऽहं लोके न त्वहं लोकः ॥

अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ॥ २ ॥

अस्त्यप्रयुक्त इति चेत्तन्न । किं कारणम् । अर्थे शब्दप्रयोगात् । अर्थे शब्दाः प्रयुज्यन्ते सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते ॥

अप्रयोगः प्रयोगान्यत्वात् ॥ ३ ॥

अप्रयोगः खल्वेषां शब्दानां न्याय्यः । कुतः । प्रयोगान्यत्वात् । यदेतेषां शब्दानामर्थे ऽन्याञ्छब्दान्प्रयुञ्जते । तद्यथा । ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः । तेरेत्यस्यार्थे किं यूयं तीर्णाः । चक्रेत्यस्यार्थे किं यूयं कृतवन्तः । पेचेत्यस्यार्थे किं यूयं पक्ववन्त इति ॥

अप्रयुक्ते दीर्घसत्त्रवत् ॥ ४ ॥

यद्यप्यप्रयुक्ता अवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः । तद्यथा । दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च न चाद्यत्वे कश्चिदपि व्यवहरति केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ॥

सर्वे देशान्तरे ॥ ५ ॥

सर्वे खल्वप्येते शब्दा देशान्तरे प्रयुज्यन्ते । न चैत उपलभ्यन्ते । उपलब्धौ यत्नः क्रियताम् । महान्हि शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा विभिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदो वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः । एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य सन्त्यप्रयुक्ता इति वचनं केवलं साहसमात्रम् ॥ एतस्मिन्नतिमहति शब्दस्य प्रयोगविषये ते ते *शब्दास्तत्र तत्र नियतविषया दृश्यन्ते* । तद्यथा । शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति विकार एनमार्या भाषन्ते शव इति । हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु दात्रमुदी-

च्येषु ॥ ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते । क्व । वेदे । यद्वो रेवती रेवत्यं तदूष । यन्मे नरः श्रुत्य ब्रह्म चक्र । यत्रा नश्चक्रा जरसं तनूनामिति ॥

किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित्प्रयोगे । कश्चात्र विशेषः ।

ज्ञाने धर्म इति चेत्तथाधर्मः ॥ ६ ॥

ज्ञाने धर्म इति चेत्तथाधर्मः प्राप्नोति । यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः । अथवा भूयानधर्मः प्राप्नोति । भूयांसोऽपशब्दा अल्पीयांसः शब्दाः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा । गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः ॥

आचारे नियमः ॥ ७ ॥

आचारे पुनर्ऋषिर्नियमं वेदयते । तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुरिति ॥ अस्तु तर्हि प्रयोगे ।

प्रयोगे सर्वलोकस्य ॥ ८ ॥

यदि प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्येत । कश्चेदानीं भवतो मत्सरो यदि सर्वो लोकोऽभ्युदयेन युज्येत । न खलु कश्चिन्मत्सरः प्रयत्नानर्थक्यं तु भवति । फलवता च नाम यत्नेन भवितव्यं न च प्रयत्नः फलाद्व्यतिरेच्यः । ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते त एव साधीयोऽभ्युदयेन योक्ष्यन्ते । व्यतिरेकोऽपि वै लक्ष्यते । दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणा अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ॥ एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव । किं तर्हि ।

शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥ ९ ॥

शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । तत्तुल्यं वेदशब्देन । वेदशब्दा अप्येवमभिवदन्ति । योऽग्निष्टोमेन यजते य उ चैनमेवं वेद । योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद ॥ अपर आह । तत्तुल्यं वेदशब्देनेति । यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ॥ अथवा पुनरस्तु ज्ञान एव धर्म इति । ननु चोक्तं ज्ञाने धर्म इति

नेत्तथाधर्म इति । नैष दोषः । शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञाने ऽधर्मम् । यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति नाभ्युदयाय । तद्यथा । हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति नाप्यभ्युदयाय ॥ अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने । यो ऽपशब्दाञ्जानाति शब्दानप्यसौ जानाति । तदेवं ज्ञाने धर्म इति ब्रुवतो ऽर्थादापन्नं भवत्यपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति ॥ अथवा कूपखानकवदेतद्भविष्यति । तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सो ऽप्सु सजातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवत्येवमिहापि यद्यप्यपशब्दज्ञाने ऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति ॥ यदप्युच्यत आचारे नियम इति याज्ञे कर्मणि स नियमः । एवं हि श्रूयते । यर्वाणस्तर्वाणो नामर्षयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः । ते तत्रभवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे पुनः कर्मणि नापभाषन्ते । तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः ॥

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः । सूत्रम् ।

सूत्रे व्याकरणे षष्ठ्यर्थो ऽनुपपन्नः ॥ १० ॥

सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते व्याकरणस्य सूत्रमिति । किं हि तदन्यत्सूत्राद्व्याकरणं यस्यादः सूत्रं स्यात् ॥

शब्दाप्रतिपत्तिः ॥ ११ ॥

शब्दानां चाप्रतिपत्तिः प्राप्नोति व्याकरणाच्छब्दान्प्रतिपद्यामह इति । न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते । किं तर्हि । व्याख्यानतश्च । ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति । न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति । किं तर्हि । उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति ॥ एवं तर्हि शब्दः ।

शब्दे ल्युडर्थः ॥ १२ ॥

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते । व्याक्रियते ऽनेनेति व्याकरणम् । न हि शब्देन किंचिद्व्याक्रियते । केन तर्हि । सूत्रेण ॥

भवे

भवे च तद्धितो नोपपद्यते* । व्याकरणे भवो योगो वैयाकरण इति । न हि शब्दे भवो योगः । क्व तर्हि । सूत्रे ॥

प्रोक्तादयश्च तद्धिताः ॥ १३ ॥

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते† । पाणिनिना प्रोक्तं पाणिनीयम् । आपिशलम् । काशकृत्स्नमिति । न हि पाणिनिना शब्दाः प्रोक्ताः । किं तर्हि । सूत्रम् ॥ किमर्थमिदमुभयमुच्यते भवे प्रोक्तादयश्च तद्धिता इति न प्रोक्तादयश्च तद्धिता इत्येव भवे ऽपि तद्धितश्चोदितः स्यात् । पुरस्तादिदमाचार्येण दृष्टं भवे तद्धित इति तत्पठितम् । तत उत्तरकालमिदं दृष्टं प्रोक्तादयश्च तद्धिता इति तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥ अयं तावददोषो यदुच्यते शब्दे ल्युडर्थ इति । नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते । किं तर्हि । अन्येष्वपि कारकेषु कृत्यल्युटो बहुलम् [३.३.११३] इति । तद्यथा । प्रस्कन्दनम् प्रपतनमिति ॥ अथवा शब्दैरपि शब्दा व्याक्रियन्ते । तद्यथा । गौरित्युक्ते सर्वे संदेहा निवर्तन्ते नाश्वो न गर्दभ इति ॥ अयं तर्हि दोषो भवे प्रोक्तादयश्च तद्धिता इति । एवं तर्हि

लक्ष्यलक्षणे व्याकरणम् ॥ १४ ॥

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति । किं पुनर्लक्ष्यं लक्षणं च । शब्दो लक्ष्यः सूत्रं लक्षणम् । एवमप्ययं समुदाये व्याकरणशब्दः प्रवृत्तो ऽवयवे नोपपद्यते । सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति । नैष दोषः । समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते । तद्यथा । पूर्वे पञ्चालाः । उत्तरे पञ्चालाः । तैलं भुक्तम् । घृतं भुक्तम् । शुक्लः नीलः कृष्ण इति । एवमयं समुदाये व्याकरणशब्दः प्रवृत्तो ऽवयवे ऽपि वर्तते ॥ अथवा पुनरस्तु सूत्रम् । ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थो ऽनुपपन्न इति । नैष दोषः । व्यपदेशिवद्भावेन भविष्यति ॥ यदप्युच्यते शब्दाप्रतिपत्तिरिति न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते किं तर्हि व्याख्यानतश्चेति परिहृतमेतत्तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति । ननु चोक्तं न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवतीति । अविजानत एतदेव भवति । सूत्रत एव हि शब्दान्प्रतिपद्यन्ते । आतश्च सूत्रत एव यो ह्युत्सूत्रं कथयेन्नादो गृह्येत ॥

---

* ४.३.५३ † ४.३.१०१

अथ किमर्थो वर्णानामुपदेशः ।

वृत्तिसमवायार्थ उपदेशः ॥ १५ ॥

वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्यः ॥ किमिदं वृत्तिसमवायार्थ इति । वृत्तये समवायो वृत्तिसमवायः । वृत्त्यर्थो वा समवायो वृत्तिसमवायः । वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः । का पुनर्वृत्तिः । शास्त्रप्रवृत्तिः । अथ कः समवायः । वर्णानामानुपूर्व्येण संनिवेशः । अथ क उपदेशः । उच्चारणम् । कुत एतत् । दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाहोपदिष्टा इमे वर्णा इति ॥

अनुबन्धकरणार्थश्च ॥ १६ ॥

अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्तव्यः । अनुबन्धानासङ्क्ष्यामीति । न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम् ॥ स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः ॥

इष्टबुद्ध्यर्थश्च । इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः । इष्टान्वर्णान्भोत्स्य इति । न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम् ।

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ॥ १७ ॥

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः । एवंगुणा अपि हि वर्णा इष्यन्ते ॥

आकृत्युपदेशात्सिद्धम् । आकृत्युपदेशात्सिद्धमेतत् । अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ।

आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः ॥ १८ ॥

आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधो वक्तव्यः । के पुनः संवृतादयः । संवृतः कलो ध्मात एणीकृतो ऽम्बूकृतो ऽर्धको ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश इति ॥ अपर आह ।

ग्रस्तं निरस्तमविलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम् ।
संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावना इति ॥

अतो ऽन्ये व्यञ्जनदोषाः ॥ नैष दोषः । गर्गादिबिदादिपाठात्संवृतादीनां निवृ-

त्तिर्भविष्यति । अस्त्यन्यद्वर्गादिविदादिपाठे प्रयोजनम् । किम् । समुदायानां साधुत्वं यथा स्यादिति ॥ एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि । सा तर्हि वक्तव्या ।

लिङ्गार्था तु प्रत्यापत्तिः ।

लिङ्गार्था सा तर्हि भविष्यति । तत्तर्हि वक्तव्यम् । यद्यप्येतदुच्यतेऽथवैतर्ह्यनेकमनुबन्धशतं नोच्चार्यमित्संज्ञा च न वक्तव्या लोपश्च न वक्तव्यः । यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते । सिध्यत्येवमपाणिनीयं तु भवति ॥ यथान्यासमेवास्तु । ननु चोक्तमाकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध इति । परिहृतमेतद्वर्गादिविदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति । ननु चान्यद्वर्गादिविदादिपाठे प्रयोजनमुक्तम् । किम् । समुदायानां साधुत्वं यथा स्यादिति । एवं तर्ह्युभयमनेन क्रियते पाठश्चैव विशेष्यते कलादयश्च निवर्त्यन्ते । कथं पुनरेकेन यत्नेनोभयं लभ्यम् । लभ्यमित्याह । कथम् । द्विगता अपि हेतवो भवन्ति । तद्यथा ।

आम्राश्च सिक्ताः पितरश्च प्रीणिता इति ।

तथा वाक्यान्यपि द्विष्ठानि भवन्ति । श्वेतो धावति । अलम्बुसानां यातेति ॥ अथवेदं तावदयं प्रष्टव्यः । क्वेमे संवृतादयः श्रूयेरन्निति । आगमेषु । आगमाः शुद्धाः पठ्यन्ते । विकारेषु तर्हि । विकाराः शुद्धाः पठ्यन्ते । प्रत्ययेषु तर्हि । प्रत्ययाः शुद्धाः पठ्यन्ते । धातुषु तर्हि । धातवोऽपि शुद्धाः पठ्यन्ते । प्रातिपदिकेषु तर्हि । प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते । यानि तर्ह्यग्रहणानि प्रातिपदिकानि । एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः । शशः । षष इति मा भूत् । पलाशः । पलाष इति मा भूत् । मञ्चकः । मञ्जक इति मा भूत् ॥

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः ।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

अ इ उण् ॥ १ ॥

अकारस्य विवृतोपदेश आकारग्रहणार्थः ॥ १ ॥

अकारस्य विवृतोपदेशः कर्तव्यः । किं प्रयोजनम् । आकारग्रहणार्थः । अकारः सवर्णग्रहणेनाकारमपि यथा गृह्णीयात् । किं च कारणं न गृह्णीयात् । विवारभेदात् । किमुच्यते विवारभेदादिति न पुनः कालभेदादपि । यथैव ह्ययं विवारभिन्न एवं कालभिन्नो ऽपि । सत्यमेतत् । वक्ष्यति तुल्यास्यप्रयत्नं सवर्णम् [१. १. ९] इत्यत्रास्यग्रहणस्य प्रयोजनमास्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसञ्ज्ञका भवन्तीति । बाह्यश्च पुनरास्यात्कालः । तेन स्यादेव कालभिन्नस्य ग्रहणं न पुनर्विवारभिन्नस्य ॥ किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत आहोस्वित्संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते । विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते । कथं ज्ञायते । यदयम् अ अ [८. ४. ६८] इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति संवृतः स्यादित्येवमर्था प्रत्यापत्तिः । नैतदस्ति । नैव लोके न च वेदे ऽकारो विवृतो ऽस्ति । कस्तर्हि । संवृतः । यो ऽस्ति स भविष्यति । तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति ॥ कः पुनरत्र विशेषो विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येतेति । न खलु कश्चिद्विशेषः । आतोपुरुषिकामात्रं तु भवानाह संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यत इति । वयं तु ब्रूमो विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति ॥

तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः ॥ २ ॥

तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्तव्यः । क्वान्यत्र । धातुप्रातिपदिकप्रत्ययनिपातस्थस्य । किं प्रयोजनम् । सवर्णग्रहणार्थः । आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात् । किं च कारणं न स्यात् । विवारभेदादेव ॥ आचार्यप्रवृत्तिर्ज्ञापयति भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति यदयमकः सवर्णे दीर्घः [६. १. १०१] इति प्रत्याहारे ऽको ग्रहणं करोति । कथं कृत्वा ज्ञापकम् । न हि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । यस्याक्षरसमा-

ज्ञायिकेन ग्रहणमस्ति तदर्थमेतत्स्यात् । खट्वाढकम् मालाढकमिति । सति प्रयोजने न ज्ञापकं भवति । तस्माद्विवृतोपदेशः कर्तव्यः ॥ क एष यत्नश्चोद्यते विवृतोपदेशो नाम । विवृतो वोपदिश्येत संवृतो वा को न्वत्र विशेषः । स एष सर्व एवमर्थो यत्नो यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते । तद्गुरु भवति । तस्माद्वक्तव्यं धात्वादिस्थश्च विवृत इति ॥

दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः ॥ ३ ॥

दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः । दीर्घप्लुतौ संवृतौ मा भूतामिति । वृक्षाभ्याम्[*] देवदत्ता३[†] इति ॥ नैव लोके न च वेदे दीर्घप्लुतौ सवृतौ स्तः । कौ तर्हि । विवृतौ । यौ स्तस्तौ भविष्यतः ॥

स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम् ।

सवृतः स्थानी सवृतौ दीर्घप्लुतौ प्रकल्पयेत् । अनुस्वारो यथा यणम् । तद्यथा । सय्ँयन्ता सव्ँवत्सरः यल्ँलोकम् तल्ँलोकमिति । अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति[‡] ॥ विषम उपन्यासः । युक्तं यत्सतस्तत्र प्रक्लृप्तिर्भवति सन्ति हि यणः सानुनासिका निरनुनासिकाश्च । दीर्घप्लुतौ पुनर्नैव लोके न च वेदे सवृतौ स्तः । कौ तर्हि । विवृतौ । यौ स्तस्तौ भविष्यतः ॥ एवमपि कुत एतत्तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतो न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्यातामीकार ऊकारो वेति । वक्ष्यति स्थानेऽन्तरतमः [१.१.५०] इत्यत्र स्थान इति वर्तमाने पुनः स्थानग्रहणस्य प्रयोजनं यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् ॥

तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् ॥ ४ ॥

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति । अस्य च्वौ [७.४.३२] यस्येति च [६.४.१४८] । किं कारणम् । अनण्त्वात् । न ह्येतेऽणो येऽनुवृत्तौ । के तर्हि । येऽक्षरसमाम्नाय उपदिश्यन्ते ॥

एकत्वादकारस्य सिद्धम् ॥ ५ ॥

एको ऽयमकारो यश्चाक्षरसमाम्नाये यश्चानुवृत्तौ यश्च धात्वादिस्थः ॥

अनुबन्धसंकरस्तु ॥ ६ ॥

अनुबन्धसंकरस्तु प्राप्नोति । कर्मण्यण् [३.२.१] आतोऽनुपसर्गे कः [३.२.३] इति केऽपि णित्कृतं प्राप्नोति ॥

---

* ७.१.१० † ८.२.८२ ‡ ८.४.५०

एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ॥ ७ ॥

एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भविष्यति । तत्र को दोषः । किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति* । इह न घटेन तरति घटिक इति व्यज्लक्षणष्ठन प्राप्नोति† ॥

द्रव्यवच्चोपचाराः ॥ ८ ॥

द्रव्यवच्चोपचाराः प्राप्नुवन्ति । तद्यथा । द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति । एवमिममकारं नानेको युगपदुच्चारयेत् ॥

विपर्ययेण तु नानालिङ्गकरणात्सिद्धम् ॥ ९ ॥

यदयं विषये विषये नानालिङ्गमकारं करोति कर्मण्यण् आतोऽनुपसर्गे क इति तेन ज्ञायते नानुबन्धसंकरोऽस्तीति । यदि हि स्यान्नानालिङ्गकरणमनर्थकं स्यात् । एकमेवायं सर्वगुणमुच्चारयेत् ॥ नैतदस्ति ज्ञापकम् । इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात् । न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम् । इत्संज्ञायां हि दोषः स्यात् । आद्यस्य हि द्वयोरित्संज्ञा स्यात् । कयोः । आद्यन्तयोः ॥ एवं तर्हि विपर्ययेण तु पुंर्लिङ्गकरणात्सिद्धम् । यदयं विषये विषये पुंर्लिङ्गमकारं करोति प्राग्दीव्यतोऽण् [४. १. ८३] शिवादिभ्योऽण् [११२] इति तेन ज्ञायते नानुबन्धसंकरोऽस्तीति । यदि हि स्यात्पुंर्लिङ्गकरणमनर्थकं स्यात् ॥ अथवा पुनरस्तु विपर्ययेण तु नानालिङ्गकरणात्सिद्धमित्येव । ननु चोक्तमित्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यादिति । नैष दोषः । लोकत एतत्सिद्धम् । तद्यथा । लोके कश्चिद्देवदत्तमाह । इह मुण्डो भव । इह जटी भव । इह शिखी भवेति । यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते । एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते ॥ यदप्युच्यत एकाजनेकाज्ग्रहणेषु चानुपपत्तिरिति ।

एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् ॥ १० ॥

एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाच्त्वं भविष्यति । तद्यथा । सप्तदश सामिधेन्यो भवन्तीति त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यावृत्तितः सप्तदशत्वं भवति । एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति । भवेदावृत्तितः कार्यं परिहृतम् । इह तु खलु किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव । एतदपि सिद्धम् । कथम् । लोकतः । तद्यथा । लोक ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो

* ६ १ १६८ † ४ ४ ७

दत्त्वा तया सर्वे ते सहस्रदक्षिणाः संपन्नाः । एवमिहाप्यनेकाच्त्वं भविष्यति ॥ यदप्युच्यते द्रव्यवच्चोपचाराः प्राप्नुवन्तीति भवेद्यदसंभवि कार्यं तन्नानेको युगपत्कुर्याद्यत्तु खलु संभवि कार्यमनेको ऽपि तद्युगपत्करोति । तद्यथा । घटस्य दर्शनं स्पर्शनं वा । संभवि चेदं कार्यमकारस्योच्चारणं नामानेको ऽपि तद्युगपत्करिष्यति ॥

आन्यभाव्यं तु कालशब्दव्यवायात् ॥ ११ ॥

आन्यभाव्य त्वकारस्य । कुतः । कालशब्दव्यवायात् । कालव्यवायाच्छब्दव्यवायाच्च । कालव्यवायात् । दण्ड अग्रम् । शब्दव्यवायात् । दण्डः । न चैकस्यात्मनो व्यवायेन भवितव्यम् । भवति चेद्भवत्यान्यभाव्यमकारस्य ॥

युगपच्च देशपृथक्त्वदर्शनात् ॥ १२ ॥

युगपच्च देशपृथक्त्वदर्शनान्मन्यामह आन्यभाव्यमकारस्येति । यदयं युगपद्देशपृथक्त्वेपूपलभ्यते । अश्वः अर्कः अर्थ इति । न ह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मथुरायां च ॥ यदि पुनरिमे वर्णाः शकुनिवत्स्युः । तद्यथा । शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते । एवमयमकारो द इत्यत्र दृष्टो ण्ड इत्यत्र दृश्यते । नैव शक्यम् । अनित्यत्वमेव स्यात् । नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । यदि चायं द इत्यत्र दृष्टो ण्ड इत्यत्र दृश्येत नायं कूटस्थः स्यात् ॥ यदि पुनरिमे वर्णा आदित्यवत्स्युः । तद्यथा । एक आदित्यो ऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेपूपलभ्यते । विषम उपन्यासः । नैको द्रष्टादित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेपूपलभते ऽकार पुनरुपलभते । अकारमपि नोपलभते । किं कारणम् । श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द एकं च पुनराकाशम् । आकाशदेशा अपि बहवः । यावता बहवस्तस्मादान्यभाव्यमकारस्य ॥

आकृतिग्रहणात्सिद्धम् ॥ १३ ॥

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ॥

तद्वच्च तपरकरणम् ॥ १४ ॥

सवर्णं च कृत्वा तपराः क्रियन्ते । आकृतिग्रहणेनातिप्रसक्तमिति । ननु च सवर्णग्रहणेनातिप्रसक्तमिति कृत्वा तपराः क्रियेरन् । प्रत्याख्यायते तत्सवर्णग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्चेति* ॥

---

* १.१.६९ *

हल्ग्रहणेषु च ॥ १५ ॥

किम् । आकृतिग्रहणात्सिद्धमित्येव । झलो झलि [८.२.२६] । अवात्ताम् अवात्तम् अवात्त । यत्रैतन्नास्त्यण्सवर्णान्गृह्णातीति ॥

रूपसामान्याद्वा ॥ १६ ॥

रूपसामान्याद्वा सिद्धमेतत् । तद्यथा । तानेव शाटकानाच्छादयामो ये मथुरायाम् । तानेव शालीन्भुञ्ज्महे ये मगधेषु । तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम् । अन्यस्मिंश्चान्यस्मिंश्च रूपसामान्यात्तदेवेदमिति भवति । एवमिहापि रूपसामान्यात्सिद्धम् ॥

ॠ ऌक् ॥ २ ॥

ऌकारस्योपदेशः किमर्थः । किं विशेषेण ऌकारोपदेशश्चोद्यते न पुनरन्येषामपि वर्णानामुपदेशश्चोद्येत । यदि किंचिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्त्यॢकारोपदेशस्यापि तद्भवितुमर्हति । को वा विशेषः । अयमस्ति विशेषः । अस्य ऌकारस्याल्पीयांश्चैव प्रयोगविषयो यश्चापि प्रयोगविषयः सो ऽपि कॢपिस्थस्य कॢपेश्च लत्वमसिद्धम्* । तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्ति नार्थ ऌकारोपदेशेन ॥ अत उत्तरं पठति ।

ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः ॥ १ ॥

ऌकारोपदेशः क्रियते यदृच्छाशब्दार्थो ऽशक्तिजानुकरणार्थः प्लुत्याद्यर्थश्च । यदृच्छाशब्दार्थस्तावत् । यदृच्छया कश्चिदॢतको नाम तस्मिन्नच्कार्याणि यथा स्युः । दध्ॢतकाय देहि । मध्ॢतकाय देहि । उदगॢतको ऽगमत् । प्रत्यगॢतको ऽगमत् । चतुष्टयी शब्दानां प्रवृत्तिः । जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्थाः ॥ अशक्तिजानुकरणार्थः । अशक्तया कयाचिद्ब्राह्मण्या ऋतक इति प्रयोक्तव्ये ऌतक इति प्रयुक्तम् । तस्यानुकरणं ब्राह्मण्यॢतक इत्याह कुमार्यॢतक इत्याहेति ॥ प्लुत्याद्यर्थश्च ऌकारोपदेशः कर्तव्यः । के पुनः प्लुत्यादयः । प्लुतिद्विर्वचनस्वरिताः । कॢ३प्तशिख† । कॢप्तः‡ । प्रकॢप्तः§ । प्लुत्यादिषु कार्येषु कॢपेर्लत्वं सिद्धं

* ८.२.१८ † ८.२.८६ ‡ ८.४.४० § ६.२.४९, ६.१.१९८, ८.४.६६.

तस्य सिद्धत्वादृकार्याणि न सिध्यन्ति । तस्मादॣकारोपदेशः क्रियते ॥ नैतानि सन्ति प्रयोजनानि ।

न्याय्यभावात्कल्पनं संज्ञादिषु ॥ २ ॥

न्याय्यस्य ऋतकशब्दस्य भावात्कल्पनं संज्ञादिषु साधु मन्यन्ते । ऋतक एवासौ न लृतक इति ॥ अपर आह । न्याय्य ऋतकशब्दः शास्त्रान्वितो ऽस्ति स कल्पयितव्यः साधुः संज्ञादिषु । ऋतक एवासौ न लृतकः ॥ अयं तर्हि यदृच्छाशब्दो ऽपरिहार्यः । लृफिडः लृफिड्डः । एषो ऽप्यृफिडः ऋफिड्डश्च । कथम् । अर्तिप्रवृत्तिश्चैव हि लोके लक्ष्यते फिडफिड्डावौणादिकौ प्रत्ययौ । त्रयी च शब्दानां प्रवृत्तिः । जातिशब्दा गुणशब्दाः क्रियाशब्दा इति । न सन्ति यदृच्छाशब्दाः ॥ अन्यथा कृत्वा प्रयोजनमुक्तमन्यथा कृत्वा परिहारः । सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तं न सन्तीति परिहारः । समाने चार्थे शास्त्रान्वितो ऽशास्त्रान्वितस्य निवर्तको भवति । तद्यथा । देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति न गाव्यादीन् । नैष दोषः । पक्षान्तरैरपि परिहारा भवन्ति ॥

अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ॥ ३ ॥

अनुकरणं हि शिष्टस्य साधु भवति । अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति नाभ्युदयाय । यथा लौकिकवैदिकेषु । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावत् । य एवमसौ ददाति य एवमसौ यजते य एवमसावधीत इति तस्यानुकुर्वन्दद्याच्च यजेत चाधीयीत च सो ऽप्यभ्युदयेन युज्यते । वेदे ऽपि । य एवं विश्वसृजः सत्राण्यध्यासत इति तेषामनुकुर्वंस्तद्वत्सत्राण्यध्यासीत सो ऽप्यभ्युदयेन युज्यते ॥ अशिष्टाप्रतिषिद्धम् । य एवमसौ हिक्कति य एवमसौ हसति य एवमसौ कण्डूयतीति तस्यानुकुर्वन्हिक्केच्च हसेच्च कण्डूयेच्च नैव तद्दोषाय स्यान्नाभ्युदयाय ॥ यस्तु खल्वेवमसौ ब्राह्मणं हन्त्येवमसौ सुरां पिबतीति तस्यानुकुर्वन्ब्राह्मणं हन्यात्सुरां वा पिबेत्सो ऽपि मन्ये पतितः स्यात् । विषम उपन्यासः । यश्चैवं हन्ति यश्चानुहन्त्युभौ तौ हतः । यश्च पिबति यश्चानुपिबत्युभौ तौ पिबतः । यस्तु खल्वेवमसौ ब्राह्मणं हन्त्येवमसौ सुरां वा पिबतीति तस्यानुकुर्वन्स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्पयो वा पिबेन्न स मन्ये पतितः स्यात् । एवमिहापि य एवमसावपशब्दं प्रयुङ्क्त इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत सो ऽप्यपशब्दभाक्स्यात् । अयं त्वन्यो ऽपशब्दपदार्थकः शब्दो यदर्थ उपदेशः कर्तव्यः । न चापशब्दपदार्थकः

शब्दो ऽपशब्दो भवति । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते ऽपशब्दपदार्थकः शब्दो ऽपशब्दो भवतीत्यपशब्द इत्येव तस्यापशब्दः स्यात् । न चैषो ऽपशब्दः ॥ अयं खल्वपि भूयो ऽनुकरणशब्दो ऽपरिहार्यो यदर्थ उपदेशः कर्तव्यः। साध्वृकारमधीते। मध्वृकारमधीत इति । क्वस्थस्य पुनरेतदनुकरणम् । क्लृपिस्थस्य । यदि क्लृपिस्थस्य क्लृपेश्च लत्वमसिद्धं तस्यासिद्धत्वादृकार एवाच्कार्याणि भविष्यन्ति। भवेत्तदर्थेन नार्थः स्यात् । अथ त्वन्यः क्लृपिस्थपदार्थकः शब्दो यदर्थ उपदेशः कर्तव्यः। न कर्तव्यः । इदमवश्यं वक्तव्यं प्रकृतिवदनुकरणं भवतीति । किं प्रयोजनम् । द्विः पचन्त्वित्याह । तिङतिङः [८. १. २८] इति निघातो यथा स्यात् । अग्नी इत्याह । ईदूदेद्द्विवचनं प्रगृह्यम् [१. १. ११] इति प्रगृह्यसंज्ञा यथा स्यात् । यदि प्रकृतिवदनुकरणं भवतीत्युच्यते ऽपशब्द एवासौ भवति कुमार्यृतक इत्याह ब्राह्मण्यृतक इत्याह । अपशब्दो ह्यस्य प्रकृतिः । न चापशब्दः प्रकृतिः । न ह्यपशब्दा उपदिश्यन्ते न चानुपदिष्टा प्रकृतिरस्ति ॥

एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः ॥ ४ ॥

एकदेशविकृतमनन्यवद्भवतीति प्लुत्यादयो ऽपि भविष्यन्ति । यद्येकदेशविकृतमनन्यवद्भवतीत्युच्यते राज्ञः क च [४. २. १४०] राजकीयम् अल्लोपो ऽनः [६. ४. १३४] इति लोपः प्राप्नोति । एकदेशविकृतमनन्यवत्षष्ठीनिर्दिष्टस्येति वक्ष्यामि । यदि षष्ठीनिर्दिष्टस्येत्युच्यते क्लृ३प्तशिख इति प्लुतो न प्राप्नोति । न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः । कस्तर्हि । रेफः । ऋकारो ऽप्यत्र षष्ठीनिर्दिष्टः । कथम् । अविभक्तिको निर्देशः । कृप उः रः लः कृपो रो लः [८. २. १८] इति । अथवा पुनरस्त्वविशेषेण । ननु चोक्तं राज्ञः क च राजकीयम् अल्लोपो ऽन इति लोपः प्राप्नोतीति । नैष दोषः । वक्ष्यत्येतत् । श्वादीनां प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति* । तत्प्रकृतमुत्तरत्रानुवर्तिष्यते । अल्लोपो ऽनो नकारान्तस्येति ॥ इह तर्हि क्लृ३प्तशिख इत्यनृत इति प्रतिषेधः प्राप्नोति† ।

रवत्प्रतिषेधाच्च ॥ ५ ॥

रवत्प्रतिषेधाच्चैतत्सिध्यति । गुरोररवत इति वक्ष्यामि । यद्यरवत इत्युच्यते होतृ ऋकार होतृ३कार अत्र न प्राप्नोति । गुरोररवतो ह्रस्वस्येति वक्ष्यामि ॥ स एष सूत्रभेदेन लकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते सैषा महतो वंशात्स्तम्बाल्लट्वानुकृष्यते ॥

---

* ६ ४ १३३ * † ८ २.८६

ए ओङ् ॥ ३ ॥ ऐ औच् ॥ ४ ॥

इदं विचार्यते ।-इमानि संध्यक्षराणि तपराणि वोपदिश्येरन् । एत् ओत् ङ् । ऐत् औत् च् इति । अतपराणि वा यथान्यासमिति । कश्चात्र विशेषः ।

संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् ॥ १ ॥

संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यम् ॥

प्लुत्यादिष्वज्विधिः ॥ २ ॥

प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति । गो३त्रात नौ३त्रात इत्यत्रानचि च [८. ४. ४७] इत्यच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति । इह च प्रत्यङ्ङु३तिकायन उदङ्ङौ३पगव इत्यचि [८.३.३२] इति ङमुण्न प्राप्नोति ॥

प्लुतसंज्ञा च ॥ ३ ॥

प्लुतसंज्ञा च न सिध्यति । ऐ३तिकायन औ३पगव । ऊकालोऽज्झ्रस्वदीर्घप्लुतः [१.२.२७] इति प्लुतसंज्ञा न प्राप्नोति ॥ सन्तु तर्ह्यतपराणि ।

अतपर एच इग्घ्रस्वादेशे ॥ ४ ॥

यद्यतपराण्येच इग्घ्रस्वादेशे [१.१.४८] इति वक्तव्यम् । किं प्रयोजनम् । एचो ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूदिति । ननु च यस्यापि तपराणि तेनाप्येतद्वक्तव्यम् । इमावैचौ समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्णयोस्तयोर्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात्कदाचिदिवर्णोवर्णौ मा कदाचिदवर्णो भूदिति । प्रत्याख्यायत एतत् । ऐचोश्चोत्तरभूयस्त्वादिति । यदि प्रत्याख्यानपक्ष इदमपि प्रत्याख्यायते । सिद्धमेङः सस्थानत्वादिति । ननु चैङः सस्थानतरावर्ध एकारोऽर्ध ओकारश्च । न तौ स्तः । यदि हि तौ स्यातां तावेवायमुपदिशेत् । ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते । सुजाते ए अश्वसूनृते । अध्वर्यो ओ अद्रिभिः सुतम् । शुक्रं ते ए अन्यद्यजतं ते ए अन्यदिति । पार्षदकृतिरेषा तत्रभवतां नैव हि लोके नान्यस्मिन्वेदेऽर्ध एकारोऽर्ध ओकारो वास्ति ॥

एकादेशे दीर्घग्रहणम् ॥ ५ ॥

एकादेशे दीर्घग्रहणं कर्तव्यम् । आद्गुणो [६.१.८७] दीर्घः । वृद्धिरेचि [८८]

दीर्घ इति । किं प्रयोजनम् । आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति । खट्वा इन्द्रः खट्वेन्द्रः । खट्वा उदकं खट्वोदकम् । खट्वा ईषा खट्वेषा । खट्वा ऊढा खट्वोढा । खट्वा एलका खट्वैलका । खट्वा ओदनः खट्वौदनः । खट्वा ऐतिकायनः खट्वैतिकायनः । खट्वा औपगवः खट्वौपगवः ॥ तर्हि दीर्घग्रहणं कर्तव्यम् । न कर्तव्यम् । उपरिष्टाद्योगविभागः करिष्यते । अकः सवर्ण एको भवति । ततो दीर्घः । दीर्घश्च स भवति यः स एकः पूर्वपरयोरित्येवं निर्दिष्ट इति* । इहापि तर्हि प्राप्नोति । पभुम् विद्धम् पचन्तीति । नैष दोषः । इह तावत्पशुमित्यम्येक इतीयता सिद्धम् । सो ऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति† तस्यैतत्प्रयोजनं यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति । विद्धमिति पूर्व इत्येवानुवर्तते‡ । अथवाचार्यप्रवृत्तिर्ज्ञापयति नानेन संप्रसारणस्य दीर्घो भवतीति यदयं हल उत्तरस्य संप्रसारणस्य दीर्घत्वं शास्ति§ । पचन्तीत्यतो गुणे पर इतीयता सिद्धम् । सो ऽयमेवं सिद्धे सति यद्रूपग्रहणं करोति‖ तस्यैतत्प्रयोजनं यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्यादिति ॥ इह तर्हि खट्वर्श्यः मालर्श्य इति दीर्घवचनादकारो नानान्तर्यादेकारौकारौ न । तत्र को दोषः । विगृहीतस्य श्रवणं प्रसज्येत । न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति । किं तर्हि । यत्र क्रियमाणे न दोषस्तत्र कर्तव्यमिति । क्व च क्रियमाणे न दोषः । संज्ञाविधौ । वृद्धिरादैच् [१.१.१] दीर्घः । अदेङ्गुणो [२] दीर्घ इति ॥ तर्हि दीर्घग्रहणं कर्तव्यम् । न कर्तव्यम् । कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति । तपरे गुणवृद्धी । ननु च तः परो यस्मात्सो ऽयं तपरः । नेत्याह । तादपि परस्तपर इति । यदि तादपि परस्तपर ऋदोरप् [३.३.५७] इतीदेव स्यात् । यवः स्तवः । लवः पव इत्यत्र न स्यात् । नैष तकारः । कस्तर्हि । दकारः । किं दकारे प्रयोजनम् । अथ किं तकारे । यद्यसंदेहार्थस्तकारो दकारो ऽपि । अथ मुखसुखार्थस्तकारो दकारो ऽपि ॥

इदं विचार्यते । य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति । कुतः पुनरियं विचारणा । इह समुदाया अप्युपदिश्यन्ते ऽवयवा अपि । अभ्यन्तरश्च समुदाये ऽवयवः । तद्यथा । वृक्षः प्रचलन्सहावयवैः प्रचलति । तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा । कश्चात्र विशेषः ।

* ६.१.१०१. † ६.१.१०७. ‡ ६.१.१०८. § ६.४.२. ‖ ६.१.९७; ९४.

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः ॥ ६ ॥

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्यः । अग्ने इन्द्रम् । वायो उदकम् । अकः सवर्णे दीर्घः [६.१.१०१] इति दीर्घत्वं प्राप्नोति ॥

दीर्घे ह्रस्वविधिप्रतिषेधः ॥ ७ ॥

दीर्घे ह्रस्वाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्यः । ग्रामणीः । आलूय । प्रलूय । ह्रस्वस्य पिति कृति तुग्भवतीति तुक्प्राप्नोति* । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधिर्भवतीति यदयं दीर्घाच्छे तुकं शास्ति† । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । पदान्ताद्वा [६.१.७६] इति विभाषां वक्ष्यामीति । यत्तर्हि योगविभागं करोति । इतरथा हि दीर्घात्पदान्ताद्वेत्येव ब्रूयात् ॥ इह तर्हि खट्वाभिः मालाभिः अतो भिस ऐस् [७. १. ९] इत्यैस्भावः प्राप्नोति । तपरकरणसामर्थ्यान्न भविष्यति ॥ इह तर्हि याता वाता अतो लोप आर्धधातुके [६.४.४८] इत्यकारलोपः प्राप्नोति । ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति । अस्ति ह्यन्यत्तपरकरणे प्रयोजनम् । किम् । सर्वस्य लोपो मा भूदिति । अथ क्रियमाणे अपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति । परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नाकारस्थस्याकारस्य लोपो भवतीति यदयमातो ऽनुपसर्गे कः [३.२.३] इति ककारमनुबन्धं करोति । कथं कृत्वा ज्ञापकम् । कित्करण एतत्प्रयोजनं कितीत्याकारलोपो यथा स्यादिति‡ । यदि चाकारस्थस्याकारस्य लोपः स्यात्कित्करणमनर्थकं स्यात् । परस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्यात् गोदः कम्बलद इति । पश्यति त्वाचार्यो नाकारस्थस्याकारस्य लोपो भवतीत्यतः ककारमनुबन्धं करोति । नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात् । तुन्दशोकयोः परिमृजापनुदोः [३.२.५] इति । यत्तर्हि गापोष्टक् [३.२.८] इत्यनन्यार्थं ककारमनुबन्धं करोति ॥

एकवर्णवच्च ॥ ८ ॥

एकवर्णवच्च दीर्घो भवतीति वक्तव्यम् । किं प्रयोजनम् । वाचा तरतीति वाग्लक्षणठन्मा भूदिति§ । इह च वाचो निमित्तं तस्य निमित्तं संयोगोत्पातौ

---

* ६.१.७१. † ६.१.७५. ‡ ६.४.६४. § ४.४.५

[९ १.३८] इति व्यञ्जलक्षणो यन्मा भूदिति* । अत्रापि गोनीमहण† ज्ञापक दीर्घाद्व्यञ्जलक्षणो विधिर्न भवतीति ॥ अय तु सर्वेषामेव परिहार॰ ।

नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु ॥ ९ ॥

नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्भवति यथा द्रव्येषु । तद्यथा द्रव्येषु । सप्तदश सामिधेन्यो भवन्तीति न सप्तदशारत्निमात्र काष्ठममावभ्याधीयते । विषम उपन्यास॰ । प्रत्यृच चैव हि तत्कर्म चोद्यते ऽसंभवश्चामौ वेद्यां च ॥ यथा तर्हि सप्तदश प्रादेशमात्रीराश्वत्थीः समिधो ऽभ्यादधीतेति न सप्तदशप्रादेशमात्र काष्ठमभ्याधीयते । अत्रापि प्रतिप्रणव चैतत्कर्म चोद्यते तुल्यश्चासभवो ऽमौ वेद्यां च ॥ यथा तर्हि तैल न विक्रेतव्य मास न विक्रेतव्यमिति व्यपवृक्त च न विक्रीयते ऽव्यपवृक्त च गावश्च सर्षपाश्च विक्रीयन्ते । तथा लोमनख स्पृष्ट्वा शौच कर्तव्यमिति व्यपवृक्त स्पृष्ट्वा नियोगत कर्तव्यमव्यपवृक्ते कामचार ॥ यत्र तर्हि व्यपवर्गो ऽस्ति । क्व च व्यपवर्गो ऽस्ति । सध्यक्षरेषु ।

सध्यक्षरेषु विवृतत्वात् ॥ १० ॥

यदत्रावर्ण विवृततर तदन्यस्मादवर्णाद्ये अपीवर्णोवर्णे विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम् ॥

अथवा पुनर्न गृह्यन्ते ।

अग्रहण चेन्नुड्विधिलादेशविनामेष्वृकारग्रहणम् ॥ ११ ॥

अग्रहण चेन्नुड्विधिलादेशविनामेष्वृकारस्य ग्रहण कर्तव्यम् । तस्मान्नुड्द्विहल॰ [७ ४ ७१] ऋकारे चेति वक्तव्यम् । इहापि यथा स्यात् । आनृधतु॰ आनृधुरिति । यस्य पुनर्गृह्यन्ते द्विहल इत्येव तस्य सिद्धम् । यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । द्विहल्ग्रहण न करिष्यते । तस्मान्नुड्भवतीत्येव । यदि न क्रियत आटतु आटुरित्यत्रापि प्राप्नोति । अश्नोतिग्रहण‡ नियमार्थ भविष्यति । अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति ॥ लादेशे च ऋकारग्रहण कर्तव्यम् । कृपो रो ल [८ २.१८] ऋकारस्य चेति वक्तव्यम् । इहापि यथा स्यात् । क्लृप्त॰ क्लृप्तवानिति । यस्य पुनर्गृह्यन्ते र इत्येव तस्य सिद्धम् । यस्यापि न गृह्यन्ते तस्याप्येष न दोष॰ । ऋकारो ऽप्यत्र निर्दिश्यते । कथम् । अविभक्तिको निर्देश॰ । कृप उः र॰

* ८ १ ३० † ६ १ १९, ४ ४ ० ‡ ७ ४ ७२

लः कृपो रो ल इति । अथवोभयतः स्फोटमात्रं निर्दिश्यते । रश्रुतेर्लश्रुतिर्भवतीति ॥ विनाम ऋकारग्रहणं कर्तव्यम् । रषाभ्यां नो णः समानपदे [८.४.१] ऋकाराच्चेति वक्तव्यम् । इहापि यथा स्यात् । मातॄणाम् पितॄणामिति । यस्य पुनर्गृह्यन्ते रषाभ्यामित्येव तस्य सिद्धम् । न सिध्यति । यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति । मा भूदेवम् । अड्व्यवाय* इत्येव सिद्धम् । न सिध्यति । वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते । ये व्यपवृक्ता अपि वर्णा भवन्ति । यच्चापि रेफात्परं भक्तेर्न तत्क्वचिदपि व्यपवृक्तं दृश्यते । एवं तर्हि योगविभागः करिष्यते । रषाभ्यां नो णः समानपदे । ततो व्यवाये । व्यवाये च रषाभ्यां नो णो भवतीति । ततो ऽट्कुप्वाङ्नुम्भिरिति । इदमिदानीं किमर्थम् । नियमार्थम् । एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यैरिति ॥ यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति भवत्यृकारान्नो णत्वमिति यदयं क्षुभ्नादिषु नृनमनशब्दं पठति† । नैतदस्ति ज्ञापकम् । वृद्ध्यर्थमेतत्स्यात् । नार्नमनिः । यत्तर्हि तृप्नोतिशब्दं पठति । यच्चापि नृनमनशब्दं पठति । ननु चोक्तं वृद्ध्यर्थमेतत्स्यादिति । बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ अथवोपरिष्टाद्योगविभागः करिष्यते‡ । ऋतो नो णो भवति । ततश्छन्दस्यवग्रहात् । ऋत इत्येव ॥

प्लुतावैच इदुतौ§ ॥ १२ ॥

एतच्च वक्तव्यम् । यस्य पुनर्गृह्यन्ते गुरोरिरित्येव प्लुत्या तस्य सिद्धम्‖ । यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । क्रियत एतन्न्यास एव ॥

तुल्यरूपे संयोगे द्विव्यञ्जनविधिः ॥ १३ ॥

तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति । कुक्कुटः पिप्पलः पित्तमिति । यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । कथम् । मात्राकालो ऽत्र गम्यते न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । यद्यपि तावदेतच्छक्यते वक्तुं यत्रैतन्नास्त्यण्सवर्णान्गृह्णातीतीह तु कथं सय्यँन्ता सव्वँत्सरः यँल्लोकम् तँल्लोकमिति यत्रैतदस्त्यण्सवर्णान्गृह्णातीति । अत्रापि मात्राकालो गृह्यते न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुमसच्च कथं शक्यं प्रतिपत्तुम् ॥

---

* ८.४.२. † ८.४.३९. ‡ ८.४.३९. § ८.२.१०६. ‖ ८.२.८६.

ह य व रट् ॥ ५ ॥

सर्वे वर्णा सकृदुपदिष्टा । अय हकारो द्विरुपदिश्यते पूर्वश्चैव परश्च । यदि पुन पूर्व एवोपदिश्येत पर एव वा । कश्चात्र विशेष ।

हकारस्य परोपदेशे ऽड्ग्रहणेषु हग्रहणम् ॥ १ ॥

हकारस्य परोपदेशे ऽड्ग्रहणेषु हग्रहण कर्तव्यम् । आतो ऽटि नित्यम् [८ ३.३] शश्छो ऽटि [८ ४ ६३] दीर्घादटि समानपादे [८ ३ ९] हकारे चेति वक्तव्यम् । *इहापि यथा स्यात् । महाँ हि स ॥*

उत्वे च ॥ २ ॥

उत्वे च हकारग्रहण कर्तव्यम् । अतो रोरप्लुतादप्लुते [६ १ ११३] हशि च [११४] हकारे चेति वक्तव्यम् । इहापि यथा स्यात् । पुरुषो हसति । ब्राह्मणो हसतीति ॥ अस्तु तर्हि पूर्वोपदेश ।

पूर्वोपदेशे किन्वक्सेड्विधयो झल्ग्रहणानि च ॥ ३ ॥

यदि पूर्वोपदेश किन्त्व विधेयम् । स्निहित्वा स्नेहित्वा । सिस्निहिषति सिस्नेहिषति । रलो व्युपधाद्धलादे [१ २ २६] इति किन्त्व न प्राप्नोति ॥ क्सविधि । क्सश्च विधेय । अधुक्षत् अलिक्षत् । शल इगुपधादनिट क्स [३ १ ४५] इति क्सो न प्राप्नोति ॥ इड्विधि । इट् च विधेय । रुदिहि स्वपिहि । वलादिलक्षण इण्न प्राप्नोति* ॥ झल्ग्रहणानि च । किम् । अहकाराणि स्यु । तत्र को दोष । झलो झलि [८ २ २६] इतीह न स्यात् । अदाग्धाम् अदाग्धम् ॥ तस्मात्पूर्वश्चैवोपदेष्टव्य परश्च । यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति तत्राप्युपदेश कर्तव्य ॥

इद विचार्यते । अय रेफो यकारवकाराभ्या पूर्व एवोपदिश्येत ह र य वडिति पर एव *वा यथान्यासमिति । कश्चात्र विशेष ।*

रेफस्य परोपदेशे ऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध ॥ ४ ॥

रेफस्य परोपदेशे ऽनुनासिकद्विर्वचनपरसवर्णाना प्रतिषेधो वक्तव्य । अनुनासिकस्य । स्वर्नयति प्रातर्नयतीति यरो ऽनुनासिके ऽनुनासिको वा [८ ४ ४५] इत्यनुना-

* ७ २ ७५

सिकः प्राप्नोति ॥ द्विर्वचनस्य । भद्रह्रदः मद्रह्रद इति यर इति द्विर्वचनं प्राप्नोति* ॥ परसवर्णस्य । कुण्डं रथेन । वनं रथेन । अनुस्वारस्य ययि [८. ४. ५८] इति परसवर्णः प्राप्नोति ॥ अस्तु तर्हि पूर्वोपदेशः ।

पूर्वोपदेशे किच्त्वप्रतिषेधो व्यलोपवचनं च ॥ ५ ॥

यदि पूर्वोपदेशः किच्त्वं प्रतिषेध्यम् । देवित्वा दिदेविषति । रलो व्युपधात् [१. २. २६] इति किच्त्वं प्राप्नोति । नैष दोषः । नैवं विज्ञायते रलः व्युपधादिति । किं तर्हि । रलः अव्व्युपधादिति । किमिदमव्व्युपधादिति । अवकारान्ताद्व्युपधादव्व्युपधादिति ॥ व्यलोपवचनं च । व्योश्च लोपो वक्तव्यः । गौधेरः । पचेरन् यजेरन् । जीवे रदानुक् जीरदानुः । वलीति लोपो†न प्राप्नोति । नैष दोषः । रेफो ऽप्यत्र निर्दिश्यते । लोपो व्योर्वलीति रेफे च वलि चेति ॥ अथवा पुनरस्तु परोपदेशः । ननु चोक्तं रेफस्य परोपदेशे ऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध इति । अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः । रेफोष्मणां सवर्णा न सन्ति । द्विर्वचने ऽपि नैमौ रहौ कार्यिणौ द्विर्वचनस्य । किं तर्हि । निमित्तमिमौ रहौ द्विर्वचनस्य । तद्यथा । ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषातामिति नेदानीं तौ भुञ्जाते ॥

इदं विचार्यते । इमे ऽयोगवाहा न क्वचिदुपदिश्यन्ते श्रूयन्ते च तेषां कार्यार्थ उपदेशः कर्तव्यः । के पुनरयोगवाहाः । विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्ययमाः । कथं पुनरयोगवाहाः । यदयुक्ता वहन्त्यनुपदिष्टाश्च श्रूयन्ते ॥ क्व पुनरेषामुपदेशः कर्तव्यः ।

अयोगवाहानामट्सु णत्वम् ॥ ६ ॥

अयोगवाहानामट्सूपदेशः कर्तव्यः । किं प्रयोजनम् । णत्वम् । उरःकेण उरःपेण । अड्व्यवाय इति णत्वं सिद्धं भवति‡ ॥

शर्षु जश्भावषत्वे ॥ ७ ॥

शर्षूपदेशः कर्तव्यः । किं प्रयोजनम् । जश्भावषत्वे । अयमुब्जिरुपध्मानीयोपधः पठ्यते तस्य जश्त्वे कृत उब्जिता उब्जितुमित्येतद्रूपं यथा स्यात्§ ॥ यद्युब्जिरुपध्मानीयोपधः पठ्यते उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति ।

* ८. ४. ४६. † ६. १. ६६. ‡ ८. ४. २. § ८. ४. ५३.

दकारोपधे पुनर्न न्द्राः संयोगादयः [६.१.३] इति प्रतिषेधः सिद्धो भवति । यदि दकारोपधः पठ्यते का रूपसिद्धिः उब्जिता उब्जितुमिति । असिद्धे भ उद्जेः । इदमस्ति स्तोः श्चुना श्चुः [८.४.४०] इति । ततो वक्ष्यामि । भ उद्जेः । उद्जेश्चुना संनिपाते भो भवतीति । तर्हि वक्तव्यम् । न वक्तव्यम् । निपातनादेव सिद्धम् । किं निपातनम् । भुजन्युब्जौ पाण्युपतापयोः [७.३.६१] इति । इहापि तर्हि प्राप्नोति । अभ्युद्गः समुद्गः इति । अकुत्वविषये तन्निपातनम् । अथवा नैतदुब्जे रूपं गमेरेतद्व्युपसर्गाड्डो विधीयते । अभ्युद्गतो ऽभ्युद्गः । समुद्गतः समुद्ग इति ॥ षत्वं च प्रयोजनम् । सर्पिःषु धनुःषु । शर्व्यवाय इति षत्वं सिद्धं भवति । नुम्विसर्जनीयशर्व्यवाये ऽपि [८.३.५८] इति विसर्जनीयग्रहणं न कर्तव्यं भवति । नुमथापि तर्हि ग्रहणं शक्यमकर्तुम् । कथं सर्पींषि धनूंषि । अनुस्वारे कृते शर्व्यवाय इत्येव सिद्धम् । अवश्यं नुमो ग्रहणं कर्तव्यम् । अनुस्वारविशेषणं नुम्ग्रहणं नुमो यो ऽनुस्वारस्तत्र यथा स्यादिह मा भूत् । पुंस्विति ॥ अथवाविशेषेणोपदेशः कर्तव्यः । किं प्रयोजनम् ।

अविशेषेण संयोगोपधासञ्ज्ञालोऽन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः ॥ ८ ॥

अविशेषेण संयोगसञ्ज्ञा प्रयोजनम् । ऊर्ज्जकः । हलो ऽनन्तराः संयोगः [१.१.७] इति संयोगसंज्ञा संयोगे गुरु [१.४.११] इति गुरुसंज्ञा गुरोरिति प्लुतो भवति* ॥ उपधासञ्ज्ञा च प्रयोजनम्† । दुष्कृतम् निष्कृतम् । निष्पीतम् दुष्पीतम् । इदुदुपधस्य चाप्रत्ययस्य [८.३.४१] इति षत्वं सिद्धं भवति । नैतदस्ति प्रयोजनम् । नेदुदुपधग्रहणेन विसर्जनीयो विशेष्यते । किं तर्हि । सकारो विशेष्यते । इदुदुपधस्य सकारस्य यो विसर्जनीय इति । अथवोपधाग्रहणं न करिष्यत इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः । इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति ॥ अलोऽन्त्यविधिः प्रयोजनम्‡ । वृक्षस्तरति । प्लक्षस्तरति । अलोऽन्त्यस्य विधयो भवन्तीत्यलोऽन्त्यस्य सत्वं सिद्धं भवति§ । एतदपि नास्ति प्रयोजनम् । निर्दिश्यमानस्यादेशा भवन्तीति विसर्जनीयस्यैव भविष्यति ॥ द्विर्वचनं प्रयोजनम् । उरःकः उरःपः । अनचि च [८.४.४७] अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति ॥ स्थानिवद्भावप्रतिषेधश्च प्रयोजनम् । यथेह भवत्युरःकेण उरःपेणेत्यड्व्यवाय॥ इति णत्वमेवमिहापि स्थानिवद्भावात्प्राप्नोति व्यूढोरस्केन महोरस्केनेति । तत्रानल्विधाविति प्रतिषेधः¶ सिद्धो भवति ॥

* ८ २ ८०. † १ १ ६५ ‡ १ १ ५२ § ८ ३. ३४ ॥ ८ ४ २ ¶ १ १ ५६

किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः ।

अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ॥९॥

धातव एकवर्णा अर्थवन्तो दृश्यन्ते । एति अध्येति अधीत इति । प्रातिपदिकान्येकवर्णान्यर्थवन्ति । आभ्याम् एभिः एषु । प्रत्यया एकवर्णा अर्थवन्तः । औपगवः कापटवः । निपाता एकवर्णा अर्थवन्तः । अ अपेहि । इ इन्द्रं पश्य । उ उत्तिष्ठ । धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे ऽर्थवन्तो वर्णा इति ॥

वर्णव्यत्यये चार्थान्तरगमनात् ॥ १० ॥

वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहे ऽर्थवन्तो वर्णा इति । कूपः सूपः यूप इति । कूप इति सककारेण कश्चिदर्थो गम्यते । सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते । यूप इति ककारसकारापाये यकारोपजने चार्थान्तरं गम्यते । ते मन्यामहे यः कूपे कूपार्थः स ककारस्य यः सूपे सूपार्थः स सकारस्य यो यूपे यूपार्थः स यकारस्येति ॥

वर्णानुपलब्धौ चानर्थगतेः ॥ ११ ॥

वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे ऽर्थवन्तो वर्णा इति । वृक्षः ऋक्षः । काण्डीरः आण्डीरः । वृक्ष इति सवकारेण कश्चिदर्थो गम्यत ऋक्ष इति वकारापाये सो ऽर्थो न गम्यते । काण्डीर इति सककारेण कश्चिदर्थो गम्यत आण्डीर इति ककारापाये सो ऽर्थो न गम्यते । किं तर्ह्युच्यते ऽनर्थगतेरिति । न साधीयो ह्यत्रार्थस्य गतिर्भवति । एवं तर्हीदं पठितव्यं स्यात् । वर्णानुपलब्धौ चातदर्थगतेरिति । किमिदमतदर्थगतेरिति । तस्यार्थस्तदर्थः । तदर्थस्य गतिस्तदर्थगतिः । न तदर्थगतिरतदर्थगतिः । अतदर्थगतेरिति । अथवा सो ऽर्थस्तदर्थः । तदर्थस्य गतिस्तदर्थगतिः । न तदर्थगतिरतदर्थगतिः । अतदर्थगतेरिति । स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । उत्तरपदलोपो ऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्य । उष्ट्रमुखः । खरमुखमिव मुखमस्य । खरमुखः । एवमतदर्थगतेरनर्थगतेरिति ॥

सघातार्थवत्त्वाच्च ॥ १२ ॥

संघातार्थवत्त्वाच्च मन्यामहे ऽर्थवन्तो वर्णा इति । येषां सघाता अर्थवन्तो ऽवयवा अपि तेषामर्थवन्तः । येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः ।

तद्यथा । एकश्चक्षुष्मान्दर्शने समर्थस्तत्समुदायश्च शतमपि समर्थम् । एकश्च तिलस्तैलदाने समर्थस्तत्समुदायश्च खार्यपि समर्था । येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः । तद्यथा । एको ऽन्धो दर्शने ऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम् । एका च सिकता तैलदाने ऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम् ॥ यदि तर्हीमे वर्णा अर्थवन्तो ऽर्थवत्कृतानि प्राप्नुवन्ति । कानि । अर्थवत्प्रातिपदिकम् [१. २. ४५] इति प्रातिपदिकसंज्ञा प्रातिपदिकात् [४. १. १.] इति स्वाद्युत्पत्तिः सुबन्तं पदम् [१. ४. १४] इति पदसंज्ञा । तत्र को दोषः । पदस्येति नलोपादीनि प्राप्नुवन्ति* । धनम् वनमिति ।

संघातस्यैकार्थ्यात्सुबभावो वर्णात् ॥ १३ ॥

संघातस्यैकत्वमर्थस्तेन वर्णात्सुबुत्पत्तिर्न भविष्यति ॥

अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः ॥ १४ ॥

अनर्थकास्तु वर्णाः । कुतः । प्रतिवर्णमर्थानुपलब्धेः । न हि प्रतिवर्णमर्था उपलभ्यन्ते । किमिदं प्रतिवर्णमिति । वर्णं वर्णं प्रति प्रतिवर्णम् ॥

वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् ॥ १५ ॥

वर्णव्यत्ययापायोपजनविकारेष्वनर्थदर्शनान्मन्यामहे ऽनर्थका वर्णा इति । वर्णव्यत्यये । कृतेस्तर्कुः । कसेः सिकताः । हिंसेः सिंहः । वर्णव्यत्ययो नार्थव्यत्ययः ॥ अपायो लोपः । घ्नन्ति घ्नन्तु अघ्नन् । वर्णापायो नार्थापायः ॥ उपजन आगमः । लविता लवितुम् । वर्णोपजनो नार्थोपजनः ॥ विकार आदेशः । घातयति घातकः । वर्णविकारो नार्थविकारः ॥ यथैव हि वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम् । न चेह तद्वत् । अतो मन्यामहे ऽनर्थका वर्णा इति ॥ उभयमिदं वर्णेषूक्तम् । अर्थवन्तो ऽनर्थका इति च । किमत्र न्याय्यम् । उभयमित्याह । कुतः । स्वभावतः । तद्यथा । समानमीहमानानामधीयानानां च केचिदर्थैर्युज्यन्ते ऽपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति कृत्वा सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम् । यद्धातुप्रत्ययप्रातिपदिकनिपाता एकवर्णा अर्थवन्तो ऽतो ऽन्ये ऽनर्थका इति स्वाभाविकमेतत् ॥ कथं य एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टो ऽर्थवन्तो वर्णा

* ८. २. ७

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्चेति । संघातान्तराण्येवैतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्ते । कूपः सूपः यूप इति । यदि हि वर्णव्यत्ययकृतमर्थान्तरगमनं स्याद्भूयिष्ठः कूपार्थः सूपे स्यात्सूपार्थश्च कूपे कूपार्थश्च यूपे यूपार्थश्च कूपे सूपार्थश्च यूपे यूपार्थश्च सूपे । यतस्तु खलु न कश्चित्कूपस्य वा सूपे सूपस्य वा कूपे कूपस्य वा यूपे यूपस्य वा कूपे सूपस्य वा यूपे यूपस्य वा सूपे ऽतो मन्यामहे संघातान्तराण्येवैतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त इति । इदं खल्वपि भवता वर्णानामर्थवत्त्वं ब्रुवता साधीयो ऽनर्थकत्वं द्योतितम् । यो हि मन्यते यः कूपे कूपार्थः स ककारस्य यः सूपे सूपार्थः स सकारस्य यो यूपे यूपार्थः स यकारस्येत्यूपशब्दस्तस्यानर्थकः स्यात् ॥ तत्रेदमपरिहृतं संघातार्थवत्त्वाच्चेति । एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति* ॥

अ इ उण् ऋ लृक् ए ओङ् ऐ औच् ।

प्रत्याहारे ऽनुबन्धानां कथमज्ग्रहणेषु न ।

य एते ऽक्षु प्रत्याहारार्था अनुबन्धाः क्रियन्त एतेषामज्ग्रहणेषु ग्रहणं कस्मान्न भवति । किं च स्यात् । दधि णकारीयति मधु णकारीयतीतीको यणचि [६.१.७७] इति यणादेशः प्रसज्येत ॥

आचारात्

किमिदमाचारादिति । आचार्याणामुपचारात् । नैतेष्वाचार्या अच्कार्याणि कृतवन्तः ॥

अप्रधानत्वात्

अप्रधानत्वाच्च । न खल्वप्येतेषामक्षु प्राधान्येनोपदेशः क्रियते । क्व तर्हि । हल्सु । कुत एतत् । एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति । अचो ऽक्षु हलो हल्सु ॥

लोपश्च बलवत्तरः ॥

लोपः खल्वपि बाधयिष्यति ॥

ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत् ।
अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति ॥

अथवा योगविभागः करिष्यते† । ऊकालो ऽच् । उ ऊ ऊ३ इत्येवंकालो ऽज्भ-

* १।२।४५ † १।२।२७

मति । ततो ह्रस्वदीर्घप्लुत । ह्रस्वदीर्घप्लुतसंज्ञश्च भवत्यूकालो ऽच् । एवमपि कुक्कुट इत्यत्रापि प्राप्नोति । तस्मात्पूर्वोक्त एव परिहार ॥ एष एवार्थ । अपर आह ।

ह्रस्वादीनां वचनात्प्राग्यावत्तावदेव योगो ऽस्तु ।
अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि ॥

अथ किमर्थमन्त स्थानामण्सूपदेश क्रियते । इह सय्यन्ता सव्ँवत्सर॰ यँल्लोकम् तँल्लोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम्* । तत्र परस्य परसवर्णे कृते तस्य यय्ग्रहणेन ग्रहणात्पूर्वस्यापि परसवर्णो यथा स्यात् । नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत् । द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यमिति† । यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति । परसवर्णे तर्हि कृते तस्य यर्ग्रहणेन ग्रहणाद्द्विर्वचनं यथा स्यात् । मा भूद्द्विर्वचनम् । ननु च भेदो भवति । सति द्विर्वचने त्रियकारमसति द्विर्वचने द्वियकारम् । नास्ति भेद । सत्यपि द्विर्वचने द्वियकारमेव । कथम् । हलो यमां यमि लोप [८ ४ ६४] इत्येवमेकस्य लोपेन भवितव्यम् । एवमपि भेद । सति द्विर्वचने कदाचिद्द्वियकारं कदाचित्त्रियकारम् । असति द्वियकारमेव । स एष कथं भेदो न स्यात् । यदि नित्यो लोप स्यात् । विभाषा च स लोप । यथाभेदस्तथास्तु ।

अनुवर्तते विभाषा शरोऽचि यद्वारयत्ययं द्वित्वम् ।

यदयं शरोऽचि [८ ४ ४९] इति द्विर्वचनप्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो ऽनुवर्तते विभाषेति । कथं कृत्वा ज्ञापकम् ।

नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात् ॥

यदि नित्यो लोप स्यात्प्रतिषेधवचनमनर्थकं स्यात् । अस्त्वत्र द्विर्वचनम् । झरो झरि सवर्णे [८ ४ ६५] इति लोपो भविष्यति । पश्यति त्वाचार्यो विभाषा स लोप इति ततो द्विर्वचनप्रतिषेधं शास्ति । नैतदस्ति ज्ञापकम् । नित्येऽपि तस्य लोपे स प्रतिषेधो ऽवश्य वक्तव्य । यदेतदचो रहाभ्याम् [८ ४ ४६] इति द्विर्वचनं लोपापवाद स विज्ञायते । कथम् । यर इत्युच्यते एतावन्तश्च यरो यदुत झरो वा यमो वा । यदि चात्र नित्यो लोप स्याद्द्विर्वचनमनर्थकं स्यात् । किं तर्हि तयोर्योगयोरुदाहरणम् । यदकृते द्विर्वचने त्र्यञ्जन संयोग । प्रत्तम् अवत्तम् आदित्य । इहेदानीं कर्त्ता हर्त्तेति द्विर्वचनसामर्थ्याल्लोपो न भवति । एवमिहापि लोपो न स्यात्कर्षति वर्षतीति ।

* ८ ४ ५९ ४० † ८ २ १*

तस्मान्नित्ये ऽपि लोपे ऽवश्य स प्रतिषेधो वक्तव्यः || तदेतदत्यन्तं संदिग्धं वर्तते आचार्याणां विभाषानुवर्तते न वेति ||

लण् || ६ ||

अयं णकारो द्विरनुबध्यते पूर्वश्च परश्च | तत्राण्ग्रहणेष्विण्ग्रहणेषु च संदेहो भवति पूर्वेण वा स्युः परेण वेति | कतरस्मिंस्तावदण्ग्रहणे संदेहः | ढ्रलोपे पूर्वस्य दीर्घो ऽणः [६.३.१११] इति | असंदिग्धं पूर्वेण न परेण | कुत एतत् | पराभावात् | न हि ढ्रलोपे परे ऽणः सन्ति | ननु चायमस्ति | आतृढम् आवृढमिति | एवं तर्हि सामर्थ्यात्पूर्वेण न परेण | यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात् | ढ्रलोपे पूर्वस्य दीर्घो ऽच इत्येव ब्रूयात् | अथवैतदपि न ब्रूयात् | अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति || अस्मिंस्तर्ह्यण्ग्रहणे संदेहः के ऽणः [७.४.१३] इति | असंदिग्धं पूर्वेण न परेण | कुत एतत् | पराभावात् | न हि के परे ऽणः सन्ति | ननु चायमस्ति | गोका नौकेति | एवं तर्हि सामर्थ्यात्पूर्वेण न परेण | यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात् | के ऽच इत्येव ब्रूयात् | अथवैतदपि न ब्रूयात् | अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति || अस्मिंस्तर्ह्यण्ग्रहणे संदेहः | अणो ऽप्रगृह्यस्यानुनासिकः [८.४.५७] इति | असंदिग्धं पूर्वेण न परेण | कुत एतत् | पराभावात् | न हि पदान्ताः परे ऽणः सन्ति | ननु चायमस्ति | कर्तृ हर्तृ इति | एवं तर्हि सामर्थ्यात्पूर्वेण न परेण | यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात् | अचो ऽप्रगृह्यस्यानुनासिक इत्येव ब्रूयात् | अथवैतदपि न ब्रूयात् | अच एव हि प्रगृह्या भवन्ति || अस्मिंस्तर्ह्यण्ग्रहणे संदेहः | उरण्रपरः [१.१.५१] इति | असंदिग्धं पूर्वेण न परेण | कुत एतत् | परा-

तुग्रहणमनर्थकं स्यात् । रपरत्वे कृते ऽनन्त्यत्वादित्त्वं न भविष्यति । पश्यति त्वाचार्यो नात्र रपरत्वं भवतीति ततो धातुग्रहणं करोति । इहापि तर्हीत्त्वं न प्राप्नोति । चिकीर्षति जिहीर्षतीति । मा भूदेवम् । उपधायाश्च [७.१.१०१] इत्येवं भविष्यति । इहापि तर्हि प्राप्नोति । मातॄणाम् पितॄणामिति । तस्मात्तत्र धातुग्रहणं कर्तव्यम् । एवं तर्ह्यण्ग्रहणसामर्थ्यात्पूर्वेण न परेण । यदि परेण स्यादण्ग्रहणमनर्थकं स्यात् । उरत्पर इत्येव ब्रूयात् ॥ अस्मिंस्तर्ह्यण्ग्रहणे संदेहः । अणुदित्सवर्णस्य चाप्रत्ययः [१.१.६९] इति । असंदिग्धं परेण न पूर्वेण । कुत एतत् ।

सवर्णेऽण् तपर ह्युर्ऋत् ।

यदयमुर्ऋत् [७.४.७] इत्यृकारं तपरं करोति तज्ज्ञापयत्याचार्यः परेण न पूर्वेणेति ॥ इण्ग्रहणेषु तर्हि संदेहः । असंदिग्धं परेण न पूर्वेणेति । कुत एतत् ।

य्वोरन्यत्र परेणेण् स्यात् ।

यत्रेच्छति पूर्वेण संगृह्य ग्रहणं तत्र करोति य्वोरिति । तच्च गुरु भवति । कथं कृत्वा ज्ञापकम् । तत्र विभक्तिनिर्देशे संगृह्य ग्रहणे ऽर्धचतस्रो मात्राः । प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः । सो ऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः परेण न पूर्वेणेति ॥ किं पुनर्वर्णोत्सन्नाविव णकारो द्विरनुबध्यते । एतज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति । अणुदित्सवर्णे परिहाय पूर्वेणाण्ग्रहणं परेणेण्ग्रहणमिति व्याख्यास्यामः ॥

ञ म ङ ण नम् ॥ ७ ॥ झ भञ् ॥ ८ ॥

किमर्थमिमौ मुखनासिकावचनौ वर्णावुभावप्यनुबध्येते न ञकार एवानुबध्येत । कथं यानि मकारेण ग्रहणानि हलो यमां यमि लोपः [८.४.६४] इति । सन्तु ञकारेण हलो यञां यञि लोप इति । नैवं शक्यम् । झकारभकारपरयोरपि हि झकारभकारयोर्लोपः प्रसज्येत । न झकारभकारौ झकारभकारयोः स्तः ॥ कथं पुमः खय्यम्परे [८.३.६] इति । एतदप्यस्तु ञकारेण पुमः खय्यञ्परे इति । नैवं शक्यम् । झकारभकारपरे हि खयि रुः प्रसज्येत । न झकारभकारपरः खयस्ति ॥ कथं ङमो ह्रस्वादचि ङमुण्नित्यम् [८.३.३२] इति । एतदप्यस्तु ञकारेण ङञो ह्रस्वादचि ङञुण्नित्यमिति । नैवं शक्यम् ।

झकारभकारयोरपि हि पदान्तयोर्झकारभकारावागमौ स्याताम् । न झकारभकारौ पदान्तौ स्तः । एवमपि पञ्चागमास्त्रय आगमिनो वैषम्यात्सङ्ख्यातानुदेशो* न प्राप्नोति । सन्तु तावदेषामागमानामागमिनः सन्ति । झकारभकारौ पदान्तौ न स्त इति कृत्वागमावपि न भविष्यतः ॥

अथ किमिदमक्षरमिति ।

अक्षरं न क्षरं विद्यात्

न क्षीयते न क्षरतीति वाक्षरम् ॥

अश्नोतेर्वा सरो ऽक्षरम् ।

अश्नोतेर्वा पुनरयमौणादिकः सरन्प्रत्ययः । अश्नुत इत्यक्षरम् ॥

वर्णं वाहुः पूर्वसूत्रे

अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते ।

किमर्थमुपदिश्यते ॥

अथ किमर्थमुपदिश्यते ॥

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ॥

सो ऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः । सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति । मातापितरौ चास्य स्वर्गे लोके महीयेते ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥

---

* १ । १ । १०

वृद्धिरादैच् ॥ १ । १ । १ ॥

कुत्वं कस्मान्न भवति चोः कुः पदस्य [८.२.३०] इति । भत्वात् । कथं भसंज्ञा । *अयस्मयादीनि च्छन्दसि* [१.४.२०] *इति । छन्दसीत्युच्यते न चेदं छन्दः ।* छन्दोवत्सूत्राणि भवन्ति । यदि भसंज्ञा वृद्धिरादैजदेङ्गुण इति जश्त्वमपि* न प्राप्नोति । उभयसंज्ञान्यपि च्छन्दांसि दृश्यन्ते । तद्यथा । स सुष्टुभा स ऋक्वता गणेन । पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति । एवमिहापि पदत्वाज्जश्त्वं भत्वात्कुत्वं न भविष्यति ॥

किं पुनरिदं तद्भावितग्रहणं वृद्धिरित्येवं य आकारैकारौकारा भाव्यन्ते तेषां ग्रहणमाहोस्विदादैज्मात्रस्य । किं चातः । *यदि तद्भावितग्रहणं शालीयः मालीय इति* वृद्धलक्षणश्छो न प्राप्नोति† । आम्रमयम् शालमयम् वृद्धलक्षणो मयण्न प्राप्नोति‡ । आम्रगुप्तायनिः शालगुप्तायनिः वृद्धलक्षणः फिञ्न प्राप्नोति§ ॥ अथादैज्मात्रस्य ग्रहणं सर्वो भासः सर्वभास इत्युत्तरपदवृद्धौ सर्वं च [६.२.१०५] इत्येष विधिः प्राप्नोति । *इह च तावती भार्यास्य तावद्भार्यः यावद्भार्यः वृद्धिनिमित्तस्य* [६.३.३९] इति पुंवद्भावप्रतिषेधः प्राप्नोति ॥ अस्तु तर्ह्यादैज्मात्रस्य ग्रहणम् । ननु चोक्तं सर्वो भासः सर्वभास इत्युत्तरपदवृद्धौ सर्वं चेत्येष विधिः प्राप्नोतीति । नैष दोषः । नैवं विज्ञायत उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिरुत्तरपदवृद्धाविति । कथं तर्हि । उत्तरपदस्य [७.३.१०] इत्येवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपद इत्येवमेतद्विज्ञायते । अवश्य चैतदेवं विज्ञेयम् । तद्भावितग्रहणे सत्यपीह प्रसज्येत सर्वः कारकः सर्वकारक इति । यदप्युच्यत इह तावती भार्यास्य तावद्भार्यः यावद्भार्य इति च वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोतीति नैष दोषः । नैवं विज्ञायते वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति । कथं तर्हि । वृद्धेर्निमित्तं यस्मिन्सो ऽयं वृद्धिनिमित्तो वृद्धिनिमित्तस्येति । *किं च वृद्धेर्निमित्तम् । यो ऽसौ ककारो णकारो ञकारो वा । अथवा यः कृत्स्नाया वृद्धेर्निमित्तम् । कश्च कृत्स्नाया वृद्धेर्निमित्तम् ।* यस्त्रयाणामाकारैकारौकाराणाम् ॥

संज्ञाधिकारः संज्ञासंप्रत्ययार्थः ॥ १ ॥

अथ संज्ञेति प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः । किं प्रयोजनम् । संज्ञासंप्रत्ययार्थः । वृद्ध्यादीनां शब्दानां संज्ञेत्येष संप्रत्ययो यथा स्यात् ॥

---

* ८ २ ३९ † ४ २ ११४ ‡ ४ ३.१४४. § ४ १.१५७.

इतरथा ह्यसंप्रत्ययो यथा लोके ॥ २ ॥

अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञेत्येष संप्रत्ययो न स्यात् । इदमिदानीं बहुसूत्रमनर्थकं स्यात् । अनर्थकमित्याह । कथम् । यथा लोके । लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते । अर्थवन्ति तावत् । देवदत्त गामभ्याज शुक्लां दण्डेन देवदत्त गामभ्याज कृष्णामिति । अनर्थकानि । दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति ॥

संज्ञासंज्ञ्यसंदेहश्च ॥ ३ ॥

क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः । कुतो ह्येतद्वृद्धिशब्दः संज्ञादैचः संज्ञिन इति न पुनरादैचः संज्ञा वृद्धिशब्दः संज्ञीति ॥ यत्तावदुच्यते संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थ इति न कर्तव्यः ।

आचार्याचारात्संज्ञासिद्धिः

आचार्याचारात्संज्ञासिद्धिर्भविष्यति । किमिदमाचार्याचारादिति । आचार्याणामुपचारात् ।

यथा लौकिकवैदिकेषु ॥ ४ ॥

तद्यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति । तयोरुपचारादन्येऽपि जानन्तीयमस्य संज्ञेति । वेदे याज्ञिकाः संज्ञां कुर्वन्ति स्फ्यो यूपश्चषाल इति । तत्रभवतामुपचारादन्येऽपि जानन्तीयमस्य संज्ञेति । एवमिहापि । इहैव तावत्केचिद्व्याचक्षाणा आहुः । वृद्धिशब्दः संज्ञादैचः संज्ञिन इति । अपरे पुनः सिचि वृद्धिः [७.२.१] इत्युक्त्वाकारैकारौकारानुदाहरन्ति । ते मन्यामहे यया प्रत्याय्यन्ते सा संज्ञा ये प्रतीयन्ते ते संज्ञिन इति ॥ यदप्युच्यते क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्य इति

संज्ञासंज्ञ्यसंदेहश्च ॥ ५ ॥

संज्ञासंज्ञिनोरसंदेहः सिद्धः । कुतः । आचार्याचारादेव । उक्त आचार्याचारः ॥

अनाकृतिः ॥ ६ ॥

अथवानाकृतिः संज्ञा । आकृतिमन्तः संज्ञिनः । लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते ॥

लिङ्गेन वा ॥ ७ ॥

अथवा किंचिल्लिङ्गमासज्य वक्ष्यामीत्थंलिङ्गा संज्ञेति । वृद्धिशब्दे च तल्लिङ्गं करिष्यते नादैच्छब्दे ॥ इदं तावदयुक्तं यदुच्यत आचार्याचारादिति । किमत्रायुक्तम् । तमेवोपालभ्यागमकं ते सूत्रमिति तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तम् । अपरितुष्यन्खल्वपि भवाननेन परिहारेणानाकृतिर्लिङ्गेन वेत्याह । तथापि वक्तव्यम् । यद्यप्येतदुच्यतेऽथवैतर्हीत्संज्ञा न वक्तव्या लोपश्च न वक्तव्यः* । संज्ञालिङ्गमनुबन्धेषु करिष्यते । न च संज्ञाया निवृत्तिरुच्यते । स्वभावतः संज्ञाः संज्ञिनः प्रत्याय्य निवर्तन्ते । तेनानुबन्धानामपि निवृत्तिर्भविष्यति । सिध्यत्येवमपाणिनीयं तु भवति ॥ यथान्यासमेवास्तु । ननु चोक्तं संज्ञाधिकारः संज्ञासंप्रत्ययार्थ इतरथा ह्यसंप्रत्ययो यथा लोक इति । न यथा लोके तथा व्याकरणे । प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्रं प्रणयति स्म तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण । किमतो यदशक्यम् । अतः संज्ञासंज्ञिनावेव ॥

कुतो नु खल्वेतत्संज्ञासंज्ञिनावेवेति न पुनः साध्वनुशासनेऽस्मिञ्शास्त्रे साधुत्वमनेन क्रियते । कृतमनयोः साधुत्वम् । कथम् । वृधिरस्मा अविशेषेणोपदिष्टः प्रकृतिपाठे तस्मात् क्तिन्प्रत्ययः । आदैचो ऽप्यक्षरसमाम्नाय उपदिष्टाः ॥ प्रयोगनियमार्थं तर्हीदं स्यात् । वृद्धिशब्दात्पर आदैचः प्रयोक्तव्या इति । नेह प्रयोगनियम आरभ्यते । किं तर्हि । संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवति । तद्यथा । आहर पात्रम् पात्रमाहरेति ॥ आदेशास्तर्हीमे स्युः । वृद्धिशब्दस्यादैचः । षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते न चात्र षष्ठीं पश्यामः ॥ आगमास्तर्हीमे स्युः । वृद्धिशब्दस्यादैच आगमाः । आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते लिङ्गेन च न चात्र षष्ठीं न खल्वप्यागमलिङ्गं पश्यामः ॥ इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वं च द्वयोश्चैतद्भवति । कयोः । विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा । तत्रैतत्स्याद्विशेषणविशेष्ये इति । तच्च न । द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति न चादैच्छब्दः प्रतीतपदार्थकः । तस्मात्संज्ञासंज्ञिनावेव ॥ तत्र त्वेतावान्संदेहः कः संज्ञी का संज्ञेति । स चापि क्व संदेहः । यत्रोभे समानाक्षरे । यत्र त्वन्यतरल्लघु यल्लघु सा संज्ञा । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति । किं तर्हि । अनाकृततामपि ।

* १ । १ । १९

अनाकृतिः संज्ञा । आकृतिमन्तः संज्ञिनः । लोके ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते ॥ अथवावर्तिन्यः संज्ञा भवन्ति । वृद्धिशब्दश्चावर्तते नादैच्छब्दः । तद्यथा । इतरत्रापि देवदत्तशब्द आवर्तते न मांसपिण्डः ॥ अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा । कुत एतत् । सतो हि कार्यिणः कार्येण भवितव्यम् । तद्यथा । इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते । कथं वृद्धिरादैजिति । एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति । सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा । अदेङ्गुणः [१.१.२] इति यथा ॥ दोषवान्खल्वपि संज्ञाधिकारः । अष्टमे ऽपि हि संज्ञा क्रियते तस्य परमाम्रेडितम् [८.१.२] इति । तत्रापीदमनुवर्त्यं स्यात् ॥ अथवा- *स्थाने ऽयं यत्नः क्रियते न हीदं लोकाद्भिद्यते । यदीदं लोकाद्भिद्येत ततो यत्नार्हं* स्यात् । तद्यथा । अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशत्ययं गौरिति । न चास्मा आचष्ट इयमस्य संज्ञेति भवति चास्य संप्रत्ययः । तत्रैतत्स्यात्कृतः पूर्वैरभिसंबन्ध इति । इहापि कृतः पूर्वैरभिसंबन्धः । कैः । आचार्यैः । तत्रैतत्स्यात् । यस्मै तर्हि संप्रत्युपदिशति तस्याकृत इति । लोके ऽपि हि यस्मै संप्रत्युपदिशति तस्याकृतः । अथ तत्र कृत इहापि कृतो द्रष्टव्यः ॥

सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः ॥ ८ ॥

सतः संज्ञिन. संज्ञाभावात्तदाश्रये संज्ञाश्रये संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः । *केतरेतराश्रयता । सतामादैचां संज्ञया भवितव्यं संज्ञया चादैचो भा*व्यन्ते तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते । तद्यथा । नौर्नावि बद्धा नेतरेतरत्राणाय भवति । ननु च भो इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते । तद्यथा । नौः शकटं वहति शकटं च नावं वहति । अन्यदपि तत्र किंचिद्भवति जलं स्थलं वा । स्थले शकटं नावं वहति जले नौः शकटं वहति । यथा तर्हि त्रिविष्टब्धकम् । तत्राप्यन्ततः सूत्रकं भवति । इदं पुनरितरेतराश्रयमेव ॥

सिद्धं तु नित्यशब्दत्वात् ॥ ९ ॥

सिद्धमेतत् । कथम् । नित्यशब्दत्वात् । नित्याः शब्दाः । नित्येषु शब्देषु सतामादैचां *संज्ञा क्रियते न संज्ञयादैचो भाव्यन्ते । यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रम् ।*

किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् ॥ १० ॥

निवर्तकं शास्त्रम् । कथम् । मृजिरस्मा अविशेषेणोपदिष्टः । तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता । तत्रानेन निवृत्तिः क्रियते । मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवतीति* ॥

प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यम् । किं प्रयोजनम् । समुदाये मा भूतामिति ।

अन्यत्र सहवचनात्समुदाये संज्ञाप्रसङ्गः ॥ ११ ॥

अन्यत्र सहवचनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसङ्गः । यत्रेच्छति सहभूतानां कार्यं करोति तत्र सहग्रहणम् । तद्यथा । सह सुपा [२ १ ४] । उभे अभ्यस्तं सहेति† ॥

प्रत्यवयवं च वाक्यपरिसमाप्तेः ॥ १२ ॥

प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति । न चोच्यते प्रत्येकमिति प्रत्येकं च भुजिः परिसमाप्यते । ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । सत्येतस्मिन्दृष्टान्ते यदि तत्र सहग्रहणं क्रियत इहापि प्रत्येकमिति वक्तव्यम् । अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवतीहापि नार्थः प्रत्येकमिति वचनेन ॥

अथ किमर्थमाकारस्तपरः क्रियते ।

आकारस्य तपरकरणं सवर्णार्थम्

आकारस्य तपरकरणं क्रियते । किं प्रयोजनम् । सवर्णार्थम् । तपरस्तत्कालस्य [१ १ ७०] इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात् । केषाम् । उदात्तानुदात्तस्वरितानाम् । किं च कारणं न स्यात् ।

भेदकत्वात्स्वरस्य ॥ १३ ॥

भेदका उदात्तादयः । कथं पुनर्ज्ञायते भेदका उदात्तादय इति । एवं हि दृश्यते लोके । य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददात्यन्यत्त्वं करोषीति । अस्ति प्रयोजनमेतत् । किं तर्हीति । भेदकत्वाद्गुणस्येति वक्तव्यम् । किं प्रयोजनम् । आनुनासिक्यं नाम गुणः । तद्भिन्नस्यापि यथा स्यात् । किं च कारणं न स्यात् । भेदकत्वाद्गुणस्य । भेदका गुणाः । कथं पुनर्ज्ञायते भेदका गुणा इति । एवं हि दृश्यते लोके । एको ऽयमात्मोदकं

* ७ २ ११४ † ६ १ ५

नाम तस्य गुणभेदादन्यत्वं भवति । अन्यदिदं शीतमन्यदिदमुष्णमिति । ननु च भो अभेदका अपि गुणा दृश्यन्ते । तद्यथा । देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति । तथा बालो युवा वृद्धः वत्सो दम्यो बलीवर्द इति ॥ उभयमिदं गुणेषूक्तं भेदका अभेदका इति । किं पुनरत्र न्याय्यम् । अभेदका गुणा इत्येव न्याय्यम् । कुत एतत् । यदयमस्थिदधिसक्थ्यक्ष्णामनङुदात्तः [७.१.७५] इत्युदात्तग्रहणं करोति । यदि भेदका गुणाः स्युरुदात्तमेवोच्चारयेत् । यदि तर्ह्यभेदका गुणा अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेः स्वरितान्ताच्च प्राप्नोति । नैष दोषः । आश्रीयमाणो गुणो भेदको भवति । तद्यथा । शुक्लमालभेत । कृष्णमालभेत । तत्र यः शुक्ल आलब्धव्ये कृष्णमालभते न हि तेन यथोक्तं कृतं भवति ॥ असंदेहार्थस्तर्हि तकारः । ऐजित्युच्यमाने संदेहः स्यात्किमिमावैचावेवाहोस्विदाकारोऽप्यत्र निर्दिश्यत इति । संदेहमात्रमेतद्भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति । त्रयाणां ग्रहणमिति व्याख्यास्यामः । अन्यत्रापि ह्ययमेवंजातीयकेषु संदेहेषु न कंचिद्यत्नं करोति । तद्यथा । औतोऽम्शसोः [६.१.९३] इति ॥ इदं तर्हि प्रयोजनम् । आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति । खट्वा इन्द्रः खट्वेन्द्रः । खट्वा उदकं खट्वोदकम् । खट्वा ईषा खट्वेषा । खट्वा ऊढा खट्वोढा । खट्वा एलका खट्वैलका । खट्वा ओदनः खट्वौदनः । खट्वा ऐतिकायनः खट्वैतिकायनः । खट्वा औपगवः खट्वौपगव इति । अथ क्रियमाणेऽपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति । तपरस्तत्कालस्येति नियमात् । ननु तः परो यस्मात्सोऽयं तपरः । नेत्याह । तादपि परस्तपरः । यदि तादपि परस्तपर ऋदोरप् [३. ३. ५७] इतीहैव स्यात् यवः स्तवः । लवः पव इत्यत्र न स्यात् । नैष तकारः । कस्तर्हि । दकारः । किं दकारे प्रयोजनम् । अथ किं तकारे । यद्यसंदेहार्थस्तकारो दकारोऽपि । अथ मुखसुखार्थस्तकारो दकारोऽपि ॥

इको गुणवृद्धी ॥ १ । १ । ३ ॥

इग्ग्रहणं किमर्थम् ।

इग्ग्रहणमात्संध्यक्षरव्यञ्जननिवृत्त्यर्थम् ॥ १ ॥

इग्ग्रहणं क्रियते आकारनिवृत्त्यर्थं संध्यक्षरनिवृत्त्यर्थं व्यञ्जननिवृत्त्यर्थं च ।

आकारनिवृत्त्यर्थं तावत् । याता वाता । आकारस्य गुणः प्राप्नोति* । इग्ग्रहणान्न भवति ॥ संध्यक्षरनिवृत्त्यर्थम् । ग्लायति म्लायति । संध्यक्षरस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवति ॥ व्यञ्जननिवृत्त्यर्थम् । उम्भिता उम्भितुम् उम्भितव्यम् । व्यञ्जनस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवति ॥ आकारनिवृत्त्यर्थेन तावन्नार्थः । आचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य गुणो भवतीति यदयमातो ऽनुपसर्गे कः [३.२.३] इति ककारमनुबन्धं करोति । कथं कृत्वा ज्ञापकम् । कित्करण एतत्प्रयोजनं कितीत्याकारलोपो यथा स्यात्† । यदि चाकारस्य गुणः स्यात्कित्करणमनर्थकं स्यात् । गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्यात् गोदः कम्बलद इति । पश्यति त्वाचार्यो नाकारस्य गुणो भवतीति ततः ककारमनुबन्धं करोति ॥ संध्यक्षरनिवृत्त्यर्थेनापि नार्थः । उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भविष्यति ॥ व्यञ्जननिवृत्त्यर्थेनापि नार्थः । आचार्यप्रवृत्तिर्ज्ञापयति न व्यञ्जनस्य गुणो भवतीति यदयं जनेर्डं शास्ति‡ । कथं कृत्वा ज्ञापकम् । डित्करण एतत्प्रयोजनं डितीति टिलोपो यथा स्यात्§ । यदि व्यञ्जनस्य गुणः स्याड्डित्करणमनर्थकं स्यात् । गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्यात् उपसरजः मन्दुरज इति । पश्यति त्वाचार्यो न व्यञ्जनस्य गुणो भवतीति ततो जनेर्डं शास्ति ॥ नैतानि सन्ति ज्ञापकानि । यत्तावदुच्यते कित्करणं ज्ञापकमाकारस्य गुणो न भवतीत्युत्तरार्थमेतत्स्यात् । तुन्दशोकयोः परिमृजापनुदोः [३.२.५] इति । यत्तर्हि गापोष्टक् [८] इत्यनन्यार्थं ककारमनुबन्धं करोति ॥ यदप्युच्यत उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भवतीति यदि यत्संध्यक्षरस्य प्राप्नोति तत्तदुपदेशसामर्थ्याद्बाध्येत आयादयो ऽपि तर्हि न प्राप्नुवन्ति । नैष दोषः । यं विधिं प्रत्युपदेशो ऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । गुणं च प्रत्युपदेशो ऽनर्थक आयादीनां पुनर्निमित्तमेव ॥ यदप्युच्यते जनेर्डवचनं ज्ञापकं न व्यञ्जनस्य गुणो भवतीति सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न च जनेर्गुणेन सिध्यति । कुतो ह्येतज्जनेर्गुण उच्यमानो ऽकारो भवति न पुनरेकारो वा स्यादोकारो वेति । आन्तर्यतो ऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिको ऽकारो भविष्यति । एवमप्यनुनासिकः प्राप्नोति । पररूपेण शुद्धो भविष्यति । एवं तर्हि गमेरप्ययं डो वक्तव्यः । गमेश्च गुण उच्यमान आन्तर्यत ओकारः प्राप्नोति । तस्मादिग्ग्रहणं कर्तव्यम् ॥

यदीग्ग्रहणं क्रियते द्योः पन्थाः सः इमामित्येते ऽपीकः प्राप्नुवन्ति॥ ।

* ७.३.८४ † ६.४.६४ ‡ ३.१.१०० § ६.४.१४३ ¶ ७.१.८८ ...

संज्ञया विधाने नियमः ॥ २ ॥

संज्ञया ये विधीयन्ते तेषु नियमः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमान गम्यते । गुणवृद्धिग्रहणसामर्थ्यात् । कथ पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम् । प्रकृतं गुणवृद्धिग्रहणमनुवर्तते । क्व प्रकृतम् । वृद्धिरादैजदेङ्गुण इति । यदि तदनुवर्तते ऽदेङ्गुणो वृद्धिश्चेत्यदेङां वृद्धिसंज्ञापि प्राप्नोति । संबन्धमनुवर्तिष्यते । वृद्धिरादैच् । अदेङ्गुणो वृद्धिरादैच् । तत इको गुणवृद्धी इति । गुणवृद्धिग्रहणमनुवर्तते । आदैजदेङ्ग्रहण निवृत्तम् ॥ अथवा मण्डूकगतयो ऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः ॥ अथवैकयोगः करिष्यते । वृद्धिरादैजदेङ्गुणः । तत इको गुणवृद्धी इति । न चैकयोगे ऽनुवृत्तिर्भवति ॥ अथवान्यवचनाच्चकाराकरणात्प्रकृतापवादो विज्ञायते यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति । अन्यस्याः संज्ञाया वचनाच्चकारस्य चानुकर्षणार्थस्याकरणात्प्रकृताया वृद्धिसंज्ञाया गुणसंज्ञा बाधिका भविष्यति यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति ॥ अथवा वक्ष्यत्येतत् । अनुवर्तन्ते च नाम विधयो न चानुवर्तनादेव भवन्ति । किं तर्हि । यत्नाद्भवन्तीति* ॥ अथवोभय निवृत्तं तदपेक्षिष्यामहे ॥

किं पुनरयमलो ऽन्त्यशेष आहोस्विदलो ऽन्त्यापवादः[†] । कथ चायं तच्छेषः स्यात्कथ वा तदपवादः । यद्येक वाक्य तच्चेदं च अलो ऽन्त्यस्य विधयो भवन्ति इको गुणवृद्धी अलो ऽन्त्यस्येति ततो ऽय तच्छेषः । अथ नाना वाक्यम् अलो ऽन्त्यस्य विधयो भवन्ति इको गुणवृद्धी अन्त्यस्य नानन्त्यस्य चेति ततो ऽयं तदपवादः । कश्चात्र विशेषः ।

वृद्धिगुणावलो ऽन्त्यस्येति चेन्मिदिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम् ॥ ३ ॥

वृद्धिगुणावलो ऽन्त्यस्येति चेन्मिदिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्तव्यम् । मिदेर्गुणः [७ ३ ८२] इक इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ पुगन्तलघूपधस्य गुण[‡] इक इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति । ऋच्छत्यॄतां लिटि गुण[§] इक इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ ऋदृशो ऽङि गुणः [७ ४.१६] इक इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ क्षिप्रक्षुद्रयोर्गुण[‖] इक इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥

---

* ५.२.८* † १.१.५२ ‡ ७.३.८६ § ७.४.११ ‖ ६.४.१५६

सर्वादेशप्रसङ्गश्चानिगन्तस्य || ४ ||

सर्वादेशश्च गुणो ऽनिगन्तस्य प्राप्नोति | याता वाता | किं कारणम् | अलो ऽन्त्यस्येति षष्ठी नैव ह्यन्त्यमिकमुपसक्रान्ता | अङ्गस्येति च स्थानषष्ठी | तद्यदिदानीमनिगन्तमङ्ग तस्य गुण सर्वादेश प्राप्नोति | नैष दोष | यथैव ह्यलो ऽन्त्यस्येति षष्ठ्यन्त्यमिकमुपसक्रान्तैवमङ्गस्येत्यपि स्थानषष्ठी | तद्यदिदानीमनिगन्तमङ्ग तत्र षष्ठ्येव नास्ति कुतो गुण कुत सर्वादेश || एव तर्हि नाय दोषसमुच्चय | किं तर्हि | पूर्वापेक्षो ऽय दोष | सर्वे चाय च पठित* | मिदिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसङ्गो ह्यनिगन्तस्येति | मिदेर्गुण इक इति वचनादन्त्यस्य न | अन्त्यस्येति वचनादिको न | उच्यते च गुण | स सर्वादेश प्राप्नोति | एव सर्वत्र || अस्तु तर्हि तदपवाद |

इग्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेध || ५ ||

इग्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यस्य प्रतिषेधो वक्तव्य | जुसि गुण * | स यथेह भवति अजुहवु अबिभयुरिति एवमनेनिजु पर्यवेविषु अत्रापि प्राप्नोति || सार्वधातुकार्धधातुकयोर्गुण † | स यथेह भवति कर्ता हर्ता नयति तरति भवति एवमीहिता ईहितुमित्यत्रापि प्राप्नोति || ह्रस्वस्य गुण [७ ३ १०८] | स यथेह भवति हे ऽग्ने हे वायो इति एव हे ऽग्निचित् हे सोमसुदित्यत्रापि प्राप्नोति || जसि गुण ‡ | स यथेह भवति अग्नय वायव इति एवमग्निचित सोमसुत इत्यत्रापि प्राप्नोति || ऋतो ङिसर्वनामस्थानयोर्गुण § | स यथेह भवति कर्तरि कर्तारौ कर्तार इति एव सुकृति सुकृतौ सुकृत इत्यत्रापि प्राप्नोति || घेर्ङिति [७ ३. १११] गुण | स यथेह भवति अग्नये वायवे एवमग्निचिते सोमसुत इत्यत्रापि प्राप्नोति || ओर्गुण [६. ४ १४६] | स यथेह भवति बाभ्रव्य माण्डव्य इति एवं सुभुत् सौभुत इत्यत्रापि प्राप्नोति || नैष दोष |

पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम् || ६ ||

पुगन्तलघूपधग्रहणमनन्त्यनियमार्थं भविष्यति || पुगन्तलघूपधस्यैवानन्त्यस्य नान्यस्यानन्त्यस्येति || प्रकृतस्यैष नियम स्यात् | किं च प्रकृतम् | सार्वधातुकार्ध-

* ७ ३ ८३ † ७ ३ ४ ‡ ७ ३ १०९ § ७ ११० || ७ ३ ८५

धातुकयोरिति । तेन भवेदिह नियमान्न स्यात् ईहिता ईहितुम् ईहितव्यमिति । ह्रस्वाद्योर्गुणस्त्वनियतः सो ऽनन्त्यस्यापि प्राप्नोति । अथाप्येवं नियमः स्यात् । पुगन्तलघूपधस्य सार्वधातुकार्धधातुकयोरेवेति । एवमपि सार्वधातुकार्धधातुकयोर्गुणो ऽनियतः सो ऽनन्त्यस्यापि प्राप्नोति । ईहिता ईहितुम् ईहितव्यमिति । अथाप्युभयतो नियमः स्यात् । पुगन्तलघूपधस्यैव सार्वधातुकार्धधातुकयोः सार्वधातुकार्धधातुकयोरेव पुगन्तलघूपधस्येति । एवमप्ययं जुसि गुणो ऽनियतः सो ऽनन्त्यस्यापि प्राप्नोति । अनेनिजुः पर्यवेविषुरिति ॥ एवं तर्हि नायं तच्छेषो नापि तदपवादः । अन्यदेवेदं परिभाषान्तरमसंबद्धमनया परिभाषया । परिभाषान्तरमिति च मत्वा क्रोष्ट्रीयाः पठन्ति । नियमादिको गुणवृद्धी भवतो विप्रतिषेधेनेति । यदि चायं तच्छेषः स्यात्तेनैव तस्यायुक्तो विप्रतिषेधः । अथापि तदपवाद उत्सर्गापवादयोरप्ययुक्तो विप्रतिषेधः । तत्र नियमस्यावकाशः । राज्ञः क च [४.२.१४०] राजकीयम् । इको गुणवृद्धी इत्यस्यावकाशः । चयनम् चायकः लवनम् लावक इति । इहोभयं प्राप्नोति । मेद्यति मार्ष्टीति । इको गुणवृद्धी इत्येतद्भवति विप्रतिषेधेन । नैष युक्तो विप्रतिषेधः । विप्रतिषेधे हि परमित्युच्यते* पूर्वश्चायं योगः परो नियमः । इष्टवाची परशब्दः । विप्रतिषेधे परं यदिष्टं तद्भवतीति । एवमप्ययुक्तो विप्रतिषेधः । द्विकार्ययोगो हि विप्रतिषेधो न चात्रैको द्विकार्ययुक्तः । नावश्यं द्विकार्ययोग एव विप्रतिषेधः । किं तर्हि । असंभवो ऽपि । स चास्त्यत्रासंभवः । को ऽसावसंभवः । इह तावद्वृक्षेभ्यः प्लक्षेभ्य इत्येकः स्थानी द्वावादेशौ† । न चास्ति संभवो यदेकस्य स्थानिनो द्वावादेशौ स्याताम् । इहेदानीं मेद्यति मेद्यतः मेद्यन्तीति द्वौ स्थानिनावेक आदेशः । न चास्ति संभवो यद्द्वयोः स्थानिनोरेक आदेशः स्यादित्येषो ऽसंभवः । सत्येतस्मिन्नसंभवे युक्तो विप्रतिषेधः । एवमप्ययुक्तो विप्रतिषेधः । द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवत्यनवकाशश्चायं योगः । ननु चेदानीमेवास्यावकाशः प्रक्लृप्तः । चयनम् चायकः लवनम् लावक इति । अत्रापि नियमः प्राप्नोति । यावता नाप्राप्ते नियमे ऽय योग आरभ्यते ऽतस्तदपवादो ऽयं योगो भवति । उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः । अथापि कथंचिदिको गुणवृद्धी इत्यस्यावकाशः स्यादेवमपि यथेह विप्रतिषेधादिको गुणो भवति मेद्यति मेद्यतः मेद्यन्ति एवमिहापि स्यात् अनेनिजुः पर्यवेविषुरिति ॥ एवं तर्हि वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयादिक इत्येतत्तत्रोपस्थितं द्रष्टव्यम् । किं कृतं भवति । द्वितीया षष्ठी प्रादुर्भाव्यते । तत्र कामचारो गृह्यमाणेन येषां विशेषयि-

* १.४.२ † [illegible] १०१, १०२

तुमिको वा गृह्यमाणम् । यावता कामचार इह तावन्मिदिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेनेक विशेषयिष्यामः । एतेषां य इगिति । इहेदानीं जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्विका गृह्यमाणं विशेषयिष्यामः । एतेषां गुणो भवतीकः । इगन्तानामिति ॥ अथवा सर्वत्रैवात्र स्थानी निर्दिश्यते । इह तावन्मिदेरित्यविभक्तिको निर्देशः । मिद ए. मिदेः मिदेरिति । अथवा षष्ठीसमासो भविष्यति । मिद इः मिदिः मिदेरिति ॥ पुगन्तलघूपधस्येति नैवं विज्ञायते पुगन्तस्याङ्गस्य लघूपधस्य चेति । कथं तर्हि । पुक्यन्तः पुगन्तः । लघ्व्युपधा लघूपधा । पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति । अवश्यं चैतदेवं विज्ञेयम् । अङ्गविशेषणे हि सतीह प्रसज्येत भिनत्ति छिनत्तीति ॥ ऋच्छेरपि प्रश्लिष्टनिर्देशो ऽयम् । ऋच्छति ऋ ऋ ऋताम् ऋच्छत्यृतामिति ॥ दृशेरपि योगविभागः करिष्यते । उराडि गुणः । उरड्डि गुणो भवति । ततो दृशेः । दृशेश्चाडि गुणो भवति । उरित्येव ॥ क्षिप्रक्षुद्रयोरपि यणादिपरं गुण इतीयता सिद्धम् । सो ऽयमेव सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनमिको यथा स्यादनिको मा भूदिति ॥

अथ वृद्धिग्रहणं किमर्थम् । किं विशेषेण वृद्धिग्रहणं चोद्यते न पुनर्गुणग्रहणमपि । यदि किंचिद्गुणग्रहणस्य प्रयोजनमस्ति वृद्धिग्रहणस्यापि तद्भवितुमर्हति । को वा विशेषः । अयमस्ति विशेषः । गुणविधौ न कचित्स्थानी निर्दिश्यते । तत्रावश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यम् । वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते ॥ अचो ञ्णिति [७ २ ११५] । अत उपधायाः [११६] । तद्धितेष्वचामादेः [११७] इति ॥ अत उत्तरं पठति ।

वृद्धिग्रहणमुत्तरार्थम् ॥ ७ ॥

वृद्धिग्रहणं क्रियत उत्तरार्थम् । क्ङिति [१.१.५] इति प्रतिषेधं वक्ष्यति स वृद्धेरपि यथा स्यात् । कश्चेदानीं क्ङित्प्रत्ययेषु वृद्धेः प्रसङ्गो यावता ञ्णितीत्युच्यते । तत्र मृज्यर्थम् । मृजेर्वृद्धिरविशेषेणोच्यते* सा क्ङिति मा भूत् । मृष्टः मृष्टवानिति । इहार्थं चापि मृज्यर्थं वृद्धिग्रहणं कर्तव्यम् । मृजेर्वृद्धिरविशेषेणोच्यते सेको यथा स्यादनिको मा भूदिति ।

मृज्यर्थमिति चेद्योगविभागात्सिद्धम् ॥ ८ ॥

मृज्यर्थमिति चेद्योगविभागः करिष्यते । मृजेर्वृद्धिरचः । ततो ञ्णिति । ञ्णिति

* ७ २ ११४.

णिति च वृद्धिर्भवति । अच इत्येव । यद्यचो वृद्धिरुच्यते न्यमार्ट् अटो ऽपि वृद्धिः प्राप्नोति ।

अटि चोक्तम् ॥ ९ ॥

किमुक्तम् । अनन्त्यविकारे ऽन्त्यसदेशस्य कार्यं भवतीति* ॥

वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात् ॥ १० ॥

वृद्धेस्तु प्रतिषेधो नोपपद्यते । किं कारणम् । इक्प्रकरणात् । इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधो न चैव सति मृजेरिग्लक्षणा वृद्धिर्भवति । तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या ॥

एवं तर्हीहान्ये वैयाकरणा मृजेरजादौ सङ्क्रमे विभाषा वृद्धिमारभन्ते । परिमृजन्ति परिमार्जन्ति । परिमृजन्तु परिमार्जन्तु । परिममृजतु परिममार्जतुरित्याद्यर्थम् । तदिहापि साध्यम् । तस्मिन्साध्ये योगविभागः करिष्यते । मृजेर्वृद्धिरचो भवति । ततो ऽचि क्ङिति । अजादौ च क्ङिति मृजेर्वृद्धिर्भवति । परिमार्जन्ति परिमार्जन्तु । किमर्थमिदम् । नियमार्थम् । अजादावेव क्ङिति नान्यत्र । क्वान्यत्र मा भूत् । मृष्टः मृष्टवानिति । ततो वा । वाचि क्ङिति मृजेर्वृद्धिर्भवति । परिमृजन्ति परिमार्जन्ति । परिममृजतुः परिममार्जतुरिति ॥ इहार्थमेव तर्हि सिज्ग्रहणं वृद्धिग्रहणं कर्तव्यम् । सिचि वृद्धिरविशेषेणोच्यते सेको यथा स्यादनिको मा भूदिति । कस्य पुनरनिकः प्राप्नोति । अकारस्य । अचिकीर्षीत् अजिहीर्षीत् । नैतदस्ति । लोपो ऽत्र बाधको भविष्यति† ॥ आकारस्य तर्हि प्राप्नोति । अयासीत् अवासीत् । नास्त्यत्र विशेषः सत्यां वृद्धावसत्यां वा ॥ सन्ध्यक्षरस्य तर्हि प्राप्नोति । नैव सन्ध्यक्षरमन्त्यमस्ति । ननु चेदमस्ति ढलोपे कृते उदवोढाम् उदवोढम् उदवोढेति§ । नैतदस्ति । असिद्धो ढलोपस्तस्यासिद्धत्वान्नैतदन्त्यं भवति ॥ व्यञ्जनस्य तर्हि प्राप्नोति । अभैत्सीत् अच्छैत्सीत् । हलन्तलक्षणा वृद्धिर्बाधिका भविष्यति‖ ॥ यत्र तर्हि सा प्रतिषिध्यते¶ । अकोषीत् अमोषीत् । सिचि वृद्धेरप्येष प्रतिषेधः । कथम् । लक्षणं हि नाम ध्वनति भ्रमति मुहूर्तमपि नावतिष्ठते । अथवा सिचि वृद्धिः परस्मैपदेष्विति सिचि वृद्धिः प्राप्नोति । तस्या हलन्तलक्षणा वृद्धिर्बाधिका । तस्या अपि नेटीति प्रतिषेधः । अस्ति पुनः क्वचिदन्यत्राप्यपवादे प्रतिषिद्ध उत्सर्गो ऽपि न भवति । अस्तीत्याह । सुजाते अश्वसूनृते । अध्वर्यो अद्रिभिः सुतम् । शुक्रं ते अन्यदिति । पूर्वरूपत्वे प्रतिषिद्धे ऽयादयो ऽपि न भवन्ति** ॥

---

* १ १ ५६. † ७ २ १ ‡ १ ४ ४८ § ८ ३ १३, ६ ३ १११.
‖ ७ २ ३ ¶ ७ २ ४ ** ६ १ ५८, १०१, ११५

उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम् । सिचि वृद्धिरविशेषेणोच्यते सा क्ङिति मा भूत् । न्यनुवीत् न्यधुवीत्* । नैतदस्ति प्रयोजनम् । अन्तरङ्गत्वादत्रोवङादेशे कृते ऽनन्त्यत्वाद्वृद्धिर्न भविष्यति ॥ यदि तर्हि सिच्यन्तरङ्गं भवति अकार्षीत् अहार्षीत् गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति । मा भूदेवम् । हलन्तस्येत्येवं भविष्यति ॥ इह तर्हि न्यस्तारीत् व्यदारीत् गुणे रपरत्वे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति हलन्तलक्षणायाश्च नेटीति प्रतिषेधः । मा भूदेवम् । ल्रान्तस्य [७ २ २] इत्येव भविष्यति ॥ इह तर्हि अलावीत् अपावीत् गुणे कृते ऽवादेशे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति हलन्तलक्षणायाश्च नेटीति प्रतिषेधः । मा भूदेवम् । ल्रान्तस्येत्येव भविष्यति । ल्रान्तस्येत्युच्यते न चेदं ल्रान्तम् । ल्रान्तस्येत्यत्र वकारो ऽपि निर्दिश्यते । किं वकारो न श्रूयते । लुप्तनिर्दिष्टो वकारः ॥ यद्येवं मा भवानवीत् मा भवान्मवीत् अत्रापि प्राप्नोति । अविमवोर्नेति वक्ष्यामि । तद्वक्तव्यम् ।

णिश्विभ्यां तौ निपातव्यौ ।

यद्यप्येतदुच्यते ऽथवैतर्हि णिश्व्योः प्रतिषेधो न वक्तव्यो भवति । गुणे कृते ऽयादेशे च यान्तानां नेत्येव प्रतिषेधो भविष्यति† ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न सिच्यन्तरङ्गं भवतीति यदयमतो हलादेर्लघोः [७ २ ७] इत्यकारग्रहणं करोति । कथं कृत्वा ज्ञापकम् । अकारग्रहणस्यैतत्प्रयोजनमिह मा भूत् अकोपीत् अमोषीत् । यदि सिच्यन्तरङ्गं स्यादकारग्रहणमनर्थकं स्यात् । गुणे कृते ऽलघुत्वाद्वृद्धिर्न भविष्यति । पश्यति त्वाचार्यो न सिच्यन्तरङ्गं भवतीति ततो ऽकारग्रहणं करोति । नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्र गुणः प्रतिषिध्यते तदर्थमेतत्स्यात् न्यकुटीत् न्यपुटीदिति । यत्तर्हि णिश्व्योः प्रतिषेधं शास्ति† तेन नेहान्तरङ्गमस्तीति दर्शयति । यच्च करोत्यकारग्रहणं लघोरिति कृते ऽपि ॥

तस्मादिग्लक्षणा वृद्धिः ॥ ११ ॥

तस्मादिग्लक्षणा वृद्धिरास्थेया ॥

षष्ठ्या स्थानेयोगत्वादिग्निवृत्तिः ॥ १२ ॥

षष्ठ्याः स्थानेयोगत्वात्सर्वेषामिकां निवृत्तिः प्राप्नोति । अस्यापि प्राप्नोति । दधि मधु । पूर्वत्रापीदानीं किमर्थं स्यात् ।

---

* १ २ १ † ७ २ ५

अन्यतरार्थं पुनर्वचनम् || १३ ||

अन्यतरार्थमेतत्स्यात् | सार्वधातुकार्धधातुकयोर्गुण एवेति ||

प्रसारणे च || १४ ||

प्रसारणे च सर्वेषां यणां निवृत्तिः प्राप्नोति* | अस्यापि प्राप्नोति | याता वाता | पुनर्वचनमिदानीं किमर्थं स्यात् |

विषयार्थं पुनर्वचनम् || १५ ||

विषयार्थमेतत्स्यात् | वचिस्वपियजादीनां कित्येवेति† ||

उरण्परे च || १६ ||

उरण्परे च सर्वकाराणां निवृत्तिः प्राप्नोति‡ | अस्यापि प्राप्नोति | कर्तृ हर्तृ ||

सिद्धं तु षष्ठ्यधिकारे वचनात् || १७ ||

सिद्धमेतत् | कथम् | षष्ठ्यधिकार इमे योगाः कर्तव्याः | एकस्तावत्क्रियते तत्रैव | इमावपि योगौ षष्ठ्यधिकारमनुवर्तिष्येते || अथवा षष्ठ्यधिकार इमौ योगावपेक्षिष्यामहे || अथवेदं तावदयं प्रष्टव्यः | सार्वधातुकार्धधातुकयोर्गुणो भवतीतीह कस्मान्न भवति | याता वाता | इदं तत्रापेक्षिष्यत इको गुणवृद्धी इति | यथैव तर्हीदं तत्रापेक्षिष्यत एवमिहापि तदपेक्षिष्यामहे | सार्वधातुकार्धधातुकयोरिको गुणवृद्धी इति ||

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ||

---

* १. १. ४५ † ६ १ १५. ‡ १ १ ५१

न धातुलोप आर्धधातुके ॥ १ । १ । ४ ॥

धातुग्रहणं किमर्थम् । इह मा भूत् । लूञ् लविता लवितुम् । पूञ् पविता पवितुम् ॥ आर्धधातुक इति किमर्थम् । त्रिधा बद्धो वृषभो रोरवीति ॥ किं पुनरिदमार्धधातुकग्रहणं लोपविशेषणम् । आर्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवत इति । आहोस्विद्गुणवृद्धिविशेषणमार्धधातुकग्रहणम् । धातुलोपे सत्यार्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति । किं चातः । यदि लोपविशेषणमुपेद्धः प्रेद्धः अत्रापि प्राप्नोति । अथ गुणवृद्धिविशेषणं क्नोपयतीत्यत्रापि प्राप्नोति । यथेच्छसि तथास्तु । अस्तु लोपविशेषणम् । कथमुपेद्धः प्रेद्ध इति । बहिरङ्गो गुणो ऽन्तरङ्गः प्रतिषेधः । असिद्धं बहिरङ्गमन्तरङ्गे । यद्येवं नार्थो धातुग्रहणेन । इह कस्मान्न भवति । लूञ् लविता लवितुम् । आर्धधातुकनिमित्ते लोपे प्रतिषेधो न चैष आर्धधातुकनिमित्तो लोपः ॥ अथवा पुनरस्तु गुणवृद्धिविशेषणम् । ननु चोक्तं क्नोपयतीत्यत्रापि प्राप्नोतीति । नैष दोषः । निपातनात्सिद्धम् । किं निपातनम् । चेले क्नोपेः [३.४.३३] इति ॥

परिगणनं कर्तव्यम् ।

यङ्यक्क्यवलोपे प्रतिषेधः ॥ १ ॥

यङ्यक्क्यवलोपे प्रतिषेधो वक्तव्यः । यङ् । बेभिदिता* मरीमृजः† । यक् । कुषुभिता मगधकः । क्य । समिधिता वृषदकः‡ । वलोपे । जीरदानुः§ ॥ किं प्रयोजनम् ।

नुम्लोपश्विव्यनुबन्धलोपे ऽप्रतिषेधार्थम् ॥ २ ॥

नुम्लोपे श्विव्यनुबन्धलोपे च प्रतिषेधो मा भूदिति । नुम्लोपे । अभाजि‖ रागः¶ उपबर्हणम्** । श्विवेः आश्वेमाणम् । अनुबन्धलोपे । लूञ् लविता लवितुम् ॥ यदि परिगणनं क्रियते स्यदः प्रश्रथः हिमश्रथ इत्यत्रापि प्राप्नोति । वक्ष्यत्येतत् । निपातनात्स्यदादिष्विति ॥ तत्तर्हि परिगणनं कर्तव्यम् । न कर्तव्यम् । नुम्लोपे कस्मान्न भवति ।

इक्प्रकरणान्नुम्लोपे वृद्धिः ॥ ३ ॥

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधो न चैषेग्लक्षणा वृद्धिः ॥ यदीग्लक्षणयोर्गुण-

---

* ६.४.४९ † ७.४.९१ ‡ ६.४.५० § ६.१.६६ ‖ ६.४.३३ ¶ ६.४.२७ ** ७.१.५९

वृद्ध्योः प्रतिषेधः स्यदः प्रश्रथः हिमश्रथ इत्यत्र न प्राप्नोति । इह च प्राप्नोति । अवोदः एधः ओद्म इति ।

निपातनात्स्यदादिषु ॥ ४ ॥

निपातनात्स्यदादिषु प्रतिषेधो भविष्यति न च भविष्यति* ॥ यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः लिव्यनुबन्धलोपे कथम् । लिवेः आस्रेमाणम् । लूञ् लविता ।

प्रत्ययाश्रयत्वादन्यत्र सिद्धम् ॥ ५ ॥

आर्धधातुकनिमित्ते लोपे प्रतिषेधो न चैष आर्धधातुकनिमित्तो लोपः ॥ यद्यार्धधातुकनिमित्ते लोपे प्रतिषेधो जीरदानुः अत्र न प्राप्नोति ।

रकि ज्यः प्रसारणम् ॥ ६ ॥

नैतज्जीवे रूपम् । रक्येतज्ज्यः प्रसारणम् । यावता चेदानीं रकि जीवेरपि सिद्धं भवति ॥ कथमुपबर्हणम् । बृहिः प्रकृत्यन्तरम् । कथं ज्ञायते बृहिः प्रकृत्यन्तरमिति । अचीति हि लोप उच्यते । अनजादावपि दृश्यते । निबृह्यते । अनिटीति चोच्यते । इडादावपि दृश्यते । निबर्हिता निबर्हितुमिति । अजादावपि न दृश्यते । बृंहयति बृंहकः ॥ तस्मान्नार्थः परिगणनेन ॥ यदि परिगणनं न क्रियते मेद्यते छेद्यते अत्रापि प्राप्नोति । नैष दोषः । धातुलोप इति नैवं विज्ञायते धातोर्लोपो धातुलोपो धातुलोप इति । कथं तर्हि । धातोर्लोपो ऽस्मिंस्तदिदं धातुलोपं धातुलोप इति ॥ तस्मादिग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः ॥ यदि तर्हीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः पापचकः पापठकः मगधकः वृषदकः अत्र न प्राप्नोति ।

अल्लोपस्य स्थानिवत्त्वात्

अकारलोपे कृते† तस्य स्थानिवत्त्वाद्गुणवृद्धी न भविष्यतः ॥

अनारम्भो वा ॥ ७ ॥

अनारम्भो वा पुनरस्य योगस्य न्याय्यः । कथं बेभिदिता मरीमृजकः कुसुभिता समिधितेति । अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः ॥ यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः । क्व च स्थानिवद्भावो नास्ति । यत्र हलचोरादेशः । लोलुवः पोपुवः मरीमृजः सरीसृप इति ।

* १.१.४६. † १.१.५७.

अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद्गुणवृद्धी न भविष्यतः । लुकि कृते* न प्राप्नोति । इदमिह सम्प्रधार्यम् । लुक्क्रियतामल्लोप इति किमत्र कर्तव्यम् । परत्वादल्लोपः । नित्यो लुक् । कृते ऽप्यल्लोपे प्राप्नोत्यकृते ऽपि प्राप्नोति । लुगप्यनित्यः । कथम् । अन्यस्य कृते ऽल्लोपे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । अनवकाशस्तर्हि लुक् । सावकाशो लुक् । को ऽवकाशः । अवशिष्टः । अथापि कथंचिदनवकाशो लुक्स्यादेवमपि न दोषः । अल्लोपे योगविभागः करिष्यते । अतो लोपः । ततो यस्य । यस्य च लोपो भवति । अत इत्येव । किमर्थमिदम् । लुक् वक्ष्यति तद्बाधनार्थम् । ततो हलः । हल उत्तरस्य च यस्य लोपो भवतीति । इहापि तर्हि परत्वाद्योगविभागाद्वा लोपो लुकं बाधेत । कृष्णो नोनाव वृषभो यदीदम् । नोनूयतेर्नोनाव । समानाश्रयो लुग्लोपेन बाध्यते । कथं समानाश्रयः । यः प्रत्ययाश्रयः । अत्र च प्रागेव प्रत्ययोत्पत्तेर्लुग्भवति ॥ कथं स्यदः प्रश्रथ हिमश्रथः जीरदानुः निकुचित इति ।

उक्तं शेषे ॥ ८ ॥

किमुक्तम् । निपातनात्स्यदादिषु । प्रत्ययाश्रयत्वादन्यत्र सिद्धम् । रकि ज्यःप्रसारणमिति । निकुचिते ऽप्युक्तं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति† ॥

क्ङिति च ॥ १।१।५ ॥

क्ङिति प्रतिषेधे तन्निमित्तग्रहणम् ॥ १ ॥

क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम् । क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यम् ॥ किं प्रयोजनम् ।

उपधारोरवीत्यर्थम् ॥ २ ॥

उपधार्थं रोरवीत्यर्थं च । उपधार्थं तावत् । भिन्नः भिन्नवानिति । किं पुनः कारणं न सिध्यति । क्ङितीत्युच्यते । तेन यत्र क्ङित्यनन्तरो गुणभाव्यस्ति तत्रैव स्यात् । चितम् स्तुतम् । इह तु न स्यात् । भिन्नः भिन्नवानिति ॥ ननु च यस्य गुण उच्यते तत्क्ङित्परत्वेन विशेषयिष्यामः । पुगन्तलघूपधस्य च गुण उच्यते‡ तदात्र क्ङित्परम् । पुगन्तलघूपधस्येति नैवं विज्ञायते पुगन्तस्याङ्गस्य लघूपधस्य चेति । कथं

* २ ४ ७४   † १ १ ३९   ‡ ७ ३ ८६

तर्हि । पुक्यन्तः पुगन्तः । लघ्व्युपधा लघूपधा । पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति । अवश्यं चैतदेवं विज्ञेयम् । अङ्गविशेषणे हि सतीह प्रसज्येत । भिनत्ति छिनत्तीति ॥ रोरवीत्यर्थं च । त्रिधा बद्धो वृषभो रोरवीति ॥ यदि तन्निमित्तग्रहणं क्रियते शचङन्ते दोषः । रियति पियति धियति । प्रादुद्रुवत् प्रासुस्रुवत् । अत्र प्राप्नोति ।

शचङन्तस्यान्तरङ्गलक्षणत्वात् ॥ ३ ॥

अन्तरङ्गलक्षणत्वादत्रेयङुवङोः कृतयोरनुपधात्वाद्गुणो न भविष्यति । एवं क्रियते चेदं तन्निमित्तग्रहणं न च कश्चिद्दोषो भवति ॥ इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि । हतः हथः उपोयते औयत लौयमानिः पौयमानिः नेनिक्त इति । नैतानि सन्ति प्रयोजनानि । इह तावत् हतः हथ इति प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुमत्र च धातूपदेशावस्थायामेवाकारः ॥ इह चोपोयते औयत लौयमानिः पौयमानिरिति बहिरङ्गे गुणवृद्धी अन्तरङ्गः प्रतिषेधः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ नेनिक्त* इति परेण रूपेण व्यवहितत्वान्न भविष्यति ॥ उपधार्थेन तावन्नार्थः । धातोरिति वर्तते । धातुं क्ङित्परत्वेन विशेषयिष्यामः । यदि धातुर्विशेष्यते विकरणस्य न प्राप्नोति । चिनुतः सुनुतः लुनीतः पुनीत इति । नैष दोषः । विहितविशेषणं धातुग्रहणम् । धातोर्यो विहित इति । धातोरेव तर्हि न प्राप्नोति । नैवं विज्ञायते धातोर्विहितस्य क्ङितीति । कथं तर्हि । धातोर्विहिते क्ङितीति ॥ अथवा कार्यकालं हि संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । पुगन्तलघूपधस्य गुणो भवतीत्युपस्थितमिदं भवति क्ङिति नेति ॥ अथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणवृद्धी न भविष्यतः ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्युपधालक्षणस्य गुणस्य प्रतिषेध इति यदयं त्रसिगृधिधृषिक्षिपेः क्नुः [३.२.१४०] इको झल्हलन्ताच्च [१. २. ९; १०] इति क्नुसनौ किती करोति । कथं कृत्वा ज्ञापकम् । कित्करण एतत्प्रयोजनं गुणः कथं न स्यादिति । यदि चात्र गुणप्रतिषेधो न स्यात्कित्करणमनर्थकं स्यात् । पश्यति त्वाचार्यो भवत्युपधालक्षणस्य प्रतिषेध इति ततः क्नुसनौ किती करोति ॥ रोरवीत्यर्थेनापि नार्थः । क्ङितीत्युच्यते न चात्र क्ङितं पश्यामः । प्रत्ययलक्षणेन प्राप्नोति । न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः । अथापि न लुमताङ्गस्येत्युच्यते । एवमपि न दोषः । कथम् । न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते । किं तर्हि । यो ऽसौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न भवतीति । अथाप्यङ्गाधिकारः प्रतिनिर्दिश्यते । एव-

मपि न दोषः । कथम् । कार्यकालं हि संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । सार्वधातुकार्धधातुकयोर्गुणो भवतीत्युपस्थितमिदं भवति क्ङिति नेति ॥ अथवा छान्दसमेतदृष्टानुविधिश्च च्छन्दसि भवति ॥ अथवा बहिरङ्गो गुणो ऽन्तरङ्गः प्रतिषेधः । असिद्धं बहिरङ्गमन्तरङ्गे ॥ अथवा पूर्वस्मिन्योगे यदार्धधातुकग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणो भविष्यति ॥

इह कस्मान्न भवति । लैगवायनः* कामयते† ।

तद्धितकाम्योरिक्प्रकरणात् ॥ ४ ॥

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधो न चैते इग्लक्षणे ॥

लकारस्य ङित्वादादेशेषु स्थानिवद्भावप्रसङ्गः । लकारस्य ङित्वादादेशेषु स्थानिवद्भावः प्राप्नोति । अचिनवम् असुनवम् अकरवम् ।

लकारस्य ङित्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम् ॥ ५ ॥

यदयं यासुटो ङिद्वचनं शास्ति‡ तज्ज्ञापयत्याचार्यो न ङिदादेशा ङितो भवन्तीति । यद्येतज्ज्ञाप्यते कथं नित्यं ङितः [३.४.९९] इतश्च [१००] इति । ङितो यत्कार्यं तद्भवति ङिति यत्कार्यं तन्न भवतीति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । यासुट एव ङिद्वचनात् । अपर्याप्तश्चैव हि यासुट् समुदायस्य ङित्त्वे ङितं चैनं करोति । तस्यैतत्प्रयोजनं ङितो यत्कार्यं तद्यथा स्यात् । ङिति यत्कार्यं तन्मा भूदिति ॥

दीधीवेवीटाम् ॥ १ । १ । ६ ॥

किमर्थमिदमुच्यते । गुणवृद्धी मा भूतामिति । आदीध्यनम् आदीध्यकः । आवेव्यनम् आवेव्यक इति ॥ अयं योगः शक्यो ऽकर्तुम् । कथम् ।

दीधीवेव्योश्छन्दोविषयत्वाद्दृष्टानुविधित्वाच्च च्छन्दसो ऽदीधेददीधयुरिति च गुणदर्शनादप्रतिषेधः ॥ १ ॥

दीधीवेव्योश्छन्दोविषयत्वात् । दीधीवेव्यौ छन्दोविषयौ । दृष्टानुविधित्वाच्च च्छन्दसः । दृष्टानुविधिश्च च्छन्दसि भवति । अदीधेददीधयुरिति च गुणस्य दर्शनादप्-

* ४.१.९९, ८.४.१४८ † १.२.१०, ७.२ ११४ ‡ ३.४.१०२.

तिषेधः | अनर्थकः प्रतिषेधो ऽप्रतिषेधः | प्रजापतिर्वै यत्किंचन मनसादीधेत् | होत्राय वृतः कृपयन्नदीधेत् | अदीधयुर्दाशराज्ञे वृतासः || भवेदिदं युक्तमुदाहरणम् अदीधेदिति | इदं त्वयुक्तम् अदीधयुरिति | अयं जुसि गुणः* प्रतिषेधविषय आरभ्यते | स यथैव क्ङिति नेत्येतं प्रतिषेधं बाधत एवमिममपि बाधते | नैष दोषः | जुसि गुणः प्रतिषेधविषय आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते | कश्च तुल्यजातीयः प्रतिषेधः | यः प्रत्ययाश्रयः | प्रकृत्याश्रयश्चायम् | अथवा येन नाप्राप्ते तस्य बाधनं भवति | न चाप्राप्ते क्ङिति नेत्येतस्मिन्प्रतिषेधे जुसि गुण आरभ्यते | अस्मिन्पुनः प्राप्ते चाप्राप्ते च || यदि तर्ह्ययं योगो नारभ्यते कथं दीध्यदिति |

दीध्यदिति श्यन्व्यत्ययेन || २ ||

दीध्यदिति श्यन्नेष व्यत्ययेन भविष्यति ||

इटश्चापि ग्रहणं शक्यमकर्तुम् | कथमकणिषम् अरणिषम् कणिता श्वः रणिता श्व इति | आर्धधातुकस्येड्वलादेः [७.२.३५] इत्यत्रेडिति वर्तमाने† पुनरिड्ग्रहणस्य प्रयोजनमिडेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति | किं चान्यत्प्राप्नोति | गुणः | यदि नियमः क्रियते पिपठिषतेरप्रत्ययः पिपठीः दीर्घत्वं‡ न प्राप्नोति | नैष दोषः | आङ्गं यत्कार्यं तन्नियम्यते न चैतदाङ्गम् | अथवासिद्धं दीर्घत्वं तस्यासिद्धत्वान्नियमो न भवति ||

हलो ऽनन्तराः संयोगः || १ | १ | ७ ||

अनन्तरा इति कथमिदं विज्ञायते | अविद्यमानमन्तरमेषामिति | आहोस्विदविद्यमाना अन्तरैषामिति | किं चातः | यदि विज्ञायते अविद्यमानमन्तरमेषामित्यवमहे संयोगसंज्ञा न प्राप्नोति | अप् स्वित्यप्स्विति | विद्यते ह्यत्रान्तरम् | अथ विज्ञायते अविद्यमाना अन्तरैषामिति न दोषो भवति | यथा न दोषस्तथास्तु | अथवा पुनरस्त्वविद्यमानमन्तरमेषामिति | ननु चोक्तमवग्रहे संयोगसंज्ञा न प्राप्नोति अप् स्वित्यप्स्विति विद्यते ह्यत्रान्तरमिति | नैष दोषो न प्रयोजनम् ||

संयोगसञ्ज्ञायां सहवचनं यथान्यत्र || १ ||

संयोगसंज्ञायां सहग्रहणं कर्तव्यम् | हलो ऽनन्तराः संयोगः सहेति वक्तव्यम् |

* ७.३.८३. † ७.२.८. ‡ ८.२.७७.

किं प्रयोजनम् । सहभूतानां संयोगसंज्ञा यथा स्यादेकैकस्य मा भूदिति । यथान्यत्र । तद्यथान्यत्रापि यत्रेच्छति सहभूतानां कार्यं करोति तत्र सहग्रहणम् । तद्यथा । सह सुपा [२.१.४] । उभे अभ्यस्तं सहेति* । किं च स्याद्यद्येकैकस्य हलः संयोगसंज्ञा स्यात् । इह निर्यायात् निर्वायात् वान्यस्य संयोगादेः [६.४.६८] इत्येत्त्वं प्रसज्येत । इह च संहृषीष्टेत्यृतश्च संयोगादेः [७.२.४३] इतीट् प्रसज्येत । इह च संह्रियत इति गुणोऽर्तिसंयोगाद्योः [७.४.२९] इति गुणः प्रसज्येत । इह च दृषत्करोति समित्करोतीति संयोगान्तस्य लोपः प्रसज्येत† । इह च शक्ता वस्तेति स्कोः संयोगाद्योः [८.२.२९] इति लोपः प्रसज्येत । इह च निर्यातः निर्वातः संयोगादेरातो धातोर्यण्वतः [८.२.४३] इति निष्ठानत्वं प्रसज्येत ॥ नैष दोषः । यत्तावदुच्यत इह तावन्निर्यायात् निर्वायात् वान्यस्य संयोगादेरित्येत्त्वं प्रसज्येतेति नैवं विज्ञायते संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति । कथं तर्हि । संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति । एवं तावत्सर्वमाङ्गं परिहृतम् ॥ यदप्युच्यत इह च दृषत्करोति समित्करोतीति संयोगान्तस्य लोपः प्रसज्येतेति नैवं विज्ञायते संयोगोऽन्तो यस्य तदिदं संयोगान्तं संयोगान्तस्येति । कथं तर्हि । संयोगावन्तावस्य तदिदं संयोगान्तं संयोगान्तस्येति ॥ यदप्युच्यत इह च शक्ता वस्तेति स्कोः संयोगाद्योरन्ते चेति लोपः प्रसज्येतेति नैवं विज्ञायते संयोगावादी संयोगादी संयोगाद्योरिति । कथं तर्हि । संयोगयोरादी संयोगादी संयोगाद्योरिति ॥ यदप्युच्यत इह च निर्यातः निर्वात इति संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं प्रसज्येतेति नैवं विज्ञायते संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति । कथं तर्हि । संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति ॥ अथ क्रियमाणेऽपि वै सहग्रहणे प्रत्येकं संयोगसंज्ञा प्राप्नोति । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । तद्यथा । वृद्धिगुणसंज्ञे प्रत्येकं भवतः । ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । सत्येतस्मिन्दृष्टान्ते यदि तत्र प्रत्येकमित्युच्यत इहापि सहग्रहणं कर्तव्यम् । अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं वृद्धिगुणसंज्ञे भवत इहापि नार्थः सहग्रहणेन ॥

अथ यत्र बहूनामानन्तर्यं किं तत्र द्वयोर्द्वयोः संयोगसंज्ञा भवत्याहोस्विदविशेषेण । कश्चात्र विशेषः ।

---

* ६.१.५. † ८.२.२३.

समुदाये संयोगादिलोपो मस्जेः ॥ २ ॥

समुदाये संयोगादिलोपो मस्जेर्न सिध्यति । मङ्क्ता मङ्क्तुम्* ॥ इह च निर्ग्लेयात् निर्ग्लायात् निर्म्लेयात् निर्म्लायात् वान्यस्य संयोगादेरित्येत्वं न प्राप्नोति । इह च संस्वरिषीष्टेत्यृतश्च संयोगादेरितीण्न प्राप्नोति । इह च सस्वर्यत इति गुणो ऽर्तिसंयोगाद्योरिति गुणो न प्राप्नोति । इह च गोमान्करोति यवमान्करोतीति संयोगान्तस्य लोप इति लोपो न प्राप्नोति । इह च निर्ग्लानः निर्म्लान इति संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं न प्राप्नोति ॥ अस्तु तर्हि द्वयोर्द्वयोः संयोग. ।

द्वयोर्हलोः संयोग इति चेद्द्विर्वचनम् ॥ ३ ॥

द्वयोर्हलोः संयोग इति चेद्द्विर्वचनं न सिध्यति । इन्द्रमिच्छति इन्द्रीयति । इन्द्रीयतेः सन् इन्दिद्रीयिषति । न न्द्राः संयोगादय· [६.१.३] इति दकारस्य द्विर्वचनं न प्राप्नोति ॥

न वाज्विधेः ॥ ४ ॥

न वैष दोषः । किं कारणम् । अज्विधेः । न्द्राः संयोगादयो न द्विरुच्यन्ते । अजादेरिति वर्तते† ॥ अथ यद्येव बहूनां संयोगसंज्ञायापि द्वयोर्द्वयोः किं गतमेतदियता सूत्रेणाहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम् । गतमित्याह । कथम् । यदा तावद्बहूनां संयोगसंज्ञा तदैव विग्रहः करिष्यते । अविद्यमानमन्तरमेषामिति । यदा द्वयोर्द्वयोस्तदैव विग्रहः करिष्यते । अविद्यमाना अन्तरैषामिति । द्वयोश्चैवान्तरा कश्चिद्द्रियते वा न वा । एवमपि बहूनामेव प्राप्नोति । यान्हि भवानत्र पञ्च्या प्रतिनिर्दिशत्येतेषामन्येन व्यवाये न भवितव्यम् । अस्तु तर्हि समुदाये संज्ञा । ननु चोक्तं समुदाये संयोगादिलोपो मस्जेरिति । नैष दोषः । वक्ष्यत्येतत् । अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थमिति‡ ॥ अथवाविशेषेण संयोगसंज्ञा विज्ञास्यते द्वयोरपि बहूनामपि । तत्र द्वयोर्या संयोगसंज्ञा तदाश्रयो लोपो भविष्यति ॥ यदप्युच्यत इह च निर्ग्लेयात् निर्ग्लायात् निर्म्लेयात् निर्म्लायात् वान्यस्य संयोगादेरित्येत्वं न प्राप्नोतीत्यङ्गेन संयोगादिं विशेषयिष्यामः । अङ्गस्य संयोगादेरिति । एवं तावत्सर्वमाङ्गं परिहृतम् ॥ यदप्युच्यत इह च गोमान्करोति यवमान्करोतीति संयोगान्तस्य लोप इति लोपो न प्राप्नोतीति पदेन संयोगान्तं विशेषयिष्यामः । पदस्य संयोगान्तस्येति ॥ यदप्युच्यत इह च निर्ग्लानः निर्म्लान इति संयोगादेरातो

* ७.१.६०, ८.२.२९. † १.१.१ ‡ [illegible]

धातोर्यण्वत इति निष्ठानत्व न प्राप्नोतीति धातुना संयोगादि विशेषयिष्याम | धातो सयोगादेरिति ||

स्वरानन्तर्हितवचनम् || ९ ||

स्वरैरनन्तर्हिता हल सयोगसज्ञा भवन्तीति वक्तव्यम् | किं प्रयोजनम् | व्यवहितानां मा भूत् | पचति पनसम् || ननु चानन्तरा इत्युच्यते तेन व्यवहितानां न भविष्यति |

दृष्टमानन्तर्यं व्यवहितेऽपि || ६ ||

व्यवहितेऽप्यनन्तरशब्दो दृश्यते | तद्यथा | अनन्तराविमौ ग्रामावित्युच्यते तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवन्ति || यदि तर्हि व्यवहितेऽप्यनन्तरशब्दो भवत्यानन्तर्यवचनमिदानीं किमर्थं स्यात् |

आनन्तर्यवचन किमर्थमिति चेदेकप्रतिषेधार्थम् || ७ ||

एकस्य हल सयोगसज्ञा मा भूदिति | किं च स्याद्यद्येकस्य हल सयोगसज्ञा स्यात् | इयेष उवोष | इजादेश्च गुरुमतोऽनृच्छ [३ १ ३६] इत्याम्प्रसज्येत ||

न वातज्जातीयव्यवायात् || ८ ||

न वैष दोष | किं कारणम् | अतज्जातीयस्य व्यवायात् | अतज्जातीयकं हि लोके व्यवधायकं भवति | कथ पुनर्ज्ञायते ऽतज्जातीयक लोके व्यवधायकं भवतीति | एवं हि कश्चित्कश्चित्पृच्छति | अनन्तरे एते ब्राह्मणकुले इति | स आह | नानन्तरे वृषलकुलमनयोरन्तरेति | किं पुन कारणं क्वचिदतज्जातीयक व्यवधायक भवति क्वचिन्न | सर्वत्रैव ह्यतज्जातीयक व्यवधायक भवति | कथमनन्तराविमौ ग्रामाविति | ग्रामशब्दोऽयं बह्वर्थः | अस्त्येव शालासमुदाये वर्तते | तद्यथा | ग्रामो दग्ध इति | अस्ति वाटपरिक्षेपे वर्तते | तद्यथा | ग्राम प्रविष्ट इति | अस्ति मनुष्येषु वर्तते | तद्यथा | ग्रामो गतो ग्राम आगत इति | अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते | तद्यथा | ग्रामो लब्ध इति | तद्य सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते ऽनन्तराविमौ ग्रामाविति | सर्वत्रैव ह्यतज्जातीयक व्यवधायक भवति ||

मुखनासिकावचनोऽनुनासिकः || १ | १ | ८ ||

किमिदं मुखनासिकावचना इति | मुख च नासिका च मुखनासिकम् | मुख

नासिकं वचनमस्य सो ऽयं मुखनासिकावचनः । यद्येवं मुखनासिकवचन इति प्राप्नोति । निपातनाद्दीर्घत्वं भविष्यति ॥ अथवा मुखनासिकमावचनमस्य सो ऽयं मुखनासिकावचनः । अथ किमिदमावचनमिति । ईषद्वचनमावचनं किंचिन्मुखवचनं किंचिन्नासिकावचनम् ॥ मुखद्वितीया वा नासिका वचनमस्य सो ऽयं मुखनासिकावचनः । मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः ॥ अथ मुखग्रहणं किमर्थम् । नासिकावचनो ऽनुनासिक इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत । मुखग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ नासिकाग्रहणं किमर्थम् । मुखवचनो ऽनुनासिक इतीयत्युच्यमाने कचटतपानामेव प्रसज्येत । नासिकाग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ मुखग्रहणं शक्यमकर्तुम् । केनेदानीमुभयवचनानां भविष्यति । प्रासादवासिन्यायेन । तद्यथा । केचित्प्रासादवासिनः केचिद्भूमिवासिनः केचिदुभयवासिनः । ये प्रासादवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन । ये भूमिवासिनो गृह्यन्ते ते भूमिवासिग्रहणेन । य उभयवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च । एवमिहापि केचिन्मुखवचनाः केचिन्नासिकावचनाः केचिदुभयवचनाः । तत्र ये मुखवचना गृह्यन्ते ते मुखग्रहणेन । ये नासिकावचना गृह्यन्ते ते नासिकाग्रहणेन । य उभयवचना गृह्यन्त एव ते मुखग्रहणेन नासिकाग्रहणेन च । भवेदुभयवचनानां सिद्धं यमानुस्वाराणामपि प्राप्नोति । नैष दोषो न प्रयोजनम् ॥ इतरेतराश्रयं तु भवति । केतरेतराश्रयता । सतो ऽनुनासिकस्य संज्ञया भवितव्यं संज्ञया च नामानुनासिको भाव्यते तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ।

अनुनासिकसंज्ञायामितरेतराश्रय उक्तम् ॥ १ ॥

किमुक्तम् । सिद्धं तु नित्यशब्दत्वादिति* । नित्याः शब्दा नित्येषु च शब्देषु सतो ऽनुनासिकस्य संज्ञा क्रियते न संज्ञयानुनासिको भाव्यते । यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रम् । किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् । निवर्तकं शास्त्रम् । कथम् । आङस्मा अविशेषेणोपदिष्टो ऽननुनासिकः । तस्य सर्वत्रानुनासिकबुद्धिः प्रसक्ता । तत्रानेन निवृत्तिः क्रियते । छन्दस्यचि परत आङो ऽनुनासिकस्य प्रसङ्गे ऽनुनासिकः साधुर्भवतीति† ॥

---

* १.१.१ *   † १ १ ११

तुल्यास्यप्रयत्नं सवर्णम् ॥ १ । १ । ९ ॥

तुलया संमितं तुल्यम् । आस्यं च प्रयत्नश्चास्यप्रयत्नम् । तुल्यास्यं तुल्यप्रयत्नं च सवर्णसंज्ञं भवति ॥ किं पुनरास्यम् । लौकिकमास्यमोष्ठात्प्रभृति प्राक्काकलकात् । कथं पुनरास्यम् । अस्यन्त्यनेन वर्णानित्यास्यम् । अन्नमेतदास्यन्दत इति वास्यम् ॥ अथ कः प्रयत्नः । प्रयतनं प्रयत्नः । प्रपूर्वाद्यततेर्भावसाधनो नङ्प्रत्ययः ॥ यदि लौकिकमास्यं किमास्योपादाने प्रयोजनं सर्वेषां हि तत्तुल्यं भवति । वक्ष्यत्येतत् । प्रयत्नविशेषणमास्योपादानमिति ॥

सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात् ॥ १ ॥

सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति । ज ब ग ड दशाम् । किं कारणम् । प्रयत्नसामान्यात् । एतेषां हि समानः प्रयत्नः ॥

सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम् ॥ २ ॥

सिद्धमेतत् । कथम् । आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति वक्तव्यम् । एवमपि किमास्योपादाने प्रयोजनं सर्वेषां हि तत्तुल्यम् । प्रयत्नविशेषणमास्योपादानम् । सन्ति ह्यास्याद्बाह्याः प्रयत्नाः । ते हापिता भवन्ति । तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिध्यति । के पुनस्ते । विवारसंवारौ । श्वासनादौ । घोषवदघोषता । अल्पप्राणता महाप्राणतेति । तत्र वर्गाणां प्रथमद्वितीया विवृतकण्ठाः श्वासानुप्रदाना अघोषाः । एकेऽल्पप्राणा अपरे महाप्राणाः । तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः । एकेऽल्पप्राणा अपरे महाप्राणाः । यथा तृतीयास्तथा पञ्चमा आनुनासिक्यवर्जम् । आनुनासिक्यं तेषामधिको गुणः ॥ एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति । किं कारणम् । बाह्यं ह्यास्यात्स्थानमवर्णस्य । सर्वमुखस्थानमवर्णमेक इच्छन्ति । एवमपि व्यपदेशो न प्रकल्पत आस्ये येषां तुल्यो देश इति । व्यपदेशिवद्भावेन व्यपदेशो भविष्यति । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यादिति । नैष दोषः । न हि लौकिकमास्यम् । किं तर्हि । तद्धितान्तमास्यम् । आस्ये भवमास्यम् । शरीरावयवाद्यत् [५.१.६] । किं पुनरास्ये भवम् । स्थानं करणं च । एवमपि प्रयत्नोऽविशेषितो भवति । प्रयत्नश्च विशेषितः । कथम् । न हि प्रयतनं प्रयत्नः । किं तर्हि । प्रारम्भो यत्नस्य प्रयत्नः ।

यदि प्रारम्भो यत्नस्य प्रयत्न एवमप्यवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति । प्रश्लिष्टावर्णावेतौ । अवर्णस्य तर्ह्यैचोश्च सवर्णसंज्ञा प्राप्नोति । विवृततरावर्णावेतौ । एतयोरेव तर्हि मिथः सवर्णसंज्ञा प्राप्नोति । नैतौ तुल्यस्थानौ । उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति । अभेदका उदात्तादयः ॥ अथवा किं न एतेन प्रारम्भो यत्नस्य प्रयत्न इति । प्रयतनमेव प्रयत्नस्तदेव च तद्धितान्तमास्यम् । यत्समानं तदाश्रयिष्यामः । किं सति भेदे । सतीत्याह । सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम् । कुत एतत् । भेदाधिष्ठाना हि सवर्णसंज्ञा । यदि हि यत्र सर्वं समानं तत्र स्यात्सवर्णसंज्ञावचनमनर्थकं स्यात् । यदि तर्हि सति भेदे किंचित्समानमिति कृत्वा सवर्णसंज्ञा भविष्यति शकारछकारयोः षकारठकारयोः सकारथकारयोः सवर्णसंज्ञा प्राप्नोति । एतेषां हि सर्वमन्यत्समानं करणवर्जम् ॥ एवं तर्हि प्रयतनमेव प्रयत्नस्तदेव च तद्धितान्तमास्यं न त्वयं द्वन्द्व आस्यं च प्रयत्नश्चास्यप्रयत्नमिति । किं तर्हि । त्रिपदोऽयं बहुव्रीहिः । तुल्य आस्ये प्रयत्न एषामिति ॥ अथवा पूर्वस्तत्पुरुषस्ततो बहुव्रीहिः । तुल्य आस्ये तुल्यास्यः । तुल्यास्यः प्रयत्न एषामिति ॥ अथवा परस्तत्पुरुषस्ततो बहुव्रीहिः । आस्ये प्रयत्न आस्यप्रयत्नः । तुल्य आस्यप्रयत्न एषामिति ॥

तस्य । तस्येति तु वक्तव्यम् । किं प्रयोजनम् । यो यस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसंज्ञो यथा स्यात् । अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञो मा भूत् ।

तस्यावचनं वचनप्रामाण्यात् ॥ ३ ॥

तस्येति न वक्तव्यम् । अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति । वचनप्रामाण्यात् । सवर्णसंज्ञावचनसामर्थ्यात् । यदि ह्यन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः स्यात्सवर्णसंज्ञावचनमनर्थकं स्यात् ॥

संबन्धिशब्दैर्वा तुल्यम् ॥ ४ ॥

संबन्धिशब्दैर्वा पुनस्तुल्यमेतत् । तद्यथा संबन्धिशब्दाः । मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति । न चोच्यते स्वस्यां मातरि स्वस्मिन्वा पितरीति संबन्धाच्चैतद्गम्यते या यस्य माता यश्च यस्य पितेति । एवमिहापि तुल्यास्यप्रयत्नं सवर्णमित्यत्र संबन्धिशब्दावेतौ । तत्र संबन्धादेतद्गन्तव्यं यं प्रति यत्तुल्यास्यप्रयत्नं तं प्रति तत्सवर्णसंज्ञं भवतीति ॥

ऋकारऌकारयोः सवर्णविधिः ॥ ५ ॥

ऋकारऌकारयोः सवर्णसंज्ञा विधेया । होतृ ऌकारः होतॢकारः । किं प्रयो-

जनम् । अकः सवर्णे दीर्घः [६. १. १०१] इति दीर्घत्वं यथा स्यात् । नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत्* । सवर्णदीर्घत्व ऋति ऋवावचनम्लृति लृवावचनमिति । तत्सवर्णे यथा स्यात् । इह मा भूत् दध्ल्कारः मध्ल्कार इति । यदेतत्सवर्णदीर्घत्व ऋतीत्येतद्लृत इति वक्ष्यामि । तत लृति । लृकारे च वा लृ भवति । ऋत इत्येव । तन्न वक्तव्यं भवति । अवश्यं तद्वक्तव्यम् । ऊकालो ऽज्झ्रस्वदीर्घप्लुतसंज्ञो भवतीत्युच्यते† न च ऋकार लृकारो वाऽस्ति । ऋकारस्य लृकारस्य चाच्त्वं वक्ष्यामि । तच्चावश्यं वक्तव्यं प्लुतो यथा स्यात् । होतृ ऋकारः होतृकारः होतृ३कारः होतृ लृकारः होतॢकारः होतॢ३कारः । किं पुनरत्र ज्यायः । सवर्णसंज्ञावचनमेव ज्यायः । दीर्घत्वं चैव हि सिद्धं भवति । अपि च ऋकारग्रहणे लृकारग्रहणं संनिहितं भवति । यथेह भवति । ऋत्यकः [६. १. १२८] खट्व ऋश्यः माल ऋश्यः । इदमपि संगृहीतं भवति । खट्व लृकारः माल लृकार इति । वा सुप्यापिशलेः [६. १. ९२] उपर्कारीयति उपार्कारीयति । इदमपि सिद्धं भवति । उपल्कारीयति उपाल्कारीयति ॥ यदि तर्हृकारग्रहणे लृकारग्रहणं संनिहितं भवत्युरण्रपरः [१. १. ५१] लृकारस्यापि रपरत्वं प्राप्नोति । लृकारस्य लपरत्वं वक्ष्यामि । तच्चावश्यं वक्तव्यमसत्यां सवर्णसंज्ञायां विध्यर्थम् । तदेव सत्यां रेफबाधनार्थं भविष्यति ॥ इह तर्हि रषाभ्यां नो णः समानपदे [८. ४. १] इत्यृकारग्रहणं चोदितं मातॄणाम् पितॄणामित्येवमर्थम् । तदिहापि प्राप्नोति । क्लृप्यमानं पश्येति । अथासत्यामपि सवर्णसंज्ञायामिह कस्मान्न भवति । प्रक्लृप्यमानं पश्येति‡ । चुटुतुलशर्व्यवाये नेति वक्ष्यामि । अपर आह ।

त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये न

इति वक्ष्यामीति । वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति यो ऽसाव्लृकारे लकारस्तदाश्रयः प्रतिषेधो भविष्यति । यद्येवं नार्थो रषाभ्यां णत्व ऋकारग्रहणेन । वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति यो ऽसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति ॥

नाज्झलौ ॥ १ । १ । १० ॥

अज्झलोः प्रतिषेधे शाकारप्रतिषेधो ऽज्झल्त्वात् ॥ १ ॥

अज्झलोः प्रतिषेधे शाकारस्य शाकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति । किं

* ६.१.१०१ † १.२.२७ ‡ ८.४.३९

कारणम् । अज्झल्त्वात् । अचैव हि शकारो हल्च । कथं तावदच्त्वम् । इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्यच्त्वम् । हल्पुपदेशाद्धल्त्वम् ॥ तत्र को दोषः ।

तत्र सवर्णलोपे दोषः ॥ २ ॥

तत्र सवर्णलोपे दोषो भवति । परश्शतानि* कार्याणि । झरो झरि सवर्णे [८.४.६५] इति लोपो न प्राप्नोति ॥

सिद्धमनच्त्वात् ॥ ३ ॥

सिद्धमेतत् । कथम् । अनच्त्वात् । कथमनच्त्वम् । स्पृष्टं स्पर्शानां करणम् । ईषत्स्पृष्टमन्तःस्थानाम् । विवृतमूष्मणाम् ईषदित्येवानुवर्तते । स्वराणां विवृतम् ईषदिति निवृत्तम् ॥

वाक्यापरिसमाप्तेर्वा ॥ ४ ॥

वाक्यापरिसमाप्तेर्वा पुनः सिद्धमेतत् । किमिद वाक्यापरिसमाप्तेरिति । वर्णानामुपदेशस्तावत् । उपदेशोत्तरकालेत्संज्ञा । इत्संज्ञोत्तरकाल आदिरन्त्येन सहेता [१.१.७१] इति प्रत्याहारः । प्रत्याहारोत्तरकाला सवर्णसंज्ञा । सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्ययः [१.१.६९] इति सवर्णग्रहणम् । एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति । न चात्रेकारः शकारं गृह्णाति ॥ यथैव तर्हीकारः शकारं न गृह्णात्येवमीकारमपि न गृह्णीयात् । तत्र को दोषः । कुमारी ईहते कुमारीहते । अकः सवर्णदीर्घत्वं† न प्राप्नोति । नैष दोषः । यदेतदकः सवर्णे दीर्घ इति प्रत्याहारग्रहणं तत्रेकार ईकारं गृह्णाति शकारं न गृह्णाति ॥

अपर आह । अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात् ॥ अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति । किं कारणम् । अज्झल्त्वात् । अचैव हि शकारो हल्च । कथं तावदच्त्वम् । इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम् । हल्पूपदेशाद्धल्त्वम् ॥ तत्र को दोषः । तत्र सवर्णलोपे दोषः ॥ तत्र सवर्णलोपे दोषो भवति । परश्शतानि कार्याणि । झरो झरि सवर्णे इति लोपो न प्राप्नोति ॥ सिद्धमनच्त्वात् ॥ सिद्धमेतत् । कथम् । अनच्त्वात् ॥ कथमनच्त्वम् । वाक्यापरिसमाप्तेर्वा ॥ उक्ता वाक्यापरिसमाप्तिः ॥ अस्मिन्पक्षे येत्येतदसमाधितं भवति । एतत्र समाधितम् । कथम् । अस्तु वा शा-

* ८.४.४० † ६.१.१०१

कारस्य शकारेण सवर्णसंज्ञा मा भूत् । ननु चोक्तं परश्शतानि कार्याणि झरो झरि सवर्ण इति लोपो न प्राप्नोतीति । मा भूल्लोपः । ननु च भेदो भवति । सति लोपे द्विशकारमसति लोपे त्रिशकारम् । नास्ति भेदः । असत्यपि लोपे द्विशकारमेव । कथम् । विभाषा द्विर्वचनम्* । एवमपि भेदः । असति लोपे कदाचिद्द्विशकारं कदाचित्त्रिशकारं सति लोपे द्विशकारमेव । स एव कथं भेदो न स्यात् । यदि नित्यो लोपः स्यात् । विभाषा तु स लोपः । यथाभेदस्तथास्तु ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥

---

*८. ४. ४७.

ईदूदेद्द्विवचनं प्रगृह्यम् ॥ १ । १ । ११ ॥

किमर्थमीदादीनां तपराणां प्रगृह्यसंज्ञोच्यते । तपरस्तत्कालस्य [१. १. ७०] इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात् । केषाम् । उदात्तानुदात्तस्वरितानाम् । अस्ति प्रयोजनमेतत् । किं तर्हीति । प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति । किं कारणम् । अतत्कालत्वात् । न हि प्लुतास्तत्कालाः । असिद्धः प्लुतस्तस्यासिद्धत्वात्तत्काला एव भवन्ति । सिद्धः प्लुतः स्वरसंधिषु । कथं ज्ञायते सिद्धः प्लुतः स्वरसंधिष्विति । यदयं प्लुतप्रगृह्या अचि [६. १. १२५] इति प्लुतस्य प्रकृतिभावं शास्ति । कथं कृत्वा ज्ञापकम् । सतो हि कार्यिणः कार्येण भवितव्यम् । किमेतस्य ज्ञापने प्रयोजनम् । अप्लुतादप्लुत इत्येतन्न वक्तव्यं भवति* । किमतो यत्सिद्धः प्लुतः स्वरसंधिषु । संज्ञाविधावसिद्धस्तस्यासिद्धत्वात्तत्काला एव भवन्ति । संज्ञाविधौ च सिद्धः । कथम् । कार्यकालं हि संज्ञापरिभाषम् । यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति ईदूदेद्द्विवचनं प्रगृह्यमिति ॥ किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनम् । प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् । मा भूदेवम् । प्लुतः प्रकृत्येत्येव भविष्यति । नैवं शक्यम् । उपस्थिते हि दोषः स्यात् । अप्लुतवदुपस्थिते [६. १. १२९] इत्यत्र पठिष्यति ह्याचार्यः । वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गो ऽन्येन विहितत्वादिति । तस्मात्प्लुतस्य प्रगृह्यसंज्ञैषितव्या प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् ॥

यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसंज्ञोच्येत । एवमप्येकार एवैकः सवर्णान्गृह्णीयादीकारोकारौ न गृह्णीयाताम् । किं कारणम् । अनण्त्वात्† ॥ यदि पुनर्ह्रस्वानामतपराणां प्रगृह्यसंज्ञोच्येत । नैवं शक्यम् । इहापि प्रसज्येत । अकुर्वह्यत्र अकुर्वह्यत्रेति ॥

तस्माद्दीर्घाणामेव तपराणां प्रगृह्यसंज्ञा वक्तव्या । दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोति ॥ एवं तर्हि किं न एतेन यत्नेन यत्सिद्धः प्लुतः स्वरसंधिष्विति । असिद्धः प्लुतस्तस्यासिद्धत्वात्तत्काला एव भवन्तीति । कथं यत्तज्ज्ञापकमुक्तं प्लुतप्रगृह्या अचीति । प्लुतभावी प्रकृत्येत्येवमेतद्विज्ञायते । कथं यत्तत्प्रयोजनमुक्तम् । क्रियते न्यास एवाप्लुतादप्लुत इति ॥ एवमपि यासिद्धे प्रगृह्यकार्यं तत्प्लुतस्य न प्राप्नोति । अणो ऽप्रगृह्यस्यानुनासिकः [८. ४. ५७] इति । एवं तर्हि किं न एतेन कार्यकाले संज्ञापरिभा-

---

* ६. १. १११. † १. १. ६९.

पमिति । ययोर्हिसमेव सज्ञापरिभाषम् । तत्र चासावसिद्धस्तस्यासिद्धत्वात्तत्काला एव भवन्ति ॥

कथ पुनरिद विज्ञायते । ईदादयो यद्द्विवचनमिति । आहोस्विदीदाद्यन्तं यद्द्विवचनमिति । कश्चात्र विशेष ।

ईदादयो द्विवचन प्रगृह्या इति चेदन्त्यस्य विधि ॥ १ ॥

ईदादयो द्विवचन प्रगृह्या इति चेदन्त्यस्य प्रगृह्यसज्ञा विधेया । पचेते इति । पचेथे इति । वचनाद्भविष्यति । अस्ति वचने प्रयोजनम् । किम् । खट्वे इति । माले इति ॥ अस्तु तर्हीदाद्यन्त यद्द्विवचनमिति ।

ईदाद्यन्तमिति चेदेकस्य विधि ॥ २ ॥

ईदाद्यन्तमिति चेदेकस्य प्रगृह्यसज्ञा विधेया । खट्वे इति । माले इति ॥

न वाद्यन्तवत्त्वात् ॥ ३ ॥

न वैष दोष । किं कारणम् । आद्यन्तवत्त्वात् । आद्यन्तवदेकस्मिन्कार्यं भवतीत्येकस्यापि भविष्यति* ॥ अथवैवं वक्ष्यामि । ईदाद्यन्त यद्द्विवचनान्तमिति ।

ईदाद्यन्त द्विवचनान्तमिति चेल्लुकि प्रतिषेध ॥ ४ ॥

ईदाद्यन्त द्विवचनान्तमिति चेल्लुकि प्रतिषेधो वक्तव्य । कुमार्योरगार कुमार्यगारम् । वध्वोरगार वध्वगारम् । एतद्धीदाद्यन्त च श्रूयते द्विवचनान्त च भवति प्रत्ययलक्षणेन† ॥

सप्तम्यामर्थग्रहण ज्ञापक प्रत्ययलक्षणप्रतिषेधस्य ॥ ५ ॥

यदयमीदूतौ च सप्तम्यर्थे [१ १ १९] इत्यर्थग्रहण करोति तज्ज्ञापयत्याचार्यो न प्रगृह्यसज्ञाया प्रत्ययलक्षण भवतीति ॥ तर्हि ज्ञापकार्थमर्थग्रहण कर्तव्यम् । न कर्तव्यम् । ईदादिभिर्द्विवचन विशेषयिष्याम ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति । ईदाद्यन्त यद्द्विवचन तदन्तमीदाद्यन्तमिति ॥ एवमप्यशुक्ले वस्त्रे शुक्ले सम्पद्येता शुक्लीस्ता वस्त्रे इत्यत्र प्राप्नोति । अत्र हीदादि द्विवचन तदन्त च भवति प्रत्ययलक्षणेन । अत्राप्यकृते शीभावे‡ लुग्भविष्यति§ । इदमिह सम्प्रधार्यं लुक्क्रियता शीभाव इति किमत्र कर्तव्यम् । परत्वाच्छीभाव । नित्यो लुक् । कृतेऽपि

* १ १ ३१ † १ १ ६२ ‡ ७ १ १९ § २ ४ ७१

शीभावे प्राप्नोत्यकृते ऽपि प्राप्नोति । अनित्यो लुक् । अन्यस्य कृते शीभावे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । शीभावो ऽप्यनित्यो न हि कृते लुकि प्राप्नोति । उभयोरनित्ययोः परत्वाच्छीभावः शीभावे कृते लुक् । अथापि कथंचिन्नित्यो लुक्स्यादेवमपि दोषः । वक्ष्यत्येतत् । पदसंज्ञायामन्तवचनमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थमिति* । इद चापि प्रत्ययग्रहणमयं चापि संज्ञाविधिः । अवश्यं खल्वस्मिन्नपि पक्ष आद्यन्तवद्भाव एषितव्यः । तस्मादस्तु स एव मध्यमः पक्षः ॥

अदसो मात् ॥ १ । १ । १२ ॥

मात्प्रगृह्यसंज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः ॥ १ ॥

मात्प्रगृह्यसंज्ञायां तस्य ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः प्राप्नुवन्ति† तेषां प्रतिषेधो वक्तव्यः । अमी अत्र । अमी आसते । अमू अत्र । अमू आसाते ॥ ननु च प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति ।

वचनार्थो हि सिद्धे ॥ २ ॥

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्सिद्धे प्रगृह्यसंज्ञाकार्यं तदर्थमेतत्स्यात् । अणो ऽप्रगृह्यस्यानुनासिकः [८.४.५७] इति । नैकं प्रयोजनं योगारम्भं प्रयोजयति । यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयादणो ऽप्रगृह्यस्यानुनासिको ऽदसो नेति ॥

विप्रतिषेधाद्वा ॥ ३ ॥

अथवा प्रगृह्यसंज्ञा क्रियतामयादयो वा प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधेन । नैष युक्तो विप्रतिषेधः । विप्रतिषेधे परमित्युच्यते‡ पूर्वा च प्रगृह्यसंज्ञा परे ऽयादयः । परा प्रगृह्यसंज्ञा करिष्यते । सूत्रविपर्यासः कृतो भवति । एवं तर्हि परैव प्रगृह्यसंज्ञा । कथम् । कार्यकालं हि संज्ञापरिभाषम् । यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति§ अदसो मादिति ॥ एवमप्ययुक्तो विप्रतिषेधः । कथम् । द्विकार्ययोगो हि विप्रतिषेधो न चात्रैको द्विकार्ययुक्तः । एषामयादयः । ईदूतोः प्रगृह्यसंज्ञा । नावश्यं द्विकार्ययोग एव विप्रतिषेधः । किं तर्हि । असंभवो ऽपि ।

---

* १.४.१४ † [illegible] ‡ १.४.२ § ६.१.१२५

स चास्त्यत्रासंभवः । को ऽसावसंभवः । प्रगृह्यसंज्ञाभिनिर्वर्तमानायादीन्बाधते । अयादयो ऽभिनिर्वर्तमानाः प्रगृह्यसंज्ञानिमित्तं विघ्नन्तीत्येषो ऽसंभवः । सत्यसंभवे युक्तो विप्रतिषेधः ॥ एवमप्ययुक्तो विप्रतिषेधः । सतोर्हि विप्रतिषेधो भवति न चात्रेत्त्वोत्त्वे स्तो नापि मकारः । उभयमसिद्धम् ।

आश्रयात्सिद्धत्वं च यथा रोरुत्वे ॥ ४ ॥

आश्रयात्सिद्धत्वं भविष्यति तद्यथा रुरुत्व आश्रयात्सिद्धो भवति* । किं पुनः कारणं रुरुत्व आश्रयात्सिद्धो भवति न पुनर्यत्रैव रुः सिद्धस्तत्रैवोत्वमप्युच्यते । नैवं शक्यम् ।

असिद्धे ह्युत्व आद्गुणाप्रसिद्धिः ॥ ५ ॥

असिद्धे ह्युत्व आद्गुणस्याप्रसिद्धिः स्यात्† । वृक्षो ऽत्र । प्लक्षो ऽत्र । तस्मात्तत्राश्रयात्सिद्धत्वमेषितव्यम् । तत्र यथाश्रयात्सिद्धत्वं भवत्येवमिहापि भविष्यति ॥

अथवा प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति ॥ अथवा योगविभागः करिष्यते । अदसः । अदस ईदादयः प्रगृह्यसंज्ञा भवन्ति । ततो मात् । माच्च पर ईदादयः प्रगृह्यसंज्ञा भवन्ति । अदस इत्येव । किमर्थो योगविभागः । एको यत्तत्सिद्धे प्रगृह्यकार्ये तदर्थः । अपरो यदसिद्धे । इहापि तर्हि प्राप्नोति । अमुया अमुयोरिति । किं च स्याद्यदि प्रगृह्यसंज्ञा स्यात् । प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत । नैष दोषः । पदान्तप्रकरणे प्रकृतिभावो न चैष पदान्तः । एवमप्यमुके ऽत्र अत्रापि प्राप्नोति । द्विवचनमिति वर्तते । यदि द्विवचनमिति वर्तते अमी अत्रेति न प्राप्नोति । एवं तर्हीदन्तमिति निवृत्तम् ॥ अथवाहायमदसो मादिति । न चेत्त्वोत्त्वे स्तो नापि मकारः । त एवं विज्ञास्यामः । मार्थादीदादयर्थानामिति ॥

उक्तं वा ॥ ६ ॥

किमुक्तम् । अदस ईत्त्वोत्त्वे स्वरे बहिष्पदलक्षणे प्रगृह्यसंज्ञायां च सिद्धे वक्तव्ये इति‡ ॥

तत्र सकि दोषः ॥ ७ ॥

तत्र सककारे दोषो भवति । अमुके ऽत्र ॥

* ८ २. ६६, ६. १ ११३. † ६ १ ८७. ‡ ८ २ ६*

न वा ग्रहणविशेषणत्वात् ॥ ८ ॥

न वैष दोषः । किं कारणम् । ग्रहणविशेषणत्वात् । न माड्ग्रहणेनेदाद्यन्त विशेष्यते । किं तर्हि । ईदादयो विशेष्यन्ते । मात्परे य ईदादय इति ॥

शे ॥ १।१।१३ ॥

इह कस्मान्न भवति काशे कुशे वंशे इति ।

शे ऽर्थवद्ग्रहणात् ॥ १ ॥

अर्थवतः शेशब्दस्य ग्रहणं न चायमर्थवान् । एवमपि हरिशे बभ्रुशे इत्यत्र प्राप्नोति* । एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति । अथवा पुनरस्त्वर्थवद्ग्रहणे नानर्थकस्येति । कथं हरिशे बभ्रुशे इति । एको ऽत्र विभक्त्यर्थेनार्थवानपरस्तद्धितार्थेन समुदायो ऽनर्थकः ॥

निपात एकाजनाङ् ॥ १ । १ । १४ ॥

निपात इति किमर्थम् । चकारात्र । जहारात्र ॥ एकाजिति किमर्थम् । प्रेद ब्रह्म । प्रेद क्षत्रम् । एकाजित्यप्युच्यमाने ऽत्रापि प्राप्नोति । एषो ऽपि ह्येकाच् । एकाजिति नायं बहुव्रीहिः । एको ऽजस्मिन्सो ऽयमेकाजिति । किं तर्हि । तत्पुरुषो ऽयं समानाधिकरणः । एको ऽच् एकाजिति । यदि तत्पुरुषः समानाधिकरणो नार्थ एकग्रहणेन । इह कस्मान्न भवति । प्रेद ब्रह्म । प्रेदं क्षत्रम् । अजेव यो निपात इत्येव विज्ञास्यते । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अज्ग्रहणसामर्थ्यात् । यदि हि यत्राजन्यच्च तत्र स्यादज्ग्रहणमनर्थकं स्यात् । अस्त्यन्यदज्ग्रहणस्य प्रयोजनम् । किम् । अजन्तस्य यथा स्याद्धलन्तस्य मा भूत् । नैव दोषो न प्रयोजनम् ॥ एवमपि कुत एतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोराद्यन्तवदेकस्मिन् [१ १.२१] इति च येन विधिस्तदन्तस्य [१.१ ७२] इति चेयमिह परिभाषा भविष्यत्याद्यन्तवदेकस्मिन्नितीयं न भविष्यति येन विधिस्तदन्तस्येति । आचार्यप्रवृत्तिर्ज्ञापयतीयमिह परिभाषा भवत्याद्यन्तवदेकस्मिन्नितीयं न भवति येन विधिस्तदन्तस्येति यदयमनाङिति प्रतिषेधं शास्ति ॥ एवं तर्हि सिद्धे सति यदज्ग्रहणं क्रिय-

---

*६ २ १००

माण एकग्रहणं करोति तज्ज्ञापयत्याचार्यो ऽन्यत्र वर्णग्रहणे जातिग्रहणं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति यदुक्तं* तदुपपन्नं भवति ॥ अनाङिति किमर्थम् । आ उदकान्तात् ओदकान्तात् । इह कस्मान्न भवति । आ एवं नु मन्यसे । आ एवं किल तदिति । सानुबन्धकस्येदमाकारस्य ग्रहणमननुबन्धकश्चात्राकारः । क्व पुनरयं सानुबन्धकः क्व निरनुबन्धकः ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

ओत् ॥ १ । १ । १५ ॥

किमुदाहरणम् । आहो इति । उताहो इति । नैतदस्ति प्रयोजनम् । निपातसमाहारो ऽयम् । आह उ आहो इति । उत आह उ उताहो इति । तत्र निपात एकाजनाङ् [१.१.१४] इत्येव सिद्धम् । एवं तर्ह्येकनिपाता इमे ॥ अथवा प्रतिषिद्धार्थो ऽयमारम्भः । ओ षु यात मरुतः । ओ षु यात बृहती शक्वरी च । ओ चित्सखाय सख्या ववृत्याम् ॥

ओतश्चिप्रतिषेधः ॥ १ ॥

ओदन्तो निपात इत्यत्र च्व्यन्तस्य† प्रतिषेधो वक्तव्यः । अनदः अदः अभवत् अदोऽभवत् । तिरोऽभवत् ॥ न वक्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति ॥ एवमप्यगौर्गौः समपद्यत गोऽभवत् अत्र प्राप्नोति । एवं तर्हि गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति । तद्यथा । गौरनुबन्ध्यो ऽजो ऽग्नीषोमीय इति न बाहीको ऽनुबध्यते । कथं तर्हि बाहीके वृद्ध्यात्त्वे भवतः‡ । गौस्तिष्ठति । गामानयेति । अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्त्वे ॥

उञ ऊँ ॥ १ । १ । १७-१८ ॥

इह कस्मान्न भवति । आहो इति । उताहो इति । उञ इत्युच्यते न चात्रोञं पश्यामः । उञो ऽयमन्येन सहैकादेश उञ्ग्रहणेन गृह्यते । आचार्यप्रवृत्तिर्ज्ञापयति

१.२.१० †१.४.६१ ‡७.१.९०; ६.१.९३

नोऽनेकादेश उञ्ग्रहणेन गृह्यत इति यदयमोत् [१.१.१५] इत्योदन्तस्य निपातस्य प्रगृह्यसंज्ञां शास्ति । नैतदस्ति ज्ञापकम् । उक्तमेतत् । प्रतिषिद्धार्थोऽयमारम्भ इति । दोषः खल्वपि स्याद्यद्युञेकादेश उञ्ग्रहणेन न गृह्येत । जानु उ अस्य रुजति जानू अस्य रुजति जान्वस्य रुजति । मय उञो वो वा [८. ३. ३३] इति वत्वं न स्यात् । एवं तर्ह्येकनिपाता इमे ॥ अथवा द्वावुकाराविमौ । एको ऽननुबन्धकः । अपरः सानुबन्धकः । तयो ऽननुबन्धकस्तस्यैष एकादेशः ॥

उञ इति योगविभागः ॥ १ ॥

उञ इति योगविभागः कर्तव्यः । उञः शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति । उ इति विति ॥ तत ऊँ । उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याचार्यस्य मतेन दीर्घो ऽनुनासिकः प्रगृह्यसंज्ञकश्च ऊँ इति ॥ किमर्थो योगविभागः ।

ऊँ वा शाकल्यस्य ॥ २ ॥

शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथा स्यात् । ऊँ इति उ इति । अन्येषामाचार्याणां मतेन विति ॥

ईदूतौ च सप्तम्यर्थे ॥१।१।१९॥

ईदूतौ सप्तमीत्येव

ईदूतौ सप्तमीत्येव सिद्धं नार्थो ऽर्थग्रहणेन ।

लुप्ते ऽर्थग्रहणाद्भवेत् ।

लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति । क्व । सोमो गौरी अधि श्रितः । इष्यते चात्रापि स्यादिति तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणम् ॥ नात्र सप्तमी लुप्यते । किं तर्हि । पूर्वसवर्णो ऽत्र भवति* ।

पूर्वस्य चेत्सवर्णो ऽसावाडाम्भावः प्रसज्यते ॥ १ ॥

यदि पूर्वसवर्ण आट् आम्भावश्च प्राप्नोति† ॥ एवं तर्ह्याहायमीदूतौ सप्तमीति न चास्ति सप्तमीदूतौ तत्र वचनाद्भविष्यति ।

वचनाद्यत्र दीर्घत्वम्

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्र सप्तम्या

---

* ७. १. ३९.   † १ ११२. ११ ६.

दीर्घत्वमुच्यते* । दृतिं न शुष्कं सरसी शयानमिति । सति प्रयोजन इह न प्राप्नोति । सोमो गौरी अधि श्रित इति ॥

तत्रापि सरसी यदि ।

तत्रापि सिद्धम् । कथम् । यदि सरसीशब्दस्य प्रवृत्तिरस्ति । अस्ति च लोके सरसीशब्दस्य प्रवृत्तिः । कथम् । दक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यन्ते ॥

ज्ञापकं स्यात्तदन्तत्वे

एवं तर्हि ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । कुमार्योरगारं कुमार्यगारम् वध्वोरगारं वध्वगारम् प्रत्ययलक्षणेन प्रगृह्यसंज्ञा न भवति ॥

मा वा पूर्वपदस्य भूत् ॥ २ ॥

अथवा पूर्वपदस्य मा भूदित्येवमर्थमर्थग्रहणम् । वाप्यामश्वो वाप्यश्वः नद्यामातिर्नद्यातिः । अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवात्र न भवति । जहत्स्वार्था वृत्तिरिति । अथाजहत्स्वार्थायां वृत्तौ दोष एव । अजहत्स्वार्थायां च न दोषः । समुदायार्थोऽभिधीयते ॥

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् ।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते ॥ १ ॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥ २ ॥

दाधा घ्वदाप् ॥ १ । १ । २० ॥

घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम् ॥ १ ॥

घुसंज्ञायां प्रकृतिग्रहणं कर्तव्यम् । दाधाप्रकृतयो घुसंज्ञा भवन्तीति वक्तव्यम् । किं प्रयोजनम् । आत्त्वभूतानामियं संज्ञा क्रियते । सात्त्वभूतानामेव स्यादनात्त्वभूतानां न स्यात् । ननु च भूयिष्ठानि घुसंज्ञाकार्याण्यार्धधातुके तत्र चैत आत्त्वभूता दृश्यन्ते । शिदर्थम् । शिदर्थं प्रकृतिग्रहणं कर्तव्यम् । शित्यात्त्वं प्रतिषिध्यते† तदर्थम् । प्रणिदयते प्रणिधयतीति‡ ॥

भारद्वाजीयाः पठन्ति । घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम् । घुसंज्ञायां

* ७.१.१९ † ६.१.४५ ‡ ८.४.१७

प्रकृतिग्रहणं क्रियते । किं प्रयोजनम् । शिदर्थं विकृतार्थं च । शिदुदाहृतम् । विकृतार्थं खल्वपि । प्रणिदाता प्रणिधाता । किं पुनः कारणं न सिध्यति । लक्षणप्रतिपदोक्तयोः *प्रतिपदोक्तस्यैवेति प्रतिपदं य आत्त्वभूतास्तेषामेव स्याल्लक्षणेन य आत्त्वभूतास्तेषां न स्यात्* ॥

अथ क्रियमाणे ऽपि प्रकृतिग्रहणे कथमिदं विज्ञायते । दाधाः प्रकृतय इति । आहोस्विद्दाधां प्रकृतय इति । किं चातः । यदि विज्ञायते दाधाः प्रकृतय इति स एव दोषः । *आत्त्वभूतानामेव स्यादनात्त्वभूतानां न स्यात् । अथ विज्ञायते दाधां प्रकृतय इत्यनात्त्वभूतानामेव स्यादात्त्वभूतानां न स्यात्* । एवं तर्हि नैवं विज्ञायते दाधाः प्रकृतय इति नापि दाधां प्रकृतय इति । कथं तर्हि । दाधा घुसंज्ञा भवन्ति प्रकृतयश्चैषामिति ॥

तर्हि प्रकृतिग्रहणं कर्तव्यम् । न कर्तव्यम् । इह प्रकृतमर्थग्रहणमनुवर्तते । क्व प्रकृतम् । ईदूतौ च सप्तम्यर्थे [१.१.१९] इति । ततो वक्ष्यामि । दाधा घ्वदाप् अर्थ इति । नैवं शक्यम् । ददातिना समानार्थानां तिरासतिदाशतिमंहतिप्रीणातिप्रभृतीनाहुः । एतेषामपि घुसंज्ञा प्राप्नोति । तस्मान्नैवं शक्यम् । न चेदेवं प्रकृतिग्रहणं कर्तव्यमेव ॥ शिदर्थेन तावन्नार्थः प्रकृतिग्रहणेन । अवश्यं तत्र* मार्थं प्रकृतिग्रहणं कर्तव्यं प्रणिमयते प्रण्यमयतेत्येवमर्थम् । तत्पुरस्तादपकक्ष्यते । घुप्रकृतौ माप्रकृतौ चेति । यदि प्रकृतिग्रहणं क्रियते प्रनिमिनोति प्रनिमीनाति† अत्रापि प्राप्नोति । अथाक्रियमाणे ऽपि *प्रकृतिग्रहण इह कस्मान्न भवति प्रनिमाता प्रनिमातुम् प्रनिमातव्यमिति* । आकारान्तस्य ङितो ग्रहणं विज्ञास्यते । यथैव तर्ह्यक्रियमाणे प्रकृतिग्रहण आकारान्तस्य ङितो ग्रहणं विज्ञायत एवं *क्रियमाणे ऽपि प्रकृतिग्रहण आकारान्तस्य ङितो ग्रहणं विज्ञास्यते* ॥ विकृतार्थेन चापि नार्थः । दोष एवैतस्याः परिभाषाया लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति गामादाग्रहणेष्वविशेष इति ॥

समानशब्दप्रतिषेधः ॥ २ ॥

समानशब्दानां प्रतिषेधो वक्तव्यः । प्रनिदारयति प्रनिधारयति । दाधा घुसंज्ञा भवन्तीति घुसंज्ञा प्राप्नोति ॥

समानशब्दाप्रतिषेधो ऽर्थवद्ग्रहणात् ॥ ३ ॥

समानशब्दानामप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । घुसंज्ञा कस्मान्न भवति । अर्थवद्ग्रहणात् । अर्थवतोर्दाधोर्ग्रहणं न चैतावर्थवन्तौ ॥

---

* ८ ४ १७ † ६ १ ५०

अनुपसर्गाद्वा ॥ ४ ॥

अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतः । न चैतौ दाधौ प्रति क्रियायोगः ॥ यद्येवमिहापि तर्हि न प्राप्नोति । प्रणिदापयति प्रणिधापयति । अत्रापि नैतौ दाधावर्थवन्तौ नाप्येतौ दाधौ प्रति क्रियायोगः ॥

न वार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र ॥ ५ ॥

न वैष दोषः । किं कारणम् । अर्थवत आगमस्तद्गुणीभूतो ऽर्थवद्ग्रहणेन गृह्यते यथान्यत्र । तद्यथा । अन्यत्राप्यर्थवत आगमो ऽर्थवद्ग्रहणेन गृह्यते । क्वान्यत्र । लविता चिकीर्षितेति ॥ युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यान्न नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । आगमश्च नामापूर्वः शब्दोपजनः । अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः । बाढं युक्तम् । शब्दान्तरैरिह भवितव्यम् । तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता । आदेशास्तर्हीमे भविष्यन्त्यनागमकानां सागमकाः । तत्कथम् ।

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥

दीङः प्रतिषेधः स्थाघ्वोरित्त्वे ॥ ६ ॥

दीङः प्रतिषेधः स्थाघ्वोरित्त्वे वक्तव्यः । उपादास्तास्य स्वरः शिक्षकस्येति । मीनातिमिनोति [६.१.५०] इत्यात्त्वे कृते स्थाघ्वोरिच्च [१.२.१७] इतीत्वं प्राप्नोति । कुतः पुनरयं दोषो जायते किं प्रकृतिग्रहणादाहोस्विद्रूपग्रहणात् । रूपग्रहणादित्याह । इह खलु प्रकृतिग्रहणाद्दोषो जायते । उपदिदीषते । सनि मीमाघुरभलभ [७.४.५४] इति । नैष दोषः । दाप्रकृतिरित्युच्यते न चेयं दाप्रकृतिः । आकारान्तानामेजन्ताः प्रकृतय एजन्तानामपीकारान्ता न च प्रकृतिप्रकृतिः प्रकृतिग्रहणेन गृह्यते ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । घुसंज्ञा कस्मान्न भवति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्येवं न भविष्यति ॥

दाप्प्रतिषेधे न देप्यनेजन्तत्वात् ॥ ७ ॥

दाप्प्रतिषेधे देपि प्रतिषेधो न प्राप्नोति । अवदातं* मुखम् । ननु चात्त्वे कृते भविष्यति । तत्रात्त्वं न प्राप्नोति । किं कारणम् । अनेजन्तत्वात् ॥

---

* ७.४.४७.

सिद्धमनुबन्धस्यानेकान्तत्वात् ॥ ८ ॥

सिद्धमेतत् । कथम् । अनुबन्धस्यानेकान्तत्वात् । अनेकान्ता अनुबन्धाः ॥

पित्प्रतिषेधाद्वा ॥ ९ ॥

अथवा दाधा घ्वपिदिति वक्ष्यामि । तच्चावश्यं वक्तव्यम् । अदाबिति ह्युच्यमान इहापि प्रसज्येत । प्रणिदापयतीति । शक्यं तावदनेनादाबिति ब्रुवता दान्तस्य प्रतिषेधो विज्ञातुम् । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं दाप्प्रतिषेधे न दैपीति । परिहृतमेतत्सिद्धमनुबन्धस्यानेकान्तत्वादिति । अथैकान्तेषु दोष एव । एकान्तेषु च न दोषः । आत्त्वे कृते भविष्यति । ननु चोक्तं तद्धात्त्वं न प्राप्नोति किं कारणम् अनेजन्तत्वादिति । पकारलोपे कृते भविष्यति । न ह्यय तदा दाब्भवति । भूतपूर्वगत्या भविष्यति । एतच्चात्र युक्तं यत्सर्वेष्वेव सानुबन्धकग्रहणेषु भूतपूर्वगतिर्विज्ञायते । अनैमित्तिको ह्यनुबन्धलोपस्तावत्येव भवति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेजन्तत्वमिति यदयमुदीचां माङो व्यतीहारे [३.४.१९] इति मेङः सानुबन्धकस्यात्त्वभूतस्य ग्रहणं करोति ॥ अथवा दावेवायं न दैबस्ति । कथमवदायतीति । श्यन्विकरणो भविष्यति ॥

आद्यन्तवदेकस्मिन् ॥ १ । १ । २१ ॥

किमर्थमिदमुच्यते ।

सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम् ॥ १ ॥

सत्यन्यस्मिन्यस्मात्पूर्वं नास्ति परमस्ति स आदिरित्युच्यते । सत्यन्यस्मिन्यस्मात्परं नास्ति पूर्वमस्ति सो ऽन्त इत्युच्यते । सत्यन्यस्मिन्नाद्यन्तवद्भावादेतस्मात्कारणादेकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति । इष्यन्ते च स्युरिति । तान्यन्तरेण यत्नं न सिध्यन्तीत्येकस्मिन्नाद्यन्तवद्वचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्र व्यपदेशिवद्वचनम् ॥ २ ॥

तत्र व्यपदेशिवद्भावो वक्तव्य. । व्यपदेशिवदेकस्मिन्कार्यं भवतीति वक्तव्यम् । किं प्रयोजनम् ।

एकाचो द्वे प्रथमार्थम् ॥ ३ ॥

वक्ष्यत्येकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देश इति* । तस्मिन्क्रियमाण इहैव स्यात् पपाच पपाठ । इयाय आरेत्यत्र न स्यात् । व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भवति ॥

षत्वे चादेशसंप्रत्ययार्थम् ॥ ४ ॥

वक्ष्यत्यादेशप्रत्ययोरित्यवयवषष्ठ्येवेति† । एतस्मिन्क्रियमाण इहैव स्यात् करिष्यति हरिष्यति । इह न स्यात् । इन्द्रो मा वक्षत् । स देवान्यक्षत् । व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भवति ॥ स तर्हि व्यपदेशिवद्भावो वक्तव्यः न वक्तव्यः ।

अवचनाल्लोकविज्ञानात्सिद्धम् ॥ ५ ॥

अन्तरेणैव वचनं लोकविज्ञानात्सिद्धमेतत् । तद्यथा । लोके शालासमुदायो ग्राम इत्युच्यते । भवति चैतदेकस्मिन्नप्येकशालो ग्राम इति । विषम उपन्यासः । ग्रामशब्दो ऽयं बह्वर्थः । अस्त्येव शालासमुदाये वर्तते । तद्यथा । ग्रामो दग्ध इति । अस्ति वाटपरिक्षेपे वर्तते । तद्यथा । ग्रामं प्रविष्ट इति । अस्ति मनुष्येषु वर्तते । तद्यथा । ग्रामो गतो ग्राम आगत इति । अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते । तद्यथा । ग्रामो लब्ध इति । तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यत एकशालो ग्राम इति ॥ यथा तर्हि वर्णसमुदायः पदं पदसमुदाय ऋगृक्समुदायः सूक्तमित्युच्यते । भवति चैतदेकस्मिन्नप्येकवर्णं पदमेकपदर्गेकर्चं सूक्तमिति । अत्राप्यर्थेन युक्तो व्यपदेशः । पदं नामार्थ ऋङ् नामार्थः सूक्तं नामार्थः ॥ यथा तर्हि बहुषु पुत्रेष्वेतदुपपन्नं भवत्ययं मे ज्येष्ठो ऽयं मे मध्यमो ऽयं मे कनीयानिति । भवति चैतदेकस्मिन्नप्ययमेव मे ज्येष्ठो ऽयमेव मे मध्यमो ऽयमेव मे कनीयानिति । तथासूतायामसोष्यमाणायां च भवति प्रथमगर्भेण हतेति । तथानेत्यानाजिगमिषुराहेदं मे प्रथममागमनमिति ॥

आद्यन्तवद्भावश्च शक्यो ऽवक्तुम् । कथम् ।

अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन् ॥ ६ ॥

अपूर्वलक्षण आदिरनुत्तरलक्षणो ऽन्तः । एतच्चैकस्मिन्नपि भवति । अपूर्वानुत्तरल-

* ६.१.१.

† ८.३.५९.

क्षणत्वादेतस्मात्कारणादेकस्मिन्नप्याद्यन्तापदिष्टानि कार्याणि भविष्यन्ति नार्थ आद्यन्तवद्भावेन || गोनर्दीयस्त्वाह | सत्यमेतत्सति त्वन्यस्मिन्निति ||

कानि पुनरस्य योगस्य प्रयोजनानि |

आदिवत्त्वे प्रयोजनं प्रत्ययञ्निदाद्युदात्तत्वे || ७ ||

प्रत्ययस्यादिरुदात्तो* भवतीतीहैव स्यात् कर्तव्यम् तैत्तिरीयः | औपगवः कापटव इत्यत्र न स्यात् || ञ्नित्यादिर्नित्यम् [६.१.१९७] इतीहैव स्यात् अहिचुम्बकायनिः आग्निवेश्यः | गार्ग्यः कृतिरित्यत्र न स्यात् ||

वलादेरार्धधातुकस्येट् || ८ ||

वलादेरार्धधातुकस्येट् प्रयोजनम् | आर्धधातुकस्येड्वलादेः [७ २ ३५] इहैव स्यात् करिष्यति हरिष्यति | जोपिपत् मन्दिपदित्यत्र न स्यात् ||

यस्मिन्विधिस्तदादित्वे || ९ ||

यस्मिन्विधिस्तदादित्वे प्रयोजनम् | वक्ष्यति यस्मिन्विधिस्तदादावल्ग्रहण इति† | तस्मिन्क्रियमाणे अचि श्नुधातुभ्रुवां य्वोरियङुवङौ [६.४.७७] इहैव स्यात् श्रियः भ्रुवः | श्रियौ भ्रुवौ इत्यत्र न स्यात् ||

अजाद्याट्त्वे || १० ||

अजाद्याट्त्वे प्रयोजनम् | आडजादीनाम् [६.४ ७२] इहैव स्यात् ऐहिष्ट ऐक्षिष्ट | ऐत् अध्यैष्टेत्यत्र न स्यात् ||

अथान्तवत्त्वे कानि प्रयोजनानि |

अन्तवद्द्विवचनान्तप्रगृह्यत्वे || ११ ||

अन्तवद्द्विवचनान्तप्रगृह्यत्वे प्रयोजनम् | ईदूदेद्द्विवचन प्रगृह्यम् [१ १ ११] इहैव स्यात् पचेते इति पचेथे इति | खट्वे इति माले इतीत्यत्र न स्यात् ||

[मिदचो ऽन्त्यात्परः || १२ ||]

मिदचो ऽन्त्यात्परः [१.१ ४७] प्रयोजनम् | इहैव स्यात् कुण्डानि वनानि | तानि यानीत्यत्र न स्यात्‡ ||

---

* ३.१.३ † १.१.७२ ‡ ७.१.७२

अचोऽन्त्यादि टि ॥ १३ ॥

अचोऽन्त्यादि टि [१.१.६४] प्रयोजनम् । टित आत्मनेपदानां टेरे [३.४.७९] इतीहैव स्यात् कुर्वाते कुर्वाथे । कुरुते कुर्वे इत्यत्र न स्यात् ॥

अलोऽन्त्यस्य ॥ १४ ॥

अलोऽन्त्यस्य [१.१.५२] प्रयोजनम् । अतो दीर्घो यञि [७.३.१०१] सुपि च [१०२] इहैव स्यात् घटाभ्याम् पटाभ्याम् । आभ्यामित्यत्र न स्यात् ॥

येन विधिस्तदन्तत्वे ॥ १५ ॥

येन विधिस्तदन्तत्वे* प्रयोजनम् । अचो यत् [३.१.९७] इहैव स्यात् चेयम् जेयम् । एयम् अध्येयमित्यत्र न स्यात् ॥

आद्यन्तवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भवति ॥

तरप्तमपौ घः ॥ १ । १ । २२ ॥

घसंज्ञायां नदीतरे प्रतिषेधः ॥ १ ॥

घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः । नद्यास्तरो† नदीतर इति ॥

घसंज्ञायां नदीतरेऽप्रतिषेधः ॥ २ ॥

अनर्थकः प्रतिषेधोऽप्रतिषेधः । घसंज्ञा कस्मान्न भवति ।

तरब्ग्रहणं ह्यौपदेशिकम् ॥ ३ ॥

औपदेशिकस्य तरपो ग्रहणं न चैष उपदेशे तरप्शब्दः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति । रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते । कोऽसौ । उपदेशो नाम । न चैष उपदेशे तरप्शब्दः ॥ अथवास्त्वस्य घसंज्ञा को दोषः । घादिषु नद्या ह्रस्वो भवतीति‡ ह्रस्वत्वं प्रसज्येत । समानाधिकरणेषु घादिष्वित्येवं तत् । यदा तर्हि सैव नदी स एव तरस्तदा प्राप्नोति ।

* १.१.७२. † १.१.५० ‡ ६.३.४३

स्त्रीलिङ्गेषु घादिष्वित्येवं तत् । अवश्यं चैतदेवं विज्ञेयम् । समानाधिकरणेषु घादिष्वित्युच्यमान इह प्रसज्येत । महिषी रूपमिव ब्राह्मणी रूपमिवेति ॥

बहुगणवतुडति संख्या ॥ १ । १ । २३ ॥

संख्यासंज्ञायां संख्याग्रहणम् ॥ १ ॥

संख्यासंज्ञायां संख्याग्रहणं कर्तव्यम् । बहुगणवतुडतयः संख्यासंज्ञा भवन्ति । संख्या च संख्यासंज्ञा भवतीति वक्तव्यम् । किं प्रयोजनम् ।

संख्यासंप्रत्ययार्थम् ॥ २ ॥

एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येत्येष संप्रत्ययो यथा स्यात् ॥ ननु चैकादिका संख्या लोके संख्येति प्रतीता तेनास्याः संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति । एवमपि कर्तव्यम् ।

इतरथा ह्यसंप्रत्ययो ऽकृत्रिमत्वाद्यथा लोके ॥ ३ ॥

अक्रियमाणे हि संख्याग्रहण एकादिकायाः संख्यायाः संख्येत्येष संप्रत्ययो न स्यात् । किं कारणम् । अकृत्रिमत्वात् । बह्वादीनां कृत्रिमा संज्ञा । कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति यथा लोके । तद्यथा । लोके गोपालकमानय कटजकमानयेति यस्यैषा संज्ञा भवति स आनीयते न यो गाः पालयति यो वा कटे जातः । यदि तर्हि कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति नदीपौर्णमास्याग्रहायणीभ्यः [५.४.११०] अत्रापि प्रसज्येत । पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति । तद्विशेषेभ्यस्तर्हि प्राप्नोति गङ्गा यमुनेति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न तद्विशेषेभ्यो भवतीति यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति* ॥ इह तर्हि प्राप्नोति नदीभिश्च [२.१.२०] इति । बहुवचननिर्देशान्न भविष्यति । स्वरूपविधिस्तर्हि प्राप्नोति । बहुवचननिर्देशादेव न भविष्यति ॥ एवं न चेदमकृतं भवति कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति न च कश्चिद्दोषो भवति ॥

उत्तरार्थं च ॥ ४ ॥

उत्तरार्थं च संख्याग्रहणं कर्तव्यम् । ष्णान्ता षट् [१.१.२४] षकारनकारान्तायाः संख्यायाः षट्संज्ञा यथा स्यात् । इह मा भूत् । पामानः विप्रुष इति† ॥

* ५.४.१०७.　　† ७.१.२२.

इहार्थेन तावन्नार्थः संख्याग्रहणेन । ननु चोक्तमितरथा ह्यसंप्रत्ययो ऽकृत्रिमत्वाद्यथा लोक इति । नैष दोषः । अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति । अर्थो वास्यैवंसंज्ञकेन भवति प्रकृतं वा तत्र भवतीदमेवंसंज्ञकेन कर्तव्यमिति । आतश्चार्थात्प्रकरणाद्वा । अङ्ग हि भवान्ग्राम्यं पांसुरपादमप्रकरणज्ञमागतं ब्रवीतु गोपालकमानय कटजकमानयेति । उभयगतिस्तस्य भवति साधीयो वा यष्टिहस्तं गमिष्यति ॥ यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवत्येवमिहापि प्राप्नोति । जानाति ह्यसौ बह्वादीनामियं संज्ञा कृतेति ॥ न यथा लोके तथा व्याकरणे । उभयगतिः पुनरिह भवति । अन्यत्रापि नावश्यमिहैव । तद्यथा । कर्तुरीप्सिततमं कर्म [१. ४. ४९] इति कृत्रिमा कर्मसंज्ञा । कर्मप्रदेशेषु चोभयगतिर्भवति । कर्मणि द्वितीया [२.३.२] इति कृत्रिमस्य ग्रहणं कर्तरि कर्मव्यतिहारे [१.३.१४] इत्यकृत्रिमस्य । तथा साधकतमं करणम् [१.४.४२] इति कृत्रिमा करणसंज्ञा । करणप्रदेशेषु चोभयगतिर्भवति । कर्तृकरणयोस्तृतीया [२.३.१८] इति कृत्रिमस्य ग्रहणं शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे [३.१.१७] इत्यत्राकृत्रिमस्य । तथाधारो ऽधिकरणम् [१.४.४५] इति कृत्रिमाधिकरणसंज्ञा । अधिकरणप्रदेशेषु चोभयगतिर्भवति । सप्तम्यधिकरणे च [२.३.३६] इति कृत्रिमस्य ग्रहणं विप्रतिषिद्धं चानधिकरणवाचि [२.४.१३] इत्यकृत्रिमस्य ॥ अथवा नेदं संज्ञाकरणं तद्वदतिदेशो ऽयम् । बहुगणवतुडतयः संख्यावद्भवन्तीति । स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यसंख्यां संख्येत्याह संख्यावदिति गम्यते ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्यासंप्रत्यय इति यदयं संख्याया अतिशदन्तायाः कन् [५.१.२२] इति तिशदन्तायाः प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । न हि कृत्रिमा त्यन्ता शदन्ता वा संख्यास्ति । ननु चेयमस्ति डतिः । यत्तर्हि शदन्तायाः प्रतिषेधं शास्ति । यद्यपि त्यन्तायाः प्रतिषेधं शास्ति । ननु चोक्तं डत्यर्थमेतत्स्यादिति । अर्थवद्ग्रहणे नानर्थकस्येत्यर्थवतस्तिशब्दस्य ग्रहणं न च डतेस्तिशब्दो ऽर्थवान् ॥ अथवा महतीयं संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । संख्यायते ऽनया संख्येति । एकादिकया चापि संख्यायते ॥

स्त्रीलिङ्गेषु घादिष्विव्येवं तत् । अवश्यं चैतदेवं विज्ञेयम् । समानाधिकरणेषु घादिष्वित्युच्यमान इह प्रसज्येत । महिषी रूपमिव ब्राह्मणी रूपमिवेति ॥

बहुगणवतुडति संख्या ॥ १ । १ । २३ ॥

संख्यासंज्ञायां सख्याग्रहणम् ॥ १ ॥

सख्यासज्ञायां सख्याग्रहण कर्तव्यम् । बहुगणवतुडतयः सख्यासंज्ञा भवन्ति । संख्या च सख्यासंज्ञा भववीति वक्तव्यम् । किं प्रयोजनम् ।

संख्यासंप्रत्ययार्थम् ॥ २ ॥

एकादिकायाः सख्यायाः सख्याप्रदेशेषु सख्येत्येष संप्रत्ययो यथा स्यात् ॥ ननु चैकादिका सख्या लोके सख्येति प्रतीता तेनास्याः सख्याप्रदेशेषु सख्यासप्रत्ययो भविष्यति । एवमपि कर्तव्यम् ।

इतरथा ह्यसंप्रत्ययो ऽकृत्रिमत्वाद्यथा लोके ॥ ३ ॥

अक्रियमाणे हि सख्याग्रहण एकादिकायाः संख्यायाः सख्येत्येष संप्रत्ययो न स्यात् । किं कारणम् । अकृत्रिमत्वात् । बह्वादीनां कृत्रिमा सज्ञा । कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति यथा लोके । तद्यथा । लोके गोपालकमानय कटजकमानयेति यस्यैषा संज्ञा भवति स आनीयते न यो गाः पालयति यो वा कटे जातः । यदि तर्हि कृत्रिमाकृत्रिमयोः कृत्रिमे सप्रत्ययो भवति नदीपौर्णमास्याग्रहायणीभ्य. [५.४ ११०] अत्रापि प्रसज्येत । पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति । तद्विशेषेभ्यस्तर्हि प्राप्नोति गङ्गा यमुनेति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न तद्विशेषेभ्यो भवतीति यदय विपाट्शब्दं शरत्प्रभृतिषु पठति* ॥ इह तर्हि प्राप्नोति नदीभिश्च [२ १ २०] इति । बहुवचननिर्देशान्न भविष्यति । स्वरूपविधिस्तर्हि प्राप्नोति । बहुवचननिर्देशादेव न भविष्यति ॥ एव न चेदमकृत भवति कृत्रिमाकृत्रिमयोः कृत्रिमे सप्रत्यय इति न च कश्चिद्दोषो भवति ॥

उत्तरार्थं च ॥ ४ ॥

उत्तरार्थं च सख्याग्रहणं कर्तव्यम् । ष्णान्ता षट् [१ १ २४] षकारनकारान्तायाः सख्यायाः षट्सज्ञा यथा स्यात् । इह मा भूत् । पामानः विप्रुष इति† ॥

* ५ ४ १०७ † ७ १ २२

इहार्थेन तावन्नार्थः संख्याग्रहणेन । ननु चोक्तमितरथा ह्यसंप्रत्ययो ऽकृत्रिमत्वाद्यथा लोक इति । नैष दोषः । अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति । अर्थो वास्यैवंसंज्ञकेन भवति प्रकृतं वा तत्र भवतीदमेवंसंज्ञकेन कर्तव्यमिति । आतश्चार्थात्प्रकरणाद्वा । अङ्ग हि भवान्ग्राम्यं पांसुरपादमप्रकरणज्ञमागतं ब्रवीतु गोपालकमानय कटजकमानयेति । उभयगतिस्तस्य भवति साधीयो वा यष्टिहस्त गमिष्यति ॥ यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवत्येवमिहापि प्राप्नोति । जानाति ह्यसौ बह्वादीनामियं संज्ञा कृतेति ॥ न यथा लोके तथा व्याकरणे । उभयगतिः पुनरिह भवति । अन्यत्रापि नावश्यमिहैव । तद्यथा । कर्तुरीप्सिततमं कर्म [१. ४. ४९] इति कृत्रिमा कर्मसंज्ञा । कर्मप्रदेशेषु चोभयगतिर्भवति । कर्मणि द्वितीया [२.३.२] इति कृत्रिमस्य ग्रहणं कर्तरि कर्मव्यतिहारे [१.३.१४] इत्यकृत्रिमस्य । तथा साधकतमं करणम् [१.४.४२] इति कृत्रिमा करणसंज्ञा । करणप्रदेशेषु चोभयगतिर्भवति । कर्तृकरणयोस्तृतीया [२.३.१८] इति कृत्रिमस्य ग्रहणं शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे [३ १ १७] इत्यत्राकृत्रिमस्य । तथाधारो ऽधिकरणम् [१.४.४५] इति कृत्रिमाधिकरणसंज्ञा । अधिकरणप्रदेशेषु चोभयगतिर्भवति । सप्तम्यधिकरणे च [२.३.३६] इति कृत्रिमस्य ग्रहणं विप्रतिषिद्धं चानधिकरणवाचि [२ ४.१३] इत्यकृत्रिमस्य ॥ अथवा नेदं संज्ञाकरणं तद्वदतिदेशो ऽयम् । बहुगणवतुडतयः संख्यावद्भवन्तीति । स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यसंख्यां संख्येत्याह संख्यावदिति गम्यते ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्यासंप्रत्यय इति यदयं संख्याया अतिशदन्तायाः कन् [५.१ २२] इति तिशदन्तायाः प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । न हि कृत्रिमा त्यन्ता शदन्ता वा संख्यास्ति । ननु चेयमस्ति डतिः । यत्तर्हि शदन्तायाः प्रतिषेधं शास्ति । यच्चापि त्यन्तायाः प्रतिषेधं शास्ति । ननु चोक्तं डत्यर्थमेतत्स्यादिति । अर्थवद्ग्रहणे नानर्थकस्येत्यर्थवतस्तिशब्दस्य ग्रहणं न च डतेस्तिशब्दो ऽर्थवान् ॥ अथवा महतीयं संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । संख्यायते ऽनया संख्येति । एकादिकया चापि संख्यायते ॥

उत्तरार्थेन चापि नार्थः सख्याग्रहणेन । इद प्रकृतमुत्तरत्रानुवर्तिष्यते ॥ इद त्रै सज्ञार्थमुत्तरत्र च सज्ञिविशेषणेनार्थः । न चान्यार्थं प्रकृतमन्यार्थं भवति । न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवति ॥ यत्तावदुच्यते न चान्यार्थं प्रकृतमन्यार्थं भवतीत्यन्यार्थमपि प्रकृतमन्यार्थं भवति । तद्यथा । शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीय पीयत उपस्पृश्यते च शालयश्च भाव्यन्ते । यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवतीति भवेद्द्रव्येष्वेतदेव स्यात् । शब्दस्तु खलु येन येन विशेषणेनाभिसबध्यते तस्य तस्य विशेषको भवति ॥ अथवा सापेक्षो ऽय निर्देशः क्रियते न चान्यत्किचिदपेक्ष्यमस्ति ते सख्यामेवापेक्षिष्यामहे ॥

अध्यर्धग्रहण च समासकन्विध्यर्थम् ॥ ५ ॥

अध्यर्धग्रहण च कर्तव्यम् । किं प्रयोजनम् । समासकन्विध्यर्थम् । समासविध्यर्थं कन्विध्यर्थं च । समासविध्यर्थं तावत् । अध्यर्धशूर्पम्* । कन्विध्यर्थम् । अध्यर्धकम्† ॥

लुकि चाग्रहणम् ॥ ६ ॥

लुकि चाध्यर्धग्रहण न कर्तव्य भवति । अध्यर्धपूर्वद्विगोर्लुगसज्ञायाम् [५ १ २८] इति । द्विगोरित्येव सिद्धम् ॥

अर्धपूर्वपदश्च पूरणप्रत्ययान्तः ॥ ७ ॥

अर्धपूर्वपदश्च पूरणप्रत्ययान्तः सख्यासज्ञो भवतीति वक्तव्यम् । किं प्रयोजनम् । समासकन्विध्यर्थमेव । समासविध्यर्थं कन्विध्यर्थं च । समासविध्यर्थं तावत् । अर्धपञ्चमशूर्पम् । कन्विध्यर्थम् । अर्धपञ्चमकम् ॥

अधिकग्रहण चालुकि समासोत्तरपदवृद्ध्यर्थम् ॥ ८ ॥

अधिकग्रहण चालुकि कर्तव्यम् । किं प्रयोजनम् । समासोत्तरपदवृद्ध्यर्थम् । समासविध्यर्थमुत्तरपदवृद्ध्यर्थं च । समासविध्यर्थं तावत् । अधिकषाष्टिकः अधिकसाप्ततिकः‡ । उत्तरपदवृद्ध्यर्थम् । अधिकषाष्टिक अधिकसाप्ततिक § । अलुकीति किमर्थम् । अधिकषाष्टिक अधिकसाप्ततिक ¶ ॥

---

* २ १ ५१ ५ १ २८ † ५ १ २२ ‡ २ १ ५१ ५ १ २८ § ७ ३ १५ ¶ ५ १ १८

बहुव्रीहौ चाग्रहणम् ॥ ९ ॥

बहुव्रीहौ चाधिकशब्दस्य ग्रहण न कर्तव्य भवति । सख्ययाव्ययासन्नादूराधिकसख्या· सख्येये [२ २ २५] इति । सख्येत्येव सिद्धम् ॥

वद्वादीनामग्रहणम् ॥ १० ॥

वद्वादीना ग्रहण शक्यमकर्तुम् । केनेदानीं सख्याप्रदेशेषु सख्यासम्प्रत्ययो भविष्यति । ज्ञापकात्सिद्धम् । किं ज्ञापकम् । यदय वतोरिड्वा [५ १ २३] इति सख्याया विहितस्य कनो वत्वन्तादिट शास्ति । वतोरेव तज्ज्ञापक स्यात् । नेत्याह । योगापेक्ष ज्ञापकम् ॥

ष्णान्ता षट् ॥ १ । १ । २४ ॥

षट्सज्ञायामुपदेशवचनम् ॥ १ ॥

षट्सज्ञायामुपदेशग्रहण कर्तव्यम् । उपदेशे षकारनकारान्ता सख्या षट्सज्ञा भवतीति वक्तव्यम् । किं प्रयोजनम् ।

शताद्यष्टनोर्नुम्नुडर्थम् ॥ २ ॥

शतानि सहस्राणि । नुमि कृते ष्णान्ता षडिति षट्संज्ञा प्राप्नोति* । उपदेशग्रहणान्न भवति ॥ अष्टानामित्यत्रात्वे कृते षट्सज्ञा न प्राप्नोति† । उपदेशग्रहणाद्भवति ॥

उक्त वा ॥ ३ ॥

किमुक्तम् । इह तावच्छतानि सहस्राणीति सन्निपातलक्षणो विधिरनिमित्त तद्विघातस्येति‡ । अष्टनोऽप्युक्तम् । किमुक्तम् । अष्टनो दीर्घग्रहण षट्सज्ञाज्ञापकमाकारान्तस्य नुडर्थमिति§ ॥

अथवाकारोऽप्यत्र निर्दिश्यते । षकारान्ता नकारान्ताकारान्ता च सख्या षट्सज्ञा भवतीति । इहापि तर्हि प्राप्नोति । सप्रमादो युष्म एकास्ता एका इति¶ । नैष दोष । एकशब्दोऽय बह्वर्थ । अस्त्येव सख्यापदम् । तद्यथा । एको द्वौ बहव इति । अस्त्यसहायवाची । तद्यथा । एकाग्नय एकहलानि एकाकिभि क्षुद्रकैर्जितमिति । असहायैरित्यर्थ । अस्त्यन्यार्थे वर्तते । तद्यथा । प्रजामेका रक्षत्यूर्जमे-

* ७ १ ७२ २१ † ७ २ ८४ ७ १ ५५ ‡ १ १ ३९ § ६ १ १०२ ¶ ७ १ २२

केति। अन्येत्यर्थः। सधमादो द्युम्न एकास्ताः। अन्या इत्यर्थः। तथो ऽन्यार्थे वर्तते तस्यैव प्रयोगः॥ इह तर्हि प्राप्नोति। द्वाभ्यामिष्टये विंशत्या चेति* ॥ एवं तर्हि सप्तमे योगविभागः करिष्यते†। अष्टाभ्य औश्। ततः षड्भ्यः। षड्भ्यश्च यदुक्तमष्टाभ्योऽपि तद्भवति। ततो लुक्। लुक् च भवति षड्भ्य इति॥ अथवोपरिष्टाद्योगविभागः करिष्यते‡। अष्टन आ विभक्तौ। ततो रायः। रायश्च विभक्तावाकारादेशो भवति। हलीत्युभयोः शेषः॥ यद्येवं प्रियाष्टौ प्रियाष्टा इति न सिध्यति प्रियाष्टानौ प्रियाष्टान इति च प्राप्नोति। यथालक्षणमप्रयुक्ते॥

डति च ॥ १ । १ । २५ ॥

इदं डतिग्रहणं द्विः क्रियते संख्यासंज्ञायां षट्संज्ञायां च। एकं शक्यमकर्तुम्। कथम्। यदि तावत्संख्यासंज्ञायां क्रियते षट्संज्ञायां न करिष्यते। कथम्। ष्णान्ता षडित्यत्र डतीत्यनुवर्तिष्यते। अथ षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते। डति चेत्यत्र संख्यासंज्ञाप्यनुवर्तिष्यते॥

क्तक्तवतू निष्ठा ॥ १ । १ । २६ ॥

निष्ठासंज्ञायां समानशब्दप्रतिषेधः॥ १॥

निष्ठासंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। लोतः गर्त इति॥

निष्ठासंज्ञायां समानशब्दाप्रतिषेधः॥ २॥

निष्ठासंज्ञायां समानशब्दानामप्रतिषेधः। अनर्थकः प्रतिषेधो ऽप्रतिषेधः। निष्ठासंज्ञा कस्मान्न भवति। अनुबन्धो ऽन्यत्वकरः। अनुबन्धः क्रियते सो ऽन्यत्वं करिष्यति॥

अनुबन्धो ऽन्यत्वकर इति चेन्न लोपात्॥ ३॥

अनुबन्धो ऽन्यत्वकर इति चेत्तन्न। किं कारणम्। लोपात्। लुप्यते ऽत्रानुबन्धः। लुप्ते ऽत्रानुबन्धे नान्यत्वं भविष्यति। तद्यथा। कतरद्देवदत्तस्य गृहम्। अदो यत्रासौ काक इति। उत्पतिते काके नष्टं तद्गृहं भवति। एवमिहापि लुप्ते ऽनुबन्धे नष्टः

* ६.१.१७० † ७.१.२२ ‡ ७.२.८४

प्रत्ययो भवति ॥ यद्यपि लुप्यते जानाति त्वसौ सानुबन्धकस्येयं संज्ञा कृतेति । तद्यथा । इतरत्रापि कतरद्देवदत्तस्य गृहम् । अदो यत्रासौ काक इति । उत्पतिते काके यद्यपि नष्टं तद्गृहं भवत्यन्ततस्तमुद्देशं जानाति ॥

सिद्धविपर्यासश्च ॥ ४ ॥

सिद्धश्च विपर्यासः । यद्यपि जानाति संदेहस्तस्य भवत्ययं स तशब्दो लोनः गर्त इत्ययं स तशब्दो लूनः गीर्ण इति । तद्यथा । इतरत्रापि कतरद्देवदत्तस्य गृहम् । अदो यत्रासौ काक इति । उत्पतिते काके यद्यपि तमुद्देशं जानाति संदेहस्तु तस्य भवतीदं तद्गृहमिदं तद्गृहमिति ॥ एवं तर्हि

कारककालविशेषात्सिद्धम् ॥ ५ ॥

कारककालविशेषावुपादेयौ । भूते यस्तशब्दः कर्तरि कर्मणि भावे चेति । तद्यथा । इतरत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति सोऽध्रुवेण निमित्तेन ध्रुवं निमित्तमुपादत्ते वेदिकां पुण्डरीकं वा ॥ एवमपि प्राकीर्ष्टेत्यत्र प्राप्नोति ।

लुङि सिजादिदर्शनात् ॥ ६ ॥

लुङि सिजादिदर्शनान्न भविष्यति । यत्र तर्हि सिजादयो न दृश्यन्ते प्राभित्तेति । दृश्यन्तेऽत्रापि सिजादयः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गस्यते । यथैवायमनुपदिष्टान्कारककालविशेषानवगच्छत्येवमेतदप्यवगन्तुमर्हति यत्र सिजादयो नेति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ॥

सर्वादीनि सर्वनामानि ॥ १ । १ । २७ ॥

सर्वादीनीति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । सर्वशब्द आदिर्येषां तानीमानीति । यद्येवं सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोति । किं कारणम् । अन्यपदार्थत्वाद्बहुव्रीहेः । बहुव्रीहिरयमन्यपदार्थे वर्तते* । तेन यदन्यत्सर्वशब्दात्तस्य सर्वनामसंज्ञा प्राप्नोति । तद्यथा । चित्रगुरानीयतामित्युक्ते यस्य ता गावो भवन्ति स आनीयते न गावः । नैष दोषः । भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा । चित्रवाससमानय । लोहितोष्णीषा ऋत्विजः प्रचरन्ति । तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति ॥

इह सर्वनामानीति पूर्वपदात्संज्ञायामगः [८. ४. ३.] इति णत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः ।

सर्वनामसंज्ञायां निपातनाण्णत्वाभावः ॥ १ ॥

सर्वनामसंज्ञायां निपातनाण्णत्वं न भविष्यति । किमेतन्निपातनं नाम । अथ कः प्रतिषेधो नाम । अविशेषेण किंचिदुक्त्वा विशेषेण नेत्युच्यते । तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यत इदं न भवतीति । निपातनमप्येवंजातीयकमेव । अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं क्रियते । तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यत इदं न भवतीति ॥ ननु च निपातनाद्यथाणत्वं स्याद्यथाप्राप्तं च णत्वम् । किमन्येऽप्येवं विधयो भवन्ति । इहेको यणचि [६ .१.७७] इति वचनाद्य यण्स्याद्यथाप्राप्तश्चेक्श्रूयेत । नैष दोषः । अस्त्यत्र विशेषः । षष्ठ्यात्र निर्देशः क्रियते षष्ठी च पुनः स्थानिनं निवर्तयति ॥ इह तर्हि कर्तरि शप् [३.१.६८] दिवादिभ्यः श्यन् [६९] इति वचनाच्च श्यन्स्याद्यथाप्राप्तश्च शप्श्रूयेत । नैषः दोषः । शबादेशाः श्यन्नादयः करिष्यन्ते । तत्तर्हि शपो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । कर्तरि शबिति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । दिवादिभ्य इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१.१.६७] इति । प्रत्ययविधिरयं न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति । नायं प्रत्ययविधिः । विहितः प्रत्ययः प्रकृतश्चानुवर्तते ॥ इह तद्धितव्ययसर्वनाम्नामकच्प्राक्टेः [५.३.७१] इति वचनाद्याकच्स्याद्यथाप्राप्तश्च कः श्रूयेत । नैष दोषः । नाप्राप्ते हि के ऽकजार-

* २. २. २४

भ्यते स बाधको भविष्यति । निपातनमप्येवंजातीयकमेव । नाप्राप्ते णत्वे निपातनमारभ्यते तद्बाधकं भविष्यति ॥ यदि तर्हि निपातनान्यप्येवंजातीयकानि भवन्ति समस्तते दोषो भवति । इहान्ये वैयाकरणाः समस्तते विभाषा लोपमारभन्ते समो हिततततयोर्वेति । सततम् संततम् सहितम् संहितमिति । इह पुनर्भवान्निपातनाच्च मलोपमिच्छत्यपरस्पराः क्रियासातत्ये [६.१.१४४] इति यथाप्राप्तं चालोपं संततमित्येतन्न सिध्यति । कर्तव्यो ऽत्र यत्नः । बाधकान्येव हि निपातनानि भवन्ति ॥

संज्ञोपसर्जनप्रतिषेधः ॥ २ ॥

संज्ञोपसर्जनीभूतानां सर्वादीनां प्रतिषेधो वक्तव्यः । सर्वो नाम कश्चित्तस्मै सर्वाय देहि । अतिसर्वाय देहि ॥ स कथं कर्तव्यः ।

पाठात्पर्युदासः पठितानां संज्ञाकरणम् ॥ ३ ॥

पाठादेव पर्युदासः कर्तव्यः । शुद्धानां पठितानां संज्ञा कर्तव्या । सर्वादीनि सर्वनामसंज्ञानि भवन्ति । संज्ञोपसर्जनीभूतानि न सर्वादीनि । किमविशेषेण । नेत्याह । विशेषेण च । किं प्रयोजनम् ।

सर्वाद्यानन्तर्यकार्यार्थम् ॥ ४ ॥

सर्वादीनामानन्तर्येण यदुच्यते कार्यं तदपि संज्ञोपसर्जनीभूतानां मा भूदिति । किं प्रयोजनम् ।

प्रयोजन डतरादीनामद्भावे ॥ ५ ॥

डतरादीनामद्भावे प्रयोजनम् * । अतिक्रान्तमिदं ब्राह्मणकुलं कतरत् अतिकतरं ब्राह्मणकुलमिति ॥

त्यदादिविधौ च ॥ ६ ॥

त्यदादिविधौ च प्रयोजनम् † । अतिक्रान्तोऽयं ब्राह्मणस्तम् अतितद्ब्राह्मण इति ॥ संज्ञाप्रतिषेधस्तावन्न वक्तव्यः । उपरिष्टाद्योगविभागः करिष्यते ‡ । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम् । ततोऽसंज्ञायामिति । सर्वादीनीत्येवं यान्यनुक्रान्तान्यसंज्ञायां तानि द्रष्टव्यानि ॥ उपसर्जनप्रतिषेधश्च न कर्तव्यः । अनुपसर्जनात् [४.१.१४] इत्येष योगः प्रत्याख्यायते तमेवमभिसंभन्त्स्यामः । अनुपसर्जन अ अदिति । किमिदम् अदिति । अकारादकारो शिष्यमाणादनुपसर्जनस्य

* ७.१.२५ † ७.२.१०२ ‡ १.१.३४

द्रष्टव्यौ । यद्येवमतियुष्मत् अत्यस्मदिति न सिध्यति* । प्रश्लिष्टनिर्देशो ऽयम् । अनुपसर्जन अ अ अदिति । अकारान्तादकारात्कारौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ ॥ अथवाङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवति । यद्येवं परमपञ्च परमसप्त षड्भ्यो लुक् [७.१.२२] इति लुग्न प्राप्नोति । नैष दोषः । षट्प्रधान एष समासः ॥ इह तर्हि प्रियसक्थ्ना ब्राह्मणेनानङ् न प्राप्नोति† । सप्तमीनिर्दिष्टे यदुच्यते प्रकृतविभक्तौ तद्भवति । यद्येवमतितल् अतितदौ अतितद इत्यत्वं प्राप्नोति‡ । तत्रापि वक्तव्यम् । न वक्तव्यम् । इह तावदड्डतरादिभ्यः पञ्चभ्यः [७.१.२५] इति पञ्चम्यङ्गस्येति षष्ठी तत्राशक्यं विविभक्तित्वाड्डतरादिभ्य इति पञ्चम्याङ्गं विशेषयितुम् । तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात्प्रत्ययात् । डतरादिभ्यो यो विहित इति । इहेदानीमस्थिदधिसक्थ्यक्ष्णामनङुदात्त इति त्यदादीनामो भवतीत्यस्थ्यादीनामित्येषा षष्ठ्यङ्गस्येत्यपि त्यदादीनामित्यपि षष्ठ्यङ्गस्येत्यपि । तत्र कामचारो गृह्यमाणेन वा विभक्तिं विशेषयितुमङ्गेन वा । यावता कामचार इह तावदस्थिदधिसक्थ्यक्ष्णामनङुदात्त इत्यङ्गेन विभक्तिं विशेषयिष्यामो ऽस्थ्यादिभिरनङम् । अङ्गस्य विभक्तावनङ् भवत्यस्थ्यादीनामिति । इहेदानीं त्यदादीनामो भवतीति गृह्यमाणेन विभक्तिं विशेषयिष्यामो ऽङ्गेनाकारम् । त्यदादीनां विभक्तावो भवत्यङ्गस्येति ॥ यद्येवमतिसः अत्वं न प्राप्नोति । नैष दोषः । त्यदादिप्रधान एष समासः ॥ अथवा नेदं संज्ञाकरणं पाठविशेषणमिदम् । सर्वेषां यानि नामानि तानि सर्वादीनि । संज्ञोपसर्जने च विशेषे ऽवतिष्ठेते । यद्येवं संज्ञाश्रय यत्कार्यं तन्न सिध्यति । सर्वनाम्नः स्मै [७.१.१४] आमि सर्वनाम्नः सुट् [५२] इति । अन्वर्थग्रहणं तत्र विज्ञास्यते । सर्वेषां यन्नाम तत्सर्वनाम सर्वनाम्न उत्तरस्य ङेः स्मै भवति सर्वनाम्न उत्तरस्यामः सुड्भवति । यद्येवं सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति । एतेषां चापि शब्दानामेकैकस्य स स विषयस्तस्मिंस्तस्मिन्विषये यो यः शब्दो वर्तते तस्य तस्य तस्मिंस्तस्मिन्वर्तमानस्य सर्वनामकार्यं प्राप्नोति ॥ एवं तर्ह्युभयमनेन क्रियते पाठश्चैव विशेष्यते संज्ञा च । कथं पुनरेकेन यत्नेनोभयं लभ्यम् । लभ्यमित्याह । कथम् । एकशेषनिर्देशात् । एकशेषनिर्देशो ऽयम् । सर्वादीनि च सर्वादीनि च सर्वादीनि । सर्वनामानि च सर्वनामानि च सर्वनामानि । सर्वादीनि सर्वनामसंज्ञानि भवन्ति सर्वेषां यानि च नामानि तानि सर्वादीनि । संज्ञोपसर्जने च विशेषे ऽवतिष्ठेते ॥ अथवा महतीयं संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि

* ७ १. ११.   † ७ १ ७५   ‡ ७ २ १०२.

संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । सर्वादीनि सर्वनामसंज्ञानि भवन्ति सर्वेषां नामानीति चातः सर्वनामानि । संज्ञोपसर्जने च विशेषे ऽवतिष्ठेते ॥

अथोभस्य सर्वनामत्वे को ऽर्थः ।

उभस्य सर्वनामत्वे ऽकजर्थः ॥ ७ ॥

उभस्य सर्वनामत्वे ऽकजर्थः* पाठः क्रियते । उभकौ । किमुच्यते ऽकजर्थ इति न पुनरन्यान्यपि सर्वनामकार्याणि ।

अन्याभावो द्विवचनटाब्विषयत्वात् ॥ ८ ॥

अन्येषां सर्वनामकार्याणामभावः । किं कारणम् । द्विवचनटाब्विषयत्वात् । उभशब्दो ऽयं द्विवचनटाब्विषयो ऽन्यानि च सर्वनामकार्याण्येकवचनबहुवचनेषूच्यन्ते ॥ यदा पुनरयमुभशब्दो द्विवचनटाब्विषयः क इदानीमस्यान्यत्र भवति ।

उभयो ऽन्यत्र ॥ ९ ॥

उभयशब्दो ऽस्यान्यत्र भवति । उभये देवमनुष्याः । उभयो मणिरिति ॥ किं च स्याद्यद्यत्राकज्न स्यात् । कः प्रसज्येत । कश्चेदानीं काकचोर्विशेषः । उभशब्दो ऽयं द्विवचनटाब्विषय इत्युक्तम् । तत्राकचि सत्यकचस्तन्मध्यपतितत्वाच्छक्यत एतद्वक्तुं द्विवचनपरो ऽयमिति । के पुनः सति नायं द्विवचनपरः स्यात् । तत्र द्विवचनपरता वक्तव्या । यथैव तर्हि के सति नायं द्विवचनपर एवमाप्यपि सति नायं द्विवचनपरः स्यात् । तत्रापि द्विवचनपरता वक्तव्या । अवचनादापि तत्परविज्ञानम् । अन्तरेणापि वचनमापि द्विवचनपरो ऽयं भविष्यति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एकादेशे कृते द्विवचनपरो ऽयमन्तादिवद्भावेन ।

अवचनादापि तत्परविज्ञानमिति चेत्के ऽपि तुल्यम् ॥ १० ॥

अवचनादापि तत्परविज्ञानमिति चेत्के ऽप्यन्तरेण वचनं द्विवचनपरो भविष्यति । कथम् । स्वार्थिकाः प्रत्ययाः प्रकृतितो ऽविशिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति ॥

अथ भवतः सर्वनामत्वे कानि प्रयोजनानि ।

भवतो ऽकच्छेषात्वानि ॥ ११ ॥

भवतो ऽकच्छेषात्वानि प्रयोजनानि । अकच्* । भवकान् । शेषः† । स च

---

* ५ ३ ७१ † ५ ३ ७२

भवांश्च भवन्तौ । आत्वम्* । भवादृगिति ॥ किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम् । उदाहरणमात्रमित्याह । तृतीयादयो ऽपि ह्रीष्यन्ते । सर्वनाम्नस्तृतीया च [२.३.२७] । भवता हेतुना । भवतो हेतोरिति ॥

विभाषा दिक्समासे बहुव्रीहौ ॥ १ । १ । २८ ॥

दिग्ग्रहणं किमर्थम् । न बहुव्रीहौ [१.१.२९] इति प्रतिषेधं वक्ष्यति । तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेध इति । दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति । दिगुपदिष्टे† विभाषान्यत्र प्रतिषेधः ॥ अथ समासग्रहणं किमर्थम् । समास एव यो बहुव्रीहिस्तत्र यथा स्याद्बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति । दक्षिणदक्षिणस्यै देहीति‡ ॥ अथ बहुव्रीहिग्रहणं किमर्थम् । द्वन्द्वे मा भूत् । दक्षिणोत्तरपूर्वाणामिति । नैतदस्ति प्रयोजनम् । द्वन्द्वे च [१.१.३१] इति प्रतिषेधो भविष्यति । नाप्राप्ते प्रतिषेध इयं विभाषारभ्यते सा यथैव न बहुव्रीहाविव्येतं प्रतिषेधं बाधत एवं द्वन्द्वे चेत्येतमपि बाधेत । न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनं भवति । न चाप्राप्ते न बहुव्रीहावित्येतस्मिन्प्रतिषेध इयं विभाषारभ्यते द्वन्द्वे चेत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च ॥ अथवा पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमियं विभाषा न बहुव्रीहावित्येतं प्रतिषेधं बाधिष्यते द्वन्द्वे चेत्येतं प्रतिषेधं न बाधिष्यते ॥ अथवेदं तावदयं प्रष्टव्यः । इह कस्मान्न भवति । या पूर्वा सोत्तरास्योन्मुग्धस्य सो ऽयं पूर्वोत्तर उन्मुग्धः । तस्मै पूर्वोत्तराय देहीति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । यथैव नार्थो बहुव्रीहिग्रहणेन । द्वन्द्वे कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ उत्तरार्थं तर्हि बहुव्रीहिग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते तत्रैव न बहुव्रीहाविति । द्वितीयं कर्तव्यम् । बहुव्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्याद्बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत् । एकैकस्मै देहि§ । एतदपि नास्ति प्रयोजनम् । समास इति वर्तते तेन बहुव्रीहिं विशेषयिष्यामः । समासो यो बहुव्रीहिरिति ॥ इदं तर्हि प्रयोजनम् । अवयवभूतस्यापि बहुव्रीहेः प्रतिषेधो यथा स्यात् । इह मा भूत् । वस्त्रमन्तरमेषां त इमे वस्त्रान्तराः । वसनमन्तरमेषां त इमे वसनान्तराः । वस्त्रान्तराश्च वसनान्तराश्च वस्त्रान्तरवसनान्तराः ॥

---

* ६ ३ ९१ † २ २ २६ ‡ ८ १ १० § ८ १ ९

न बहुव्रीहौ ॥ १ । १ । २९ ॥

किमुदाहरणम् । प्रियविश्वाय । नैतदस्ति प्रयोजनम् । सर्वादयन्तस्य बहुव्रीहेः प्रतिषेधेन भवितव्यम् । वक्ष्यति ह्येतत्* । बहुव्रीहौ सर्वनामसङ्ख्ययोरुपसङ्ख्यानमिति । तत्र विश्वप्रियायेति भवितव्यम् ॥ इदं तर्हि । द्व्यन्याय त्र्यन्याय । ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यम् । नैष दोषः । वक्ष्यत्येतत्* । सङ्ख्यासर्वनाम्नोर्यो बहुव्रीहिः परत्वात्तत्र सङ्ख्याया पूर्वनिपातो भवतीति ॥ इदं चाप्युदाहरणम् । प्रियविश्वाय । ननु चोक्तं विश्वप्रियायेति भवितव्यमिति । वक्ष्यत्येतत्* । वा प्रियस्येति ॥ न खल्वप्यवश्यं सर्वाद्यन्तस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यम् । किं तर्हि । असर्वाद्यन्तस्यापि भवितव्यम् । किं प्रयोजनम् । अकज्मा भूदिति । किं च स्याद्यद्यत्राकच्स्यात् । को न स्यात् । कश्चेदानीं काकचोर्विशेषः । व्यञ्जनान्तेषु विशेषः । अहकं पितास्य मकत्पितृकः त्वकं पितास्य त्वकत्पितृक इति प्राप्नोति । मत्कपितृकः त्वत्कपितृक इति चेष्यते । कथं पुनरिच्छतापि भवता बहिरङ्गेण प्रतिषेधेनान्तरङ्गो विधिः शक्यो बाधितुम् । अन्तरङ्गानपि विधीन्बहिरङ्गो विधिर्बाधते गोमत्प्रिय इति यथा । क्रियते तत्र यत्नः प्रत्ययोत्तरपदयोश्च [७.२ ९८] इति । ननु चेहापि क्रियते न बहुव्रीहाविति । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । प्रियविश्वाय । उपसर्जनप्रतिषेधेनाप्येतत्सिद्धम् ॥ अथ खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च । अस्ति तादर्थ्यात्ताच्छब्द्यं बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति । तद्यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम् ॥ गोनर्दीय आह ।

अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ ।

त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति ॥

प्रतिषेधे भूतपूर्वस्योपसङ्ख्यानम् ॥ १ ॥

प्रतिषेधे भूतपूर्वस्योपसङ्ख्यानं कर्तव्यम् । आढ्यो भूतपूर्व आढ्यपूर्वः । आढ्यपूर्वाय देहीति ॥

---

*२ १ २९ *

प्रतिषेधे भूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात् ॥ २ ॥

प्रतिषेधे भूतपूर्वस्योपसंख्यानमनर्थकम् । किं कारणम् । पूर्वादीनां व्यवस्थायामिति वचनात्* । पूर्वादीनां व्यवस्थायां सर्वनामसंज्ञोच्यते न चात्र व्यवस्था गम्यते ॥

तृतीयासमासे ॥ १ । १ । ३० ॥

समास इति वर्तमाने पुनः समासग्रहणं किमर्थम् । अयं तृतीयासमासो ऽस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च । अस्ति तादर्थ्यात्ताच्छब्द्यं तृतीयासमासार्थानि पदानि तृतीयासमास इति । तद्यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम् ॥ अथवा समास इति वर्तमाने पुनः समासग्रहणस्यैतत्प्रयोजनं योगाङ्गं यथोपजायेत । सति योगाङ्गे योगविभागः करिष्यते । तृतीया । तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासपूर्वाय देहि । संवत्सरपूर्वाय देहि । ततो ऽसमासे । असमासे च तृतीयायाः सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासेन पूर्वाय देहि ॥

विभाषा जसि ॥ १ । १ । ३२ ॥

जसः कार्यं प्रति विभाषाकञ्झि न भवति ॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥ १ । १ । ३४ ॥

अवरादीनां च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठितत्वात् ॥ १ ॥

अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकम् । किं कारणम् । गणे पठितत्वात् । गणे ह्येतानि पठ्यन्ते । कथं पुनर्ज्ञायते स पूर्वः पाठो ऽयं पुनःपाठ इति । तानि हि पूर्वादीनीमान्यवरादीनि । इमान्यपि पूर्वादीनि । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति स पूर्वः पाठो ऽयं पुनःपाठ इति यदयं पूर्वादिभ्यो नवभ्यो वा [७ १.१६] इति नवग्रहणं

* १ १ ३४

करोति । नत्रैव हि पूर्वादीनि ॥ इदं तर्हि प्रयोजनं व्यवस्थायामसंज्ञायामिति वक्ष्यामीति । एतदपि नास्ति प्रयोजनम् । एवंविशिष्टान्येवैतानि गणे पठ्यन्ते ॥ इदं तर्हि प्रयोजनं द्व्यादिपर्युदासेन* पर्युदासो मा भूदिति । एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति नैषां द्व्यादिपर्युदासेन पर्युदासो भवतीति यदयं पूर्वत्रासिद्धम् [८.२.१] इति निपातनं करोति । वार्त्तिककारश्च पठति जश्भावादिति चेदुत्तरत्राभावादपवादप्रसङ्ग इति† ॥ इदं तर्हि प्रयोजनं जसि विभाषां वक्ष्यामीति ॥

स्वमज्ञातिधनाख्यायाम् ॥ १ । १ । ३५ ॥

आख्याग्रहणं किमर्थम् । ज्ञातिधनपर्यायवाची यः स्वशब्दस्तस्य यथा स्यादिह मा भूत् । स्वे पुत्राः स्वाः पुत्राः । स्वे गावः स्वा गावः ॥

अन्तरं बहिर्योगोपसंव्यानयोः ॥ १ । १ । ३६ ॥

उपसंव्यानग्रहणमनर्थकं बहिर्योगेण कृतत्वात् ॥ १ ॥

उपसंव्यानग्रहणमनर्थकम् । किं कारणम् । बहिर्योगेण कृतत्वात् । बहिर्योग इत्येव सिद्धम् ॥

न वा शाटकयुगाद्यर्थम् ॥ २ ॥

न वानर्थकम् । किं कारणम् । शाटकयुगाद्यर्थम् । शाटकयुगाद्यर्थं तर्हीदं वक्तव्यं यत्रैतन्न ज्ञायते किमन्तरीयं किमुत्तरीयमिति ॥ अत्रापि य एष मनुष्यः *प्रेक्षापूर्वकारी भवति निर्ज्ञातं तस्य भवतीदमन्तरीयमिदमुत्तरीयमिति ॥*

अपुरीति वक्तव्यम् ॥ इह मा भूत् । अन्तरायां पुरि वसतीति ॥

वाप्रकरणे तीयस्य ङित्सूपसंख्यानम् ॥ ३ ॥

वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्तव्यम् । द्वितीयायै द्वितीयस्यै । तृतीयायै तृतीयस्यै । विभाषा द्वितीयातृतीयाभ्याम् [७.३.११५] इत्येतन्न वक्तव्यं भवति । किं पुनरत्र ज्यायः । उपसंख्यानमेवात्र ज्यायः । इदमपि सिद्धं भवति । द्वितीयाय द्वितीयस्मै । तृतीयाय तृतीयस्मै ॥

---

* ५.२.२. † ८ ३ १३.*

स्वरादिनिपातमव्ययम् || १ | १ | ३७ ||

किमर्थं पृथग्ग्रहणं स्वरादीनां क्रियते न चादिष्वेव पठ्येरन्* | चादीनां वा असत्त्ववचनानां निपातसंज्ञा स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां च || अथ किमर्थमुभे संज्ञे क्रियेते न निपातसंज्ञैव स्यात् | नैवं शक्यम् | निपात एकाजनाङ् [१.१.१४] इति प्रगृह्यसंज्ञोक्ता सा स्वरादीनामप्येकाचां प्रसज्येत || एवं तर्ह्यव्ययसंज्ञैवास्तु | तद्याशक्यम् | वक्ष्यत्येतत् | अव्यये नञ्कुनिपातानामिति † | तद्गरीयसा न्यासेन परिगणनं कर्तव्यं स्यात् || तस्मात्पृथग्ग्रहणं कर्तव्यम् | उभे च संज्ञे कर्तव्ये ||

तद्धितश्चासर्वविभक्तिः || १ | १ | ३८ ||

असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम् || १ ||

असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानं कर्तव्यम् | नाना विना | किं पुनः कारणं न सिध्यति |

सर्वविभक्तिर्ह्यविशेषात् || २ ||

सर्वविभक्तिर्ह्येष भवति | किं कारणम् | अविशेषेण विहितत्वात्‡ ||

त्रलादीनां चोपसंख्यानम् || ३ ||

त्रलादीनां चोपसंख्यानं कर्तव्यम् | तत्र यत्र | ततः यतः | ननु च विशेषेणैते विधीयन्ते | पञ्चम्यास्तसिल् [५.३.७] सप्तम्यास्त्रल् [१०] इति | वक्ष्यत्येतत् | इतराभ्योऽपि दृश्यन्ते [१४] इति || यदि पुनरविभक्तिः शब्दोऽव्ययसंज्ञो भवतीत्युच्येत |

अविभक्ताावितरेतराश्रयत्वादप्रसिद्धिः || ४ ||

अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः संज्ञायाः | केतरेतराश्रयता | सत्यविभक्तित्वे संज्ञया भवितव्यं संज्ञया चाविभक्तित्वं भाव्यते तदितरेतराश्रयं भवति | इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ||

---

* १.४.५७ † ६.२.२. ‡ ५.३.२७

अलिङ्गमसंख्यमिति वा ॥ ५ ॥

अथवालिङ्गमसंख्यमव्ययसंज्ञं भवतीति वक्तव्यम् । एवमपीतरेतराश्रयमेव भवति । केतरेतराश्रयता । सत्यलिङ्गासंख्यत्वे संज्ञया भवितव्यं संज्ञया चालिङ्गासंख्यत्वं भाव्यते तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ॥ नेदं वाचनिकमलिङ्गतासंख्यता च । किं तर्हि । स्वाभाविकमेतत् । तद्यथा । समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्तेऽपरे न । तत्र किमस्माभिः कर्तुं शक्यम् । स्वाभाविकमेतत् ॥ तत्तर्हि वक्तव्यमलिङ्गमसंख्यमिति । न वक्तव्यम् ।

सिद्धं तु पाठात् ॥ ६ ॥

पाठाद्वा सिद्धमेतत् । कथं पाठः कर्तव्यः । तसिलादयः प्राक्पाशपः । शस्प्रभृतयः प्राक्समासान्तेभ्यः । मान्तः । कृत्वोऽर्थः । तसिवती । नानाञाविति ॥

अथवा पुनरस्त्वविभक्तिः शब्दोऽव्ययसंज्ञो भवतीत्येव । ननु चोक्तमविभक्तावितरेतराश्रयत्वादप्रसिद्धिरिति । नैष दोषः । इदं तावदयं प्रष्टव्यः । यद्यपि तावद्वैयाकरणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्शब्दान्प्रयुञ्जते ये त्वेते वैयाकरणेभ्योऽन्ये मनुष्याः कथं तेऽविभक्तिकाञ्शब्दान्प्रयुञ्जत इति । अभिज्ञाश्च पुनर्लौकिका एकत्वादीनामर्थानाम् । अतश्चाभिज्ञा अन्येन हि वस्नेनैकं गां क्रीणन्त्यन्येन द्वावन्येन त्रीन् । अभिज्ञाश्च न च प्रयुञ्जते । तदेतदेवं संदृश्यतामर्थरूपमेवैतदेवंजातीयकं येनात्र विभक्तिर्न भवतीति । तथाप्येतदेवमनुगम्यमानं दृश्यताम् । किंचिदव्ययं विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम् । उच्चैर्नीचैरिति विभक्त्यर्थप्रधानं हिरुक्पृथगिति क्रियाप्रधानम् । तद्धितश्चापि कश्चिद्विभक्त्यर्थप्रधानः कश्चित्क्रियाप्रधानः । तत्र यत्रेति विभक्त्यर्थप्रधानो नाना विनेति क्रियाप्रधानः । न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति ॥

अथाप्यसर्वविभक्तिरित्युच्यत एवमपि न दोषः । कथम् । इदं चाप्यद्यत्वेऽतिबहु क्रियत एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति* । कथं तर्हि । एकवचनमुत्सर्गः करिष्यते तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः ॥ न चाप्येवं विग्रहः करिष्यते । न सर्वा असर्वाः । असर्वा विभक्तयोऽस्मादिति । कथं तर्हि । न सर्वासर्वा । असर्वा विभक्तिरस्मादिति । त्रिकं पुनर्विभक्तिसंज्ञम् ॥

---

* १ ४ २१, २२

एवं गते कृत्यापि तुल्यमेतन्मान्तस्य कार्यं ग्रहणं न तत्र ।
तत. परे चाभिमता न कार्यास्त्रयः कृदर्था ग्रहणेन योगाः ॥
कृत्तद्धितानां ग्रहणं तु कार्यं संख्याविशेषं ह्यभिनिश्रिता ये ।

तेषां प्रतिषेधो भवतीति वक्तव्यम् । इह मा भूत् । एको द्वौ बहव इति ।

तस्मात्स्वरादिग्रहणं च कार्यं कृत्तद्धितानां ग्रहणं च पाठे ॥

पाठेनेयमव्ययसंज्ञा क्रियते सेह न प्राप्नोति । परमोच्चैः परमनीचैरिति । तदन्तविधिना भविष्यति* । इहापि तर्हि प्राप्नोति । अत्युच्चैः अत्युच्चैसौ अत्युच्चैस इति । उपसर्जनस्य नेति प्रतिषेधो भविष्यति । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । सर्वनामसंज्ञायां प्रकृतः प्रतिषेध† इहानुवर्तिष्यते । स वै तत्र प्रत्याख्यायते । यथा स तत्र प्रत्याख्यायत इहापि तथा शक्यः प्रत्याख्यातुम् । कथ स तत्र प्रत्याख्यायते । महतीयं संज्ञा क्रियत इति । इयमपि च महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । न व्येतीत्यव्ययमिति । क्व पुनर्न व्येति । स्त्रीपुंनपुंसकानि सत्त्वगुणा एकत्वद्वित्वबहुत्वानि च । एतानर्थान्केचिद्वियन्ति केचिन्न वियन्ति । ये न वियन्ति तदव्ययम् ॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

कृन्मेजन्तः ॥ १ । १ । ३९ ॥

कथमिदं विज्ञायते । कृद्यो मान्त इति । आहोस्वित्कृदन्तं यन्मान्तमिति । किं चातः । यदि विज्ञायते कृद्यो मान्त इति कारयांचकार हारयांचकारेत्यत्र न प्राप्नोति । अथ विज्ञायते कृदन्तं यन्मान्तमिति प्रतामौ प्रतामः अत्रापि प्राप्नोति । यथेच्छसि तथास्तु ॥ अस्तु तावत्कृद्यो मान्त इति । कथं कारयांचकार हारयांचकारेति । किं पुनरत्राव्ययसंज्ञया प्रार्थ्यते । अव्ययात् [२.४.८२] इति लुग्यथा स्यात् । मा भूदेवम् । आमः [२.४.८१] इत्येव भविष्यति । न सिध्यति । लिग्रहणं‡ तत्रानुवर्तते । लिग्रहणं निवर्तिष्यते । यदि निवर्तते प्रत्ययमात्रस्य लुक्प्राप्नोति । इष्यते च प्रत्ययमात्रस्य । अतश्चेष्यत एवं ह्याह कृञ्चानुप्रयुज्यते लिटि [३ १ ४०] इति । यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति ॥ अथवा पुनरस्तु कृदन्तं

* १ १ ७१ † १ १ १० ‡ २ ४ ८१

यन्मान्तमिति । कथं प्रतामौ प्रताम इति । आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेनाव्ययसंज्ञा भवतीति यदयं प्रतान्प्रभृतीं स्वरादिषु पठति ॥

कृन्मेजन्तश्चानिकारोकारप्रकृतिः ॥ १ ॥

कृन्मेजन्तश्चानिकारोकारप्रकृतिरिति वक्तव्यम् । इह मा भूत् । आधये आधेः । चिकीर्षवे चिकीर्षोरिति ॥

अनन्यप्रकृतिरिति वा ॥ २ ॥

अथवानन्यप्रकृतिः कृदव्ययसंज्ञो भवतीति वक्तव्यम् ॥ किं पुनरत्र ज्यायः । अनन्यप्रकृतिरित्येव ज्यायः । इदमपि सिद्धं भवति । कुम्भकारेभ्यः नगरकारेभ्य इति ॥ तर्हि वक्तव्यम् ।

न वा सनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ३ ॥

न वा वक्तव्यम् । किं कारणम् । सनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्येषा परिभाषा कर्तव्या ॥ कः पुनरत्र विशेष एषा वा परिभाषा क्रियेतानन्यप्रकृतिरिति वोच्येत । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि पुनस्तानि ।

प्रयोजनं ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम् ॥ ४ ॥

ग्रामणिकुलम् सेनानिकुलमित्यत्र ह्रस्वत्वे कृते[*] ह्रस्वस्य पिति कृति तुग्भवतीति[†] तुक्प्राप्नोति । सनिपातलक्षणो विधिरनिमित्त तद्विघातस्येति न दोषो भवति ॥ नैतदस्ति प्रयोजनम् । बहिरङ्गं ह्रस्वत्वमन्तरङ्गस्तुक् । असिद्धं बहिरङ्गमन्तरङ्गे ॥

नलोपो वृत्रहभिः ॥ ५ ॥

वृत्रहभिः भ्रूणहभिरित्यत्र नलोपे कृते[‡] ह्रस्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति । संनिपातलक्षणो विधिरनिमित्त तद्विघातस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । असिद्धो नलोपः[§] । तस्यासिद्धत्वान्न भविष्यति ॥

उदुपधत्वमकित्त्वस्य निकुचिते ॥ ६ ॥

उदुपधत्वमकित्त्वस्यानिमित्तम् । क्व । निकुचिते । निकुचित इत्यत्र नलोपे कृते[¶] उदुपधाद्भावादिकर्मणोरन्यतरस्याम् [१ २ २१] इत्यकित्त्वं प्राप्नोति ।

---

* ६ ३ ६१ † ६ १ ७१ ‡ ८ २ ७ § ८ २ २ ¶ ६ ४ २४

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । अस्त्यत्राकित्त्वम् । न धातुलोप आर्धधातुके [१.१.४] इति प्रतिषेधो भविष्यति ॥

नाभावो यञि दीर्घत्वस्यामुना ॥ ७ ॥

नाभावो यञि दीर्घत्वस्यानिमित्तम् । क्व । अमुना । नाभावे कृते* ऽतो दीर्घो यञि सुपि च [७.३.१०१;१०२] इति दीर्घत्वं प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । वक्ष्यत्येतत् । न मु टादेश इति† ॥

आत्त्वं कित्त्वस्योपादास्त ॥ ८ ॥

आत्त्वं कित्त्वस्यानिमित्तम् । क्व । उपादास्तास्य स्वरः शिक्षकस्येति । आत्त्वे कृते‡ स्थाघ्वोरिच्च [१.२.१७] इतीत्त्वं प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । उक्तमेतत् । दीङः प्रतिषेधः स्थाघ्वोरित्त्व इति§ ॥

तिसृचतसृत्वं ङीब्विधेः ॥ ९ ॥

तिसृचतसृत्वं ङीब्विधेरनिमित्तम् । क्व । तिस्रस्तिष्ठन्ति । चतस्रस्तिष्ठन्ति । तिसृचतसृभावे कृते‖ ऋन्नेभ्यो ङीप् [४.१.५] इति ङीप्प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति न तिसृचतसृभावे कृते ङीब्भवतीति यदयं न तिसृचतसृ [६.४.४] इति नामि दीर्घत्वप्रतिषेधं शास्ति ॥

इमानि तर्हि प्रयोजनानि । शतानि सहस्राणि । नुमि कृते¶ ष्णान्ता षट् [१.१.२४] इति षट्संज्ञा प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ शाकटी पद्धती । अस्ये कृते** ऽतः [४.१.४] इति टाप्प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥ इयेष उवोष । गुणे कृते†† इजादेश गुरुमतोऽनृच्छः [३.१.३६] इत्याम्प्राप्नोति । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति ॥

---

* ७.१ १२०. † ८.३ १.° ‡ ६.१.५० § १ १.२०.° ‖ ७.२.९९.
¶ ७.१.७२ ** ७.१ ११० †† ७.३ ८६.

तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य ॥ १० ॥

तस्यैतस्य लक्षणस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात् । क्व । अत इञ् [४.१.९५]* । दाक्षिः प्लाक्षिः । न प्रत्ययः संनिपातलक्षणः । अङ्गसंज्ञा† तद्धिनिमित्तं स्यात् ॥

आत्त्वं पुग्विधेः ज्ञापयति ॥ ११ ॥

आत्त्वं पुग्विधेरनिमित्तं स्यात्‡ । क्व । ज्ञापयतीति ॥

पुग्घ्रस्वत्वस्यादीदपत् ॥ १२ ॥

पुग्घ्रस्वत्वस्यानिमित्तं स्यात्§ । क्व । अदीदपदिति ॥

त्यदाद्यकारष्टाब्विधेः ॥ १३ ॥

त्यदाद्यकारष्टाब्विधेरनिमित्तं स्यात्‖ । क्व । या सा ॥

इड्विधिराकारलोपस्य पपिवान् ॥ १४ ॥

इड्विधिराकारलोपस्यानिमित्तं स्यात्¶ । क्व । पपिवान् तस्थिवानिति ॥

मतुब्विभक्त्युदात्तत्व पूर्वनिघातस्य ॥ १५ ॥.

मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्यानिमित्तं स्यात्** । क्व । अग्निमान् वायुमान् । परमवाचा परमवाचे ॥

नदीह्रस्वत्वं संबुद्धिलोपस्य ॥ १६ ॥

नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यात्†† । क्व । नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु । ह्रस्वत्वे कृत एङ्ह्रस्वात्संबुद्धेरिति लोपो न प्राप्नोति । मा भूदेवम् । ङ्यन्तादित्येवं‡‡ भविष्यति । न सिध्यति । दीर्घादित्युच्यते ह्रस्वान्ताच्च न प्राप्नोति । इदमिह संप्रधार्यम् । ह्रस्वत्व क्रियतां संबुद्धिलोप इति किमत्र कर्तव्यम् । परत्वाद्ध्रस्वत्वम् । नित्यः संबुद्धिलोपः । कृतेऽपि ह्रस्वत्वे प्राप्नोत्यकृतेऽपि । अनित्यः संबुद्धिलोपः । न हि कृते ह्रस्वत्वे प्राप्नोति । किं कारणम् । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति ॥

एते दोषाः समा भूयांसो वा तस्मान्नाचार्यो ऽनया परिभाषया । न हि दोषाः सन्तीति परिभाषा न कर्तव्या लक्षणं वा न प्रणेयम् । न हि भिक्षुकाः सन्तीति

---

* ६.४.१४८ † १.४.१३ ‡ ६.१.४८; ७.३.३६ § ७.४.१, ७.४.१. ‖ ७.२.१०२, ४.१.४
¶ ७.२.६७, ६.४.६४. ** ६.१.१७६, १९९; १५८ †† ७.३.१०७, ६.१.६९. ‡‡ ६.१.६८.

स्थाल्यो नाधिश्रीयन्ते न च मृगाः सन्तीति यवा नोप्यन्ते । दोषाः खल्वपि साकल्येन परिगणिताः प्रयोजनानामुदाहरणमात्रम् । कुत एतत् । न हि दोषाणां लक्षणमस्ति । तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या प्रतिविधेयं दोषेषु ॥

अव्ययीभावश्च ॥ १ । १ । ४१ ॥

अव्ययीभावस्याव्ययत्वे प्रयोजनं लुग्मुखस्वरोपचाराः ॥ १ ॥

अव्ययीभावस्याव्ययत्वे प्रयोजनं किम् । लुग्मुखस्वरोपचाराः ॥ लुक् । उपाग्नि प्रत्यग्नि । अव्ययात् [२.४.८२] इति लुक्सिद्धो भवति ॥ मुखस्वरः । उपाग्निमुखः प्रत्यग्निमुखः । नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः [६.२.१६८] इति प्रतिषेधः सिद्धो भवति ॥ उपचारः । उपपयःकारः उपपयःकाम इति । अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य [८.३.४६] इति प्रतिषेधः सिद्धो भवति ॥ किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम् । परिगणनमित्याह ॥

अपि खल्वप्याहुः । यदन्यदव्ययीभावस्याव्ययकृतं प्राप्नोति तस्य प्रतिषेधो वक्तव्य इति । किं पुनस्तत् । पराङ्गवद्भावः । पराङ्गवद्भावे ऽव्ययप्रतिषेधश्चोदित* उच्चैरधीयान नीचैरधीयानेत्येवमर्थम् । स इहापि प्राप्नोति । उपाग्न्यधीयान प्रत्यग्न्यधीयान ॥ अकच्यव्ययग्रहणं क्रियते† उच्चकैः नीचकैरित्येवमर्थम् । तदिहापि प्राप्नोति । उपाग्निकम् प्रत्यग्निकमिति ॥ मुम्यव्ययप्रतिषेध उच्यते‡ दोषामन्यमहः दिवामन्या रात्रिरित्येवमर्थम् । स इहापि प्राप्नोति । उपकुम्भमन्यः उपमणिकमन्यः ॥ अस्य च्वावव्ययप्रतिषेध उच्यते§ दोषाभूतमहः दिवाभूता रात्रिरित्येवमर्थम् । स इहापि प्राप्नोति । उपकुम्भीभूतम् उपमणिकीभूतम् ॥

यदि परिगणनं क्रियते नार्थो ऽव्ययीभावस्याव्ययसंज्ञया । कथं यान्यव्ययीभावस्याव्ययत्वे प्रयोजनानि । नैतानि सन्ति । यत्तावदुच्यते लुगित्याचार्यप्रवृत्तिर्ज्ञापयति भवत्यव्ययीभावाल्लुगिति यदयं नाव्ययीभावादतः [२.४.८३] इति प्रतिषेधं शास्ति । उपचारः । अनुत्तरपदस्थस्येति वर्तते‖ । तत्र मुखस्वर एकः प्रयोजयति न चैकं प्रयोजनं योगारम्भं प्रयोजयति । यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयान्नाव्ययादव्ययीभावाच्चेति ॥

* २.१.२ † ५.३.७१ ‡ ६.३.६६ § ७.४.३२ ‖ ८.३.४५

शि सर्वनामस्थानम् ॥१।१।४२॥ सुडनपुंसकस्य ॥१।१।४३॥

शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः ॥ १ ॥

शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शेः प्रतिषेधः प्राप्नोति । कुण्डानि तिष्ठन्ति । वनानि तिष्ठन्ति* ॥

असमर्थसमासश्चायं द्रष्टव्यो ऽनपुंसकस्येति । न हि नञो नपुंसकेन सामर्थ्यम् । केन तर्हि । भवतिना । न भवति नपुंसकस्येति ॥

यत्तावदुच्यते शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेध इति ।

नाप्रतिषेधात् ॥ नायं प्रसज्यप्रतिषेधो नपुंसकस्य नेति । किं तर्हि । पर्युदासो ऽयं यदन्यन्नपुंसकादिति । नपुंसके ऽव्यापारः । यदि केनचित्प्राप्नोति तेन भविष्यति । पूर्वेण च प्राप्नोति ॥

अप्राप्तेर्वा ॥ अथवानन्तरा या प्राप्तिः सा प्रतिषिध्यते । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति । ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते । नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥

यदप्युच्यते ऽसमर्थसमासश्चायं द्रष्टव्य इति यद्यपि वक्तव्यो ऽथवैतर्हि बहूनि प्रयोजनानि । कानि । असूर्यंपश्यानि मुखानि । अपुनर्गेयाः श्लोकाः । अश्राद्धभोजी ब्राह्मण इति ॥

न वेति विभाषा ॥ १ । १ । ४४ ॥

न वेति विभाषायामर्थसञ्ज्ञाकरणम् ॥ १ ॥

न वेति विभाषायामर्थस्य संज्ञा कर्तव्या । नवाशब्दस्य यो ऽर्थस्तस्य संज्ञा भवतीति वक्तव्यम् । किं प्रयोजनम् ।

शब्दसञ्ज्ञायां ह्यर्थासंप्रत्ययो यथान्यत्र ॥ २ ॥

शब्दसञ्ज्ञायां हि सत्यामर्थस्यासंप्रत्ययः स्याद्यथान्यत्र । अन्यत्रापि शब्दसंज्ञायां शब्दस्य संप्रत्ययो भवति नार्थस्य । क्वान्यत्र । दाधा घ्वदाप् [१.१.२०] तर-

* ७२ ७२.

प्रगृह्यौ घः [२२] इति घुग्रहणेषु घग्रहणेषु च शब्दस्य संप्रत्ययो भवति नार्थस्य ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

इतिकरणोऽर्थनिर्देशार्थः ॥ ३ ॥

इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति । किं गतमेतदितिनाहोस्विच्छब्दाधिक्यादर्थाधिक्यम् । गतमित्याह । कुतः । लोकतः । तद्यथा । लोके गौरित्ययमाहेति गोशब्दादितिकरणः परः प्रयुज्यमानो गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति । सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासावर्थपदार्थकता तस्याः शब्दपदार्थकः संपद्यते । एवमिहापि नवाशब्दादितिकरणः परः प्रयुज्यमानो नवाशब्दं स्वस्मात्पदार्थात्प्रच्यावयति । सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासौ शब्दपदार्थकता तस्या लौकिकमर्थं संप्रत्याययति । न वेति यद्गम्यते न वेति यत्प्रतीयत इति ॥

समानशब्दप्रतिषेधः ॥ ४ ॥

समानशब्दानां प्रतिषेधो वक्तव्यः । नवा कुण्डिका । नवा घटिकेति । किं च स्याद्यद्येतेषामपि विभाषासंज्ञा स्यात् । विभाषा दिक्समासे बहुव्रीहौ [१.१ २८] । दक्षिणपूर्वस्यां शालायाम् । अचिरकृतायां संप्रत्ययः स्यात् ॥

न वा विधिपूर्वकत्वात्प्रतिषेधसंप्रत्ययो यथा लोके ॥ ५ ॥

न वैष दोषः । किं कारणम् । विधिपूर्वकत्वात् । विधाय किंचिन्न वेत्युच्यते । तेन प्रतिषेधवाचिनः संप्रत्ययो भवति । तद्यथा लोके । ग्रामो भवता गन्तव्यो न वा । नेति गम्यते ॥ अस्ति कारणं येन लोके प्रतिषेधवाचिनः संप्रत्ययो भवति । किं कारणम् । विलिङ्गं हि भवाँल्लोके निर्देशं करोति । अङ्ग हि समानलिङ्गो निर्देशः क्रियतां प्रत्ययवाचिनः संप्रत्ययो भविष्यति । तद्यथा । ग्रामो भवता गन्तव्यो नवः । प्रत्यग्र इति गम्यते ॥ एतदेव न जानीमः क्वचिद्व्याकरणे समानलिङ्गो निर्देशः क्रियत इति । अपि च कामचारः प्रयोक्तुः शब्दानामभिसंबन्धे । तद्यथा । यवागूर्भवता भोक्तव्या नवा । यदा यवागूशब्दो भुजिनाभिसंबध्यते भुजिर्नवाशब्देन तदा प्रतिषेधवाचिनः संप्रत्ययो भवति । यवागूर्भवता भोक्तव्या नवा । नेति गम्यते । यदा यवागूशब्दो नवाशब्देनाभिसंबध्यते न भुजिना तदा प्रत्ययवाचिनः संप्रत्ययो भवति । यवागूर्नवा भवता भोक्तव्या । प्रत्यग्रेति गम्यते । न चेह वयं विभाषा-

ग्रहणेन सर्वादीन्यभिसंबध्नीमः । दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवन्तीति । किं तर्हि । भवतिरभिसंबध्यते । दिक्समासे बहुव्रीहौ सर्वादीनि भवन्ति विभाषेति ॥

विध्यनित्यत्वमनुपपन्नं प्रतिषेधसंज्ञाकरणात् ॥ ६ ॥

विधेरनित्यत्वं नोपपद्यते । शुशाव शुशुवतुः शुशुवुः । शिश्वाय शिश्वियतुः शिश्वियुः* । किं कारणम् । प्रतिषेधसंज्ञाकरणात् । प्रतिषेधस्येयं संज्ञा क्रियते । तेन विभाषाप्रदेशेषु प्रतिषेधस्यैव संप्रत्ययः स्यात् ॥

सिद्धं तु प्रसज्यप्रतिषेधात् ॥ ७ ॥

सिद्धमेतत् । कथम् । प्रसज्यप्रतिषेधात् । प्रसज्य किंचिन्न वेत्युच्यते । तेनोभयं भविष्यति ॥

विप्रतिषिद्धं तु ॥ ८ ॥

विप्रतिषिद्धं तु भवति । अत्र न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति ॥

न वा प्रसङ्गसामर्थ्यादन्यत्र प्रतिषेधविषयात् ॥ ९ ॥

न वैष दोषः । किं कारणम् । प्रसङ्गसामर्थ्यात् । प्रसङ्गसामर्थ्याच्च विधिर्भविष्यत्यन्यत्र प्रतिषेधविषयात् । प्रतिषेधसामर्थ्याच्च प्रतिषेधो भविष्यत्यन्यत्र विधिविषयात् ॥ तदेतत्क्व सिद्धं भवति । याप्राप्ते विभाषा । या हि प्राप्ते कृतसामर्थ्यस्तत्र पूर्वेण विधिरिति कृत्वा प्रतिषेधस्यैव संप्रत्ययः स्यात् । एतदपि सिद्धम् । कथम् । विभाषेति महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमुभयोः संज्ञा यथा विज्ञायेत नेति च वेति च । तत्र या तावदप्राप्ते विभाषा तत्र प्रतिषेध्यं नास्तीति कृत्वा वेत्यनेन विकल्पो भविष्यति । या हि प्राप्ते विभाषा तत्रोभयमुपस्थितं भवति नेति च वेति च । तत्र नेत्यनेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति ॥ एवमपि

विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिः ॥ १० ॥

विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते । शुशाव शुशुवतुः शुशुवुः । शिश्वाय शिश्वियतुः शिश्वियुः । किं कारणम् ।

---

* ६.१.३०

भवतीति चेन्न प्रतिषेधः ॥ ११ ॥

भवतीति चेत्प्रतिषेधो न प्राप्नोति ॥

नेति चेन्न विधिः ॥ १२ ॥

नेति चेद्विधिर्न सिध्यति ॥

सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात् ॥ १३ ॥

सिद्धमेतत् । कथम् । पूर्वविधिमुत्तरो विधिर्बाधते । इतिकरणोऽर्थनिर्देशार्थ इत्युक्तम् ॥

साध्वनुशासनेऽस्मिन्यस्य विभाषा तस्य साधुत्वम् ॥ १४ ॥

साध्वनुशासनेऽस्मिञ्शास्त्रे यस्य विभाषा क्रियते स विभाषा साधुः स्यात् । समासश्चैव हि विभाषा तेन समासस्यैव विभाषा साधुत्वं स्यात् । अस्तु । यः साधुः स प्रयोक्ष्यतेऽसाधुर्न प्रयोक्ष्यते । न चैव हि कदाचिद्राजपुरुष इत्यस्यामवस्थायामसाधुत्वमिष्यते । अपि च

द्वैधाप्रतिपत्तिः ॥ १५ ॥

द्वैधं शब्दानामप्रतिपत्तिः । इच्छामथ पुनर्विभाषाप्रदेशेषु द्वैधं शब्दानां प्रतिपत्तिः स्यादिति तच्च न सिध्यति ॥ यस्य पुनः कार्याः शब्दा विभाषासौ समासं निर्वर्तयति । यस्यापि नित्याः शब्दास्तस्याप्येष न दोषः । कथम् । न विभाषाग्रहणेन साधुत्वमभिसंबध्यते । किं तर्हि । समाससंज्ञाभिसंबध्यते । समास इत्येषा संज्ञा विभाषा भवतीति । तद्यथा । मेध्यः पशुर्विभाषितः । मेध्योऽनड्वान्विभाषित इति । नैतद्विचार्यतेऽनड्वाननड्वानिति । किं तर्हि । आलब्धव्यो नालब्धव्य इति ॥

कार्ये युगपदन्वाचययौगपद्यम् ॥ १६ ॥

कार्येषु शब्देषु युगपदन्वाचयेन च यदुच्यते तस्य युगपद्वचनता प्राप्नोति । तव्यत्तव्यानीयरः [३.१.९६] ढक् च मण्डूकात् [४.१.११९] इति ॥ यस्य पुनर्नित्याः शब्दाः प्रयुक्तानामसौ साधुत्वमन्वाचष्टे । ननु च यस्यापि कार्यास्तस्याप्येष न दोषः । कथम् । प्रत्ययः परो भवतीत्युच्यते* न चैकस्याः प्रकृतेरनेकस्य प्रत्ययस्य युगपत्परत्वेन संभवो अस्ति । नापि ब्रूमः प्रत्ययमाला प्राप्नोतीति । किं तर्हि ।

कर्तव्यमिति प्रयोक्तव्ये युगपद्द्वितीयस्य तृतीयस्य च प्रयोगः प्राप्नोतीति । नैष दोषः । अर्थगत्यर्थः शब्दप्रयोगः । अर्थं सम्प्रत्याययिष्यामीति शब्दः प्रयुज्यते । तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति ॥

आचार्यदेशशीलने च तद्विषयता ॥ १७ ॥

आचार्यदेशशीलनेन यदुच्यते तस्य तद्विषयता प्राप्नोति । इको ह्रस्वो ऽङ्यो गालवस्य [६.३.६१] प्राचामवृद्धात्फिन्बहुलम् [४.१.१६०] इति गालवा एव ह्रस्वान्प्रयुञ्जीरन्प्राक्षु चैव हि फिन्स्यात् । तद्यथा । जमदग्निर्वा एतत्पञ्चममवदानमवाद्यत्तस्माज्जामदग्न्यः पञ्चावत्तं जुहोति ॥ यस्य पुनर्नित्याः शब्दा गालवग्रहणं तस्य पूजार्थं देशग्रहणं च कीर्त्यर्थम् । ननु च यस्यापि कार्यास्तस्यापि पूजार्थं गालवग्रहणं स्याद्देशग्रहणं च कीर्त्यर्थम् ॥

तत्कीर्तने च द्वैधाप्रतिपत्तिः ॥ १८ ॥

तत्कीर्तने च द्वैधं शब्दानामप्रतिपत्तिः स्यात् । इष्यामथ पुनराचार्यग्रहणेषु देशग्रहणेषु च द्वैधं शब्दानां प्रतिपत्तिः स्यादिति तच्च न सिध्यति ॥

अशिष्यो वा विदितत्वात् ॥ १९ ॥

अशिष्यो वा पुनरयं योगः । किं कारणम् । विदितत्वात् । यदनेन योगेन प्रार्थ्यते तस्यार्थस्य विदितत्वात् । ये ऽपि ह्येतां सञ्ज्ञां नारभन्ते ते ऽपि विभाषेत्युक्ते ऽनित्यत्वमवगच्छन्ति । याज्ञिकाः खल्वपि सञ्ज्ञामनारभमाणा विभाषेत्युक्ते ऽनित्यत्वमवगच्छन्ति । तद्यथा । मेध्यः पशुर्विभाषितः । मेध्यो ऽनड्वान्विभाषित इति । आलब्धव्यो नालब्धव्य इति गम्यते ॥ आचार्यः खल्वपि सञ्ज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थं संप्रत्याययति । बहुलम् अन्यतरस्याम् उभयथा वा एकेषामिति ॥

अप्राप्ते त्रिसञ्ज्ञायाः ॥ २० ॥

इत उत्तरं या विभाषा अनुक्रमिष्यामो ऽप्राप्ते ता द्रष्टव्याः । त्रिसञ्ज्ञायास्तु भवन्ति प्राप्ते ऽप्राप्त उभयत्र वेति ॥

द्वन्द्वे च विभाषा जसि [१ १ ३१,३२] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं चाप्राप्ते कथं वोभयत्र । उभयशब्दः सर्वादिषु पठ्यते तयपश्चायजादेशः क्रियते* तेन वा नित्ये प्राप्ते ऽन्यत्र

* ५ २ ४४

वाप्राप्त उभयत्र वेति । अप्राप्ते । अयच्प्रत्ययान्तरम् । यदि प्रत्ययान्तरमुभयीतीकारो न प्राप्नोति । मा भूदेवम् । मात्रच इत्येवं भविष्यति* । कथम् । मात्रजिति नेदं प्रत्ययग्रहणम् । किं तर्हि । प्रत्याहारग्रहणम् । क्व संनिविष्टानां प्रत्याहारः । मात्रशब्दात्प्रभृत्यायचश्चकारात्† । यदि प्रत्याहारग्रहणं कति तिष्ठन्ति अत्रापि प्राप्नोति । अत इति वर्तते‡ । एवमपि तैलमात्रा घृतमात्रा अत्रापि प्राप्नोति । सदृशस्याप्यसंनिविष्टस्य न भविष्यति प्रत्याहारेण ग्रहणम् ॥

ऊर्णोतेर्विभाषा [१.२.३]

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । असंयोगाल्लिट् कित् [१.२.५] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते ॥ अन्यद्धि कित्त्वमन्यन्ङित्त्वम् ।

एकं चेन्ङित्कितौ ॥

यद्येकं ङित्कितौ ततो ऽस्ति संदेहः । अथ हि नाना नास्ति संदेहः । यद्यपि नानैवमपि संदेहः । कथम् । प्रोर्णुवीति । सार्वधातुकमपित् [१.२.४] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते ॥

विभाषोपयमने [१.२.१६] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । गन्धने [१.२.१५] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । गन्धन इति निवृत्तम् ॥

अनुपसर्गाद्वा [१.३.४३] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । वृत्तिसर्गतायनेषु क्रमः [१.३.३८] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । वृत्त्यादिष्विति निवृत्तम् ॥

विभाषा वृक्षमृगादीनाम् [२.४.१२] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । जातिरप्राणिनाम् [२.४.६] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । जातिरप्राणिनामिति निवृत्तम् ॥

---

* ४.२.१८. † ५.२.३७-४१ ‡ ४.१.४.

उपविदजागृभ्यो ऽन्यतरस्याम् [३.१.३८] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । प्रत्ययान्तादिति* वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । प्रत्ययान्ता धात्वन्तराणि ॥

दीपादीनां विभाषा [३.१.६१] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । भावकर्मणोः [३.१.६६] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । कर्तरीति हि वर्तते† । एवमपि संदेहो न्याय्ये वा कर्तरि कर्मकर्तरि वेति । नास्ति संदेहः । सकर्मकस्य कर्ता कर्मवद्भवत्यकर्मकाश्च दीपादयः । अकर्मका अपि वै सोपसर्गाः सकर्मका भवन्ति । कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति कर्तृस्थभावकाश्च दीपादयः ॥

विभाषाग्रेप्रथमपूर्वेषु [३.४.२४] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । आभीक्ष्ण्ये [३.४.२२] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । आभीक्ष्ण्य इति निवृत्तम् ॥

तृनादीनां विभाषा [६.२.१६१] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । आक्रोशे [६.२.१५८] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । आक्रोश इति निवृत्तम् ॥

एकहलादौ पूरयितव्ये ऽन्यतरस्याम् [६.३.५९] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । उदकस्योदः संज्ञायाम् [६.३.५७] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । संज्ञायामिति निवृत्तम् ॥

आदेरिजि पदान्तस्यान्यतरस्याम् [७.३.८,९] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । इञीति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । इञीति निवृत्तम् ॥

* ३.१.३५ † ३.१.६८.

सपूर्वायाः प्रथमाया विभाषा [८.१.२६] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । चादिभिर्योगे* इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । चादिभिर्योग इति निवृत्तम् ॥

ओ यङ्यचि विभाषा [८.२.२०,२१] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथ वाप्राप्ते कथं वोभयत्र । यङीति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । अप्राप्ते । यङीति निवृत्तम् ॥

प्राप्ते च ॥ २१ ॥

इत उत्तरं या विभाषा अनुक्रमिष्यामः प्राप्ते ता द्रष्टव्याः । त्रिसंशयास्तु भवन्ति प्राप्ते ऽप्राप्त उभयत्र वेति ॥

विभाषा विप्रलापे [१.३.५०] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथ वोभयत्र । व्यक्तवाचाम् [१.३ ४८] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । प्राप्ते । व्यक्तवाचामिति हि वर्तते ॥

विभाषोपपदेन प्रतीयमाने [१.३.७७] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथ वाप्राप्ते कथं वोभयत्र । स्वरितञितः [१.३.७२] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । प्राप्ते । स्वरितञित इति हि वर्तते ॥

तिरो ऽन्तर्धौ विभाषा कृञि [१.४.७१,७२] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । अन्तर्धाविति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । प्राप्ते । अन्तर्धाविति हि वर्तते ॥

अधिरीश्वरे विभाषा कृञि [१.४.९७,९८] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । ईश्वर इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । प्राप्ते । ईश्वर इति हि वर्तते ॥

---

* ८१.१४.

दिवस्तदर्थस्य विभाषोपसर्गे [२.३.५८,५९] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । तदर्थस्येति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । प्राप्ते । तदर्थस्येति हि वर्तते ॥

उभयत्र च ॥ २२ ॥

इत उत्तरं या विभाषा अनुक्रमिष्याम उभयत्र ता द्रष्टव्याः । त्रिसंशयास्तु भवन्ति प्राप्ते ऽप्राप्त उभयत्र वेति ॥

हृक्रोरन्यतरस्याम् [१.४.५३] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम् [१.४.५२] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । उभयत्र । प्राप्ते तावत् । अभ्यवहारयति सैन्धवान् अभ्यवहारयति सैन्धवैः । विकारयति सैन्धवान् विकारयति सैन्धवैः । अप्राप्ते । हरति भारं देवदत्तः हारयति भारं देवदत्तम् हारयति भारं देवदत्तेन । करोति कटं देवदत्तः कारयति कटं देवदत्तम् कारयति कटं देवदत्तेन ॥

न यदि विभाषा साकाङ्क्षे [३.२.११३,११४] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । यदीति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । उभयत्र । प्राप्ते तावत् । अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः । यत्कश्मीरेष्ववसाम । यत्तत्रौदनान्भोक्ष्यामहे । यत्तत्रौदनानभुञ्ज्महि । अप्राप्ते । अभिजानासि देवदत्त कश्मीरान्गमिष्यामः । कश्मीरानगच्छाम । तत्रौदनान्भोक्ष्यामहे । तत्रौदनानभुञ्ज्महि ॥

विभाषा श्वेः [६.१.३०] ॥

प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । कितीति* वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । उभयत्र । प्राप्ते तावत् । शुशुवतुः शुशुवुः । शिश्वियतुः शिश्वियुः । अप्राप्ते । शुशाव शुशविथ । शिश्वाय शिश्वयिथ ॥

---

* ६११५

विभाषा संघुषास्वनाम् [७ २ २८] ॥

संपूर्वाद्घुषेः प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । घुषिरविशब्दने [७.२.२३] इति वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । उभयत्र । प्राप्ते तावत् । संघुष्टा रज्जुः संघुषिता रज्जुः । अप्राप्ते । संघुष्टं वाक्यम् संघुषितं वाक्यम् ॥ आङ्पूर्वात्स्वनेः प्राप्ते ऽप्राप्त उभयत्र वेति संदेहः । कथं च प्राप्ते कथं वाप्राप्ते कथं वोभयत्र । मनसीति* वा नित्ये प्राप्ते ऽन्यत्र वाप्राप्त उभयत्र वेति । उभयत्र । प्राप्ते तावत् । आस्वान्तं मनः आस्वनितं मनः । अप्राप्ते । आस्वान्तो देवदत्तः आस्वनितो देवदत्त इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ॥

---

* ७२१८

इग्यणः संप्रसारणम् ॥ १ । १ । ४५ ॥

किमियं वाक्यस्य संप्रसारणसंज्ञा क्रियते । इग्यण इत्येतद्वाक्यं संप्रसारणसंज्ञं भवतीति । आहोस्विद्वर्णस्य । इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति । कश्चात्र विशेषः ।

सम्प्रसारणसंज्ञायां वाक्यसंज्ञा चेद्वर्णविधिः ॥ १ ॥

सम्प्रसारणसंज्ञायां वाक्यसंज्ञा चेद्वर्णविधिर्न सिध्यति । सम्प्रसारणात्परः पूर्वो भवति* सम्प्रसारणस्य दीर्घो भवतीति‡ । न हि वाक्यस्य सम्प्रसारणसंज्ञायां सत्यामेष निर्देश उपपद्यते नाप्येतयोः कार्ययोः संभवोऽस्ति ॥ अस्तु तर्हि वर्णस्य ॥

वर्णसंज्ञा चेन्निर्वृत्तिः ॥ २ ॥

वर्णसंज्ञा चेन्निर्वृत्तिर्न सिध्यति ष्यङः सम्प्रसारणम् [६.१.१३] इति । स एव हि तावदिग्दुर्लभो यस्य संज्ञा क्रियते । अथापि कथंचिल्लभ्येत केनासौ यणः स्थाने स्यात् । अनेनैव ह्यसौ व्यवस्थाप्यते । तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ॥

विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य ॥ ३ ॥

यदयं विभक्तिविशेषैर्निर्देशं करोति सम्प्रसारणात्परः पूर्वो भवति सम्प्रसारणस्य दीर्घो भवति ष्यङः सम्प्रसारणमिति तेन ज्ञायत उभयोः संज्ञा भवतीति । यत्तावदाह सम्प्रसारणात्परः पूर्वो भवति सम्प्रसारणस्य दीर्घो भवतीति तेन ज्ञायते वर्णस्य भवतीति । यदप्याह ष्यङः सम्प्रसारणमिति तेन ज्ञायते वाक्यस्यापि संज्ञा भवतीति ॥

अथवा पुनरस्तु वाक्यस्यैव । ननु चोक्तं सम्प्रसारणसंज्ञायां वाक्यसंज्ञा चेद्वर्णविधिरिति । नैष दोषः । यथा काकाज्जातः काकः श्येनाज्जातः श्येन एवं सम्प्रसारणाज्जातं सम्प्रसारणम् । यत्तत्सम्प्रसारणाज्जातं सम्प्रसारणं तस्मात्परः पूर्वो भवति तस्य दीर्घो भवतीति ॥ अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान्प्रयुञ्जानाः पदेषु च पदैकदेशान् । वाक्येषु तावद्वाक्यैकदेशान् । प्रविश पिण्डीम् प्रविश तर्पणम् । पदेषु पदैकदेशान् । देवदत्तो दत्तः सत्यभामा भामेति । एवमिहापि सम्प्रसारणनिर्वृत्तात्सम्प्रसारणनिर्वृत्तस्येत्येतस्य वाक्यस्यार्थे संप्रसारणात्सम्प्रसारणस्येत्येष वाक्यैकदेशः

* ६।१।१०८ ‡ ६।३।१३९

प्रयुज्यते । तेन निर्वृत्तस्य विधिं विज्ञास्यामः । संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति ॥ अथवाहायं संप्रसारणात्परः पूर्वो भवति संप्रसारणस्य दीर्घो भवतीति न च वाक्यस्य संप्रसारणसंज्ञायां सत्यामेष निर्देश उपपन्नो नाप्येतयोः कार्ययोः संभवो ऽस्ति तत्र वचनाद्भविष्यति ॥

अथवा पुनरस्तु वर्णस्य । ननु चोक्तं वर्णसंज्ञा चेन्निर्वृत्तिरिति । नैष दोषः इतरेतराश्रयमात्रमेतच्चोदितम् । सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि सिद्धं तु नित्यशब्दत्वादिति* । नेदं तुल्यमन्यैरितरेतराश्रयैः । न हि तत्र किंचिदुच्यते ऽस्य स्थाने य आकारैकारौकारा भाव्यन्ते ते वृद्धिसंज्ञा भवन्तीति । इह पुनरुच्यत इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति ॥ एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते । तद्यथा । कश्चित्कंचित्तन्तुवायमाह । अस्य सूत्रस्य शाटकं वयेति । स पश्यति यदि शाटको न वातव्यो ऽथ वातव्यो न शाटकः शाटको वातव्यश्चेति विप्रतिषिद्धम् । भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति । एवमिहापि स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य संप्रसारणमित्येषा संज्ञा भविष्यति ॥ अथवेजादियजादिप्रवृत्तिश्चैव हि लोके लक्ष्यते यजादुपदेशात्त्विजादिनिवृत्तिः प्रसक्ता । प्रयुञ्जते च पुनर्लोका इष्टम् उप्तमिति । ते *मन्यामहे ऽस्य यणः स्थान इममिकं प्रयुञ्जत इति । तत्र तस्यासाध्वभिमतस्य* शास्त्रेण साधुत्वमन्वाख्यायते किति साधुर्भवति ङिति साधुर्भवतीति† ॥

आद्यन्तौ टकितौ ॥ १ । १ । ४६ ॥

समासनिर्देशो ऽयं तत्र न ज्ञायते क आदिः को ऽन्त इति । तद्यथा । अजाविधनौ देवदत्तयज्ञदत्ताविरयुक्ते तत्र न ज्ञायते कस्याजा धनं कस्यावय इति । यद्यपि तावल्लोक एष दृष्टान्तो दृष्टान्तस्यापि पुरुषारम्भो निवर्तको भवति । अस्ति चेह कश्चित्पुरुषारम्भः । अस्तीत्याह । कः । संख्यातानुदेशो नाम‡ ॥

कौ पुनष्टकितावाद्यन्तौ भवतः । आगमावित्याह । युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यान्न नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । आगमश्च नामापूर्वः शब्दोपजनः । अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः । बाढं युक्तम् । शब्दान्तरैरिह भवितव्यम् । तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता । आदेशास्तर्हीमे भविष्यन्त्यनागमकानां सागमकाः ।

---

* १.१.१ † १.१.१० ‡ १.१.१०

तत्कथम् । सञ्ज्ञाधिकारोऽयम् । आद्यन्तौ चेह सङ्कीर्त्येते टकारककारावितावुदाह्रियेते । तत्राद्यन्तयोष्टकारककारावितौ सञ्ज्ञे भविष्यतः । तत्रार्धधातुकस्येड्वलादेः [७ २ ३५] इत्युपस्थितमिदं भवत्यादिरिति । तेनेकारादिरादेशो भविष्यति । एतावदिह सूत्रमिडिति । कथं पुनरियता सूत्रेणेकारादिरादेशो लभ्यः । लभ्य इत्याह । कथम् । बहुव्रीहिनिर्देशात् । बहुव्रीहिनिर्देशोऽयम् । इकार आदिरस्येति । यद्यपि तावदत्रैतच्छक्यते वक्तुमिह कथं लुङ्लङ्लृङ्क्ष्वडुदात्तः [६ ४ ७१] इति यत्राशक्यमुदात्तग्रहणेनाकारो विशेषयितुम् । तत्र को दोषः । अङ्गस्योदात्तत्वं प्रसज्येत । नैष दोषः । त्रिपदोऽयं बहुव्रीहिः । तत्र वाक्य एवोदात्तग्रहणेनाकारो विशेष्यते । अकार उदात्त आदिरस्येति । यत्र तर्ह्यनुदात्तस्यैतद्भवत्याडजादीनाम् [६ ४ ७२] इति । वक्ष्यत्येतत् । अजादीनामटा सिद्धमिति* ॥ अथवा यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति प्रकृतिं ततो वलाद्यार्धधातुकं ततः पश्चादिकारम् । तेनायं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते । तद्यथा । खदिरबर्बुरयोः । खदिरबर्बुरौ गौरकाण्डौ सूक्ष्मपर्णौ । ततः पश्चादाह कण्टकवान्खदिर इति । तेनासौ विशेषेण द्रव्यान्तरं समुदायं प्रतिपद्यते ॥ अथवैतयानुपूर्व्यायं शब्दान्तरमुपदिशति प्रकृतिं ततो वलाद्यार्धधातुकं ततः पश्चादिकारं यस्मिंस्तस्यागमबुद्धिर्भवति ॥

टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः ॥ १ ॥

टकितोराद्यन्तविधाने प्रत्ययस्य प्रतिषेधो वक्तव्यः । प्रत्यय आदिरन्तो वा मा भूत् । चरेष्टः [३ २ १६] आतोऽनुपसर्गे कः [३] इति ॥ परवचनात्सिद्धम् । परवचनात्प्रत्यय आदिरन्तो वा न भविष्यति† ।

परवचनात्सिद्धमिति चेन्नापवादत्वात् ॥ २ ॥

परवचनात्सिद्धमिति चेत्तन्न । किं कारणम् । अपवादत्वात् । अपवादोऽयं योगः । तद्यथा । मिदचोऽन्त्यात्परः [१ १ ४७] इत्येष योगः स्थानेयोगत्वस्य‡ प्रत्ययपरत्वस्य चापवादः । विषम उपन्यासः । युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च बाधते इह पुनरुभयं सावकाशम् । कोऽवकाशः । टित्करणस्यावकाशः । टित इतीकारो यथा स्यात्§ । कित्करणस्यावकाशः । कितीत्याकारलोपो यथा स्यात्‖ । प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात् । यदि चायं नियोगतः परः स्यात्तत एतत्प्रयोजनं स्यात् । कुतो नु खल्वेतट्टित्करणादयं परो

* ६ ४ ७४ * † ३ १ १ ‡ १ १ ४९ § ४ १ १५ ‖ ६ ४ ६४

15 M

भविष्यति न पुनरादिरिति कित्करणाच्च परो भविष्यति न पुनरन्त इति । टितः खल्वप्येष परिहारो यत्र नास्ति संभवो यत्परश्च स्यादादिश्च । कितस्त्वपरिहारः । अस्ति हि संभवो यत्परश्च स्यादन्तश्च । तत्र को दोषः । उपसर्गे घोः किः [३.३.९२] । आध्योः प्रध्योः । नोङ्धात्वोः [६.१.१७५] इति प्रतिषेधः प्रसज्येत । टितश्चाप्यपरिहारः । स्यादेव ह्ययं टित्करणादादिर्न पुनः परः । क्व तर्हीदानीमिदं स्याट्टित ईकारो भवतीति । य उभयवान् । गापोष्टक् [३.२.८] इति ॥

सिद्धं तु षष्ठ्यधिकारे वचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । षष्ठ्यधिकारे ऽयं योगः कर्तव्यः । आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्येति ॥

आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावे ऽसंप्रत्ययः ॥ ४ ॥

आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावे षष्ठ्या अभावे ऽसंप्रत्ययः स्यात् । आदिरन्तो वा न भविष्यति ॥ युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यान्नार्थनिमित्तकेन नाम शब्देन भवितव्यम् । अर्थनिमित्तक एव शब्दः । तत्कथम् । आद्यन्तौ षष्ठ्यर्थौ । न चात्र षष्ठीं पश्यामः । ते मन्यामह आद्यन्तावेवात्र न स्तस्तयोरभावे षष्ठ्यपि न भवतीति ॥

मिदचो ऽन्त्यात्परः ॥ १ । १ । ४७ ॥

किमर्थमिदमुच्यते ।

मिदचो ऽन्त्यात्पर इति स्थानपरप्रत्ययापवादः ॥ १ ॥

मिदचो ऽन्त्यात्पर इत्युच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः* । स्थानेयोगत्वस्य तावत् । कुण्डानि वनानि । पयांसि यशांसि† । प्रत्ययपरत्वस्य । भिनत्ति छिनत्ति‡ । भवेदिदं युक्तमुदाहरणं कुण्डानि वनानि यत्र नास्ति संभवो यदयमचो ऽन्त्यात्परश्च स्यात्स्थाने चेति । इदं त्वयुक्तं पयांसि यशांसीति । अस्ति हि संभवो यदचो ऽन्त्यात्परश्च स्यात्स्थाने च । एतदपि युक्तम् । कथम् । नैवेश्वर आज्ञा-

* १.१.४९, ३.१.२ † ७.१.७२ ‡ ३.१.७८.

पयति नापि धर्मसूत्रकाराः पठन्त्यपवादैरुत्सर्गा बाध्यन्तामिति । किं तर्हि । लौकिको ऽयं दृष्टान्तः । लोके हि सत्यपि संभवे बाधनं भवति । तद्यथा । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि संभवे ऽनामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते ॥

अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थम् ॥ २ ॥

अन्त्यात्पूर्वो मस्जेर्मिद्वक्तव्यः । किं प्रयोजनम् । अनुषङ्गसंयोगादिलोपार्थम् । अनुषङ्गलोपार्थं सयोगादिलोपार्थं च । अनुषङ्गलोपार्थं तावत् । मग्नः मग्नवान् । संयोगादिलोपार्थम् । मङ्क्ता मङ्क्तुम् मङ्क्तव्यम्* ॥

भर्जिमर्च्योश्च ॥ ३ ॥

भर्जिमर्च्योश्चान्त्यात्पूर्वो मिद्वक्तव्यः । भरूजा मरीचय इति ॥ स तर्हि वक्तव्यः । न वक्तव्यः । निपातनात्सिद्धम् । किं निपातनम् । भरूजाशब्दो ऽङ्गुल्यादिषु पठ्यते मरीचिशब्दो बाह्वादिषु ॥

किं पुनरयं पूर्वान्त आहोस्वित्परादिराहोस्विदभक्तः । कथं चायं पूर्वान्तः स्यात्कथं वा परादिः कथं वाभक्तः । यदन्त इति वर्तते ततः पूर्वान्तः । अथादिरिति वर्तते ततः परादिः । अथोभयं निवृत्तं ततो ऽभक्तः । कश्चात्र विशेषः ।

अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः ॥ ४ ॥

यद्यभक्तो दीर्घत्वं न प्राप्नोति । कुण्डानि वनानि । नोपधायाः [६.४.७] सर्वनामस्थाने चासंबुद्धौ [८] इति दीर्घत्वं न प्राप्नोति । दीर्घ ॥ नलोप । नलोपश्च न सिध्यति । अग्ने त्री ते वाजिना त्री षधस्था । ता ता पिण्डानाम्† । नलोपः प्रातिपदिकान्तस्य [८.२.७] इति नलोपो न प्राप्नोति । नलोप ॥ स्वर । स्वरश्च न सिध्यति । सर्वाणि ज्योतींषि । सर्वस्य सुपि [६.१.१९१] इत्याद्युदात्तत्वं न प्राप्नोति । स्वर ॥ णत्व । णत्वं च न सिध्यति । माषवापाणि व्रीहिवापाणि । पूर्वान्ते प्रातिपदिकान्तनकारस्येति सिद्धम् । परादौ विभक्तिनकारस्येति । अभक्ते नुमो ग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । प्रातिपदिकान्तनुम्विभक्तिषु च [८.४.११] इति । णत्व ॥ अनुस्वार । अनुस्वारश्च न सिध्यति । द्विषंतपः परंतपः‡। मो ऽनुस्वारो हलीत्यनुस्वारो ऽन प्राप्नोति । मा भूदेवम् । नश्चापदान्तस्य झलि [८.३.२४]

* ऋ० १,६२,६४.४८.२० † ६.१.२० ‡ ६.३.१० § ८.२.१३.

इत्येव भविष्यति । यस्तर्हि न झल्परः । वहलिहो गौः । अभ्रलिहो वायुः । अनुस्वार ॥ शीभाव । शीभावश्च न सिध्यति । त्रपुणी जतुनी तुम्बुरुणी । नपुंसकादुत्तरस्यौङः शीभावो भवतीति* शीभावो न प्राप्नोति ॥ एव तर्हि परादिः करिष्यते ।

परादौ गुणवृद्ध्यौत्त्वदीर्घनलोपानुस्वारशीभावेनकारप्रतिषेधः ॥ ५ ॥

यदि परादिर्गुणः प्रतिषेध्यः । त्रपुणे जतुने तुम्बुरुणे । घेर्ङिति [७.३.१११] इति गुणः प्राप्नोति । गुण ॥ वृद्धि । वृद्धिः प्रतिषेध्या । अतिसखीनि ब्राह्मणकुलानि । सख्युरसंबुद्धौ [७.१.९२] इति णित्त्वे ऽचो ञ्णिति [७.२.११५] इति वृद्धिः प्राप्नोति । वृद्धि ॥ औत्त्व । औत्त्वं च प्रतिषेध्यम् । त्रपुणि जतुनि तुम्बुरुणि । इदुद्भ्यामौदच्च घेः [७.३.११७-११९] इत्यौत्त्वं प्राप्नोति । औत्त्व ॥ दीर्घ । दीर्घत्वं च न सिध्यति । कुण्डानि वनानि । नोपधायाः सर्वनामस्थान इति दीर्घत्वं न प्राप्नोति । मा भूदेवम् । अतो दीर्घो यञि सुपि च [७.३.१०१-१०२] इत्येव भविष्यति । इह तर्हि । अस्थीनि दधीनि प्रियसखीनि ब्राह्मणकुलानि । दीर्घ ॥ नलोप । नलोपश्च न सिध्यति । अग्ने त्री ते वाजिना त्री षधस्था । ता ता पिण्डानाम् । नलोप. प्रातिपदिकान्तस्येति नलोपो न प्राप्नोति । नलोप ॥ अनुस्वार । अनुस्वारश्च न सिध्यति । द्विषंतपः परंतपः । मो ऽनुस्वारो हलीत्यनुस्वारो न प्राप्नोति । मा भूदेवम् । नश्चापदान्तस्य झलीत्येव भविष्यति । यस्तर्हि न झल्परः । वहलिहो गौः । अभ्रलिहो वायुः । अनुस्वार ॥ शीभावेनकारप्रतिषेध । शीभावे नकारस्य प्रतिषेधो वक्तव्यः । त्रपुणी जतुनी तुम्बुरुणी । सनुम्कस्य शीभावः प्राप्नोति । नैष दोषः । निर्दिश्यमानस्यादेशा भवन्तीत्येव न भविष्यति । यस्तर्हि निर्दिश्यते तस्य न प्राप्नोति । कस्मात् । नुमा व्यवहितत्वात् ॥ एव तर्हि पूर्वान्तः करिष्यते ।

पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च ॥ ६ ॥

यदि पूर्वान्तः क्रियते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति । नपुंसकोपसर्जनह्रस्वत्वम् । आराशस्त्रिणी धानाशष्कुलिनी । निष्कौशाम्बिनी निर्वाराणसिनी† । द्विगुस्वरः । पञ्चारत्निनी दशारत्निनी‡ । नुमि कृते ऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति ॥

न वा बहिरङ्गलक्षणत्वात् ॥ ७ ॥

नैष दोषः । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गो नुमन्तरङ्गा एते

* ७.१.१९, ७३ † ७.१.७३ १.२.४७, ४८ ‡ ७.१.७३ ६.२.३०.

विषय । असिद्ध बहिरङ्गमन्तरङ्गे ॥ द्विगुस्वरे भूयान्परिहार । सघातभक्तो ऽसौ नोत्सहते ऽवयवस्यैगन्तता विहन्तुमिति कृत्वा द्विगुस्वरो भविष्यति ॥

एच इग्घ्रस्वादेशे ॥ १ । १ । ४८ ॥

किमर्थमिदमुच्यते ।

एच इक्सवर्णाकारनिवृत्त्यर्थम् ॥ १ ॥

एच इग्भवतीत्युच्यते सवर्णनिवृत्त्यर्थमकारनिवृत्त्यर्थं च । सवर्णनिवृत्त्यर्थं तावत् । एचो ह्रस्वशासनेष्वर्ध एकारो ऽर्ध ओकारो वा मा भूदिति ॥ अकारनिवृत्त्यर्थं च । इमावैचौ समाहारवर्णौ । मात्रावर्णस्य मात्रेवर्णोवर्णयो । तयोर्ह्रस्वशासनेषु कदाचिदवर्ण स्यात्कदाचिदिवर्णोवर्णौ । मा कदाचिदवर्णं भूदित्येवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । दीर्घप्रसङ्ग । दीर्घास्त्विक प्राप्नुवन्ति । किं कारणम् । स्थानेऽन्तरतमो भवतीति* । ननु च ह्रस्वादेश इत्युच्यते तेन दीर्घा न भविष्यन्ति । विषयार्थमेतत्स्यात् । एचो ह्रस्वप्रसङ्ग इग्भवतीति ।

दीर्घप्रसङ्गस्तु निवर्तकत्वात् ॥ २ ॥

दीर्घाणा त्विकामप्रसङ्ग । किं कारणम् । निवर्तकत्वात् । नानेनेको निर्वर्त्यन्ते । किं तर्हि । अनिको निवर्त्यन्ते । सिद्धा ह्यत्र ह्रस्वा इकश्चानिकश्च तत्रानेनानिको निवर्त्यन्ते ॥

सवर्णनिवृत्त्यर्थेन तावन्नार्थ ।

सिद्धमेङ सस्थानत्वात् ॥ ३ ॥

सिद्धमेतत् । कथम् । एङ· सस्थानत्वादिकारोकारौ भविष्यतो ऽर्ध एकारो ऽर्ध ओकारो वा न भविष्यति । ननु चैङ सस्थानतरावर्धैकारार्धौकारौ । न तौ स्त । यदि हि तौ स्याता तावेवायमुपदिशेत् । ननु च भोश्छन्दोगाना सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकार चाधीयते । सुजाते ए अश्वसूनृते । अध्वर्यो ओ अद्रिभि. सुतम् । शुक्र ते ए अन्यद्यजतं ते ए अन्यदिति । पार्षदकृतिरेषा तत्रभवतां नैव लोके नान्यस्मिन्वेदे ऽर्ध एकारो ऽर्ध ओकारो वास्ति ॥ अकारनिवृत्त्यर्थेनापि नार्थ ।

---

* १ १ ५०

ऐचोश्चोत्तरभूयस्त्वात् ॥ ४ ॥

ऐचोश्चोत्तरभूयस्त्वादवर्णो न भविष्यति । भूयसी मात्रेवर्णोवर्णयोरल्पीयस्यवर्णस्य । भूयस एव ग्रहणानि भविष्यन्ति । तद्यथा । ब्राह्मणग्राम आनीयतामित्युच्यते तत्र चावरतः पञ्चकारुकी भवति ॥

षष्ठी स्थानेयोगा ॥ १ । १ । ४९ ॥

किमिदं स्थानेयोगेति । स्थाने योगो ऽस्याः सेयं स्थानेयोगा । सप्तम्यलोपो निपातनात् ॥ तृतीयाया वैत्वम् । स्थानेन योगो ऽस्याः सेयं स्थानेयोगा ॥

किमर्थं पुनरिदमुच्यते ।

षष्ठ्याः स्थानेयोगवचनं नियमार्थम् ॥ १ ॥

नियमार्थो ऽयमारम्भः । एकशतं षष्ठ्यर्था यावन्तो वा ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति । इष्यते च व्याकरणे या षष्ठी सा स्थानेयोगैव स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति षष्ठ्याः स्थानेयोगवचनं नियमार्थम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

अवयवषष्ठ्यादिष्वतिप्रसङ्गः शासो गोह इति ॥ २ ॥

अवयवषष्ठ्यादयस्तु न सिध्यन्ति । तत्र को दोषः । शास इदङ्हलोः [६.४.३४] इति शासेश्चान्त्यस्य स्यादुपधामात्रस्य च । ऊदुपधाया गोहः [६.४.८९] इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च ॥

अवयवषष्ठ्यादीनां चाप्राप्तिर्योगस्यासंदिग्धत्वात् ॥ ३ ॥

अवयवषष्ठ्यादीनां च नियमस्याप्राप्तिः । किं कारणम् । योगस्यासंदिग्धत्वात् । संदेहे नियमो न चावयवषष्ठ्यादिषु संदेहः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गम्यते । लौकिको ऽयं दृष्टान्तः । तद्यथा । लोके कश्चित्कंचित्पृच्छति ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति । स तस्मा आचष्टे । अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यो ऽमुष्मिन्नवकाशे हस्तवाम इति । यस्तत्र तिर्यक्पथो भवति न तस्मिन्संदेह इति कृत्वा नासावुपदिश्यते । एवमिहापि संदेहे नियमो न चावयवषष्ठ्यादिषु संदेहः ॥

अथवा स्थाने ऽयोगा स्थानेयोगा । किमिदमयोगेति । अव्यक्तयोगायोगा ॥ अथवा योगवती योगा । का पुनर्योगवती । यस्या बहवो योगाः । कुत एतत् । भूम्नि हि मतुब्भवति* ॥

विशिष्टा वा षष्ठी स्थानेयोगा ॥ ४ ॥

अथवा किंचिल्लिङ्गमासज्य वक्ष्यामीत्यलिङ्गा षष्ठी स्थानेयोगा भवतीति । न च तल्लिङ्गमवयवषष्ठ्यादिषु करिष्यते ॥ यद्येवं शास इदङ्हलोः शा हौ [६.४.३५] शासिग्रहणं कर्तव्यं स्थानेयोगार्थं लिङ्गमासङ्क्ष्यामीति । न कर्तव्यम् । यदेवादः पुरस्तादवयवषष्ठ्यर्थं प्रकृतमेतदुत्तरत्रानुवृत्तं सत्स्थानेयोगार्थं भविष्यति । कथम् । अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति । अपरो ऽधिकारो यथा रज्ज्वायसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण । अपरो ऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठते । तद्यदैष पक्षो ऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति तदा हि यदेवादः पुरस्तादवयवषष्ठ्यर्थमेतदुत्तरत्रानुवृत्तं सत्स्थानेयोगार्थं भविष्यति । संप्रत्ययमात्रमेतद्भवति । न ह्यनुच्चार्य शब्दं लिङ्गं शक्यमासङ्क्तुम् । एवं तर्ह्यादेशे तल्लिङ्गं करिष्यते तत्प्रकृतिमास्कन्त्स्यति ॥

यदि नियमः क्रियते यत्रैका षष्ठ्यनेकं च विशेष्यं तत्र न सिध्यति । अङ्गस्य हलः अणः संप्रसारणस्येति† । हलपि विशेष्यो ऽणपि विशेष्यः संप्रसारणमपि विशेष्यम् । असति पुनर्नियमे कामचार एकया षष्ठ्यानेकं विशेषयितुम् । तद्यथा । देवदत्तस्य पुत्रः पाणिः कम्बल इति । तस्मान्नार्थो नियमेन । ननु चोक्तमेकशतं षष्ठ्यर्था यावन्तो वा ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्तीति । नैष दोषः । यद्यपि लोके बहवो ऽभिसंबन्धा आर्था यौना मौखाः स्रौवाश्च शब्दस्य तु शब्देन को ऽन्यो ऽभिसंबन्धो भवितुमर्हत्यन्यदतः स्थानात् । शब्दस्यापि शब्देनानन्तरादयो ऽभिसंबन्धाः । अस्तेर्भूर्भवतीति‡ संदेहः स्थाने ऽनन्तरे समीप इति । संदेहमात्रमेतद्भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति । स्थान इति व्याख्यास्यामः ॥ न तर्हीदानीमयं योगो वक्तव्यः । वक्तव्यश्च । किं प्रयोजनम् । षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारिता । किं कृतं भवति । निर्दिश्यमानस्यादेशा भवन्तीत्येषा परिभाषा न कर्तव्या भवति ॥

---

* ५.२.९४. † ६.४.१.२,६.१.१११,१३९ ‡ २.४.५२

स्थानेऽन्तरतमः ॥ १ । १ । ५० ॥

किमुदाहरणम् । इको यणचि [६.१.७७] । दध्यत्र । मध्वत्र । तालुस्थानस्य तालुस्थान ओष्ठस्थानस्यौष्ठस्थानो यथा स्यात् । नैतदस्ति । संख्यातानुदेशेनाप्येतत्सिद्धम्* ॥ इदं तर्हि । तस्थस्थमिपां तांतंतामः [३.४.१०१] इत्येकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थो यथा स्यात् । ननु चैतदपि संख्यातानुदेशेनैव सिद्धम् ॥ इदं तर्हि । अकः सवर्णे दीर्घः [६.१.१०१] इति दण्डाग्रम् क्षुपाग्रम् दधीन्द्रः मधूष्ट्रः इति कण्ठस्थानयोः कण्ठस्थानस्तालुस्थानयोस्तालुस्थान ओष्ठस्थानयोरोष्ठस्थानो यथा स्यादिति ॥ अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम् । यत्रानेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् । किं पुनस्तत् । चेता स्तोता । प्रमाणतोऽकारो गुणः प्राप्नोति स्थानत एकारौकारौ । पुनः स्थानग्रहणादेकारौकारौ भवतः ॥ अथ तमब्ग्रहणं किमर्थम् । झयो होऽन्यतरस्याम् [८.४.६२] इत्यत्र सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ता नादवतो नादवन्त इति तृतीयाः । तमब्ग्रहणाद्ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः । वाग्घसति त्रिष्टुब्भसतीति ॥

किमर्थं पुनरिदमुच्यते ।

स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गस्तस्मात्स्थानेऽन्तरतमवचनम् ॥ १ ॥

स्थान्येकत्वेन निर्दिश्यते । अक इति । अनेकश्च पुनरादेशः प्रतिनिर्दिश्यते । दीर्घ इति । स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गः । सर्वे सर्वत्र प्राप्नुवन्ति । इष्यते चान्तरतमा एव स्युरिति तच्चान्तरेण यत्नं न सिध्यतीति *तस्मात्स्थानेऽन्तरतम* इति वचनं नियमार्थम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

यदा पुनरियमन्तरतमनिर्वृत्तिः सा किं प्रकृतितो भवति । स्थानिन्यन्तरतमे षष्ठीति । आहोस्विदादेशतः । स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति । कुतः पुनरियं विचारणा । उभयथापि तुल्या संहिता । स्थानेऽन्तरतम उरण्परः इति ॥ किं चातः । यदि प्रकृतित इको यणचि [६.१.७७] यणो येऽन्तरतमा इकस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात् । दध्यत्र मध्वत्र । कुमार्यत्र ब्रह्मबन्ध्वर्थमित्यत्र न स्यात् । आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी

---

* १.१.१०

यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति ॥ तथेको गुणवृद्धी [१.१.३] गुणवृद्ध्योर्ये ऽन्तरतमा इकस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात् । नेता लविता नायकः लावकः । चेता स्तोता चायकः स्तावक इत्यत्र न स्यात् । आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति ॥ तथा ऋवर्णस्य गुणवृद्धिप्रसङ्गे गुणवृद्ध्योर्यदन्तरतममृवर्णे तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात् । कर्ता हर्ता आस्तारकः निपारकः । आस्तरिता निपरिता कारकः हारक इत्यत्र न स्यात् । आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति ॥ अथादेशतो ऽन्तरतमनिर्वृत्तौ सत्यामयं दोषः । वान्तो यि प्रत्यये [६.१.७९] । स्थानिनिर्देशः कर्तव्यः । ओकारौकारयोरिति वक्तव्यम् । एकारैकारयोर्मा भूदिति । प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां वान्तादेशस्यैक्षु यान्तरतमा प्रकृतिस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेण स्थानिनिर्देशं सिद्धं भवति । आदेशतो ऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः । कथम् । वान्तग्रहणं न करिष्यते । यि प्रत्यये एचो ऽयादयो भवन्तीत्येव । यदि न क्रियते चेयम् जेयमित्यत्रापि प्राप्नोति । क्षय्यजय्यौ शक्यार्थे [६.१.८१] इत्येतन्नियमार्थं भविष्यति । क्षिज्योरेवैच इति । तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति । क्षेयं पापम् जेयो वृषल इति । उभयतो नियमो विज्ञास्यते । क्षिज्योरेवैचः । अनयोश्च शक्यार्थ एवेति । इहापि तर्हि नियमान्न प्राप्नोति । लव्यम् पव्यम् । अवश्यलाव्यम् अवश्यपाव्यमिति । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यथाजातीयकः क्षिज्योरेच् । कथंजातीयकः क्षिज्योरेच् । एकारः । एवमपि रायमिच्छति रैयति अत्रापि प्राप्नोति । रायिश्छन्दसो दृष्टानुविधिश्छन्दसि भवति ॥ ऊदुपधाया गोहः [६.४.८९] । आदेशतो ऽन्तरतमनिर्वृत्तौ सत्यामुपधाग्रहणं कर्तव्यम् । प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यामूकारस्य गोहो यान्तरतमा प्रकृतिस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणोपधाग्रहणं सिद्धं भवति । आदेशतो ऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः । क्रियत एतन्न्यास एव ॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः [८.२.४२] । आदेशतो ऽन्तरतमनिर्वृत्तौ सत्यां तकारग्रहणं कर्तव्यम् । प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां नकारस्य निष्ठायां यान्तरतमा प्रकृतिस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेण तकारग्रहणं सिद्धं भवति । आदेशतो ऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः । क्रियत एतन्न्यास एव ॥

किं पुनरिदं निर्वर्तकम् । अन्तरतमा अनेन निर्वर्त्यन्ते । आहोस्वित्प्रतिपादकम् । अन्येन निर्वृत्तानामनेन प्रतिपत्तिः । कश्चात्र विशेषः ।

स्थानेऽन्तरतमनिर्वर्तके स्थानिनिवृत्तिः ॥ २ ॥

स्थानेऽन्तरतमनिर्वर्तके सर्वस्थानिनां निवृत्तिः प्राप्नोति । अस्यापि प्राप्नोति । दधि मधु । अस्तु । न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतो दधिशब्दस्य दधिशब्द एव मधुशब्दस्य मधुशब्द एवादेशो भविष्यति । यदि चैवं क्वचिद्वैरूप्यं तत्र दोषः स्यात् । बिसं बिसम् मुसलं मुसलमिति । इण्कोरिति षत्वं प्राप्नोति* ॥ अपि चेष्टा व्यवस्था न प्रकल्पेत । तद्यथा तप्ते भ्राष्ट्रे तिलाः क्षिप्ता मुहूर्तमपि नावतिष्ठन्त एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन् ॥ अस्तु तर्हि प्रतिपादकम् । अन्येन निर्वृत्तानामनेन प्रतिपत्तिः ।

निर्वृत्तप्रतिपत्तौ निर्वृत्तिः ॥ ३ ॥

निर्वृत्तप्रतिपत्तौ निर्वृत्तिर्न सिध्यति । सर्वे सर्वत्र प्राप्नुवन्ति । किं तर्ह्युच्यते निर्वृत्तिर्न सिध्यतीति । न साधीयो निर्वृत्तिः सिद्धा भवति । न ब्रूमो निर्वृत्तिर्न सिध्यतीति । किं तर्हि । इष्टा व्यवस्था न प्रकल्पेत । न सर्वे सर्वत्रेष्यन्ते ॥ इदमिदानीं किमर्थं स्यात् ।

अनर्थकं च ॥ ४ ॥

अनर्थकमेतत्स्यात् । यो हि भुक्तवन्तं ब्रूयान्मा भुक्था इति किं तेन कृतं स्यात् ॥

उक्तं वा ॥ ५ ॥

किमुक्तम् । सिद्धं तु षष्ठ्यधिकारे वचनादिति† । षष्ठ्यधिकारेऽयं योगः कर्तव्यः । स्थानेऽन्तरतमः षष्ठीनिर्दिष्टस्येति ॥

प्रत्यात्मवचनं च ॥ ६ ॥

प्रत्यात्ममिति न वक्तव्यम् । किं प्रयोजनम् । यो यस्यान्तरतमः स तस्य स्थाने यथा स्यादन्यस्यान्तरतमोऽन्यस्य स्थाने मा भूदिति ॥

---

* ८।३।५७ ५९ † १।१।१०

प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात् ॥ ७ ॥

प्रत्यात्मवचनमशिष्यम् । किं कारणम् । स्वभावसिद्धत्वात् । स्वभावत एतत्सिद्धम् । तद्यथा । समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते न चोच्यते प्रत्यात्ममिति प्रत्यात्मं चासते ॥

अन्तरतमवचनं च ॥ ८ ॥

अन्तरतमवचनं चाशिष्यम् । योगश्चाप्ययमशिष्यः । कुतः । स्वभावसिद्धत्वादेव । तद्यथा । समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते न पाण्डवः पाण्डुभिः । येषामेव किंचिदर्थकृतमान्तर्यं तैरेव सहासते ॥ तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति तेन सह शेरते । तथा यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति तान्यन्योन्यं पश्यन्ति शब्दं कुर्वन्ति ॥ एवं तावच्चेतनावत्सु । अचेतनेष्वपि । तद्यथा । लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः । तथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः स आकाशदेशे निवाते नैव तिर्यग्गच्छति नावागवरोहत्यब्विकारो ऽप एव गच्छत्यान्तर्यतः । तथा ज्योतिषो विकारो ऽर्चिराकाशदेशे निवाते सुप्रज्वलितो नैव तिर्यग्गच्छति नावागवरोहति ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः ॥

व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः ॥ ९ ॥

व्यञ्जनव्यतिक्रमे स्वरव्यतिक्रमे च तत्कालता प्राप्नोति । व्यञ्जनव्यतिक्रमे । इदम् उदम् । आन्तर्यतो ऽर्धमात्रिकस्य व्यञ्जनस्यार्धमात्रिक इक्प्राप्नोति ॥ नैव लोके न च वेदे ऽर्धमात्रिक इगस्ति । कस्तर्हि । मात्रिकः । यो ऽस्ति स भविष्यति ॥ स्वरव्यतिक्रमे । दध्यत्र मध्वत्र कुमार्यत्र ब्रह्मबन्ध्वर्थमिति । आन्तर्यतो मात्रिकस्य द्विमात्रिकस्यैको मात्रिको द्विमात्रिको वा यण्प्राप्नोति ॥ नैव लोके न च वेदे मात्रिको द्विमात्रिको वा यणस्ति । कस्तर्हि । अर्धमात्रिकः । यो ऽस्ति स भविष्यति ॥

अक्षु चानेकवर्णादेशेषु ॥ १० ॥

अक्षु चानेकवर्णादेशेषु तत्कालता प्राप्नोति । इदम इश् [५.३.३] । आन्तर्यतो ऽर्धतृतीयमात्रस्येदमः स्थाने ऽर्धतृतीयमात्रमिवर्णं प्राप्नोति ॥ नैष दोषः । भाव्यमानेन सवर्णानां ग्रहणं नेत्येवं न भविष्यति ॥

गुणवृद्ध्येज्भावेषु च ॥ ११ ॥

गुणवृद्ध्येज्भावेषु च तत्कालता प्राप्नोति । खट्वा इन्द्रः खट्वेन्द्रः । खट्वा उदकं खट्वोदकम् । खट्वा ईषा खट्वेषा । खट्वा ऊढा खट्वोढा । खट्वा एलका खट्वैलका । खट्वा ओदनः खट्वौदनः । खट्वा ऐतिकायनः खट्वैतिकायनः । खट्वा ओपगवः खट्वौपगव इति । आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशाः प्राप्नुवन्ति ॥ नैष दोषः । तपरे गुणवृद्धी । ननु च तः परो यस्मात्सो ऽयं तपरः । नेत्याह । तादपि परस्तपरः । यदि तादपि परस्तपर ऋदोरप् [३.३.५७] इहैव स्यात् । यवः स्तवः । लवः पव इत्यत्र न स्यात् । नैष तकारः । कस्तर्हि । दकारः । किं दकारे प्रयोजनम् । अथ किं तकारे । यद्यसंदेहार्थस्तकारो दकारो ऽपि । अथ मुखसुखार्थस्तकारो दकारोऽपि ॥ एज्भावे* । कुर्वाते कुर्वाथे । आन्तर्यतो ऽर्धतृतीयमात्रस्य टिसंज्ञकस्यार्धतृतीयमात्र एः प्राप्नोति ॥ नैव लोके न च वेदे ऽर्धतृतीयमात्र एरस्ति ॥

ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गो ऽविशेषात् ॥ १२ ॥

ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गः । सर्वे गुणवृद्धिसंज्ञका ऋवर्णस्य स्थाने प्राप्नुवन्ति । किं कारणम् । अविशेषात् । न हि कश्चिद्विशेष उपादीयत एवंजातीयको गुणवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति । अनुपादीयमाने विशेषे सर्वप्रसङ्गः ॥

न वा ऋवर्णस्य स्थाने रपरप्रसङ्गादवर्णस्यान्तर्यम् ॥ १३ ॥

न वैष दोषः । किं कारणम् । ऋवर्णस्य स्थाने रपरप्रसङ्गात् । उः स्थाने ऽण् प्रसज्यमान एव रपरो भवतीत्युच्यते† तत्र ऋवर्णस्यान्तर्यतो रेफवतो रेफवानकार एवान्तरतमो भवति ॥

सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात् ॥ १४ ॥

सर्वादेशास्तु गुणवृद्धिसंज्ञक ऋवर्णस्य प्राप्नोति । किं कारणम् । अनेकाल्त्वात् । अनेकाल्शित्सर्वस्य [१.१.५५] इति ॥

न वानेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः ॥ १५ ॥

न चैष दोषः । किं कारणम् । अनेकाल्त्वस्य तदाश्रयत्वात् । यत्रायमुः स्थाने

* १.१.२. † १.१.५१.

तदानेकाल् । अनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्य विघातो न भविष्यति ॥ अथवा-नान्तर्यमेवैतयोरान्तर्यम् । एकस्याप्यन्तरतमा प्रकृतिर्नास्त्यपरस्याप्यन्तरतम आदेशो नास्ति । एतदेवैतयोरान्तर्यम् ॥

संप्रयोगो वा नष्टाश्वदग्धरथवत् ॥ १६ ॥

अथवा नष्टाश्वदग्धरथवत्संप्रयोगो भवति । तद्यथा । तवाश्वो नष्टो ममापि रथो दग्ध उभौ संप्रयुज्यावहा इति । एवमिहापि तवाप्यन्तरतमा प्रकृतिर्नास्ति ममाप्यन्तरतम आदेशो नास्त्यस्तु नौ संप्रयोग इति । विषम उपन्यासः । चेतनावत्स्वर्थात्प्रकरणाद्वा लोके संप्रयोगो भवति वर्णाश्च पुनरचेतनास्तत्र किंकृतः संप्रयोगः । यद्यपि वर्णा अचेतना यस्त्वसौ प्रयुङ्क्ते स चेतनावान् ॥

एजवर्णयोरादेशे ऽवर्णं स्थानिनो ऽवर्णप्रधानत्वात् ॥ १७ ॥

एजवर्णयोरादेशे ऽवर्णं प्राप्नोति । खट्वैलका मालौघगवः । किं कारणम् । स्थानिनो ऽवर्णप्रधानत्वात् । स्थानी ह्यत्रावर्णप्रधानः ॥

सिद्धं तूभयान्तर्यात् ॥ १८ ॥

सिद्धमेतत् । कथम् । उभयोर्यो ऽन्तरतमस्तेन भवितव्य न चावर्णमुभयोरन्तरतमम् ॥

उरण्परः ॥ १ । १ । ५१ ॥

किमिदमुरण्परवचनमन्यनिवृत्त्यर्थम् । उः स्थाने ऽणेव भवति रपरश्चेति । आहोस्विद्रपरत्वमनेन विधीयते । उः स्थाने ऽण्चानण्च अण्तु रपर इति । कश्चात्र विशेषः ।

उरण्परवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः ॥ १ ॥

उरण्परवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषो भवति । के पुनरुदात्तादयः । उदात्तानुदात्तस्वरितानुनासिकाः । कृतिः हतिः* । कृतम् हृतम्† । प्रकृतम् प्रहृतम्‡ । नॄः पाहि§ । अस्तु तर्हि उः स्थाने ऽण्चानण्च अण्तु रपर इति ।

* ६ १ १६०   † १ १ १ ६ १ ११८.   ‡ ६ २ ४९ ६ १ १५८, ८ ४ ६६.   § ८ ३ १० २

य उः स्थाने स रपर इति चेद्गुणवृद्ध्योरवर्णाप्रतिपत्तिः ॥ २ ॥

य उः स्थाने स रपर इति चेद्गुणवृद्ध्योरवर्णस्याप्रतिपत्तिः । कर्ता हर्ता वार्षगण्यः । किं हि साधीय ऋवर्णस्यासवर्णे यदवर्णं स्यान्न पुनरेङैचौ । पूर्वस्मिन्नपि पक्ष एष दोषः । किं हि साधीयस्तत्राप्यृवर्णस्यासवर्णे यदवर्णं स्यान्न पुनरिवर्णोवर्णौ । अथ मतमेतदुः स्थाने ऽणश्चानणश्च प्रसङ्गे ऽणेव भवति रपरश्चेति सिद्धा पूर्वस्मिन्पक्षे ऽवर्णस्य प्रतिपत्तिः । यत्तु तदुक्तमुदात्तादिषु दोषो भवतीतीह स दोषो जायते । न जायते । जायते स दोषः । कथम् । उदात्त इत्यनेनाणो ऽपि प्रतिनिर्दिश्यन्ते ऽनणो ऽपि । यद्यपि प्रतिनिर्दिश्यन्ते न तु प्राप्नुवन्ति । किं कारणम् । स्थाने ऽन्तरतमो भवतीति* । कुतो नु खल्वेतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः स्थाने ऽन्तरतम इत्युरण्रपर इति च स्थाने ऽन्तरतम इत्यनया परिभाषया व्यवस्था भविष्यति न पुनरुरण्रपर इति । अतः किम् । अत एव दोषो जायत उदात्तादिषु दोष इति ॥ ये चाप्येत ऋवर्णस्य स्थाने प्रतिपदमादेशा उच्यन्ते तेषु रपरत्वं न प्राप्नोति । ऋत इद्धातोः [७.१.१००] उदोष्ठ्यपूर्वस्य [१०२] इति ॥

सिद्धं तु प्रसङ्गे रपरत्वात् ॥ ३ ॥

सिद्धमेतत् । कथम् । प्रसङ्गे रपरत्वात् । उः स्थाने ऽण्प्रसज्यमान एव रपरो भवतीति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । स्थान इति वर्तते स्थानशब्दश्च प्रसङ्गवाची । यद्येवमादेशो ऽविशेषितो भवति । आदेशश्च विशेषितः । कथम् । द्वितीयं स्थानग्रहणं प्रकृतमनुवर्तते तत्रैवमभिसंबन्धः करिष्यते । उः स्थाने ऽण्स्थान इति । उः प्रसङ्गे ऽण्प्रसज्यमान एव रपरो भवति ॥

अथाण्ग्रहणं किमर्थं न ऊ रपर इत्येवोच्येत । ऊ रपर इतीयत्युच्यमाने क इदानीं रपरः स्यात् । य उः स्थाने भवति । कथोः स्थाने भवति । आदेशः ।

आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः ॥ ४ ॥

आदेशो रपर इति चेद्रीरिविधिषु रपरत्वस्य प्रतिषेधो वक्तव्यः । के पुना रीरिविधयः । अकङ्लोपानङनङ्रीङ्रिङादेशाः । अकङ् । सौधातकिः† । लोपः । पैतृष्वसेयः‡ । आनङ् । होतापोतारौ§ । अनङ् । कर्ता हर्ता¶ । रीङ् । मात्रीयति पित्रीयति** । रिङ् । क्रियते ह्रियते†† ॥

---

* १.१.५० † ४.१.९७ ‡ ४.१.१३३. § ६.३.२५ ¶ ७.१.९४. ** ७.४.२७ †† ७.४.२८

उदात्तादिषु च ॥ ५ ॥

किम् । रपरत्वस्य प्रतिषेधो वक्तव्यः । कृतिः हृतिः । कृतम् हृतम् । प्रकृतम् हृतम् । नॄः पाहि ॥ तस्मादण्ग्रहणं कर्तव्यम् ॥

एकादेशस्योपसंख्यानम् ॥ ६ ॥

एकादेशस्योपसंख्यानं कर्तव्यम् । खट्वर्श्यः मालर्श्यः* । किं पुनः कारणं न यति । उः स्थाने ऽण्प्रसज्यमान एव रपरो भवतीत्युच्यते न चायमुरेव स्थाने ाप्यते । किं तर्हि । उश्चान्यस्य च ॥ अवयवग्रहणात्सिद्धम् । यदत्र ऋवर्णं तदा-रपरत्वं भविष्यति । तद्यथा । माषा न भोक्तव्या इत्युक्ते मिश्रा अपि न भुज्यन्ते ।

अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः ॥ ७ ॥

अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तस्य प्रतिषेधो वक्तव्यः । होतापोतारौ† । ोश्चान्यस्य च स्थाने ऽण्परो भवत्येवं य उः स्थाने ऽनानण्च सो ऽपि ः स्यात् ॥ यदि पुनर्ऋवर्णान्तस्य स्थानिनो रपरत्वमुच्येत । खट्वर्श्यः मालर्श्यः । शक्यम् । इह हि दोषः स्यात् । कर्ता हर्ता । किरति गिरति‡ । ऋवर्णान्तस्ये-च्यते न चैतदृवर्णान्तम् । ननु चैतदपि व्यपदेशिवद्भावेन ऋवर्णान्तम् । अर्थवता देशिवद्भावो न चैषो ऽर्थवान् । तस्मान्नैवं शक्यम् ॥ न चेदेवमुपसंख्यानं कर्त-् । इह च रपरत्वस्य प्रतिषेधो वक्तव्यः । मातुः पितुरिति§ ॥ उभयं न व्यम् । कथम् । इह यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति लभते ऽसावन्य-तो व्यपदेशम् । तद्यथा । देवदत्तस्य पुत्रः देवदत्तायाः पुत्र इति ॥ कथं मातुः रिति । अस्त्वत्र रपरत्वम् । का रूपसिद्धिः । रात्सस्य [८.२.२४] इति ारस्य लोपो रेफस्य विसर्जनीयः¶ । नैवं शक्यम् । इह हि मातुः करोति ः करोतीत्यप्रत्ययविसर्जनीयस्येति षत्वं प्रसज्येत** । अप्रत्ययविसर्जनीयस्ये-च्यते प्रत्ययविसर्जनीयश्चायम् । लुप्यते ऽत्र प्रत्ययो रात्सस्येति । एवं तर्हि ्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात्षत्वप्रतिषेधस्य†† । यदयं कस्कादिषु भ्रातु-ुत्रशब्दं पठति तज्ज्ञापयत्याचार्यो नैकादेशनिमित्तात्षत्वं भवतीति ॥

किं पुनरयं पूर्वान्त आहोस्वित्परादिराहोस्विदभक्तः । कथं चायं पूर्वान्तः

* ६.१.८७ † ६.१.३१ ‡ ७.१.८४, ७.१.१०० § ६.१.१११; ८.२.६६ ८.३.१४, ६.१.१११. ¶ ८.३.१५ ** ८.३.४१ †† ८.३.४१.१.

कथ वा परादिः कथ वाभक्तः । यद्यन्त इति वर्तते* ततः पूर्वान्तः । अथा-
ति वर्तते ततः परादिः । अथोभयं निवृत्तं ततो ऽभक्तः । कश्चात्र विशेषः ।

भक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिशेषविसर्जनीयप्रतिषेधः प्रत्यया-
व्यवस्था च ॥ ८ ॥

यद्यभक्तो दीर्घत्व न प्राप्नोति । गीः पूः† । रेफवकारान्तस्य धातोरिति‡ दीर्घत्वं
प्राप्नोति। किं पुनः कारणं रेफवकाराभ्यां धातुर्विशेष्यते न पुनः पदं विशेष्यते
वकारान्तस्य पदस्येति । नैवं शक्यम् । इहापि प्रसज्येत । अग्निर्वायुरिति । एव
रेफवकाराभ्यां पद विशेषयिष्यामो धातुनेकम् रेफवकारान्तस्य पदस्येको
तोरिति । एवमपि प्रिय ग्रामणि कुलमस्य प्रियग्रामणिः प्रियसेनानिः अत्रापि
ोति । तस्माद्धातुरेव विशेष्यते धातौ च विशेष्यमाण इह दीर्घत्व न प्राप्नोति ।
: पूः । दीर्घ ॥ लत्व । लत्व च न सिध्यति । निजेगिल्यते । ग्रो यङि [८.२.२०]
लत्वं न प्राप्नोति ॥ नैष दोषः । ग्र इत्यनन्तरयोगैषा षष्ठी । एवमपि स्वर्जे-
ल्यत इत्यत्रापि प्राप्नोति । एवं तर्हि यङानन्तर्यं विशेषयिष्यामः । अथवा ग्र इति
प्तमी । लत्व ॥ यक्स्वर । यक्स्वरश्च न सिध्यति । गीर्यते स्वयमेव । पूर्यते
यमेव । अचः कर्तृयकि [६.१.१९५] इत्येष स्वरो न प्राप्नोति रेफेण
वहितत्वात् ॥ नैष दोषः । स्वरविधौ व्यञ्जनमविद्यमानवदिति नास्ति व्यवधानम् ।
स्वर ॥ अभ्यस्तस्वर । अभ्यस्तस्वरश्च न सिध्यति । मा हि स्म ते पिपरुः ।
हि स्म ते बिभरुः§ । अभ्यस्तानामादिरुदात्तो भवत्यजादौ लसार्वधातुक¶
ष स्वरो न प्राप्नोति रेफेण व्यवहितत्वात् ॥ नैष दोषः । स्वरविधौ व्यञ्जनम-
विद्यमानवदिति नास्ति व्यवधानम् । अभ्यस्तस्वर ॥ हलादिशेष । हलादि-
षश्च न सिध्यति । ववृते ववृधे** । अभ्यासस्येति हलादिशेषो न प्राप्नोति††। हलादि-
ष ॥ विसर्जनीय । विसर्जनीयस्य च प्रतिषेधो वक्तव्यः । नार्कुटः नार्पत्यः ।
रवसानयोर्विसर्जनीयः [८.३.१५] इति विसर्जनीयः प्राप्नोति । विसर्जनीय ॥
त्यया व्यवस्था च । प्रत्यये व्यवस्था न प्रकल्पते । किरतः गिरतः । रेफो ऽभक्तः
त्ययोऽपि तत्र व्यवस्था न प्रकल्पते ॥ एवं तर्हि पूर्वान्तः करिष्यते ।

पूर्वान्ते र्वेवधारण विसर्जनीयप्रतिषेधो यक्स्वरश्च ॥ ९ ॥

यदि पूर्वान्तो रोरवधारणं कर्तव्यम् । रोः सुपि [८.३.१६] । रोरेव सुपि

*१.१.४६ †८.१.१०० १०२ ‡८.२.७६ §८.१.८१ ¶६.१.१८९ **७.४.६१ ††७.४.६०.

नान्यस्य रेफस्य । सर्पिष्षु धनुष्षु । इह मा भूत् । गीर्षु पूर्षु ॥ परादावपि सत्यवधारणं कर्तव्यं चतुर्ष्वित्येवमर्थम् ॥ विसर्जनीयप्रतिषेधः । विसर्जनीयस्य च प्रतिषेधो वक्तव्यः । नार्कुटः नार्पत्यः । खरवसानयोर्विसर्जनीयः [८.३.१५] इति विसर्जनीयः प्राप्नोति ॥ परादावपि विसर्जनीयस्य प्रतिषेधो वक्तव्यो नार्कल्पिरित्येवमर्थम् । कल्पिपदसंघातभक्तो ऽसौ नोत्सहते ऽवयवस्य पदान्ततां विहन्तुमिति कृत्वा विसर्जनीयः प्राप्नोति ॥ यक्स्वरः । यक्स्वरश्च न सिध्यति । गीर्यते स्वयमेव । पूर्यते स्वयमेव । अचः कर्तृयकि [६.१.१९५] इत्येष स्वरो न प्राप्नोति ॥ नैष दोषः । उपदेश इति वर्तते* ॥ अथवा पुनरस्तु परादिः ।

परादावकारलोपौत्वपुक्प्रतिषेधश्चङ्युपधाह्रस्वत्वमिटो ऽव्यवस्थाभ्यासलोपो ऽभ्यस्ततादिस्वरौ दीर्घत्वं च ॥ १० ॥

यदि परादिरकारलोपः प्रतिषेध्यः । कर्ता हर्ता । अतो लोप आर्धधातुके† इत्यकारलोपः प्राप्नोति ॥ नैष दोषः । उपदेश इति वर्तते‡ । यद्युपदेश इति वर्तते धिनुतः कृणुतः§ अत्र लोपो न प्राप्नोति । नोपदेशग्रहणेन प्रकृतिरभिसबध्यते । किं तर्हि । आर्धधातुकमभिसबध्यते । आर्धधातुकोपदेशे यदकारान्तमिति । अकारलोप ॥ औत्व । औत्वं च प्रतिषेध्यम् । चकार जहार । आत औ णलः [७.१.३४] इत्यौत्वं प्राप्नोति ॥ नैष दोषः । निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । रेफेण व्यवहितत्वात् । औत्व ॥ पुक्प्रतिषेधः । पुक् च प्रतिषेध्यः । कारयति हारयति । आर्तां पुगिति¶ पुक्प्राप्नोति । पुक्प्रतिषेधः ॥ चङ्युपधाह्रस्वत्वम् । चङ्युपधाह्रस्वत्वं च न सिध्यति । अचीकरत् अजीहरत् । णौ चङ्युपधाया ह्रस्वः [७.४.१] इति ह्रस्वत्वं न प्राप्नोति । चङ्युपधाह्रस्वत्वम् ॥ इटो ऽव्यवस्था । इटश्च व्यवस्था न प्रकल्पते । आस्तरिता निपरिता । इडपि परादी रेफोऽपि । तत्र व्यवस्था न प्रकल्पते । इटो ऽव्यवस्था ॥ अभ्यासलोपः । अभ्यासलोपश्च वक्तव्यः । ववृते ववृधे । अभ्यासस्येति हलादिःशेषो न प्राप्नोति** । अभ्यासलोपः ॥ अभ्यस्तस्वर । अभ्यस्तस्वरश्च न सिध्यति । मा हि स्म ते पिपरुः । मा हि स्म ते बिभरुः । अभ्यस्तानामादिरुदात्तो भवत्यजादौ लसार्वधातुके†† इत्येष स्वरो न प्राप्नोति । अभ्यस्तस्वर ॥ तादिस्वरः । तादिस्वरश्च न सिध्यति । प्रकर्ता प्रकर्तुम् । प्रहर्ता प्रहर्तुम् । तादौ च निति कृत्यतौ [६.२.५०] इत्येष स्वरो न प्राप्नोति ॥ नैष दोषः । उक्तमेतत् । कृदुपदेशे

*६.१.१८६ †६.४.४८ ‡६.४.३७ §३.१.८० ¶७.३.३६ **७.४.६० ††६.१.१८९

मा तावदर्थमिङर्थमिति* । तादिस्वरः ॥ दीर्घत्वम् । दीर्घत्वं च न सिध्यति । गीः पूः । रेफवकारान्तस्य धातोरिति[1] दीर्घत्वं न प्राप्नोति ॥

अलो ऽन्त्यस्य ॥ १ । १ । ५२ ॥

किमिदमल्ग्रहणमन्त्यविशेषणमाहोस्विदादेशविशेषणम् । किं चातः । यद्यन्त्यविशेषणमादेशो ऽविशेषितो भवति । तत्र को दोषः । अनेकालप्यादेशो ऽन्त्यस्य प्रसज्येत ॥ यदि पुनरलन्त्यस्येत्युच्येत । तत्रायमप्यर्थो ऽनेकाल्शित्सर्वस्य [१.१.५५] इत्येतन्न वक्तव्यं भवति । इदं नियमार्थं भविष्यति । अलेवान्त्यस्य भवति नान्य इति । एवमप्यन्त्यो ऽविशेषितो भवति । तत्र को दोषः । वाक्यस्यापि पदस्याप्यन्त्यस्य प्रसज्येत ॥ यदि खल्वप्येषो ऽभिप्रायस्तच्च क्रियेतेत्यन्त्यविशेषणे ऽपि सति तच्च करिष्यते । कथम् । ङिच्चालो ऽन्त्यस्येत्येतन्नियमार्थं भविष्यति[1] । ङिदेवानेकालन्त्यस्य भवति नान्य इति ॥

किमर्थं पुनरिदमुच्यते ।

अलो ऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः ॥ १ ॥

अलो ऽन्त्यस्येत्युच्यते स्थाने विज्ञातस्यानुसंहारः क्रियते स्थाने प्रसक्तस्य ॥

इतरथा ह्यनिष्टप्रसङ्गः ॥ २ ॥

इतरथा ह्यनिष्टं प्रसज्येत । डिन्निमित्तो ऽप्यन्त्यस्य स्युः ॥ यदि पुनरयं योगशेषो विज्ञायेत ।

योगशेषे च ॥ ३ ॥

किम् । अनिष्टं प्रसज्येत । डिन्निमित्तो ऽप्यन्त्यस्य स्युः ॥ तस्मात्सूक्तमलो ऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहार इतरथा ह्यनिष्टप्रसङ्ग इति ॥

ङिच्च ॥ १ । १ । ५३ ॥

[illegible] । [illegible] ।

तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः ॥ १ ॥

तातङि ङित्करणं सावकाशम् । कोऽवकाशः । गुणवृद्धिप्रतिषेधार्थो ङकारः* । तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति ॥ प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात् । यदि चायं नियोगतः सर्वादेशः स्यात्तत एतत्प्रयोजनं स्यात् । कुतो नु खल्वेतन्ङित्करणादयं सर्वादेशो भविष्यति न पुनरन्त्यस्य स्यादिति ॥ एवं तर्ह्येतदेव ज्ञापयति न तातङन्त्यस्य स्थाने भवतीति यदेनं ङितं करोति । इतरथा हि लोट एरुप्रकरणे† एव ब्रूयात्तिह्योस्तातङाशिष्यन्यतरस्यामिति ॥

आदेः परस्य ॥ १ । १ । ५४ ॥

अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादविप्रतिषेधात्सर्वादेशः ॥ १ ॥

अलोऽन्त्यस्येत्युत्सर्गः । तस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादौ । अपवादविप्रतिषेधात्तु सर्वादेशो भविष्यति । आदेः परस्येत्यस्यावकाशः । द्व्यन्तरुपसर्गेभ्योऽप ईत् [६.३.९७] द्वीपम् अन्तरीपम् । अनेकाल्शित्सर्वस्येत्यस्यावकाशः । अस्तेर्भूः [२.४.५२] भविता भवितुम् । इहोभयं प्राप्नोति । अतो भिस ऐस् [७.१.९] । अनेकाल्शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन ॥ शित्सर्वस्येत्यस्यावकाशः । इदम इश् [५.३.३] इतः इह । आदेः परस्येत्यस्यावकाशः । स एव । इहोभयं प्राप्नोति । अष्टाभ्य औश् [७.१.२१] । शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन ॥

अनेकाल्शित्सर्वस्य ॥ १ । १ । ५५ ॥

शित्सर्वस्येति किमुदाहरणम् । इदम इश् [५.३.३] इतः इह । नैतदस्ति प्रयोजनम् । शित्करणादेवात्र सर्वादेशो भविष्यति । इदं तर्हि । अष्टाभ्य औश् [७.१.२१] । ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति । इदं तर्हि । जसः शी [७.१.१७] । जश्शसोः शिः [२०] । ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति । अस्त्यन्यच्छित्करणे प्रयोजनम् । किम् । विशेषणार्थः । क्व विशेषणार्थेनार्थः । शि सर्वनामस्थानम् [१.१.४२] विभाषा ङिश्योः [६.४.१३६] इति ॥

---

* ११६ † ११४८.

शित्सर्वस्येति शक्यमकर्तुम् । कथम् । अन्त्यस्याय स्थाने भवन्न प्रत्ययः स्यात् । असत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यात् । असत्यामित्संज्ञायां लोपो न स्यात् । असति लोपे ऽनेकाल् । यदानेकाल्तदा सर्वादेशः । यदा सर्वादेशस्तदा प्रत्ययः । यदा प्रत्ययस्तदेत्संज्ञा* । यदेत्संज्ञा तदा लोपः† ॥ एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह तज्ज्ञापयत्याचार्यो ऽस्त्येषा परिभाषा नानुबन्धकृतमनेकाल्त्वं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । तत्रासरूपसर्वादेशदाप्प्रतिषेधेषु पृथक्त्वनिर्देशो ऽनाकारान्तत्वादित्युक्तं‡ तन्न वक्तव्यं भवतीति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकम् ॥

---

* १२८ † १२९ ‡ १३०

स्थानिवदादेशो ऽनल्विधौ ॥ १ । १ । ५६ ॥

यत्करणं किमर्थम् । स्थान्यादेशो ऽनल्विधावितीयत्युच्यमाने संज्ञाधिकारो ऽयं तत्र स्थान्यादेशस्य संज्ञा स्यात् । तत्र को दोषः । आङो यमहन आत्मनेपदं भवतीति* वधेरेव स्याद्धन्तेर्न स्यात् । वत्करणे पुनः क्रियमाणे न दोषो भवति । स्थानिकार्यमादेशो ऽतिदिश्यते गुरुवद्गुरुपुत्र इति यथा ॥ अथादेशग्रहणं किमर्थम् । स्थानिवदनल्विधावितीयत्युच्यमाने क इदानीं स्थानिवत्स्यात् । यः स्थाने भवति । कश्च स्थाने भवति । आदेशः । इदं तर्हि प्रयोजनमादेशमात्रं स्थानिवद्यथा स्यात् । एकदेशविकृतस्योपसंख्यानं चोदयिष्यति† तन्न वक्तव्यं भवति ॥ अथ विधिग्रहणं किमर्थम् । सर्वविभक्त्यन्तः समासो यथा विज्ञायेत । अलः परस्य विधिरल्विधिः । अलो विधिरल्विधिः । अलि विधिरल्विधिः । अला विधिरल्विधिरिति । नैतदस्ति प्रयोजनम् । प्रातिपदिकनिर्देशो ऽयम् । प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति । तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितु बुद्धिरुपजायते सा साश्रयितव्या ॥ इदं तर्हि प्रयोजनमुत्तरपदलोपो यथा विज्ञायेत । अलमाश्रयते ऽलाश्रयः । अलाश्रयो विधिरल्विधिरिति । यत्र प्राधान्येनालाश्रीयते तत्रैव प्रतिषेधः स्यात् । यत्र विशेषणत्वेनालाश्रीयते तत्र प्रतिषेधो न स्यात् । किं प्रयोजनम् । प्रदीव्य प्रसीव्येति वलादिलक्षण इण्मा भूदिति‡ ॥

किमर्थं पुनरिदमुच्यते ।

स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद्गुरुपुत्र इति यथा ॥ १ ॥

अन्यः स्थान्यन्य आदेशः । स्थान्यादेशपृथक्त्वादेतस्मात्कारणात्स्थानिकार्यमादेशो न प्राप्नोति । तत्र को दोषः । आङो यमहन आत्मनेपदं भवतीति* हन्तेरेव स्याद्वधेर्न स्यात् । इष्यते च वधेरपि स्यादिति तच्चान्तरेण यत्नं न सिध्यति । तस्मात्स्थानिवदनुदेशः । एवमर्थमिदमुच्यते । गुरुवद्गुरुपुत्र इति यथा । तद्यथा । गुरुवदस्मिन्गुरुपुत्रे वर्तितव्यमिति गुरौ यत्कार्यं तद्गुरुपुत्रे ऽतिदिश्यते । एवमिहापि स्थानिकार्यमादेशे ऽतिदिश्यते ॥ नैतदस्ति प्रयोजनम् । लोकत एतत्सिद्धम् । तद्यथा । लोके यो यस्य प्रसङ्गे भवति लभते ऽसौ तत्कार्याणि । तद्यथा । उपाध्यायस्य शिष्यो याज्यकुलानि गत्वाग्रासनादीनि लभते । यद्यपि तावल्लोक एष दृष्टान्तो दृष्टान्तस्यापि तु पुरुषारम्भो

---

* १ ३ २८   † १ १ ५५°   ‡ ७ २ ३५

निवर्तको भवति । अस्ति चेह कश्चित्पुरुषारम्भः । अस्तीत्याह । कः । स्वरूपविधिर्नाम* । हन्तेरात्मनेपदमुच्यमानं हन्तेरेव स्याद्वधेर्न स्यात् ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति स्थानिवदादेशो भवतीति यदयं युष्मदस्मदोरनादेशे [७.२.८६] इत्यादेशप्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । युष्मदस्मदोर्विभक्तौ कार्यमुच्यमानं कः प्रसङ्गो यदादेशे स्यात् । पश्यति त्वाचार्यः स्थानिवदादेशो भवतीत्यत आदेशे प्रतिषेधं शास्ति ॥ इदं तर्हि प्रयोजनम् । अनल्विधाविति प्रतिषेधं वक्ष्यामीति । इह मा भूत् । द्यौः पन्थाः स इति† ॥ एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयत्यल्विधौ स्थानिवद्भावो न भवतीति यदयमदो जग्धिर्ल्यप्ति किति [२.४.३६] इति ति कितीत्येव सिद्धे ल्यब्ग्रहणं करोति ॥ तस्मान्नार्थो ऽनेन योगेन ॥

आरभ्यमाणे ऽप्येतस्मिन्योगे

अल्विधौ प्रतिषेधे ऽविशेषणे ऽप्राप्तिस्तस्यादर्शनात् ॥ २ ॥

अल्विधौ प्रतिषेधे ऽसत्यपि विशेषणे समाश्रीयमाणे ऽसति तस्मिन्विशेषणे ऽप्राप्तिर्विधेः । प्रदीव्य प्रसीव्य । किं कारणम् । तस्यादर्शनात् । वलादेरित्युच्यते‡ न चात्र वलादिं पश्यामः ॥ ननु चैवमर्थ एवायं यत्नः क्रियते ऽन्यस्य कार्यमुच्यमानमन्यस्य यथा स्यादिति । सत्यमेवमर्थो न तु प्राप्नोति । किं कारणम् ।

सामान्यातिदेशे विशेषानतिदेशः ॥ ३ ॥

सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति । तद्यथा । ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमिति सामान्यं यद्ब्राह्मणकार्यं तत्क्षत्रिये ऽतिदिश्यते यद्विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते । एवमिहापि सामान्यं यत्प्रत्ययकार्यं तदतिदिश्यते यद्विशिष्टं वलादेरिति न तदतिदिश्यते ॥ यद्येवमग्रहीत्§ इट ईटि [८.२.२८] इति सिचो लोपो न प्राप्नोति । अनल्विधाविति पुनरुच्यमान इहापि प्रतिषेधो भविष्यति । प्रदीव्य प्रसीव्येति । विशिष्टं ह्येषो ऽलमाश्रयते वलं नाम । इह च प्रतिषेधो न भविष्यति । अग्रहीदिति । विशिष्टं ह्येषो ऽनलमाश्रयत इटं नाम ॥ यदि तर्हि सामान्यमप्यतिदिश्यते विशेषश्च

सत्याश्रये विधिरिष्टः ॥ ४ ॥

सति च वलादित्व इटा भवितव्यम् । अरुदिताम् अरुदितम् अरुदित¶ । किमतो यत्सति भवितव्यम् ।

---

* १.१.५८. † ७.१.८४ ८५, ७.२.१०१, ६.१.६८ ‡ ७.२.१८ § ७.२.१० ¶ ७.२.७६

प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात् ॥ ५ ॥

प्रतिषेधस्तु प्राप्नोति । किं कारणम् । अल्विधित्वात् । अल्विधिरयं भवति तत्रानल्विधाविति प्रतिषेधः प्राप्नोति ॥

न वानुदेशिकस्य प्रतिषेधादितरेण भावः ॥ ६ ॥

न वैष दोषः । किं कारणम् । आनुदेशिकस्य प्रतिषेधात् । अस्त्वत्रानुदेशिकस्य वलादित्वस्य प्रतिषेधः स्वाश्रयमत्र वलादित्वं भविष्यति ॥ नैतद्विवदामहे वलादिर्न वलादिरिति । किं तर्हि । स्थानिवद्भावात्सार्वधातुकत्वमेषितव्यं तत्रानल्विधाविति प्रतिषेधः प्राप्नोति ॥

किं पुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवत्याहोस्विदविशेषेणादेश आदेशिनि च । कश्चात्र विशेषः ।

आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः ॥ ७ ॥

आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्ध्योः प्रतिषेधो वक्तव्यः । कुर्वित्यत्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च लघूपधत्वं तत्र लघूपधगुणः प्राप्नोति* । वधकमित्यत्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं चादुपधत्वं तत्र वृद्धिः प्राप्नोति† । पिबेत्यत्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं च लघूपधत्वं तत्र गुणः प्राप्नोति‡ ॥ अस्तु तर्ह्यविशेषेणादेश आदेशिनि च ।

आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम् ॥ ८ ॥

आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानं कर्तव्यम् । सुप् । वृक्षाय प्लक्षाय । स्थानिवद्भावात्सुप्संज्ञा स्वाश्रयं च यञादित्वं तत्र प्रतिषेधः प्राप्नोति§ । सुप् ॥ तिङ् । अरुदिताम् अरुदितम् अरुदित । स्थानिवद्भावात्सार्वधातुकसंज्ञा स्वाश्रयं च वलादित्वं तत्र प्रतिषेधः प्राप्नोति¶ । तिङ् ॥ कृदतिदिष्टम् । भुवनम् सुवनम् धुवनम् । स्थानिवद्भावात्प्रत्ययसंज्ञा स्वाश्रयं चाजादित्वं तत्र प्रतिषेधः प्राप्नोति** ॥ किं पुनरत्र ज्यायः । आदेशिन्यल्याश्रीयमाणे प्रतिषेध इत्येतदेव ज्यायः । कुत एतत् । तथा ह्ययं विशिष्टं स्थानिकार्यमादेशेऽतिदिशति गुरुवद्गुरुपुत्र इति यथा । तद्यथा । गुरुवदस्मिन्गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसंग्रहणाच्चेति । यदि च गुरु-

* ६ ४।११०, ७।३।८६ † २।४।५४, ७।२।११६ ‡ ७।३।७८, ८६ § ७।१।१३, ७।३।१०२ ¶ ३।४।१०१, ७।२।७६ ** ७।१।१, ६।४।७७

पुन्नोऽपि गुरुर्भवति तदपि कर्तव्यं भवति ॥ अस्तु तर्ह्यादेशिन्यल्याश्रीयमाणे प्रतिषेधः । ननु चोक्तमादेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेध इति । नैष दोषः । करोतौ तपरकरणनिर्देशात्सिद्धम् । पिबिरदन्तः । वधकमिति नायं ण्वुल् अन्यो ऽयमकशब्दः किदौणादिको रुचक इति यथा ॥

एकदेशविकृतस्योपसंख्यानम् ॥ ९ ॥

एकदेशविकृतस्योपसंख्यानं कर्तव्यम् । किं प्रयोजनम् । पचतु पचन्तु* । तिङ्ग्रहणेन ग्रहणं यथा स्यात् ॥

एकदेशविकृतस्यानन्यत्वात्सिद्धम् ॥ १० ॥

एकदेशविकृतमनन्यवद्भवतीति तिङ्ग्रहणेन ग्रहणं भविष्यति । तद्यथा । श्वा कर्णे वा पुच्छे वा छिन्ने श्वैव भवति नाश्वो न गर्दभ इति ॥

अनित्यविज्ञानं तु तस्मादुपसंख्यानम् ॥ ११ ॥

अनित्यविज्ञानं तु भवति । नित्याः शब्दाः । नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । तत्र स एवायं विकृतश्चेत्येतन्नित्येषु नोपपद्यते । तस्मादुपसंख्यानं कर्तव्यम् ॥

भारद्वाजीयाः पठन्ति ॥ एकदेशविकृतेषूपसंख्यानम् ॥ एकदेशविकृतेषूपसंख्यानं कर्तव्यम् । किं प्रयोजनम् । पचतु पचन्तु । तिङ्ग्रहणेन ग्रहणं यथा स्यात् । किं च कारणं न स्यात् ॥ अनादेशत्वात् ॥ आदेशः स्थानिवदित्युच्यते न चेम आदेशाः ॥ रूपान्यत्वाच्च ॥ अन्यत्खल्वपि रूपं पचतीत्यन्यत्पचन्त्विति । इमेऽप्यादेशाः । कथम् । आदिश्यते यः स आदेश इमे चाप्यादिश्यन्ते ॥ आदेशः स्थानिवदिति चेन्नानाश्रितत्वात् ॥ आदेशः स्थानिवदिति चेत्तन्न । किं कारणम् । अनाश्रितत्वात् । योऽत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः । नैतन्मन्तव्यं समुदाय आश्रीयमाणेऽवयवो नाश्रीयत इति । अभ्यन्तरो हि समुदायस्यावयवः । तद्यथा । वृक्षः प्रचलन्सहावयवैः प्रचलति ॥ आश्रय इति चेदल्विधिप्रसङ्गः ॥ आश्रय इति चेदल्विधिरयं भवति तत्रानल्विधाविति प्रतिषेधः प्राप्नोति । नैष दोषः । नैव सति कश्चिदप्यनल्विधिः स्यात् । उच्यते चेदमनल्विधाविति तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो योऽल्विधिरिति । कश्च साधीयः । यत्र प्राधान्येनालाश्रीयते । तत्र नान्त-

* १ ४ ८१

ईयको ऽलाश्रीयते नासावल्विधिरिति ॥ अथवोक्तमादेशग्रहणस्य प्रयोजनमादेशमात्रं स्थानिवद्यथा स्यादिति ॥

अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात् ॥ १२ ॥

स्थान्यादेश इत्येतन्नित्येषु शब्देषु नोपपद्यते । किं कारणम् । नित्यत्वात् । स्थानी हि नाम यो भूत्वा न भवति । आदेशो हि नाम यो ऽभूत्वा भवति । एतच्च नित्येषु शब्देषु नोपपद्यते यत्सतो नाम विनाशः स्यादसतो वा प्रादुर्भाव इति ॥

सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वे ऽपि स्थानशब्दप्रयोगात् ॥ १३ ॥

सिद्धमेतत् । कथम् । यथा लौकिकेषु वैदिकेषु च कृतान्तेष्वभूतपूर्वे ऽपि स्थानशब्दो वर्तते । लोके तावदुपाध्यायस्य स्थाने शिष्य इत्युच्यते न च तत्रोपाध्यायो भूतपूर्वो भवति । वेदे ऽपि सोमस्य स्थाने पूतीकतृणान्यभिषुणुयादित्युच्यते न च तत्र सोमो भूतपूर्वो भवति ॥

कार्यविपरिणामाद्वा सिद्धम् ॥ १४ ॥

अथवा कार्यविपरिणामात्सिद्धमेतत् । किमिदं कार्यविपरिणामादिति । कार्या बुद्धिः सा विपरिणम्यते । ननु च कार्याविपरिणामादिति भवितव्यम् । सन्ति चैव ह्यौत्तरपदिकानि ह्रस्वत्वानि । अपि च बुद्धिः सम्प्रत्यय इत्यनर्थान्तरम् । कार्या बुद्धिः कार्यः सम्प्रत्ययः कार्यस्य सम्प्रत्ययस्य विपरिणामः कार्यविपरिणामः कार्यविपरिणामादिति ॥ परिहारान्तरमेवेदं मत्वा पठितं कथं चेदं परिहारान्तरं स्यात् । यदि भूतपूर्वे स्थानशब्दो वर्तते । भूतपूर्वे चापि स्थानशब्दो वर्तते । कथम् । बुद्ध्या । तद्यथा । कश्चित्कस्मैचिदुपदिशति प्राचीनं ग्रामादाम्रा इति । तस्य सर्वत्राम्रबुद्धिः प्रसक्ता । ततः पश्चादाह ये क्षीरिणो ऽवरोहवन्तः पृथुपर्णास्ते न्यग्रोधा इति । स तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते । स ततः पश्यति बुद्ध्याम्रांश्चापकृष्यमाणान्न्यग्रोधांश्चाधीयमानान् । नित्या एव च स्वस्मिन्विषय आम्रा नित्याश्च न्यग्रोधा बुद्धिस्त्वस्य विपरिणम्यते । एवमिहाप्यस्तिरस्मा अविशेषेणोपदिष्टः । तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता । सो ऽस्तेर्भूर्भवतीत्यस्तिबुद्ध्या भवतिबुद्धिं प्रतिपद्यते* । स ततः पश्यति बुद्ध्यास्तिं चापकृष्यमाणं भवतिं चाधीयमानम् । नित्य एव च स्वस्मिन्विषये ऽस्तिर्नित्यो भवतिर्बुद्धिस्त्वस्य विपरिणम्यते ॥

---

* २. ४. ५२.

अपवादप्रसङ्गस्तु स्थानिवत्त्वात् ॥ १५ ॥

अपवाद उत्सर्गकृतं च प्राप्नोति । कर्मण्यण् [३ २ १] आतोऽनुपसर्गे कः [३] इति केऽप्यणि कृत प्राप्नोति । किं कारणम् । स्थानिवत्त्वात् ॥

उक्तं वा ॥ १६ ॥

किमुक्तम् । विप्रयेण तु नानालिङ्गकरणात्सिद्धमिति* ॥ अथवा

सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् ॥ १७ ॥

सिद्धमेतत् । कथम् । षष्ठीनिर्दिष्टस्यादेशः स्थानिवदिति वक्तव्यम् । तर्त्तार्हि षष्ठीनिर्दिष्टग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । षष्ठी स्थानेयोगा [१.१.४९] इति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति नापवाद उत्सर्गकृत भवतीति यदय श्यनादीनां कांश्चिच्छितः करोति । श्यन् श्नम् श्ना श· श्नुरिति ॥

तस्य दोषस्तयादेश उभयप्रतिषेधः ॥ १८ ॥

तस्यैतस्य लक्षणस्य दोषः । तयादेश उभयप्रतिषेधो वक्तव्यः† । उभये देवमनुष्याः । तयपो ग्रहणेन ग्रहणाज्जसि विभाषा प्राप्नोति‡ ॥ नैष दोषः । अयच्प्रत्ययान्तरम् । यदि प्रत्ययान्तरमुभयीतीकारो न प्राप्नोति । मा भूदेवम् । मात्रजित्येवं भविष्यति§ । कथम् । मात्रजिति नेदं प्रत्ययग्रहणम् । किं तर्हि । प्रत्याहारग्रहणम् । क्व संनिविष्टानां प्रत्याहारः । मात्रशब्दात्प्रभृत्यायचश्चकारात्¶ । यदि प्रत्याहारग्रहणं कति तिष्ठन्ति अत्रापि प्राप्नोति । अत इति वर्तते** । एवमपि तैलमात्रा घृतमात्रा अत्रापि प्राप्नोति । सदृशस्याप्यसंनिविष्टस्य न भवति प्रत्याहारग्रहणेन ग्रहणम् ॥

जात्याख्यायां वचनातिदेशे स्थानिवद्भावप्रतिषेधः ॥ १९ ॥

जात्याख्यायां वचनातिदेशे†† स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः । व्रीहिभ्य आगत इत्यत्र घेर्ङिति [७ ३.१११] इति गुणः प्राप्नोति ॥ नैष दोषः । उक्तमेतत् । अर्थातिदेशात्सिद्धमिति‡‡ ॥

ल्यब्ग्रहणे ऽदीर्घः ॥ २० ॥

ल्यब्ग्रहणे ऽदीर्घ आदेशो न स्थानिवदिति वक्तव्यम् । किं प्रयोजनम् ।

* विभा० १० † ५.२.४४ ‡ १.१ ३३ § ५.२.३७ ¶ ५.२.११०-११. ** ५.१.४
†† १.२ ५८ ‡‡ १.२ ५८

निष्कौशाम्बिः अतिखट्वः । ङ्याब्ग्रहणेन ग्रहणात्सुलोपो मा भूदिति* । ननु च दीर्घादित्युच्यते । तन्न वक्तव्यं भवति । किं पुनरत्र ज्यायः । स्थानिवत्प्रतिषेध एव ज्यायान् । इदमपि सिद्धं भवति । अतिखट्वाय अतिमालाय । याडापः [७.३.११३] इति याण्न भवति । अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते पिप्पासौ भूतपूर्व इति कृत्वा याडाप इति याट् कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीं सत्यपि स्थानिवद्भाव एतया परिभाषया शक्यमिहोपस्थातुम् । नेत्याह । न हीदानीं क्वचिदपि स्थानिवद्भावः स्यात् ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । प्रश्लिष्टनिर्देशात्सिद्धम् । प्रश्लिष्टनिर्देशोऽयम् । ङी ई ईकारान्तात् आ आप् आकारान्तादिति ॥

आहिभुवोरीट्प्रतिषेधः ॥ २१ ॥

आहिभुवोरीटः प्रतिषेधो वक्तव्यः । आत्थ अभूत्‡ । अस्तिब्रूग्रहणेन ग्रहणादीट् प्राप्नोति§ ॥ आहेस्तावन्न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति नाहेरीड् भवतीति यदयमाहस्थः [८.२.३५] इति झलादिप्रकरणे थत्वं शास्ति । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । भूतपूर्वगतिर्यथा विज्ञायेत । झलादिर्यो भूतपूर्व इति । यद्येवं थवचनमनर्थकं स्यात् । आथिमेवायमुच्चारयेत् । पुनः पञ्चानामादित आथो ब्रुव इति । भवतेश्चापि न वक्तव्यः । अस्तिसिचोऽपृक्ते [७.३.९६] इति द्विसकारको निर्देशः । अस्तेः सकारान्तादिति ॥

वध्यादेशे वृद्धितत्त्वप्रतिषेधः ॥ २२ ॥

वध्यादेशे वृद्धितत्त्वयोः प्रतिषेधो वक्तव्यः । वधकं पुष्करमिति¶ । स्थानिवद्भावाद्वृद्धितत्त्वे प्राप्नुतः** ॥ नैष दोषः । उक्तमेतत् । नायं ण्वुल् अन्यो ऽयमक-शब्दः क्रिदौणादिको रनक इति यथा ॥

इड्विधिश्च ॥ २३ ॥

इड्विधेयः । आवधिषीष्ट†† । एकाच उपदेशे ऽनुदात्तात् [७.२.१०] इति प्रतिषेधः प्राप्नोति ॥ नैष दोषः । आद्युदात्तनिपातनं करिष्यते । स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति । एवमप्युपदेशिवद्भावो वक्तव्यः । यथैव हि निपातनस्वरः प्रकृतिस्वरं बाधत एवं प्रत्ययस्वरमपि बाधेत । आवधिषीष्टेति । नैव

---

* ११ ४८, ६६ ६८ † ७३ २०१ ‡ ३.४.८४, २४ ५१ § ७३ ६६, ६६. ¶ २४. ५४७.
** ७२ १९५ ७१. ३२ †† २.८. ४१.

दोषः । आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो भविष्यति ॥

आकारान्तान्नुक्षुक्प्रतिषेधः ॥ २४ ॥

आकारान्तानुक्षुकोः प्रतिषेधो वक्तव्यः । विलापयति भापयते* । लीभीग्रहणेन ग्रहणान्नुक्षुकौ प्राप्नुतः† ॥ लीभियोः प्रश्लिष्टनिर्देशात्सिद्धम् । लीभियोः प्रश्लिष्टनिर्देशोऽयम् । ली ई ईकारान्तस्य । भी ई ईकारान्तस्य चेति ॥

लोडादेशे शाभावजभावधित्वहिलोपैत्त्वप्रतिषेधः ॥ २५ ॥

लोडादेश एषां प्रतिषेधो वक्तव्यः । शिष्टात् हतात् भिन्तात् कुरुतात् स्तात्‡ ॥ लोडादेशे कृते शाभावो जभावो धित्वं हिलोप एत्त्वमित्येते विधयः प्राप्नुवन्ति§ ॥ नैष दोषः । इदमिह संप्रधार्यम् । लोडादेशः क्रियतामेते विधय इति किमत्र कर्तव्यम् । परत्वाल्लोडादेशः । अथेदानीं लोडादेशे कृते पुनःप्रसङ्गविज्ञानात्कस्मादेते विधयो न भवन्ति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा ॥

त्रयादेशे स्रन्तप्रतिषेधः ॥ २६ ॥

त्रयादेशे स्रन्तस्य प्रतिषेधो वक्तव्यः । तिसृणाम् । तिसृभावे¶ कृते त्रेस्त्रयः [७.१.५३] इति त्रयादेशः प्राप्नोति ॥ नैष दोषः । इदमिह संप्रधार्यम् । तिसृभावः क्रियतां त्रयादेश इति किमत्र कर्तव्यम् । परत्वात्तिसृभावः । अथेदानीं तिसृभावे कृते पुनःप्रसङ्गविज्ञानात्त्रयादेशः कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

आम्विधौ च ॥ २७ ॥

आम्विधौ च स्रन्तस्य प्रतिषेधो वक्तव्यः । चतस्रस्तिष्ठन्ति । चतसृभावे कृते चतुरनडुहोरामुदात्तः [७.१.९८] इत्याम्प्राप्नोति ॥ नैष दोषः । इदमिह संप्रधार्यम् । चतसृभावः क्रियतां चतुरनडुहोरामुदात्त इत्यामिति किमत्र कर्तव्यम् । परत्वाच्चतसृभावः । अथेदानीं चतसृभावे कृते पुनःप्रसङ्गविज्ञानादाम्कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

---

* [illegible] † [illegible] ‡ [illegible] § [illegible] ¶ [illegible]

स्वरे वस्वादेशे ॥ २८ ॥

स्वरे वस्वादेशे प्रतिषेधो वक्तव्यः । विदुषः* पश्य । शतुरनुमो नद्यजादी अन्तोदात्तादित्येष स्वरः† प्राप्नोति ॥ नैष दोषः । अनुम इति प्रतिषेधो भविष्यति । अनुम इत्युच्यते न चात्र नुमं पश्यामः । अनुम इति नेदमागमग्रहणम् । किं तर्हि । प्रत्याहारग्रहणम् । क संनिविष्टानां प्रत्याहारः । उकारात्प्रभृत्या नुमो मकारात्‡ । यदि प्रत्याहारग्रहणं लुनता पुनता अत्रापि प्राप्नोति§ । अनुम्ग्रहणेन न शत्रन्तं विशेष्यते । किं तर्हि । शतैव विशेष्यते शता यो ऽनुम्क इति । अवश्यं चैतदेवं विज्ञेयम् । आगमग्रहणे हि सतीह प्रसज्येत । मुञ्चता मुञ्चत इति¶ ॥

गोः पूर्वणित्त्वात्वस्वरेषु ॥ २९ ॥

गोः पूर्वणित्त्वात्वस्वरेषु प्रतिषेधो वक्तव्यः । चित्रग्वग्रम् शबलग्वग्रम्** । सर्वत्र विभाषा गोः [६ १ १२२] इति विभाषा पूर्वत्वं प्राप्नोति ॥ नैष दोषः । एङ इति वर्तते†† तत्रानल्विधाविति प्रतिषेधो भविष्यति । एवमपि हे चित्रगो अग्रम् अत्र प्राप्नोति ॥ णित्त्वम् । चित्रगुः चित्रगू चित्रगवः । गोतो णित् [७ १ ९०] इति णित्त्वं प्राप्नोति ॥ आत्वम् । चित्रगु पश्य । शबलगु पश्य । आ ओत इत्यात्वं प्राप्नोति‡‡ ॥ नैष दोषः । तपरकरणात्सिद्धम् । तपरकरणसामर्थ्याण्णित्त्वात्वे न भविष्यतः ॥ स्वरः । बहुगुमान् । न गोश्वन्साववर्ण [६ १.१८२] इति प्रतिषेधः प्राप्नोति ॥

करोतिपिब्योः प्रतिषेधः ॥ ३० ॥

करोतिपिब्योः प्रतिषेधो वक्तव्यः । कुरु पिबेति । स्थानिवद्भावाल्लघूपधगुणः प्राप्नोति§§ ॥

उक्तं वा ॥ ३१ ॥

किमुक्तम् । करोतौ तपरकरणनिर्देशात्सिद्धं पिबिरदन्त इति¶¶ ॥

अचः परस्मिन्पूर्वविधौ ॥ १ । १ । ५७ ॥

अच इति किमर्थम् । प्रश्नः । धूत्वा । आक्राष्टाम् । आगत्य ॥ प्रश्नः विश्न इत्यत्र छकारस्य शकारः*** परनिमित्तकः । तस्य स्थानिवद्भावाच्छे च [६.१.७३] इति

* ७ १ ११ † ६ १ १७१ ‡ ६ १ ७९ ७ १ ५८ § ६ १ ८९ ¶ ७ १ ५९ ** १ १ ४८ †† १ १ १०९ ‡‡ ६ १ ९३ §§ ६ ४ ११०, ७ ३ ७८, ८६ ¶¶ १ १ ५६ *** ६ ४ १९

तुक्प्राप्नोति । अच इति वचनान्न भवति । नैतदस्ति प्रयोजनम् । क्रियमाणे ऽपि वा अज्ग्रहणे ऽवश्यमत्र तुगभावे यत्नः कर्तव्यः । अन्तरङ्गत्वाद्धि तुक्प्राप्नोति ॥ इदं तर्हि । द्यूत्वा स्यूत्वा । वकारस्य ऊठ् परनिमित्तकः । तस्य स्थानिवद्भावादचीति यणादेशो* न प्राप्नोति । अच इति वचनाद्भवति । एतदपि नास्ति प्रयोजनम् । स्वाश्रयमत्राच्त्वं भविष्यति । अथवा यो ऽत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः ॥ इदं तर्हि प्रयोजनम् । आक्राष्टाम् । सिचो लोपः† परनिमित्तकः । तस्य स्थानिवद्भावात्षढोः कः सि [८.२.४१] इति कत्वं प्राप्नोति । अच इति वचनान्न भवति । एतदपि नास्ति प्रयोजनम् । वक्ष्यत्येतत् । पूर्वत्रासिद्धे न स्थानिवदिति‡ ॥ इदं तर्हि प्रयोजनम् । आगत्य अभिगत्य । अनुनासिकलोपः परनिमित्तकः । तस्य स्थानिवद्भावाद्ध्रस्वस्येति तुग्न प्राप्नोति§ । अच इति वचनाद्भवति ॥

अथ परस्मिन्निति किमर्थम् । युवजानिः । द्विपदिका । वैयाघ्रपद्यः । आदीध्ये ॥ युवजानिः वधूजानिरिति जायाया निङ् [५.४.१३४] न परनिमित्तकः । तस्य स्थानिवद्भावाद्वलीति यलोपो¶ न प्राप्नोति । परस्मिन्निति वचनाद्भवति । नैतदस्ति प्रयोजनम् । स्वाश्रयमत्र वल्त्वं भविष्यति । अथवा यो ऽत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः ॥ इदं तर्हि प्रयोजनम् । द्विपदिका त्रिपदिका । पादस्य लोपो न परनिमित्तकः । तस्य स्थानिवद्भावात्पद्भावो न प्राप्नोति** । परस्मिन्निति वचनाद्भवति । एतदपि नास्ति प्रयोजनम् । पुनर्लोपवचनसामर्थ्यात्स्थानिवद्भावो न भविष्यति†† ॥ इदं तर्हि प्रयोजनम् । वैयाघ्रपद्यः‡‡ । ननु चात्रापि पुनर्वचनसामर्थ्यादेव न भविष्यति । अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनम् । किम् । यत्र भसंज्ञा न । व्याघ्रपात् श्येनपादिति ॥ इदं चाप्युदाहरणम् । आदीध्ये आवेव्ये । इकारस्यैकारो§§ न परनिमित्तकः । तस्य स्थानिवद्भावाद्यीवर्णयोर्दीधीवेव्योः [७.४.५३] इति लोपः प्राप्नोति । परस्मिन्निति वचनान्न भवति ॥

अथ पूर्वविधाविति किमर्थम् । हे गौः । बाभ्रवीयाः । नैधेयः ॥ हे गौरित्यौकारः¶¶ परनिमित्तकः । तस्य स्थानिवद्भावादेङ्ह्रस्वात्संबुद्धेः [६.१.६९] इति लोपः प्राप्नोति । पूर्वविधाविति वचनान्न भवति । नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति न संबुद्धिलोपे स्थानिवद्भावो भवतीति यदयमेङ्ह्रस्वात्संबुद्धेरित्येङ्ग्रहणं करोति । नैतदस्ति ज्ञापकम् । गोऽर्थमेतत्स्यात् । यत्तर्हि मत्याहारग्रहणं

* ६.४.१९, ६.१.७७. † ८.२.२६. ‡ १.१.५८. § ६.४.३७; ६.१.७१. ¶ ६.१.६६.
** ५.४.१; ५.४.१४०. †† ६.४.१४८, ५.४.१. ‡‡ ५.४.११८ ४.१. १०५, ६.४.१३०, ७.३.३.
§§ ७.३.४. ¶¶ ७.१.९०.

करोति । इतरथा ह्योह्रस्वादित्येव ब्रूयात् ॥ इदं तर्हि प्रयोजनम् । बाभ्रवीयाः माधवीयाः*। वान्तादेशः परनिमित्तकः । तस्य स्थानिवद्भावाद्धलस्तद्धितस्य [६.४.१५०] इति यलोपो न प्राप्नोति । पूर्वविधाविति वचनाद्भवति । एतदपि नास्ति प्रयोजनम् । स्वाश्रयमत्र हल्त्वं भविष्यति । अथवा यो ऽत्रादेशो नासावाश्रीयते यथाश्रीयते नासावादेशः ॥ इदं तर्हि प्रयोजनम् । नैधेयः† । आकारलोपः परनिमित्तकः । तस्य स्थानिवद्भावाद्द्व्यज्लक्षणो ढग्न प्राप्नोति । पूर्वविधाविति वचनाद्भवति ॥

अथ विधिग्रहणं किमर्थम् । सर्वविभक्त्यन्तः समासो यथा विज्ञायेत । पूर्वस्य विधिः पूर्वविधिः । पूर्वस्माद्विधिः पूर्वविधिरिति । कानि पुनः पूर्वस्माद्विधौ स्थानिवद्भावस्य प्रयोजनानि । बेभिदिता । माथितिकः । अपीपचन् ॥ बेभिदिता चेच्छिदितेत्यकारलोपे कृत एकाज्लक्षण इट्प्रतिषेधः प्राप्नोति‡ । स्थानिवद्भावान्न भवति ॥ माथितिक इत्यकारलोपे कृते ऽतान्तात्क§ इति कादेशः प्राप्नोति । स्थानिवद्भावान्न भवति ॥ अपीपचन्नित्येकादेशे कृते ऽभ्यस्ताज्झेर्जुस्भवतीति जुस्भावः प्राप्नोति** । स्थानिवद्भावान्न भवति ॥ नैतानि सन्ति प्रयोजनानि । कुतः । प्रातिपदिकनिर्देशो ऽयं प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति । तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा साश्रयितव्या ॥ इदं तर्हि प्रयोजनं विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायामपि प्रकृतौ । वाय्वोः अध्वर्य्वोः†† लोपो व्योर्वलि [६.१ ६६] इति यलोपो मा भूदिति ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

अपरविधाविति तु वक्तव्यम् । किं प्रयोजनम् । स्वविधावपि स्थानिवद्भावो यथा स्यात् । कानि पुनः स्वविधौ स्थानिवद्भावस्य प्रयोजनानि । आयन् आसन् । धिन्वन्ति कृण्वन्ति । दध्यत्र मध्वत्र । चक्रतुः चक्रुः ॥ इह तावदायन् आसन्निति णस्त्योर्यण्लोपयोः‡‡ कृतयोरनजादित्वादाडजादीनाम् [६ ४.७२] इत्याण्न प्राप्नोति । स्थानिवद्भावाद्भवति ॥ धिन्वन्ति कृण्वन्तीति यणादेशे कृते वलादिलक्षण इट् प्राप्नोति§§ । स्थानिवद्भावान्न भवति ॥ दध्यत्र मध्वत्रेति यणादेशे कृते संयोगान्तलोपः प्राप्नोति¶¶ । स्थानिवद्भावान्न भवति ॥ चक्रतुः चक्रुरित्यत्र यणादेशे कृते ऽनच्त्वाद्द्विर्वचनं न प्राप्नोति*** । स्थानिवद्भावाद्भवति ॥ यदि तर्हि स्वविधावपि स्थानिवद्भावो भवति

* ४.१ १०६, ७.२ ११७, ६.४ १४६, ६.१. ७८, ४.१ ११४, ६.४ १४८, १६१
† ३.१ ९२, ६.४ ६४ २.२ १८ ४.१ १२२ ‡ ६.४ ४८, ७.२ १०
§ ४.४ ९१, ७.१ ९०, ६.४ १४८. ¶ ७.१.९१ ** ६.१ ९७ १.४ १०९ †† ६.१ ७७
‡‡ ६.४ ८१, १११. §§ ६.१. ७७, ७.२. ३६. ¶¶ ६.१ ७७ ८.२ २३ *** ६.१ ७७, १.

द्राभ्याम् देयम् लवनम् अत्रापि प्राप्नोति । द्राभ्यामित्यत्रात्वस्य स्थानिवद्भावाद्दीर्घत्वं न प्राप्नोति[*] । देयमितीत्वस्य स्थानिवद्भावाद्गुणो न प्राप्नोति[†] । लवनमिति गुणस्य स्थानिवद्भावादवादेशो न प्राप्नोति[‡] ॥ नैष दोषः । स्वाश्रया अत्रैते विधयो भविष्यन्ति ॥ तर्हि वक्तव्यमपरविधाविति । न वक्तव्यम् । पूर्वविधावित्येव सिद्धम् । कथम् । न पूर्वग्रहणेनादेशो ऽभिसंबध्यते । अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति । कुतः पूर्वस्य । आदेशादिति । किं तर्हि । निमित्तमभिसंबध्यते । अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति । कुतः पूर्वस्य । निमित्तादिति । अथ निमित्ते ऽभिसंबध्यमाने यत्तदस्य योगस्य मूर्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति । किं पुनस्तत् । पट्व्या मृद्व्येति[§] । बाढं संगृहीतम् । ननु चेकारयणा व्यवहितत्वान्नासौ निमित्तात्पूर्वो भवति । व्यवहिते ऽपि पूर्वशब्दो वर्तते । तद्यथा । पूर्वं मथुरायाः पाटलिपुत्रमिति ॥ अथवा पुनरस्त्वादेश एवाभिसंबध्यते । कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानि । नैतानि सन्ति । इह तावदायन् आसन् धिन्वन्ति कृण्वन्तीति । अयं विधिशब्दो ऽस्त्येव कर्मसाधनो विधीयते विधिरिति । अस्ति भावसाधनो विधानं विधिरिति । तत्र कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं संगृहीतमिति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते । पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्यादिति स्थानिवद्भवतीत्येवमाड् भविष्यतीट् च न भविष्यति ॥ दध्यत्र मध्वत्र चक्रतुः चक्रुरिति परिहारं वक्ष्यति[¶] ॥

कानि पुनरस्य योगस्य प्रयोजनानि ।

स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वोभूते शातनीं पातनीं च ।
नेतारावागच्छतं धारणिं रावणिं च ततः पश्चात्स्रंस्यते ध्वंस्यते च ॥

इह तावत्पादिकम् औदवाहिम् शातनीम् पातनीम् धारणिम् रावणिमित्यकारलोपे कृते[**] पद्भाव ऊठ्ल्लोपटिलोप इत्येते विधयः[††] प्राप्नुवन्ति । स्थानिवद्भावान्न भवन्ति । स्रंस्यते ध्वंस्यते । णिलोपे कृते[‡‡] ऽनिदितां हल उपधायाः क्ङिति [६.४.२४] इति नलोपः प्राप्नोति । स्थानिवद्भावान्न भवति ॥ नैतानि सन्ति प्रयोजनानि । असिद्धवदत्रा भात् [६.४.२२] इत्यनेनाप्येतानि सिद्धानि ॥ इदं तर्हि प्रयोजनम् । याज्यते वाप्यते । णिलोपे कृते[‡‡] यजादीनां किति [६.१.१५] इति संप्रसारणं प्राप्नोति । स्थानिवद्भावान्न भवति । एतदपि नास्ति प्रयोजनम् । यजादिभिरत्र कितं वि-

* [illegible] † [illegible] ‡ [illegible] § [illegible]
¶ [illegible] ** [illegible] †† [illegible] ‡‡ [illegible]

शेषयिष्यामो यजादीनां यः किदिति। कथं यजादीनां कित्। यजादिभ्यो यो विहित इति। न चायं यजादिभ्यो विहितः॥ इदं तर्हि प्रयोजनम्। पट्व्या मृद्व्येति। परस्य यणादेशे कृते पूर्वस्य न प्राप्नोतीकारयणा व्यवहितत्वात्। स्थानिवद्भावाद्भवति। किं पुनः कारणं परस्य तावद्भवति न पुनः पूर्वस्य। नित्यत्वात्। नित्यः परयणादेशः कृतेऽपि पूर्वयणादेशे प्राप्नोत्यकृतेऽपि प्राप्नोति। नित्यत्वात्परयणादेशे कृते पूर्वस्य न प्राप्नोति। स्थानिवद्भावाद्भवति॥ एतदपि नास्ति प्रयोजनम्। असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य परयणादेशस्यान्तरङ्गलक्षणः पूर्वयणादेशो भविष्यति। अवश्यं चैषा परिभाषाश्रयितव्या स्वरार्थम्। कर्त्र्यौ हर्त्र्यौ। उदात्तयणो हल्पूर्वात् [६.१.१७४] इत्येष स्वरो यथा स्यात्। अनेनापि सिद्धः स्वरः। कथम्।

आरभ्यमाणे नित्योऽसौ

आरभ्यमाणेऽस्मिन्योगे नित्यः पूर्वयणादेशः। कृतेऽपि परयणादेशे प्राप्नोत्यकृतेऽपि॥ परयणादेशोऽपि नित्यः। कृतेऽपि पूर्वयणादेशे प्राप्नोत्यकृतेऽपि।

परश्चासौ व्यवस्थया।

व्यवस्थया चासौ परः॥

युगपत्संभवो नास्ति

न चास्ति यौगपद्येन संभवः॥ कथं न सिध्यति।

बहिरङ्गेण सिध्यति॥

असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इत्यनेन सिध्यति॥ एवं तर्हि योऽत्रोदात्तयणन्तदाश्रयः स्वरो भविष्यति। ईकारयणा व्यवहितत्वान्न प्राप्नोति। स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीति नास्ति व्यवधानम्। सा तर्ह्येषा परिभाषा कर्तव्या। ननु चेयमपि कर्तव्यासिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति। बहुप्रयोजनैषा परिभाषा। अवश्यमेषा कर्तव्या। सा चाप्येषा लोकतः सिद्धा। कथम्। प्रत्यङ्गवर्ती लोको लक्ष्यते। तद्यथा। पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्करोति ततः सुहृदां ततः संबन्धिनाम्। प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेऽर्थे वर्तते। सामान्ये वर्तमानस्य व्यक्तिरुपजायते। व्यक्तस्य सतो लिङ्गसंख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भवति। यथैव चानुपूर्व्यार्थानां प्रादुर्भावस्तथैव शब्दानामपि तद्वत्कार्येणापि भवितव्यम्॥ इमानि तर्हि प्रयोजनानि। पचति

अवधीत् बहुखट्वकः ॥ पटयति लघयतीति टिलोपे कृते* अत उपधायाः [७.२.११६] इति वृद्धिः प्राप्नोति । स्थानिवद्भावान्न भवति ॥ अवधीदित्यकारलोपे कृते† अतो हलादेर्लघोः [७.२.७] इति विभाषा वृद्धिः प्राप्नोति । स्थानिवद्भावान्न भवति ॥ बहुखट्वक इत्यापो ऽन्यतरस्याम् [७.४.१५] इति ह्रस्वत्वे कृते ह्रस्वान्ते ऽन्त्यात्पूर्वम् [६.२.१७४] इत्येष स्वरः प्राप्नोति । स्थानिवद्भावान्न भवति ॥

इह वैयाकरणः सौवश्व‡ इति य्वोः§ स्थानिवद्भावादायावौ¶ प्राप्नुतस्तयोः प्रतिषेधो वक्तव्यः ।

अचः पूर्वविज्ञानादैचोः सिद्धम् ॥ १ ॥

यो ऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भाव आदिष्टाच्चैषो ऽचः पूर्वः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अच इति पञ्चमी । अचः पूर्वस्य । यद्येवमादेशो ऽविशेषितो भवति । आदेशश्च विशेषितः । कथम् । न ब्रूमो यत्षष्ठीनिर्दिष्टमज्ग्रहणं तत्पञ्चमीनिर्दिष्टं कर्तव्यमिति । किं तर्ह्यन्यत्कर्तव्यम् । अन्यच्च न कर्तव्यम् । यदेवादः षष्ठीनिर्दिष्टमज्ग्रहणं तस्य दिक्शब्दैर्योगे** पञ्चमी भवति । अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति । कुतः पूर्वस्य । अच इति । तद्यथा । आदेशः प्रथमानिर्दिष्टः । तस्य दिक्शब्दैर्योगे पञ्चमी भवति । अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति । कुतः पूर्वस्य । आदेशादिति ॥

तत्रादेशलक्षणप्रतिषेधः ॥ २ ॥

तत्रादेशलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । वार्य्योः अध्वर्य्वोः§ । लोपो व्योर्वलि [६.१.६६] इति यलोपः प्राप्नोति ॥ असिद्धवचनात्सिद्धम् । अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम् ।

असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः ॥ ३ ॥

असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः । पट्व्या मृद्व्येति ॥ ननु चैतदप्यसिद्धवचनात्सिद्धम् ।

असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः ॥ ४ ॥

असिद्धवचनात्सिद्धमिति चेन्नैतत् । किं कारणम् । नान्यस्यासिद्धवचनादन्यस्य

[illegible]

भावः । न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति । न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति ॥

तस्मात्स्थानिवद्वचनमसिद्धत्वं च ॥ ५ ॥

तस्मात्स्थानिवद्भावो वक्तव्यो ऽसिद्धत्वं च । पट्व्या मृद्व्येत्यत्र स्थानिवद्भावः । वाय्वोः अध्वर्य्वोरित्यसिद्धत्वम् ॥

उक्तं वा ॥ ६ ॥

किमुक्तम् । स्थानिवद्वचनानर्थक्यं शास्त्रासिद्धत्वादिति* । विषम उपन्यासः । युक्तं तत्र यदेकादेशशास्त्रं तुक्शास्त्रे ऽसिद्धं स्यात् । अन्यदन्यस्मिन् । इह पुनरयुक्तम् । कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात् । तदेव चापि तस्मिन्नसिद्धं भवति । वक्ष्यति ह्याचार्यः । चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वादिति† । चिणो लुक् चिणो लुक्येवासिद्धो भवति ॥

काममतिदिश्यतां वा सच्चासच्चापि नेह भारो ऽस्ति ।
कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि ॥

अथवा वतिनिर्देशो ऽयं कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा । उशीनरवन्मद्रेषु यवाः । सन्ति न सन्तीति । मातृवदस्याः कलाः । सन्ति न सन्तीति । एवमिहापि स्थानिवद्भवति स्थानिवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे । इह तावत्पट्व्या मृद्व्येति यथा स्थानिनि यणादेशो भवत्येवमादेशेऽपि भवति । इहेदानीं वाय्वोः अध्वर्य्वोरिति यथा स्थानिनि यलोपो न भवत्येवमादेशे ऽपि न भवति ॥

किं पुनरनन्तरस्य विधिं प्रति स्थानिवद्भाव आहोस्वित्पूर्वमात्रस्य । कश्चात्र विशेषः ।

अनन्तरस्य चेदेकाननुदात्तद्विगुस्वरगतिनिघातेपूपसंख्यानम् ॥ ७ ॥

अनन्तरस्येति चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानं कर्तव्यम् ॥ एकाननुदात्त । लुनीह्यत्र पुनीह्यत्र‡ । अनुदात्तं पदमेकवर्जम् [६.१.१५८] इत्येष स्वरो न प्राप्नोति ॥ द्विगुस्वर । पञ्चारत्यः दशारत्यः । इगन्तकाल [६.२.२९] इत्येष स्वरो न प्राप्नोति ॥ गतिनिघात । यत्प्रलुनीह्यत्र यत्प्रपुनीह्यत्र । तिङि चोदात्तवति [८.१.७१] इत्येष स्वरो न प्राप्नोति ॥ अस्तु तर्हि पूर्वमात्रस्य ।

* ६.१.८८ † ६.४.१०४ ‡ १.१.६२.१.७७

पूर्वमात्रस्येति चेदुपधाह्रस्वत्वम् ॥ ८ ॥

पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यम् । वादितवन्त प्रयोजितवान् अवीवद-द्वीणां परिवादकेन । किं पुनः कारणं न सिध्यति । यो ऽसौ णौ णिर्लुप्यते* तस्य स्थानिवद्भावाद्ध्रस्वत्वं† न प्राप्नोति ॥

गुरुसंज्ञा च ॥ ९ ॥

गुरुसंज्ञा च न सिध्यति । श्लेष्माघ्न पित्तघ्न दाध्यश्व माध्वश्व‡ । हलोऽन-न्तराः संयोगः [१.१.७] इति संयोगसंज्ञा संयोगे गुरु [१.४.११] इति गुरुसंज्ञा गुरोरिति प्लुतो न प्राप्नोति§ । ननु च यस्याप्यनन्तरस्य विधिं प्रति स्थानिवद्भाव-स्तस्याप्यनन्तरलक्षणो विधिः संयोगसंज्ञा विधेया ॥

न वा संयोगस्यापूर्वविधित्वात् ॥ १० ॥

न वैष दोषः । किं कारणम् । संयोगस्यापूर्वविधित्वात् । न पूर्वविधिः संयोगः । किं तर्हि । पूर्वपरविधिः संयोगः ॥

एकादेशस्योपसंख्यानम् ॥ ११ ॥

एकादेशस्योपसंख्यानं कर्तव्यम् । श्रायसौ गोमतौ चातुरौ आनडुहौ पादे उद-वाहे । एकादेशे कृते¶ नुमामौ पद्भाव ऊडित्येते विधयः प्राप्नुवन्ति** ॥ किं पुनः कारणं न सिध्यति ।

उभयनिमित्तत्वात् ॥ १२ ॥

अजादेशः परनिमित्तक इत्युच्यत उभयनिमित्तश्चायम् ॥

उभयादेशत्वाच्च ॥ १३ ॥

अच आदेश इत्युच्यते ऽचोश्चायमादेशः ॥ नैष दोषः । यत्तावदुच्यत उभय-निमित्तत्वादिति । इह यस्य ग्रामे नगरे वानेकं कार्यं भवति शक्नोत्यसौ ततो ऽन्य-तरव्यपदेष्टुम् । तद्यथा । गुरुनिमित्तं वसामः । अध्ययननिमित्तं वसाम इति ॥ यदप्युच्यत उभयादेशत्वाच्चेति । इह यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति लभते ऽसावन्यतरतो व्यपदेशम् । तद्यथा । देवदत्तस्य पुत्रः । देवदत्तायाः पुत्र इति ॥

* ६.४.९१ † ७.४.१ ‡ ६.४.४८, ६.१.७७ § ८.२.८६ ¶ ६.१.८८, ८७
** ७.१.७०, ९८ ६.४ १३० ११०

अथ हल्चोरादेशः स्थानिवद्भवत्युताहो न । कश्चात्र विशेषः ।

हल्चोरादेशे स्थानिवदिति चेद्दिशतेस्तिलोप एकादेशः ॥ १४ ॥

हल्चोरादेशः स्थानिवदिति चेद्दिशतेस्तिलोपे* एकादेशो† वक्तव्यः । विशकः विशः शनम् विशः ॥

स्थूलादीनां यणादिलोपे ऽवादेशः ॥ १५ ॥

स्थूलादीनां यणादिलोपे कृते‡ ऽवादेशो§ वक्तव्यः । स्थवीयान् दवीयान् ॥

केकयमित्रय्वोरियादेश एत्वम् ॥ १६ ॥

केकयमित्रय्वोरियादेशे¶ एत्वं न सिध्यति । कैकेयः मैत्रेयः । अचीत्येत्वं** न सिध्यति ॥

उत्तरपदलोपे च ॥ १७ ॥

उत्तरपदलोपे च दोषो भवति । दध्युपसिक्ताः सक्तवो दधिसक्तवः†† । अचीति यणादेशः प्राप्नोति‡‡ ॥

यङ्लोपे यणियङुवङः ॥ १८ ॥

यङ्लोपे§§ यणियङुवङो न सिध्यन्ति । नेन्यः नेन्यः नेक्षियः चेक्रियः लोलुवः पोपुवः । अचीति यणियङुवङो¶¶ न सिध्यन्ति ॥ अस्तु तर्हि न स्थानिवत् ॥

अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः ॥ १९ ॥

अस्थानिवत्त्वे यङ्लोपे गुणवृद्ध्योः*** प्रतिषेधो वक्तव्यः । लोलुवः पोपुवः सरीसृपः मरीमृजः इति ॥ नैष दोषः । न धातुलोप आर्धधातुके [१ १ ४] इति प्रतिषेधो भविष्यति ॥

किं पुनराश्रीयमाणायां प्रकृतौ स्थानिवद्भवत्याहोस्विदविशेषेण । कश्चात्र विशेषः ।

अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः ॥ २० ॥

अविशेषेण स्थानिवदिति चेल्लोपयणादेशयोर्गुरुविधिर्न सिध्यति । श्लेष्माघ्न पित्तघ्न दाध्यश्वः माध्वश्वः††† । हलो ऽनन्तराः संयोगः [१ १ ७] इति संयोगसंज्ञा संयोगे गुरु [१ ४ ११] इति गुरुसंज्ञा गुरोरिति प्लुतो न प्राप्नोति‡‡‡ ॥

---

* ६१ ३४ ६१ ४६ ४८ ६४ १४१ † ६१ ९० ‡ ६४ १५१ § ६१ ७८ ¶ ७ ३ २
** ६१ ८० †† १११४* ‡‡ ६१ ७० §§ २ ४ ७४ ¶¶ ६४ ८१ ७४
*** ७४ ८४ ८५ ७२ ११४ ††† ६४ ७८ ६१ ७३ ‡‡‡ ८२ ८१

द्विर्वचनादयश्च प्रतिषेधे ॥ २१ ॥

द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः । द्विर्वचनवरेयलोपेति* ॥

क्सलोपे लुग्वचनम् ॥ २२ ॥

क्सलोपे† लुग्वक्तव्य. । अदुग्ध अदुग्धा· । लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये [७ ३ ७३] इति ॥

हन्तेर्घत्वम् ॥ २३ ॥

हन्तेश्च घत्व वक्तव्यम् । घ्नन्ति घ्नन्तु अघ्नन्‡ ॥ अस्तु तर्ह्याश्रीयमाणायां प्रकृताविति ।

ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः ॥ २४ ॥

ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशस्य प्रतिषेधो वक्तव्य । निराद्य समाद्य§ । अदो जग्धिर्ल्यप्ति किति [२ ४ ३६] इति जग्धिभावः प्राप्नोति ॥

यणादेशे युलोपेत्वानुनासिकात्त्वप्रतिषेध· ॥ २५ ॥

यणादेशे¶ युलोपेत्वानुनासिकात्त्वानां प्रतिषेधो वक्तव्यः ॥ यलोप । वाय्वोः अध्वर्य्वोः । लोपो व्योर्वलि [६ १ ६६] इति यलोप· प्राप्नोति ॥ उलोप । अकुर्वि आशाम् अकुर्व्याशाम् । नित्य करोतेर्ये च [६ ४ १०८,१०९] इत्युकारलोपः प्राप्नोति ॥ ईत्व । अलुनि आशाम् अलुन्याशाम् । ई हल्यघोः [६.४ ११३] इतीत्व प्राप्नोति ॥ अनुनासिकात्त्व । अजज्ञि आशाम् अजज्ञ्याशाम् । ये विभाषा [६ ४.४३] इत्यनुनासिकात्त्व प्राप्नोति ॥

रायात्वप्रतिषेधश्च ॥ २६ ॥

राय आत्वस्य च प्रतिषेधो वक्तव्य· । रायि आशाम् राय्याशाम् । रायो हलि [७.२.८५] इत्यात्व प्राप्नोति ॥

दीर्घे यलोपप्रतिषेधः ॥ २७ ॥

दीर्घे यलोपस्य प्रतिषेधो वक्तव्य· । सौर्ये नाम हिमवत शृङ्गे तद्वान्सौर्यी निमग्नानिति साविनाभये दीर्घत्वे कृते** इति यलोप· प्राप्नोति†† ॥

---

* १ १ ५८ † ७ ३ ७३, ८ २ ७५ ‡ ६ ४ ९८ ७ ३ ५४ § ६ ४ ८१ ¶ ६ १ ७७
** ६ ४ १२ †† ६ ४ १४०

अतो दीर्घे यलोपवचनम् ॥ २८ ॥

अतो दीर्घे यलोपो वक्तव्यः । गार्गीभ्याम् वात्सीभ्याम् । दीर्घे कृते[*] आपत्यस्य च तद्धितेऽनाति [६.४.१५१] इति प्रतिषेधः प्राप्नोति ॥ नैष दोषः । आश्रीयते तत्र प्रकृतिस्तद्धित इति ॥ सर्वेषामेष परिहारः । उक्तं विधिग्रहणस्य प्रयोजनं विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायामपि प्रकृताविति ॥ अथवा पुनरस्त्वविशेषेण स्थानिवदिति । ननु चोक्तमविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिर्द्विर्वचनादयश्च क्सलोपे लुग्वचनं हन्तेर्घत्वमिति । नैष दोषः । यत्तावदुच्यते अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिरिति । उक्तमेतत् । न वा संयोगस्यापूर्वविधित्वादिति ॥ यदप्युच्यते द्विर्वचनादयश्च प्रतिषेधे वक्तव्या इति । उच्यन्ते न्यास एव ॥ क्सलोपे लुग्वचनमिति । क्रियते न्यास एव ॥ हन्तेर्घत्वमिति । सप्तमे परिहारं वक्ष्यति[†] ॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ १ । १ । ५८ ॥

पदान्तविधिं प्रति न स्थानिवदित्युच्यते तत्र वेतस्वानिति रुः प्राप्नोति[‡] । नैष दोषः । भसंज्ञात्र बाधिका भविष्यति तसौ मत्वर्थे [१.४.१९] इति । अकारान्तमेतद्भसंज्ञां प्रति । पदसंज्ञां प्रति सकारान्तम् । ननु चैव विज्ञायते यः संप्रतिपदान्त इति । कर्मसाधनस्य विधिशब्दस्योपादान एतदेव स्यात् । अयं च विधिशब्दो ऽस्त्येव कर्मसाधनो विधीयते विधिरिति । अस्ति भावसाधनो विधानं विधिरिति । तत्र भावसाधनस्य विधिशब्दस्योपादान एष दोषो भवति । इह च ब्रह्मबन्ध्वा ब्रह्मबन्ध्वे धकारस्य जश्त्वं प्राप्नोति[§] ॥ अस्ति पुनः किंचिद्भावसाधनस्य विधिशब्दस्योपादाने सतीष्टं संगृहीतमाहोस्विद्दोषान्तमेव । अस्तीत्याह । इह कानि सन्ति यानि सन्ति कौ स्तः यौ स्त इति यो ऽसौ पदान्तो यकारो वकारो वा श्रूयेत[¶] स न श्रूयते । पढिकश्चापि सिद्धो भवति[**] । याविकस्तु न सिध्यति[††] । अस्तु तर्हि कर्मसाधनः । यदि कर्मसाधनः पढिको न सिध्यति । अस्तु तर्हि भावसाधनः । याविको न सिध्यति । याविकपढिकौ न संवदेते । कर्तव्यो ऽत्र यत्नः[‡‡] ॥ कथं ब्रह्मबन्ध्वा ब्रह्मबन्ध्वे । उभयत

* ७ ३ १०२ † ७ ३ ५१° ‡ [illegible]
§ [illegible] ¶ [illegible]
** [illegible] †† [illegible] ‡‡ [illegible]

आश्रये नान्तादिवदिति ॥ कथं वेतस्वान् । नैवं विज्ञायते पदस्यान्तः पदान्तः पदान्तविधिं प्रतीति । कथं तर्हि । पदे ऽन्तः पदान्तः पदान्तविधिं प्रतीति ॥ अथवा यथैवान्यान्यपि पदकार्याण्युपप्लवन्ते रुत्वं जश्त्वं चैवमिदमपि पदकार्यमुपप्लोष्यते । किम् । भसंज्ञा नाम ॥

वरे यलोपविधिं प्रति न स्थानिवद्भवतीत्युच्यते तत्र ते अप्सु यायावरः* प्रवपेत पिण्डान् अवर्णलोपविधिं प्रति[1] स्थानिवत्स्यात् । नैष दोषः । नैवं विज्ञायते वरे यलोपविधिं प्रति न स्थानिवद्भवतीति । कथं तर्हि । वरे ऽयलोपविधिं प्रतीति । किमिदमयलोपविधिं प्रतीति । अवर्णलोपविधिं प्रति यलोपविधिं च प्रतीति ॥ अथवा योगविभागः करिष्यते । वरे लुप्तं न स्थानिवत् । ततो यलोपविधिं च प्रति न स्थानिवदिति ॥ यलोपे किमुदाहरणम् । कण्डूयतेरप्रत्ययः कण्डूरिति‡ । नैतदस्ति । क्वौ लुप्तं न स्थानिवत् ॥ इदं तर्हि । सौरी§ बलाका । नैतदस्ति । उपधात्वविधिं प्रति न स्थानिवत् ॥ इदं तर्हि प्रयोजनम् । आदित्यः¶ । नैतदस्ति । पूर्वत्रासिद्धे न स्थानिवत् ॥ इदं तर्हि । कण्डूतिः वल्गूतिः** । नैतदस्ति प्रयोजनम् । कण्डूया वल्गूयेति भवितव्यम् ॥ इदं तर्हि । कण्डूयतेः क्तिन् । ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिः ॥

प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् ॥ १ ॥

प्रतिषेधे स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवद्भवतीति वक्तव्यम् ॥ स्वर । आकर्षिकः चिकीर्षकः जिहीर्षकः†† । यो ह्यन्य आदेशः स्थानिवदेवासौ भवति । पञ्चारत्न्यः दशारत्न्यः‡‡ । स्वर ॥ दीर्घ । प्रतिदीव्ना प्रतिदीव्ने§§ । यो ह्यन्य आदेशः स्थानिवदेवासौ भवति । किर्योः गिर्योः¶¶ । दीर्घ ॥ यलोप । ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिः । यो ह्यन्य आदेशः स्थानिवदेवासौ भवति । वाय्वोः अध्वर्य्वोरिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इह हि लोपो ऽपि प्रकृत आदेशो ऽपि विधिग्रहणमपि प्रकृतमनुवर्तते दीर्घादयो ऽपि निर्दिश्यन्ते । केवलं तत्राभिसम्बन्धमात्रं कर्तव्यम् । स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति । आनुपूर्व्येण संनिविष्टानां यथेष्टमभिसम्बन्धः शक्यते कर्तुं न चैतान्यानुपूर्व्येण संनिविष्टानि । अनानुपूर्व्येणापि संनिविष्टानां यथेष्टमभिसम्बन्धो भवति । तद्यथा । अन-

* ३ २ १० ६ ४ ४८ ६.१ ६६ † ६ ४ ६४ ‡ ६ ४ ४८ ६ १ ६६
§ ६ ४ १४८ १४९. ¶ ४ ७ ७४ ४ ३ ५३ ८४ ६४ ** ६ ४ ४८ ६ १ ६०
†† ४ ४ ९ ३ १ ११३ ६ ४ १४८, ४८ ६१ १०२ ‡‡ ६ २ ७० ६ २ २९
§§ ६ ४ १,४ ८२ ७७ ¶¶ ६ १ ७७

ङ्गाइमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसंबन्धो भवति । उदाहारि भगिनि या त्वं कुम्भं हरसि शिरसान-ङ्गाइं साचीनमभिधावन्तमद्राक्षीरिति ॥

क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् ॥ २ ॥

क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्तव्यम् ॥ क्वौ किमुदाहरणम् । कण्डूयतेरप्रत्ययः कण्डूरिति । नैतदस्ति । यलोपविधिं प्रति न स्थानिवत् ॥ इद तर्हि । पिपठिषतेरप्रत्ययः पिपठी:* । नैतदस्ति । दीर्घविधिं प्रति न स्थानिवत् ॥ इद तर्हि । लावयतेर्लौः पावयतेः पौः† । नैतदस्ति । अकृत्वा वृद्ध्यावादेशौ णिलोपः । प्रत्ययलक्षणेन वृद्धिर्भविष्यति ॥ इद तर्हि । लवमाचष्टे लवयति । लवयतेरप्रत्ययो लौः पौः । स्थानिवद्भावाण्णेरूण्न प्राप्नोति । क्वौ लुप्तं न स्थानिवदिति भवति ॥ एवमपि न सिध्यति । कथम् । क्वौ णिलोपो णावकारलोपस्तस्य स्थानिवद्भावादूण्न प्राप्नोति । नैष दोषः । नैवं विज्ञायते क्वौ लुप्त न स्थानिवदिति । कथं तर्हि । क्वौ विधिं प्रति न स्थानिवदिति ॥ लुकि किमुदाहरणम् । बिम्बम् बदरम्‡ । नैतदस्ति । पुंवद्भावेनाप्येत-त्सिद्धम्§ ॥ इद तर्हि । आमलकम्¶ । एतदपि नास्ति । वक्ष्यत्येतत् । फले लुग्वचनमन-र्थकं प्रकृत्यन्तरत्वादिति** ॥ इद तर्हि । पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः दशपटु-रिति†† । ननु चैतदपि पुंवद्भावेनैव सिद्धम् । कथं पुंवद्भावः । भस्याढे तद्धिते पुंव-द्भवतीति । भस्येत्युच्यते यजादौ च भं भवति‡‡ न चात्र यजादिं पश्यामः । प्रत्य-यलक्षणेन यजादिः । वर्णाश्रये नास्ति प्रत्ययलक्षणम् । एवं तर्हि ठक्छसोश्चेत्येवं भविष्यति§§ । ठक्छसोश्चेत्युच्यते न चात्र ठक्छसौ पश्यामः । प्रत्ययलक्षणेन । न लुमता तस्मिन्निति¶¶ प्रत्ययलक्षणस्य प्रतिषेधः ॥ न खल्वप्यवश्यं ठगेव क्रीतप्रत्ययः क्रीतार्थो एव वा तद्धिताः । किं तर्हि । अन्येऽपि तद्धिता ये लुकं प्रयोजयन्ति । पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्रः दशेन्द्रः पञ्चाग्निः दशाग्निः*** ॥ उपधात्वे किमुदाहरणम् । पिपठिषतेरप्रत्ययः पिपठीरिति । नैतदस्ति । दीर्घविधिं प्रति न स्था-निवत् ॥ इद तर्हि । सौरी बलाका । नैतदस्ति । यलोपविधिं प्रति न स्थानिवत् ॥ इद तर्हि । पारिखीयः††† ॥ चङ्परनिर्ह्रासे नोपसंख्यानं कर्तव्यम् । वादितवन्त प्रयो-

---

* ६ ४ ४८ ८२ ६६ ७ † ६ ४ ५२, १९ ६१ ८०
‡ ४ १ १४०, १६२ १२ ४१, (६ ४ १४८) § ६ ३ ३५ * ¶ ४ ३ १४४
** ४ ३ १६३ * †† ५ १ १९ २८ १ - ४० (६ १ ७४) ‡‡ १ ४ १८ §§ ६ ३ ३९
¶¶ १ १ ६३ * *** ४ ० २४ ४ १ ८८ १ २ ४९ (४ १ ४० ३० ६ ४ १४८,
††† ४ २ ३० ६ ४ १४८ ४ २ १४१

.O M

जितवान् अवीवदद्वीणां परिवादकेन* । किं पुनः कारणं न सिध्यति । योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नोति । ननु चैतदप्युपधात्वविधिं प्रति न स्थानिवदित्येव सिद्धम् । विशेष एतद्वक्तव्यम् । क्व । प्रत्ययविधाविति । इह मा भूत् । पटयति लघयतीति† ॥ कुत्वे चोपसंख्यानं कर्तव्यम् । अर्चयतेरर्कः मर्चयतेर्मर्कः‡ । नैतद्ण्यन्तम् । औणादिक एष कशब्दस्तस्मिन्नाटमिकं कुत्वम्§ । एतदपि णिचा व्यवहितत्वान्न प्राप्नोति ॥

पूर्वत्रासिद्धे च ॥ ३ ॥

पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यम् । किं प्रयोजनम् ।

प्रयोजनं क्सलोपः सलोपे ॥ ४ ॥

क्सलोपः सलोपे प्रयोजनम्¶ । अदुग्ध अदुग्धाः । लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये [७.३.७३] इति लुग्ग्रहणं न कर्तव्यं भवति ॥

दध आकारलोप आदिचतुर्थत्वे ॥ ५ ॥

दध आकारलोप** आदिचतुर्थत्वे प्रयोजनम् । धत्से धद्ध्वे धद्ध्वमिति । दधस्तथोश्च [८.२.३८] इति चकारो न कर्तव्यो भवति ॥

हलो यमां यमि लोपे ॥ ६ ॥

हलो यमां यमि लोपे प्रयोजनम् । आदित्यः । हलो यमां यमि लोपः सिद्धो भवति†† ॥

अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु ॥ ७ ॥

अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु प्रयोजनम् । पापच्यतेः पापक्तिः । यायज्यतेर्यायष्टिः । पाचयतेः पाक्तिः । याजयतेर्याष्टिः‡‡ ॥

द्विर्वचनादीनि च ॥ ८ ॥

द्विर्वचनादीनि च न पठितव्यानि भवन्ति । पूर्वत्रासिद्धेनैव सिद्धानि भवन्ति ॥ किमविशेषेण । नेत्याह ।

---

* ७ ४ १ † ६ ४ १५५ (७ २ ११६) ‡ ३ ३ १९; ६ ४ ५१; ७ २ ५२ § ८ २ ३०
¶ ८ २ २६ ** ६ ४ ११२ †† ८ ४ ६४ ‡‡ ६ ४ ४८ ५१ ८ २ ३०; ३६

वरेयलोपस्वरवर्जम् ॥ ९ ॥

वरेयलोप स्वर च वर्जयित्वा ॥

तस्य दोष॰ सयोगादिलोपलत्वणत्वेषु ॥ १० ॥

तस्यैतस्य लक्षणस्य दोष. सयोगादिलोपलत्वणत्वेषु ॥ सयोगादिलोप । काक्यर्थम् वास्यर्थम्* । स्को सयोगाद्योरन्ते च [८.२.२९] इति लोप प्राप्नोति ॥ लत्वम् । निगार्यते निगाल्यते† । अचि विभाषा [८.२.२१] इति लत्व न प्राप्नोति ॥ णत्वम् । माषवपनी व्रीहिवपनी‡ । प्रातिपदिकान्तस्येति§ णत्व प्राप्नोति ॥

द्विर्वचने ऽचि ॥ १ । १ । ५९ ॥

आदेशो स्थानिवदनुदेशात्तद्वतो द्विर्वचनम् ॥ १ ॥

आदेशो स्थानिवदनुदेशात्तद्वत । किंवत । आदेशवतो द्विर्वचन प्राप्नोति ॥ तत्र को दोष ।

तत्राभ्यासरूपम् ॥ २ ॥

तत्राभ्यासरूप न सिध्यति । चक्रतु चक्रुरिति¶ ॥

अज्ग्रहण तु ज्ञापकं रूपस्थानिवद्भावस्य ॥ ३ ॥

यदयमज्ग्रहण करोति तज्ज्ञापयत्याचार्यो रूप स्थानिवद्भवतीति । कथ कृत्वा ज्ञापकम् । अज्ग्रहणस्यैतत्प्रयोजनमिह मा भूत् । जेघ्रीयते देध्मीयत इति** । यदि रूप स्थानिवद्भवति ततो ऽज्ग्रहणमर्थवद्भवति । अथ हि कार्यं नार्थो ऽज्ग्रहणेन । भवत्येवात्र द्विर्वचनम् ॥

तत्र गाङ्प्रतिषेध ॥ ४ ॥

तत्र गाङ प्रतिषेधो वक्तव्य । अधिजगे । इवर्णाभ्यासता प्राप्नोति ॥ न वक्तव्य । गाङ् लिटि [२.४.४९] इति द्विलकारको निर्देश । लिटि लकारादाविति ॥

कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम् ॥ ५ ॥

कृत्येजन्तदिवादिनामधातुष्वभ्यासरूप न सिध्यति ॥ कृति । अचिकीर्तत†† । कृति ॥

* ६.१.७० † ६.४.५१ ‡ ८.४.१४८ § ८.४.११ ¶ [illegible]
** ७.४.३१ || [illegible]

एजन्त । जग्ले मम्ले* । एजन्त ॥ दिवादि । द्युपति सुस्यूपति† । दिवादि ॥ नामधातु । भवनमिच्छति भवनीयति भवनीयतेः सन् बिभवनीयिषति‡ ॥ एवं तर्हि प्रत्यय इति वक्ष्यामि ।

प्रत्यय इति चेत्कृत्येजन्तनामधातुष्वभ्यासरूपम् ॥ ६ ॥

प्रत्यय इति चेत्कृत्येजन्तनामधातुष्वभ्यासरूपं न सिध्यति । दिवादय एके परिहृताः ॥ एवं तर्हि द्विर्वचननिमित्ते ऽच्यजादेशः स्थानिवदिति वक्ष्यामि । स तर्हि निमित्तशब्द उपादेयो न ह्यन्तरेण निमित्तशब्द निमित्तार्थो गम्यते । अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते । तद्यथा । दधित्रपुसं प्रत्यक्षो ज्वरः । ज्वरनिमित्तमिति गम्यते । नड्वलोदकं पादरोगः । पादरोगनिमित्तमिति गम्यते । आयुर्घृतम् । आयुषो निमित्तमिति गम्यते ॥ अथवाकारो मत्वर्थीयः । द्विर्वचनमस्मिन्नस्ति सो ऽयं द्विर्वचनो द्विर्वचन इति ॥ एवमपि न ज्ञायते कियन्तमसौ काल स्थानिवद्भवतीति । यः पुनराह द्विर्वचने कर्तव्य इति कृते तस्य द्विर्वचने स्थानिवन्न भविष्यति ॥ एवं तर्हि प्रतिषेधः प्रकृतः सो ऽनुवर्तिष्यते । क्व प्रकृतः । न पदान्तद्विर्वचन [१.१.५८] इति । द्विर्वचननिमित्ते ऽच्यजादेशो न भवतीति । एवमपि न ज्ञायते कियन्तमसौ कालमादेशो न भवतीति । यः पुनराह द्विर्वचने कर्तव्य इति कृते तस्य द्विर्वचने ऽजादेशो भविष्यति ॥ एवं तर्ह्युभयमनेन क्रियते प्रत्ययश्च विशेष्यते द्विर्वचनं च । कथं पुनरेकेन यत्नेनोभयं लभ्यम् । लभ्यमित्याह । कथम् । एकशेषनिर्देशात् । एकशेषनिर्देशो ऽयम् । द्विर्वचन च द्विर्वचन च द्विर्वचनम् । द्विर्वचने च कर्तव्ये द्विर्वचने ऽचि प्रत्यय इति द्विर्वचननिमित्ते ऽचि स्थानिवद्भवति ॥

द्विर्वचननिमित्ते ऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम् ॥ ७ ॥

द्विर्वचननिमित्ते ऽचि स्थानिवदिति चेण्णौ स्थानिवद्भावो वक्तव्यः । अचुनावयिषति अचक्षुवयिषति ॥ न वक्तव्यः ।

ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य ॥ ८ ॥

यदयमोः पुयण्ज्यपरे [७.४.८०] इत्याह तज्ज्ञापयत्याचार्यो भवति णौ स्थानिवदिति । यद्येतज्ज्ञाप्यते अचिकीर्तत् अत्रापि प्राप्नोति । तुल्यजातीयस्य ज्ञापकम् । कथं तुल्यजातीयः । यथाजातीयकाः पुयण्जयः । कथंजातीयकाश्चैते । अवर्णपराः ॥ यच्च जग्ले मम्ले । अनैमित्तिकमात्त्वं शिति तु प्रतिषेधः ॥

* ६.१.४५ † ६.४.१९, ६.१.७७ ‡ ३.१.८, ६.१.९.

कानि पुनरस्य योगस्य प्रयोजनानि । पपतुः पपुः तस्थतुः तस्थुः । जग्मतुः जग्मुः । आटिटत् आशिशत् । चक्रतुः चक्रुरिति । आल्लोपोपधालोपणिलोपयणादेशेषु* कृतेष्वनच्कत्वाद्द्विर्वचनं न प्राप्नोति† । स्थानिवद्भावाद्भवति ॥ नैतानि सन्ति प्रयोजनानि । पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि । कथम् । वक्ष्यति ह्याचार्यः । द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्त्वेभ्य इति‡ । स पूर्वविप्रतिषेधो न पठितव्यो भवति ॥ किं पुनरत्र ज्यायः । स्थानिवद्भाव एव ज्यायान् । पूर्वविप्रतिषेधे हि सतीदं वक्तव्यं स्यात् । ओदौदादेशस्योद्भवति चुटुतुशरादेरभ्यासस्येति । ननु च त्वयापीत्त्वं वक्तव्यम्§ । परार्थं मम भविष्यति सन्यत इद्भवतीति¶ । ममापि तर्ह्युत्त्वं परार्थं भविष्यत्युत्परस्यातास्ति च [७.४.८८,८९] इति । इत्त्वमपि त्वया वक्तव्यं यत्समानाश्रयं तदर्थम् । उत्पिपविषते संयियविषतीत्येवमर्थम् ॥ तस्मात्स्थानिवदित्येष एव पक्षो ज्यायान् ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे ऽष्टममाह्निकम् ॥

---

* ६.४. ६४; ९८, ५१, ६.१. ७७. † ६.१. ३; २. ‡ ६.१. १२.* § ७.४. ८०. ¶ ७.४. ७९.

अदर्शनं लोपः ॥ १ । १ । ६० ॥

अर्थस्य संज्ञा कर्तव्या शब्दस्य मा भूदिति । इतरेतराश्रयं च भवति । केतरेतराश्रयता । सतोऽदर्शनस्य संज्ञया भवितव्यं संज्ञया चादर्शनं भाव्यते तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते ।

लोपसंज्ञायामर्थसतोरुक्तम् ॥ १ ॥

किमुक्तम् । अर्थस्य तावदुक्तम् । इतिकरणोऽर्थनिर्देशार्थ इति* । सतोऽप्युक्तम् । सिद्धं तु नित्यशब्दत्वादिति† । नित्याः शब्दाः । नित्येषु च शब्देषु सतोऽदर्शनस्य संज्ञा क्रियते न संज्ञयादर्शनं भाव्यते ॥

सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात् ॥ २ ॥

सर्वप्रसङ्गस्तु भवति । सर्वस्यादर्शनस्य लोपसंज्ञा प्राप्नोति । किं कारणम् । सर्वस्यान्यत्रादृष्टत्वात् । सर्वो हि शब्दो यो यस्य प्रयोगविषयः स ततोऽन्यत्र न दृश्यते । त्रपु जत्वित्यत्राणोऽदर्शनं तत्रादर्शनं लोप इति लोपसंज्ञा प्राप्नोति । तत्र को दोषः ।

तत्र प्रत्ययलक्षणप्रतिषेधः ॥ ३ ॥

तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । अचो ञ्णिति [७. २. ११५] इति वृद्धिः प्राप्नोति ॥ नैष दोषः । ञ्णित्यङ्गस्याचो वृद्धिरुच्यते । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं भवति‡ । यस्माच्चात्र प्रत्ययविधिर्न तत्प्रत्यये परतः । यच्च प्रत्यये परतो न तस्मात्प्रत्ययविधिः ॥ क्विपस्तर्ह्यदर्शनं तत्रादर्शनं लोप इति लोपसंज्ञा प्राप्नोति । तत्र को दोषः । तत्र प्रत्ययलक्षणप्रतिषेधः । तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । ह्रस्वस्य पिति कृति तुग्भवतीति तुक्प्राप्नोति§ ॥

सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात् ॥ ४ ॥

सिद्धमेतत् । कथम् । प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यम् । यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यते ग्रामणीः सेनानीः अत्र वृद्धिः प्राप्नोति¶ । प्रसक्तादर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य । यदि षष्ठीनिर्दिष्टस्येत्युच्यते नाग्लोप

---

* १.१.४४ † १.१.१ ‡ १.४.१३ § ६.१.७१ ¶ १.१.१; ७.२.११५

एवेत्यवधारणे [८.१.६२] चादिलोपे विभाषा [६३] इत्यत्र लोपसंज्ञा न प्राप्नोति । अथ प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमिवैतत्सिध्यति । को हि शब्दस्य प्रसङ्गः । यत्र गम्यते चार्थो न च प्रयुज्यते । अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव । कथं ग्रामणीः सेनानीः । योऽत्राणः प्रसङ्गः क्विपासौ बाध्यते* ॥

प्रत्ययस्य लुक्श्लुलुपः ॥ १ । १ । ६१ ॥

प्रत्ययग्रहणं किमर्थम् ।

लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम् ॥ १ ॥

लुमति प्रत्ययग्रहणं क्रियते अप्रत्ययस्यैताः संज्ञा मा भूवन्निति ॥ किं प्रयोजनम् ।

प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम् ॥ २ ॥

तद्धितलुकि गोनिवृत्त्यर्थं कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थम् । लुक्तद्धितलुकि [१.२.४९] इति गोरपि लुक्प्राप्नोति । प्रत्ययग्रहणान्न भवति । कंसीयपरशव्ययोर्यञञौ लुक्च [४.३.१६८] इति प्रकृतेरपि लुक्प्राप्नोति । प्रत्ययग्रहणान्न भवति ॥ गोनिवृत्त्यर्थेन तावन्नार्थः ।

योगविभागात्सिद्धम् ॥ ३ ॥

योगविभागः करिष्यते । गोरुपसर्जनस्य । गोऽन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति । ततः स्त्रियाः । स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति । *ततो लुक्तद्धितलुकीति स्त्रिया इति वर्तते गोरिति निवृत्तम् ॥*

कंसीयपरशव्ययोर्विशिष्टनिर्देशात्सिद्धम् ॥ ४ ॥

कंसीयपरशव्ययोरपि विशिष्टनिर्देशः कर्तव्यः । कंसीयपरशव्ययोर्यञञौ भवतश्छयतोश्च लुग्भवतीति । स चावश्यं विशिष्टनिर्देशः कर्तव्यः क्रियमाणे अपि वै प्रत्ययग्रहण उकारसशब्दयोर्मा भूदिति । कमेः सः कंसः । परान् शृणातीति परशुरिति । नैष दोषः । उणादयो ऽव्युत्पन्नानि प्रातिपदिकानि । स एषो ऽनन्यार्थो विशिष्टनिर्देशः कर्तव्यः प्रत्ययग्रहणं वा कर्तव्यम् ॥

---

* ११ ५१   † ११ ४८

उक्तं वा ॥ ५ ॥

किमुक्तम् । ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थं यच्छयोश्च लुगर्थमिति* ॥

षष्ठीनिर्देशार्थं तु ॥ ६ ॥

षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम् । षष्ठीनिर्देशो यथा प्रकल्पेत ॥

अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ॥ ७ ॥

अक्रियमाणे हि प्रत्ययग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात् । कस्य । स्थानेयोगत्वस्य ॥ क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः प्रत्ययग्रहणेन यावता सर्वत्रैव षष्ठ्युच्चार्यते ऽणिञोस्तद्राजस्य यञञोः शप इति† । इह न काचित्षष्ठी जनपदे लुप् [४.२.८१] इति । अत्रापि प्रकृतं प्रत्ययग्रहणमनुवर्तते । क्व प्रकृतम् । प्रत्ययः परश्च [३.१.१,२] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । ङ्याप्प्रातिपदिकात् [४.१.१] इत्येषा पञ्चमी प्रत्यय इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१.१.६७] इति । प्रत्ययविधिरयं न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति । नायं प्रत्ययविधिः । विहितः प्रत्ययः प्रकृतश्चानुवर्तते ॥

सर्वादेशार्थं वा वचनप्रामाण्यात् ॥ ८ ॥

सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम् । लुक्श्लुलुपः सर्वादेशा यथा स्युः । अथ क्रियमाणे ऽपि प्रत्ययग्रहणे कथमिव लुक्श्लुलुपः सर्वादेशा लभ्याः । वचनप्रामाण्यात् । प्रत्ययग्रहणसामर्थ्यात् ॥ एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति लुक्श्लुलुपः सर्वादेशा भवन्तीति यदयं लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये [७.३.७३] इति लोपे प्रकृते लुकं शास्ति ॥

उत्तरार्थं तु ॥ ९ ॥

उत्तरार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते तत्रैव प्रत्ययलोपे प्रत्ययलक्षणम् [१.१.६२] इति । द्वितीयं कर्तव्यम् । कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात् । एकदेशलोपे मा भूदिति । आग्नीत । स रायस्पोषेण ग्मीयेति‡ ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ १ । १ । ६२ ॥

प्रत्ययग्रहणं किमर्थम् । लोपे प्रत्ययलक्षणमितीयत्युच्यमाने सौत्थी वैहतीति§

* [illegible] † [illegible] ‡ [illegible] § [illegible]

गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत* । नैष दोषः । नैवं विज्ञायते लोपे प्रत्ययलक्षणं भवति प्रत्ययस्य प्रादुर्भाव इति । कथं तर्हि । प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि भवतीति ॥ इदं तर्हि प्रयोजनम् । सति प्रत्यये यत्प्राप्नोति *तत्प्रत्ययलक्षणेन यथा* स्यात् । लोपोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणेन मा भूदिति । किं प्रयोजनम् । ग्रामणिकुलम् सेनानिकुलम् । औत्तरपदिके ह्रस्वत्वे कृते† ह्रस्वस्य पिति कृति तुक् [६.१.७१] इति तुक्प्राप्नोति स मा भूदिति । यदि तर्हि सति प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन भवति लोपोत्तरकालं यत्प्राप्नोति तन्न भवति जगत् जनगदित्यत्र‡ तुग् न प्राप्नोति । लोपोत्तरकालो ह्यत्र तुगागमः । तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन । कस्मान्न भवति ग्रामणिकुलम् सेनानिकुलम् । बहिरङ्गं ह्रस्वत्वम् । अन्तरङ्गस्तुक् । असिद्धं बहिरङ्गमन्तरङ्गे ॥ इदं तर्हि प्रयोजनम् । कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यादेकदेशलोपे मा भूदिति । आघ्नीत । स रायस्पोषेण ग्मीय । पूर्वस्मिन्नपि योगे *प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तम् । अन्यतरच्छक्यमकर्तुम् ॥ अथ द्वितीयं प्रत्ययग्रहणं* किमर्थम् । प्रत्ययलक्षणं यथा स्याद्वर्णलक्षणं मा भूदिति । गवे हितं गोहितम् । रायः कुलं रैकुलमिति§ ॥

किमर्थं पुनरिदमुच्यते ।

प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य ॥ १ ॥

प्रत्ययलोपे प्रत्ययलक्षणमित्युच्यते सदन्वाख्यानाच्छास्त्रस्य । सच्छास्त्रेणान्वाख्यायते *सतो वा शास्त्रमन्वाख्यायकं भवति सदन्वाख्यानाच्छास्त्रस्य ।* उगिदचां सर्वनामस्थानेऽधातोः [७.१.७०] इतीहैव स्यात् । गोमन्तौ यवमन्तौ । गोमान् यवमान्‌ *इत्यत्र न स्यात्*¶ । *इष्यते च स्यादिति तच्चान्तरेण यत्नं न सिध्यति* । अतः प्रत्ययलोपे प्रत्ययलक्षणवचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

लुक्युपसंख्यानम् ॥ २ ॥

लुक्युपसंख्यानं कर्तव्यम् । पञ्च सप्त** ॥ किं पुनः कारणं न सिध्यति ।

लोपे हि विधानम् ॥ ३ ॥

लोपे हि प्रत्ययलक्षणं विधीयते तेन लुकि न प्राप्नोति ॥

न वादर्शनस्य लोपसञ्ज्ञित्वात् ॥ ४ ॥

न वा कर्तव्यम् । किं कारणम् । अदर्शनस्य लोपसञ्ज्ञित्वात् । अदर्शनं लोपसञ्ज्ञं भवतीत्युच्यते लुमत्सञ्ज्ञाश्चाप्यदर्शनस्य क्रियन्ते । तेन लुक्यपि भविष्यति ॥ यथेत्र

प्रत्ययादर्शनं तु लुमत्संज्ञम् ॥ ५ ॥

प्रत्ययादर्शनं तु लुमत्सञ्ज्ञमपि प्राप्नोति । तत्र को दोषः ।

तत्र लुकि श्लुविधिप्रतिषेधः ॥ ६ ॥

तत्र लुकि श्लुविधिरपि प्राप्नोति स प्रतिषेध्यः । अत्ति हन्ति[*] । श्लौ [६.१.१०] इति द्विर्वचनं प्राप्नोति ॥

न वा पृथक्सञ्ज्ञाकरणात् ॥ ७ ॥

न वैष दोषः । किं कारणम् । पृथक्सञ्ज्ञाकरणात् । पृथक्सञ्ज्ञाकरणसामर्थ्याल्लुकि श्लुविधिर्न भविष्यति ॥ तस्माददर्शनसामान्याल्लोपसञ्ज्ञा लुमत्सञ्ज्ञा अवगाहते । यथैव तर्ह्यदर्शनसामान्याल्लोपसञ्ज्ञा लुमत्सञ्ज्ञा अवगाहत एवं लुमत्सञ्ज्ञा अपि लोपसञ्ज्ञामवगाहेरन् । तत्र को दोषः । अगोमती गोमती सपन्ना गोमतीभूता[†] । लुक्तद्धितलुकि [१.२.४९] इति ङीपो लुक्प्रसज्येत । ननु चात्रापि न वा पृथक्सञ्ज्ञाकरणादित्येव सिद्धम् । यथैव तर्हि पृथक्सञ्ज्ञाकरणसामर्थ्याल्लुमत्सञ्ज्ञा लोपसञ्ज्ञां नावगाहन्त एवं लोपसञ्ज्ञापि लुमत्सञ्ज्ञा नावगाहेत । तत्र स एव दोषो लुक्युपसंख्यानमिति । अस्त्यन्यल्लोपसञ्ज्ञायाः पृथक्सञ्ज्ञाकरणे प्रयोजनम् । किम् । लुमत्सञ्ज्ञासु यदुच्यते तल्लोपमात्रे मा भूदिति ॥

लुमति प्रतिषेधाद्वा ॥ ८ ॥

अथवा यदयं न लुमताङ्गस्य [१.१.६३] इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति लुकि प्रत्ययलक्षणमिति ॥

सतो निमित्ताभावात्पदसञ्ज्ञाभावः ॥ ९ ॥

सन्प्रत्ययो येषां कार्याणामनिमित्तं[‡] राज्ञः पुरुष इति स लुप्तो[§]ऽप्यनिमित्तं स्यात् राजपुरुष इति । अस्तु तस्या अनिमित्तं या स्वादौ पदमिति[¶] पदसञ्ज्ञा या तु सुबन्तं पदमिति[**] पदसञ्ज्ञा सा भविष्यति । सत्येतस्मिन्प्रत्यय आसीदनया भविष्यत-

* २.४.७२ † ५.४.५० १.१.६० ‡ ८.२.७ § २.४.७१ ¶ १.४.१७ ** १.४.१४

तया न भविष्यतीति । लुमि इदानीं प्रत्यये यावत एवावधेः स्यादौ पदमिति पदसंज्ञा॰ तावत एवावधेः सुबन्तं पदमिति । अस्ति च प्रत्ययलक्षणेन यजादिपरतेति कृत्वा भसंज्ञा प्राप्नोति* ॥

तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीरिति ॥ १० ॥

तुग्दीर्घत्वयोश्च विप्रतिषेधो नोपपद्यते । क्व । परिवीरिति† । किं कारणम् । *एकयोगलक्षणत्वात्* । *एकयोगलक्षणे तुग्दीर्घत्वे* । इह लुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्यवपन्नानि भवन्ति । तान्येतेन प्रत्युत्थाप्यन्ते । अनेनैव तुगनेनैव च दीर्घत्वमिति । तदेकयोगलक्षणं भवति । एकयोगलक्षणानि च न प्रकल्पन्ते ॥

सिद्धं तु स्थानिसंज्ञानुदेशादान्यभाव्यस्य ॥ ११ ॥

सिद्धमेतत् । कथम् । स्थानिसंज्ञान्यभूतस्य भवतीति वक्तव्यम् । किं कृतं भवति । सत्तामात्रमनेन क्रियते । यथाप्राप्ते तुग्दीर्घत्वे भविष्यतः ॥ तद्वक्तव्यं भवति । यद्यप्येतदुच्यतेऽथवैतर्हि स्थानिवद्भावो नारभ्यते । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वक्ष्यामि । यद्येवमाङो यमहन आत्मनेपदं भवतीति‡ हन्तेरेव स्याद्वधेर्न स्यात् । न हि काचिद्धन्तेः संज्ञास्ति या वधेरतिदिश्येत । *हन्तेरपि संज्ञास्ति । का । हन्तिरेव* । कथम् । स्वं रूपं शब्दस्याशब्दसंज्ञा [१ १ ६८] इति वचनात्स्वं रूपं शब्दस्य संज्ञा भवतीति हन्तेरपि हन्तिः संज्ञा भविष्यतीति ॥

भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धम् ॥ १२ ॥

भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धं भवति ॥ भसंज्ञा । राज्ञः पुरुषो राजपुरुषः । प्रत्ययलक्षणेन यचि भम् [१ ४ १८] इति भसंज्ञा प्राप्नोति । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति ॥ ङीप् । चित्रायां जाता चित्रा§ । प्रत्ययलक्षणेनाणन्तादितीकारः प्राप्नोति¶ । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भविष्यति ॥ ष्फ । यतण्डी** । प्रत्ययलक्षणेन यञन्तादिति ष्फः प्राप्नोति†† । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति ॥ गोरात्वम् । गामिच्छति गव्यति‡‡ । प्रत्ययलक्षणेनाम्यौतोऽम्शसोः [६ १ ९३] इत्यात्वं प्राप्नोति । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति ॥

तस्य दोषो ङीनकारलोपेत्त्वेट्विधयः ॥ १३ ॥

तस्यैतस्य लक्षणस्य दोषो ङौ नकारलोपः । आर्द्रे चर्मन् लोहिते चर्मन्* । प्रत्ययलक्षणेन यचि भम् [१.४.१८] इति भसंज्ञा सिद्धा भवति । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न प्राप्नोति ॥ इत्त्वम् । आशीः† । प्रत्ययलक्षणेन हलीतीत्त्वं सिद्धं भवति‡ । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न प्राप्नोति ॥ इम् । अतृणेट्§ । प्रत्ययलक्षणेन हलीतीम्सिद्धो भवति¶ । स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न प्राप्नोति ॥ सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं सतो निमित्ताभावात्पदसंज्ञाभावस्तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीरिति । नैष दोषः । वक्ष्यत्यत्र परिहारम् । इहापि परिवीरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यति ॥

कानि पुनरस्य योगस्य प्रयोजनानि ।

प्रयोजनमपृक्तशिलोपे नुममामौ गुणवृद्धिदीर्घत्वेमडाड्अम्विधयः ॥ १४ ॥

अपृक्तलोपे शिलोपे च कृते** नुममामौ गुणवृद्धी दीर्घत्वमिमडाटो अम्विधिरिति प्रयोजनानि ॥ नुम् । अग्ने त्री ते वाजिना त्री षधस्था । ता ता पिण्डानाम्†† । नुम् ॥ अमामौ । हे अनड्वन् अनड्वान्‡‡ ॥ गुणः । अधोक् अलेट्§§ ॥ वृद्धिः । न्यमार्ट्¶¶ ॥ दीर्घत्वम् । अग्ने त्री ते वाजिना त्री षधस्था । ता ता पिण्डानाम्*** ॥ इम् । अतृणेट् ॥ अडाटौ । अधोक् अलेट् । ऐयः औन.††† ॥ अम्विधिः । अभिनोऽत्र अच्छिनोऽत्र‡‡‡ ॥ अपृक्तशिलोपयोः कृतयोरेते विधयो न प्राप्नुवन्ति । प्रत्ययलक्षणेन भवन्ति ॥ नैतानि सन्ति प्रयोजनानि । स्थानिवद्भावेनाप्येतानि सिद्धानि । न सिध्यन्ति । आदेशः स्थानिवदित्युच्यते न च लोप आदेशः । लोपोऽप्यादेशः । कथम् । आदिश्यते यः स आदेशः । लोपोऽप्यादिश्यते । दोषः खल्वपि स्याद्यदि लोपो नादेशः स्यात् । इकाचः परस्मिन्पूर्वविधौ [१.१.५७] इत्येतस्य भूयिष्ठानि लोप उदाहरणानि तानि न स्युः ॥ यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः । क्व च स्थानिवद्भावो नास्ति । यो ऽल्विधिः । किं प्रयोजनम् । प्रयोजनं ङीनकारलोपेत्त्वेम्विधयः ॥

---

* ७.१.३९ † ६.१.६७ ‡ ६.४.१४ § ६.१.६८ ¶ ७.३.९२ ** ६.१ ६८, ७० †† ७.१ ७१ ‡‡ ७.१ ९९, ९८ §§ ७.३.८६ ¶¶ ७.२.११४ *** ६.१.४ ††† ६.४ ७१, ७२ ‡‡‡ ३.१ ७०

भसञ्ज्ञाङीप्ष्फगोरास्वेषु च दोषः ॥ १९ ॥

भसञ्ज्ञाङीप्ष्फगोरात्वेषु दोषो भवति ॥ भसंज्ञायां तावन्न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन भसञ्ज्ञा भवतीति यदयं न ङिसम्बुद्ध्योः [८.२.८] इति ङौ प्रतिषेधं शास्ति ॥ ङीप्यपि नैवं विज्ञायते ऽन्नन्तादकारान्तादिति । कथं तर्हि । अन्यो ऽकार इति ॥ ष्फे ऽपि नैवं विज्ञायते यञन्तादकारान्तादिति । कथं तर्हि । यञ्यो ऽकार इति ॥ गोरात्वे ऽपि नैव विज्ञायते ऽम्यचीति । कथं तर्हि । अच्यमीति ॥ प्रयोजनान्यपि तर्हि तानि न सन्ति । यत्तावदुच्यते ङौ नकारलोप इति क्रियत एतन्न्यास एव न ङिसम्बुद्ध्योरिति ॥ इत्त्वमपि । वक्ष्यत्येतत् । शास इदङ्आशासः क्वाविति* ॥ इम्विधिरपि । हलीति निवृत्तम् । यदि हलीति निवृत्तं तृणहानि अत्रापि प्राप्नोति । एवं तर्ह्यचि नेत्यप्यनुवर्तिष्यते† ॥ न तर्हीदानीमयं योगो वक्तव्यः । वक्तव्यश्च । किं प्रयोजनम् । प्रत्ययं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात् । शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन मा भूदिति । किं प्रयोजनम् । शोभना दृषदो ऽस्य सुदृषद्ब्राह्मणः‡ । सोमनसी अलोमोषसी [६.२.११७] इत्येष स्वरो मा भूदिति ॥

न लुमताङ्गस्य ॥ १ । १ । ६३ ॥

लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम् ॥ १ ॥

लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानं कर्तव्यम् । एकपदस्वरे च लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् ॥ किमविशेषेण । नेत्याह ।

सर्वामन्त्रितसिज्लुक्स्वरवर्जम् ॥ २ ॥

सर्वस्वरमामन्त्रितस्वरं सिज्लुक्स्वरं च वर्जयित्वा ॥ सर्वस्वरः । सर्वस्तोमः सर्वपृष्ठः§ । सर्वस्य सुपि [६.१.१९१] इत्याद्युदात्तत्वं यथा स्यात् ॥ आमन्त्रितस्वरः । सर्पिरागच्छ । सप्तागच्छत । आमन्त्रितस्य च [६.१.१९८] इत्याद्युदात्तत्वं यथा स्यात् ॥ सिज्लुक्स्वरः । मा हि दाताम् । मा हि धाताम् । आदिः सिचो ऽन्यतरस्याम् [६.१.१८७] इत्येष स्वरो यथा स्यात् ॥ किं प्रयोजनम् ।

प्रयोजनं ञिनिकिल्लुकि स्वराः ॥ ३ ॥

ञिनिकित्स्वरा लुकि प्रयोजयन्ति । गर्गा वत्साः । विदाः उर्वाः¶ । उष्ट्रग्रीवाः

* ६ ४ ३४ † ७ २ ८७ ‡ ७ ४ ७३ § २ ४ ७१ ६ २ १ ¶ ८ ४ ६४

वामरज्जुः* । ञ्नितीत्याद्युदात्तत्वं मा भूदिति† । इह च अलयः‡ कितः [६.१.१६५] इत्यन्तोदात्तत्वं मा भूदिति ॥

पथिमथोः सर्वनामस्थाने ॥ ४ ॥

पथिमथोः सर्वनामस्थाने लुकि प्रयोजनम् । पथिप्रियः मथिप्रियः§ । पथिमथोः सर्वनामस्थाने [६.१.१९९] इत्येष स्वरो मा भूदिति ॥

अह्नो रविधौ ॥ ५ ॥

अह्नो रविधाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् । अहर्ददाति । अहर्भुङ्क्ते¶ । रोऽसुपि [८.२.६९] इति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति ॥

उत्तरपदत्वे चापदादिविधौ ॥ ६ ॥

उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् । परमवाचा परमवाचे । परमगोदुहा परमगोदुहे । परमश्वलिहा परमश्वलिहे । पदस्य [८.१.१६] इति प्रत्ययलक्षणेन कुत्वादीनि** मा भूवन्निति ॥ अपदादिविधाविति किमर्थम् । दधिसेचौ दधिसेचः । सात्पदाद्योः [८.३.१११] इति प्रतिषेधो यथा स्यात् ॥ यद्यपदादिविधावित्युच्यत उत्तरपदाधिकारो न प्रकल्पेत । तत्र को दोषः । कर्णो वर्णलक्षणात् [६.२.११२] इत्येवमादिर्विधिर्न सिध्यति ॥ यदि पुनर्नलोपादिविधौ इत्युच्येत†† लुमता लुप्ते प्रत्ययलक्षणं न भवतीत्युच्येत । नैवं शक्यम् । इह हि राजकुमार्यौ राजकुमार्य इति शाकलं‡‡ प्रसज्येत । नैष दोषः । यदेतत्सिति शाकलं नेत्येतत्प्रत्यये शाकलं नेति वक्ष्यामि§§ । यदि प्रत्यये शाकलं नेत्युच्यते दधि अधुना मधु अधुना¶¶ अत्रापि न प्रसज्येत । प्रत्यये शाकलं न भवति । कस्मिन् । यस्मात्स प्रत्ययो विहित इति ॥ इह तर्हि परमदिवा परमदिवे दिव उत् [६.१.१३१] इत्युत्वं प्राप्नोतीति ॥ अस्तु तर्ह्यविशेषेण । ननु चोक्तमुत्तरपदाधिकारो न प्रकल्पेतेति । वचनादुत्तरपदाधिकारो भविष्यति ॥

तर्हि वक्तव्यम् । न वक्तव्यम् । अनुवृत्तिः करिष्यते । इदमस्ति यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गम् [१.४.१३] । सुप्तिङन्तं पदम् [१४] । यस्मात्सुप्तिङ्विधिस्तदादि सुबन्तं च । नः क्ये [१५] । नान्तं क्ये पदसंज्ञं भवति यस्मात्क्यविधिस्तदादि सुबन्तं च । सिति च [१६] । सिति च पूर्वं पदसंज्ञं भवति यस्मात्सिद्विधिस्तदादि

सुबन्तं च । स्वादिष्वसर्वनामस्थाने [१७] । स्वादिष्वसर्वनामस्थाने पूर्वं पदसंज्ञं भवति यस्मात्स्वादिविधिस्तदादि सुबन्तं च । यचि भम् [१८] । यजादिप्रत्यये पूर्वं भं भवति यस्माद्यजादिविधिस्तदादि सुबन्तं च ॥ इह तर्हि परमवाक् असर्वनामस्थान इति प्रतिषेधः प्राप्नोति । अस्तु तस्याः प्रतिषेधो या स्वादौ पदमिति पदसंज्ञा या तु सुबन्तं पदमिति पदसंज्ञा सा भविष्यति । सत्येतत्प्रत्यय आसीदनया भविष्यत्यनया न भविष्यतीति । लुप्ते इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एवावधेः सुबन्तं पदमिति । अस्ति च प्रत्ययलक्षणेन सर्वनामस्थानपरतेति कृत्वा प्रतिषेधाश्च बलीयांसो भवन्तीति प्रतिषेधः प्राप्नोति ॥ नाप्रतिषेधात् । नायं प्रसज्यप्रतिषेधः सर्वनामस्थाने नेति । किं तर्हि । पर्युदासो ऽयं यदन्यत्सर्वनामस्थानादिति । सर्वनामस्थाने ऽव्यापारः । यदि केनचित्प्राप्नोति तेन भविष्यति । पूर्वेण च प्राप्नोति ॥ अप्राप्तेर्वा । अथवानन्तरा या प्राप्तिः सा प्रतिषिध्यते । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति । ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते । नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥ यद्येवं परमवाचौ परमवाच इति सुप्तिङन्तं पदमिति पदसंज्ञा प्राप्नोति । एवं तर्हि योगविभागः करिष्यते । स्वादिषु पूर्वं पदसंज्ञं भवति । ततः सर्वनामस्थाने ऽयचि । पूर्वं पदसंज्ञं भवति । ततो भम् । भसंज्ञं भवति यजाद्यसर्वनामस्थान इति ॥ यदि तर्हि सावपि पदं भवत्येचः प्लुतविकारे पदान्तग्रहणं चोदयिष्यति* इह मा भूत् भद्रं करोषि गौरिति तस्मिन्क्रियमाणे ऽपि प्राप्नोति । वाक्यपदयोरन्त्यस्येत्येवं तत् ॥ इह तर्हि दधिसेचौ दधिसेचः सात्पदाद्योरिति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति । मा भूदेवं पदस्यादिः पदादिः पदादेर्नेति । कथं तर्हि । पदादादिः पदादिः पदादेर्नेत्येवं भविष्यति । नैवं शक्यम् । इहापि प्रसज्येत । ऋक्षु वाक्षु त्वक्षु कुमारीषु किशोरीष्विति । सात्प्रतिषेधो ज्ञापकः स्वादिषु पदत्वेन येषां पदसंज्ञा न तेभ्यः प्रतिषेधो भवतीति ॥ इह तर्हि बहुसेचौ बहुसेचः । बहुजयं प्रत्ययः । अत्र पदादादिः पदादिः पदादेर्नेत्युच्यमाने ऽपि न सिध्यति । एवं तर्ह्युत्तरपदत्वे च पदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं भवतीति वक्ष्यामि । तन्नियमार्थं भविष्यति पदादिविधावेव न पदान्तविधाविति ॥ कथं बहुसेचौ बहुसेचः । बहुच्पूर्वस्य च पदादिविधावेव न पदान्तविधाविति ॥

द्वन्द्वे ऽन्त्यस्य ॥ ७ ॥

द्वन्द्वे ऽन्त्यस्य लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् । वाक्स्रुक्त्वचम् ॥

इह अभूवन्निति* प्रत्ययलक्षणेन जुस्भावः प्राप्नोति† ।

सिच उसो ऽप्रसङ्ग आकारप्रकरणात् ॥ ८ ॥

सिच उसो ऽप्रसङ्गः । किं कारणम् । आकारप्रकरणात् । आतः [३.४.११०] इत्येतन्नियमार्थं भविष्यति । आत एव न सिज्लुगन्तान्नान्यस्मात्सिज्लुगन्तादिति ॥ इह इति युष्मत्पुत्रो ददाति इत्यस्मत्पुत्रो ददातीत्यत्र प्रत्ययलक्षणेन युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ [८.१.२०] इति वान्नावादयः प्राप्नुवन्ति ।

युष्मदस्मदोः स्थग्रहणात् ॥ ९ ॥

स्थग्रहणं तत्र क्रियते तच्छ्रूयमाणविभक्तिविशेषणं विज्ञास्यते । अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम् । किम् । सविभक्तिकस्य वान्नावादयो यथा स्युरिति । नैतदस्ति प्रयोजनम् । पदस्य [१६] इति वर्तते विभक्त्यन्तं च पदं तत्रान्तरेणापि स्थग्रहणं सविभक्तिकस्यैव भविष्यति । भवेत्सिद्धं यत्र विभक्त्यन्तं पदं यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति । ग्रामो वां दीयते । ग्रामो नौ दीयते । जनपदो वां दीयते । जनपदो नौ दीयते । सर्वग्रहणमपि प्रकृतमनुवर्तते‡ तेन सविभक्तिकस्यैव भविष्यति ॥ इह चक्षुस्कामं याजयांचकारेति§ तिङ्ङतिङः [८.१.२८] इति तस्य च निघातस्तस्माच्चानिघातः प्राप्नोति ।

आमि लिङ्लोपात्तस्य चानिघातस्तस्माच्च निघातः ॥ १० ॥

आमि लिङ्लोपात्तस्य चानिघातस्तस्माच्च निघातः सिद्धो भविष्यति ॥

अङ्गाधिकार इष्टौ विधिप्रतिषेधौ ॥ ११ ॥

अङ्गाधिकारे इष्टौ विधिप्रतिषेधौ न सिध्यतः । [illegible]¶ । अङ्गस्येतीष्टौ विधिप्रतिषेधौ न प्राप्नुतः** ॥

[illegible] च ॥ १२ ॥

किं च । इष्टश्च विधिप्रतिषेधौ । [illegible] । [illegible] । [illegible] ॥

इह [illegible] प्रत्ययलक्षणेन [illegible] ।

[illegible]

यदि पुनर्न लुमता तस्मिन्निल्युच्येत । अथ न लुमता तस्मिन्नित्युच्यमाने किं सिद्धमेतद्भवतीटौ विधिप्रतिषेधौ क्रमेर्दीर्घत्वं च । बाढं सिद्धम् । नेटौ विधिप्रतिषेधौ परस्मैपदेष्वित्युच्यते । कथं तर्हि । सकारादाविति तद्विशेषणं परस्मैपदग्रहणम् । न खल्वपि क्रमेर्दीर्घत्वं परस्मैपदेष्वित्युच्यते । कथं तर्हि । शितीति तद्विशेषणं परस्मैपदग्रहणम् ॥

न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे ॥ १३ ॥

न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे न सिध्यन्ति । अवधि भवता दस्युः । अगायि भवता ग्रामः । अध्यगायि भवतानुवाकः । तलोपे कृते* लुङीति हनिणिङादेशा न प्राप्नुवन्ति† ॥ नैष दोषः । न लुङीति हनिणिङादेशा उच्यन्ते । किं तर्हि । आर्धधातुक इति तद्विशेषणं लुङ्ग्रहणम् ॥ इह च सर्वस्तोमः सर्वपृष्ठः सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति । तच्चापि वक्तव्यम् । न वक्तव्यम् । न लुमताङ्गस्येत्येव सिद्धम् । कथम् । न लुमता लुप्ते ऽङ्गाधिकारः प्रतिनिर्दिश्यते । किं तर्हि । यो ऽसौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न भवति । एवमपि सर्वस्वरो न सिध्यति । कर्तव्यो ऽत्र यत्नः ॥

अलो ऽन्त्यात्पूर्व उपधा ॥ १ । १ । ६५ ॥

किमिदमल्ग्रहणमन्त्यविशेषणम् । एवं भवितुमर्हति ।

उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातप्रतिषेधः ॥ १ ॥

उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातस्य प्रतिषेधो वक्तव्यः । संघातस्योपधासंज्ञा प्राप्नोति । तत्र को दोषः । शास इदङ्हलोः [६ ४.३४] शिष्टः शिष्टः । संघातस्येत्त्वं प्राप्नोति ॥ यदि पुनरलन्त्यादित्युच्येत । एवमप्यन्त्यो ऽविशेषितो भवति । तत्र को दोषः । संघातादपि पूर्वस्योपधासंज्ञा प्रसज्येत । तत्र को दोषः । शास इदङ्हलोः शिष्टः शिष्टवान् । शकारस्येत्त्वं प्रसज्येत । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तमुपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातप्रतिषेध इति । नैष दोषः । अन्त्यविज्ञानात्सिद्धम् । सिद्धमेतत् । कथम् । अलो ऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति‡ ।

* ६ ४ १०४ † ३ ४, ४३, ४५ ५० ‡ १ १ ५०

अन्त्यविज्ञानात्सिद्धमिति चेन्नानर्थके ऽलोऽन्त्यविधिरनभ्यासविकारे ॥ २ ॥

अन्त्यविज्ञानात्सिद्धमिति चेत्तन्न । किं कारणम् । नानर्थके ऽलोऽन्त्यविधिरनभ्यासविकारे । अनर्थके ऽलोऽन्त्यविधिर्नेत्येषा परिभाषा कर्तव्या । किमविशेषेण । नेत्याह । अनभ्यासविकारे । अभ्यासविकारान्वर्जयित्वा । भृञामित् [७.४.७६] अर्तिपिपर्त्योश्च [७७] इति ॥ कान्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनमव्यक्तानुकरणस्यात इतौ* ॥ ३ ॥

अन्त्यस्य प्राप्नोति । अनर्थकेऽलोऽन्त्यविधिर्न भवतीति न दोषो भवति ॥ नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति नान्त्यस्य पररूपं भवतीति यदयं नाम्रेडितस्यान्त्यस्य तु वा [६.१.९९] इत्याह ॥

घ्वसोरेद्धावभ्यासलोपश्च ॥ ४ ॥

घ्वसोरेद्धावभ्यासलोपश्च [६.४.११९] इत्यन्त्यस्य प्राप्नोति । अनर्थके ऽलो ऽन्त्यविधिर्नेति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । पुनर्लोपवचनसामर्थ्यात्सर्वस्य भविष्यति ॥ अथवा शिल्लोपः करिष्यते स शित्सर्वस्येति† सर्वादेशो भविष्यति । स तर्हि शकारः कर्तव्य । न कर्तव्य । क्रियते न्यास एव । द्विशकारको निर्देश । घ्वसोरेद्धावभ्यासलोपश्श्चेति ॥

आपि लोपो ऽको ऽनचि ॥ ५ ॥

तिष्ठति सूत्रम् ‡ । अन्यथा व्याख्यायते । आपि हलि लोप इत्यन्त्यस्य प्राप्नोति । अनर्थके ऽलो ऽन्त्यविधिर्नेति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । अन एव लोपं वक्ष्यामि । तदनो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अनाप्यकः [७.२.११२] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । हलीत्येषा सप्तमी अनिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१.१.६६] इति ॥

अत्र लोपो ऽभ्यासस्य ॥ ६ ॥

अत्र लोपो ऽभ्यासस्य [७.४.५८] इत्यन्त्यस्य प्राप्नोति । नानर्थके ऽलोऽन्त्यविधिरिति न दोषो भवति ॥ एतदपि नास्ति प्रयोजनम् । अत्रग्रहणसामर्थ्यात्सर्वस्य

[illegible]

भविष्यति ॥ अस्त्यन्यदत्रग्रहणस्य प्रयोजनम् । किम् । सन्नधिकारोऽपेक्ष्यते । इह मा भूत् । दधौ ददौ । अन्तरेणाप्यत्रग्रहणं सन्नधिकारमपेक्षिष्यामहे ॥ संस्तर्हि सकारादिरपेक्ष्यते सनि सकारादाविति । इह मा भूत् । जिज्ञपयिषति । अन्तरेणाप्यत्रग्रहणं सनं सकारादिमपेक्षिष्यामहे ॥ प्रकृतयस्तर्ह्यपेक्ष्यन्ते । एतासां प्रकृतीनां लोपो यथा स्यात् । इह मा भूत् । पिपक्षति यियक्षति । अन्तरेणाप्यत्रग्रहणमेताः प्रकृतीरपेक्षिष्यामहे ॥ विषयस्तर्ह्यपेक्ष्यते । मुचोऽकर्मकस्य गुणो वा [७.४.५७] इति । इह मा भूत् । मुमुक्षति गामिति । अन्तरेणाप्यत्रग्रहणमेतं विषयमपेक्षिष्यामहे । कथम् । अकर्मकस्येत्युच्यते तेन यत्रैवायं मुचिरकर्मकस्तत्रैव भविष्यति ॥ तस्मान्नार्थोऽनया परिभाषया नानर्थकेऽलोऽन्त्यविधिरिति ॥

अलोऽन्त्यात्पूर्वोऽलुपधेति वा ॥ ७ ॥

अथवा व्यक्तमेव पठितव्यमलोऽन्त्यात्पूर्वोऽलुपधासंज्ञो भवतीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

अवचनाल्लोकविज्ञानात्सिद्धम् ॥ ८ ॥

अन्तरेणापि वचनं लोकविज्ञानात्सिद्धमेतत् । तद्यथा । लोकेऽमीषां ब्राह्मणानामन्त्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोऽन्त्यस्तथाजातीयकोऽन्त्यात्पूर्व आनीयते ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ १ । १ । ६६ ॥

तस्मादित्युत्तरस्य ॥ १ । १ । ६७ ॥

किमुदाहरणम् । इह तावत्तस्मिन्निति निर्दिष्टे पूर्वस्येति । इको यणचि [६.१.७७] दध्यत्र मध्वत्र । इह तस्मादित्युत्तरस्येति । द्व्यन्तरुपसर्गेभ्योऽप ईत् [६.३.९७] द्वीपम् अन्तरीपम् समीपम् ॥ अन्यथाजातीयकेन शब्देन निर्देशः क्रियतेऽन्यथाजातीयक उदाह्रियते । किं तर्ह्युदाहरणम् । इह तावत्तस्मिन्निति निर्दिष्टे पूर्वस्येति तस्मिन्नणि च युष्माकास्माकौ [४.३.२] इति । तस्मादित्युत्तरस्येति तस्माच्छसो नः पुंसि [६.१.१०३] इति ॥ इदं चाप्युदाहरणमिको यणचि द्व्यन्तरुपसर्गेभ्योऽप ईदिति । कथम् । सर्वनामायं निर्देशः क्रियते सर्वनाम च सामान्यवाचि । तत्र सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति ॥ किं पुनः सामान्यं को वा

विशेषः । गौः सामान्यं कृष्णो विशेषः । न तर्हीदानीं कृष्णः सामान्य भवति गौर्विशेषो भवति । भवति च । यदि तर्हि सामान्यमपि विशेषो विशेषो ऽपि सामान्यं सामान्यविशेषौ न प्रकल्पेते । प्रकल्पेते च । कथम् । विवक्षातः । यदास्य गौः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन तदा गौः सामान्यं कृष्णो विशेषः । यदा कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन विवक्षितस्तदा कृष्णः सामान्यं गौर्विशेषः ॥ अपर आह । प्रकल्पेते च । कथम् । पितापुत्रवत् । तद्यथा । स एव कंचित्प्रति पिता भवति कंचित्प्रति पुत्रो भवति । एवमिहापि स एव कंचित्प्रति सामान्यं कंचित्प्रति विशेषः ॥ एते खल्वपि नैर्देशिकानां वार्त्ततरका भवन्ति ये सर्वनाम्ना निर्देशाः क्रियन्ते । एतैर्हि बहुतरकं व्याप्यते ॥ अथ किमर्थमुपसर्गेण निर्देशः क्रियते । शब्दे सप्तम्या निर्दिष्टे पूर्वस्य कार्यं यथा स्यादर्थे मा भूत् । जनपदे अतिशायन इति* । किं गतमेतदुपसर्गेणाहोस्विच्छब्दाधिक्यादर्थाधिक्यम् । गतमित्याह । कथम् । निरयं बहिर्भावे वर्तते । तद्यथा । निष्क्रान्तो देशान्निर्देशः । बहिर्देश इति गम्यते । शब्दश्च शब्दाद्बहिर्भूतो ऽर्थो ऽबहिर्भूतः ॥ अथ निर्दिष्टग्रहणं किमर्थम् ।

निर्दिष्टग्रहणमानन्तर्यार्थम् ॥ १ ॥

निर्दिष्टग्रहणं क्रियत आनन्तर्यार्थम् । आनन्तर्यमात्रे कार्यं यथा स्यात् । इको यणचि । दध्यत्र मध्वत्र । इह मा भूत् । समिधौ समिधः । दृषदौ दृषदः ॥ किमर्थं पुनरिदमुच्यते ।

तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम् ॥ २ ॥

तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थो ऽयमारम्भः । ग्रामे देवदत्तः । पूर्वः पर इति संदेहः । ग्रामाद्देवदत्तः । पूर्वः पर इति संदेहः । एवमिहापीको यणचि । दध्युदकं पचत्योदनम् । उभाविकावुभावचौ । अचि पूर्वस्याचि परस्येति संदेहः । तिङ्ङतिङः [८.१.२८] इत्यतिङः पूर्वस्यातिङः परस्येति संदेहः । इष्यते चाचि पूर्वस्य स्यादतिङः परस्येति तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । अथ यत्रोभयं निर्दिश्यते किं तत्र पूर्वस्य कार्यं भवत्याहोस्वित्परस्येति ॥

* [illegible]

उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः ॥ ३ ॥

उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशो भविष्यति ॥ किं प्रयोजनम् ।

प्रयोजनमतो लसार्वधातुकानुदात्तत्वे ॥ ४ ॥

वक्ष्यति तास्यादिभ्यो ऽनुदात्तत्वे सप्तमीनिर्देशो ऽभ्यस्तसिजर्थ इति* । तस्मिन् क्रियमाणे तास्यादिभ्यः परस्य लसार्वधातुकस्य लसार्वधातुके परतस्तास्यादीनामिति संदेहः । तास्यादिभ्यः परस्य लसार्वधातुकस्य ॥

बहोरिष्ठादीनामादिलोपे ॥ ५ ॥

बहोरुत्तरेषामिष्ठेमेयसामिष्ठेमेयःसु परतो बहोरिति संदेहः† । बहोरुत्तरेषामिष्ठेमेयसाम् ॥

गोतो णित्‡ ॥ ६ ॥

गोतः परस्य सर्वनामस्थानस्य सर्वनामस्थाने परतो गोत इति संदेहः । गोतः परस्य सर्वनामस्थानस्य ॥

रुदादिभ्यः सार्वधातुके§ ॥ ७ ॥

रुदादिभ्यः परस्य सार्वधातुकस्य सार्वधातुके परतो रुदादीनामिति संदेहः रुदादिभ्यः परस्य सार्वधातुकस्य ॥

आने मुगीदासः¶ ॥ ८ ॥

आस उत्तरस्यानस्याने परत आस इति संदेहः । आस उत्तरस्यानस्य ॥

आमि सर्वनाम्नः सुट्** ॥ ९ ॥

सर्वनाम्न उत्तरस्याम आमि परतः सर्वनाम्न इति संदेहः । सर्वनाम्न उत्तरस्यामः ॥

घेर्ङित्याण्नद्याः†† ॥ १० ॥

नद्या उत्तरेषां ङितां ङित्सु परतो नद्या इति संदेहः । नद्या उत्तरेषां ङिताम् ॥

याडापः‡‡ ॥ ११ ॥

आप उत्तरस्य ङितो ङिति परत आप इति संदेहः । आप उत्तरस्य ङितः ॥

* ६.१.१८६. † ६.४.१५८ ‡ ७.१.९० § ७.२.७६ ¶ ७.२.८२, ८३
** ७.१.५२ †† ७.३.१११, ११२ ‡‡ ७.३.११३

ङमो ह्रस्वादचि ङमुण्नित्यम्* ॥ १२ ॥

ङम उत्तरस्याचो अचि परतो ङम इति संदेहः । ङम उत्तरस्याचः ॥

विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेधः ॥ १३ ॥

विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तो ऽयं विप्रतिषेधः । सर्वत्रैवात्र कृतसामर्थ्या सप्तम्यकृतसामर्थ्यां पञ्चमीति कृत्वा पञ्चमीनिर्देशो भविष्यति ॥

यथार्थं वा षष्ठीनिर्देशः ॥ १४ ॥

यथार्थं वा षष्ठीनिर्देशः कर्तव्यः । यत्र पूर्वस्य कार्यमिष्यते तत्र पूर्वस्य षष्ठी कर्तव्या । यत्र परस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्तव्या ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । अनेनैव प्रक्लृप्तिर्भविष्यति । तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी । तस्मादित्युत्तरस्य षष्ठी ॥ तर्त्तर्हि षष्ठीग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । षष्ठी स्थानेयोगा [१.१.४९] इति ॥

प्रकल्पकमिति चेन्नियमाभावः ॥ १५ ॥

प्रकल्पकमिति चेन्नियमस्याभावः । उक्तं चैतन्नियमार्थो ऽयमारम्भ इति ॥ प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युः । तत्र को दोषः । गुप्तिज्किद्भ्यः सन् [३.१.५] । गुप्तिज्किद्भ्य इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्तस्मादित्युत्तरस्येति । अस्तु । न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतः सनः सन्नेव भविष्यति । नैवं शक्यम् । इत्संज्ञा न प्रकल्पेत । उपदेश इतीत्संज्ञोच्यते† ॥

प्रकृतिविकाराव्यवस्था च ॥ १६ ॥

प्रकृतिविकारयोश्च व्यवस्था न प्रकल्पते । इको यणचि । अचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्तस्मिन्निति निर्दिष्टे पूर्वस्येति ॥

सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः ॥ १७ ॥

सप्तमीपञ्चम्योश्च भावादुभयत्रैव षष्ठी प्राप्नोति । तास्यादिभ्य इत्येषा पञ्चमी लसार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत्तस्मादित्युत्तरस्येति । तथा लसार्वधातुक इत्येषा सप्तमी तास्यादिभ्य इति पञ्चम्याः षष्ठीं प्रकल्पयेत्तस्मिन्निति निर्दिष्टे पूर्वस्येति । तत्र को दोषः । तत्रोभयकार्यप्रसङ्गः । उभयोः कार्यं तत्र प्राप्नोति ॥ नैष

* ८.३.३२ † १.३.२

दोषः। यत्तावदुच्यते प्रकल्पकमिति चेन्नियमाभाव इति मा भून्नियमः। सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते पञ्चमीनिर्दिष्टे परस्य। यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यत एवं पञ्चमीनिर्दिष्टे परस्य नोत्सहते सप्तमीनिर्दिष्टे परस्य कार्यं भवितुं नापि पञ्चमीनिर्दिष्टे पूर्वस्य॥ यदप्युच्यते प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युरिति सन्तु प्रकल्पिकाः। ननु चोक्तं गुप्तिज्किद्भ्यः सन्नित्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्तस्मादित्युत्तरस्येति। परिहृतमेतत्न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतः सनः सन्नेव भविष्यतीति। ननु चोक्तं नैवं शक्यमित्संज्ञा न प्रकल्पेतोपदेश इतीत्संज्ञोच्यत इति। स्यादेष दोषो यदीत्संज्ञादेशं प्रतीक्षेत। तत्र खलु कृतायामित्संज्ञायां लोपे च कृत आदेशो भविष्यति। उपदेश इति हीत्संज्ञोच्यते। अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यं यदा चोत्पन्नः संस्तदा कृतसामर्थ्या पञ्चमीति कृत्वा प्रक्लृप्तिर्न भविष्यति॥ यदप्युच्यते प्रकृतिविकाराव्यवस्था चेति तत्रापि कृता प्रकृतौ षष्ठीक इति विकृतौ प्रथमा यणिति यत्र च नाम सौत्री षष्ठी नास्ति तत्र प्रक्लृप्त्या भवितव्यम्। अथवास्तु तावदिको यणचीति यत्र नाम सौत्री षष्ठी। यदि चेदानीमचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्तस्मिन्निति निर्दिष्टे पूर्वस्येत्यस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतो यणो यणेव भविष्यति॥ यदप्युच्यते सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्ग इत्याचार्यप्रवृत्तिर्ज्ञापयति नोभे युगपत्प्रकल्पिके भवत इति यदयमेकः पूर्वपरयोः [६.१.८४] इति पूर्वपरग्रहणं करोति॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ १ । १ । ६८ ॥

रूपग्रहणं किमर्थं न स्वं शब्दस्याशब्दसंज्ञा भवतीत्येव रूपं शब्दस्य संज्ञा भविष्यति। न ह्यन्यत्स्वं शब्दस्यास्त्यन्यदतो रूपात्। एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्योऽस्त्यन्यद्रूपात्स्वं शब्दस्येति। किं पुनस्तत्। अर्थः। किमेतस्य ज्ञापने प्रयोजनम्। अर्थवद्ग्रहणे नानर्थकस्येत्येषा परिभाषा न कर्तव्या भवति॥

किमर्थं पुनरिदमुच्यते।

शब्देनार्थगतेरर्थस्यासंभवात्तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम् ॥ १ ॥

शब्देनोच्चारितेनार्थो गम्यते। गामानय दध्यशानेत्यर्थ आनीयते अर्थश्च भुज्यते। अर्थस्यासंभवात्। इह व्याकरणेऽर्थे कार्यस्यासंभवः। अग्नेर्ढक् [४.२.३३] इति

न शक्यते ऽङ्गारेभ्यः परो ढक्कर्तुम् । शब्देनार्थगतेरर्थस्यासंभवाद्यावन्तस्तद्वाचिनः शब्दास्तावद्भ्यः सर्वेभ्य उत्पत्तिः प्राप्नोति । इष्यते च तस्मादेव स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम् । एवमर्थमिदमुच्यते ॥

न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः ॥ २ ॥

न वैतत्प्रयोजनमस्ति । किं कारणम् । शब्दपूर्वको ह्यर्थे संप्रत्ययः । शब्दपूर्वको ह्यर्थस्य संप्रत्ययः । आतश्च शब्दपूर्वको यो ऽपि ह्यसावाहूयते नाम्ना नाम यदानेन नोपलब्धं भवति तदा पृच्छति किं भवानाहेति । शब्दपूर्वकश्चार्थस्य संप्रत्यय इह च व्याकरणे शब्दे कार्यस्य संभवो ऽर्थे ऽसंभवस्तस्मादर्थनिवृत्तिः । तस्मादर्थनिवृत्तिर्भविष्यति ॥ इदं तर्हि प्रयोजनमशब्दसंज्ञेति वक्ष्यामीति । इह मा भूत् । दाधा घ्वदाप् [१.१.२०] तरप्तमपौ घः [२२] इति ।

संज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् ॥ ३ ॥

संज्ञाप्रतिषेधश्चानर्थकः । शब्दसंज्ञायां स्वरूपविधिः कस्मान्न भवति । वचनप्रामाण्यात् । शब्दसंज्ञावचनसामर्थ्यात् ॥ ननु च वचनप्रामाण्यात्संज्ञिनां संप्रत्ययः स्यात्स्वरूपग्रहणाच्च संज्ञायाः । एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति शब्दसंज्ञायां न स्वरूपविधिर्भवतीति यदयं ष्णान्ता षट् [१.१.२४] इति षकारान्तायाः संख्यायाः षट्संज्ञां शास्ति । इतरथा हि वचनप्रामाण्याच्च नकारान्तायाः संख्यायाः संप्रत्ययः स्यात्स्वरूपग्रहणाच्च षकारान्तायाः । नैतदस्ति ज्ञापकं न हि षकारान्ता संज्ञा । का तर्हि । डकारान्ता । असिद्धं जश्त्वं* तस्यासिद्धत्वात्षकारान्ता ॥ मन्त्राद्यर्थं तर्हीदं वक्तव्यम् । मन्त्रे ऋचि यजुषीति यदुच्यते तन्मन्त्रशब्द ऋक्शब्दे च यजुःशब्दे च मा भूत् ।

मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम् ॥ ४ ॥

मन्त्राद्यर्थमिति चेत्तन्न । किं कारणम् । शास्त्रस्य सामर्थ्यादर्थस्य गतिर्भविष्यति । मन्त्रे ऋचि यजुषीति यदुच्यते मन्त्रशब्द ऋक्शब्दे च यजुःशब्दे च तस्य कार्यस्य संभवो नास्तीति कृत्वा मन्त्रादिसहचरितो यो ऽर्थस्तस्य गतिर्भविष्यति साहचर्यात् ॥

सित्तद्विशेषाणां वृक्षाद्यर्थम् ॥ ५ ॥

सिन्निर्देशः कर्तव्यः । ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति । किं प्रयो-

* ८.२.३९

जनम् । वृक्षाद्यर्थम् । विभाषा वृक्षमृग [२ ४ १२] इति । प्लक्षन्यग्रोधम् प्लक्षन्यग्रोधाः ॥

पित्पर्यायवचनस्य च स्वाद्यर्थम् ॥ ६ ॥

पिन्निर्देशः कर्तव्यः । ततो वक्तव्यं पर्यायवचनस्य तद्विशेषाणां च ग्रहणं भवति स्वस्य च रूपस्येति । किं प्रयोजनम् । स्वाद्यर्थम् । स्वे पुषः [३ ४ ४०] । स्वपोषं पुष्यति । रैपोषम् विद्यापोषम् गोपोषम् अश्वपोषम् ॥

जित्पर्यायवचनस्यैव राजाद्यर्थम् ॥ ७ ॥

जिन्निर्देशः कर्तव्यः । ततो वक्तव्यं पर्यायवचनस्यैव ग्रहणं भवति । किं प्रयोजनम् । राजाद्यर्थम् । सभा राजामनुष्यपूर्वा [२ ४.२३] । इनसभम् ईश्वरसभम् । तस्यैव न भवति । राजसभा । तद्विशेषाणां च न भवति । पुष्यमित्रसभा चन्द्रगुप्तसभा ॥

झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ॥ ८ ॥

झिन्निर्देशः कर्तव्यः । ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति । किं प्रयोजनम् । मत्स्याद्यर्थम् । पक्षिमत्स्यमृगान्हन्ति [४.४.३५] । मात्स्यिकः । तद्विशेषाणाम् । शाफरिकः शाकुलिकः । पर्यायवचनानां न भवति । अजिह्मान्हन्तीति ॥ अस्येकस्य पर्यायवचनस्येष्यते । मीनान्हन्ति मैनिकः ॥

अणुदित्सवर्णस्य चाप्रत्ययः ॥ १ । १ । ६९ ॥

अप्रत्यय इति किमर्थम् । सनाशंसभिक्ष उः [३ २ १६८] । अ सांप्रतिके [४ ३ ९] ॥ अत्यल्पमिदमुच्यते ऽप्रत्यय इति । अप्रत्ययादेशटित्किन्मित इति वक्तव्यम् । प्रत्यय उदाहृतम् । आदेशे । इदम इश् [५ ३.२] । इत इह । टिति । लविता लवितुम्* । किति । बभूव† । मिति । हे ऽनड्वन्‡ ॥ टितः परिहारः । आचार्यप्रवृत्तिर्ज्ञापयति न टिता सवर्णानां ग्रहणं भवतीति यदयं ग्रहो ऽलिटि दीर्घत्वं शास्ति§ । नैतदस्ति ज्ञापकम् । नियमार्थमेतत्स्यात् । ग्रहो ऽलिटि दीर्घ एवेति । यत्तर्हि वृतो वा [७ २ ३८] इति विभाषां शास्ति ॥ सर्वेषामेव परिहारः । भाव्यमानेन सवर्णानां ग्रहणं नेत्येवं न भविष्यति ॥ प्रत्यये भूयान्परिहारः । अनभिधाना-

* ७.२.३५ † ६.४.८८ ‡ ७.१.९९ § ७.२.३७
2. 31

प्रत्ययः सवर्णान्न ग्रहीष्यति । यान्हि प्रत्ययः सवर्णग्रहणेन गृह्णीयान्न तैरर्थस्याभिधानं स्यात् । अनभिधानान्न भविष्यति ॥ इदं तर्हि प्रयोजनम् । इह केचित्प्रतीयन्ते केचित्प्रत्याय्यन्ते । ह्रस्वाः प्रतीयन्ते दीर्घाः प्रत्याय्यन्ते । यावद्ब्रूयात्प्रत्याय्यमानेन सवर्णानां ग्रहणं नेति तावदप्रत्यय इति । कं पुनर्दीर्घः सवर्णग्रहणेन गृह्णीयात् । ह्रस्वम् । मात्राधिक्यान्न ग्रहीष्यति । प्लुतं तर्हि गृह्णीयात् । अनण्त्वान्न ग्रहीष्यति । एवं तर्हि सिद्धे सति यदप्रत्यय इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति ॥

किमर्थं पुनरिदमुच्यते ।

अण्सवर्णस्येति स्वरानुनासिक्यकालभेदात् ॥ १ ॥

अण्सवर्णस्येत्युच्यते । स्वरभेदादानुनासिक्यभेदात्कालभेदाच्चाण्सवर्णान्न गृह्णीयात् । इष्यते च सवर्णग्रहणं स्यादिति तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात् ॥ २ ॥

तत्र प्रत्याहारग्रहणे सवर्णानां ग्रहणं न प्राप्नोति । अकः सवर्णे दीर्घः [६.१.१०१] इति । किं कारणम् । अनुपदेशात् । यथाजातीयकानां संज्ञा कृता तथाजातीयकानां संप्रत्यायिका स्यात् । ह्रस्वानां च क्रियते ह्रस्वानामेव संप्रत्यायिका स्याद्दीर्घाणां न स्यात् ॥ ननु च ह्रस्वाः प्रतीयमाना दीर्घान्संप्रत्याययिष्यन्ति ।

ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचनम् ॥ ३ ॥

ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः संप्रत्यायको भवति न संप्रतीयमानः । तद्यथा । ऋगित्युक्ते स्वपाठमात्रं गम्यते नास्या अर्थो गम्यते ॥ एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते ।

वर्णपाठ उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः ॥ ४ ॥

वर्णपाठ उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः । किं पुनः सूत्रे क्रियत इत्यतोऽवरकाला । नेत्याह । सर्वथावरकालैव । वर्णानामुपदेशस्तावत् । उपदेशोत्तरकालेत्संज्ञा । इत्संज्ञोत्तरकाल आदिरन्त्येन सहेता [१.१.७१] इति प्रत्याहारः । प्रत्याहारोत्तरकाला सवर्णसंज्ञा । सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य

चाप्रत्यय इति । सैषोपदेशोत्तरकालावरकाला सती वर्णानामुत्पत्तौ निमित्तत्वाय कल्पयिष्यत इत्येतच्च ॥

तस्मादुपदेशः ॥ ५ ॥

तस्मादुपदेशः कर्तव्यः ॥

तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् ॥ ६ ॥

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति । अस्य च्वौ [७.४.३२] यस्येति च [६.४.१४८] । किं कारणम् । अनण्त्वात् । न ह्येते अणो ये ऽनुवृत्तिनिर्देशे । के तर्हि । ये ऽक्षरसमाम्नाय उपदिश्यन्ते ॥ एवं तर्ह्यनण्त्वादनुवृत्तौ नानुपदेशाच्च प्रत्याहारे न । उच्यते चेदमण्सवर्णान्गृह्णातीति । तत्र वचनाद्भविष्यति ॥

वचनाद्यत्र तन्नास्ति ।

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । य एते प्रत्याहाराणामादितो वर्णास्तैः सवर्णानां ग्रहणं यथा स्यात् ॥ एवं तर्हि

सवर्णे ऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् ।

सवर्णे ऽण्ग्रहणमपरिभाष्यम् । कुतः । आकृतिग्रहणात् । अवर्णाकृतिरुपदिष्टा सा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ॥ ननु चान्याकृतिरकारस्याकारस्य च ।

अनन्यत्वाच्च ॥ ८ ॥

अनन्याकृतिरकारस्याकारस्य च ।

अनेकान्तो ह्यनन्यत्वकरः ॥

यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति । तद्यथा । न यो गोश्च गोश्च भेदः सो ऽन्यत्वं करोति । यस्तु खलु गोश्चाश्वस्य च भेदः सो ऽन्यत्वं करोति ॥

अपर आह । सवर्णे ऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वम् । सवर्णे ऽण्ग्रहणमपरिभाष्यम् । आकृतिग्रहणादनन्यत्वं भविष्यति । अनन्याकृतिरकारस्याकारस्य च । अनेकान्तो ह्यनन्यत्वकरः । यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति । तद्यथा । न यो गोश्च गोश्च भेदः सो ऽन्यत्वं करोति । यस्तु खलु गोश्चाश्वस्य च भेदः सो ऽन्यत्वं करोति ॥

तद्वच्च हल्ग्रहणेषु ॥ १० ॥

एवं च कृत्वा हल्ग्रहणेषु सिद्धं भवति । झलो झलि [८.२.२६] अवात्ताम् अवात्तम् अवात्त । यत्रैतन्नास्त्यण्सवर्णान्गृह्णातीति । अनेकान्तो ह्यनन्यत्वकर इत्युक्तार्थम् ॥

द्रुतविलम्बितयोश्चानुपदेशात् ॥ ११ ॥

द्रुतविलम्बितयोश्चानुपदेशान्मन्यामह आकृतिग्रहणात्सिद्धमिति । यदयं कस्यांचिद्वृत्तौ वर्णानुपदिश्य सर्वत्र कृती भवति ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

वृत्तिपृथक्त्वं तु नोपपद्यते ॥ १२ ॥

वृत्तेस्तु पृथक्त्वं नोपपद्यते ॥

तस्मात्तत्र तपरनिर्देशात्सिद्धम् ॥ १३ ॥

तस्मात्तत्र तपरनिर्देशः कर्तव्यः । न कर्तव्यः । क्रियत एतन्न्यास एव । अतो भिस ऐस् [७.१.९] इति ॥

तपरस्तत्कालस्य ॥ १ । १ । ७० ॥

अयुक्तो ऽयं निर्देशः । तदित्यनेन कालः प्रतिनिर्दिश्यते तदित्ययं च वर्णः । तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम् ॥ कथं तर्हि निर्देशः कर्तव्यः । तत्कालकालस्येति । किमिदं तत्कालकालस्येति । तस्य कालस्तत्कालः । तत्कालः कालो यस्य सो ऽयं तत्कालकालः । तत्कालकालस्येति ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । उत्तरपदलोपो ऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्य सो ऽयमुष्ट्रमुखः । खरमुखः । एवं तत्कालकालस्तत्कालः । तत्कालस्येति ॥ अथवा साहचर्यात्ताच्छब्द्यं भविष्यति । कालसहचरितो वर्णो ऽपि काल एव ॥

किं पुनरिदं नियमार्थमाहोस्वित्प्रापकम् । कथं च नियमार्थं स्यात्कथं वा प्रापकम् । यद्यत्राण्ग्रहणमनुवर्तते ततो नियमार्थम् । अथ निवृत्तं ततः प्रापकम् ॥ कश्चात्र विशेषः ।

तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणम् ॥ १ ॥

तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति । येषाम् । उदात्तानुदात्तस्वरितानाम् ॥ अस्तु तर्हि प्रापकम् ॥

प्रापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः ॥ २ ॥

प्रापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतयोस्तु प्रतिषेधो वक्तव्यः ॥

विप्रतिषेधात्सिद्धम् ॥ ३ ॥

अण्सवर्णान्गृह्णातीत्येतदस्तु तपरस्तत्कालस्येति वा तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन । अण्सवर्णान्गृह्णातीत्यस्यावकाशः । ह्रस्वा अतपरा अणः । तपरस्तत्कालस्येत्यस्यावकाशः । दीर्घास्तपराः । ह्रस्वेषु तपरेषूभयं प्राप्नोति । तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन ॥ यद्येवं

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ॥ ४ ॥

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यं तथा मध्यमायां द्रुतविलम्बितयोस्तथा विलम्बितायां द्रुतमध्यमयोः । किं पुनः कारणं न सिध्यति । कालभेदात् । ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायां ये मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायाम् ॥

सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्ते ॥ ५ ॥

सिद्धमेतत् । कथम् । अवस्थिता वर्णा द्रुतमध्यमविलम्बितासु । किंकृतस्तर्हि वृत्तिविशेषः । वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्ते । वक्ता कश्चिदाश्वभिधायी भवति । आशु वर्णानभिधत्ते । कश्चिच्चिरेण कश्चिच्चिरतरेण । तद्यथा । तमेवाध्वानं कश्चिदाशु गच्छति कश्चिच्चिरेण गच्छति कश्चिच्चिरतरेण गच्छति । रथिक आशु गच्छत्याश्विकश्चिरेण पदातिश्चिरतरेण ॥ विषम उपन्यासः । अधिकरणमत्राध्वा व्रजतिक्रियायाः । तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्याताम् ॥ एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः । कथम् । भेर्याघातवत् । तद्यथा भेर्याघातः । भेरीमाहत्य कश्चिद्विंशति पदानि गच्छति कश्चित्त्रिंशत्कश्चिच्चत्वारिंशत् । स्फोटश्च तावानेव भवति ध्वनिकृता वृद्धिः ॥

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः ॥

आदिरन्त्येन सहेता ॥ १ । १ । ७१ ॥

आदिरन्त्येन सहेतेत्यसंप्रत्ययः संज्ञिनोऽनिर्देशात् ॥ १ ॥

आदिरन्त्येन सहेतेत्यसंप्रत्ययः । किं कारणम् । संज्ञिनोऽनिर्देशात् । न हि संज्ञिनो निर्दिश्यन्ते ॥

सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । आदिरन्त्येन सहेता गृह्यमाणः स्वस्य च रूपस्य ग्राहकस्तन्मध्यानां चेति वक्तव्यम् ॥

संबन्धिशब्दैर्वा तुल्यम् ॥ ३ ॥

संबन्धिशब्दैर्वा तुल्यमेतत् । तद्यथा संबन्धिशब्दाः । मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति । न चोच्यते स्वस्यां मातरि स्वस्मिन्पितरीति संबन्धाच्च गम्यते या यस्य माता यश्च यस्य पितेति । एवमिहाप्यादिरन्त्य इति संबन्धिशब्दावेतौ । तत्र संबन्धादेतद्गन्तव्यं यं प्रत्यादिरन्त्य इति च भवति तस्य ग्रहणं भवति स्वस्य च रूपस्येति ॥

येन विधिस्तदन्तस्य ॥ १ । १ । ७२ ॥

इह कस्मान्न भवति । इको यणचि [६.१.७७] दध्यत्र मध्वत्र । अस्तु । अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति* । नैवं शक्यम् । ये ह्यनेकाल आदेशास्तेषु दोषः स्यात् । एचोऽयवायावः [६.१.७८] इति । नैष दोषः । यथैव प्रकृतितस्तदन्तविधिर्भवत्येवमादेशतोऽपि भविष्यति । तत्रैजन्तस्यायादयोऽन्ता आदेशा भविष्यन्ति ॥ यदि चैवं क्वचिद्वैरूप्यं तत्र दोषः स्यात् । अपि चान्तरङ्गबहिरङ्गे न प्रकल्पेयाताम् । तत्र को दोषः । स्योनः स्योना । अन्तरङ्गलक्षणस्य यणादेशस्य† बहिरङ्गलक्षणो गुणो‡ बाधकः प्रसज्येत । ऊनशब्दं ह्याश्रित्य यणादेशो नशब्दमाश्रित्य गुणः ॥ अन्विधिश्च§ न प्रकल्पेत । द्यौः पन्थाः स इति¶ ॥ तस्मात्स्वरूपे तदन्तविधिरिति वक्तव्यम् । न वक्तव्यम् । येनेति करणे एषा तृतीया । अन्येन चान्यस्य विधिर्भवति । तद्यथा । देवदत्तस्य समानं शरधनुरेतेन च प्रह-

* [illegible] † [illegible] ‡ [illegible] § [illegible] ¶ [illegible]

दत्तः प्रतिविधत्ते । तथा संग्रामं हस्त्यश्वरथपदातिभिः । एवमिहाप्यचा धातोर्यत विधत्ते* । अकारेण प्रातिपदिकस्येञ् विधत्ते† ॥

येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः ॥ १ ॥

येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदन्तोपाधिताप्रसङ्गः । ये ग्रहणोपाधयस्ते ऽपि तदन्तोपाधयः स्युः । तत्र को दोषः । उतश्च प्रत्ययादसंयोगपूर्वात् [६.४.१०६] इत्यसंयोगपूर्वग्रहणमुकारान्तविशेषणं स्यात् । तत्र को दोषः। असंयोगपूर्वग्रहणेनेहैव पर्युदासः स्यात् । अक्ष्णुहि तक्ष्णुहीति । इह न स्यात् । आप्नुहि शक्नुहीति ॥ तथोदोष्ठ्यपूर्वस्य [७.१.१०२] इत्योष्ठ्यपूर्वग्रहणमृकारान्तविशेषणं स्यात् । तत्र को दोष । ओष्ठ्यपूर्वग्रहणेनेह च प्रसज्येत । संकीर्णमिति । इह च न स्यात् । निपूर्ताः पिण्डा इति ॥

सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । यथेष्टं विशेषणविशेष्ययोर्योगो भवति । यावता यथेष्टमिह तावदुतश्च प्रत्ययादसंयोगपूर्वादिति नासंयोगपूर्वग्रहणेनोकारान्तं विशेष्यते । किं तर्हि । उकार एव विशेष्यते । उकारो यो ऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति ॥ तथोदोष्ठ्यपूर्वस्येति नौष्ठ्यपूर्वग्रहणेन ऋकरान्तं विशेष्यते । किं तर्हि । ऋकार एव विशेष्यते । ऋकारो य ओष्ठ्यपूर्वस्तदन्तस्य धातोरिति ॥

समासप्रत्ययविधौ प्रतिषेधः ॥ ३ ॥

समासविधौ प्रत्ययविधौ च प्रतिषेधो वक्तव्यः ॥ समासविधौ तावत् । द्वितीया श्रितादिभिः समस्यते‡ । कष्टश्रितः नरकाश्रितः । कष्टं परमश्रित इत्यत्र मा भूत् ॥ प्रत्ययविधौ । नडस्यापत्यं नाडायनः§ । इह न भवति । सूत्रनडस्यापत्यं सौत्रनाडिः ॥ किमविशेषेण । नेत्याह ।

उगिद्वर्णग्रहणवर्जम् ॥ ४ ॥

उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा । उगिद्ग्रहणम् । भवती अतिभवती महती अतिमहती¶ । वर्णग्रहणम् । अत इञ् [४.१.९५] दाक्षिः प्लाक्षिः ॥ अस्ति चेदानीं कश्चित्केवलो ऽकारः प्रातिपदिकं यदर्थो विधिः स्यात् । अस्तीत्याह । अततेर्डः अः तस्यापत्यम् अत इञ् इः ॥

* ३.१.९७ † ४.१.९५ ‡ २.१.२४ § ४.१.९९ ¶ ४.१.६

अकच्श्नम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम् ॥ ५ ॥

अकज्वतः सर्वनामाव्ययविधौ श्नम्वतो धातुविधावुपसंख्यानं कर्तव्यम् । अकज्वतः । सर्वके विश्वके* । अव्ययविधौ । उच्चकैः नीचकैः† । श्नम्वतः । भिनत्ति छिनत्ति‡ ॥ किं पुनः कारणं न सिध्यति । इह तस्य वा ग्रहणं भवति तदन्तस्य वा न चेदं तन्नापि तदन्तम् ॥

सिद्धं तु तदन्तान्तवचनात् ॥ ६ ॥

सिद्धमेतत् । कथम् । तदन्तान्तवचनात् । तदन्तान्तस्येति वक्तव्यम् । किमिदं तदन्तान्तस्येति । तस्यान्तस्तदन्तः । तदन्तो ऽन्तो यस्य तदिदं तदन्तान्तम् । तदन्तान्तस्येति ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । उत्तरपदलोपो ऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः । खरमुखः । एवमिहापि तदन्तो ऽन्तो यस्य तदन्तस्येति ॥

तदेकदेशविज्ञानाद्वा सिद्धम् ॥ ७ ॥

तदेकदेशविज्ञानाद्वा पुनः सिद्धमेतत् । तदेकदेशभूतस्तद्ग्रहणेन गृह्यते । तद्यथा । गङ्गा यमुना देवदत्तेति । अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते । तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते ॥ विषम उपन्यासः । इह केचिच्छब्दा अव्यक्तपरिमाणानामर्थानां वाचका भवन्ति य एते संख्याशब्दाः परिमाणशब्दाश्च । पञ्च सप्तेत्येकेनाप्यपाये न भवन्ति । द्रोणः खार्याढकमिति नैवाधिके भवन्ति न न्यूने । केचिद्यावदेव तद्भवति तावदेवाहुर्य एते जातिशब्दा गुणशब्दाश्च । तैलं घृतमिति खार्यामपि भवन्ति द्रोणे ऽपि । शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रे ऽपि द्रव्ये । इमाश्चापि संज्ञा अव्यक्तपरिमाणानामर्थानां क्रियन्ते ताः केनाधिकस्य स्युः ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति यदयं नेदमदसोरकोः [७ १.११] इति सककारयोरिदमदसोः प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । इदमदसोः कार्यमुच्यमानं क प्रसङ्गो यत्सककारयोः स्यात् । पश्यति त्वाचार्यस्तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ततः सककारयोः प्रतिषेधं शास्ति ॥

यानि पुनरस्य योगस्य प्रयोजनानि ।

---

* [illegible] † [illegible] ‡ [illegible]

प्रयोजनं सर्वनामाव्ययसंज्ञायाम् ॥ ८ ॥

सर्वनामाव्ययसंज्ञायां प्रयोजनम्* । सर्वे परमसर्वे विश्वे परमविश्वे । उच्चैः परमोच्चैः नीचैः परमनीचैरिति ॥

उपपदविधौ भयाढ्यादिग्रहणम् ॥ ९ ॥

उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम्† । भयंकरः अभयंकरः । आढ्यंकरणम् स्वाढ्यंकरणम् ॥

ङीब्विधावुगिद्ग्रहणम् ॥ १० ॥

ङीब्विधावुगिद्ग्रहणं प्रयोजनम्‡ । भवती अतिभवती । महती अतिमहती ॥

प्रतिषेधे स्वस्रादिग्रहणम् ॥ ११ ॥

प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनम्§ । स्वसा परमस्वसा । दुहिता परमदुहिता ॥

अपरिमाणबिस्ताचितग्रहणं च प्रतिषेधे ॥ १२ ॥

अपरिमाणबिस्ताचितग्रहणं च प्रतिषेधे प्रयोजनम् । अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि [४.१.२२] । द्विबिस्ता द्विपरमबिस्ता । त्रिबिस्ता त्रिपरमबिस्ता । द्व्याचिता द्विपरमाचिता ॥

दिति ॥ १३ ॥

दितिग्रहणं च प्रयोजनम् । दितेरपत्यं दैत्यः । अदितेरपत्यमादित्यः । दित्यदित्यादित्य [४.१.८५] इत्यदितिग्रहणं न कर्तव्यं भवति ॥

रोण्या अण् ॥ १४ ॥

रोण्या अण्ग्रहणं च प्रयोजनम्¶ । आजकरोणः सैंहकरोणः ॥

तस्य च ॥ १५ ॥

तस्य चेति वक्तव्यम् । रौणः ॥ किं पुनः कारणं न सिध्यति । तदन्ताच्च तदन्तविधिना सिद्धं केवलाच्च व्यपदेशिवद्भावेन । व्यपदेशिवद्भावो ऽप्रातिपदिकेन । किं पुनः कारणं व्यपदेशिवद्भावो ऽप्रातिपदिकेन । इह सूत्रान्तादकाभ्यनानि दशान्ताड्ढः

* १.१.२७, २९. † ३.२.४३, ४४. ‡ ४.१.६. § ४.१.१०. ¶ ४.२.७८.

भवतीति* केवलादुत्पत्तिर्मा भूदिति । नैतदस्ति प्रयोजनम् । सिद्धमत्र तदन्ताच्च तदन्तविधिना केवलाच्च व्यपदेशिवद्भावेन । सो ऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः सूत्रान्तादेव दशान्तादेवेति । नात्र तदन्तादुत्पत्तिः प्राप्नोति । इदानीमेव ह्युक्तं समासप्रत्ययविधौ प्रतिषेध इति ॥ सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति यदयं पूर्वादिनिः सपूर्वाच्च [५.२.८६,८७] इत्याह । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । सपूर्वात्पूर्वादिनि वक्ष्यामीति । यत्तर्हि योगविभागं करोति । इतरथा हि पूर्वात्सपूर्वादिनिरित्येव ब्रूयात् ॥ किं पुनरयमस्यैव शेषस्तस्य चेति । नेत्याह । यच्चानुक्रान्त यच्चानुक्रंस्यते सर्वस्यैव शेषस्तस्य चेति ॥

रथसीताहलेभ्यो यद्विधौ ॥ १६ ॥

रथसीताहलेभ्यो यद्विधौ प्रयोजनम्† । रथ्यः परमरथ्यः । सीत्यम् परमसीत्यम् । हल्या परमहल्या ॥

सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥ १७ ॥

सुसर्वार्धदिक्शब्देभ्यो जनपदस्य प्रयोजनम्‡ । सुपाञ्चालकः सुमागधकः । सु ॥ सर्व । सर्वपाञ्चालकः सर्वमागधकः । सर्व ॥ अर्ध । अर्धपाञ्चालकः अर्धमागधकः । अर्ध ॥ दिक्शब्द । पूर्वपाञ्चालकः पूर्वमागधकः ॥

ऋतोर्वृद्धिमद्विधाववयवानाम् ॥ १८ ॥

ऋतोर्वृद्धिमद्विधाववयवानां प्रयोजनम्§ । पूर्वशारदम् अपरशारदम् । पूर्वनैदाघम् अपरनैदाघम् ॥

टञ्विधौ संख्यायाः ॥ १९ ॥

टञ्विधौ संख्यायाः प्रयोजनम्¶ । द्विशाटिकम् पञ्चशाटिकम् ॥

धर्मान्नञः ॥ २० ॥

धर्मान्नञः प्रयोजनम्** । धर्मं चरति धार्मिकः । अधर्मं चरत्याधार्मिकः । अधर्मांचेति†† न प्रत्ययं भवति ॥

---

* [illegible] † [illegible] ‡ [illegible] § [illegible] ¶ [illegible] ** [illegible] †† [illegible]

पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ॥ २१ ॥

पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वक्तव्यम् ॥ पदाधिकारे किं प्रयोजनम् ।

प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु* ॥ २२ ॥

इष्टकचितं चिन्वीत पक्वेष्टकचितं चिन्वीत । इषीकतूलेन मुञ्जेषीकतूलेन । मालभारिणी कन्या उत्पलमालभारिणी कन्या ॥ अङ्गाधिकारे किं प्रयोजनम् ।

महदप्स्वसृनप्तॄणां दीर्घविधौ ॥ २३ ॥

महदप्स्वसृनप्तॄणां दीर्घविधौ† प्रयोजनम् ॥ महान् परममहान् । महत् ॥ अप् । आपस्तिष्ठन्ति स्वापस्तिष्ठन्ति । अप् ॥ स्वसृ । स्वसा स्वसारौ स्वसारः परमस्वसा परमस्वसारौ परमस्वसारः । स्वसृ ॥ नप्तृ । नप्ता नप्तारौ नप्तारः । एवं परमनप्ता परमनप्तारौ परमनप्तारः ॥

पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् ॥ २४ ॥

पद्भावः प्रयोजनम्‡ । द्विपदः पश्य । अस्ति चेदानीं कश्चित्केवलः पाच्छब्दो यदर्थो विधिः स्यात् । नास्तीत्याह । एवं तर्ह्यङ्गाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्येदं प्रयोजनमुक्तम् । हिमकाषिहतिषु च [६.३.५४] । यथा पत्काषिणौ पत्काषिण एवं परमपत्काषिणौ परमपत्काषिणः । यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति पादस्य पदाज्यातिगोपहतेषु [६.३.५२] यथेह भवति । पादेनोपहतं पदोपहतम् । अत्रापि स्यात् । दिग्धपादेनोपहतं दिग्धपादोपहतमिति । एवं तर्ह्यङ्गाधिकार एव प्रयोजनम् । ननु चोक्तं नास्ति केवलः पाच्छब्द इति । अयमस्ति पादयतेरप्रत्ययः पात् । पदा पदे । पद् ॥ युष्मद् अस्मद्§ । यूयम् वयम् अतियूयम् अतिवयम् ॥ अस्थ्यादि¶ । अस्थ्ना दध्ना सक्थ्ना परमास्थ्ना परमदध्ना परमसक्थ्ना ॥ अनडुहो नुम्** । अनड्वान् परमानड्वान् ॥

द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणम् ॥ २५ ॥

द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणं प्रयोजनम्†† । द्यौः सुद्यौः । पन्थाः सुपन्थाः । मन्थाः सुमन्थाः परममन्थाः । पुमान् परमपुमान् । गौः सुगौः । सखा सखायौ

* ६.३.६५ † ६.४.१०; ११ ‡ ६.४.१३० § ७.२.८६; ९२. ¶ ७.१.७५.
** ७.१.८२ †† ७.१ ८४, ८५, ८९, ९०; ९२, ९८, ९३.

सखायः सुसखा सुसखायौ सुसखायः परमसखा परमसखायौ परमसखायः । चत्वारः परमचत्वारः । अनड्वाहः परमानड्वाहः । त्रयाणाम् परमत्रयाणाम् ॥

त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च ॥ २६ ॥

त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च प्रयोजनम् । सः अतिसः* । भस्त्रका भस्त्रिका निर्भस्त्रका निर्भस्त्रिका बहुभस्त्रका बहुभस्त्रिका† । स्त्रीग्रहणं च प्रयोजनम्‡ । स्त्रियौ स्त्रियः राजस्त्रियौ राजस्त्रियः ॥

वर्णग्रहणं च सर्वत्र ॥ २७ ॥

वर्णग्रहणं च सर्वत्र प्रयोजनम् । क्व सर्वत्र । अङ्गाधिकारे चान्यत्र च । अन्यत्रोदाहृतम् । अङ्गाधिकारे । अतो दीर्घो यञि सुपि च [७,३.१०१-१०२] इहैव स्यात् आभ्याम् । घटाभ्यामित्यत्र न स्यात् ॥

प्रत्ययग्रहणं चापञ्चम्याः ॥ २८ ॥

प्रत्ययग्रहणं चापञ्चम्याः प्रयोजनम् । यञिञोः फग्भवति§ । गार्ग्यायणः वात्स्यायनः परमगार्ग्यायणः परमवात्स्यायनः । अपञ्चम्या इति किमर्थम् । दृषत्तीर्णा परिषत्तीर्णा¶ ॥

अलैवानर्थकेन नान्येनानर्थकेनेति वक्तव्यम् । किं प्रयोजनम् । हन्ग्रहणे** प्लीहन्ग्रहणं मा भूत् । उद्गहणे†† गर्मुद्ग्रहणम् । स्त्रीग्रहणे‡‡ शास्त्रीग्रहणम् । संग्रहणे§§ पायसं करोतीति मा भूत् ॥ किमर्थमिदमुच्यते न पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेत्येव सिद्धं न चेदं तत्रापि तदुत्तरपदम् । तत्र वक्तव्यं भवति ॥ किं पुनरत्र ज्यायः । तदन्तविधिरेव ज्यायान् । इदमपि सिद्धं भवति । परमातिमहान् । एतद्धि नैव तत्रापि तदुत्तरपदम् ॥ अनिनस्मन्ग्रहणानि चार्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति । अन् । राज्ञेत्यर्थवता साम्नेत्यनर्थकेन¶¶ । अन् ॥ इन् । दण्डीत्यर्थवता वाग्मीत्यनर्थकेन*** । इन् ॥ अस् । सुपया इत्यर्थवता सुस्रोता इत्यनर्थकेन††† । अस् ॥ मन् । सुशर्मेत्यर्थवता सुप्रथिमेत्यनर्थकेन‡‡‡ । मन् ॥

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ २९ ॥

अल्ग्रहणेषु यस्मिन्विधिस्तदादाविति वक्तव्यम् । किं प्रयोजनम् । अचि श्नुधातु-

* ७.२.१०२ † ७.३.४७ ‡ ६.४.७९. § ४.१.१०१. ¶ ८.३.४१.
** ६.४.१२ †† ८.४.११ ‡‡ ६.४.८०. §§ ६.१.११०. ¶¶ ६.४.१४४
*** ६.४.१२, ११ ††† ६.४.१४ ‡‡‡ ४.१.११.

भ्रुवां य्वोरियङुवङौ [६.४.७७] इतीहैव स्यात् श्रियौ भ्रुवौ । श्रियः भ्रुव इत्यत्र न स्यात् ॥

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥ १ । १ । ७३ ॥

वृद्धिग्रहणं किमर्थम् । यस्याचामादिस्तद्वृद्धमितीयत्युच्यमाने शालाः शालिताः अत्रापि प्रसज्येत । वृद्धिग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ यस्यग्रहणं किमर्थम् । यस्येति व्यपदेशाय ॥ अथाज्ग्रहणं किमर्थम् । वृद्धिर्यस्यादिस्तद्वृद्धमितीयत्युच्यमान इहैव स्यात् । ऐतिकायनीयाः औपगवीयाः । इह न स्यात् । गार्गीयाः वात्सीया इति । अज्ग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथादिग्रहणं किमर्थम् । वृद्धिर्यस्याचां तद्वृद्धमितीयत्युच्यमाने सभासंनयने भवः साभासंनयन इत्यत्र प्रसज्येत । आदिग्रहणे पुनः क्रियमाणे न दोषो भवति ॥

वृद्धसंज्ञायामजसंनिवेशादनादित्वम् ॥ १ ॥

वृद्धसंज्ञायामजसंनिवेशादादिरित्येतन्नोपपद्यते । न ह्यचां संनिवेशो ऽस्ति ॥ ननु चैवं विज्ञायते ऽजेवादिरजादेरिति । नैवं शक्यम् । इहैव प्रसज्येत । औपगवीयाः । इह न स्यात् । गार्गीया इति ॥ एकान्तादित्वं तर्हि विज्ञायते ।

एकान्तादित्वे च सर्वप्रसङ्गः ॥ २ ॥

इहापि प्रसज्येत । सभासंनयने भवः साभासंनयन इति ॥

सिद्धमजाकृतिनिर्देशात् ॥ ३ ॥

सिद्धमेतत् । कथम् । अजाकृतिर्निर्दिश्यते ॥ एवमपि व्यञ्जनैर्व्यवहितत्वान्न प्राप्नोति ।

व्यञ्जनस्याविद्यमानत्वं यथान्यत्र ॥ ४ ॥

व्यञ्जनस्याविद्यमानवद्भावो वक्तव्यो यथान्यत्रापि व्यञ्जनस्याविद्यमानवद्भावो भवति । क्वान्यत्र । स्वरे ॥

वा नामधेयस्य ॥ ५ ॥

वा नामधेयस्य वृद्धसंज्ञा वक्तव्या । देवदत्तीयाः* दैवदत्ताः । यज्ञदत्तीयाः याज्ञदत्ताः ॥

* ४.२.११४.

गोत्रोत्तरपदस्य च ॥ ६ ॥

गोत्रोत्तरपदस्य च वृद्धसंज्ञा वक्तव्या । कम्बलचारायणीयाः ओदनपाणिनीयाः घृतरौढीयाः ॥

गोत्रान्ताद्वासमस्तवत् ॥ ७ ॥

गोत्रान्ताद्वासमस्तवत्प्रत्ययो भवतीति वक्तव्यम् । एतान्येवोदाहरणानि ॥ किमविशेषेण । नेत्याह ।

जिह्वाकात्यहरितकात्यवर्जम् ॥ ८ ॥

जिह्वाकात्यं हरितकात्यं च वर्जयित्वा । जैह्वाकाताः हारितकाताः ॥ किं पुनरत्र ज्यायः । गोत्रान्ताद्वासमस्तवदित्येव ज्यायः । इदमपि सिद्धं भवति । पिङ्गलकाण्वस्य छात्राः पैङ्गलकाण्वाः* ॥

त्यदादीनि च ॥ १ । १ । ७४ ॥

यस्याचामादिग्रहणमनुवर्तत उताहो न । किं चातः । यद्यनुवर्तते इह च प्रसज्येत त्वत्पुत्रस्य छात्रास्त्वात्पुत्राः मात्पुत्राः । इह च न स्यात् त्वदीयः मदीय इति । अथ निवृत्तमेङ् प्राचां देशे [१.१.७५] यस्याचामादिग्रहणं कर्तव्यम् ॥ एवं तर्ह्यनुवर्तते । कथं त्वात्पुत्राः मात्पुत्रा इति । संबन्धमनुवर्तिष्यते । वृद्धिर्यस्याचामादिस्तद्वृद्धम् । त्यदादीनि च वृद्धसंज्ञानि भवन्ति । वृद्धिर्यस्याचामादिस्तद्वृद्धम् । एङ् प्राचां देशे । यस्याचामादिग्रहणमनुवर्तते वृद्धिग्रहणं निवृत्तम् । तद्यथा । कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते । स यदा निष्कान्तारीभूतो भवति तदा सार्थं जहाति ॥

एङ् प्राचां देशे ॥ १ । १ । ७५ ॥

एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम् । सैपुरिकी सैपुरिका । स्कौनगरिकी स्कौनगरिकेति† ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे नवमगाह्निकम् ॥ पादश्च समाप्तः ॥

---

* ४.२.१११ † ४.२.११७

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ १ । २ । १ ॥

ङित्किद्वचने तयोरभावादप्रसिद्धिः ॥ १ ॥

ङित्किद्वचने तयोरभावान्ङकारककारयोरभावान्ङित्त्वकित्त्वयोरप्रसिद्धिः । सता *ह्यभिसंबन्धः शक्यते कर्तुं न चात्र ङकारककारावितौ पश्यामः । तद्यथा ।* चित्रगुर्देवदत्त इति यस्य ता गावो भवन्ति स एव ताभ्यां शब्दाभ्यां शक्यतेऽभिसंबन्द्धुम् ॥ भाष्येते तर्ह्यनेन । गाङ्कुटादिभ्योऽञ्णिन्ङिद्भवतीति । असंयोगाल्लिट् किद्भवतीति* ।

भवतीति चेदादेशप्रतिषेधः ॥ २ ॥

भवतीति चेदादेशस्य प्रतिषेधो वक्तव्यः । ङकारककारावितावादेशौ प्राप्नुतः । कथं पुनरित्संज्ञो नामादेशः स्यात् । किं हि वचनान्न भवति ॥ एवं तर्हि षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते न चात्र षष्ठीं पश्यामः । गाङ्कुटादिभ्य इत्येषा पञ्चम्यञ्णिदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१.१.६७] इति ॥ संज्ञाकरणं तर्हीदम् । *गाङ्कुटादिभ्योऽञ्णिन्ङित्संज्ञो भवतीति । असंयोगाल्लिट्कित्संज्ञो भवतीति ।*

संज्ञाकरणे किद्ग्रहणेऽसंप्रत्ययः शब्दभेदात् ॥ ३ ॥

संज्ञाकरणे किद्ग्रहणेऽसंप्रत्ययः स्यात् । किं कारणम् । शब्दभेदात् । अन्यो हि शब्दः *क्ङितीत्यन्यः कितीति ङितीति च । तथा किद्ग्रहणेषु ङिद्ग्रहणेषु चानयोरेव* संप्रत्ययः स्यात् ॥ *तद्वदतिदेशस्तर्ह्ययम् । गाङ्कुटादिभ्योऽञ्णिन्ङिद्वद्भवतीति ।* असंयोगाल्लिट्किद्वद्भवतीति । स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यङित ङिदित्याह ङिद्वदिति गम्यते । अकित किदित्याह किद्वदिति गम्यते ।

---

* १.२.५.

तद्वदतिदेशे ऽकिद्विधिप्रसङ्गः ॥ ४ ॥

तद्वदतिदेशे ऽकिद्विधिरपि प्राप्नोति । सृजिदृशोर्झल्यमकिति [६.१.५८] । सिसृक्षति दिदृक्षते* । अकिल्लक्षणो ऽमागमः प्राप्नोति ॥

सिद्धं तु प्रसज्यप्रतिषेधात् ॥ ५ ॥

सिद्धमेतत् । कथम् । प्रसज्यायं प्रतिषेधः क्रियते किति नेति ॥

सर्वत्र सनन्तादात्मनेपदप्रतिषेधः ॥ ६ ॥

सर्वेषु पक्षेषु सनन्तादात्मनेपदं प्राप्नोति । उचुकुटिषति निचुकुटिषति । ङित इत्यात्मनेपदं प्राप्नोति† तस्य प्रतिषेधो वक्तव्यः ॥

सिद्धं तु पूर्वस्य कार्यातिदेशात् ॥ ७ ॥

सिद्धमेतत् । कथम् । पूर्वस्य यत्कार्यं तदतिदिश्यते । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । सप्तम्यर्थेऽपि वतिर्भवति । तद्यथा । मथुरायामिव मथुरावत् । पाटलिपुत्र इव पाटलिपुत्रवत् । एवं ङितीव ङिद्वत् ॥

अथ किमर्थं पृथङ्ङित्कितौ क्रियेते न सर्वं किदेव वा स्यान्ङिदेव वा ।

पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसंप्रसारणं सार्वधातुकचङादिषु ॥ ८ ॥

पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसंप्रसारणं सार्वधातुके चङादिषु च‡ ॥ सार्वधातुके प्रयोजनम् । यथेह भवति सुप्तः सुप्तवानित्येवं स्वपितः स्वपिथः अत्रापि प्राप्नोति ॥ चङादिषु प्रयोजनम् । के पुनश्चङादयः । चङङ्जिङ्ङ्निथङ्नङः । चङ् । यथेह भवति शूनः शूनवानित्येवमशिश्वियत् अत्रापि प्राप्नोति । अङ् । यथेह भवति शूनः उक्त इत्येवमश्वत् अवोचत् अत्रापि प्राप्नोति । नजिङ् । यथेह भवति सुप्त इत्येवं स्वप्नक् अत्रापि प्राप्नोति । ङ्वनिप् । यथेह भवतीष्ट इत्येवं यज्वा अत्रापि प्राप्नोति । अथङ् । यथेह भवत्युषित इत्येवमावसथः अत्रापि प्राप्नोति । नङ् । यथेह भवतीष्टमित्येवं यज्ञः अत्रापि प्राप्नोति ॥

जाग्रो ऽगुणविधिः ॥ ९ ॥

जागर्तेरगुणविधिः प्रयोजनम्§ । यथेह भवति जागृतः जागृथ इत्यङितीति पर्युदास एवं जागरितः जागरितवानित्यत्रापि प्राप्नोति ॥

* १ २.१०. † १. १.१२. ‡ ६ १.१५. § ७ १ ८५.

अपर आह । जार्यो गुणविधिः । जागर्तेर्गुणविधिः प्रयोजनम् । यथेह भवति जागरितः जागरितवानित्येवं जागृतः जागृथ इत्यत्रापि प्राप्नोति ॥

कुटादीनामिट्प्रतिषेधः ॥ १० ॥

कुटादीनामिट्प्रतिषेधः प्रयोजनम् । यथेह भवति लूत्वा पूत्वा श्र्युकः किति [७.२.११] इतीट्प्रतिषेध एवं नुविता धुविता अत्रापि प्राप्नोति ॥

क्त्वायां कित्प्रतिषेधश्च ॥ ११ ॥

क्त्वायां कित्प्रतिषेधश्च प्रयोजनम् । किं च । इट्प्रतिषेधश्च । नेत्याह । अदेशेऽयं चः पठितः । क्त्वायां च कित्प्रतिषेध इति । यथेह भवति देवित्वा सेवित्वा न क्त्वा सेट् [१.२.१८] इति प्रतिषेध एवं कुटित्वा पुटित्वा अत्रापि प्राप्नोति ॥ अथवा देश एवायं चः पठितः । क्त्वायां कित्प्रतिषेधश्चेट्प्रतिषेधश्च । कित्प्रतिषेध उदाहृतम् । इट्प्रतिषेधः । यथेह भवति लूत्वा पूत्वा श्र्युकः कितीतीट्प्रतिषेध एवं नुवित्वा धुवित्वा अत्रापि प्राप्नोति । स्यादेतत्प्रयोजनं यदस्य नियोगत आतिदेशिकेन ङित्त्वेनौपदेशिकं कित्त्वं बाध्येत । सत्यपि तु ङित्त्वे किदेवैषः । तस्मान्नूत्वा धूत्वेत्येव भवितव्यम् ।

सार्वधातुकमपित् ॥ १ । २ । ४ ॥

सार्वधातुकग्रहणं किमर्थम् । अपिदितीयत्युच्यमान आर्धधातुकस्याप्यनेनापितो ङित्त्वं प्रसज्येत । कर्ता हर्ता । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति नानेनार्धधातुकस्यापितो ङित्त्वं भवतीति यदयमार्धधातुकीयान्कांश्चिन्ङितः करोति चङङ्गजिङ्ङ्वनिप्यङ्नङः । सार्वधातुके ऽप्येतज्ज्ञापकं स्यात् । नेत्याह । तुल्यजातीयस्य ज्ञापकम् । कश्च तुल्यजातीयः । यथाजातीयकाश्चङङ्गजिङ्ङ्वनिप्यङ्नङः । कथंजातीयकाश्चैते । आर्धधातुकाः ॥ यद्येतदस्ति तुल्यजातीयस्य ज्ञापकमिति चङङौ लुग्विकरणानां ज्ञापकौ स्यातां नजिङ्वर्तमानकालानां ङ्वनिब्भूतकालानामप्यङ्शब्द औणादिकानां नङ्शब्दो घञर्थानाम् । तस्मात्सार्वधातुकग्रहणं कर्तव्यम् ॥

किं पुनरयं पर्युदासो यदन्यत्पित इति । आहोस्वित्प्रसज्यायं प्रतिषेधः पिन्नेति । कश्चात्र विशेषः ।

अपिन्ङिदिति चेच्छ्वेकादेशप्रतिषेध आदिवत्त्वात् ॥ १ ॥

अपिन्ङिदिति चेच्छ्वेकादेशे प्रतिषेधो वक्तव्यः । च्यवन्ते प्लवन्ते । किं कारणम् ।

आदिवत्त्वात् । पिदपितोरेकादेशो ऽपित आदिवत्स्यात् । अस्त्यन्यत्पित इति कृत्वा ङित्त्वं प्राप्नोति ॥ अस्तु तर्हि प्रसज्यप्रतिषेधः पिन्नेति ।

न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः ॥ २ ॥

पिन्नेति चेदुत्तमैकादेशे प्रतिषेधः प्राप्नोति । तुदानि लिखानि* । किं कारणम् । आदिवत्त्वादेव । पिदपितोरेकादेशः पित आदिवत्स्यात्तत्र पिन्नेति प्रतिषेधः प्राप्नोति ॥ यथेच्छसि तथास्तु । ननु चोक्तमुभयथापि दोष इति । उभयथापि न दोषः । एकादेशः पूर्वविधौ स्थानिवदिति स्थानिवद्भावाद्व्यवधानम् ॥

असंयोगाल्लिट् कित् ॥ १ । २ । ५ ॥

ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन ॥ १ ॥

ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्भवति विप्रतिषेधेन† । ववृते ववृधे ॥

उक्तं वा ॥ २ ॥

किमुक्तम् । न वा क्सस्यानवकाशत्वादपवादो गुणस्येति‡ ॥ विषम उपन्यासः । युक्तं तत्र यदनवकाशं कित्करणं गुणं बाधते इह पुनरुभयं सावकाशम् । कित्करणस्यावकाशः । ईजतुः ईजुः§ । गुणस्यावकाशः । वर्तित्वा वर्धित्वा¶ । इहोभयं प्राप्नोति । ववृते ववृधे । परत्वाद्गुणः प्राप्नोति ॥ इदं तर्ह्युक्तमिष्टवाची परशब्दो विप्रतिषेधे परं यदिष्टं तद्भवतीति** ॥

इन्धिभवतिभ्यां च ॥ १ । २ । ६ ॥

किमर्थमिदमुच्यते । इन्धेः संयोगार्थं वचनं भवतेः पिदर्थम् ॥ अयं योगः शक्यो ऽवक्तुम् । कथम् ।

इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां किद्वचनानर्थक्यम् ॥ १ ॥

इन्धेश्छन्दोविषयो लिट् । न ह्यन्तरेण छन्द इन्धेरनन्तरो लिड् लभ्यः । आमा भाषाया भवितव्यम्†† । भुवो वुको नित्यत्वात् । भवतेरपि नित्यो वुक्‡‡ । कृते

* १ ४ ५२ † ७ २ ८१ ‡ ३ १ ४५ § ६ १ १९ ¶ १ २ १८
** ८ ४ ३० †† १ २ ११ ‡‡ ६ ४ ८८

ऽपि प्राप्नोत्यकृतेऽपि । ताभ्यां किद्वचनानर्थक्यम् । ताभ्यामिन्धिभवतिभ्यां किद्वचनमनर्थकम् ॥

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ १ । २ । ७ ॥

किमर्थं मृडादिभ्यः परस्य क्त्वः कित्त्वमुच्यते किदेव हि क्त्वा । न क्त्वा सेट् [१.२.१८] इति प्रतिषेधः प्राप्नोति तद्बाधनार्थम् ॥ यदि तर्हि मृडादिभ्यः परस्य क्त्वः कित्त्वमुच्यते नार्थो न क्त्वा सेडित्यनेन कित्त्वप्रतिषेधेन । इदं नियमार्थं भविष्यति । मृडादिभ्य एव परस्य क्त्वः कित्त्वं भवति नान्येभ्य इति । यदि नियमः क्रियत इहापि तर्हि नियमात्र प्राप्नोति । लूत्वा पूत्वा । अत्राप्यकित्त्वं प्राप्नोति । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यथाजातीयको मृडादिभ्यः परः क्त्वा । कथंजातीयकश्च मृडादिभ्यः परः क्त्वा । सेट् ॥ एवमप्यस्त्यत्र कश्चिद्विभाषितेट्* सोऽनिटां नियामकः स्यात् । अस्तु तावद्ये सेटस्तेषां ग्रहणं नियमार्थं य इदानीं विभाषितेट् तस्य ग्रहणं विध्यर्थं भविष्यति ॥

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ १ । २ । ८ ॥

स्वपिप्रच्छ्योः सनर्थं ग्रहणं किदेव हि क्त्वा ॥

इको झल् ॥ १ । २ । ९ ॥

किमर्थमिकः परस्य सनः कित्त्वमुच्यते ।

इक किन्त्वं गुणो मा भूत

इकः कित्त्वमुच्यते गुणो† मा भूदिति । चिचीषति तुष्टूषति ॥ नैतदस्ति प्रयोजनम् ।

दीर्घारम्भात्

दीर्घत्वमत्र बाधकं भविष्यति‡ ॥

कृते भवेत् ।

कृते खलु दीर्घत्वे गुणः प्राप्नोति ॥

---

* ७.२.५०. † ७.३.८४. ‡ ६.४.१६.

अनर्थकं तु

अनर्थकमेवं सति दीर्घत्वं स्यात् ॥ नानर्थकम् ।

ह्रस्वार्थम्

ह्रस्वानां दीर्घवचनसामर्थ्याद्गुणो न भविष्यति ॥ भवेद्ध्रस्वानां दीर्घवचनसामर्थ्याद्गुणो न स्यात्

दीर्घाणां तु प्रसज्यते ॥ १ ॥

दीर्घाणां तु खलु गुणः प्राप्नोति । ननु च दीर्घाणामपि दीर्घवचनसामर्थ्याद्गुणो न भविष्यति । न दीर्घाणां दीर्घाः प्राप्नुवन्ति । किं कारणम् । न हि भुक्तवान्पुनर्भुङ्क्ते न च कृतश्मश्रुः पुनः श्मश्रूणि कारयति । ननु च पुनःप्रवृत्तिरपि दृष्टा । भुक्तवांश्च पुनर्भुङ्क्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति ।

सामर्थ्याद्धि पुनर्भाव्यम्

सामर्थ्यात्तत्र पुनःप्रवृत्तिर्भवति भोजनविशेषाच्छिल्पिविशेषाद्वा । दीर्घाणां पुनर्दीर्घत्ववचने न किंचित्प्रयोजनमस्ति । अकृतकारि खल्वपि शास्त्रमग्निवत् । तद्यथा । अग्निर्यददग्धं तद्दहति ॥ दीर्घाणामपि दीर्घवचन एतत्प्रयोजनं गुणो मा भूदिति । कृतकारि खल्वपि शास्त्रं पर्जन्यवत् । तद्यथा । पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति ॥ यथैव तर्हि दीर्घवचनसामर्थ्याद्गुणो न भवत्येवमृदित्त्वमपि* न प्राप्नोति । चिकीर्षति जिहीर्षतीति ।

ऋदित्त्वं दीर्घसंश्रयम् ।

नाकृते दीर्घे ऋदित्त्वं प्राप्नोति । किं कारणम् । ऋत इत्युच्यते ॥ भवेद्ध्रस्वानां नाकृते दीर्घे ऋदित्त्वं स्याद्दीर्घाणां तु खल्वकृतेऽपि दीर्घत्व ऋदित्त्वं प्राप्नोति ।

दीर्घाणां नाकृते दीर्घे

दीर्घाणामपि नाकृते दीर्घे ऋदित्त्वं प्राप्नोति । यदा दीर्घत्वेन गुणो बाधितस्तत उत्तरकालमृदित्त्वं भवति ॥

णिलोपस्तु प्रयोजनम् ॥ २ ॥

इदं तर्हि प्रयोजनं णिलोपो यथा स्यादिति† । ज्ञीप्सति ॥ क्वास्ताः क्व निपतिताः । क्व किच्त्वं क्व णिलोपः । को वाभिसंबन्धो यत्सति किच्त्वे णिलोपः स्यादसति न

* ७.१.१०० † ६.४.५१

स्यात् । एषो ऽभिसंबन्धो यत्सति किच्त्वे सावकाशं दीर्घत्वं परत्वाण्णिलोपो बाधते ऽसति पुनः किच्त्वे ऽनवकाशं दीर्घत्वं यथैव गुणं बाधत एवं णिलोपमपि बाधेत । तत्र णिलोपस्यावकाशः । कारणा हारणा । दीर्घत्वस्यावकाशः । चिचीषति तुष्टूषति । इहोभयं प्राप्नोति । ज्ञीप्सति । परत्वाण्णिलोपः ॥ असत्यपि किच्त्वे सावकाशं दीर्घत्वम् । को ऽवकाशः । इस्भावः । निमित्सति प्रमित्सति । मीनातिमिनोत्योर्दीर्घत्वे कृते मीग्रहणेन ग्रहणं यथा स्यात्* ॥ यथैव तर्ह्यसति किच्त्वे सावकाशं दीर्घत्वं परत्वाण्णिलोपो बाधत एवं गुणो ऽपि बाधेत । तस्मात्किच्त्वं वक्तव्यम् ॥

इकः किच्त्वं गुणो मा भूद्दीर्घारम्भात्कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥ १ ॥
सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम् ॥ २ ॥

हलन्ताच्च ॥ १ । २ । १० ॥

अयुक्तो ऽयं निर्देशः । कथं हीको नाम हलन्तः स्यादन्यस्यान्यः । कथं तर्हि निर्देशः कर्तव्यः । इग्वतो हल इति । यद्येवं यियक्षति अत्रापि प्राप्नोति† । एवं तर्हीगुपधाद्धलन्तादिति वक्ष्यामि । एवमपि दम्भेर्न प्राप्नोति । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तमयुक्तो ऽयं निर्देश इति । नायुक्तः । अन्तशब्दो ऽयमस्त्येवावयववाची । तद्यथा । वस्त्रान्तः वसनान्तः । वस्त्रावयवो वसनावयव इति गम्यते । अस्ति सामीप्ये वर्तते । तद्यथा । उदकान्तं गत इति । उदकसमीपं गत इति गम्यते । तद्यः सामीप्ये वर्तते तस्येदं ग्रहणम् ॥ एवमपि दम्भेर्न सिध्यति‡ । यो ऽत्रेक्समीपे हल्न तस्मादुत्तरः सन् । यस्मादुत्तरः सन्नासाविक्समीपे हल् । एवं तर्हि

दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम् ॥ १ ॥

हल्जातिर्निर्दिश्यते । इक उत्तरा या हल्जातिरिति ॥

लिङ्सिचावात्मनेपदेषु ॥ १ । २ । ११ ॥

कथमिदं विज्ञायते । आत्मनेपदं यौ लिङ्सिचाविति । आहोस्विदात्मनेपदेषु

* ७. ४. ५४ † ६. १. १६ ‡ ७. ४. ५६. ६. ४. ३४.

परतो यौ लिङ्सिचाविति । किं चातः । यदि विज्ञायत आत्मनेपदं यौ लिङ्सिचाविति लिङ्विशेषितः सिजविशेषितः । अथ विज्ञायत आत्मनेपदेषु परतो यौ लिङ्सिचाविति सिज्विशेषितो लिङविशेषितः ॥ यथेच्छसि तथास्तु । अस्तु तावदात्मनेपदं यौ लिङ्सिचाविति । ननु चोक्त लिङ्विशेषितः सिजविशेषित इति । सिच विशेषितः । कथम् । आत्मनेपदं सिज्नास्तीति कृत्वात्मनेपदपरे सिचि कार्यं विज्ञास्यते । अथवा पुनरस्त्वात्मनेपदेषु परतो यौ लिङ्सिचाविति । ननु चोक्तं सिज्विशेषितो लिङविशेषित इति । लिङ् विशेषितः । कथम् । आत्मनेपदेषु परतो लिङ्नास्तीति कृत्वात्मनेपदे लिङि कार्यं विज्ञास्यते ॥ नैव वा पुनरर्थो लिङ्विशेषणेनात्मनेपदग्रहणेन । किं कारणम् । झलिति वर्तते* । आत्मनेपदेषु चैव लिङ् झलादिर्न परस्मैपदेषु । तदेतत्सिज्विशेषणमात्मनेपदग्रहणम् ॥ अथ सिज्विशेषण आत्मनेपदग्रहणे सति किं प्रयोजनम् । इह मा भूत् । अयाक्षीत् अवात्सीत्† । नैतदस्ति । इक इति वर्तते* ॥ एवमप्यनैषीत् अचैषीत् अत्रापि प्राप्नोति । एतदपि नास्ति प्रयोजनम् । हलन्तादिति वर्तते ॥ एवमप्यकोर्षीत् अमोषीत् अत्रापि प्राप्नोति । नैतदस्ति । झलिति वर्तते ॥ एवमप्यभैत्सीत् अच्छैत्सीत् अत्रापि प्राप्नोति । नैतदस्ति । इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधो‡ न चैषेग्लक्षणा वृद्धिः§ ॥ इदं तर्हि प्रयोजनम् । इह मा भूत् । अद्राक्षीत् अस्राक्षीत् । किं च स्यात् । अकिल्लक्षणो ऽमागमो न स्यात्¶ ॥

स्थाघ्वोरिच्च ॥ १ । २ । १७ ॥

इच्च कस्य तकारेत्त्वम्

कस्य हेतोरिकारस्तपरः क्रियते ।

दीर्घो मा भूत्

दीर्घो मा भूदिति ॥

ऋतेऽपि सः ।

अन्तरेणाप्यारम्भं सिद्धोऽत्र दीर्घो घुमास्थागापाजहाति [६.४.६६] इति ॥

अनन्तरे प्लुतो मा भूत्

इदं तर्हि प्रयोजनमनन्तरे प्लुतो मा भूदिति । कुतो नु खल्वेतदनन्तरार्थ आरम्भे ह्रस्वो भविष्यति न पुनः प्लुत इति ॥

* १ २ ९ † ६ २ १५ ‡ १ १ ५ § ७ २ १ ¶ ६.१.५८.

प्लुतश्च विषये स्मृत ॥ १ ॥

विषये प्लुत उच्यते* यदा च स विषयो भवितव्यमेव तदा प्लुतेन ॥

इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेऽपि सः ।
अनन्तरे प्लुतो मा भूत्प्लुतश्च विषये स्मृतः ॥ १ ॥

न क्त्वा सेट् ॥ १ । २ । १८ ॥

न सेडिति कृते ऽकित्त्वे

न सेडित्येव सिद्धं नार्थः क्त्वाग्रहणेन ॥ निष्ठायामपि तर्हि प्राप्नोति । गुधितः गुधितवानिति ।

निष्ठायामवधारणात् ।

निष्ठायामवधारणान्न भविष्यति । किमवधारणम् । निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः [१.२.१९] इति ॥ परोक्षायां तर्हि प्राप्नोति । किं च स्यात् । पपिव पपिम । क्ङितीत्याकारलोपो न स्यात् । मा भूदेवम् । इटीत्येव भविष्यति† ॥ इदं तर्हि । जग्मिव जघ्निव । क्ङितीत्युपधालोपो‡ न स्यात् ।

ज्ञापकान्न परोक्षायाम्

ज्ञापकात्परोक्षाया न भविष्यति । किं ज्ञापकम् ।

सनि झल्ग्रहणं विदु ॥ १ ॥

यदयमिको झल् [१.२.९] इति झल्ग्रहणं करोति तज्ज्ञापयत्याचार्य औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति । कथं कृत्वा ज्ञापकम् । झल्ग्रहणस्यैतत्प्रयोजनमिह मा भूत् । शिशयिषत इति । यदि चात्रातिदेशिकस्यापि कित्त्वस्य प्रतिषेधः स्याज्झल्ग्रहणमनर्थकं स्यात् । अस्त्वत्र कित्त्वं न सेडिति प्रतिषेधो भविष्यति । पश्यति त्वाचार्य औपदेशिकस्य कित्त्वस्य प्रतिषेधो नातिदेशिकस्येति ततो झल्ग्रहणं करोति ॥ नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात् । स्थाघ्वोरिच्च [१.२.१७] झलादौ यथा स्यादिह मा भूत् । उपास्थायिषाताम् उपास्थायिषत§ ।

इत्त्वं कित्संनियोगेन

कित्त्वसंनियोगेनेत्त्वमुच्यते । तेनासति कित्त्व इत्त्वं न भविष्यति ।

* ८ १ १०५ † १४ ४४ ‡ १४ ९८ § १४ ४३ ० ३ ११.

रेण तुल्यं सुधीवनि ।

तद्यथा । सुधीवा सुपीवेति । ङीप्संनियोगेन र उच्यमानो ऽसति ङीपि न भवति* ॥ अथवास्त्वत्रेत्त्वम् । का रूपसिद्धिः । वृद्धौ कृतायामायादेशो भविष्यति ॥

वस्वर्थम्

वस्वर्थं तर्हि क्त्वाग्रहणं कर्तव्यम् । वसौ ह्यौपदेशिकं कित्त्वम् । किं च स्यात् । पपिवान् तस्थिवान् । क्ङितीत्याकारलोपो न स्यात् । मा भूदेवम् । इटि चेत्येवं भविष्यति† ॥ इदं तर्हि जग्मिवान् जघ्निवान् । क्ङितीत्युपधालोपो‡ न स्यात् ।

किदतीदेशात्

अस्त्वत्रौपदेशिकस्य कित्त्वस्य प्रतिषेधः । आतिदेशिकमत्र कित्त्वं भविष्यति§॥ यत्र तर्हि तत्प्रतिषिध्यते । अञ्जेराजिवानिति ॥ एवं तर्हि च्छान्दसः क्वसुः । लिट् च च्छन्दसि सार्वधातुकमपि भवति । तत्र सार्वधातुकमपिन्ङिद्भवतीति¶ ङित्युपधालोपो भविष्यति ॥

निगृहीतिः

निगृहीतिः प्रयोजनम् । इदं तर्हि प्रयोजनम् । इह मा भूत् । निगृहीतिः उपस्निहितिः निकुचितिः** ॥ तत्तर्हि क्त्वाग्रहणं कर्तव्यम् । न कर्तव्यम् ।

क्त्वा च विग्रहात् ॥ २ ॥

उपरिष्टाद्योगविभागः करिष्यते††। न सेट् । निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः [१९] । मृषस्तितिक्षायाम् [२०] । उदुपधाद्भावादिकर्मणोरन्यतरस्याम् [२१]। ततः पूङः । पूङश्च निष्ठा सेण्न किद्भवति । ततः क्त्वा च । क्त्वा च सेण्न किद्भवति । पूङ इति निवृत्तम् ॥

न सेडिति कृते ऽकित्त्वे निष्ठायामवधारणात् ।
ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ॥ १ ॥
इत्त्वं कित्संनियोगेन रेण तुल्यं सुधीवनि ।
वस्वर्थं किदतीदेशान्निगृहीतिः क्त्वा च विग्रहात् ॥ २ ॥

---

* ४.१.७.१२. † ६.४.६४. ‡ ६.४.९८. § १.२.५. ¶ १.२.४.
** ७.२.१०. †† १.२ २२.

उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ॥ १ । २ । २१ ॥

इह कस्मान्न भवति । गुधितः गुधितवानिति ।

उदुपधाच्छपः ॥ १ ॥

शब्विकरणेभ्य इष्यते ॥

पूङः क्त्वा च ॥ १ । २ । २२ ॥

पूङः क्त्वानिष्ठयोरिटि वा प्रसङ्गः सेट्प्रकरणात् ॥ १ ॥

पूङः क्त्वानिष्ठयोरिटि विभाषा प्राप्नोति । किं कारणम् । सेट्प्रकरणात् । सेडिति वर्तते* ॥

न वा सेट्त्वस्याकिदाश्रयत्वादनिटि वा किच्त्वम् ॥ २ ॥

न वैष दोषः । किं कारणम् । सेट्त्वस्याकिदाश्रयत्वात् । अकिदाश्रयं सेट्त्वम् । यदाकित्त्वं तदेटा भवितव्यम् । सेट्त्वस्याकिदाश्रयत्वादनिटचेव विभाषा कित्त्वं भविष्यति ॥ इड्विधौ पूङो ग्रहणं क्रियते† तेन वचनादिट् सेट्प्रकरणादनिटचेव विभाषा कित्त्वं प्राप्नोति ।

इड्विधौ ह्यग्रहणम् ॥ ३ ॥

इड्विधौ हि पूङो ग्रहणं न कर्तव्यं भवति ॥

भारद्वाजीयाः पठन्ति ॥ नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम् ॥ नित्यमकित्त्वमिडाद्योः सिद्धम् । कथम् । विभाषामध्येऽयं योगः क्रियते विभाषामध्ये च ये विधयस्ते नित्या भवन्ति । किमर्थं तर्हि क्त्वाग्रहणम् । क्त्वाग्रहणमुत्तरार्थम् । उत्तरार्थं क्त्वाग्रहणं क्रियते । नोपधात्थफान्ताद्वा [२३] वञ्चिलुञ्च्यृतश्च [२४] इति ॥

तृषिमृषिकृशेः काश्यपस्य ॥ १ । २ । २५ ॥

काश्यपग्रहणं किमर्थम् । काश्यपग्रहणं पूजार्थम् । वेत्येव हि वर्तते‡ ॥

---

* १।२।१८ † ७।२।५१ ‡ १।२।२१

रलो व्युपधाद्धलादेः संश्च ॥ १ । २ । २६ ॥

किमिदं रलः क्त्वासनोः कित्त्वं विधीयत आहोस्वित्प्रतिषिध्यते । किं चातः । यदि विधीयते क्त्वाग्रहणमनर्थकम् । किदेव हि क्त्वा । अथ प्रतिषिध्यते सन्ग्रहणमनर्थकम् । अकिदेव हि सन् ॥ अत उत्तरं पठति ।

रलः क्त्वासनोः कित्त्वम् ॥ १ ॥

रलः क्त्वासनोः कित्त्वं विधीयते । ननु चोक्तं क्त्वाग्रहणमनर्थकं किदेव हि क्त्वेति । नानर्थकम् । न क्त्वा सेट् [१.२.१८] इति प्रतिषेधः प्राप्नोति तद्बाधनार्थम् ॥

ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ १ । २ । २७ ॥

अयुक्तोऽयं निर्देशः । ऊ इत्यनेन कालः प्रतिनिर्दिश्यत ऊ इत्ययं च वर्णः । तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम् ॥ कथं तर्हि निर्देशः कर्तव्यः । ऊकालकाल इति । किमिदमूकालकाल इति । ऊ इत्येतस्य काल ऊकालः । ऊकालः कालोऽस्य ऊकालकाल इति ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः । खरमुखः । एवमूकालकाल ऊकाल इति ॥ अथवा साहचर्यात्ताच्छब्द्यं भविष्यति । कालसहचरितो वर्णः । वर्णोऽपि काल एव ॥

ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात् ॥ १ ॥

ह्रस्वादिषु समसंख्यत्वस्याप्रसिद्धिः । किं कारणम् । निर्देशवैषम्यात् । तिस्रः संज्ञा एकः संज्ञी वैषम्यात्संख्यातानुदेशो* न प्राप्नोति ॥

सिद्धं तु समसंख्यत्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । समसंख्यत्वात् । कथं समसंख्यत्वम् ।

त्रयाणां हि विकारनिर्देशः ॥ ३ ॥

त्रयाणामयं प्रश्लिष्टनिर्देशः । कथं पुनर्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देश इति । तिसृणां संज्ञानां करणसामर्थ्यात् ॥ यदि तावत्तिसृणां संज्ञानां करणसामर्थ्याज्ज्ञा-

---

* १.३.१०.

यते त्रयाणामयं प्रश्लिष्टनिर्देश इति कुतस्त्वेतदेतेनानुपूर्व्येण संनिविष्टानां संज्ञा भविष्यन्तीति । आदौ मात्रिकस्ततो द्विमात्रस्ततस्त्रिमात्र इति । न पुनर्मात्रिको मध्ये वान्ते वा स्यात्तथा द्विमात्र आदौ वान्ते वा स्यात्तथा त्रिमात्र आदौ वा मध्ये वा स्यात् ॥ अयं तावत्त्रिमात्रो ऽशक्य आदौ वा मध्ये वा कर्तुम् । कुतः । प्लुताश्रयो हि प्रकृतिभावः प्रसज्येत* । मात्रिकाद्द्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति† मात्रिकस्य पूर्वनिपातो भविष्यति ॥ यत्तावदुच्यते ऽयं तावत्त्रिमात्रो ऽशक्य आदौ वा मध्ये वा कर्तुं प्लुताश्रयो हि प्रकृतिभावः प्रसज्येतेति प्लुताश्रयः प्रकृतिभावः प्लुतसंज्ञा चानेनैव । यदि च त्रिमात्र आदौ वा मध्ये वा स्यात्प्लुतसंज्ञैवास्य न स्यात्कुतः प्रकृतिभावः ॥ यदप्युच्यते मात्रिकाद्द्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यतीति ह्रस्वाश्रया हि विसंज्ञा‡ ह्रस्वसंज्ञा चानेनैव । यदि च मात्रिको मध्ये वान्ते वा स्याद्ध्रस्वसंज्ञैवास्य न स्यात्कुतो विसंज्ञा कुतः पूर्वनिपातः ॥ एवमेषा व्यवस्था न प्रकल्पते ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न मात्रिको ऽन्ते भवतीति यदयं विभाषा पृष्टप्रतिवचने हेः [८.२.९३] इति मात्रिकस्य प्लुतं शास्ति । कथं कृत्वा ज्ञापकम् । यो ऽन्ते स प्लुतसंज्ञकः । यदि च मात्रिको ऽन्ते स्यात्प्लुतसंज्ञास्य स्यात् । तत्र मात्राकालस्य मात्राकालवचनमनर्थकं स्यात् ॥ मध्ये तर्हि स्यादिति । अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न मात्रिको मध्ये भवतीति यदयमतो दीर्घो यञि सुपि च [७.३.१०१-१०२] इति दीर्घत्वं शास्ति । कथ कृत्वा ज्ञापकम् । यो मध्ये स दीर्घसंज्ञकः । यदि च मात्रिको मध्ये स्याद्दीर्घसंज्ञास्य स्यात् । तत्र मात्राकालस्य मात्राकालवचनमनर्थक स्यात् ॥ द्विमात्रस्तर्ह्यन्ते स्यादिति । अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न द्विमात्रो ऽन्ते भवतीति यदयमोगभ्यादाने [८.२.८७] इति द्विमात्रिकस्य प्लुत शास्ति । कथं कृत्वा ज्ञापकम् । योऽन्ते स प्लुतसंज्ञकः । यदि च द्विमात्रोऽन्ते स्यात्प्लुतसंज्ञास्य स्यात् । तत्र द्विमात्राकालस्य द्विमात्राकालवचनमनर्थकं स्यात् ॥ मात्रिकेण चास्य पूर्वनिपातो बाधित इति कृत्वा क्वान्यत्रोत्सहते भवितुमन्यदतो मध्यात् ॥ एवमेषा व्यवस्था प्रकॢप्ता ॥ भवेद्व्यवस्था प्रकॢप्ता

दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः ॥ ४ ॥

दीर्घप्लुतयोरपि पूर्वसंज्ञा प्राप्नोति । का । ह्रस्वसंज्ञा । किं कारणम् । अणसवर्णान्गृह्णातीति§ ॥

---

* ६.१.१२५ † २.२.३४ ‡ १.४.७ § १.१.६९

सिद्धं तु तपरनिर्देशात् ॥ ५ ॥

सिद्धमेतत् । कथम् । तपरनिर्देशः कर्तव्यः । उदूकाल इति ॥ यद्येवं द्रुतायां तपरकरणे मध्यविलम्बितयोरुपसंख्यानं कालभेदात् ॥

द्रुतादिषु चोक्तम् ॥ ६ ॥

किमुक्तम् । सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्त इति* ॥ स तर्हि तपरनिर्देशः कर्तव्यः । न कर्तव्यः । इह कालग्रहणं क्रियते यावच्च तपरकरणं तावत्कालग्रहणम् । प्रत्येकं च कालशब्दः परिसमाप्यते । उकाल ऊकाल ऊ३काल इति ॥ अथवैकसंज्ञाधिकारेऽयं योगः कर्तव्यः† । तत्रैका संज्ञा भवति या परानवकाशा चेत्येवं हि दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति ॥ अथवा स्वं रूपं शब्दस्याशब्दसंज्ञा [१.१.६८] इत्ययं योगः प्रत्याख्यायते । तत्र यदेतदशब्दसंज्ञेत्येतदया विभक्त्या निर्दिश्यमानमर्थवद्भवति तया निर्दिष्टमुत्तरत्रानुवर्तिष्यते । अणुदित्सवर्णस्य चाप्रत्ययः [१.१. ६९] अशब्दसंज्ञायामिति ॥ अथवा ह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति । ननु चेदं प्रयोजनं स्यात्संज्ञया विधाने नियमं वक्ष्यामीति‡ ह्रस्वसंज्ञया यदुच्यते तदचः स्थाने यथा स्यादिति । स्यादेतत्प्रयोजनं यदि किंचित्कराणि ह्रस्वशासनानि स्युः । यतस्तु खलु यावदज्ग्रहणं तावद्ध्रस्वग्रहणमतोऽकिंचित्कराणि ह्रस्वशासनानि ॥ इदं तर्हि प्रयोजनमेच इग्घ्रस्वादेशे [१.१.४८] इति वक्ष्यामीति । अनुच्यमाने ह्येतस्मिंस्त्रिर्ह्रस्वप्रदेशेष्वेच इग्भवतीति वक्तव्यं स्यात् । ह्रस्वो नपुंसके प्रातिपदिकस्य [१ २.४७] एच इग्भवतीति । णौ चङ्युपधाया ह्रस्वः [७.४.१] एच इग्भवतीति । ह्रस्वः हलादिः शेषः [७ ४.५९,६०] एच इग्भवतीति ॥ संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । लघीयश्च त्रिर्ह्रस्वप्रदेशेष्वेच इग्भवतीति न पुनः संज्ञाकरणम् । त्रिर्ह्रस्वप्रदेशेष्वेच इग्भवतीति पद्ग्रहणानि । संज्ञाकरणे पुनरष्टौ । ह्रस्वसंज्ञा वक्तव्या । त्रिर्ह्रस्वप्रदेशेषु ह्रस्वग्रहणं कर्तव्यं ह्रस्वो ह्रस्वो ह्रस्व इति । एच इग्घ्रस्वादेश इति । सोऽयमेवं लघीयसा न्यासेन सिद्धे यद्गरीयांसं यत्नमारभते तस्यैतत्प्रयोजनं दीर्घप्लुतयोस्तु पूर्वसंज्ञा मा भूदिति ॥

अचश्च ॥ १ । २ । २८ ॥

किमयमलोऽन्त्यशेष आहोस्विदलोऽन्त्यापवादः§ । कथं चायं तच्छेषः स्या-

* १.१ ७०. † १ ८.१. ‡ १ १ २८. § १ १.५२

दकथं वा तदपवादः । यद्येकं वाक्यं तच्चेदं च अलो ऽन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्येति ततो ऽयं तच्छेषः । अथ नाना वाक्यम् अलो ऽन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्यानन्त्यस्य चेति ततो ऽयं तदपवादः । कश्चात्र विशेषः ।

ह्रस्वादिविधिरलो ऽन्त्यस्येति चेद्वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेष्वज्ग्रहणम् ॥ १ ॥

ह्रस्वादिविधिरलो ऽन्त्यस्येति चेद्वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेष्वज्ग्रहणं कर्तव्यम् । वचिप्रच्छ्योर्दीर्घो* ऽच इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ शमादीनां दीर्घो† ऽच इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ हनिगम्योर्दीर्घो‡ ऽच इति वक्तव्यम् । अनन्त्यत्वाद्धि न प्राप्नोति ॥ अस्तु तर्हि तदपवादः ।

अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः ॥ २ ॥

अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यस्य प्रतिषेधो वक्तव्यः । ह्रस्वो नपुंसके प्रातिपदिकस्य [१.२.४७] यथेह भवति । रै अतिरि । नौ अतिनु । एवं सुवाग्ब्राह्मणकुलमित्यत्रापि प्राप्नोति ॥ अकृत्सार्वधातुकयोर्दीर्घः [७.४.२५] यथेह भवति । चीयते स्तूयते । एवं भिद्यते अत्रापि प्राप्नोति ॥ नामि [६.४.३] दीर्घो यथेह भवति । अग्नीनाम् वायूनाम् । एवमत्रापि प्राप्नोति । षण्णाम् ॥ नैष दोषः । नोपधायाः [६.४.७] इत्येतन्नियमार्थं भविष्यति । प्रकृतस्यैष नियमः स्यात् । किं च प्रकृतम् । नामीति । तेन भवेदिह नियमान्न स्यात् । षण्णाम् । अन्यते तन्यते अत्रापि प्राप्नोति । अथाप्येवं नियमः स्यान्नोपधाया नाम्येवेति । एवमपि भवेदिह नियमान्न स्यात् । अन्यते तन्यत इति । षण्णामित्यत्र प्राप्नोति । अथाप्युभयतो नियमः स्यान्नोपधाया एव नामि नाम्येव नोपधाया इति । एवमपि भिद्यते सुवाग्ब्राह्मणकुलमित्यत्रापि प्राप्नोति ॥ एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यम् । किं कृतं भवति । द्वितीया षष्ठी प्रादुर्भाव्यते । तत्र कामचारो गृह्यमाणेन चार्चं विशेषयितुमचा वा गृह्यमाणम् । यावता कामचार इह तावद्वचिप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेषु गृह्यमाणेनाचं विशेषयिष्यामः । एतेषामचो दीर्घो भवतीति । इहेदानीं नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वचा गृह्यमाणं विशेषयिष्यामः । नपुंसकस्य ह्रस्वो

* ३.२.१७८ † ७.३.७४ ‡ ६.४.१६

भवत्यचः । अजन्तस्येति । अकृत्सार्वधातुकयोर्दीर्घो ऽचः । अजन्तस्येति । नामि दीर्घो भवत्यचः । अजन्तस्येति ॥

इह कस्मान्न भवति द्यौः पन्थाः स इति* ।

संज्ञया विधाने नियमः ॥ ३ ॥

संज्ञया ये विधीयन्ते तेषु नियमः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमान गंस्यते । अजिति† हि वर्तते । तत्रैवमभिसंबन्धः करिष्यते । अचो ऽज्भवति ह्रस्वो दीर्घः प्लुत इत्येवं भाव्यमान इति ॥ अथ पूर्वस्मिन्योगे ऽज्ग्रहणे सति किं प्रयोजनम् ।

अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम् ॥ ४ ॥

अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थमच्समुदायनिवृत्त्यर्थं च । संयोगनिवृत्त्यर्थं तावत् । प्रतक्ष्य प्ररक्ष्य । ह्रस्वस्य पिति कृति तुक् [६.१.७१] इति तुग्मा भूदिति । अच्समुदायनिवृत्त्यर्थम् । तितउच्छत्रम् । तितउच्छाया । दीर्घात्पदान्ताद्वा [६.१.७५,७६] इति विभाषा मा भूदिति ॥

उच्चैरुदात्तः ॥ १ । २ । २९ ॥ नीचैरनुदात्तः ॥ १ । २ । ३० ॥

किं षष्ठीनिर्दिष्टमज्ग्रहणमनुवर्तत उताहो न‡ । किं चातः । यद्यनुवर्तते हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवदित्येषा परिभाषा न प्रकल्पते । कथं हलो नाम स्वरप्राप्तिः स्यात् । एवं तर्हि निवृत्तम् । बहून्येतस्याः परिभाषायाः प्रयोजनानि ॥ अथ प्रथमानिर्दिष्टमज्ग्रहणमनुवर्तत उताहो न । किं चार्थोऽनुवृत्त्या । बाढमर्थो यद्येते व्यञ्जनस्यापि गुणा लक्ष्यन्ते । ननु च प्रत्यक्षमुपलभ्यन्ते । इषे त्वोर्जे त्वा । नैते व्यञ्जनस्य गुणाः । अच एते गुणास्तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते । तद्यथा । द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते । बदरपिटके रिक्तको लोहकसस्तद्गुण उपलभ्यते ॥ कुतो नु खल्वेतदच एते गुणास्तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यत इति न पुनर्व्यञ्जनस्यैते गुणाः स्युस्तत्सामीप्यादजपि तद्गुण उपलभ्यत इति । अन्तरेणापि व्यञ्जनमच एवैते गुणा लक्ष्यन्ते न पुनरन्तरेणाच व्यञ्जनस्योच्चारणमपि भवति । अन्वर्थं खल्वपि निर्वचनम् । स्वयं राजन्ते स्वरा अन्वग्भवति व्यञ्जनमिति ॥

---

* ७.१.८४, ८५, ७.२.१०२ † १.२.२७ ‡ १.२.२८

उच्चनीचस्यानवस्थितत्वात्संज्ञाप्रसिद्धिः ॥ १ ॥

इदमुच्चनीचमनवस्थितपदार्थकम् । तदेव हि कंचित्प्रत्युच्चैर्भवति कंचित्प्रति नीचैः । एवं कंचित्कश्चिदधीयानमाह किमुच्चै रोरूयसे ऽथ नीचैर्वर्ततामिति । तमेव तथाधीयानमपर आह किमन्तर्दन्तकेनाधीष उच्चैर्वर्ततामिति । एवमुच्चनीचमनवस्थितपदार्थकं तस्यानवस्थानात्संज्ञाया अप्रसिद्धिः ॥ एवं तर्हि लक्षणं करिष्यते । आयामो दारुण्यमणुता खस्येत्युच्चैःकराणि शब्दस्य । आयामो गात्राणां निग्रहः । दारुण्यं स्वरस्य दारुणता रूक्षता । अणुता खस्य कण्ठस्य संवृतता । उच्चैःकराणि शब्दस्य ॥ अथ नीचैःकराणि शब्दस्य । अन्ववसर्गो मार्दवमुरुता खस्येति नीचैःकराणि शब्दस्य । अन्ववसर्गो गात्राणां शिथिलता । मार्दवं स्वरस्य मृदुता स्निग्धता । उरुता खस्य महत्ता कण्ठस्य । इति नीचैःकराणि शब्दस्य ॥ एतदप्यनैकान्तिकम् । यदल्पप्राणस्य सर्वोच्चैस्तन्महाप्राणस्य सर्वनीचैः ॥

सिद्धं तु समानप्रक्रमवचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । समाने प्रक्रम इति वक्तव्यम् । कः पुनः प्रक्रमः । उरः कण्ठः शिर इति ॥

समाहारः स्वरितः ॥ १ । २ । ३१ ॥

समाहारः स्वरित इत्युच्यते । कस्य समाहारः स्वरितसंज्ञो भवति । अचोरित्याह ।

समाहारोऽचोश्चेन्नाभावात् ॥ १ ॥

समाहारोऽचोश्चेत्तन्न । किं कारणम् । अभावात् । न ह्यचोः समाहारोऽस्ति । नन्वयमस्ति गाङ्गेऽनूप इति । नैषोऽचोः समाहारः । अन्योऽन्यमुदात्तानुदात्तयोः स्थान एक आदिश्यते ॥ एवं तर्हि गुणयोः ।

गुणयोश्चेन्नाच्प्रकरणात् ॥ २ ॥

गुणयोः समाहार इति चेत्तन्न । किं कारणम् । अच्प्रकरणात् । अजिति वर्तते ॥

सिद्धं त्वच्समुदायस्याभावात्तद्गुणे संप्रत्ययः ॥ ३ ॥

सिद्धमेतत् । कथम् । अच्समुदायो नास्तीति कृत्वा तद्गुणस्याचः समाहारगु-

णस्य संप्रत्ययो भविष्यति ॥ कथं पुनः समाहार इत्यनेनाच्छक्यः प्रतिनिर्देष्टुम् । मतुब्लोपोऽत्र द्रष्टव्यः । तद्यथा । पुष्पका एषां ते पुष्पकाः । कालका एषां ते कालका इति । एवं समाहारवान्समाहारः ॥ अथवाकारो मत्वर्थीयः । तद्यथा । तुन्दः घाट इति ॥ यद्येवं त्रैस्वर्यं न प्रकल्पते । तत्र को दोषः । त्रैस्वर्येणाधीमह इत्येतन्नोपपद्यते । नैतद्गुणापेक्षम् । किं तर्हि । अजपेक्षम् । त्रैस्वर्येणाधीमहे त्रिप्रकारैरज्भिरधीमहे कैश्चिदुदात्तगुणैः कैश्चिदनुदात्तगुणैः कैश्चिदुभयगुणैः । तद्यथा । शुक्लगुणः शुक्लः । कृष्णगुणः कृष्णः । य इदानीमुभयगुणः स तृतीयामाख्यां लभते कल्माष इति वा सारङ्ग इति वा । एवमिहाप्युदात्तगुण उदात्तः । अनुदात्तगुणोऽनुदात्तः । य इदानीमुभयवान्स तृतीयामाख्यां लभते स्वरित इति ॥

तस्यादित उदात्तमर्धह्रस्वम् ॥ १ । २ । ३२ ॥

अर्धह्रस्वमित्युच्यते तत्र दीर्घप्लुतयोर्न प्राप्नोति । कन्या । शक्तिके३ शक्तिके* । नैष दोषः । मात्रचोऽत्र लोपो द्रष्टव्यः । अर्धह्रस्वमात्रमर्धह्रस्वमिति ॥ किमर्थमिदमुच्यते । आमिश्रीभूतमिवेदं भवति । तद्यथा । क्षीरोदके संपृक्त आमिश्रीभूतत्वान्न ज्ञायते कियत्क्षीरं कियदुदकं कस्मिन्नवकाशे क्षीरं कस्मिन्नवकाश उदकमिति । एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते कियदुदात्तं कियदनुदात्तं कस्मिन्नवकाश उदात्तं कस्मिन्नवकाशेऽनुदात्तमिति । तदाचार्यः सुहृद्भूत्वान्वाचष्ट इयदुदात्तमियदनुदात्तमस्मिन्नवकाश उदात्तमस्मिन्नवकाशेऽनुदात्तमिति ॥ यद्ययमेवं सुहृत्किमन्यान्यप्येवंजातीयकानि नोपदिशति । कानि पुनस्तानि । स्थानकरणानुप्रदानानि । व्याकरणं नामेयमुत्तरा विद्या । सोऽसौ छन्दःशास्त्रेष्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते । यद्येवं नार्थोऽनेन । इदमप्युपलब्ध्या गमिष्यति ॥ संज्ञाकरणं तर्हीदम् । तस्य स्वरितस्यादितोऽर्धह्रस्वमुदात्तसंज्ञमिति । किं कृतं भवति । त्रिरुदात्तप्रदेशेषु स्वरितग्रहणं न कर्तव्यं भवति । उदात्तस्वरितपरस्य सन्नतरः [१.२.४०] उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्य [८. २. ४] नोदात्तस्वरितोदयम् [८.४.६७] इति ॥ संज्ञाकरणं हि नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । लघीयश्च त्रिरुदात्तप्रदेशेषु स्वरितग्रहणं न पुनः संज्ञाकरणम् । त्रिरुदात्तप्रदेशेषु स्वरितग्रहणे नवाक्षराणि संज्ञाकरणे पुनरेकादश ॥ एवं तर्ह्युभयमनेन क्रियते

---

* ८.२ १०१.

ऽन्वाख्यानं च सञ्ज्ञा च । कथं पुनरेकेन यत्नेनोभयं लभ्यम् । लभ्यमित्याह । कथम् । अन्वर्थग्रहणं विज्ञास्यते । तस्य स्वरितस्यादितोऽर्धह्रस्वमुदात्तसञ्ज्ञं भवतीति । ऊर्ध्वमात्तमिति चात उदात्तम् ॥ यदि तर्हि सञ्ज्ञाकरणमुदात्तादेर्यदुच्यते तत्स्वरितादेरपि प्राप्नोति । अन्वाख्यानमेव तर्हीदं मन्दबुद्धेः ॥

स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम् ॥ १ ॥

स्वरितस्यार्धह्रस्वोदात्तादा उदात्तस्वरितपरस्य सन्नतरः [१.२.४०] इत्येतस्मात्सूत्रादिदं सूत्रकाण्डमूर्ध्वमुदात्तादनुदात्तस्य स्वरितः [८.४.६६] इत्यतः कर्तव्यम् । किं प्रयोजनम् । स्वरितादिति सिद्ध्यर्थम् । स्वरितादिति सिद्धिर्यथा स्यात् । स्वरितात्संहितायामनुदात्तानाम् [१.२.३९] इति । इम मे गङ्गे यमुने सरस्वति शुतुद्रि । क्व तर्हि स्यात् । यः सिद्धः स्वरितः । कार्यं* देवदत्तयज्ञदत्तौ ॥

स्वरितोदात्तार्थं च ॥ २ ॥

स्वरितोदात्तार्थं च तत्रैव कर्तव्यम् । न सुब्रह्मण्यायां स्वरितस्य तूदात्तः [१.२.३७] । इन्द्र आगच्छ । क्व तर्हि स्यात् । यः सिद्धः स्वरितः । सुब्रह्मण्यो*मिन्द्र आगच्छ ॥

स्वरितोदात्ताद्यास्वरितार्थम् ॥ ३ ॥

स्वरितोदात्ताद्यास्वरितार्थं तत्रैव कर्तव्यम् । इन्द्र आगच्छ । हरिव आगच्छ ॥

स्वरितपरसन्नतरार्थं च ॥ ४ ॥

स्वरितपरसन्नतरार्थं च तत्रैव कर्तव्यम् । उदात्तस्वरितपरस्य सन्नतरः [१.२.४०] । माणवक जटिलकाध्यापक न्यङ्† । क्व तर्हि स्यात् । यः सिद्धः स्वरितः । माणवक जटिलकाभिरूपक क्व‡ ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

देवब्रह्मणोरनुदात्तवचनं ज्ञापकं स्वरितादिति सिद्धत्वस्य ॥ ५ ॥

देवब्रह्मणोरनुदात्तवचनं§ ज्ञापकं सिद्ध इह स्वरित इति ॥ यद्येतज्ज्ञाप्यते स्वरितोदात्तात्परस्यानुदात्तस्य स्वरितत्वं प्राप्नोति । न ब्रूमो देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्ध इह स्वरित इति । किं तर्हि । पूर्वमेतत्काण्डमिति ॥

* ६.१.१८५. † ६.२.५२, ८.२.४ ‡ ६.२.११ ६.१.१८५ § १.२.३८

27 M

एकश्रुति दूरात्संबुद्धौ ॥ १ । २ । ३३ ॥

किमिदं पारिभाषिक्याः संबुद्धेर्ग्रहणमेकवचनं संबुद्धिः [२.३.४९] । आहोस्विदन्वर्थग्रहणं संबोधन संबुद्धिरिति । किं चातः । यदि पारिभाषिक्या देवा ब्रह्माणः* अत्र न प्राप्नोति । अथान्वर्थग्रहणं न दोषः । यथा न दोषस्तथास्तु ॥

किं पुनरियमेकश्रुतिरुदात्ताहोस्विदनुदात्ता । नोदात्ता । कथं ज्ञायते । यदयमुच्चैस्तरां वा वषट्कारः [१.२.३५] इत्याह । कथ कृत्वा ज्ञापकम् । अतन्त्रं तरनिर्देशः । यावदुच्चैस्तावदुच्चैस्तरामिति ॥ यदि तर्हि नोदात्तानुदात्ता । अनुदात्ता च न । कथ ज्ञायते । यदयमुदात्तस्वरितपरस्य सन्नतरः [१.२.४०] इत्याह । कथं कृत्वा ज्ञापकम् । अतन्त्रं तरनिर्देशः । यावत्सन्नस्तावत्सन्नतर इति ॥ सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरन्तरालं क्रियते ॥

अपर आह । किमियमेकश्रुतिरुदात्तोतानुदात्ता । उदात्ता । कथं ज्ञायते । यदयमुच्चैस्तरां वा वषट्कार इत्याह । कथ कृत्वा ज्ञापकम् । तन्त्रं तरनिर्देशः । उच्चैर्दृष्ट्वोच्चैस्तरामित्येतद्भवति ॥ यदि तर्ह्युदात्ता नानुदात्ता । अनुदात्ता च । कथं ज्ञायते । यदयमुदात्तस्वरितपरस्य सन्नतर इत्याह । कथं कृत्वा ज्ञापकम् । तन्त्रं तरनिर्देश । सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति ॥ त एते तन्त्रे तरनिर्देशे सप्त स्वरा भवन्ति । उदात्तः । उदात्ततरः । अनुदात्तः । अनुदात्ततरः । स्वरितः । स्वरिते य उदात्तः सोऽन्येन विशिष्टः । एकश्रुतिः सप्तमः ॥

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ १ । २ । ३७ ॥

सुब्रह्मण्यायामोकार उदात्त. ॥ १ ॥

सुब्रह्मण्यायामोकार उदात्तो भवति । सुब्रह्मण्योम् ॥

आकार आख्याते परादिश्च ॥ २ ॥

आकार आख्याते परादिश्चोदात्तो भवति । इन्द्र आगच्छ । हरिव आगच्छ ॥

वाक्यादौ च द्वे द्वे ॥ ३ ॥

वाक्यादौ च द्वे द्वे उदात्ते भवतः । इन्द्र आगच्छ । हरिव आगच्छ ॥

---

* १२१८.

मघवन्वर्जम् ॥ ४ ॥

आगच्छ मघवन् ॥

सुत्यापराणामन्तः ॥ ५ ॥

सुत्यापराणामन्त उदात्तो भवति । द्व्यहे सुत्याम् । त्र्यहे सुत्याम् ॥

असावित्यन्तः ॥ ६ ॥

असावित्यन्त उदात्तो भवति । गार्ग्यो यजते । वात्स्यो यजते ॥

अमुष्येत्यन्तः ॥ ७ ॥

अमुष्येत्यन्त उदात्तो भवति । दाक्षेः पिता यजते ॥

स्यान्तस्योपोत्तमं च ॥ ८ ॥

स्यान्तस्योपोत्तममुदात्तं भवत्यन्तश्च । गार्ग्यस्य पिता यजते । वात्स्यस्य पिता यजते ॥

वा नामधेयस्य ॥ ९ ॥

वा नामधेयस्य स्यान्तस्योपोत्तममुदात्तं भवति । देवदत्तस्य पिता यजते । देवदत्तस्य पिता यजते ॥

देवब्रह्मणोरनुदात्तः ॥ १ । २ । ३८ ॥

देवब्रह्मणोरनुदात्तत्वमेके ॥ १ ॥

देवब्रह्मणोरनुदात्तत्वमेक इच्छन्ति । देवा ब्रह्माणः । देवा ब्रह्माणः ॥

स्वरितात्संहितायामनुदात्तानाम् ॥ १ । २ । ३९ ॥

स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयोरैकश्रुत्यवचनम् ॥ १ ॥

स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयोरैकश्रुत्यं वक्तव्यम् । आग्निवे-दयः । पचति । किं पुनः कारणं न सिध्यति । बहुवचनेन निर्देशः क्रियते तेन बहूनामैकश्रुत्यं स्याद्द्व्येकयोर्न स्यात् ॥ नैष दोषः । नात्र निर्देशस्तन्त्रम् । कथं

पुनस्तेनैव नाम निर्देशः क्रियते, तत्रान्तरं स्यात् । तत्कारी च भवांस्तद्द्वेषी च । नान्तरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते ऽवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्तव्य इति । तद्यथा । कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति नान्तरीयकत्वात् । स यावदादेयं तावदादाय तुषपलालान्युत्सृजति । तथा कश्चिन्मांसार्थी मत्स्यान्सकण्टकान्सशकलानाहरति नान्तरीयकत्वात् । स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति । एवमिहापि नान्तरीयकत्वाद्बहुवचनेन निर्देशः क्रियते ऽविशेषेणैकश्रुत्यम् ॥

अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानामप्रसिद्धिः ॥ २ ॥

अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानामैकश्रुत्यं न प्राप्नोति । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि ॥

अनेकमपीति तु वचनात्सिद्धम् ॥ ३ ॥

अनेकमप्येकमपि स्वरितात्परं संहितायामेकश्रुति भवतीति वक्तव्यम् । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयोरैकश्रुत्यवचनमविशेषेण व्यवहितानामप्रसिद्धिरिति । नैष दोषः । कथम् । एकशेषनिर्देशोऽयम् । अनुदात्तस्य चानुदात्तयोश्चानुदात्तानां चानुदात्तानामिति । एवमपि पट्प्रभृतीनामेव प्राप्नोति । पट्प्रभृतिष्वेकशेषः परिसमाप्यते । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति, द्व्येकयोरपि भविष्यति ॥

अपृक्त एकाल्प्रत्ययः ॥ १ । २ । ४१ ॥

अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलो ऽग्रहणार्थम् ॥ १ ॥

अपृक्तसंज्ञायां हल्ग्रहणं कर्तव्यम् । एकहल्प्रत्ययो ऽपृक्तसंज्ञो भवतीति वक्तव्यम् । किं प्रयोजनम् । स्वादिलोपे हलो ऽग्रहणार्थम् । स्वादिलोपे हलो ग्रहणं न कर्तव्यं भवति । हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् [६ १ ६८] इत्यपृक्तस्येत्येव सिद्धम् ॥ अणिञोर्लुगर्थमल्ग्रहणम् । अणिञोर्लुगर्थमल्ग्रहणं कर्तव्यम् । किं प्रयोजनम् । अणिञोर्लुकि ग्रहणं न कर्तव्यं भवति । ण्यक्षत्रियार्षञितो यूनि लुगणिञोः [२ ४ ५८] इत्यपृक्तस्येत्येव सिद्धम् ।

अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गः ॥ २ ॥

अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गो भवति । इहापि प्राप्नोति । फाण्टाहृतेरपत्यं माणवकः फाण्टाहृत इति[*] ॥ णवचनसामर्थ्यान्न भविष्यति ।

वचनप्रामाण्यादिति चेत्फग्निवृत्त्यर्थं वचनम् ॥ ३ ॥

वचनप्रामाण्यादिति चेत्फग्निवृत्त्यर्थमेतत्स्यात् । फगतो मा भूदिति[†] ॥

पैलादिषु वचनात्सिद्धम् ॥ ४ ॥

यद्येतावत्प्रयोजनं स्यात्पैलादिष्वेव[‡] पाठं कुर्वीत । तत्र पाठादन्येषामपि फको निवृत्तिर्भवति । एवं सिद्धे सति यदयं णं शास्ति तज्ज्ञापयत्याचार्यो नास्य लुग्भवतीति ॥

तान्येतानि त्रीणि ग्रहणानि भवन्ति । अपृक्तसंज्ञायां हल्ग्रहणं कर्तव्यम् । स्वादिलोपे हलो ग्रहणं न कर्तव्यम् । अणिञोर्लुकि ग्रहणं कर्तव्यम् । अल्ग्रहणेऽपि वै क्रियमाणे तान्येव त्रीणि ग्रहणानि भवन्ति । अपृक्तसंज्ञायामल्ग्रहणं कर्तव्यम् । स्वादिलोपे हलो ग्रहणं कर्तव्यम् । अणिञोर्लुकि ग्रहणं न कर्तव्यं भवत्यपृक्तग्रहणं कर्तव्यम् । तत्र नास्ति लाघवकृतो विशेषः ॥ अयमस्ति विशेषः । अल्ग्रहणे क्रियमाण एकग्रहणं न करिष्यते । कस्मान्न भवति । दर्विः जागृविः[§] । अलेव यः प्रत्ययः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अल्ग्रहणसामर्थ्यात् । यदि योऽल् चान्यश्च तत्र स्यादल्ग्रहणमनर्थकं स्यात् ॥ हल्ग्रहणेऽपि क्रियमाण एकग्रहणं न करिष्यते । कस्मान्न भवति । दर्विः जागृविः । हलेव यः प्रत्ययः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । हल्ग्रहणसामर्थ्यात् । यदि यो हल् चान्यश्च तत्र स्याद्धल्ग्रहणमनर्थकं स्यात् । अस्त्यन्यद्धल्ग्रहणस्य प्रयोजनम् । किम् । हलन्तस्य यथा स्यादजन्तस्य मा भूदिति ॥ एवं तर्हि सिद्धे सति यदल्ग्रहणे क्रियमाण एकग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र वर्णग्रहणे जातिग्रहणं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमित्युक्तं[¶] तदुपपन्नं भवति ॥

* ४ १.१५०. † ४ १ १०१ ‡ २.४ ५९ § ६.१ ८ ¶ १ ३.१०.

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ १ । २ । ४२ ॥

तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः ॥ १ ॥

तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासस्यैकार्थत्वात्सञ्ज्ञाया अप्रसिद्धिः । एको ऽयमर्थस्तत्पुरुषो नामानेकार्थाश्रयं च सामानाधिकरण्यम् ॥

सिद्धं तु पदसामानाधिकरण्यात् ॥ २ ॥

सिद्धमेतत् । कथम् । तत्पुरुषः समानाधिकरणपदः कर्मधारयसञ्ज्ञो भवतीति वक्तव्यम् । *सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु ।* ननु चोक्तं तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिरिति । नैष दोषः । अथ तत्पुरुषो ऽस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तित्वं च । अस्ति तादर्थ्यात्ताच्छब्द्यं तत्पुरुषार्थानि पदानि तत्पुरुष इति । तद्यस्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम् ॥

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥ १ । २ । ४३ ॥

प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात्प्रथमायाः समासे सञ्ज्ञाप्रसिद्धिः ॥ १ ॥

प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात्प्रथमायाः समासे उपसर्जनसञ्ज्ञाया अप्रसिद्धिः । न हि कष्टादीनां समासे* प्रथमां पश्यामः ॥

सिद्धं तु समासविधाने वचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । समासविधाने प्रथमानिर्दिष्टमुपसर्जनसंज्ञं भवतीति वक्तव्यम् ॥ तर्हि वक्तव्यम् ।

न वा तादर्थ्यात्ताच्छब्द्यम् ॥ ३ ॥

न वा वक्तव्यम् । किं कारणम् । तादर्थ्यात्ताच्छब्द्यं भवति । समासार्थं शास्त्रं समास इति ॥

---

* २ १ २४.

यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्राप्युपसर्जनसंज्ञाप्रसङ्गः ॥ ४ ॥

यस्य विधौ प्रथमानिर्देशः क्रियते ततोऽन्यत्रापि तस्योपसर्जनसंज्ञा प्राप्नोति । राज्ञः कुमारीं राजकुमारीं श्रितः । श्रितादिसमासे द्वितीयान्तं प्रथमानिर्दिष्टं तस्य षष्ठीसमासे ऽप्युपसर्जनसंज्ञा प्राप्नोति* ॥

सिद्धं तु यस्य विधौ तं प्रतीति वचनात् ॥ ५ ॥

सिद्धमेतत् । कथम् । यस्य विधौ यत्प्रथमानिर्दिष्टं तं प्रति तदुपसर्जनसंज्ञं भवतीति वक्तव्यम् ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । उपसर्जनमिति महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । अप्रधानमुपसर्जनमिति । प्रधानमुपसर्जनमिति च संबन्धिशब्दावेतौ । तत्र संबन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तं प्रति तदुपसर्जनसंज्ञं भवतीति ॥

अथ यत्र द्वे षष्ठ्यन्ते कस्मात्तत्र प्रधानस्योपसर्जनसंज्ञा न भवति । राज्ञः पुरुषस्य राजपुरुषस्येति† ।

षष्ठ्यन्तयोश्चोपसर्जनत्व उक्तम् ॥ ६ ॥

किमुक्तम् । षष्ठ्यन्तयोः समासे ऽर्थाभेदात्प्रधानस्यापूर्वनिपात इति‡ । एवं नचेदमकृत भवेदुपसर्जनं पूर्वमित्यर्थश्चाभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति ॥ यद्यपि तावदेतदुपसर्जनकार्यं परिहृतमिदमपरं प्राप्नोति । राज्ञः कुमार्या. राजकुमार्याः । गोस्त्रियोरुपसर्जनस्य [१.२.४८] इति ह्रस्वत्वं प्राप्नोति ।

उक्तं वा ॥ ७ ॥

किमुक्तम् । परवल्लिङ्गमिति शब्दशब्दार्थाविति§ । तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति ॥

एकविभक्ति चापूर्वनिपाते ॥ १ । २ । ४४ ॥

द्वितीयादीनामप्यनेनोपसर्जनसंज्ञा प्राप्नोति । तत्र को दोषः । तत्रापूर्वनिपात इति प्रतिषेधः प्रसज्येत ॥ नाप्रतिषेधात् । नायं प्रसज्यप्रतिषेधः पूर्वनिपाते नेति ।

* १.२.४८, २.२.११ † १.२.८ ‡ २.२.३० § २.४.२६

किं तर्हि । पर्युदासोऽयं यदन्यत्पूर्वनिपातादिति । पूर्वनिपाते ऽव्यापारः । यदि केनचित्प्राप्नोति तेन भविष्यति । पूर्वेण च प्राप्नोति तेन भविष्यति ॥ अप्राप्तेर्वा । अथवानन्तरा या प्राप्तिः सा प्रतिषिध्यते । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति । ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते । नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥

एकविभक्तावषष्ठ्यन्तवचनम् ॥ १ ॥

एकविभक्तावषष्ठ्यन्तानामिति वक्तव्यम् । इह मा भूत्* । अर्धं पिप्पल्या अर्धपिप्पली इति.† ॥

उक्तं वा ॥ २ ॥

किमुक्तम् । परवल्लिङ्गमिति शब्दशब्दार्थाविति‡ । तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति ॥

कानि पुनरस्य योगस्य प्रयोजनानि ।

प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः क्तार्थे ॥ ३ ॥

द्विगुः§ । पञ्चभिर्गोभिः क्रीतः पञ्चगुः ॥ प्राप्तापन्न¶ । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नो जीविकामापन्नजीविकः ॥ अलंपूर्व** । अलं कुमार्यै अलंकुमारिः । उपसर्गाः क्तार्थे** । निष्कौशाम्बिः । निर्वाराणसिः ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

१.२.४८. †२.२.२ ‡२.४.२६ §२.१.५२ ¶२.२.४ **२.२.१८*

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ १ । २ । ४५ ॥

अर्थवदिति व्यपदेशाय वर्णानां च मा भूदिति । किं च स्यात् । वनम् धनमिति नलोपः प्रातिपदिकान्तस्य [८.२.७] इति नलोपः प्रसज्येत ॥ अधातुरिति किमर्थम् । अहन्वृत्रमिति ॥ अधातुरिति शक्यमकर्तुम् । कस्मान्न भवति अहन्वृत्रमिति । आचार्यप्रवृत्तिर्ज्ञापयति न धातोः प्रातिपदिकसंज्ञा भवतीति यदयं सुपो धातुप्रातिपदिकयोः [२.४.७१] इति धातुग्रहणं करोति । नैतदस्ति ज्ञापकम् । प्रतिषिद्धार्थमेतत्स्यात् । अपि काकः श्येनायते* इति ॥ अप्रत्यय इति किमर्थम् । काण्डे कुड्ये† ॥ अप्रत्यय इति शक्यमकर्तुम् । कस्मान्न भवति काण्डे कुड्ये इति । कृत्तद्धितग्रहणं‡ नियमार्थं भविष्यति । कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति ॥

अर्थवत्यनेकपदप्रसङ्गः ॥ १ ॥

अर्थवति प्रातिपदिकसंज्ञायामनेकस्यापि पदस्य प्रातिपदिकसंज्ञा प्राप्नोति । दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति ॥ समुदायोऽत्रानर्थकः ।

समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वं यथा लोके ॥ २ ॥

समुदायोऽनर्थक इति चेदवयवैरर्थवद्भिः समुदाया अप्यर्थवन्तो भवन्ति यथा लोके । तद्यथा । लोके आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते न च तत्र सर्व आढ्या भवन्ति सर्वे वा गोमन्तः ॥ यथा लोक इत्युच्यते लोके चावयवा एवार्थवन्तो न समुदायाः । अतथावयवा एवार्थवन्तो न समुदायाः यस्य हि तद्द्रव्यं भवति स तेन कार्यं करोति यस्य च ता गावः सन्ति स तासां क्षीरं घृतं चोपभुङ्क्ते अन्यैस्तद्द्रष्टुमप्यशक्यम् । का तर्हीयं वाचोयुक्तिराढ्यमिदं नगरं गोमदिदमिति । एषैषा वाचोयुक्तिः । इह तावदाढ्यमिदं नगरमित्यकारो मत्वर्थीयः । आढ्या अस्मिन्सन्ति तदिदमाढ्यमिति । गोमदिदमिति मत्वन्तान्मत्वर्थीयो लुप्यते ॥ एवमपि

वाक्यप्रतिषेधोऽर्थवत्त्वात् ॥ ३ ॥

वाक्यस्य प्रातिपदिकसंज्ञायाः प्रतिषेधो वक्तव्यः । देवदत्त गामभ्याज शुक्लाम्

---

* ३.१.११ † १.२.४० ‡ १.२.४६

देवदत्त गामभ्याज कृष्णामिति । किं कारणम् । अर्थवत्त्वात् । अर्थवद्ध्येतद्वाक्यं भवति ॥ न वै पदार्थादन्यस्यार्थस्योपलब्धिर्भवति वाक्ये ।

पदार्थादन्यस्यानुपलब्धिरिति चेत्पदार्थाभिसंबन्धस्योपलब्धिः ॥ ४ ॥

पदार्थादन्यस्यानुपलब्धिरिति चेदेवमुच्यते । पदार्थाभिसंबन्धस्योपलब्धिर्भवति वाक्ये । इह देवदत्त इत्युक्ते कर्ता निर्दिष्टः कर्म क्रियागुणौ चानिर्दिष्टौ । गामित्युक्ते कर्म निर्दिष्टं कर्ता क्रियागुणौ चानिर्दिष्टौ । अभ्याजेत्युक्ते क्रिया निर्दिष्टा कर्तृकर्मणी गुणश्चानिर्दिष्टः । शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया चानिर्दिष्टा । इहेदानीं देवदत्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टं भवति । देवदत्त एव कर्ता नान्यः । गौरेव कर्म नान्यत् । अभ्याजिरेव क्रिया नान्या । शुक्लामेव न कृष्णामिति । एतेषां पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थः ॥

तस्मात्प्रतिषेधः ॥ ५ ॥

तस्मात्प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः ।

अर्थवत्समुदायानां समासग्रहणं नियमार्थम् ॥ ६ ॥

अर्थवत्समुदायानां समासग्रहणं नियमार्थं भविष्यति । समास एवार्थवतां समुदायानां प्रातिपदिकसंज्ञो भवति नान्य इति ॥ यदि नियमः क्रियते प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति । बहुपटवः* उच्चकैरिति† । किं पुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते । प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यात्‡ । नैष दोषः । यथैवात्राप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न भवत्येवं लुगपि§ न भविष्यति । तत्र यैवासावन्तर्वर्तिनी विभक्तिस्तस्या एव श्रवणं भविष्यति । नैवं शक्यम् । स्वरे हि दोषः स्यात् । बहुपटव इत्येवं स्वरः प्रसज्येत बहुपटव इति चेष्यते । पठिष्यति ह्याचार्यः । चितः सप्रकृतेर्बह्वकजर्थमिति¶ । तस्यां पुनर्लुप्तायां यान्या विभक्तिरुत्पद्यते तस्याः प्रकृत्यनेकदेशत्वादन्तोदात्तत्वं न भविष्यति ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञेति यदयमप्रत्यय इति प्रतिषेधं शास्ति । स च तदन्तप्रतिषेधः । स तर्हि ज्ञापकार्थः प्रत्ययप्रतिषेधो वक्तव्यः । ननु चायं प्राप्त्यर्थो ऽपि वक्तव्यः । नार्थः प्राप्त्यर्थेन । कृत्तद्धितग्रहणं नियमार्थं भविष्यति । कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भविष्यति

* ५.३.६८ † ५.३.७१ ‡ ४.१.१. § २.४.७१. ¶ ६.१.१६३.

नान्यस्य प्रत्ययान्तस्येति। स एषोऽनन्यार्थः प्रत्ययप्रतिषेधो वक्तव्यः प्रकृतिप्रत्ययसमुदायस्य वा प्रातिपदिकसंज्ञा वक्तव्या॥ उभयं न वक्तव्यम्। तुल्यजातीयस्य नियमः। कथं तुल्यजातीयः। यथाजातीयकानां समासः। कथंजातीयकानां समासः। सुबन्तानाम्॥ सुप्तिङ्समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति। सुप्तिङ्समुदायस्य प्रातिपदिकसंज्ञारभ्यते। जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधातीति*। तन्नियमार्थं भविष्यति। एतस्यैव सुप्तिङ्समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति॥ तिङ्समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति। तिङ्समुदायस्यापि प्रातिपदिकसंज्ञारभ्यते। आख्यातमाख्यातेन क्रियासातत्य इति*। तन्नियमार्थं भविष्यति। एतस्यैव तिङ्समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति॥

अर्थवत्ता नोपपद्यते केवलेनावचनात्॥ ७॥

अर्थवत्ता नोपपद्यते वृक्षशब्दस्य। किं कारणम्। केवलेनावचनात्। न केवलेन वृक्षशब्देनार्थो गम्यते। केन तर्हि। सप्रत्ययकेन॥

न वा प्रत्ययेन नित्यसंबन्धात्केवलस्याप्रयोगः॥ ८॥

न वैष दोषः। किं कारणम्। प्रत्ययेन नित्यसंबन्धात्। नित्यसंबन्धावेतावर्थौ प्रकृतिः प्रत्यय इति। प्रत्ययेन नित्यसंबन्धात्केवलस्य प्रयोगो न भविष्यति॥ अन्यद्भवान्पृष्टो ऽन्यदाचष्टे। आम्रान्पृष्टः कोविदारानाचष्टे। अर्थवत्ता नोपपद्यते केवलेनावचनादिति भवानस्माभिश्चोदितः केवलस्याप्रयोगे हेतुमाह। एवं च किल नाम कृत्वा चोद्यते समुदायस्यार्थे प्रयोगादवयवानामप्रसिद्धिरिति॥

सिद्धं त्वन्वयव्यतिरेकाभ्याम्॥ ९॥

सिद्धमेतत्। कथम्। अन्वयाद्व्यतिरेकाच्च। कोऽसावन्वयो व्यतिरेको वा। इह वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्षशब्दो ऽकारान्तः सकारश्च प्रत्ययः। अर्थो ऽपि कश्चिद्गम्यते मूलस्कन्धफलपलाशवानेकत्वं च। वृक्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी। सकारो हीयत औकार उपजायते वृक्षशब्दो ऽकारान्तो ऽन्वयी। अर्थो ऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। एकत्वं हीयते द्वित्वमुपजायते मूलस्कन्धफलपलाशवानन्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो यो ऽर्थो हीयते यः शब्द उपजायते तस्यासावर्थो यो ऽर्थ उपजायते यः शब्दो ऽन्वयी तस्यासावर्थो यो ऽर्थो ऽन्वयी॥ विषम उपन्यासः। बहवो हि शब्दा एकार्था

भवन्ति । तद्यथा । इन्द्रः शक्रः पुरुहूतः पुरंदरः । कन्दुः कोष्ठः कुशूल इति । एकश्च शब्दो बह्वर्थः । तद्यथा । अक्षाः पादाः माषा इति । अतः किं न साधीयो ऽर्थवत्ता सिद्धा भवति । न ब्रूमोऽर्थवत्ता न सिध्यतीति । वर्णितार्थवत्तान्वयव्यतिरेकाभ्यामेव । तत्र कुत एतदयं प्रकृत्यर्थो ऽयं प्रत्ययार्थ इति न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्प्रत्यय एव वा । सामान्यशब्दा एत एवं स्युः । सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते । यतस्तु खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदर्थे प्रतीतिरुपजायते ऽतो मन्यामहे नेमे सामान्यशब्दा इति । न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे ॥

किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः ।

वर्णस्यार्थवदनर्थकत्व उक्तम् ॥ १० ॥

किमुक्तम् । अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्च । संघातस्यैकार्थ्यात्सुबभावो वर्णात् । अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेर्वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनादिति* ॥ तत्रेदमपरिहृतं संघातार्थवत्त्वाच्चेति । तस्य परिहारः ।

संघातार्थवत्त्वाच्चेति चेद्दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः ॥ ११ ॥

संघातार्थवत्त्वाच्चेति चेद्दृश्यते हि पुनरतदर्थेन गुणेन गुणिनोऽर्थभावः । तद्यथा । एकस्तन्तुस्त्वक्त्राणे ऽसमर्थस्तत्समुदायश्च कम्बलः समर्थः । एकश्च तण्डुलः क्षुत्प्रतिघाते ऽसमर्थस्तत्समुदायश्च वर्धितकं समर्थम् । एकश्च बल्वजो बन्धने ऽसमर्थस्तत्समुदायश्च रज्जुः समर्था भवति ॥ विषम उपन्यासः । भवति हि तत्र या च यावती चार्थमात्रा । भवति हि किंचित्प्रत्येकस्तन्तुस्त्वक्त्राणे समर्थ एकश्च तण्डुलः क्षुत्प्रतिघाते समर्थ एकश्च बल्वजो बन्धने समर्थः । इमे पुनर्वर्णा अत्यन्तायैवानर्थकाः ॥ यथा तर्हि रथाङ्गानि विहृतानि प्रत्येकं व्रजिक्रियां प्रत्यसमर्थानि भवन्ति तत्समुदायश्च रथः समर्थ एवमेषां वर्णानां समुदाया अर्थवन्तो ऽवयवा अनर्थका इति ॥

निपातस्यानर्थकस्य प्रातिपदिकत्वम् ॥ १२ ॥

निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या । प्रज्ञाति निप्रज्ञाति । लम्बते

---

* निरु० १

मलम्स्वेते ॥ किं पुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते । प्रातिपदिकादिति स्वाद्युत्पत्तिः* सुबन्तं पदमिति पदसंज्ञा† पदस्य पदात् [८.१.१६–१७] इति निघातो यथा स्यात्‡ ॥ नैतदस्ति प्रयोजनम् । सत्यामपि प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणम् । न हि प्रातिपदिकसंज्ञायामेव स्वाद्युत्पत्तिः प्रतिबद्धा । किं तर्हि । एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते§ न चैषामेकत्वादयः सन्ति ॥ नैष दोषः । अविशेषेणोत्पद्यन्त उत्पन्नानां नियमः क्रियते ॥ अथवा प्रकृतानर्थानपेक्ष्य नियमः । के च प्रकृताः । एकत्वादयः । एकस्मिन्नेवार्थ एकवचनं न द्वयोर्न बहुषु । द्वयोरेवार्थयोर्द्विवचनं नैकस्मिन्न बहुषु । बहुष्वेवार्थेषु बहुवचनं नैकस्मिन्न द्वयोरिति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयत्यनर्थकानामप्येतेषां भवत्यर्थवत्कृतमिति यदयमधिपरी अनर्थकौ [१.४.९३] इत्यनर्थकयोर्गत्युपसर्गसंज्ञाबाधिकां कर्मप्रवचनीयसंज्ञां शास्ति ॥

किं पुनरयं पर्युदासो यदन्यत्प्रत्ययादिति । आहोस्वित्प्रसज्यायं प्रतिषेधः प्रत्ययो नेति । कश्चात्र विशेषः ।

अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधोऽन्तवत्त्वात् ॥ १३ ॥

अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधो वक्तव्यः । काण्डे कुड्ये । किं कारणम् । अन्तवत्त्वात् । तिबतिपोरेकादेशोऽतिपोऽन्तवत्स्यात् । अप्रत्यय इति कृत्वा प्रातिपदिकसंज्ञा प्राप्नोति¶ ॥ अस्तु तर्हि प्रसज्यप्रतिषेधः प्रत्ययो नेति ।

न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात् ॥ १४ ॥

न प्रत्यय इति चेदूङेकादेशे प्रतिषेधः प्राप्नोति । ब्रह्मबन्धूः** । किं कारणम् । आदिवत्त्वात् । प्रत्ययाप्रत्यययोरेकादेशः प्रत्ययस्यादिवत्स्यात् । तत्र प्रत्ययो नेति प्रतिषेधः प्राप्नोति ॥ नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्त ऊङन्तात्स्वादय इति यदयं नोङ्धात्वोः [६.१.१७५] इति विभक्तिस्वरस्य प्रतिषेधं शास्ति ॥ अथवा द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि । तत्रावयवस्य या प्रातिपदिकसंज्ञा तयान्तवद्भावात्स्वाद्युत्पत्तिर्भविष्यति ॥

सुब्लोपे च प्रत्ययलक्षणत्वात् ॥ १५ ॥

सुब्लोपे न प्रत्ययलक्षणेन प्रतिषेधः प्राप्नोति । राजा तक्षा†† । प्रत्ययलक्षणेन प्रत्ययो

* ४.१.१,२. † १.४.१४ ‡ ८.१.२८. § १.४.२१,२२. ¶ १.२.४० ** ४.१.६६ †† ६.१.६८; (८.२.७).

नेति प्रतिषेधः प्राप्नोति ॥ नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन प्रतिषेधो भवतीति यदय न ङिसंबुद्ध्योः [८.२.८] इति प्रतिषेधं शास्ति ॥

अथवा पुनरस्तु पर्युदासः । ननु चोक्तमप्रत्यय इति चेत्तिवेकादेशे प्रतिषेधोऽन्तवत्त्वादिति । प्रसज्यप्रतिषेधेऽप्येष दोषः । द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि । गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन । तस्मादुभाभ्यामपि वक्तव्यं स्याद्ध्रस्वो नपुंसके यत्तस्येति । किं च नपुंसके । नपुंसकं यस्य गुणः । कस्य च नपुंसकं गुणः । प्रातिपदिकस्य ॥

कृत्तद्धितसमासाश्च ॥ १ । २ । ४६ ॥

समासग्रहणं किमर्थम् ।

समासग्रहण उक्तम् ॥ १ ॥

*किमुक्तम् । अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति** ॥

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ १ । २ । ४७ ॥

प्रातिपदिकग्रहणं किमर्थम् ।

नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्निवृत्त्यर्थम् ॥ १ ॥

नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं क्रियते तिङ्निवृत्त्यर्थम् । तिङन्तस्य ह्रस्वत्वं मा भूत् । काण्डे कुड्ये । रमते ब्राह्मणकुलमिति ॥

अव्ययप्रतिषेधः ॥ २ ॥

अव्ययानां प्रतिषेधो वक्तव्यः । दोषा ब्राह्मणकुलम् । दिवा ब्राह्मणकुलमिति ॥ स तर्हि वक्तव्यः । न वक्तव्यः । नात्राव्ययं नपुंसके वर्तते । किं तर्हि । अधिकरणमत्राव्ययं नपुंसकस्य ॥ *इह तर्हि प्राप्नोति । काण्डीभूतं वृषलकुलम् । कुड्यीभूतं वृषलकुलमिति* ॥

---

* १.२.४५ *.

न वा लिङ्गाभावात् ॥ ३ ॥

न वा वक्तव्यम् । किं कारणम् । लिङ्गाभावात् । अलिङ्गमव्ययम् ॥ किं पुनरयमव्ययस्यैव परिहार आहोस्वित्तिबन्तस्यापि । तिबन्तस्यापीत्याह । कथम् । अव्ययं हि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम् । उच्चैर्नीचैरिति विभक्त्यर्थप्रधानं हिरुक्पृथगिति क्रियाप्रधानम् । तिबन्तं चापि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानम् । काण्डे कुड्ये इति विभक्त्यर्थप्रधानं रमते ब्राह्मणकुलमिति क्रियाप्रधानम् । न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति ॥ अवश्यं चैतदेव विज्ञेयम् । क्रियमाणेऽपि हि प्रातिपदिकग्रहण इह प्रसज्येत । काण्डे कुड्ये । द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि । गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन । तस्मादुभाभ्यामपि वक्तव्यं स्याद्ध्रस्वो नपुंसके यत्तस्येति । किं च नपुंसके । नपुंसकं यस्य गुणः । कस्य च नपुंसकं गुणः । प्रातिपदिकस्य ॥

यण्एकादेशदीर्घत्वेषु प्रतिषेधः ॥ ४ ॥

यण्एकादेशदीर्घत्वेषु प्रतिषेधो वक्तव्यः । युगवरत्राय युगवरत्रार्थम् युगवरत्रेभ्यः ॥

यण्एकादेशदीर्घत्वेषु बहिरङ्गलक्षणत्वात्सिद्धम् ॥ ५ ॥

बहिरङ्गा एते विधयः* । अन्तरङ्गं ह्रस्वत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥

गोस्त्रियोरुपसर्जनस्य ॥ १ । २ । ४८ ॥

उपसर्जनह्रस्वत्वे च ॥ १ ॥

उपसर्जनह्रस्वत्वे च । किम् । यण्एकादेशदीर्घत्वेषु प्रतिषेधो वक्तव्यः । अतिखट्वाय अतिखट्वार्थम् अतिखट्वेभ्यः ॥ उपसर्जनह्रस्वत्वे च । किम् । बहिरङ्गलक्षणत्वात्सिद्धमित्येव । बहिरङ्गा एते विधयः । अन्तरङ्गं ह्रस्वत्वम् । असिद्धं बहिरङ्गमन्तरङ्गे ॥

गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम् ॥ २ ॥

गोटाङ्ग्रहणं कर्तव्यम् । किमिदं टाङिति । प्रत्याहारग्रहणम् । क्व संनिविष्टानां प्रत्याहारः । टापः प्रभृत्या ष्यङो ङकारात्† । किं प्रयोजनम् । कृन्निवृत्त्यर्थम् ।

* ६.१ १०१, ७.१ १०२,१०१ † ४.१ ४ ७८

कुस्त्रिया धातुस्त्रियाश्च ह्रस्वत्वं मा भूदिति । अतितन्त्रीः अतिश्रीः अतिलक्ष्मीरिति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । स्त्रीग्रहणं स्वर्यते तत्र स्वरितेनाधिकारगतिर्भवति* । स्त्रियाम् [४.१.३] इत्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते । स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति ॥ यद्येवं प्रत्ययग्रहणमिदं भवति तत्र प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीतीह न प्राप्नोति । अतिराजकुमारिः अतिसेनानीकुमारिरिति । अस्त्रीप्रत्ययेनेत्येवं तत् ॥

ईयसो बहुव्रीहौ पुंवद्वचनम् ॥ ३ ॥

ईयसो बहुव्रीहौ पुंवद्भावो वक्तव्यः । बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी । विद्यमानश्रेयसी ॥

पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थम् ॥ ४ ॥

पूर्वपदस्य च प्रतिषेधो वक्तव्यः । किं प्रयोजनम् । गोसमासनिवृत्त्यर्थम् । गोनिवृत्त्यर्थं समासनिवृत्त्यर्थं च ॥ गोनिवृत्त्यर्थं तावत् । गोकुलम् गोक्षीरम् गोपालक इति ॥ समासनिवृत्त्यर्थम् । राजकुमारीपुत्रः सेनानीकुमारीपुत्र इति । किमुच्यते समासनिवृत्त्यर्थमिति न पुनरसमासोऽपि किंचित्पूर्वपदं यदर्थः प्रतिषेधः स्यात् । स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते न चान्तरेण समासं स्त्र्यन्तं प्रातिपदिकमुपसर्जनमस्ति । ननु चेदमस्ति । खट्वापादः मालापाद इति । एकादेशे कृते ऽन्तादिवद्भावात्प्राप्नोति । उभयत आश्रये नान्तादिवत् ॥

गोनिवृत्त्यर्थेन तावन्नार्थः । गोऽन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते न चैतद्गोऽन्तम् । ननु चैतदपि व्यपदेशिवद्भावेन गोऽन्तम् । व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ समासनिवृत्त्यर्थेन चापि नार्थः । स्त्र्यन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते प्रधानमुपसर्जनमिति च संबन्धिशब्दावेतौ । तत्र सबन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तस्य चेत्सो ऽन्तो भवतीति । अवश्यं चैतदेवं विज्ञेयम् । उच्यमानेऽपि हि प्रतिषेध इह प्रसज्येत । पञ्च कुमार्यः प्रिया अस्य पञ्चकुमारीप्रियः । दशकुमारीप्रिय इति ॥

कपि च ॥ ५ ॥

कपि च प्रतिषेधो वक्तव्यः । बहुकुमारीकः बहुवृषलीकः† ॥

---

* १.३.११. † ५.४.१५२

द्वन्द्वे च ॥ ६ ॥

द्वन्द्वे च प्रतिषेधो वक्तव्यः । कुक्कुटमयूर्यौ ॥

उक्तं वा ॥ ७ ॥

किमुक्तम् । कपि तावदुक्तं न कपि [७.४.१४] इति प्रतिषेध इति । नैतदस्त्युक्तम् । केऽणः [७.४.१३] इति या ह्रस्वप्राप्तिस्तस्याः प्रतिषेधः । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । अवश्यं चैतदेव विज्ञेयम् । यो हि मन्यते या च यावती च ह्रस्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेध इतीहापि तस्य प्रतिषेधः प्रसज्येत । प्रिय ग्रामणि* ब्राह्मणकुलमस्य प्रियग्रामणिकः । प्रियसेनानिकः ॥ इदं तर्ह्युक्तम् । कपि कृते ऽनन्त्यत्वाद्ध्रस्वत्वं न भविष्यति । इदमिह संप्रधार्यम् । कप्क्रियतां ह्रस्वत्वमिति किमत्र कर्तव्यम् । परत्वात्कप् । अन्तरङ्गं ह्रस्वत्वम् । अन्तरङ्गतरः कप् । ननु चायं कप्समासान्त इत्युच्यते । तादर्थ्यात्ताच्छब्द्यं भविष्यति । येषां पदानां समासो न तावत्तेषामन्यद्भवति कपं तावत्प्रतीक्षते ॥ द्वन्द्वे ऽप्युक्तम् । किमुक्तम् । परवल्लिङ्गमिति शब्दशब्दार्थाविति† । तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति ॥

लुक्तद्धितलुकि ॥ १ । २ । ४९ ॥

तद्धितलुक्यवन्त्यादीनां प्रतिषेधः ॥ १ ॥

तद्धितलुक्यवन्त्यादीनां प्रतिषेधो वक्तव्यः । अवन्ती कुन्ती कुरूः‡ ॥

तद्धितलुक्यवन्त्यादीनामप्रतिषेधो ऽलुक्परत्वात् ॥ २ ॥

तद्धितलुक्यवन्त्यादीनामप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । लुक्कस्मान्न भवति । अलुक्परत्वात् । लुकीत्युच्यते न चात्र लुकं पश्यामः ॥ लुकीति नैषा परसप्तमी शक्या विज्ञातुं न हि लुका पौर्वापर्यमस्ति । का तर्हि । सत्सप्तमी । लुकि सतीति । सत्सप्तमी चेत्प्राप्नोति ॥ एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति । किम् । उपसर्जनस्येति वर्तते§ । न च जातिरुपसर्जनम् ॥

* १.१.४० † १.४.११०. ‡ ४.१.१७१, १७२, १७८, ५.१, ११ § १.२.४८

इद्गोण्याः ॥१।२।५०॥

इद्गोण्या नेति वक्तव्यम्

गोण्या नेत्येव सिद्धम् । नार्थ इत्त्वेन ॥ का रूपसिद्धिः । पञ्चगोणिः दशगोणिः[*] ।

ह्रस्वता हि विधीयते ।

ह्रस्वत्वमत्र विधीयते गोस्त्रियोरुपसर्जनस्य [१.२.४८] इति ॥

इति वा वचने तावत्

इदिति वोच्येत नेति वा को न्वत्र विशेषः ॥

मात्रार्थे वा कृतं भवेत् ॥ १ ॥

अथवा मात्रार्थमिदं वक्तव्यम् । गोणीमात्रमिदं गोणिः[†] ॥

अपर आह ।

गोण्या इत्त्वं प्रकरणात्

अदिष्यं गोण्या इत्त्वम् । किं कारणम् । प्रकरणात् । प्रकृतं ह्रस्वत्वम् । ह्रस्व इति वर्तते[‡] ॥ ननु सूच्याः ।

सूच्याद्यर्थमथापि वा ॥

सूच्याद्यर्थमिदं द्रष्टव्यम् । पञ्चसूचिः दशसूचिः ॥

इद्गोण्या नेति वक्तव्यं ह्रस्वता हि विधीयते ।
इति वा वचने तावन्मात्रार्थे वा कृतं भवेत् ॥ १ ॥
गोण्या इत्त्वं प्रकरणात्सूच्याद्यर्थमथापि वा ॥

लुपि युक्तवद्व्यक्तिवचने ॥१।२।५१॥

व्यक्तिवचने इति किमर्थम् । शिरीषाणामदूरभवो ग्रामः शिरीषाः[§] । तस्य ग्रामस्य वनं शिरीषवनम् । किं च स्यात् । विभाषौषधिवनस्पतिभ्यः [८.४.६] इति णत्वं प्रसज्येत ॥

अपर आह । कटुबदर्या अदूरभवो ग्रामः कटुबदरी । षष्ठी युक्तवद्भावेन मा भूदिति ॥ अथ व्यक्तिवचने इत्युच्यमाने कस्मादेवात्र न भवति यद्यपि वि

[illegible]

यवाम् । नेदं पारिभाषिकस्य वचनस्य ग्रहणम् । किं तर्हि । अन्वर्थग्रहणम् । उच्यते वचनमिति । एवमपि षष्ठी प्राप्नोति षष्ठ्यपि ह्युच्यते । लुपोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति । आतिदेशिकी तर्हि प्राप्नोति । एवं तर्हि

प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावता युक्तम् ।
वक्तुश्च कामचारः प्राग्वृत्तेर्लिङ्गसंख्ये ये ॥

प्रागपि वृत्तेर्युक्तं वनस्पतिभिर्नगरं वृत्तं चापि युक्तं वनस्पतिभिर्नगरम् । वृत्ते च युक्तवद्भावो विधीयते । कामचारश्च प्रयोक्तुः प्राग्वृत्तेर्ये लिङ्गसंख्ये ते अतिदेष्टुं वृत्तस्य वा ये लिङ्गसंख्ये ते । यावता कामचारो वृत्तस्य ये लिङ्गसंख्ये ते अतिदेक्ष्येते न प्राग्वृत्तेर्ये ॥

किमर्थं पुनरिदमुच्यते ।

अन्यत्राभिधेयव्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः ॥ १ ॥

अन्यत्राभिधेयवल्लिङ्गवचनानि भवन्ति । क्वान्यत्र । लुकि । लवणः सूपः । लवणा यवागूः । लवणं शाकमिति* । अन्यत्राभिधेयवद्व्यक्तिवचनानि भवन्ति लुकि । इहाप्यभिधेयवल्लिङ्गवचनानि प्राप्नुवन्ति । इष्यन्ते चाभिधानवत्स्युरिति तच्चान्तरेण यत्नं न सिध्यतीति लुपि युक्तवदनुदेशः । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

लुप्यदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते ॥ २ ॥

लुबितीयमदर्शनस्य संज्ञा क्रियते† न चादर्शनस्य लिङ्गसंख्ये शक्येते अतिदेष्टुम् । लुप्यदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते ॥

न वादर्शनस्याशक्यत्वादर्थगतिः साहचर्यात् ॥ ३ ॥

न वैष दोषः । किं कारणम् । अदर्शनस्याशक्यत्वात् । अदर्शनस्य लिङ्गसंख्ये अशक्ये अतिदेष्टुमिति कृत्वादर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात् ॥

योगाभावाच्चान्यस्य ॥ ४ ॥

अदर्शनेन च योगो नास्तीति कृत्वादर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात् ॥

---

* [illegible]   † १।१।६१

समास उत्तरपदस्य बहुवचनस्य लुपः ॥ ५ ॥

समास उत्तरपदस्य बहुवचनस्य लुपो युक्तवद्भावो वक्तव्यः । मधुरापञ्चालाः* । किं प्रयोजनम् । नियमार्थम् । समास उत्तरपदस्यैव । क्व मा भूत् । पञ्चालमधुरे इति ॥

विशेषणानां चाजातेः ॥ १ । २ । ५२ ॥

कथमिदं विज्ञायते । जातिर्यद्विशेषणमिति । आहोस्विज्जातेर्यानि विशेषणानीति । किं चातः । यदि विज्ञायते जातिर्यद्विशेषणमिति सिद्धं पञ्चाला जनपद इति सुभिक्षः संपन्नपानीयो बहुमाल्यफल इति न सिध्यति । अथ विज्ञायते जातेर्यानि विशेषणानीति सिद्धं सुभिक्षः संपन्नपानीयो बहुमाल्यफल इति पञ्चाला जनपद इति न सिध्यति ॥ एवं तर्हि नैवं विज्ञायते जातिर्यद्विशेषणमिति नापि जातेर्यानि विशेषणानीति । कथं तर्हि । विशेषणानां युक्तवद्भावो भवत्या जातिप्रयोगात् ॥

किमर्थं पुनरिदमुच्यते ।

विशेषणानां वचनं जातिनिवृत्त्यर्थम् ॥ १ ॥

जातिनिवृत्त्यर्थोऽयमारम्भः ॥ किमुच्यते जातिनिवृत्त्यर्थ इति न पुनर्विशेषणानामपि युक्तवद्भावो यथा स्यादिति ।

समानाधिकरणत्वात्सिद्धम् ॥ २ ॥

समानाधिकरणत्वाद्विशेषणानां युक्तवद्भावो भविष्यति ॥ यद्येवं नार्थोऽनेन । लुपोऽन्यत्रापि जातेर्युक्तवद्भावो न भवति । क्वान्यत्र । बदरी सूक्ष्मकण्टका मधुरा वृक्ष इति । किं पुनः कारणमन्यत्रापि जातेर्युक्तवद्भावो न भवति । आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते उत्पत्तिप्रभृत्या विनाशान्न तल्लिङ्गं जहाति ॥ न तर्हीदानीमयं योगो वक्तव्यः । वक्तव्यश्च । किं प्रयोजनम् । इदं तत्र तत्रोच्यते गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति । तदनेन क्रियते ॥

हरीतक्यादिषु व्यक्तिः ॥ ३ ॥

हरीतक्यादिषु व्यक्तिर्भवति युक्तवद्भावेन । हरीतक्याः फलानि हरीतक्यः† फलानि ॥

---

* ४२ ८१ † ४१ १४०, १६०

खलतिकादिषु वचनम् ॥ ४ ॥

खलतिकादिषु वचनं भवति युक्तवद्भावेन । खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं* वनानि ॥

मनुष्यलुपि प्रतिषेधः ॥ ५ ॥

मनुष्यलुपि प्रतिषेधो वक्तव्यः । चञ्चाभिरूपः † वध्रिका दर्शनीयः‡ ॥

तदशिष्यं संज्ञाप्रमाणत्वात् ॥ १ । २ । ५३ ॥

किं या एताः कृत्रिमाटिघुघभादिसंज्ञास्तत्प्रामाण्यादशिष्यम् । नेत्याह । संज्ञानं संज्ञा ॥

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ॥ १ । २ । ५८ ॥

इदमयुक्तं वर्तते । किमत्रायुक्तम् । बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम् । तद्यदेकवचने शासितव्ये बहुवचनं शिष्यत एतदयुक्तम् । बहुष्वेकवचनमिति नाम वक्तव्यम् ॥ अत उत्तरं पठति ।

जात्याख्यायां सामान्याभिधानादैकार्थ्यम् ॥ १ ॥

जात्याख्यायां सामान्याभिधानादैकार्थ्यं भविष्यति । यत्तद्व्रीहौ व्रीहित्वं यवे यवत्वं गार्ग्ये गार्ग्यत्वं तदेकं तच्च विवक्षितम् । तस्यैकत्वादेकवचनमेव प्राप्नोति । इष्यते च बहुवचनं स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति जात्याख्यायामेकस्मिन्बहुवचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्रैकवचनादेश उक्तम् ॥ २ ॥

किमुक्तम् । व्रीहिभ्य आगत इत्यत्र घेर्ङितीति [७.३.१११] इति गुणः प्राप्नोतीति‡ ॥ नैष दोषः ।

अर्थातिदेशात्सिद्धम् ॥ ३ ॥

अर्थातिदेशोऽयम् । नेदं पारिभाषिकस्य वचनस्य ग्रहणम् । किं तर्हि । अन्वर्थ-

---

* ४२ ३७, ८२ † ५२ १५, १८. ‡ १.१.५११

ग्रहणम् । उच्यते वचनम् । बहूनामर्थानां वचनं बहुवचनमिति । यावद्ब्रूयादेकोऽर्थो बहुवद्भवतीति तावदेकस्मिन्बहुवचनमिति ॥

सङ्ख्याप्रयोगे प्रतिषेधः ॥ ४ ॥

संख्याप्रयोगे प्रतिषेधो वक्तव्यः । एको व्रीहिः संपन्नः सुभिक्षं करोति ॥

अस्मदो नामयुवप्रत्यययोश्च ॥ ५ ॥

अस्मदो नामप्रयोगे युवप्रत्ययप्रयोगे च प्रतिषेधो वक्तव्यः ॥ नामप्रयोगे । अहं देवदत्तो ब्रवीमि । अहं यज्ञदत्तो ब्रवीमि ॥ युवप्रत्ययप्रयोगे । अहं गार्ग्यायणो ब्रवीमि । अहं वात्स्यायनो ब्रवीमि ॥ युवग्रहणेन नार्थः । अस्मदो नामप्रत्ययप्रयोगे नेत्येव । इदमपि सिद्धं भवति । अहं गार्ग्यो ब्रवीमि । अहं वात्स्यो ब्रवीमि ॥ अपर आह । अस्मदः सविशेषणस्य प्रयोगे नेत्येव । इदमपि सिद्धं भवति । अहं पटुर्ब्रवीमि । अहं पण्डितो ब्रवीमि ॥

अशिष्यं वा बहुवत्पृथक्त्वाभिधानात् ॥ ६ ॥

अशिष्यो वा बहुवद्भावः । किं कारणम् । पृथक्त्वाभिधानात् । पृथक्त्वेन हि द्रव्याण्यभिधीयन्ते । बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम् । किमुच्यते पृथक्त्वाभिधानादिति यावतेदानीमेवोक्तं जात्याख्यायां सामान्याभिधानादैकार्थ्यमिति ।

जातिशब्देन हि द्रव्याभिधानम् ॥ ७ ॥

जातिशब्देन हि द्रव्यमप्यभिधीयते जातिरपि । कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमप्यभिधीयत इति । एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति । अस्त्यत्र कांचिद्गां पश्यसीति । स पश्यति पश्यति चायं गाः पृच्छति च कांचिदत्र गां पश्यसीति नूनमस्य द्रव्यं विवक्षितमिति । तद्यदा द्रव्याभिधानं तदा बहुवचनं भविष्यति यदा सामान्याभिधानं तदैकवचनं भविष्यति ॥

अस्मदो द्वयोश्च ॥ १ । २ । ५९ ॥

अयमपि योगः शक्योऽवक्तुम् । कथम् अहं ब्रवीमि आवां ब्रूवः वयं ब्रूमः । इमानीन्द्रियाणि कदाचित्स्वातन्त्र्येण विवक्षितानि भवन्ति । तद्यथा । इदं मे अक्षि सुष्ठु पश्यति । अयं मे कर्णः सुष्ठु शृणोतीति । कदाचित्पारतन्त्र्येण । अनेनाक्ष्णा सुष्ठु

मन्त्रयामि । अनेन कर्णेन सुष्ठु शृणोमीति । तद्यदा स्वातन्त्र्येण विवक्षा तदा बहुवचनं भविष्यति यदा पारतन्त्र्येण तदैकवचनद्विवचने भविष्यतः ॥

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ १ । २ । ६० ॥

अयमपि योगः शक्योऽवक्तुम् । कथम् । उदिते पूर्वे फल्गुन्यौ उदिताः पूर्वाः फल्गुन्यः उदिते पूर्वे प्रोष्ठपदे उदिताः पूर्वाः प्रोष्ठपदाः । फल्गुनीसमीपगते चन्द्रमसि फल्गुनीशब्दो वर्तते । बहवस्तेऽर्थास्तत्र युक्तं बहुवचनम् । यदा तयोरेवाभिधानं तदा द्विवचनं भविष्यति ॥

छन्दसि पुनर्वस्वोरेकवचनम् ॥ १ । २ । ६१ ॥

विशाखयोश्च ॥ १ । २ । ६२ ॥

इमावपि योगौ शक्याववक्तुम् । कथम् ।

पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धम् ॥ १ ॥

पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्ण [७ १ ३९] इत्येव सिद्धम् ॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥१।२।६३॥

तिष्यपुनर्वस्वोरिति किमर्थम् । कृत्तिकारोहिण्यः ॥ नक्षत्र इति किमर्थम् । तिष्यश्च माणवकः पुनर्वसू च माणवकौ* तिष्यपुनर्वसवः ॥ अथ नक्षत्र इति वर्तमाने† पुनर्नक्षत्रग्रहणं किमर्थम् । अयं तिष्यपुनर्वसुशब्दोऽस्त्येव ज्योतिषि वर्तते । अस्ति च कालवाची । तद्यथा । बहवस्तिष्यपुनर्वसवोऽतिक्रान्ताः । कतरेण तिष्येण गत इति । तयोर्ज्योतिषि वर्तते तस्येदं ग्रहणम् ॥ अथवा नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं विदेशस्थमपि तिष्यपुनर्वस्वोः कार्यं तदपि नक्षत्रस्यैव यथा स्यात् । तिष्यपुष्ययोर्नक्षत्राणि यलोपो वक्तव्य इति‡ नक्षत्रग्रहणं न कर्तव्यं भवति ॥ अथवा नक्षत्र इति वर्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं तिष्यपुनर्वसुपर्यायवाचिनामपि यथा

* ४ २ ३ ४ ४ २ १३ १४ † १ २ ६० ‡ ६ ४ १४९

स्यात् । पुष्यपुनर्वसू सिध्यपुनर्वसू ॥ अथ द्वन्द्व इति किमर्थम् । यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसव उन्मुग्धाः ॥ बहुवचनस्येति किमर्थम् । उदितं तिष्यपुनर्वसु । कथं चात्रैकवचनम् । जातिद्वन्द्व एकवद्भवतीति । अप्राणिनामिति प्रतिषेधः प्राप्नोति* । एवं तर्हि सिद्धे सति यद्बहुवचनग्रहणं करोति तज्ज्ञापयत्याचार्यः सर्वो द्वन्द्वो विभाषैकवद्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । बाभ्रवशालङ्कायनम् बाभ्रवशालङ्कायना इत्येतत्सिद्धं भवति ॥ अथवा नात्रभवन्तः प्राणिनः प्राणा एवात्रभवन्तः ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥

---

* २.४.६

सरूपाणामेकशेष एकविभक्तौ ॥ १।२।६४ ॥

रूपग्रहणं किमर्थम् । समानानामेकशेष एकविभक्तावितीयत्युच्यमाने यत्रैव सर्वं समानं शब्दोऽर्थश्च तत्रैव स्यात् । वृक्षाः प्लक्षा इति । इह न स्यात् । अक्षाः पादाः माषा इति । रूपग्रहणे पुनः क्रियमाणे न दोषो भवति । रूपं निमित्तत्वेनाश्रीयते श्रुतौ च रूपग्रहणम् ॥ अथैकग्रहणं किमर्थम् । सरूपाणां शेष एकविभक्ताविितीयत्युच्यमाने द्विबह्वोरपि शेषः प्रसज्येत । एकग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ शेषग्रहणं किमर्थम् । सरूपाणामेक एकविभक्ताविितीयत्युच्यमान आदेशोऽयं विज्ञायेत । तत्र को दोषः । अश्वश्चाश्वश्च अश्वौ । आन्तर्यतो व्युदात्ततः स्थानिनो व्युदात्तवानादेशः प्रसज्येत । लोप्यलोपिता च न प्रकल्पेत । तत्र को दोषः । गर्गाः वत्साः । विदाः उर्वाः । अञ्यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुग् प्राप्नोति* । मा भूदेवम् । अञन्त यद्बहुषु यञन्त यद्बहुष्वित्येव भविष्यति । नैवं शक्यम् । इह हि दोषः स्यात् । काश्यपप्रतिकृतयः काश्यपा इति† ॥ एकविभक्ताविति किमर्थम् । पयः पयो जरयति । वासो वासश्छादयति । ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीति ॥

किमर्थं पुनरिदमुच्यते ।

प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम् ॥ १ ॥

प्रत्यर्थं शब्दा अभिनिविशन्ते । किमिदं प्रत्यर्थमिति । अर्थमर्थं प्रति प्रत्यर्थम् । प्रत्यर्थं शब्दनिवेशादेतस्मात्कारणान्नैकेन शब्देनानेकस्यार्थस्याभिधानं प्राप्नोति । तत्र को दोषः ।

तत्रानेकार्थाभिधानेऽनेकशब्दत्वम् ॥ २ ॥

तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्नोति । इष्यते चैकेनाप्यनेकस्याभिधानं स्यादिति तच्चान्तरेण यत्नं न सिध्यति ।

तस्मादेकशेषः ॥ ३ ॥

एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । किमिदं प्रत्यर्थं शब्दा अभिनिविशन्त इत्येतं दृष्टान्तमास्थाय सरूपाणामेकशेष आरभ्यते न पुनर-

* २.४.६४ † ४.१.१०५; ६.४.१५१

प्रत्यर्थं शब्दा अभिनिविशन्त इत्येतं दृष्टान्तमास्थाय विरूपाणामेकशेष आरभ्यते। तत्रैतस्याल्लघीयसी सरूपनिवृत्तिर्गरीयसी विरूपप्रतिपत्तिरिति। तच्च न। लघीयसी विरूपप्रतिपत्तिः। किं कारणम्। यत्र हि बहूनां सरूपाणामेकः शिष्यते तत्रावरतो द्वयोः सरूपयोर्निवृत्तिर्वक्तव्या स्यात्। एवमप्येतस्मिन्सति किंचिदाचार्यः सुकरतरकं मन्यते सुकरतरकं चैकशेषारम्भं मन्यते॥

किं पुनरयमेकविभक्तावेकशेषो भवति। एवं भवितुमर्हति।

एकविभक्ताविति चेन्नाभावाद्विभक्तेः ॥ ४ ॥

एकविभक्ताविति चेत्तन्न। किं कारणम्। अभावाद्विभक्तेः। न हि समुदायात्परा विभक्तिरस्ति। किं कारणम्। अप्रातिपदिकत्वात्। ननु चार्थवत्प्रातिपदिकमिति* प्रातिपदिकसंज्ञा भविष्यति। नियमान्न प्राप्नोति। अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति† ॥

यदि पुनः पृथक्सर्वेषां विभक्तिपराणामेकशेष उच्येत।

पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात् ॥ ५ ॥

पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिः प्राप्नोति। किमुच्यत एकशेषे पृथग्विभक्त्युपलब्धिरिति यावता समयः कृतो न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति। तदाश्रयत्वात्प्राप्नोति। यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति। अग्निचित् सोमसुदिति यथा‡। यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्राप्रकृतिकस्य प्रत्ययस्य प्रयोगो भवति। अधुना इयानिति यथा§। अस्तु। संयोगान्तलोपेन सिद्धम्¶। कुतो नु खल्वेतत् द्वयोर्वृक्षशब्दयोर्निवृत्तिर्भविष्यति न पुनः पूर्वयोरिति। नैतदस्ति। पूर्वयोर्निवृत्तावपि सत्यां संयोगादिलोपेन सिद्धमिति**। न सिध्यति। तत्रावरतो द्वयोः सकारयोः श्रवणं प्रसज्येत। यत्र च संयोगान्तलोपो नास्ति तत्र च न सिध्यति। क्व च संयोगान्तलोपो नास्ति। द्विवचनबहुवचनयोः॥

समास इति चेत्स्वरसमासान्तेषु दोषः ॥ ६ ॥

समास इति चेत्स्वरसमासान्तेषु दोषो भवति । स्वर । अश्वश्चाश्वश्च अश्वौ । समासान्तोदात्तत्वे* कृत एकशेषः प्राप्नोति । इदमिह संप्रधार्यम् । समासान्तोदात्तत्वं क्रियतामेकशेष इति किमत्र कर्तव्यम् । परत्वात्समासान्तोदात्तत्वम् । समासान्तोदात्तत्वे च दोषो भवति । स्वर ॥ समासान्त । ऋक्च ऋक्च ऋचौ । समासान्ते† कृतेऽसारूप्यादेकशेषो न प्राप्नोति । इदमिह संप्रधार्यम् । समासान्तः क्रियतामेकशेष इति किमत्र कर्तव्यम् । परत्वात्समासान्तः । समासान्ते च दोषो भवति ॥

अङ्गाश्रये चैकशेषवचनम् ॥ ७ ॥

अङ्गाश्रये च कार्य एकशेषो वक्तव्यः । स्वसा च स्वसारौ च स्वसारः । अङ्गाश्रये‡ कृते ऽसारूप्यादेकशेषो न प्राप्नोति । इदमिह संप्रधार्यम् । अङ्गाश्रय क्रियतामेकशेष इति किमत्र कर्तव्यम् । परत्वादङ्गाश्रयम् ॥

तिङ्समासे तिङ्समासवचनम् ॥ ८ ॥

तिङ्समासे तिङ्समासो वक्तव्यः ॥ एकं तिङ्ग्रहणमनर्थकम् । समासे तिङ्समास इत्येव । नानर्थकम् । तिङ्समासे प्रकृते§ तिङ्समासो वक्तव्यः ॥

तिङ्विधिप्रतिषेधश्च ॥ ९ ॥

तिङ् कश्चिद्विधेयः कश्चित्प्रतिषेध्यः । पचति च पचति च पचतः । तःशब्दो विधेयस्तिशब्दः प्रतिषेध्यः ॥

यदि पुनरसमास एकशेष उच्येत ।

असमासे वचनलोपः ॥ १० ॥

यद्यसमासे वचनलोपो वक्तव्यः ॥ ननु चोत्पत्तवेव वचनलोपं चोदिताः स्मः । द्विवचनबहुवचनविधिं द्वन्द्वप्रतिषेध च वक्ष्यति तदर्थं पुनश्चोद्यते ॥

द्विवचनबहुवचनविधिः ॥ ११ ॥

द्विवचनबहुवचनानि विधेयानि । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति ॥

---

* ६१ २१३ † ५४ ७४ ‡ (७४ ७१ ६१ ७५) ७: ११०, ६४११
§ ७१ ७८, ९०.

द्वन्द्वप्रतिषेधश्च ॥ १२ ॥

द्वन्द्वस्य च प्रतिषेधो वक्तव्यः । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति । चार्थे द्वन्द्वः [२ २.२९] इति द्वन्द्वः प्राप्नोति । नैष दोषः । अनवकाश एकशेषो द्वन्द्वं बाधिष्यते । सावकाश एकशेषः । कोऽवकाशः । तिङन्तान्यवकाशः ॥

यदि पुनः पृथक्सर्वेषां विभक्त्यन्तानामेकशेष उच्येत । किं कृतं भवति । कश्चिद्वचनलोपः परिहृतो भवति ।

विभक्त्यन्तानामेकशेषे

विभक्त्यन्तानामेकशेषे विभक्त्यन्तानामेव तु निवृत्तिर्भवति ।

एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम् ॥ १३ ॥

एकविभक्त्यन्तानामिति तु वक्तव्यम् । किं प्रयोजनम् । पृथग्विभक्तिप्रतिषेधार्थम् । पृथग्विभक्त्यन्तानां मा भूत् । ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि ॥

न वार्थविप्रतिषेधाद्युगपद्वचनाभावः ॥ १४ ॥

न वैष दोषः । किं कारणम् । अर्थविप्रतिषेधात् । विप्रतिषिद्धावेतावर्थौ कर्ता संप्रदानमित्यशक्यौ युगपन्निर्देष्टुम् । तयोर्विप्रतिषिद्धत्वाद्युगपद्वचनं न भविष्यति ॥

अनेकार्थाश्रयश्च पुनरेकशेषः ॥ १५ ॥

अनेकमर्थं सम्प्रत्याययिष्यामीत्येकशेष आरभ्यते ।

तस्मान्नैकशब्दत्वम् ॥ १६ ॥

तस्मादेकशब्दत्वं न भविष्यति ॥ अथ तर्हि दोषः । कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति ॥

यदि पुनः प्रातिपदिकानामेकशेष उच्येत । किं कृतं भवति । वचनलोपः परिहृतो भवति ।

प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात् ॥ १७ ॥

प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्यः । माता च जनयित्री मातारौ च धान्यस्य मातृमातारः । किं कारणम् । सरूपत्वात् । सरूपाणि ह्येतानि

प्रातिपदिकानि ॥ किमुच्यते प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो वक्तव्यः स्यात् । तस्यापि ह्येतानि क्वचिद्विभक्त्यन्तानि सरूपाणि । मातृभ्यां च मातृभ्यां चेति । अथ मतमेतद्विभक्त्यन्तानां सारूप्ये भवितव्यमेवैकशेषेणेति प्रातिपदिकानामेवैकशेषे दोषो भवति । एवं च कृत्वा चोद्यते ॥

हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम् ॥ १८ ॥

हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानं कर्तव्यम् । हरितस्य स्त्री हरिणी । हरिणस्यापि हरिणी । हरिणी च हरिणी च हरिण्यौ । श्येतस्य स्त्री श्येनी । श्येनस्यापि श्येनी । श्येनी च श्येनी च श्येन्यौ । रोहितस्य स्त्री रोहिणी । रोहिणस्यापि रोहिणी । रोहिणी च रोहिणी च रोहिण्यौ ॥

न वा पदस्यार्थे प्रयोगात् ॥ १९ ॥

न वैष दोषः । किं कारणम् । पदस्यार्थे प्रयोगात् । पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम् । रूपं चेहाश्रीयते रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तस्मिंश्च लौकिके प्रयोगे सरूपाण्येतानि ॥

अपर आह । न वा पदस्यार्थे प्रयोगात् । न वैष पक्ष एवास्ति प्रातिपदिकानामेकशेष इति । किं कारणम् । पदस्यार्थे प्रयोगात् । पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम् । रूपं चेहाश्रीयते रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तस्मिंश्च लौकिके प्रयोगे प्रातिपदिकानां प्रयोगो नास्ति ॥

अथानेन पक्षेणार्थः स्यात्प्रातिपदिकानामेकशेष इति । बाढमर्थः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एतेनैवाभिहितं सूत्रेण सरूपाणामेकशेष एकविभक्ताविति । कथम् । विभक्तिः सारूप्येणाश्रीयते । अनैमित्तिक एकशेषः । एकविभक्तौ यानि सरूपाणि तेषामेकशेषो भवति । क्व । यत्र वा तत्र वेति ॥

अथानेन पक्षेणार्थः स्याद्विभक्त्यन्तानामेकशेष इति । बाढमर्थः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एतदप्येतेनैवाभिहितं सूत्रेण सरूपाणामेकशेष एकविभक्ताविति । कथम् । नेदं पारिभाषिक्या विभक्तेर्ग्रहणम्* । किं तर्हि । अन्वर्थग्रहणम् । विभागो विभक्तिरिति । एकविभागे यानि सरूपाणि तेषामेकशेषो भवतीति ॥ ननु चोक्तं कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रति-

---

* १ ४ १०१

षेधश्चेति । नैष दोषः । यत्तावदुच्यते कश्चिद्वचनलोपो द्विवचनबहुवचनविधिरिति । सहविवक्षायामेकशेषः । युगपद्विवक्षायामेकशेषेण भवितव्यम् । न तर्हीदानीमिदं भवति वृक्षश्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति । नैतत्सहविवक्षायां भवति । अथापि निदर्शयितुं बुद्धिरेवं निदर्शयितव्यम् । वृक्षौ च वृक्षौ च वृक्षौ । वृक्षाश्च वृक्षाश्च वृक्षाश्च वृक्षा इति ॥ यदप्युच्यते द्वन्द्वप्रतिषेधश्च वक्तव्य इति । नैष दोषः । अनवकाश एकशेषो द्वन्द्वं बाधिष्यते । ननु चोक्तं सावकाश एकशेषः कोऽवकाशः तिङन्तान्यवकाश इति । न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति । किं कारणम् । यथाजातीयकानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति तथाजातीयकानामेकशेषः । न च तिङन्तानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति । किं कारणम् । एका हि क्रिया । एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति । यदि तर्ह्येका क्रिया द्विवचनबहुवचनानि न सिध्यन्ति । पचतः पचन्ति । नैतानि क्रियापेक्षाणि । किं तर्हि । साधनापेक्षाणि ॥

अथवा पुनरस्त्वेकविभक्ताविति । ननु चोक्तमेकविभक्ताविति चेन्नाभावाद्विभक्तेरिति । नैष दोषः । परिहृतमेतत् । अर्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यतीति । ननु चोक्तं नियमान्न प्राप्नोति अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति । नैष दोषः । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यथाजातीयकानां समासः । कथंजातीयकानां समासः । सुबन्तानाम् ॥

सर्वत्रापत्यादिषूपसंख्यानम् ॥ २० ॥

सर्वेषु पक्षेष्वपत्यादिषूपसंख्यानं कर्तव्यम् । भिक्षाणां समूहो भैक्षमिति* ॥ सर्वत्रेत्युच्यते प्रातिपदिकानां चैकशेषे सिद्धम् । अपत्यादिष्वित्युच्यते बहवश्चापत्यादयः । गर्गस्यापत्यं बहवो गर्गाः† । एका प्रकृतिर्बहवश्च यञः । असारूप्यादेकशेषो न प्राप्नोति । ननु च यथैव बहवो यञ एवं प्रकृतयोऽपि बह्व्यः स्युः । नैवं शक्यम् । इह हि दोषः स्यात् । गर्गाः वत्साः विदाः उर्वा इति । अञ्यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुग् प्राप्नोति । मा भूदेवम् । अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति । ननु चोक्तं नैवं शक्यमिह हि दोषः स्यात्काश्यपप्रतिकृतयः काश्यपा इति । नैष दोषः । लौकिकस्य तत्र‡ गोत्रस्य ग्रहणं न चैतल्लौकिकं गोत्रम् ॥ अथवा पुनरस्त्वेका प्रकृतिर्बह्वयश्च यञः । ननु चोक्तमसारूप्यादेकशेषो न प्राप्नोतीति ।

* ४.२.३८. † ४.१.१०५; २.४.६४. ‡ २.४.६४.

सिद्धं तु समानार्थानामेकशेषवचनात् ॥ २१ ॥

सिद्धमेतत् । कथम् । समानार्थानामेकशेषो भवतीति वक्तव्यम् ॥ यदि समानार्थानामेकशेष उच्यते कथमक्षाः पादाः माषा इति ।

नानार्थानामपि सरूपाणाम् ॥ २२ ॥

नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः ॥

एकार्थानामपि विरूपाणाम् ॥ २३ ॥

एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डाविति वा ॥

स्वरभिन्नानां यस्योत्तरस्वरविधिः ॥ २४ ॥

स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्यैकशेषो वक्तव्यः । अक्षश्चाक्षश्च अक्षौ* । मीमांसकश्च मीमांसकश्च मीमांसकौ† ॥

इह कस्मान्न भवति । एकश्चैकश्च द्वौ च द्वौ चेति ।

संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः ॥ २५ ॥

संख्याया अर्थासंप्रत्ययादेकशेषो न भविष्यति । न ह्येकावित्यनेनार्थो गम्यते । अन्यपदार्थत्वाच्च संख्याया एकशेषो न भविष्यति । एकश्चैकश्चेत्यस्य द्वावित्यर्थः । द्वौ च द्वौ चेत्यस्य चत्वार इत्यर्थः ॥ नैतौ स्तः परिहारौ । यत्तावदुच्यते संख्याया अर्थासंप्रत्ययादिति । अर्थासंप्रत्ययेऽप्येकशेषो भवति । तद्यथा । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ‡ । न चोच्यते वृद्धयूनाविति भवति चैकशेषः । यदप्युच्यतेऽन्यपदार्थत्वादिति । अन्यपदार्थेऽप्येकशेषो भवति । तद्यथा । विंशतिश्च विंशतिश्च विंशती इति । तयोश्चत्वारिंशदित्यर्थः ॥ एव तर्हि नेमौ पृथक्परिहारौ । एकपरिहारोऽयम् । संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चेति । यत्र ह्यर्थासंप्रत्यय एव वान्यपदार्थेव वा भवति तत्रैकशेषो गार्ग्यौ विंशती इति यथा ॥ अथवा नेम एकशेषशब्दाः । यदि तर्हि नेम एकशेषशब्दाः समुदायशब्दास्तर्हि भवन्ति । तत्र को दोषः । एकवचनं प्राप्नोति । एकार्था हि समुदाया भवन्ति । तद्यथा । यूथम् शतम् वनमिति ॥ सन्तु तर्ह्येकशेषशब्दाः । किंकृतं सारूप्यम् । अन्योन्यकृतं

---

* ११ ३, ११ १०. † ६१ १९३, १०० ‡ १ २ ६५

सारूप्यम् । सन्ति पुनः केचिदन्येऽपि शब्दा येषामन्योऽन्यकृतो भावः । सन्तीत्याह । तद्यथा । माता पिता भ्रातेति ॥ विषम उपन्यासः । सकृदेते शब्दा प्रवृत्ता अपायेष्वपि वर्तन्ते । इह पुनरेकेनाप्यपाये न भवति चत्वार इति ॥ अन्यदिदानीमेतदुच्यते सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्त इति । यत्तु भवानस्मांश्चोदयति सन्ति पुनः केचिदन्येऽपि शब्दा येषामन्योऽन्यकृतो भाव इति तत्रैते ऽस्माभिरुपन्यस्ताः । तत्रैतद्भवानाह सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्तन्त इति । एतच्च वार्त्तम् ।

एकैको नोद्यन्तुं भारं शक्नोति यत्कथं तत्र ।
एकैकः कर्ता स्यात्सर्वे वा स्युः कथ युक्तम् ॥
कारणमुद्यमनं चेत्तोद्यच्छति चान्तरेण तत्तुल्यम् ।
तस्मात्पृथक्पृथक्ते कर्तारः सव्यपेक्षास्तु ॥

प्रथममध्यमोत्तमानामेकशेषो ऽसरूपत्वात् ॥ २६ ॥

प्रथममध्यमोत्तमानामेकशेषो वक्तव्यः । पचति च पचसि च पचथः । पचामि च पचामि च पचावः । पचति च पचसि च पचामि च पचामः । किं पुनः कारण न सिध्यति । असरूपत्वात् ॥

द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात् ॥ २७ ॥

द्विवचनबहुवचनयोश्चाप्रसिद्धिः । किं कारणम् । एकार्थत्वात् । एकोऽयमवशिष्यते तेनानेन तदर्थेन भवितव्यम् । किमर्थेन । यदर्थ एकः । किमर्थश्चैकः । एक एकार्थः ॥ नैकार्थ्यम् । नायमेकार्थः । किं तर्हि । द्व्यर्थो बह्वर्थश्च ।

नैकार्थ्यमिति चेदारम्भानर्थक्यम् ॥ २८ ॥

नैकार्थ्यमिति चेदेकशेषारम्भोऽनर्थकः स्यात् ॥ इह हि शब्दस्य स्वाभाविकी वानेकार्थता स्याद्वाचनिकी वा । तद्यदि तावत्स्वाभाविकी

अशिष्य एकशेष एकेनोक्तत्वात् ॥ २९ ॥

अशिष्य एकशेषः । किं कारणम् । एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति ॥ अथ वाचनिकी तद्वक्तव्यमेकोऽवशिष्यते स च द्व्यर्थो भवति बह्वर्थश्चेति । न वक्तव्यम् । सिद्धमेकशेष इत्येव । कथं पुनरेकोऽयमवशिष्यत इत्यनेन द्व्यर्थता बह्वर्थता वा शक्या लब्धुम् । तदेकशेषारम्भणम् ॥

न ह्यन्तरेण तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवति । पश्यामश्च पुनरन्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवतीति अग्निचित् सोमसुदिति यथा । ते मन्यामहे लोपकृतमेतद्येनात्रान्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवतीति । एवमिहाप्येकशेषकृतमेतद्येनात्रैकोऽयमवशिष्यत इत्यनेन द्व्यर्थता बह्वर्थता वा भवति ॥ उच्येत तर्हि न तु गम्येत । यो हि गामश्व इति ब्रूयादश्वं वा गौरिति न जातुचित्संप्रत्ययः स्यात् ॥ तेनानेकार्थाभिधाने यत्नं कुर्वतावश्यं लोकः पृष्ठतोऽनुगन्तव्यः । केष्वर्थेषु लौकिकाः कान्शब्दान्प्रयुञ्जत इति । लोके चैकस्मिन्वृक्ष इति प्रयुञ्जते द्वयोर्वृक्षाविति बहुषु वृक्षा इति । यदि तर्हि लोकोऽवश्यं शब्देषु प्रमाणं किमर्थमेकशेष आरभ्यते । अथ किमर्थं लोप आरभ्यते । प्रत्ययलक्षणमाचार्यः प्रार्थयमानो लोपमारभत एकशेषारम्भे पुनरस्य न किंचित्प्रयोजनमस्ति ॥ ननु चोक्तं प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानमिति । यदि चैकेन शब्देनानेकस्यार्थस्याभिधानं स्यान्न प्रत्यर्थं शब्दनिवेशः कृतः स्यात् ।

प्रत्यर्थं शब्दनिवेशादेकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव ॥ २० ॥

प्रत्यर्थं शब्दनिवेशादेकेनानेकस्याभिधानादप्रत्यर्थमिति चेदेवमुच्यते । यदप्येकेनानेकस्याभिधानं भवति तदपि प्रत्यर्थमेव । यदपि *ह्यर्थावर्थौ प्रति* तदपि प्रत्यर्थमेव । *यदपि ह्यर्थानर्थान्प्रति तदपि प्रत्यर्थमेव* ॥ *यावतामभिधानं तावतां प्रयोगो न्याय्यः* । यावतामर्थानामभिधानं भवति तावतां शब्दानां प्रयोग इत्येष पक्षो न्याय्यः ।

यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेकेनाप्यनेकस्याभिधानम् ॥ २१ ॥

यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेवमुच्यते । एषोऽपि न्याय्य एव यदप्येकेनानेकस्याभिधानं भवति ॥ यदि तर्ह्येकेनानेकस्याभिधानं भवति प्लक्षन्यग्रोधौ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः । एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्रयोगेण न भवितव्यम् । किं कारणम् । उक्तार्थानामप्रयोग इति ।

एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ॥ २२ ॥

एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा

न्यग्रोधशब्द प्रयुज्यते । कथमनुक्तो यावतेदानीमेवोक्तमेकेनाप्यनेकस्याभिधान भवतीति । सरूपाणामेकेनाप्यनेकस्याभिधान भवति न विरूपाणाम् ॥ किं पुन कारण सरूपाणामेकेनाप्यनेकस्याभिधान भवति न पुनर्विरूपाणाम् ।

अभिधान पुन॰ स्वाभाविकम् ॥ ३३ ॥

स्वाभाविकमभिधानम् ॥

उभयदर्शनाच्च ॥ ३४ ॥

उभय खल्वपि दृश्यते । विरूपाणामप्येकेनानेकस्याभिधान भवति । तद्यथा । द्यावा ह क्षामा । द्यावा चिदस्मै पृथिवी नमेते इति । विरूपाणा किल नामैकेनानेकस्याभिधान स्यात्किं पुन सरूपाणाम् ॥

आकृत्यभिधानाद्वैक विभक्तौ वाजप्यायन ॥ ३५ ॥

आकृत्यभिधानाद्वैक शब्द विभक्तौ वाजप्यायन आचार्यो न्याय्य मन्यते । एकाकृति सा चाभिधीयत इति ॥ कथ पुनर्ज्ञायत एकाकृति सा चाभिधीयत इति ।

प्रख्याविशेषात् ॥ ३६ ॥

न हि गौरित्युक्ते विशेष प्रख्यायते शुक्ला नीला कपिला कपोतिकेति ॥ यद्यपि तावत्प्रख्याविशेषाज्ज्ञायत एकाकृतिरिति कुतस्त्वेतत्साभिधीयत इति ।

अव्यपवर्गगतेश्च ॥ ३७ ॥

अव्यपवर्गगतेश्च मन्यामह आकृतिरभिधीयत इति । न हि गौरित्युक्ते व्यपवर्गो गम्यते शुक्ला नीला कपिला कपोतिकेति ॥

ज्ञायते चैकोपदिष्टम् ॥ ३८ ॥

ज्ञायते खल्वप्येकोपदिष्टम् । गौरस्य कदाचिदुपदिष्टो भवति । स तमन्यस्मिन्देशे ऽन्यस्मिन्काले ऽन्यस्या च वयोऽवस्थाया दृष्ट्वा जानात्यय गौरिति ॥ क पुनरस्य विशेष प्रख्याविशेषादित्यत । तदेवेगोपोद्बलकमेतत् । प्रख्याविशेषाज्ज्ञायते चैकोपदिष्टमिति ॥

धर्मशास्त्र च तथा ॥ ३९ ॥

एष च कृत्वा धर्मशास्त्र प्रवृत्तम् । ब्राह्मणो न हन्तव्य सुरा न पेयेति ब्राह्मण-

मात्रं न हन्यते सुरामात्रं च न पीयते । यदि द्रव्यं पदार्थः स्यादेकं ब्राह्मणमहत्वैकां च सुरामपीत्वान्यत्र कामचारः स्यात् ॥ कः पुनरस्य विशेषोऽव्यपवर्गगतेश्चेत्यतः । तस्यैवोपोद्बलकमेतत् । अव्यपवर्गगतेश्च धर्मशास्त्रं च तथेति ॥

अस्ति चैकमनेकाधिकरणस्थं युगपत्

अस्ति खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते । किम् । आदित्यः । तद्यथा । एक आदित्योऽनेकाधिकरणस्थो युगपदुपलभ्यते ॥ विषम उपन्यासः । नैको द्रष्टादित्यमनेकाधिकरणस्थं युगपदुपलभते ॥ एवं तर्हि

इतीन्द्रवद्विषयः ॥ ४० ॥

तद्यथा । एक इन्द्रोऽनेकस्मिन्क्रतुशत आहूतो युगपत्सर्वत्र भवति । एवमाकृतिरपि युगपत्सर्वत्र भविष्यति ॥ अवश्यं चैतदेवं विज्ञेयमेकमनेकाधिकरणस्थं युगपदुपलभ्यत इति ।

नैकमनेकाधिकरणस्थं युगपदिति चेत्तथैकशेषे ॥ ४१ ॥

यो हि मन्यते नैकमनेकाधिकरणस्थं युगपदुपलभ्यत इत्येकशेषे तस्य दोषः स्यात् । एकशेषेऽपि नैको वृक्षशब्दोऽनेकमर्थं युगपदभिदधीत ॥ अवश्यं चैतदेवं विज्ञेयमाकृतिरभिधीयत इति ।

द्रव्याभिधाने ह्याकृत्यसम्प्रत्ययः ॥ ४२ ॥

द्रव्याभिधाने सत्याकृतेरसम्प्रत्ययः स्यात् ॥ तत्र को दोषः ।

तत्रासर्वद्रव्यगतिः ॥ ४३ ॥

तत्रासर्वद्रव्यगतिः प्राप्नोति । असर्वद्रव्यगतौ को दोषः । गौरनुबन्ध्योऽजोऽग्नीषोमीय इति । एकः शास्त्रोक्तं कुर्वीतापरोऽशास्त्रोक्तम् । अशास्त्रोक्ते च क्रियमाणे विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः ॥ ननु च यस्याप्याकृतिः पदार्थस्तस्यापि यद्यनवयवेन चोद्यते न चानुबध्यते विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः । एकाकृतिरिति च प्रतिज्ञा हीयेत । यच्चास्य पक्षस्योपादाने प्रयोजनमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति । एवं तर्ह्यनवयवेन चोद्यते प्रत्येकं च परिसमाप्यते यथादित्यः । ननु च यस्यापि द्रव्यं पदार्थस्तस्या-

व्यनवयवेन चोद्यते प्रत्येकं च परिसमाप्यते । एकशेषस्त्वया वक्तव्यः । त्वयापि तर्हि द्विवचनबहुवचनानि साध्यानि ॥

चोदनायां चैकस्योपाधिवृत्तेः ॥ ४४ ॥

चोदनायां चैकस्योपाधिवृत्तेर्मन्यामहे आकृतिरभिधीयत इति । आग्नेयमष्टाकपालं निर्वपेत् । एकं निरुप्य द्वितीयस्तृतीयश्च निरुप्यते । यदि च द्रव्यं पदार्थः स्यादेकं निरुप्य द्वितीयस्य तृतीयस्य च निर्वपणं न प्रकल्पेत ॥ कः पुनरेतयोर्जातिचोदनयोर्विशेषः । एका निर्वृत्तेनापरा निर्वर्त्येन ॥

द्रव्याभिधानं व्याडिः ॥ ४५ ॥

द्रव्याभिधानं व्याडिराचार्यो न्याय्यं मन्यते । द्रव्यमभिधीयत इति ॥

तथा च लिङ्गवचनसिद्धिः ॥ ४६ ॥

एवं च कृत्वा लिङ्गवचनानि सिद्धानि भवन्ति । ब्राह्मणी ब्राह्मणः ब्राह्मणौ ब्राह्मणा इति ॥

चोदनासु च तस्यारम्भात् ॥ ४७ ॥

चोदनासु च तस्यारम्भान्मन्यामहे द्रव्यमभिधीयत इति । गौरनुबन्ध्योऽजोऽग्नीषोमीय इति । आकृतौ चोदितायां द्रव्य आरम्भणालम्भनप्रोक्षणविशसनादीनि क्रियन्ते ॥

न चैकमनेकाधिकरणस्थं युगपत् ॥ ४८ ॥

न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते । न ह्येको देवदत्तो युगपत्स्रुघ्ने भवति मथुरायां च ॥

विनाशे प्रादुर्भावे च सर्वं तथा स्यात् ॥ ४९ ॥

किम् । विनश्येच्च प्रादुःष्याच्च । श्वा मृत इति श्वा नाम लोके न प्रचरेत् । गौर्जात इति सर्वं गोभूतमनवकाशं स्यात् ॥

अस्ति च वैरूप्यम् ॥ ५० ॥

अस्ति खल्वपि वैरूप्यम् । गोश्च गौश्च खण्डो मुण्ड इति ॥

तथा च विग्रहः ॥ ५१ ॥

एवं च कृत्वा विग्रह उपपन्नो भवति । गौश्च गौश्चेति ॥

व्यर्थेषु च मुक्तसंशयम् ॥ ५२ ॥

व्यर्थेषु च मुक्तसंशयं भवति । आकृतावपि पदार्थ एकशेषो वक्तव्यः । अक्षाः पादाः माषा इति ॥

लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात् ॥ ५३ ॥

लिङ्गवचनानि सिद्धानि भवन्ति । कुतः । गुणस्यानित्यत्वात् । अनित्या गुणा अपायिन उपायिनश्च । किं य एते शुक्लादयः । नेत्याह । स्त्रीपुंनपुंसकानि सत्त्वगुणा एकत्वद्वित्वबहुत्वानि च । कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन कदाचित्स्त्रीत्वेन कदाचित्पुंस्त्वेन कदाचिन्नपुंसकत्वेन ॥ भवेल्लिङ्गपरिहार उपपन्नो वचनपरिहारस्तु नोपपद्यते । यदि हि कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्द्वित्वेन कदाचिद्बहुत्वेनैकाकृतिरिति प्रतिज्ञा हीयेत यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति ॥ एवं तर्हि लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात् । लिङ्गवचनानि सिद्धानि भवन्ति । कुतः । गुणविवक्षाया अनित्यत्वात् । अनित्या गुणविवक्षा । कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन कदाचित्स्त्रीत्वेन कदाचित्पुंस्त्वेन कदाचिन्नपुंसकत्वेन ॥ भवेल्लिङ्गपरिहार उपपन्नो वचनपरिहारस्तु नोपपद्यते । यदि कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचिद्द्वित्वेन कदाचिद्बहुत्वेनैकाकृतिरिति प्रतिज्ञा हीयेत यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति ॥ लिङ्गपरिहारश्चापि नोपपद्यते । किं कारणम् । आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते उत्पत्तिप्रभृत्या विनाशात्तल्लिङ्गं न जहाति । तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम् । अवश्यं कश्चित्स्वकृतान्त आस्थेयः । कोऽसौ स्वकृतान्तः ।

संस्त्यानप्रसवौ लिङ्गम् ।

संस्त्यानप्रसवौ लिङ्गमास्थेयौ । किमिदं संस्त्यानप्रसवाविति ।

संस्त्याने स्त्यायतेर्ड्रट्स्त्री सूतेः सप्प्रसवे पुमान् ॥

ननु च लोकेऽपि स्त्यायतेरेव स्त्री सूतेश्च पुमान् । अधिकरणसाधना लोके स्त्री ।

स्त्यायत्यस्त्यां गर्भ इति । कर्तृसाधनश्च पुमान् । सूते पुमानिति । इह पुनरुभयं भावसाधनम् । स्त्यानं प्रवृत्तिश्च । कस्य पुनः स्त्यानं स्त्री प्रवृत्तिर्वा पुमान् । गुणानाम् । केषाम् । शब्दस्पर्शरूपरसगन्धानाम् । सर्वाश्च पुनर्मूर्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः शब्दस्पर्शरूपरसगन्धवत्यः । यत्राल्पीयांसो गुणास्तत्रावरतस्त्रयः शब्दः स्पर्शो रूपमिति । रसगन्धौ न सर्वत्र । प्रवृत्तिः खल्वपि नित्या । न हीह कश्चिदपि स्वस्मिन्नात्मनि मुहूर्तमप्यवतिष्ठते । वर्धते यावदनेन वर्धितव्यमपचयेन वा युज्यते । तच्चोभयं सर्वत्र । यद्युभयं सर्वत्र कुतो व्यवस्था । विवक्षातः । संस्त्यानविवक्षायां स्त्री प्रसवविवक्षायां पुमानुभयोरप्यविवक्षायां नपुंसकम् । तत्र लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वादिति लिङ्गपरिहार उपपन्नः ॥ वचनपरिहारस्तु नोपपद्यते । वचनपरिहारश्चाप्युपपन्नः । इदं तावदयं प्रष्टव्यः । अथ यस्य द्रव्यं पदार्थः कथं तस्यैकवचनद्विवचनबहुवचनानि भवन्तीति । एवं स वक्ष्यति । एकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति । यदि तस्यापि वाचनिकानि न स्वाभाविकान्यहमप्येवं वक्ष्याम्येकस्मिन्नेकवचनं द्वयोर्द्विवचनं बहुषु बहुवचनमिति । न ह्याकृतिपदार्थिकस्य द्रव्यं न पदार्थो द्रव्यपदार्थिकस्य वाकृतिर्न पदार्थः । उभयोरुभयं पदार्थः कस्यचित्तु किंचित्प्रधानभूतं किंचिद्गुणभूतम् । आकृतिपदार्थिकस्याकृतिः प्रधानभूता द्रव्यं गुणभूतम् । द्रव्यपदार्थिकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता ॥

गुणवचनवद्वा ॥ ५४ ॥

गुणवचनवद्वा लिङ्गवचनानि भविष्यन्ति । तद्यथा । गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । शुक्लं वस्त्रम् शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ शुक्लाः कम्बला इति । यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति । एवमिहापि यदसौ द्रव्यं श्रिताकृतिस्तस्य यल्लिङ्गं वचनं च तदाकृतेरपि भविष्यति ॥

अधिकरणगतिः साहचर्यात् ॥ ५५ ॥

आकृतावारम्भणादीनां संभवो नास्तीति कृत्वाकृतिसहचरिते द्रव्य आरम्भणादीनि भविष्यन्ति ॥

न चैकमनेकाधिकरणस्थं युगपदित्यादित्यवद्विषयः ॥ ५६ ॥

न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यत इत्यादित्यवद्विषयो भविष्यति ।

तद्यथा । एक आदित्यो ऽनेकाधिकरणस्थो युगपदुपलभ्यते ॥ विषम उपन्यासः । नैको द्रष्टानेकाधिकरणस्थमादित्यं युगपदुपलभते ॥ एवं तर्हीतीन्द्रवद्विषयः । तद्यथा । एक इन्द्रो ऽनेकस्मिन्क्रतुशत आहूतो युगपत्सर्वत्र भवति । एवमाकृतिर्युगपत्सर्वत्र भविष्यति ॥

अविनाशो ऽनाश्रितत्वात् ॥ ५७ ॥

द्रव्यविनाश आकृतेरविनाशः । कुतः । अनाश्रितत्वात् । अनाश्रिताकृतिर्द्रव्यम् ॥ किमुच्यते ऽनाश्रितत्वादिति यदिदानीमेवोक्तमधिकरणगतिः साहचर्यादिति ॥ एवं तर्ह्यविनाशो ऽनैकात्म्यात् । द्रव्यविनाश आकृतेरविनाशः । कुतः । अनैकात्म्यात् । अनेक आत्माकृतेर्द्रव्यस्य च । तद्यथा । वृक्षस्योऽवतानो वृक्षे छिन्ने ऽपि न विनश्यति ॥

वैरूप्यविग्रहौ द्रव्यभेदात् ॥ ५८ ॥

वैरूप्यविग्रहावपि द्रव्यभेदाद्भविष्यतः ॥

व्यर्थेषु च सामान्यात्सिद्धम् ॥ ५९ ॥

विभिन्नार्थेषु च सामान्यात्सिद्धं सर्वम् । अश्नोतेरक्षः । पद्यतेः पादः । मिमीतेर्माषः । तत्र क्रियासामान्यात्सिद्धम् ॥ अपरस्त्वाह । पुराकल्प एतदासीत्षोडश माषाः कार्षापणं षोडशफलाश्च माषशम्बट्यः । तत्र सङ्ख्यासामान्यात्सिद्धम् ॥

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ १ । २ । ६५ ॥

इह कस्मान्न भवति । अजश्च वर्करश्च । अश्वश्च किशोरश्च । उष्ट्रश्च करभश्चेति । तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः । तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः ॥

स्त्री पुंवच्च ॥ १ । २ । ६६ ॥

इदं सर्वेष्वेव स्त्रीग्रहणेषु विचार्यते स्त्रीग्रहणे स्त्रीप्रत्ययग्रहणं वा स्यात्स्त्र्यर्थग्रहणं वा स्त्रीशब्दग्रहणं वेति । किं चातः । यदि प्रत्ययग्रहणं वा शब्दग्रहणं वा

गार्गी च गार्ग्यायणौ च गर्गाः केन यशब्दो न श्रूयेत । अस्त्रियामिति हि लुगुच्यते* । इह च गार्गी च गार्ग्यायणौ च गर्गान्पश्य तस्माच्छसो नः पुंसि [६.१.१०३] इति नत्वं न प्राप्नोति ॥ अथार्थग्रहणं न दोषो भवति । यथा न दोषस्तथास्तु ॥

इह कस्मान्न भवति । अजा च बर्करश्च । वडवा च किशोरश्च । उष्ट्री च करभश्चेति । तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः । तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः ॥

पुमान्स्त्रिया ॥ १ । २ । ६७ ॥

इह कस्मान्न भवति । हंसश्च वरटा च । कच्छपश्च डुली च । ऋश्यश्च रोहिच्चेति । तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः । तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः ॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ १ । २ । ६८ ॥

किमर्थमिदमुच्यते । न पुमान्स्त्रियेत्येव सिद्धम् । न सिध्यति । तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः । तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः ॥ एवं तर्हि सिद्धे सति यदिमं योगं शास्ति तज्ज्ञापयत्याचार्यो यत्रोर्ध्वं प्रकृतेस्तल्लक्षण एव विशेषस्तत्रैकशेषो भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । हंसश्च वरटा च कच्छपश्च डुली च ऋश्यश्च रोहिच्चेत्यत्रैकशेषो न भवति ॥ पूर्वयोर्योगयोर्भूयान्परिहारः । यावद्ब्रूयाद्गोत्रं यूनेति तावद्वृद्धो यूनेति । पूर्वसूत्रे गोत्रस्य वृद्धमिति संज्ञा क्रियते ॥

असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सिद्धम् ॥ १ ॥

असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषश्चाविवक्षितः सामान्यं च विवक्षितम् । विशेषस्याविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सरूपाणामेकशेष एकविभक्तौ [१.२.६४] इत्येव सिद्धम् ॥

---

* २.४.६४.

पुमान्स्त्रिया [१ २ ६७] इत्येष कस्मान्न भवति । ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति ।

ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादनेकशेषः ॥ २ ॥

ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादेकशेषो न भविष्यति । यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवति । नात्र लिङ्गं विभक्तिपरमेव विशेषवाचकम् ॥ यदि तर्हि यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवतीह न प्राप्नोति । कारकश्च कारिका च कारकौ । न ह्यत्र लिङ्गं विभक्तिपरमेव विशेषवाचकम् ॥ कथं पुनरिदं विज्ञायते । शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति । आहोस्विदर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति । किं चातः । यदि विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति सिद्धं कारकश्च कारिका* च कारकौ । इदं तु न सिध्यति गोमांश्च गोमती च गोमन्तौ । अथ विज्ञायतेऽर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति सिद्धं गोमांश्च गोमती च गोमन्तौ । इदं तु न सिध्यति कारकश्च कारिका च कारकौ । उभयथापि पटुश्च पट्वी+ च पटू इत्येतन्न सिध्यति ॥ एवं तर्हि नैव विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति नाप्यर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति । कथं तर्हि । शब्दार्थौ या स्त्री तत्सद्भावेन च तल्लक्षणो विशेष आश्रीयते । एवं च कृत्वेहापि प्राप्तिः । ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति ॥ एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति । किम् । तदित्यनुवर्तते । तदित्यनेन प्रकृतौ स्त्रीपुंसौ प्रतिनिर्दिश्येते । कौ च प्रकृतौ । प्रधाने । प्रधानं या शब्दस्त्री प्रधानं यार्थस्त्रीति ॥

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ १ । २ । ६९ ॥

अयं योगः शक्योऽवक्तुम् । कथं शुक्लश्च कम्बलः शुक्लं च वस्त्रं तदिदं शुक्लं ते इमे शुक्ले । शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि ।

---

* ७ ३ ४४ + ६ १ ७७

प्रधाने कार्यसंप्रत्ययाच्छेषः ॥ १ ॥

प्रधाने कार्यसंप्रत्ययाच्छेषो भविष्यति । किं च प्रधानम् । नपुंसकम् । कथं पुनर्ज्ञायते नपुंसकं प्रधानमिति । एवं हि दृश्यते लोके । अनिर्ज्ञातेऽर्थे गुणसंदेहे च नपुंसकलिङ्गं प्रयुज्यते । किं जातमित्युच्यते द्वयं चैव हि जायते स्त्री वा पुमान्वा । तथा विदूरे ऽव्यक्तमारूपं दृष्ट्वा वक्तारो भवन्ति महिषी रूपमिव ब्राह्मणी रूपमिव । प्रधाने कार्यसंप्रत्ययान्नपुंसकस्य शेषो भविष्यति ॥ इदं तर्हि प्रयोजनमेकवच्चास्यान्यतरस्यामिति वक्ष्यामीति । एतदपि नास्ति प्रयोजनम् ।

आकृतिवाचित्वादेकवचनम् ॥ २ ॥

आकृतिवाचित्वादेकवचनं भविष्यति । यदा द्रव्याभिधानं तदा द्विवचनबहुवचने भविष्यतः ॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ १ । २ । ६८ ॥ पिता मात्रा ॥ १ । २ । ७० ॥ श्वशुरः श्वश्र्वा ॥ १ । २ । ७१ ॥

किमर्थमिदमुच्यते न पुमान्स्त्रिया [१.२.६७] इत्येव सिद्धम् । भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेशः । भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेशो भवति ।

भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम् ॥ १ ॥

यदि तावद्बिभर्तीति भ्राता स्वसर्यप्येतद्भवति । तथा यदि पुनाति प्रीणातीति वा पुत्रो दुहितर्यप्येतद्भवति । तथा यदि पाति पालयतीति वा पिता मातर्यप्येतद्भवति । तथा यद्याश्वाशप्रभव्यः श्वशुरः श्वश्र्वामप्येतद्भवति ॥ दर्शनं वै हेतुः । न हि स्वसरि भ्रातृशब्दो दृश्यते ।

दर्शनं हेतुरिति चेत्तुल्यम् ॥ २ ॥

दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति । स्वसर्यपि भ्रातृशब्दो दृश्यतां तुल्यं हि कारणम् ॥ न वा एष लोके संप्रत्ययः । न हि लोके भ्रातानीयतामित्युक्ते स्वसानीयते ।

तद्विषयं च ॥ ३ ॥

तद्विषयं चैतद्द्रष्टव्यं भवति स्वसरि भ्रातृत्वम् । किंविषयम् । एकशेषविषयम् ॥ युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः । बाढं युक्तम् ।

अन्यत्रापि तद्विषयदर्शनात् ॥ ४ ॥

अन्यत्रापि नियतविषयाः शब्दा दृश्यन्ते । तद्यथा । समाने रक्ते वर्णे गौर्लोहित इति भवत्यश्वः शोण इति । समाने च काले वर्णे गौः कृष्ण इति भवत्यश्वो हेम इति । समाने च शुक्ले वर्णे गौः श्वेत इति भवत्यश्वः कर्क इति ॥

त्यदादीनि सर्वैर्नित्यम् ॥ १ । २ । ७२ ॥

त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि ॥ १ ॥

त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि भवन्ति । सा च देवदत्तश्च तौ । सा च कुण्डे च तानि ॥

अद्वन्द्वतत्पुरुषविशेषणानाम् ॥ २ ॥

अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम् । इह मा भूत् । स च कुक्कुटः सा च मयूरी कुक्कुटमयूर्यौ ते । अर्धं पिप्पल्यास्तदर्धपिप्पली च सा अर्धपिप्पल्यौ ते ॥

अयमपि योगः शक्यो ऽवक्तुम् । कथम् ।

त्यदादीनां सामान्यार्थत्वात् ॥ ३ ॥

त्यदादीनां सामान्यमर्थः । अतश्च सामान्यं देवदत्ते ऽपि हि स इत्येतद्भवति यज्ञदत्ते ऽपि । त्यदादीनां सामान्यार्थत्वाच्छेषो भविष्यति ॥ इदं तर्हि प्रयोजनं परस्य शेषं वक्ष्यामीति ।

परस्य चोभयवाचित्वात् ॥ ४ ॥

उभयवाचि परम् ॥

पूर्वशेषदर्शनाच्च ॥ ५ ॥

पूर्वस्य खल्वपि शेषो दृश्यते । स च यश्च तावानय यावानयेति ॥ इदं तर्हि प्रयोजनं द्वन्द्वो मा भूदिति । एतदपि नास्ति प्रयोजनम् ।

सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात्सिद्धम् ॥ ६ ॥

सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यम् ॥ यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते शूद्राभीरम् गोबलीवर्दम् तृणोलपमिति न सिध्यति । नैष दोषः । इह तावच्छूद्राभीरमिति । आभीरा जात्यन्तराणि । गोबलीवर्दमिति । गाव उत्कालितपुंस्का वाहाय च विक्रयाय च । स्त्रिय एवावशिष्यन्ते । तृणोलपमिति । अपामुलपमिति नामधेयम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । सामान्येनोक्तत्वाद्विशेषस्य प्रयोगो न भविष्यति । सामान्येनोक्तत्वात्तस्यार्थस्य विशेषस्य प्रयोगेण न भवितव्यम् । किं कारणम् । उक्तार्थानामप्रयोग इति ॥ न तर्हीदानीमिदं भवति त ब्राह्मणमानय गार्ग्यमिति । भवति यदा नियोगतस्तस्यैवानयनं भवति । एवं तर्हि येनैव खल्वपि हेतुनैतद्वाक्यं भवति त ब्राह्मणमानय गार्ग्यमिति तेनैव हेतुना वृत्तिरपि प्राप्नोति । तस्मात्सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीति वक्तव्यम् ॥

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ॥ १ । २ । ७३ ॥

अयमपि योगः शक्यो ऽवक्तुम् । कथं गाव इमाश्चरन्ति अजा इमाश्चरन्ति । गाव उत्कालितपुंस्का वाहाय च विक्रयाय च । स्त्रिय एवावशिष्यन्ते ॥ इदं तर्हि प्रयोजनं ग्राम्येष्विति वक्ष्यामीति । इह मा भूत् । न्यङ्कव इमे सूकरा इम इति । कः पुनरर्हत्यग्राम्याणां पुंस उत्कालयितुं ये ग्रहीतुमशक्याः कुत एव वाहाय च विक्रयाय च ॥ इदं तर्हि प्रयोजनं पशुष्विति वक्ष्यामीति । इह मा भूत् । ब्राह्मणा इमे वृषला इमे । कः पुनरर्हत्यपशूनां पुंस उत्कालयितुं ये ऽशक्या वाहाय च विक्रयाय च ॥ इदं तर्हि प्रयोजनं संघेष्विति वक्ष्यामीति । इह मा भूत् । एतौ गावौ चरतः । कः पुनरर्हति निर्ज्ञाते ऽर्थे ऽन्यथा प्रयोक्तुम् ॥ इदं तर्हि प्रयोजनमतरुणेष्विति वक्ष्यामीति । इह मा भूत् । उरणका इमे वर्करा इम इति । कः पुनरर्हति तरुणानां पुंस उत्कालयितुं ये ऽशक्या वाहाय च विक्रयाय च ॥

अनेकशफेष्विति वक्तव्यम् । इह मा भूत् । अश्वाश्चरन्ति । गर्दभाश्चरन्तीति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकम् ॥ पादश्च समाप्तः ॥

भूवादयो धातवः ॥ १ । ३ । १ ॥

कुतो ऽयं वकारः । यदि तावत्संहितया निर्देशः क्रियते भ्वादय इति भवितव्यम् । अथासंहितया भूआदय इति भवितव्यम् ॥ अत उत्तरं पठति ।

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।

माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युरिति ॥ अथादिग्रहणं किमर्थम् । यदि तावत्पठ्यन्ते नार्थ आदिग्रहणेन । अन्यत्रापि ह्ययं पठन्नादिग्रहणं न करोति । क्वान्यत्र । मृडमृदगुधकुषक्लिशवदवसः क्त्वा [१. २. ७] इति । अथ न पठ्यन्ते नतरामर्थ आदिग्रहणेन । न ह्यपठिताः शक्या आदिग्रहणेन विशेषयितुम् । एवं तर्हि सिद्धे सति यदादिग्रहणं करोति तज्ज्ञापयत्याचार्यो ऽस्ति च पाठो बाह्यश्च सूत्रादिति । किमेतस्य ज्ञापने प्रयोजनम् । पाठेन धातुसंज्ञेत्येतदुपपन्नं भवति ॥

पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः ॥ १ ॥

पाठेन धातुसंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः । या इति धातुर्या इत्याबन्तः । वा इति धातुर्वा इति निपातः । नु इति धातुर्नु इति प्रत्ययश्च निपातश्च । दिवित्ति धातुर्दिवित्ति प्रातिपदिकम् ॥ किं च स्याद्यद्येतेषामपि धातुसंज्ञा स्यात् । धातोः [३.१.९१] इति तव्यदादीनामुत्पत्तिः प्रसज्येत* । नैष दोषः । साधने तव्यदादयो विधीयन्ते साधनं च क्रियायाः । क्रियाभावात्साधनाभावः । साधनाभावात्सत्यामपि धातुसंज्ञायां तव्यदादयो न भविष्यन्ति ॥ इदं तर्हि याः पश्य आतो धातोः [६.४.१४०] इति लोपः प्रसज्येत । नैष दोषः । अनाप इत्येवं सः† ॥ अस्य तर्हि वाशब्दस्य निपातस्याधातुरिति‡ प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत । अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात् । नैष दोषः । निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं§ तत्रानर्थकग्रहणं न करिष्यते । निपातः प्रातिपदिकमित्येव ॥ इदं तर्हि

---

* ३.१.९१. † ६.४.१४०. ‡ १.२.४५. § १.२.४५.

अक्षू इत्यचि श्नुधातुभ्रुवां य्वोरियङुवङौ [६ ४ ७७] इत्युवङादेशः प्रसज्येत । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययस्योवङादेशो भवतीति यदयं तत्र श्नुग्रहणं करोति ॥ अस्य तर्हि दिव्शब्दस्याधातुरिति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत । अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात् । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्ते दिव्शब्दात्स्वादय इति यदयं दिवः सावौत्त्वं शास्ति* । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । दिव्शब्दो यत्प्रातिपदिकं तदर्थमेतत्स्यात् । अक्षद्यूरिति । न वा अत्रेष्यते । अनिष्टं च प्राप्नोतीष्टं च न सिध्यति । एवं तर्ह्यननुबन्धकग्रहणे न सानुबन्धकस्येत्येवमेतस्य न भविष्यति । एवमप्यननुबन्धको दिव्शब्दो नास्तीति कृत्वा सानुबन्धकस्य ग्रहणं विज्ञास्यते ॥

परिमाणग्रहणं च ॥ २ ॥

परिमाणग्रहणं च कर्तव्यम् । इयानवधिर्धातुसंज्ञो भवतीति वक्तव्यम् । कुतो ह्येतद्भूशब्दो धातुसंज्ञो भविष्यति न पुनर्भ्वेध्शब्द इति ॥

यदि पुनः क्रियावचनो धातुरित्येतल्लक्षणं क्रियेत । का पुनः क्रिया । ईहा । का पुनरीहा । चेष्टा । का पुनश्चेष्टा । व्यापारः ॥ सर्वथा भवाञ्शब्देनैव शब्दानाचष्टे न किंचिदर्थजातं निदर्शयत्येवंजातीयिका क्रियेति । क्रिया नामेयमत्यन्तापरिदृष्टा । अशक्या क्रिया पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुठितः । सासावनुमानगम्या । कोऽसावनुमानः । इह सर्वेषु साधनेषु संनिहितेषु कदाचित्पचतीत्येतद्भवति कदाचिन्न भवति । यस्मिन्साधने संनिहिते पचतीत्येतद्भवति सा नूनं क्रिया । अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया ॥ कथं पुनर्ज्ञायते क्रियावचनाः पचादय इति । यदेषां करोतिना सामानाधिकरण्यम् । किं करोति पचति । किं करिष्यति पक्ष्यति । किमकार्षीत् अपाक्षीदिति ॥ तत्र

क्रियावचन उपसर्गप्रत्ययप्रतिषेधः ॥ ३ ॥

क्रियावचने धातावुपसर्गप्रत्यययोः प्रतिषेधो वक्तव्यः । पचति प्रपचति ॥ किं पुनः कारणं प्राप्नोति ।

समानेनार्थगतेः ॥ ४ ॥

समानो ह्यर्थो गम्यते सप्रकृतिकेन सप्रत्ययकेन सोपसर्गेण च ॥

* ७ १ ८४

अस्तिभवतिविद्यतीनां धातुत्वम् ॥ ९ ॥

अस्तिभवतिविद्यतीनां धातुसंज्ञा वक्तव्या । यथा हि भवता करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथास्त्यादीनां निदर्श्यते । न हि भवति किं करोति अस्तीति ॥

प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरेषु

प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरेषु मन्यामहे धातुरेव क्रियामाहेति । पचति पठति । प्रकृत्यर्थो ऽन्यश्चान्यश्च प्रत्ययार्थः स एव ॥

धातोश्चार्थभेदात्प्रत्ययान्तरेषु

धातोश्चार्थभेदात्प्रत्ययान्तरेषु मन्यामहे धातुरेव क्रियामाहेति । पक्ता पचनम् पाक इति । प्रत्ययार्थो ऽन्यश्चान्यश्च भवति प्रकृत्यर्थः स एव ॥ कथं पुनर्ज्ञायते ऽयं प्रकृत्यर्थो ऽयं प्रत्ययार्थ इति ।

सिद्धं त्वन्वयव्यतिरेकाभ्याम् ॥ ६ ॥

अन्वयाच्च व्यतिरेकाच्च । को ऽसावन्वयो व्यतिरेको वा । इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच्शब्दश्चकारान्तो ऽतिशब्दश्च प्रत्ययः । अर्थो ऽपि कश्चिद्गम्यते विक्लित्तिः कर्तृत्वमेकत्वं च । पठतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी । पच्शब्दो हीयते पठ्शब्द उपजायते ऽतिशब्दो ऽन्वयी । अर्थो ऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी । विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वं चैकत्वं चान्वयि । ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो यो ऽर्थो हीयते यः शब्द उपजायते तस्यासावर्थो यो ऽर्थ उपजायते यः शब्दो ऽन्वयी तस्यासावर्थो यो ऽर्थो ऽन्वयी ॥ विषम उपन्यासः । बहवो हि शब्दा एकार्था भवन्ति । तद्यथा । इन्द्रः शक्रः पुरुहूतः पुरंदरः । कन्दुः कोष्ठः कुशूल इति । एकश्च शब्दो बह्वर्थः। तद्यथा । अक्षाः पादाः माषा इति । अतः किं न साधीयो ऽर्थवत्ता सिद्धा भवति । नापि ब्रूमो ऽर्थवत्ता न सिध्यतीति । वर्णितार्थवत्तान्वयव्यतिरेकाभ्यामेव । तत्र कुत एतदयं प्रकृत्यर्थो ऽयं प्रत्ययार्थ इति न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्प्रत्यय एव वा । सामान्यशब्दा एत एवं स्युः । सामान्यशब्दाश्च नान्तरेण प्रकरणं विशेषं वा विशेषेष्ववतिष्ठन्ते । यतस्तु खलु नियोगतः पचतीत्युक्ते स्वभावतः कस्मिंश्चिद्विशेषे

पचतिशब्दो वर्तते ऽतो मन्यामहे नेमे सामान्यशब्दा इति । न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे ॥

क्रियाविशेषक उपसर्गः ॥ ७ ॥

पचतीति क्रिया गम्यते तां प्रो विशिनष्टि ॥ यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र धातुरुपसर्गं व्यभिचरति यत्र न खलु तं व्यभिचरति तत्र कथम् । अध्येति अधीत इति । यद्यप्यत्र धातुरुपसर्गं न व्यभिचरत्युपसर्गस्तु धातुं व्यभिचरति । तं मन्यामहे य एवास्याधेरन्यत्रार्थः स इहापीति । कः पुनरन्यत्राधेरर्थः । अधिरुपरिभावे वर्तते ॥ इह तर्हि व्यक्तमर्थान्तरं गम्यते । तिष्ठति प्रतिष्ठत इति । तिष्ठतीति व्रजिक्रियाया निवृत्तिः प्रतिष्ठत इति व्रजिक्रिया गम्यते । तं मन्यामह उपसर्गकृतमेतद्येनात्र व्रजिक्रिया गम्यत इति । प्रो ऽयं दृष्टापचार आदिकर्मणि वर्तते । न चेद नास्ति बह्वर्था अपि धातवो भवन्तीति । तद्यथा । वपिः प्रकिरणे दृष्टश्छेदने चापि वर्तते । केशश्मश्रु वपतीति । ईडिः स्तुतिचोदनायाञ्चासु दृष्टः प्रेरणे चापि वर्तते । अग्निर्वा इतो वृष्टिमीट्टे मरुतो ऽमुतश्च्यावयन्तीति । करोतिरभूतप्रादुर्भावे दृष्टो निर्मलीकरणे चापि वर्तते । पृष्ठं कुरु । पादौ कुरु । उन्मृदानेति गम्यते । निक्षेपणे चापि वर्तते । कटे कुरु । घटे कुरु । अश्मानमितः कुरु । स्थापयेति गम्यते । एवमिहापि तिष्ठतिरेव व्रजिक्रियामाह तिष्ठतिरेव व्रजिक्रियाया निवृत्तिम् ॥ अथ तर्हि दोषः । अस्तिभवतिविद्यतीनां धातुत्वमिति ॥

यदि पुनर्भाववचनो धातुरित्येवं लक्षणं क्रियेत । कथं पुनर्ज्ञायते भाववचनाः पचादय इति । यदेषां भवतिना सामानाधिकरण्यम् । भवति पचति । भवति पक्ष्यति । भवत्यपाक्षीदिति ॥ कः पुनर्भावः । भवतेः स्वपदार्थो भवनं भाव इति । यदि भवतेः स्वपदार्थो भवनं भावो विप्रतिषिद्धानां धातुसंज्ञा न प्राप्नोति । भेदः छेदः । अन्यो हि भावो ऽन्यो ऽभावः । आतश्चान्यो भावो ऽन्यो ऽभाव इति यो हि यस्य भावमिच्छति स न तस्याभावं यस्य चाभावं न तस्य भावम् ॥ पचादीनां च धातुसंज्ञा न प्राप्नोति । यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथा भाववचने धातौ निदर्श्यते । करोतिः पचादीनां सर्वान्कालान्सर्वान्पुरुषान्सर्वाणि वचनान्यनुवर्तते भवतिः पुनर्वर्तमानकाले चैकवचने च ॥ का तर्हीयं वाचोयुक्तिर्भवति पचति भवति पक्ष्यति भवत्यपाक्षीदिति । नैषा वाचोयुक्तिः । पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति । यद्यपि ताव-

दत्रैतदुच्यते वक्तुं यत्रान्या चान्या च क्रिया यत्र खलु सैव क्रिया तत्र कथम्। भवेदपि भवेत्। स्यादपि स्यादिति। अत्राप्यन्यत्वमस्ति। कुतः। कालभेदात्साधनभेदाच्च। एकस्यात्र भवतेर्भवतिः साधनं सर्वकालश्च प्रत्ययः। अपरस्य बाह्यं साधनं वर्तमानकालश्च प्रत्ययः॥ यावतात्राप्यन्यत्वमस्ति पचादयश्च क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीत्यस्त्वयं कर्तृसाधनः। भवतीति भाव इति। किं कृतं भवति। विप्रतिषिद्धानां धातुसंज्ञा सिद्धा भवति। भवेद्विप्रतिषिद्धानां धातुसंज्ञा सिद्धा स्यात्प्रातिपदिकानामपि प्राप्नोति। वृक्षः प्लक्ष इति। किं कारणम्। एतान्यपि हि भवन्ति॥ एवं तर्हि कर्मसाधनो भविष्यति। भाव्यते यः स भाव इति। क्रिया चैव हि भाव्यते स्वभावसिद्धं तु द्रव्यम्। एवमपि भवेत्केषांचिन्न स्याद्यानि न भाव्यन्ते। ये त्वेते संबन्धिशब्दास्तेषां प्राप्नोति। माता पिता भ्रातेति। सर्वथा वयं प्रातिपदिकपर्युदासान्न मुच्यामहे॥ पठिष्यति ह्याचार्यो भूवादिपाठः प्रातिपदिकाणपयत्यादिनिवृत्त्यर्थ इति। यावता पठिष्यति पचादयश्च क्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीत्यस्त्वयं कर्तृसाधनः। भवतीति भाव इति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। एतेनैवाभिहितं सूत्रेण भूवादयो धातव इति। कथम्। नेदमादिमद्ग्रहणम्। वदेरयमौणादिक इञ्कर्तृसाधनः। भुवं वदन्तीति भूवादय इति॥

भाववचने तदर्थप्रत्ययप्रतिषेधः ॥ ८ ॥

भाववचने धातौ तदर्थस्य प्रत्ययस्य प्रतिषेधो वक्तव्यः। शिश्य इति। किं च स्यात्। अशितीत्यात्वं प्रसज्येत*। तद्धि धातोर्विहितम्†॥

इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः ॥ ९ ॥

इतरेतराश्रयं च भवति। केतरेतराश्रयता। प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। उत्पन्ने हि प्रत्यये भाववचनत्वं गम्यते स च तावद्भाववचनादुत्पाद्यः। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पन्ते॥

सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्ययः ॥ १० ॥

सिद्धमेतत्। कथम्। नित्याः शब्दाः। नित्येषु च शब्देष्वनाश्रित्य भाववचनत्वं प्रत्यय उत्पद्यते॥

---

* ६.१.४५ † ३.१.९१.

प्रथमभावग्रहणं च ॥ ११ ॥

प्रथमभावग्रहणं च कर्तव्यम् । प्रथमं यो भावमाहेति । कुतः पुनः प्राथम्यं किं शब्दत आहोस्विदर्थतः । किं चातः । यदि शब्दतः सनादीनां धातुसंज्ञा न प्राप्नोति । पुत्रीयति वत्सीयतीति । अथार्थतः सिद्धा सनादीनां धातुसंज्ञा स एव तु दोषो भाववचने तदर्थप्रत्ययप्रतिषेध इति । एवं तर्हि नैवार्थतो नापि शब्दतः । किं तर्हि । अभिधानतः । सुमध्यमे ऽभिधाने यः प्रथमं भावमाह ॥

इह य एव भाववचने धातौ दोषास्त एव क्रियावचने ऽपि । तत्र त एव परिहाराः । तत्रेदमपरिहृतमस्तिभवतिविद्यतीनां धातुत्वमिति । तस्य परिहारः । कां पुनः क्रियां भवान्मत्वाहास्तिभवतिविद्यतीनां धातुसंज्ञा न प्राप्नोतीति । किं यत्तदेव-दत्तः कांसपात्र्यां पाणिनौदनं भुङ्क्त इति । न ब्रूमः कारकाणि क्रियेति । किं तर्हि । कारकाणां प्रवृत्तिविशेषः क्रिया । अन्यथा च कारकाणि भुक्त्यौदने प्रवर्तन्ते ऽन्यथा च मांसौदने । यद्येवं सिद्धास्तिभवतिविद्यतीनां धातुसंज्ञा । अन्यथा हि कारकाण्यस्तौ प्रवर्तन्ते ऽन्यथा हि म्रियतौ ॥ षड्भावविकारा इति ह स्माह भगवान्वार्ष्यायणिः । जायते ऽस्ति विपरिणमते वर्धते ऽपक्षीयते विनश्यतीति । सर्वथा स्थित इत्यत्र धातुसंज्ञा न प्राप्नोति । वाक्यो येतेभ्यस्तिष्ठतिः । एवं तर्हि क्रियायाः क्रिया निवर्तिका भवति द्रव्यं द्रव्यस्य निवर्तकम् । एवं हि कश्चित्कंचित्पृच्छति । किमस्यो देवदत्तस्य व्याधिरिति । स आह । वर्धत इति । अपर आह । अपक्षीयत इति । अपर आह । स्थित इति । स्थित इत्युक्ते वर्धतेश्चापक्षीयतेश्च निवृत्तिर्भवति ॥ अथवा नान्तरेण क्रियां भूतभविष्यद्वर्तमानाः काला व्यज्यन्ते । अस्त्यादिभिश्चापि भूतभविष्यद्वर्तमानाः काला व्यज्यन्ते ॥ अथवा नान्यत्प्रकृतेनान्यदादेयम् । तेन न भविष्यति किं करोति अस्तीति ॥

अथ यदैव क्रियावचनो धातुरित्येष पक्षस्तदापि भाववचनो धातुरिति किं गतमेतदियता सूत्रेणाहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम् । गतमित्याह । कथम् । अयमादिशब्दो ऽस्त्येव व्यवस्थायां वर्तते । तद्यथा । देवदत्तादीन्समुपविष्टानाह देवदत्तादय आनीयन्तामिति । त उत्थाप्यानीयन्ते । अस्ति प्रकारे वर्तते । तद्यथा । देवदत्तादय आढ्या अभिरूपा दर्शनीयाः पञ्चवन्तः । देवदत्तप्रकारा इति गम्यते । तद्यथा । नादिशब्दः परिसमाप्यते । भ्वादय इति च वादय इति च । यदा तावत्क्रियावचनो धातुरित्येष पक्षस्तदा भू इत्ययं च आदिशब्दः व्यवस्थायां वर्तते वा इत्ययं च आदिशब्दः प्रकारे । भू इत्येवमादयो वा इत्येवंप्रकाराः

इति । यदा तु भाववचनो धातुरित्येष पक्षस्तदा वा इत्यत्र य आदिशब्दः स व्यवस्थायां भू इत्यत्र य आदिशब्दः स प्रकारे । वा इत्येवमादयो भू इत्येवंप्रकारा इति ॥ यदि तर्हि लक्षणं क्रियते नेदानीं पाठः कर्तव्यः । कर्तव्यश्च । किं प्रयोजनम् ।

भूवादिपाठः प्रातिपदिकाणपयत्यादिनिवृत्त्यर्थः ॥ १२ ॥

भूवादिपाठः कर्तव्यः । किं प्रयोजनम् । प्रातिपदिकाणपयत्यादिनिवृत्त्यर्थः । प्रातिपदिकनिवृत्त्यर्थं आणपयत्यादिनिवृत्त्यर्थश्च । के पुनराणपयत्यादयः । आणपयति वट्टति वड्ढतीति ॥

स्वरानुबन्धज्ञापनाय च ॥ १३ ॥

स्वरानुबन्धज्ञापनाय च पाठः कर्तव्यः । स्वराननुबन्धांश्च ज्ञास्यामीति । न ह्यन्तरेण पाठं स्वरा अनुबन्धा वा शक्या विज्ञातुम् ॥ ये त्वेते न्याय्यविकरणा उदात्ता अननुबन्धकाः पठ्यन्त एतेषां पाठः शक्यो ऽकर्तुम् । एतेषामप्यवश्यमाणपयत्यादिनिवृत्त्यर्थः पाठः कर्तव्यः । न कर्तव्यः । शिष्टप्रयोगादाणपयत्यादीनां निवृत्तिर्भविष्यति । स चावश्यं शिष्टप्रयोग उपास्यो येऽपि पठ्यन्ते तेषामपि विपर्यासनिवृत्त्यर्थः । लोके हि कृष्यर्थे कर्सिं प्रयुञ्जते दृश्यर्थे च दिशिम् ॥

उपदेशे ऽजनुनासिक इत् ॥ १ । ३ । २ ॥

उपदेश इति किमर्थम् । अभ्र आँ* अपः । उद्देशे यो ऽनुनासिकस्तस्य मा भूदिति ॥ कः पुनरुद्देशोपदेशयोर्विशेषः । प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रापणमुद्देशः । प्रत्यक्षं तावदाख्यानमुपदेशः । तद्यथा । अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशति । अयं गौरिति । स प्रत्यक्षमाख्यातमाह । उपदिष्टो मे गौरिति । गुणैः प्रापणमुद्देशः । तद्यथा । कश्चित्कंचिदाह । देवदत्त मे भवानुद्दिशत्विति । स इहस्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति । अङ्गदी कुण्डली किरीटी व्यूढोरस्को वृत्तबाहुर्लोहिताक्षस्तुङ्गनासो विचित्राभरण ईदृशो देवदत्त इति । स गुणैः प्राप्यमाणमाह । उद्दिष्टो मे देवदत्त इति ॥

इत्संज्ञायां सर्वप्रसङ्गो ऽविशेषात् ॥ १ ॥

इत्संज्ञायां सर्वप्रसङ्गः । सर्वस्यानुनासिकस्येत्संज्ञा प्राप्नोति । अस्यापि प्राप्नोति ।

---

* ६ १ १३१

अभ्र अँ अपः । किं कारणम् । अविशेषात् । न हि कश्चिद्विशेष उपादीयत एवंजातीयकस्यानुनासिकस्येत्संज्ञा भवतीति । अनुपादीयमाने विशेषे सर्वप्रसङ्गः ॥ किमुच्यते ऽनुपादीयमाने विशेष इति । कथं न नामोपादीयते यदोपदेश इत्युच्यते । लक्षणेन ह्युपदेशः । संकीर्णावुद्देशोपदेशौ । प्रत्यक्षमाख्यानमुद्देशो गुणैश्च प्रापणमुपदेशः । प्रत्यक्षं तावदाख्यानमुद्देशः । तद्यथा । कश्चित्कंचिदाह । अनुवाकं मे भवानुद्दिशत्विति । स तस्मा आचष्टे । इषेत्वकमधीष्व । शंनोदेवीयमधीष्वेति । स प्रत्यक्षमाख्यातमाह । उद्दिष्टो मे ऽनुवाकस्तमध्येष्य इति । गुणैश्च प्रापणमुपदेशः । तद्यथा । कश्चित्कंचिदाह । ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति । स तस्मा आचष्टे । अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यो ऽमुष्मिन्हस्तवाम इति । स गुणैः प्राप्यमाणमाह । उपदिष्टो मे पन्था इति । एवमेतौ संकीर्णावुद्देशोपदेशौ ॥ एवं तर्हीत्कार्याभावादत्रेत्संज्ञा न भविष्यति । ननु च लोप एवेत्कार्यं स्यात्* । अकार्यं लोपः । इह हि शब्दस्य व्यर्थ उपदेशः । कार्यार्थो वा भवत्युपदेशः श्रवणार्थो वा । कार्यं चेह नास्ति । कार्ये चासति यदि श्रवणमपि न स्यादुपदेशो ऽनर्थकः स्यात् ॥ इदमस्तीत्कार्यम् । अभ्र आँ अटितः । अनन्तरलक्षणायामित्संज्ञायां सत्यामादितश्च [७. २. १६] इतीट्प्रतिषेधः प्रसज्येत ॥

सिद्धं तूपदेशने ऽनुनासिकवचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । उपदेशने यो ऽनुनासिकः स इत्संज्ञो भवतीति वक्तव्यम् । किं पुनरुपदेशनम् । शास्त्रम् । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तमित्संज्ञायां सर्वप्रसङ्गो ऽविशेषादिति । नैष दोषः । उपदेश इति घञयं करणसाधनः । न सिध्यति । परत्वाल्ल्युट् प्राप्नोति† । न ब्रूमो ऽकर्तरि च कारके संज्ञायाम् [३. ३. १९] इति । किं तर्हि । हलश्च [३. ३. १२१] इति । तत्रापि संज्ञायामिति वर्तते‡ न चैषा संज्ञा । प्रायवचनादसंज्ञायामपि भविष्यति§ । प्रायवचनात्संज्ञायामेव स्याद्वा न वा न तूपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम् । यदि नोपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणं कल्याण्यादीनामिनङ् [४. १. १२६] कुलटाया वा [१२७] इतीनङ्विभाषा न प्राप्नोति । इनङेवात्र प्रधानम् । विभाषा गुणः प्रकृतश्चानुवर्तते । इह तर्हि गार्गिकादीनां लुक् [४.१.१०८] गुणान्तादन्यतरस्याम् [१०९] इति लुग्विभाषा न प्राप्नोति । अत्रापि लुगेव प्रधानम् ।

* ११ ° † ११.११७ ‡ ११.११८ § ४१.१११.

विहितः प्रत्ययः प्रकृतश्चानुवर्तते* । एवं न चेदमकृतं भवति नोपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति न च कश्चिद्दोषो भवति । एवं च कृत्वा घञ्न प्राप्नोति ॥ एवं तर्हि कृत्यल्युटो बहुलम् [३.३.११३] इत्येवमत्र घञ्भविष्यति ॥

हलन्त्यम् ॥ १ । ३ । ३ ॥

हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वात् ॥ १ ॥

हलन्त्ये सर्वप्रसङ्गः । सर्वस्य हल इत्संज्ञा प्राप्नोति । किं कारणम् । सर्वान्त्यत्वात् । सर्वो हि हल् तं तमवधिं प्रत्यन्त्यो भवति ॥

सिद्धं तु व्यवसितान्त्यत्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । व्यवसितान्त्यत्वात् । व्यवसितान्त्यो हलित्संज्ञो भवतीति वक्तव्यम् । के पुनर्व्यवसिताः । धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वादिति । नैष दोषः । आहायं हलन्त्यमित्संज्ञं भवतीति सर्वश्च हल् तं तमवधिं प्रत्यन्त्यो भवति तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो योऽन्त्य इति । कश्च साधीयः । यो व्यवसितान्त्यः ॥ अथवा सापेक्षो ऽयं निर्देशः क्रियते न चान्यत्किंचिदपेक्ष्यमस्ति ते व्यवसितमेवापेक्षिष्यामहे ॥

लकारस्यानुबन्धाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः ॥ ३ ॥

लकारस्यानुबन्धत्वेनाज्ञापितत्वाद्धल्ग्रहणस्याप्रसिद्धिः । हलन्त्यमित्संज्ञं भवतीत्युच्यते लकारस्यैव तावदित्संज्ञा न प्राप्नोति† ॥

सिद्धं तु लकारनिर्देशात् ॥ ४ ॥

सिद्धमेतत् । कथम् । लकारनिर्देशः कर्तव्यः । हलन्त्यमित्संज्ञं भवति लकारश्चेति वक्तव्यम् ॥

एकशेषनिर्देशाद्वा ॥ ५ ॥

अथवैकशेषनिर्देशोऽयम् । हल् च हल् च हल् । हलन्त्यमित्संज्ञं भवतीति ॥

* ४१.११०. † ११७१

अथवा लकारस्यैवेदं गुणभूतस्य ग्रहणं तत्रोपदेशेऽजनुनासिक इत् [१.३.२] इतीत्संज्ञा भविष्यति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति भवति लकारस्येत्संज्ञेति यदयं णलं लितं करोति ॥

प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते ॥ ६ ॥

अकृत्तद्धितान्तस्य प्रातिपदिकस्य प्रतिषेधो वक्तव्यः । उदश्वित् शकृदिति । अकृत्तद्धितान्तस्येति किमर्थम् । कुम्भकारः नगरकारः । औपगवः कापटव इति* ॥

इदर्थाभावात्सिद्धम् ॥ ७ ॥

इत्कार्याभावादत्रेत्संज्ञा न भविष्यति ॥ इदमस्तीत्कार्यं तित्स्वरितम् [६.१.१८५] इति स्वरितत्वं यथा स्यात् । नैतदस्ति । प्रत्ययग्रहणं तत्र चोदयिष्यति† ॥ इदं तर्हि । राजा तक्षा । ञ्नितीत्याद्युदात्तत्वं यथा स्यात्‡ । ञ्नितीत्युच्यते तत्र व्यपवर्गाभावान्न भविष्यति ॥ इदं तर्हि । स्वर् । उपोत्तमं रिति [६.१.२१७] इत्येष स्वरो यथा स्यात् । स्वरितकरणसामर्थ्यान्न भविष्यति । न्यङ्स्वरौ स्वरिताविति ॥ इदं तर्हि । अन्तर् । उत्तमशब्दस्त्रिप्रभृतिषु वर्तते न चात्र त्रिप्रभृतयः सन्ति ॥ इदं तर्हि सनुतर् उपोत्तमं रितीत्येष स्वरो यथा स्यात् । अन्तोदात्तनिपातनं करिष्यते स निपातनस्वरो रित्स्वरस्य बाधको भविष्यति ॥ एतच्चात्र युक्तं यदित्कार्याभावादित्संज्ञा न स्यात् । यत्रेत्कार्यं भवति भवति तत्रेत्संज्ञा । तद्यथा । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् [२.४.७०] इति§ ॥

न विभक्तौ तुस्माः ॥ १ । ३ । ४ ॥

विभक्तौ तवर्गप्रतिषेधोऽतद्धिते ॥ १ ॥

विभक्तौ तवर्गप्रतिषेधोऽतद्धित इति वक्तव्यम् । इह मा भूत् । किमोऽत् [५.३.१२] । क्व भेप्सन्दीव्यसे । क्वार्थमागमा इति ॥ न तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति न विभक्तौ तद्धिते प्रतिषेधो भवतीति यदयमिदमस्थमुः [५.३.२४] इति थमो मकारस्येत्संज्ञापरित्राणार्थमुकारमनुबन्धं करोति ॥ नैतज्ज्ञापकम् इदानीमित्यत्रापि प्राप्नोति¶ । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति ॥

* ३.११; ११ ८१; ९९. † १.१.१८९. ‡ ११, ११७ § ६१ ११४ ¶ ११.१४

इदमस्तीत्कार्यं मिदचोऽन्त्यात्परः [१.१.४७] इत्यचामन्त्यात्परो यथा स्यात् । इशभावे कृते* नास्ति विशेषो मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर† इति वा । स एव तावदिशभावो न प्राप्नोति । किं कारणम् । प्राग्दिशः प्रत्ययेष्वित्युच्यते । कः पुनरर्हतीशभावं प्राग्दिशः प्रत्ययेषु वक्तुम् । किं तर्हि । प्राग्दिशोऽर्थेष्विशभावः किंसर्वनामबहुभ्यो ऽद्व्यादिभ्यः प्रत्ययोत्पत्तिः‡ ॥ एवं तर्हि तदोऽप्ययं वक्तव्यः§ । तदश्च मिदचोऽन्त्यात्परत्वेन न सिध्यति । ननु चात्राप्यत्वे कृते¶ नास्ति विशेषो मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति वा । तद्यत्वं न प्राप्नोति । किं कारणम् । विभक्तावित्युच्यते ॥ एवं तर्हि यकारान्तो दानीं करिष्यते । किं यकारो न श्रूयते । लुप्तनिर्दिष्टो यकारः ॥

चुटू ॥ १ । ३ । ७ ॥

चुञ्चुपचणपोश्चकारप्रतिषेधः ॥ १ ॥

चुञ्चुपचणपोश्चकारस्य प्रतिषेधो वक्तव्यः** । केशचुञ्चुः केशचणः ॥

इदर्थाभावात्सिद्धम् ॥ २ ॥

इत्कार्याभावादत्रेत्संज्ञा न भविष्यति ॥ इदमस्तीत्कार्यं नितो ऽन्त उदात्तो भवतीत्यन्तोदात्तत्वं यथा स्यात्†† । पित्करणमिदानीं किमर्थं स्यात् ।

पित्करणं किमर्थमिति चेत्पर्यायार्थम् ॥ ३ ॥

पित्करणं किमर्थमिति चेत्पर्यायार्थमेतत्स्यात्‡‡ ॥ एवं तर्हि यकारादी चुञ्चुप्चणपौ । किं यकारो न श्रूयते । लुप्तनिर्दिष्टो यकारः ॥

इर उपसंख्यानम् ॥ ४ ॥

इर उपसंख्यानं कर्तव्यम् । रुधिर् । अरुधत् अरौत्सीत्§§ ॥ अवयवग्रहणात्सिद्धम् । रेफस्यात्र हलन्त्यम् [१.३.३] इतीत्संज्ञा भविष्यतीकारस्योपदेशेऽजनुनासिकः [२] इति ।

अवयवग्रहणादिति चेदिदिद्विधिप्रसङ्गः ॥ ५ ॥

अवयवग्रहणादिति चेदिदिद्विधिरपि प्राप्नोति । भेत्ता छेत्ता । इदितो नुम्धातोः

* ५.३.३ † ३.१.२ ‡ ५.३.२. § ५.३.१०. ¶ ७.२.१०२.
** ५.२.२६ †† ६.१.१६३. ‡‡ १.१.४ §§ ३.१.५७.

[७.१.५८] इति नुम्प्राप्नोति ॥ यदि पुनरयमिदिद्विधिः कुम्भीधान्यन्यायेन विज्ञायेत । तद्यथा । कुम्भीधान्यः श्रोत्रिय इत्युच्यते । यस्य कुम्भ्यामेव धान्य स कुम्भीधान्यः । यस्य पुनः कुम्भ्यां चान्यत्र च नासौ कुम्भीधान्यः । नायमिदिद्विधिः कुम्भीधान्यन्यायेन शक्यो विज्ञातुम् । इह हि दोषः स्यात् । टुनदि । नन्दथुरिति ॥ एवं तर्हि नैवं विज्ञायत इकार इदस्य सोऽयमिदित् तस्येदित इति । कथं तर्हि । इकार एवेत् इदित् इदिदन्तस्येति ॥ अथवा ऋकारस्यैवेदमिर्त्वभूतस्य ग्रहणम्* । तत्रोपदेशेऽजनुनासिक इतीत्संज्ञा भविष्यति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामिदिद्विधिर्भवतीति यदयमिरितः कांश्चिन्नुमनुषक्तान्पठति । उबुन्दिर् निशामने । स्कन्दिर् गतिशोषणयोः ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयतीर्शब्दस्येत्संज्ञा भवतीति यदयमिरितो वा [३.१.५७] इत्याह ॥ अथवान्त इति वर्तते† ॥

तस्य लोपः ॥ १ । ३ । ९ ॥

तस्यग्रहणं किमर्थम् । इत्संज्ञकः प्रतिनिर्दिश्यते । नैतदस्ति प्रयोजनम् । प्रकृतमिदिति वर्तते । क्व प्रकृतम् । उपदेशे ऽजनुनासिक इत् [१.३.२] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि । आमन्त्रयस्वैनम् । देवदत्तमिति गम्यते । देवदत्तस्य गावो ऽश्वा हिरण्य च । आढ्यो वैधवेयः । देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थाद्द्वितीयानिर्दिष्टं प्रथमानिर्दिष्टं च भवति । एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति ॥ इदं तर्हि प्रयोजनम् । ये ऽनेकाल इत्सज्ञास्तेषां लोपः सर्वादेशो यथा स्यात् । अथ क्रियमाणे ऽपि च तस्यग्रहणे कथमिव लोपः सर्वादेशो लभ्यः । लभ्य इत्याह । कुतः । वचनप्रामाण्यात् । तस्यग्रहणसामर्थ्यात् ॥

इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानमित्प्रतिषेधात् ॥ १ ॥

इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानं कर्तव्यम् । णल् । अहं पपच । क्त्वा । देवित्वा सेवित्वा । निष्ठा । शयितः शयितवान् । किं पुनः कारणं न सिध्यति । इत्प्रतिषेधात् । प्रतिषिध्यते ऽत्रेत्संज्ञा । णलुत्तमो णिद्वा भवति । क्त्वा सेण्न किद्भवति । निष्ठा सेण्न किद्भवतीति‡ ॥

---

* ७.२.१००; १.१.५१ † ७.१.६०. ‡ ७.२.११, १.२.१८, १९

सिद्धं तु णलादीनां ग्रहणप्रतिषेधात् ॥ २ ॥

सिद्धमेतत् । कथम् । णलादीनां ग्रहणानि प्रतिषिध्यन्ते । णलुत्तमो वा णिद्ग्रहणेन गृह्यते । क्त्वा सेण्न किद्ग्रहणेन गृह्यते । निष्ठा सेण्न किद्ग्रहणेन गृह्यत इति ॥

निर्दिष्टलोपाद्वा ॥ ३ ॥

निर्दिष्टलोपाद्वा सिद्धमेतत् । अथवा निर्दिष्टस्यायं लोपः क्रियते तस्मात्सिद्धमेतत् ॥

तत्र तुस्मानां प्रतिषेधः ॥ ४ ॥

तत्र तुस्मानां प्रतिषेधो वक्तव्यः । तस्मात् तस्मिन् । यस्मात् यस्मिन् । वृक्षाः प्लक्षाः । अचिनवम् असुनवम् अकरवम् ॥

न वोच्चारणसामर्थ्यात् ॥ ५ ॥

न वा वक्तव्यः । किं कारणम् । उच्चारणसामर्थ्यादत्र लोपो न भविष्यति ॥

अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः ॥ ६ ॥

अनुबन्धलोपे भावाभावयोर्विरोधादप्रसिद्धिः । न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति ॥

सिद्धं त्वपवादन्यायेन ॥ ७ ॥

सिद्धमेतत् । कथम् । अपवादन्यायेन ॥ किं पुनरिह तथा यथोत्सर्गापवादौ ।

भावो हि कार्यार्थो ऽन्यार्थो लोपः ॥ ८ ॥

कार्यं करिष्यामीत्यनुबन्ध आसज्यते कार्यादन्यन्मा भूदिति लोपः ॥
अथ यस्यानुबन्ध आसज्यते किं स तस्यैकान्तो भवत्याहोस्विदनेकान्तः ।

एकान्तस्तत्रोपलब्धेः ॥ ९ ॥

एकान्त इत्याह । कुतः । तत्रोपलब्धेः । तत्रस्थो ह्यसावुपलभ्यते । तद्यथा । वृक्षस्था शाखा वृक्षैकान्त उपलभ्यते ॥

तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्कनिर्देशोऽनाकारान्तत्वात् ॥ १० ॥

तत्रासरूपविधौ दोषो भवति । कर्मण्यण् [३.२.१] आतोऽनुपसर्गे कः [३] इति

क्तविषये ऽणपि प्राप्नोति* ॥ सर्वादेशे च दोषो भवति । दिव औत्सर्वादेशः प्राप्नोति† ॥ दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्यः । अदाब्दैपाविति वक्तव्यम्‡ । किं पुनः कारणं न सिध्यति । अनाकारान्तत्वात् । ननु चात्त्वे कृते भविष्यति । तद्ध्यात्त्वं न प्राप्नोति । किं कारणम् । अनेजन्तत्वात्§ ॥ अस्तु तर्ह्यनेकान्तः ।

अनेकान्ते वृत्तिविशेषः ॥ ११ ॥

यद्यनेकान्तो वृत्तिविशेषो न सिध्यति । किति ञितीति कार्याणि न सिध्यन्ति । किं हि स तस्येङ्भवति येनेत्कृतं स्यात् ॥ एवं तर्ह्यनन्तरः ।

अनन्तर इति चेत्पूर्वपरयोरित्कृतप्रसङ्गः ॥ १२ ॥

अनन्तर इति चेत्पूर्वपरयोरित्कृतं प्राप्नोति । वुञ्छण्¶ ॥

सिद्धं तु व्यवसितपाठात् ॥ १३ ॥

सिद्धमेतत् । कथम् । व्यवसितपाठः कर्तव्यः । वुञ् छण् ॥ स चावश्यं व्यवसितपाठः कर्तव्यः ।

इतरथा ह्येकान्तेऽपि संदेहः ॥ १४ ॥

अक्रियमाणे व्यवसितपाठ एकान्तेऽपि संदेहः स्यात् । तत्र न ज्ञायते किमयं पूर्वस्य भवत्याहोस्वित्परस्येति ॥ संदेहमात्रमेतद्भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति पूर्वस्येति व्याख्यास्यामः ॥

वृत्ताद्वा ॥ १५ ॥

वृत्ताद्वा पुनः सिद्धमेतत् । वृद्धिमन्तमाद्युदात्तं दृष्ट्वा ञिदिति व्यवसेयम् । अन्तोदात्तं दृष्ट्वा किदिति** ॥ युक्तं पुनर्यद्वृत्तनिमित्तको नामानुबन्धः स्यान्नानुबन्धनिमित्तकेन नाम वृत्तेन भवितव्यम् । वृत्तनिमित्तक एवानुबन्धः । वृत्तज्ञो ह्याचार्योऽनुबन्धानासजति ॥

उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति । किमत्र न्याय्यम् । एकान्ता इत्येव न्याय्यम् । कुत एतत् । अत्र हि हेतुर्व्यपदिष्टो यच्च नाम सहेतुकं तन्न्याय्यम् । ननु चोक्तं तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोऽनाकारान्तत्वादिति । अस-

* ३. १. ९४. † ७. १. ८४; १. १. ५५. ‡ १. १. २०. § ६. १. ४५. ¶ ४. २. ८०.
** ७. २. ११७, ११८, ६ १. १९७, १९९.

रूपविधौ तावन्न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमसारूप्यं भवतीति यदयं ददातिदधात्योर्विभाषा [३.१.१३९] इति विभाषां शं शास्ति ॥ यदप्युक्तं सर्वादेश इति । अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेकाल्त्वं भवतीति यदयं शित्सर्वस्य [१.१.५५] इत्याह ॥ यदप्युक्तं दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्य इति । न कर्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेजन्तत्वं भवतीति यदयमुदीचां माङो व्यतीहारे [३.४.१९] इति मेङः सानुबन्धकस्यात्वभूतस्य ग्रहणं करोति ॥

यथासंख्यमनुदेशः समानाम् ॥ १ । ३ । १० ॥

किमिहोदाहरणम् । इको यणचि [६.१.७७] । दध्यत्र मध्वत्र । नैतदस्ति । स्थानेऽन्तरतमेनाप्येतत्सिद्धम्* । कुत आन्तर्यम् । तालुस्थानस्य तालुस्थान ओष्ठस्थानस्यौष्ठस्थानो भविष्यतीति ॥ इदं तर्हि । तस्थस्थमिपां ताम्तम्तामः [३.४.१०१] इति । ननु चैतदपि स्थानेऽन्तरतमेनैव सिद्धम् । कुत आन्तर्यम् । एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थो भविष्यतीति ॥ इदं तर्हि । तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः [४.३.९४] इति ॥

किमर्थं पुनरिदमुच्यते ।

संज्ञासमासनिर्देशात्सर्वप्रसङ्गोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थम् ॥ १ ॥

संज्ञया समासैश्च निर्देशाः क्रियन्ते । संज्ञया तावत् । परस्मैपदानां णलतुसुस्थलथुसणल्वमाः [३.४.८२] इति । समासैः । तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः [४.३.९४] इति । संज्ञासमासनिर्देशादेतस्मात्कारणात्सर्वप्रसङ्गः । सर्वस्योद्देशस्य सर्वोऽनुदेशः प्राप्नोति । इष्यते च समसंख्यं यथा स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति तत्र यथासंख्यवचनं नियमार्थम् । एवमर्थमिदमुच्यते ॥ किं पुनः कारणं संज्ञया च समासैश्च निर्देशाः क्रियन्ते ।

संज्ञासमासनिर्देशः पृथग्विभक्तिसंज्ञ्यनुच्चारणार्थः ॥ २ ॥

संज्ञया च समासैश्च निर्देशाः क्रियन्ते पृथग्विभक्तीः संज्ञिनश्च मोच्चीचरमिति ॥

---

* १.१.५०.

प्रकरणे च सर्वसंप्रत्ययार्थः ॥ ३ ॥

प्रकरणे च सर्वेषां संप्रत्ययो यथा स्यात् । विदो लटो वा [३.४.८३] इति ॥ किं पुनः शब्दतः साम्ये संख्यातानुदेशो भवत्याहोस्विदर्थतः । कश्चात्र विशेषः ।

संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्या-यवायाव एच इत्यनिर्देशः ॥ ४ ॥

अगमको निर्देशो ऽनिर्देशः । परस्मैपदानां णलतुसुस्थलथुसणल्वमाः [३.४.८२] इति णलादयो बहवः परस्मैपदानामित्येकः शब्दः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ डारौरसः प्रथमस्य* । डारौरसो बहवः प्रथमस्येत्येकः शब्दः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ एचो ऽयवायावः [६.१.७८] । अयवायावो बहव एच इत्येकः शब्दः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ अस्तु तर्ह्यर्थतः ।

अर्थतश्चेल्लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषः ॥ ५ ॥

अर्थतश्चेल्लृलुटोर्नन्द्यरीहणसिन्धुतक्षशिलादिषु दोषो भवति ॥ स्यतासी लृलुटोः [३.१.३३] । स्यतासी द्वौ लृलुटोरित्यस्य त्रयोऽर्थाः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः [३.१.१३४] । नन्द्यादयो बहवो ल्युणिन्यचस्त्रयः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ अरीहणादयो बहवो वुञादयः सप्तदश† । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ सिन्धुतक्षशिलादिभ्यो ऽणञौ [४.३.९३] । सिन्धुतक्षशिलादयो बहवो ऽणञौ द्वौ । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥

आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु ॥ ६ ॥

आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु च दोषो भवति ॥ आत्मनेपदविधिश्च न सिध्यति । अनुदात्तङित आत्मनेपदम् [१.३.१२] । अनुदात्तङितौ द्वावात्मनेपदमित्यस्य द्वावर्थौ‡ । तत्र संख्यातानुदेशः प्राप्नोति ॥ निष्ठा । रदाभ्यां निष्ठातो नः पूर्वस्य च दः [८.२.४२] इति । रेफदकारौ द्वौ निष्ठेत्यस्य द्वावर्थौ§ । तत्र संख्यातानुदेशः प्राप्नोति ॥ सार्वधातुकद्विग्रहणेषु च दोषो भवति । श्नसोरल्लोपः [६.४.१११] । श्नमस्ती द्वौ सार्वधातुकमित्यस्य द्वावर्थौ¶ । तत्र संख्यातानुदेशः प्राप्नोति ॥

* २.४.८५ † ४.२.८० ‡ १.४.१०० § १.१.२६ ¶ ३.४.११३

एङः पूर्वत्वे प्रतिषेधः ॥ ७ ॥

एङः पूर्वत्वे प्रतिषेधो वक्तव्यः । एङः पदान्तादति ङसिङसोश्च [६.१.१०९; ११०] । ङसिङसौ द्वावेङित्यस्य द्वावर्थौ । तत्र संख्यातानुदेशः प्राप्नोति ॥ अस्तु तर्हि शब्दतः । ननु चोक्तं संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां ङारौरसः प्रथमस्यायवायाव एच इत्यनिर्देश इति । नैष दोषः । स्थानेऽन्तरतमः [१.१.५०] इत्यनेन व्यवस्था भविष्यति । कुत आन्तर्यम् । एकार्थस्यैकार्थो व्यर्थस्य व्यर्थो बह्वर्थस्य बह्वर्थः । संवृतावर्णस्य संवृतावर्णो विवृतावर्णस्य विवृतावर्णः ॥

अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति ॥ ८ ॥

अतिप्रसङ्गो भवति गुणवृद्धिप्रतिषेधे क्ङिति* । गुणवृद्धी द्वे किङौ द्वौ । तत्र संख्यातानुदेशः प्राप्नोति ॥ नैष दोषः । गकारोऽप्यत्र निर्दिश्यते । तद्गकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । ककारे गकारश्चर्त्वभूतो† निर्दिश्यते । गिति किति ङितीति ॥

उदि कूले रुजिवहोः‡ ॥ ९ ॥

उदिकूले द्वे रुजिवहौ द्वौ । तत्र संख्यातानुदेशः प्राप्नोति ॥ नैष दोषः । नोदिरुपपदम् । किं तर्हि । विशेषणं रुजिवहोः । उत्पूर्वाभ्यां रुजिवहिभ्यां कूल उपपद इति ॥

तच्छीलादिषु धातुत्रिग्रहणेषु ॥ १० ॥

तच्छीलादिषु धातुत्रिग्रहणेषु दोषो भवति । विदिभिदिच्छिदेः कुरच् [३.२.१६२] । विदिभिदिच्छिदयस्त्रयस्तच्छीलादयस्त्रयः§ । तत्र संख्यातानुदेशः प्राप्नोति ॥

घञादिषु द्विग्रहणेषु ॥ ११ ॥

घञादिषु द्विग्रहणेषु दोषो भवति । निरभ्योः पूल्वोः [३.३.२८] । निरभी द्वौ पूल्वौ द्वौ । तत्र संख्यातानुदेशः प्राप्नोति ॥ नैष दोषः । इष्यते चात्र संख्यातानुदेशः । निष्पावः अभिलाव इति ॥ एवं तर्ह्यकर्तरि च कारके भावे चेति¶ द्वौ पूल्वौ च द्वौ । तत्र संख्यातानुदेशः प्राप्नोति ॥

अवे तॄस्त्रोः करणाधिकरणयोः ॥ १२ ॥

तॄस्त्रौ द्वौ करणाधिकरणे द्वे** । तत्र संख्यातानुदेशः प्राप्नोति ॥

---

* १.१.५ † ८.४.५५ ‡ ३.२.३१. § ३.२.१६४ ¶ ३.३.१६,१८.
** ३.३ ११७, ११८

कर्तृकर्मणोश्च भूकृञोः* ॥ १३ ॥

कर्तृकर्मणी द्वे भूकृञौ द्वौ । तत्र संख्यातानुदेशः प्राप्नोति ॥

अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि† ॥ १४ ॥

अनवक्लृप्त्यमर्षौ द्वौ किंवृत्ताकिंवृत्ते द्वे । तत्र संख्यातानुदेशः प्राप्नोति ॥

कृभ्वोः क्त्वाणमुलौ ॥ १५ ॥

कृभ्वौ द्वौ क्त्वाणमुलौ द्वौ‡ । तत्र संख्यातानुदेशः प्राप्नोति ॥

अधीयानविदुषोश्छन्दोब्राह्मणानि ॥ १६ ॥

छन्दोब्राह्मणानीति द्वे अधीते वेदेति च द्वौ§ । तत्र संख्यातानुदेशः प्राप्नोति ॥

रोपधेतोः पथिदूतयोः ॥ १७ ॥

रोपधेतोः प्राचाम् [४.२.१२३] तद्गच्छति पथिदूतयोः [४.३.८५] । रोपधेतौ द्वौ पथिदूतौ द्वौ । तत्र संख्यातानुदेशः प्राप्नोति ॥

तत्र भवस्तस्य व्याख्यानः क्रतुयज्ञेभ्यश्च ॥ १८ ॥

तत्रभवस्तस्य व्याख्यानौ द्वौ क्रतुयज्ञौ द्वौ¶ । तत्र संख्यातानुदेशः प्राप्नोति ॥

संघादिष्वञ्प्रभृतयः ॥ १९ ॥

संघादिष्वञ्प्रभृतयः** संख्यातानुदेशेन न सिध्यन्ति ॥ नैष दोषः । घोषग्रहणमपि तत्र कर्तव्यम् ॥

वेशोयशआदेर्भगाद्यल्खौ ॥ २० ॥

वेशोयशआदी द्वौ यल्खौ द्वौ†† । तत्र संख्यातानुदेशः प्राप्नोति ॥

ङसिङसोः ख्यत्यात्परस्य ॥ २१ ॥

ङसिङसौ द्वौ ख्यत्यौ द्वौ‡‡ । तत्र संख्यातानुदेशः प्राप्नोति ॥

न वा समानयोगवचनात् ॥ २२ ॥

न वैष दोषः । किं कारणम् । समानयोगवचनात् । समानयोगे संख्यातानुदेशं वक्ष्यामि ॥

---

* ३.३.१२७ † ३.३.१४५ ‡ ३.४.६१; ५९. § ४.२.६६; ५९.
¶ ४.३.५३, ६६, ६८. ** ४.३.१२७. †† ४.४.१३१, १३२. ‡‡ ६.१.११०; ११२.

तस्य दोषो विदो लटो वा ॥ २३ ॥

तस्यैतस्य लक्षणस्य दोषो विदो लटो वा [३.४.८३] इति संख्यातानुदेशो न प्राप्नोति ॥

ध्माधेटोः नाडीमुष्ट्योश्च ॥ २४ ॥

ध्माधेटोर्नाडीमुष्ट्योश्च* संख्यातानुदेशो न प्राप्नोति ॥

खलगोरथात् इनित्रकट्यचश्च† ॥ २५ ॥

संख्यातानुदेशो न प्राप्नोति ॥

सिन्ध्वपकराभ्यां कन् अणञौ च‡ ॥ २६ ॥

संख्यातानुदेशो न प्राप्नोति ॥

युष्मदस्मदोश्चादेशाः ॥ २७ ॥

युष्मदस्मदोश्चादेशाः§ संख्यातानुदेशेन न सिध्यन्ति ॥

तस्माद्यस्मिन्पक्षे ऽल्पीयांसो दोषास्तमास्थाय प्रतिविधेयं दोषेषु ॥ अथवैवं वक्ष्यामि । यथासंख्यमनुदेशः समानां स्वरितेन । ततो ऽधिकारः । अधिकारश्च भवति स्वरितेनेति । एवमपि स्वरितं दृष्ट्वा संदेहः स्यात् । न ज्ञायते किमयं समसंख्यार्थ आहोस्विदधिकारार्थ इति । संदेहमात्रमेतद्भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति समसंख्यार्थ इति व्याख्यास्यामः ॥

स्वरितेनाधिकारः ॥ १ । ३ । ११ ॥

किमर्थमिदमुच्यते ।

अधिकारः प्रतियोगं तस्यानिर्देशार्थः ॥ १ ॥

अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थ इति । किमिदं प्रतियोगमिति । योगं योगं प्रति प्रतियोगम् । योगे योगे तस्य ग्रहणं मा कार्यमिति ॥ किं गतमेतदियता सूत्रेण । गतमित्याह । कुतः । लोकतः । तद्यथा । लोके ऽधिकृतो ऽसौ ग्रामे ऽधिकृतो ऽसौ नगर इत्युच्यते यो यत्र व्यापारं गच्छति । शब्देन चाप्यधिकृतेन को ऽन्यो व्यापारः शक्यो ऽवगन्तुमन्यदतो योगे योग उपस्थानात् ॥

* ३.२ २९,३० † ४.२ ५०,५१. ‡ ४.३.३२;३३. § ७.२ ९२, ८.१ २०-३१.

न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके ॥ २ ॥

न वैतत्प्रयोजनमस्ति । किं कारणम् । निर्दिश्यमानाधिकृतत्वाद्यथा लोके । निर्दिश्यमानमधिकृतं गम्यते । तद्यथा । देवदत्ताय गौर्दीयतां यज्ञदत्ताय विष्णुमित्रायेति । गौरिति गम्यते । एवमिहापि पदरुजविशस्पृशो घञ् [३.३.१६] सृ स्थिरे [१७] भावे [१८] घञिति गम्यते ॥

अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा ॥ ३ ॥

अन्यनिर्देशस्तु लोके निवर्तको भवति । तद्यथा । देवदत्ताय गौर्दीयतां यज्ञदत्ताय कम्बलो विष्णुमित्राय चेति । कम्बलो गोर्निवर्तको भवति । एवमिहाप्यभिविधौ भाव इनुण् [३.३.४४] घञो निवर्तकः स्यात् । तस्मात्परिभाषा । तस्मात्परिभाषा कर्तव्या ॥

अधिकारपरिमाणाज्ञानं तु ॥ ४ ॥

अधिकारपरिमाणाज्ञानं तु भवति । न ज्ञायते कियन्तमवधिमधिकारोऽनुवर्तत इति ॥

अधिकारपरिमाणज्ञानार्थं तु

अधिकारपरिमाणज्ञानार्थमेव तर्ह्ययं योगो वक्तव्यः । अधिकारपरिमाणं ज्ञास्यामीति । कथं पुनः स्वरितेनाधिकार इत्यनेनाधिकारपरिमाणं शक्यं विज्ञातुम् । एवं वक्ष्यामि । स्वरिते नाधिकार इति । स्वरितं दृष्ट्वाधिकारो न भवतीति । केनेदानीमधिकारो भविष्यति । लौकिकोऽधिकारः ।

नाधिकार इति चेदुक्तम् ॥ ५ ॥

किमुक्तम् । अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषेति ॥ अधिकारार्थमेव तर्ह्ययं योगो वक्तव्यः । ननु चोक्तमधिकारपरिमाणाज्ञानं त्विति ।

यावतिथो ऽनुबन्धस्तावतो योगानिति वचनात्सिद्धम् ॥ ६ ॥

यावतिथो ऽनुबध्यते तावतो योगानधिकारोऽनुवर्तत इति वक्तव्यम् ॥ अथेदानीं यत्राल्पीयांसोऽलो भूयसश्च योगानधिकारोऽनुवर्तते कथं तत्र कर्तव्यम् ।

भूयसि प्राग्वचनम् ॥ ७ ॥

भूयसि प्राग्वचनं कर्तव्यम् । प्रागमुत इति वक्तव्यम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । संदेहमात्रमेतद्भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रति-

पत्तिर्न हि संदेहादलक्षणमिति प्रागमुत इति व्याख्यास्यामः ॥ यद्येवं नार्थोऽनेन । केनेदानीमधिकारो भविष्यति । लौकिको ऽधिकारः । ननु चोक्त नाधिकार इति चेदुक्तम् किमुक्तम् अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा । संदेहमात्रमेतद्भवति सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिती-णुण्घञिति संदेहे घञिति व्याख्यास्यामः ॥

न तर्हीदानीमयं योगो वक्तव्यः । वक्तव्यश्च । किं प्रयोजनम् । स्वरितेनाधिकारगतिर्यथा विज्ञायेत । अधिकं कार्यम् । अधिकः कारः ॥

अधिकारगतिः । गोस्त्रियोरुपसर्जनस्य [१.२.४८] इत्यत्र गोटाङ्ग्रहणं चोदित तत्र कर्तव्यं भवति । स्त्रीग्रहणं स्वरयिष्यते । स्वरितेनाधिकारगतिर्भवतीति स्त्रियाम् [४.१.३] इत्येवं प्रकृत्य ये प्रत्यया विहितास्तेषां ग्रहणं विज्ञास्यते । तत्र स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति ॥

अधिकं कार्यम् । अपादानमाचार्यः किं न्याय्यं मन्यते यत्र प्राप्य निवृत्तिः । तेनेहैव स्यात् ग्रामादागच्छति नगरादागच्छति । सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात् । स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति ॥ तथाधिकरणमाचार्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति । तेनेहैव स्यात् तिलेषु तैलम् दधि सर्पिरिति । गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात् । स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति । अधिकं कार्यम् ॥

अधिकः कारः । पूर्वविप्रतिषेधा न पठितव्या भवन्ति । गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धं नुमचिरतृज्वद्भावेभ्यो नुडिति* । नुमुटौ स्वरयिष्येते । तत्र स्वरितेनाधिकः कारो भवतीति नुमुटौ भविष्यतः ॥ कथं पुनरधिकः कार इत्यनेन पूर्वविप्रतिषेधाः शक्या न पठितुम् । लोकतः । तद्यथा । लोके ऽधिकमयं कारं करोतीत्युच्यते योऽश्व दुर्बलः सन्बलवद्भिः सह भारं वहति । एवमिहाप्यधिकमयं कारं करोतीत्युच्यते योऽयं पूर्वः सन्परं बाधते ॥

अधिकारगतिः ऽन्यर्थो विशेषायाधिकं कार्यम् ।
अथ यो ऽन्यो ऽधिकः कारः पूर्वविप्रतिषेधार्थः सः ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

---

* ७.१.९६*

अनुदात्तङित आत्मनेपदम् ॥१।३।१२॥

विकरणेभ्यः प्रतिषेधो वक्तव्यः । चिनुतः सुनुतः लुनीतः पुनीतः । ङित इत्यात्मनेपदं प्राप्नोति* ॥ नैष दोषः । नैवं विज्ञायते ङकार इदस्य सोऽयं ङित् ङित इति । कथं तर्हि । ङकार एवेत् ङित् ङित इति ॥ अथवोपदेश इति वर्तते† ॥ अथवोक्तमेतत्सिद्धं तु पूर्वस्य कार्यातिदेशादिति‡ ॥ सर्वथा चङ्भ्यां प्राप्नोति । एवं तर्हि धातोरिति वर्तते । क्व प्रकृतम् । भूवादयो धातवः [१.३.१] इति । तद्वै प्रथमानिर्दिष्टं पञ्चमीनिर्दिष्टेन चेहार्थः । अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि । आमन्त्रयस्वैनम् । देवदत्तमिति गम्यते । देवदत्तस्य गावो ऽश्वा हिरण्यं च । आढ्यो वैधवेयः । देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति । एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्पञ्चमीनिर्दिष्टं भविष्यति ॥

किमर्थं पुनरिदमुच्यते ।

आत्मनेपदवचनं नियमार्थम् ॥ १ ॥

नियमार्थोऽयमारम्भः । किमुच्यते नियमार्थो ऽयमिति न पुनर्विध्यर्थो ऽपि स्यात् ।

लविधानाद्विहितम् ॥ २ ॥

लविधानाद्ध्यात्मनेपदं परस्मैपदं च विहितम्§ ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । विकरणैस्तु व्यवहितत्वान्नियमो न प्राप्नोति । इदमिह सम्प्रधार्यम् । विकरणाः क्रियन्तां नियम इति किमत्र कर्तव्यम् । परत्वाद्विकरणाः¶ । नित्याः खल्वपि विकरणाः । कृतेऽपि नियमे प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति । नित्यत्वात्परत्वाच्च विकरणेषु कृतेषु विकरणैर्व्यवहितत्वान्नियमो न प्राप्नोति ॥ नैष दोषः । अनवकाशो नियमः । सावकाशः । कोऽवकाशः । य एते लुग्विकरणाः श्लुविकरणा लिङ्लिटौ च ॥ यदि पुनरियं परिभाषा विज्ञायेत । किं कृतं भवति । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । लस्य तिबादयो भवन्तीत्युपस्थितमिदं भवत्यनुदात्तङित आत्मनेपदं शेषात्कर्तरि परस्मैपदम् [१.३.७८] इति ॥ एवमपीतरेतराश्रयं भवति । केतरेतराश्रयता । अभिनिर्वृत्तानां लस्य स्थाने तिबादीनामात्मनेपदपरस्मैपदसंज्ञया भवितव्य** संज्ञया च तिबादयो भाव्यन्ते । तदितरेतराश्रयं

* १२४ † १२२ ‡ १२१* § १४७८ ¶ १२११ ** १४ ११ १००

भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते ॥ परस्मैपदेषु तावन्नेतरेतराश्रयं भवति । परस्मैपदानुक्रमणं न करिष्यते । अवश्यं कर्तव्यमनुपराभ्यां कृञः [१.३.७९] इत्येवमर्थम् । ननु चैतदप्यात्मनेपदानुक्रमण एव करिष्यते । स्वरितञितः कर्त्रभिप्राये क्रियाफले [१.३.७२] आत्मनेपदं भवति कर्तर्यनुपराभ्यां कृञो नेति ॥ आत्मनेपदेषु चापि नेतरेतराश्रयं भवति । कथम् । भाविनी संज्ञा विज्ञास्यते सूत्रशाटकवत् । तद्यथा । कश्चित्कंचित्तन्तुवायमाह । अस्य सूत्रस्य शाटकं वयेति । स पश्यति यदि शाटको न वातव्यो ऽथ वातव्यो न शाटकः शाटको वातव्यश्चेति विप्रतिषिद्धम् । भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति । एवमिहापि स लस्य स्थाने कर्तव्यो यस्याभिनिर्वृत्तस्यात्मनेपदमित्येषा संज्ञा भविष्यति ॥ अथवा पुनरस्तु नियमः । ननु चोक्तं विकरणैर्व्यवहितत्वान्नियमो न प्राप्नोतीति । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति विकरणेभ्यो नियमो बलीयानिति यदयं विकरणविधावात्मनेपदपरस्मैपदान्याश्रयति । पुषादिद्युताद्यॢदितः परस्मैपदेषु [३.१.५५] आत्मनेपदेष्वन्यतरस्याम् [५४] इति । नैतदस्ति ज्ञापकम् । अभिनिर्वृत्तानि हि लस्य स्थान आत्मनेपदानि परस्मैपदानि च । यत्तर्ह्यनुपसर्गाद्वा [१.३ ४३] इति विभाषां शास्ति ॥

किं पुनरयं प्रत्ययनियमः । अनुदात्तङित एवात्मनेपदं भवति भावकर्मणोरेवात्मनेपदं* भवतीति । आहोस्वित्प्रकृत्यर्थनियमः । अनुदात्तङित आत्मनेपदमेव भावकर्मणोरात्मनेपदमेवेति । कश्चात्र विशेषः ।

तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात् ॥ ३ ॥

तत्र प्रत्ययनियमे शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थम् । शेषात्कर्तरि परस्मैपदम् [१.३.७८] इति । किं कारणम् । परस्मैपदस्यानिवृत्तत्वात् । प्रत्यया नियताः प्रकृत्यर्थावनियतौ तत्र परस्मैपदमपि प्राप्नोति । तत्र शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थम् । शेषादेव परस्मैपदं भवति नान्यत इति ॥

क्यष आत्मनेपदवचनं तस्यान्यत्र नियमात् ॥ ४ ॥

क्यष आत्मनेपदं वक्तव्यम् । लोहितायति लोहितायते† । किं पुनः कारणं न सिध्यति । तस्यान्यत्र नियमात् । तद्ध्यन्यत्र नियम्यते ॥ उच्यते च न च प्राप्नोति तद्वचनाद्भविष्यति ॥ अस्तु तर्हि प्रकृत्यर्थनियमः ।

---

* [illegible] † [illegible]

प्रकृत्यर्थनियमे ऽन्याभावः ॥ ५ ॥

प्रकृत्यर्थनियमे ऽन्येषां प्रत्ययानामभावः । अनुदात्तङितस्तृजादयो न प्राप्नुवन्ति । नैष दोषः । अनवकाशास्तृजादय उच्यन्ते* च ते वचनाद्भविष्यन्ति । सावकाशास्तृजादयः । को ऽवकाशः । परस्मैपदिनो ऽवकाशः । तत्रापि नियमान्न प्राप्नुवन्ति ॥ तव्यदादयस्तर्हि भावकर्मणोर्नियमान्न प्राप्नुवन्ति । तव्यदादयोऽप्यनवकाशाः । ते वचनाद्भविष्यन्ति† ॥ चिण्तर्हि भावकर्मणोर्नियमान्न प्राप्नोति । चिणपि वचनाद्भविष्यति‡ ॥ घञ्तर्हि भावकर्मणोर्नियमान्न प्राप्नोति§ । तत्रापि प्रकृतं कर्मग्रहणमनुवर्तते । क्व प्रकृतम् । अण्कर्मणि च [३.३.१२] इति ॥ तद्वै तत्रोपपदविशेषणमभिधेयविशेषणेन चेहार्थः । न चान्यार्थं प्रकृतमन्यार्थं भवति । न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवति ॥ यत्तावदुच्यते नान्यार्थं प्रकृतमन्यार्थं भवतीत्यन्यार्थमपि प्रकृतमन्यार्थं भवति । तद्यथा । शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयत उपस्पृश्यते च शालयश्च भाव्यन्ते । यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवतीति भवेद्द्रव्येष्वेतदेवं स्यात् । शब्दस्तु खलु येन येनाभिसंबध्यते तस्य तस्य विशेषको भवति ॥

शेषवचनं च ॥ ६ ॥

शेषग्रहणं च कर्तव्यम् । शेषात्कर्तरि परस्मैपदम् [१.३.७८] इति । किं प्रयोजनम् । शेषनियमार्थम् । प्रकृत्यर्थौ नियतौ प्रत्यया अनियतास्ते शेषेऽपि प्राप्नुवन्ति । तत्र शेषग्रहणं कर्तव्यम् । शेषात्कर्तरि परस्मैपदमेव नान्यदिति ॥

कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थम् ॥ ७ ॥

कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थं द्वितीयं शेषग्रहणं कर्तव्यम् । शेषाच्छेष इति वक्तव्यम् । इह मा भूत् । भिद्यते कुशूलः स्वयमेवेति* ॥ कतरस्मिन्पक्षे ऽयं दोषः । प्रकृत्यर्थनियमे । प्रकृत्यर्थनियमे तावन्न दोषः । प्रकृत्यर्थौ नियतौ प्रत्यया अनियतास्तत्र नार्थः कर्तृग्रहणेन कर्तृग्रहणाच्चैष दोषः ॥ प्रत्ययनियमे तर्ह्ययं दोषः । प्रत्यया नियताः प्रकृत्यर्थावनियतौ तत्र कर्तृग्रहणं कर्तव्यं भावकर्मणोर्निवृत्त्यर्थम् । कर्तृग्रहणाच्चैष दोषः ॥ प्रकृत्यर्थनियमे शेषग्रहणं शक्यमकर्तुम् । कथम् । प्रकृत्यर्थौ नियतौ प्रत्यया अनियताः । ततो वक्ष्यामि परस्मैपदं

* ३.१.१३३. † ३.४.७० ‡ ३.१.६६ § ३.३.१८ * ३.१.८७

भवतीति । तन्नियमार्थं भविष्यति । यत्र परस्मैपदं चान्यच्च प्राप्नोति तत्र परस्मैपदमेव भवतीति ॥ तर्त्तर्हि प्रत्ययनियमे द्वितीयं शेषग्रहणं कर्तव्यम् । न कर्तव्यम् । योगविभागः करिष्यते* । अनुदात्तङित आत्मनेपदम् । ततो भावकर्मणोः । ततः कर्तरि । कर्तरि चात्मनेपदं भवति भावकर्मणोः । ततः कर्मव्यतिहारे । कर्तरीत्येव । भावकर्मणोरिति निवृत्तम् ॥ यथैव तर्हि कर्मणि कर्तरि भवत्येवं भावेऽपि कर्तरि प्राप्नोति । एति जीवन्तमानन्दः† । नास्य किंचिद्रुजतीति‡ ॥ द्वितीयो योगविभागः करिष्यते§ । अनुदात्तङित आत्मनेपदम् । ततो भावे । ततः कर्मणि । कर्मणि चात्मनेपदं भवति । ततः कर्तरि । कर्तरि चात्मनेपदं भवति । कर्मणीत्यनुवर्तते भाव इति निवृत्तम् । ततः कर्मव्यतिहारे । कर्तरीत्येव । कर्मणीति निवृत्तम् ॥ एवमपि शेषग्रहणं कर्तव्यमनुपराभ्यां कृञः [१.३.७९] इत्येवमर्थम् । इह मा भूत् । अनुक्रियते स्वयमेव । पराक्रियते स्वयमेव । ननु चैतदपि योगविभागादेव सिद्धम् । न सिध्यति । अनन्तरा या प्राप्तिः सा योगविभागेन शक्या बाधितुम् । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । परा प्राप्तिरप्रतिषिद्धा तया प्राप्नोति । ननु चेयं प्राप्तिः परां प्राप्तिं बाधते । नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥ एवं तर्हि कर्तरि कर्मव्यतिहारे [१.३.१४] इत्यत्र कर्तृग्रहणं प्रत्याख्यायते तत्प्रकृतमुत्तरत्रानुवर्तिष्यते । शेषात्कर्तरि कर्तरीति¶ । किमर्थमिदं कर्तरि कर्तरीति । कर्तैव यः कर्ता तत्र यथा स्यात् । कर्ता चान्यश्च यः कर्ता तत्र मा भूदिति । ततोऽनुपराभ्यां कृञः । कर्तरि कर्तरीत्येव ॥

कर्तरि कर्मव्यतिहारे॥ १ । ३ । १४॥

क्रियाव्यतिहार इति वक्तव्यम् । कर्मव्यतिहार इत्युच्यमान इह प्रसज्येत । देवदत्तस्य धान्यं व्यतिलुनन्तीति । इह च न स्यात् । व्यतिलुनते व्यतिपुनत इति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । क्रियां हि लोके कर्मेत्युपचरन्ति । कां क्रियां करिष्यसि । किं कर्म करिष्यसीति ॥ एवमपि कर्तव्यम् । कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति ॥ क्रियापि कृत्रिमं कर्म । न सिध्यति । कर्तुरीप्सिततमं कर्म [१.४.४९] इत्युच्यते कथं च क्रिया नाम क्रिययेप्सिततमा स्यात् । क्रियापि क्रिययेप्सिततमा भवति । कया क्रियया । संपश्यतिक्रियया प्रार्थयति-

* १.२.२४. † १.२.१८ ‡ ३.२.५४ § १.३.३१. ¶ १.२.७८.

क्रियया ऽध्यवस्यति क्रियया वा । इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्कंचिदर्थं संपश्यति संदृष्टे प्रार्थना प्रार्थिते ऽध्यवसायो ऽध्यवसाय आरम्भ आरम्भे निर्वृत्तिर्निर्वृत्तौ फलावाप्तिः । एवं क्रियापि कृत्रिमं कर्म ॥ एवमप्युभयोः कृत्रिमयोरुभयगतिः प्रसज्येत । तस्मात्क्रियाव्यतिहार इति वक्तव्यम् ॥ न वक्तव्यम् । इह कर्तरि व्यतिहार इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यत्कर्मग्रहणं करोति तस्यैतत्प्रयोजनं क्रियाव्यतिहारे यथा स्यात्कर्मव्यतिहारे मा भूदिति ॥

अथ कर्तृग्रहण किमर्थम् ।

कर्मव्यतिहारादिषु कर्तृग्रहणं भावकर्मनिवृत्त्यर्थम् ॥ १ ॥

कर्मव्यतिहारादिषु कर्तृग्रहणं क्रियते भावकर्मणोरनेनात्मनेपदं* मा भूदिति ॥

इतरथा हि तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः ॥ २ ॥

अक्रियमाणे कर्तृग्रहणे भावकर्मणोरप्यनेनात्मनेपदं प्रसज्येत । तत्र को दोषः । तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः । तत्र प्रतिषेधे† भावकर्मणोरप्यनेनात्मनेपदस्य प्रतिषेधः प्रसज्येत । व्यतिगम्यन्ते ग्रामाः । व्यतिहन्यन्ते दस्यव इति ॥

न वानन्तरस्य प्रतिषेधात् ॥ ३ ॥

न वैष दोषः । किं कारणम् । अनन्तरस्य प्रतिषेधात् । अनन्तरं यदात्मनेपदविधानं तस्य प्रतिषेधात् । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति । ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते । नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥ उत्तरार्थं तर्हि कर्तृग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते तत्रैव शेषात्कर्तरि परस्मैपदम् [१.३.७८] इति । द्वितीयं कर्तृग्रहणं कर्तव्यम् । किं प्रयोजनम् । कर्तैव यः कर्ता तत्र यथा स्यात् । कर्ता चान्यश्च यः कर्ता तत्र मा भूदिति ॥

न गतिहिंसार्थेभ्यः ॥ १ । ३ । १५ ॥

प्रतिषेधे हसादीनामुपसंख्यानम् ॥ १ ॥

प्रतिषेधे हसादीनामुपसंख्यानं कर्तव्यम् । व्यतिहसन्ति व्यतिजल्पन्ति व्यतिपठन्ति ॥

---

* १।१ । † १।१।५

हरिवह्योरप्रतिषेधः ॥ २ ॥

हरिवह्योरप्रतिषेधो भवतीति वक्तव्यम् । संप्रहरन्ते राजानः । संविवहन्ते गर्गैरिति ॥ न वहिर्गत्यर्थः । देशान्तरप्रापणक्रियो वहिः ॥

इतरेतरान्योऽन्योपपदाच्च ॥ १ । ३ । १६ ॥

परस्परोपपदाच्च ॥ १ ॥

परस्परोपपदाच्चेति वक्तव्यम् । परस्परस्य व्यतिलुनन्ति । परस्परस्य व्यतिपुनन्ति ॥

विपराभ्यां जेः ॥ १ । ३ । १९ ॥

उपसर्गग्रहणं कर्तव्यम् । इह मा भूत् । परा जयति सेनेति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यद्यपि तावदयं पराशब्दो दृष्टापचार उपसर्गश्चानुपसर्गश्चायं तु खलु विशब्दो ऽदृष्टापचार उपसर्ग एव । तस्यास्य को ऽन्यो द्वितीयः सहायो भवितुमर्हत्यन्यदत उपसर्गात् । तद्यथा । अस्य गोर्द्वितीयेनार्थ इति गौरेवोपादीयते नाश्वो न गर्दभ इति ॥

आङो दो ऽनास्यविहरणे ॥ १ । ३ । २० ॥

आङो दो ऽव्यसनक्रियस्य ॥ १ ॥

आङो दो ऽव्यसनक्रियस्येति वक्तव्यम् । इहापि यथा स्यात् । विपादिकां व्याददाति । कूलं व्याददातीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इहाङो दो ऽनास्य इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यद्विहरणग्रहणं करोति तस्यैतत्प्रयोजनमास्यविहरणसमानक्रियादपि यथा स्यात् । यथाजातीयका चास्यविहरणक्रिया तथाजातीयकाच्चापि ॥

स्वाङ्गकर्मकाच्च ॥ २ ॥

स्वाङ्गकर्मकाच्चेति वक्तव्यम् । इह मा भूत् । व्याददते पिपीलिकाः पतङ्गमुखमिति ॥

क्रीडोऽनुसंपरिभ्यश्च ॥ १ । ३ । २१ ॥

उपसर्गग्रहणं कर्तव्यम् । इह मा भूत् । अनु*क्रीडति माणवकमिति ॥

समोऽकूजने ॥ १ ॥

समोऽकूजन इति वक्तव्यम् । इह मा भूत् । संक्रीडन्ति शकटानि ॥

आगमेः क्षमायाम् ॥ २ ॥

आगमेः क्षमायामुपसंख्यानं कर्तव्यम् । आगमयस्व तावन्माणवक ॥

शिक्षेर्जिज्ञासायाम् ॥ ३ ॥

शिक्षेर्जिज्ञासायामुपसंख्यानं कर्तव्यम् । विद्यासु शिक्षते । धनुषि शिक्षते ॥

किरतेर्हर्षजीविकाकुलायकरणेषु ॥ ४ ॥

किरतेर्हर्षजीविकाकुलायकरणेषूपसंख्यानं कर्तव्यम् । अपस्किरते वृषभो हृष्टः । अपस्किरते कुक्कुटो भक्षार्थी । अपस्किरते श्वाश्रयार्थी ॥

हरतेर्गतताच्छील्ये ॥ ५ ॥

हरतेर्गतताच्छील्य उपसंख्यानं कर्तव्यम् । पैतृकमश्वा अनुहरन्ते । मातृकं गावोऽनुहरन्ते ॥

आङि नुप्रच्छयोः ॥ ६ ॥

आङि नुप्रच्छयोरुपसंख्यानं कर्तव्यम् । आनुते शृगालः । आपृच्छते गुरुमिति ॥

आशिषि नाथः ॥ ७ ॥

आशिषि नाथ उपसंख्यानं कर्तव्यम् । सर्पिषो नाथते । मधुनो नाथते ॥

शप उपलम्भने ॥ ८ ॥

शप उपलम्भन उपसंख्यानं कर्तव्यम् । देवदत्ताय शपते । यज्ञदत्ताय शपते ॥

समवप्रविभ्यः स्थः ॥ १ । ३ । २२ ॥

आङः स्थः प्रतिज्ञाने ॥ १ ॥

आङः स्थः प्रतिज्ञान इति वक्तव्यम् । अस्ति सकारमातिष्ठते । आगमौ गुणवृद्धी आतिष्ठते । विकारौ गुणवृद्धी आतिष्ठते ॥

---

* १ ४ ८९

उदोऽनूर्ध्वकर्मणि ॥ १ । ३ । २४ ॥

उद ईहायाम् ॥ १ ॥

उद ईहायामिति वक्तव्यम् । इह मा भूत् । उत्तिष्ठति सेनेति ॥

उपान्मन्त्रकरणे ॥ १ । ३ । २५ ॥

उपाद्देवपूजासंगतकरणयोः ॥ १ ॥

उपाद्देवपूजासंगतकरणयोरिति वक्तव्यम् । आदित्यमुपतिष्ठते । चन्द्रमसमुपतिष्ठते ॥ संगतकरणे । रथिकानुपतिष्ठते । अश्वारोहानुपतिष्ठते ॥

बहूनामप्यचित्तानामेको भवति चित्तवान् ।
पश्य वानरसैन्ये ऽस्मिन्यदर्कमुपतिष्ठते ॥
मैवं मंस्थाः सचित्तो ऽयमेषोऽपि हि यथा वयम् ।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति ॥

अपर आह । उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यम् । संगतकरण उदाहृतम् ॥ मित्रकरणे । रथिकानुपतिष्ठते । अश्वारोहानुपतिष्ठते ॥ पथि । अयं पन्थाः स्रुघ्नमुपतिष्ठते । अयं पन्थाः साकेतमुपतिष्ठते ॥

वा लिप्सायाम् ॥ २ ॥

वा लिप्सायामिति वक्तव्यम् । भिक्षुको ब्राह्मणकुलमुपतिष्ठते । भिक्षुको ब्राह्मणकुलमुपतिष्ठतीति वा ॥

उद्विभ्यां तपः ॥ १ । ३ । २७ ॥

अकर्मकादित्येव* । उत्तपति सुवर्णं सुवर्णकारः ॥

स्वाङ्गकर्मकाच्च ॥ १ ॥

स्वाङ्गकर्मकाच्चेति वक्तव्यम् । उत्तपते पाणी । वितपते पाणी । उत्तपते पृष्ठम् । वितपते पृष्ठम् ॥

अथेहोद्विभ्यामित्यत्र किं प्रत्युदाह्रियते । निष्टपति इति । किं पुनः कारणमात्म-

* १.३.२६

नेपदमेवोदाह्रियते न परस्मैपदं प्रत्युदाहार्यं स्यात् । तदिरयमकर्मकः । अकर्मकाश्चापि सोपसर्गाः सकर्मका भवन्ति । न चान्तरेण कर्मकर्तारं सकर्मका अकर्मका भवन्ति । यदुच्यते न चान्तरेण कर्मकर्तारं सकर्मका अकर्मका भवन्तीत्यन्तरेणापि कर्मकर्तारं सकर्मका अकर्मका भवन्ति । तद्यथा । नदी वहतीत्यकर्मकः । भार वहतीति सकर्मकः । तस्मान्निद्रपतीति प्रत्युदाहार्यम् ॥

आङो यमहनः ॥ १ । ३ । २८ ॥

अकर्मकादित्येव* । आयच्छति रज्जुं कूपात् । आहन्ति वृषलं पादेन ॥

स्वाङ्गकर्मकाच्च ॥ १ ॥

स्वाङ्गकर्मकाच्चेति वक्तव्यम् । आयच्छते पाणी । आहत उदरमिति ॥

समो गम्यृच्छिभ्याम् ॥ १ । ३ । २९ ॥

समो गमादिषु विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम् ॥ १ ॥

समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानं कर्तव्यम् । संविते । सपृच्छते । सस्वरते ॥

अर्तिश्रुदृशिभ्यश्च ॥ २ ॥

अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् । मा समृत । मा समृषाताम् । मा समृषत । अर्ति ॥ श्रु । संशृणुते ॥ दृशि । सपश्यते ॥

उपसर्गादस्यत्यूह्योर्वावचनम् ॥ ३ ॥

उपसर्गादस्यत्यूह्योर्वेति वक्तव्यम् । निरस्यति निरस्यते । समूहति समूहते ॥

आङ उद्गमने ॥ १ । ३ । ४० ॥

ज्योतिषामुद्गमने ॥ १ ॥

ज्योतिरुद्गमन इति वक्तव्यम् । इह मा भूत् । आक्रामति धूमो हर्म्यतलमिति ॥

---

* १.३.३५

व्यक्तवाचां समुच्चारणे ॥ १ । ३ । ४८ ॥

व्यक्तवाचामिति किमर्थम् ।

वरतनु संप्रवदन्ति कुक्कुटाः ।

व्यक्तवाचामित्युच्यमानेऽत्र प्राप्नोति । एतेऽपि हि व्यक्तवाचः । आतश्च व्यक्तवाचः कुक्कुटेनोदित उच्यते कुक्कुटो वदतीति ॥ एवं तर्हि व्यक्तवाचामित्युच्यते सर्व एव हि व्यक्तवाचस्तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो ये व्यक्तवाच इति । के च साधीयः । येषां वाच्यकारादयो वर्णा व्यज्यन्ते । न चैतेषां वाच्यकारादयो वर्णा व्यज्यन्ते । एतेषामपि वाच्यकारादयो वर्णा व्यज्यन्ते । आतश्च व्यज्यन्त एवं ह्याहुः कुक्कुटाः कुक्कुडिति । नैवं त आहुः । अनुकरणमेतत्तेषाम् ॥ अथवा नैवं विज्ञायते व्यक्ता वाग्येषां त इमे व्यक्तवाच इति । कथं तर्हि । व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाच इति ॥

अवाद्ग्रः ॥ १ । ३ । ५१ ॥

अवाद्ग्रो गिरतेः ॥ १ ॥

अवाद्ग्र इत्यत्र गिरतेरिति वक्तव्यम् । गृणातेर्मा भूत् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यं प्रयोगाभावात् । अवाद्ग्र इत्युच्यते न चावपूर्वस्य गृणातेः प्रयोगोऽस्ति ॥

समस्तृतीयायुक्तात् ॥ १ । ३ । ५४ ॥

तृतीयायुक्तादिति किमर्थम् ।

उभौ लोकौ संचरसि इमं चामुं च देवल ।

तृतीयायुक्तादित्युच्यमानेऽत्र प्राप्नोति । अत्रापि हि तृतीयया योगः ॥ एवं तर्हि तृतीयायुक्तादित्युच्यते सर्वत्र च तृतीयया योगस्तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो यत्र तृतीयया योग इति । क्व च साधीयः । यत्र तृतीयया योगः श्रूयते ॥

दाणश्च सा चेच्चतुर्थ्यर्थे ॥ १ । ३ । ५५ ॥

सा चेत्तृतीया चतुर्थ्यर्थ इत्युच्यते । कथं नाम तृतीया चतुर्थ्यर्थे स्यात् । एवं तर्ह्यशिष्टव्यवहारेऽनेन तृतीया च विधीयत आत्मनेपदं च । दास्या संप्रयच्छते । वृषल्या संप्रयच्छते । यो हि शिष्टव्यवहारो ब्राह्मणीभ्यः संप्रयच्छतीत्येव तत्र भवितव्यम् । यद्येवं नार्थोऽनेन योगेन । केनेदानीं तृतीया भविष्यत्यात्मनेपदं च ।

सहयुक्ते तृतीया स्याद्व्यतिहारे तङो विधिः ।

सहयुक्तेऽप्रधाने [२. ३. १९] इत्येव तृतीया भविष्यति कर्तरि कर्मव्यतिहारे [१. ३. १४] इत्यात्मनेपदम् ॥

उपाद्यमः स्वकरणे ॥ १ । ३ । ५६ ॥

इह कस्मान्न भवति । स्वं शाटकान्तमुपयच्छतीति । अस्वं यदा स्वं करोति तदा भवितव्यम् । यद्येवं स्वीकरण इति प्राप्नोति* । विचित्रास्तद्धितवृत्तयः । नात-स्तद्धित उत्पद्यते ॥

नानोर्ज्ञः ॥ १ । ३ । ५८ ॥

अनोर्ज्ञः प्रतिषेधे सकर्मकवचनम् ॥ १ ॥

अनोर्ज्ञः प्रतिषेधे सकर्मकग्रहणं कर्तव्यम् । इह मा भूत् । औषधस्यानुजिज्ञासत इति ॥

न वाकर्मकस्योत्तरेण विधानात् ॥ २ ॥

न वा कर्तव्यम् । किं कारणम् । अकर्मकस्योत्तरेण विधानात् । अकर्मकाज्ज्ञानादित्युत्तरेण योगेनात्मनेपदं विधीयते पूर्ववत्सनः [१. ३. ६२] इति† ॥

प्रतिषेधः पूर्वस्य च ॥ ३ ॥

पूर्वस्य चायं प्रतिषेधः । स च सकर्मकार्थ आरम्भः । कथं पुनर्ज्ञायते पूर्वस्यायं प्रतिषेध इति । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । कथं पुनर्ज्ञायते

सकर्मकार्थ आरम्भ इति । अकर्मकाज्ज्ञातेः सन आत्मनेपदवचने प्रयोजनं नास्तीति कृत्वा सकर्मकार्थो विज्ञायते ॥

शदेः शितः ॥ १ । ३ । ६० ॥

शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः ॥ १ ॥

शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदस्याभावः । शीयते शीयेते शीयन्ते ॥ किं च भोः शदेः शित्परस्मैपदेष्विष्युच्यते । न खलु परस्मैपदेष्विष्युच्यते परस्मैपदेषु तु विज्ञायते । कथम् । अनुदात्तङित आत्मनेपदं भावकर्मणोरात्मनेपदमित्येतौ* द्वौ योगावुक्त्वा शेषात्कर्तरि परस्मैपदमुच्यते† । एवं न च परस्मैपदेषूच्यते परस्मैपदेषु च विज्ञायते ॥ कः पुनरर्हत्येतौ योगावुक्त्वा शेषात्कर्तरि परस्मैपदं वक्तुम् । किं तर्हि । अविशेषेण सर्वमात्मनेपदप्रकरणमनुक्रम्य शेषात्कर्तरि परस्मैपदमित्युच्यते । एवमपि परस्मैपदाश्रयो भवति । कथम् । इदं तावदयं प्रष्टव्यः । यदीदं नोच्येत किमिह स्यादिति । परस्मैपदमित्याह । परस्मैपदमिति चेत्परस्मैपदाश्रयो भवति ॥

सिद्धं तु लडादीनामात्मनेपदवचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । शदेर्लडादीनामात्मनेपदं भवतीति वक्तव्यम् ॥ सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभाव इति । नैष दोषः । शित इति नैषा पञ्चमी । का तर्हि । सम्बन्धषष्ठी । शितो यः शदिः । कथं शितः शदिः । प्रकृतिः । शदेः शित्प्रकृतेरिति ॥ अथवाहायं शदेः शित इति न च शदिः शिदस्ति त एव विज्ञास्यामः शदेः शिद्विषयादिति ॥ अथवा यद्यपि तावदेतदन्यत्र भवति विकरणेभ्यो नियमो बलीयानितीहैतन्नास्ति । विकरणो ह्याश्रीयते शित इति ॥

उपसर्गपूर्वनियमे ऽड्व्यवाय उपसंख्यानम् ॥ ३ ॥

उपसर्गपूर्वस्य नियमे ऽड्व्यवाय उपसंख्यानं कर्तव्यम् । न्यविशत व्यक्रीणीत‡ । किं पुनः कारणं न सिध्यति । अटा व्यवहितत्वात् । ननु चायमड् धातुभक्तो धातुग्रहणेन ग्रहीष्यते । न सिध्यति । अङ्गस्य ह्यडुच्यते§ विकरणान्तं चाङ्गम् ।

* १।३।१२,१३. † १।३।७८ ‡ १।३।१७,१८ § ६।४।७२

सो ऽसौ संघातभक्तो न शक्यो धातुग्रहणेन ग्रहीतुम् ॥ एवं तर्हीदमिह संप्रधार्यम् । अट्क्रियतां विकरण इति किमत्र कर्तव्यम् । परत्वादडागमः । नित्या विकरणाः[*] । कृतेऽप्यटि प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति । अडपि नित्यः । कृतेष्वपि विकरणेषु प्राप्नोत्यकृतेष्वपि प्राप्नोति । अनित्योऽट् । अन्यस्य कृतेषु विकरणेषु प्राप्नोत्यन्यस्याकृतेषु शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति ॥ एवं तर्हीदमिह संप्रधार्यम् । अट्क्रियतां लादेश इति किमत्र कर्तव्यम् । परत्वादडागम । नित्यो लादेशः[†] । कृतेऽप्यटि प्राप्नोत्यकृतेऽपि प्राप्नोति । नित्यत्वाल्लादेशस्यात्मनेपद एवाडागमो भविष्यति ।

नित्यत्वाल्लादेशस्यात्मनेपदे ऽडागम इति चेदटोऽपि नित्यनिमित्तत्वादात्मनेपदाभावः ॥ ४ ॥

नित्यत्वाल्लादेशस्यात्मनेपद एवाडागम इति चेदेवमुच्यते । अडपि नित्यनिमित्तः । कृते ऽपि लादेशे प्राप्नोत्यकृते ऽपि प्राप्नोति । अटो नित्यनिमित्तत्वादात्मनेपदस्याभावः ।

तस्मादुपसंख्यानम् ॥ ५ ॥

तस्मादुपसंख्यानं कर्तव्यम् ॥ न कर्तव्यम् । अन्तरङ्गस्तर्हि लादेशः । नैतद्विवदामहे ऽन्तरङ्गो नान्तरङ्ग इति । अस्त्वयं नित्यश्चान्तरङ्गश्च । अत्र खलु लादेशे कृते त्रीणि कार्याणि युगपत्प्राप्नुवन्ति विकरणा अडागमो नियम[‡] इति । तद्यदि सर्वतो नियमो लभ्येत कृतं स्यात् । तत्तु न लभ्यम् । अथापि विकरणादडित्यङ् लभ्येतैवमपि कृतं स्यात् । तत्तु न लभ्यम् । किं कारणम् । आङ्गात्पूर्वं विकरणा एषितव्यास्तरतः तरन्तीत्येवमर्थम्[§] । अडाड्भ्यामप्यन्यदाङ्गं पूर्वमेषितव्यमुपाच्छेदित्येवमर्थम् । तत्र ह्याटि कृते साङ्गस्य ऋच्छिभावः[¶] प्राप्नोति । ननु च ऋच्छिभावे कृते शब्दान्तरस्याकृत आडिति कृत्वा पुनराड् भविष्यति । पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्राप्नोति ॥ नैष दोषः । यत्तावदुच्यत आङ्गात्पूर्वं विकरणा एषितव्यास्तरतः तरन्तीत्येवमर्थमिति । भवेत्सिद्धं यत्र विकरणा नित्या आङ्गमनित्यं तत्राङ्गात्पूर्वं विकरणाः स्युः । यत्र तु खलूभयं नित्यं परत्वात्तत्राङ्गं तावद्भवति ॥ यदप्युच्यते ऽडाड्भ्यामप्यन्यदाङ्गं पूर्वमेषितव्यमुपाच्छेदित्येवमर्थमिति । अस्त्वत्राट् । आटि कृते साङ्गस्य ऋच्छिभाव ऋच्छिभावे कृते शब्दान्तरस्याकृत आडिति कृत्वा

---

* ११.७७.८२ † १.१.७८ ११ २०,२८ ‡ १.१ २०,१८ § ७१ १०० ¶ ७१.७८

पुनराड् भविष्यति । ननु चोक्तं पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्राप्नोतीति । नैष दोषः । चक्रकेऽप्यिष्टतो व्यवस्था ॥ अथवा नेरिति* नैषा पञ्चमी । का तर्हि । विशेषणषष्ठी । नेर्यो विशिः । कश्च नेर्विशिः । विशेष्यः । व्यवहितश्चापि शक्यते विशेषयितुम् ॥ अथवा निरपि पदं विशिरपि पदम् । पदविधिश्च समर्थानाम् । व्यवहितेऽपि सामर्थ्यं भवति ॥

पूर्ववत्सनः ॥ १ । ३ । ६२ ॥

किमिदं पूर्वग्रहणं सनपेक्षम् । प्राक्सनो येभ्य आत्मनेपदमुक्तं तेभ्यः सनन्तेभ्योऽपि भवतीति । आहोस्विद्योगापेक्षम् । प्रागेतस्माद्योगाद्येभ्य आत्मनेपदमुक्तं तेभ्यः सनन्तेभ्य आत्मनेपदं भवतीति । किं चातः । यदि सनपेक्षं निमित्तमविशेषितं भवति । पूर्ववत्सनो न ज्ञायते किमन्ताद्भवितव्यमिति । अथ योगापेक्षमुत्तरत्र विधिर्न प्रकल्पेत । बुभुक्षते उपयुयुक्षत इति† ॥ यथेच्छसि तथास्तु । अस्तु तावत्सनपेक्षम् । ननु चोक्तं निमित्तमविशेषितं भवतीति । निमित्तं च विशेषितम् । कथम् । सनमेवात्र निमित्तत्वेनापेक्षिष्यामहे । पूर्ववत्सन आत्मनेपदं भवति । कुतः । सन इति ॥ अथवा पुनरस्तु योगापेक्षम् । ननु चोक्तमुत्तरत्र विधिर्न प्रकल्पेतेति । विधिश्च प्रकॢप्तः । कथम् । उत्तरत्रापि पूर्ववत्सन इत्येवानुवर्तिष्यते ॥

किमर्थं पुनरिदमुच्यते ।

पूर्ववत्सन इति शदिम्रियत्यर्थम् ॥ १ ॥

शदिम्रियत्यर्थोऽयमारम्भः‡ । शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदं मा भूदिति ॥

इतरथा हि ताभ्यां सनन्ताभ्यामात्मनेपदप्रतिषेधः ॥ २ ॥

इतरथा ह्यनुच्यमानेऽस्मिञ्शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदस्य प्रतिषेधो वक्तव्यः स्यात् । शिशत्सति मुमूर्षति ॥ कथं पुनः पूर्ववत्सन इत्यनेन शदिम्रियतिभ्यामात्मनेपदस्य प्रतिषेधः शक्यो विज्ञातुम् । वतिनिर्देशोऽयं कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा । उशीनरवन्मद्रेषु यवाः । सन्ति न सन्तीति । मातृवदस्याः कलाः । सन्ति न सन्तीति । एवमिहापि पूर्ववद्भवति न भवतीति । न भवतीत्येवं वाक्यशेषं समर्थयिष्यामहे । यथा पूर्वयोर्योगयोः§ सनन्ताभ्यामात्म-

* १.३.१७. † १.३.६६,६४. ‡ १.३.६०,६१. § १.३.५८,५९.

नेपदं न भवत्येवमिहापि शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदं न भवतीति ॥ यदि तर्हि शदिम्रियत्यर्थोऽयमारम्भो विधिर्न प्रकल्पते । आसिसिषते शिशयिषते । अथ विध्यर्थः शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदं प्राप्नोति ॥ यथेच्छसि तथास्तु । अस्तु तावत्प्रतिषेधार्थः । ननु चोक्तं विधिर्न प्रकल्पत इति । विधिश्च प्रक्लृप्तः । कथम् । एतदेव ज्ञापयति सनन्तादात्मनेपदं भवतीति यदयं शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदस्य प्रतिषेधं शास्ति ॥ अथवा पुनरस्तु विध्यर्थः । ननु चोक्तं शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदं प्राप्नोतीति । नैष दोषः । प्रकृतं सनो नेत्यनुवर्तिष्यते । क्व प्रकृतम् । ज्ञाश्रुस्मृदृशां सनः [१.३.५७] । नानोर्ज्ञः [५८] । सकर्मकात्सनो न । प्रत्याङ्भ्यां श्रुवः [५९] सनो न । शदेः शितः [६०] सनो न । म्रियतेर्लुङ्लिङोश्च [६१] सनो नेति । इहेदानीं पूर्ववत्सन इति सन इत्यनुवर्तते नेति निवृत्तम् । एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं निमित्तमविशेषितं भवतीति ॥ नैव वा पुनरत्र शदिम्रियतिभ्यां सनन्ताभ्यामात्मनेपदं प्राप्नोति । किं कारणम् । शदेः शित इत्युच्यते न च शदिरेवात्मनेपदस्य निमित्तम् । किं तर्हि । शिदपि निमित्तम् । अथापि शदिरेव शित्परस्तु निमित्तम् । न चायं सन्परः शित्परो भवति । यत्र तर्हि शिन्नाश्रीयते म्रियतेर्लुङ्लिङोश्चेति । अत्रापि न म्रियतिरेवात्मनेपदस्य निमित्तम् । किं तर्हि । लुङ्लिङावपि निमित्तम् । अथापि म्रियतिरेव लुङ्लिङ्परस्तु निमित्तम् । न चायं सन्परः लुङ्लिङ्परो भवति ॥

किं पुनः पूर्वस्य यदात्मनेपददर्शनं तत्सनन्तस्याप्यतिदिश्यते । एवं भवितुमर्हति ।

पूर्वस्यात्मनेपददर्शनात्सनन्तादात्मनेपदभाव इति चेद्गुपादिष्वप्रसिद्धिः ॥ ३ ॥

पूर्वस्यात्मनेपददर्शनात्सनन्तादात्मनेपदं भवतीति चेद्गुपादिष्वप्रसिद्धिः । गुपादीनां न प्राप्नोति । जुगुप्सते मीमांसते इति* । न होतेभ्यः प्राक्सन आत्मनेपदं नापि परस्मैपदं पश्यामः ॥

सिद्धं तु पूर्वस्य लिङ्गातिदेशात् ॥ ४ ॥

सिद्धमेतत् । कथम् । पूर्वस्य यदात्मनेपदलिङ्गं तत्सनन्तस्याप्यतिदिश्यते ॥

ऋजादिषु तु लिङ्गप्रतिषेधः ॥ ५ ॥

ऋजादिषु तु लिङ्गस्य प्रतिषेधो वक्तव्यः । अनुचिकीर्षति पराचिकीर्षतीति† ॥ अस्तु तर्हि प्राक्सनो येभ्य आत्मनेपदं दृष्टं तेभ्यः सनन्तेभ्योऽपि भवतीति । ननु

---

* ३.१.५ † १.३.७२, ७९

चोक्तं पूर्वस्यात्मनेपददर्शनात्सनन्तादात्मनेपदभाव इति चेद्गुपादिष्वप्रसिद्धिरिति । नैष दोषः । अनुबन्धकरणसामर्थ्याद्भविष्यति ॥ अथवावयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति । तद्यथा । गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति ॥ यद्यवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति जुगुप्सयति मीमांसयतीत्यत्रापि प्राप्नोति । नैष दोषः । अवयवे कृतं लिङ्गं कस्य समुदायस्य [*] विशेषकं भवति । यं समुदायं यो ऽवयवो न व्यभिचरति । सनं च न व्यभिचरति णिचं पुनर्व्यभिचरति । तद्यथा । गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य ॥

प्रत्ययग्रहणं णियगर्थम् ॥ ६ ॥

प्रत्ययस्य ग्रहणं कर्तव्यम् । पूर्ववत्प्रत्ययादिति वक्तव्यम् । किं प्रयोजनम् । णियगर्थम् । णियगन्तादपि यथा स्यादिति । आकुस्मयते विकुस्मयते । हृणीयते महीयत इति[*] ॥ तत्र को दोषः ।

तत्र हेतुमण्णिचः प्रतिषेधः ॥ ७ ॥

तत्र हेतुमण्णिचः प्रतिषेधो वक्तव्यः[†] । आसयति शाययतीति । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । कथमाकुस्मयते विकुस्मयते हृणीयते महीयत इति । अनुबन्धकरणसामर्थ्याद्भविष्यति ॥ *अथवावयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति ।* तद्यथा । गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति ॥ यद्यवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति हृणीययति महीययति अत्रापि प्राप्नोति । अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति । यं समुदायं यो ऽवयवो न व्यभिचरति । यकं च न व्यभिचरति णिचं तु व्यभिचरति । तद्यथा । गोः सक्थनि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य ॥

आम्प्रत्ययवत्कृञो ऽनुप्रयोगस्य ॥ १ । ३ । ६३ ॥

कृञ्ग्रहणं किमर्थम् । इह मा भूत् । ईहामास ईहामासतुः ईहामासुः । कथं चात्रास्तेरनुप्रयोगो भवति । प्रत्याहारग्रहणं तत्र[‡] विज्ञायते । कथं पुनर्ज्ञायते तत्र प्रत्याहारग्रहणमिति । इह कृञ्ग्रहणात् । इह कस्मात्प्रत्याहारग्रहणं न भवति ।

* ३.१.२५;२९. † ३.१.२६ ‡ ३.१.४०.

इहैव कृञ्ग्रहणात् ॥ अथेह कस्मान्न भवति । उदुम्भांचकार उदुब्जाचकार । ननु चाम्प्रत्ययवदित्युच्यते न चात्राम्प्रत्ययादात्मनेपदं पश्यामः । न ब्रूमोऽनेनेति । किं तर्हि । स्वरितञितः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवतीति* ॥ नैष दोषः । इदं नियमार्थं भविष्यति । आम्प्रत्ययवदेवेति ॥ यदि नियमार्थं विधिर्न प्रकल्पते । ईहांचक्रे ऊहांचक्रे इति । विधिश्च प्रक्लृप्तः । कथम् । पूर्ववदिति वर्तते† । आम्प्रत्ययवत्पूर्ववच्चेति ॥

प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ १ । ३ । ६४ ॥

स्वराद्युपसृष्टादिति वक्तव्यम् । उद्युङ्क्ते अनुयुङ्क्ते ॥
अपर आह । स्वराद्यन्तोपसृष्टादिति वक्तव्यम् । प्रयुङ्क्ते नियुङ्क्ते विनियुङ्क्ते ॥

समः क्ष्णुवः ॥ १ । ३ । ६५ ॥

किमर्थं विदेशस्थस्य ग्रहणं क्रियते न समो गमादिष्वेवोच्येत‡ ।

समः क्ष्णुवः सकर्मकार्थम् ॥ १ ॥

सकर्मकार्थोऽयमारम्भः । अकर्मकादिति हि तत्रानुवर्तते ॥

भुजोऽनवने ॥ १ । ३ । ६६ ॥

अनवनकौटिल्ययोरिति वक्तव्यम् । इहापि यथा स्यात् । प्रभुजति वाससी । निभुजति जानुशिरसी इति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यस्य भुजेरवनमनवनं चार्थस्तस्य ग्रहणं न चास्य भुजेरवनमनवनं चार्थः ॥

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने ॥ १ । ३ । ६७ ॥

णेरात्मनेपदविधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धिः ॥ १ ॥

णेरात्मनेपदविधानेऽण्यन्तस्य यत्कर्म यदा ण्यन्ते तदेव कर्म भवति तदात्मनेपदं भवतीति वक्तव्यम् ॥

---

* १ ३ ७२   † १ ३ ६२   ‡ १ ३ २९

इतरथा हि सर्वप्रसङ्गः ॥ २ ॥

इतरथा हि सर्वत्र प्रसङ्गः स्यात् । इहापि प्रसज्येत । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान् ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । कस्मान्न भवति आरोहन्ति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानिति । एवं वक्ष्यामि । णेरात्मनेपदं भवति । ततो ऽणौ यत्कर्म णौ चेत् । अण्यन्ते यत्कर्म णौ चेण्णौ यदि तदेव कर्म भवति । ततः स कर्ता । कर्ता चेत्स भवति णाविति ॥ यद्येवं कर्मकर्तायं भवति तत्र कर्मकर्तृत्वात्सिद्धम्* ।

कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं वचनम् ॥ ३ ॥

कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थमिदं वक्तव्यम् । कर्मापदिष्टौ यक्चिणौ† मा भूतामिति ॥

न वा यक्चिणोः प्रतिषेधात् ॥ ४ ॥

न वैष दोषः । किं कारणम् । यक्चिणोः प्रतिषेधात् । प्रतिषिध्येते अत्र यक्चिणौ । यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानमिति‡ ॥ यस्तर्हि न हेतुमण्णिच्तदर्थमिदं वक्तव्यम् । तस्य कर्मापदिष्टौ यक्चिणौ मा भूतामिति । उत्पुच्छयते पुच्छं स्वयमेव । उदपुपुच्छत पुच्छं स्वयमेव । अत्रापि यथा भारद्वाजीयाः पठन्ति तथा भवितव्यं प्रतिषेधेन । यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानमिति‡ ॥ स चावश्यं प्रतिषेध आश्रयितव्यः ।

इतरथा हि यत्र नियमस्ततो ऽन्यत्र प्रतिषेधः ॥ ५ ॥

अनुच्यमाने ह्येतस्मिन्यत्र नियमस्ततो ऽन्यत्र तेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात् । गणयति गणं गोपालकः । गणयति गणः स्वयमेव ॥

आत्मनेपदस्य च ॥ ६ ॥

आत्मनेपदस्य च प्रतिषेधो वक्तव्यः । गणयति गणः स्वयमेव ॥

आत्मनेपदप्रतिषेधार्थं तु ॥ ७ ॥

आत्मनेपदप्रतिषेधार्थमिदं वक्तव्यम् । गणयति गणः स्वयमेव ॥ इष्यत एवात्मनेपदम् । किमिष्यत एवाहोस्वित्प्राप्नोत्यपि । इष्यते च प्राप्नोति न । कथम् ।

* ३.१.८७, १.३.१३ † ३.१.६७, ६२ ‡ ३.१.८९

अणाविति कस्येदं णेर्ग्रहणम् । यस्माण्णेः प्राक्कर्म कर्ता वा विद्यते न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते ॥ इदं तर्हि प्रयोजनमनाध्यान इति वक्ष्यामीति । इह मा भूत् । स्मरति वनगुल्मस्य कोकिलः । स्मरयत्येनं वनगुल्मः स्वयमेवेति ॥ एतदपि नास्ति प्रयोजनम् । कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति कर्तृस्थभावकश्चायम् ॥ एवं तर्हि सिद्धे सति यदनाध्यान इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येवंजातीयकानामात्मनेपदमिति । किमेतस्य ज्ञापने प्रयोजनम् । पश्यन्ति भृत्या राजानम् । दर्शयते भृत्यान्राजा । दर्शयते भृत्यै राजा । अत्रात्मनेपदं सिद्धं भवति ॥

आत्मनः कर्मत्वे प्रतिषेधः ॥ ८ ॥

आत्मनः कर्मत्वे प्रतिषेधो वक्तव्यः । हन्त्यात्मानम् । घातयत्यात्मेति ॥ स तर्हि वक्तव्यः ।

न वा ण्यन्ते ऽन्यस्य कर्तृत्वात् ॥ ९ ॥

न वा वक्तव्यः । किं कारणम् । ण्यन्ते ऽन्यस्य कर्तृत्वात् । अन्यदत्राण्यन्ते कर्मान्यो ण्यन्तस्य कर्ता । कथम् । द्वावात्मानावन्तरात्मा शरीरात्मा च । अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति । शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवतीति ॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ १ । ३ । ७२ ॥

स्वरितञित इति किमर्थम् । याति वाति द्राति प्साति । स्वरितञित इति शक्यमकर्तुम् । कस्मान्न भवति याति वाति द्राति प्सातीति । कर्त्रभिप्राये क्रियाफले इत्युच्यते सर्वेषां न कर्त्रभिप्रायं क्रियाफलमस्ति । त एवं विज्ञास्यामः । येषां कर्त्रभिप्रायमकर्त्रभिप्रायं न क्रियाफलमस्ति तेभ्य आत्मनेपदं भवतीति । न नैतेषां कर्त्रभिप्रायमकर्त्रभिप्रायं न क्रियाफलमस्ति । तथाजातीयकाः खल्वाचार्येण स्वरितञितः पठिता य उभयवन्तो येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं न क्रियाफलमस्ति ॥ अथाभिप्रायग्रहणं किमर्थम् । स्वरितञितः कर्त्राये क्रियाफल इतीयत्युच्यमाने यमेव संप्रत्येति क्रियाफलं तदेव स्यात् । लुञ् लुनीते । पुञ् पुनीते । इह न स्यात् । यज् यजते । पच् पचते । अभिप्रायग्रहणे पुनः क्रियमाणे न दोषो भवति । अभिप्रा-

भिमुख्ये वर्तते म आदिकर्मणि । तेन य चाभिप्रैति य चाभिप्रैष्यति य चाभिप्रागात्तत्र सर्वत्राभिमुख्यमात्रे सिद्ध भवति ॥ कर्त्रभिप्राये क्रियाफल इति किमर्थम् । पचन्ति भक्तकारा· । कुर्वन्ति कर्मकराः । यजन्ति याजकाः । कर्त्रभिप्राये क्रियाफल इत्युच्यमाने ऽप्यत्र प्राप्नोति । अत्रापि हि क्रियाफल कर्तारमभिप्रैति । याजका यजन्ति गा लप्स्यामह इति । कर्मकरा· कुर्वन्ति पादिकमहर्लप्स्यामह इति । एव तर्हि कर्त्रभिप्राये क्रियाफल इत्युच्यते सर्वत्र च कर्तार क्रियाफलमभिप्रैति तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो यत्र कर्तार क्रियाफलमभिप्रैति । न चान्तरेण यजिं यजिफल वपिं वा वपिफल लभन्ते । याजकाः पुनरन्तरेणापि यजिं गा लभन्ते भृतकाश्च पादिकमिति ॥

शेषात्कर्तरि परस्मैपदम् ॥ १ । ३ । ७८ ॥

शेषवचनं पञ्चम्या चेदर्थे प्रतिषेध ॥ १ ॥

शेषवचनं पञ्चम्या चेदर्थे प्रतिषेधो वक्तव्य । भिद्यते कुशूल· स्वयमेव । छिद्यते रज्जु स्वयमेवेति* ॥ एव तर्हि शेष इति वक्ष्यामि ।

सप्तम्या चेत्प्रकृते ॥ २ ॥

सप्तम्या चेत्प्रकृते· प्रतिषेधो वक्तव्य· । आस्ते शेते च्यवन्ते प्लवन्ते† ॥

सिद्धं तूभयनिर्देशात् ॥ ३ ॥

सिद्धमेतत् । कथम् । उभयनिर्देशः कर्तव्य· । शेषाच्छेष इति वक्तव्यम् ॥ कर्तृग्रहणमिदानीं किमर्थं स्यात् ।

कर्तृग्रहणमनुपराद्यर्थम् ॥ ४ ॥

अनुपराद्यर्थमेतत्स्यात्‡ । इह मा भूत् । अनुक्रियते स्वयमेव । पराक्रियते स्वयमेवेति ॥ सिध्यति । सूत्र तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्त शेषवचन पञ्चम्या चेदर्थे प्रतिषेध इति । नैष दोष । कर्तरि कर्मव्यतिहारे [१ ३ १४] इत्यत्र कर्तृग्रहण प्रत्याख्यायते तत्प्रकृतमिहानुवर्तिष्यते । शेषात्कर्तरि कर्तरीति । किमिद कर्तरि कर्तरीति । कर्तैव यः कर्ता तत्र यथा स्यात् । कर्ता चान्यश्च य कर्ता तत्र मा भूदिति ॥

---

* ३ १ ८०, ३ १.१२ † १.३ ११ ‡ १ ३ ७८

अनुपराभ्यां कृञः ॥ १ । ३ । ७९ ॥

किमर्थमिदमुच्यते ।

परस्मैपदप्रतिषेधात्कृञादिषु विधानम् ॥ १ ॥

परस्मैपदप्रतिषेधात्कृञादिषु परस्मैपदं विधीयते । प्रतिषिध्यते तत्र परस्मैपद स्वरितञितः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवतीति* ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्रात्मनेपदप्रतिषेधो ऽप्रतिषिद्धत्वात् ॥ २ ॥

तत्रात्मनेपदस्य प्रतिषेधो वक्तव्य. । किं कारणम् । अप्रतिषिद्धत्वात् । न ह्यात्मनेपदं प्रतिषिध्यते । किं तर्हि । परस्मैपदमनेन विधीयते ॥

न वा द्युतादिभ्यो वावचनात् ॥ ३ ॥

न वैष दोषः । किं कारणम् । द्युतादिभ्यो वावचनात् । यदयं द्युतादिभ्यो वावचनं करोति तज्ज्ञापयत्याचार्यो न परस्मैपदविषय आत्मनेपद भवतीति ॥

आत्मनेपदनियमे वा प्रतिषेधः ॥ ४ ॥

आत्मनेपदनियमे वा प्रतिषेधो वक्तव्यः । स्वरितञितः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवति कर्तर्यनुपराभ्यां कृञो नेति ॥ सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्त तत्रात्मनेपदप्रतिषेधो ऽप्रतिषिद्धत्वादिति । परिहृतमेतत् न वा द्युतादिभ्यो वावचनादिति ॥ अथेद तावदय प्रष्टव्यः । स्वरितञितः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवतीति परस्मैपदं कस्मान्न भवति । आत्मनेपदेन बाध्यते । यथैव तर्ह्यात्मनेपदेन परस्मैपद बाध्यत एव परस्मैपदेनाप्यात्मनेपद बाधिष्यते ॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ १ । ३ । ८६ ॥

बुधादिषु येऽकर्मकास्तेषां ग्रहण किमर्थम् । सकर्मकार्थमचित्तवत्कर्तृकार्थं च† ॥

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ १ । ३ । ८८ ॥

अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनम् ॥ १ ॥

अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदं वक्तव्यम् । इहापि यथा

---

*१. ३. ७२ †१. ३. ७१ ‡१. ३. ८८

स्यात् । चेतयमानं प्रयोजयति चेतयतीति ॥ यदि तर्ह्यत्रापीष्यते ऽणिग्रहणमिदानीं किमर्थं स्यात् । अकर्मकग्रहणमण्यन्तविशेषणं यथा विज्ञायेत । अथाक्रियमाणे ऽणिग्रहणे कस्याकर्मकग्रहणं विशेषणं स्यात् । णेरिति वर्तते* ण्यन्तविशेषणम् । तत्र को दोषः । इहैव स्यात् । चेतयमानं प्रयोजयति चेतयतीति । इह न स्यात् । आसयति शाययतीति ॥

सिद्धं त्वतस्मिण्णाविति वचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । अतस्मिण्णौ यो ऽकर्मकस्तत्रेति वक्तव्यम् ॥ सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तमणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनमिति । नैष दोषः । अणाविति कस्येदं णेर्ग्रहणम् । यस्माण्णेः प्राक्कर्म कर्ता वा विद्यते न चैतस्माण्णेः प्राक्कर्म कर्ता वा विद्यते ॥

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ १ । ३ । ८९ ॥

पादिषु धेट उपसंख्यानम् ॥ १ ॥

पादिषु धेट उपसंख्यानं कर्तव्यम् । धापयेते शिशुमेकं समीची ॥

लुटि च क्लृपः ॥ १ । ३ । ९३ ॥

किमर्थश्चकारः । स्यसनोरित्येतदनुकृष्यते† । यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति द्युद्भ्यो लुङि [१.३.९१] इत्यत्रापि चकारः कर्तव्यो विभाषेत्यनुकर्षणार्थः‡ । अथेदानीमन्तरेणापि चकारमत्रानुवृत्तिर्भवतीहापि नार्थश्चकारेण ॥ एवं सर्वे चकाराः प्रत्याख्यायन्ते ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

* १ ३ ८६ † १ ३ ९२ ‡ १ १ ९०

· आ कडारादेका संज्ञा ॥ १ । ४ । १ ॥

किमर्थमिदमुच्यते ।

अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम् ॥ १ ॥

अन्यत्र संज्ञासमावेशो भवति । क्वान्यत्र । लोके व्याकरणे च । लोके तावत् । इन्द्रः शक्रः पुरुहूतः पुरंदरः । कन्दुः कोष्ठः कुशूल इति । एकस्य द्रव्यस्य बह्व्यः संज्ञा भवन्ति । व्याकरणेऽपि कर्तव्यम् हर्तव्यमित्यत्र प्रत्ययकृत्कृत्यसंज्ञानां समावेशो भवति । पाञ्चालः वैदेहः वैदर्भ इत्यत्र प्रत्ययतद्धिततद्राजसंज्ञानां समावेशो भवति । अन्यत्र संज्ञासमावेशादेतस्मात्कारणादा कडारादपि संज्ञानां समावेशः प्राप्नोति । इष्यते चैकैव संज्ञा स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वचनम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

कथं त्वेतत्सूत्रं पठितव्यम् । किमा कडारादेका संज्ञेति । आहोस्वित्प्राक्कडारात्परं कार्यमिति । कुतः पुनरयं संदेहः । उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः । केचिदा कडारादेका संज्ञेति । केचित्प्राक्कडारात्परं कार्यमिति । कश्चात्र विशेषः ।

तत्रैकसंज्ञाधिकारे तद्वचनम् ॥ २ ॥

तत्रैकसंज्ञाधिकारे तद्वक्तव्यम् । किम् । एका संज्ञा भवतीति ॥ ननु च यस्यापि परकार्यत्वं तेनापि परग्रहणं कर्तव्यम् । परार्थं मम भविष्यति । विप्रतिषेधे चेति* । ममापि तर्ह्येकग्रहणं परार्थं भविष्यति । सरूपाणामेकशेष एकविभक्तौ [१.२.६४] इति । संज्ञाधिकारश्चायम् । तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः । तत्रैतावद्वाच्यम् । आ कडारादेका । किम् । एका संज्ञा भवतीति ॥

अङ्गसंज्ञया भपदसंज्ञयोरसमावेशः ॥ ३ ॥

अङ्गसंज्ञया भपदसंज्ञयोः† समावेशो न प्राप्नोति । सार्पिष्कः बार्हिष्कः याजुष्कः धानुष्कः‡ । बाभ्रव्यः माण्डव्य§ इति । अनवकाशे भपदसंज्ञे अङ्गसंज्ञां बाधेया-

---

* १.४.२ † १.४.११, १४, १८. ‡ ४.४.६१ (६१ ६१) ... ६१. ८२. १०, ... १०८
§ ४.१.१०५ (१०५) ... ११०

ताम् । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः ॥ यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः । कथम् । पूर्वे तस्य भपदसंज्ञे पराङ्गसंज्ञा । कथम् । एवं स वक्ष्यति । यस्मात्प्रत्ययविधिस्तदादि सुप्तिङन्तं पदम् । नः क्ये । सिति च । स्वादिष्वसर्वनामस्थाने । यचि भम् । तस्यान्ते प्रत्यये ऽङ्गमिति । तत्रारम्भसामर्थ्याच्च भपदसंज्ञे परंकार्यत्वाच्चाङ्गसंज्ञा भविष्यति ॥ ननु च यस्याप्येकसंज्ञाधिकारस्तस्याप्यङ्गसंज्ञापूर्विके भपदसंज्ञे । कथम् । अनुवृत्तिः क्रियते । पर्यायः प्रसज्येत । एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः ॥

कर्मधारयत्वे तत्पुरुषग्रहणम् ॥ ४ ॥

कर्मधारयत्वे तत्पुरुषग्रहणं कर्तव्यम् । तत्पुरुषः समानाधिकरणः कर्मधारयः [१.२.४२] इति । एकसंज्ञाधिकार इति चोदितम् । अक्रियमाणे ह्यनवकाशा कर्मधारयसंज्ञा तत्पुरुषसंज्ञां बाधेत । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः ॥ यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः । कथम् । पूर्वा तस्य कर्मधारयसंज्ञा परा तत्पुरुषसंज्ञा । कथम् । एवं स वक्ष्यति । पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन कर्मधारय इति* । एवं सर्वं कर्मधारयप्रकरणमनुक्रम्य तस्यान्ते श्रितादिस्तत्पुरुष इति† । तत्रारम्भसामर्थ्याच्च कर्मधारयसंज्ञा परंकार्यत्वाच्च तत्पुरुषसंज्ञा भविष्यति ॥ ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि तत्पुरुषसंज्ञापूर्विका कर्मधारयसंज्ञा । कथम् । अनुवृत्तिः क्रियते । पर्यायः प्रसज्येत । एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः ॥

तत्पुरुषत्वे द्विगुचग्रहणम् ॥ ५ ॥

तत्पुरुषत्वे द्विगुचग्रहणं कर्तव्यम् । तत्पुरुषः [२.१.२२] द्विगुश्च [२३] इति चकारः कर्तव्यः । अक्रियमाणे हि चकारे ऽनवकाशा द्विगुसंज्ञा तत्पुरुषसंज्ञां बाधेत । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः ॥ यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः । कथम् । पूर्वा तस्य द्विगुसंज्ञा परा तत्पुरुषसंज्ञा । कथम् । एवं स वक्ष्यति । तद्धितार्थोत्तरपदसमाहारे च [२.१.५१] संख्यापूर्वो द्विगुः [५२] इति । एवं सर्वं द्विगुप्रकरणमनुक्रम्य तस्यान्ते श्रितादिस्तत्पुरुष इति† । तत्रारम्भसामर्थ्याच्च द्विगुसंज्ञा परंकार्यत्वाच्च तत्पुरुषसंज्ञा भविष्यति ॥ ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि तत्पुरुषसंज्ञापूर्विका द्विगुसंज्ञा ।

* २.१.४९ † २.१.२४.

कथम् । अनुवृत्तिः क्रियते । पर्यायः प्रसज्येत । एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः ॥

गतिदिवःकर्महेतुमत्सु चग्रहणम् ॥ ६ ॥

गतिदिवःकर्महेतुमत्सु चग्रहणं कर्तव्यम् ॥ उपसर्गाः क्रियायोगे [१.४.५९] गतिश्च [६०] इति चकारः कर्तव्यः । अक्रियमाणे हि चकारेऽनवकाशोपसर्गसंज्ञा गतिसंज्ञां बाधेत । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः ॥ यस्य पुनः परकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः । कथम् । पूर्वा तस्योपसर्गसंज्ञा परा गतिसंज्ञा । तत्रारम्भसामर्थ्याच्चोपसर्गसंज्ञा परकार्यत्वाच्च गतिसंज्ञा भविष्यति ॥ ननु च यस्याप्येकसंज्ञाधिकारस्तस्याप्युपसर्गसंज्ञापूर्विका गतिसंज्ञा । कथम् । अनुवृत्तिः क्रियते । पर्यायः प्रसज्येत । एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः ॥ गतिसंज्ञाप्यनवकाशा सा वचनाद्भविष्यति । सावकाशा गतिसंज्ञा । कोऽवकाशः । ऊर्यादीन्यवकाशः* । प्रादीनां या गतिसंज्ञा सानवकाशा । गति ॥ दिवः कर्म । साधकतमं करणम् [१.४.४२] दिवः कर्म च [४३] इति चकारः कर्तव्यः । अक्रियमाणे हि चकारेऽनवकाशा कर्मसंज्ञा करणसंज्ञां बाधेत । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः ॥ यस्य पुनः परकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः । कथम् । पूर्वा तस्य कर्मसंज्ञा परा करणसंज्ञा । कथम् । एवं स वक्ष्यति । दिवः साधकतमं कर्म । ततः करणम् । करणसंज्ञं च भवति साधकतमम् । दिव इति निवृत्तम् । तत्रारम्भसामर्थ्याच्च कर्मसंज्ञा परकार्यत्वाच्च करणसंज्ञा भविष्यति ॥ ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि करणसंज्ञापूर्विका कर्मसंज्ञा । कथम् । अनुवृत्तिः क्रियते । पर्यायः प्रसज्येत । एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः । दिवः कर्म ॥ हेतुमत् । स्वतन्त्रः कर्ता [१.४.५४] तत्प्रयोजको हेतुश्च [५५] इति चकारः कर्तव्यः । अक्रियमाणे हि चकारेऽनवकाशा हेतुसंज्ञा कर्तृसंज्ञां बाधेत । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः ॥ यस्य पुनः परकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः । कथम् । पूर्वा तस्य हेतुसंज्ञा परा कर्तृसंज्ञा । कथम् । एवं स वक्ष्यति । स्वतन्त्रः प्रयोजको हेतुरिति । ततः कर्ता । कर्तृसंज्ञश्च भवति स्वतन्त्रः । प्रयोजक इति निवृत्तम् । तत्रारम्भसामर्थ्याच्च हेतुसंज्ञा परकार्यत्वाच्च कर्तृसंज्ञा भविष्यति ॥ ननु च यस्या-

* १.४.६१.

प्येकसंज्ञाधिकारस्तस्यापि कर्तृसंज्ञापूर्विका हेतुसंज्ञा। कथम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः॥

गुरुलघुसंज्ञे नदीघिसंज्ञे ॥ ७ ॥

गुरुलघुसंज्ञे नदीघिसंज्ञे बाधेयाताम्* । गार्गीबन्धुः वात्सीबन्धुः† । चैत्रम्‡ विविनय्य§ । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः॥ यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वे तस्य नदीघिसंज्ञे परे गुरुलघुसंज्ञे। तत्रारम्भसामर्थ्याच्च नदीघिसंज्ञे परंकार्यत्वाच्च गुरुलघुसंज्ञे भविष्यतः॥ ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि नदीघिसंज्ञापूर्विके गुरुलघुसंज्ञे। कथम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः॥

परस्मैपदसंज्ञां पुरुषसंज्ञा ॥ ८ ॥

परस्मैपदसंज्ञां पुरुषसंज्ञा बाधेत¶ । परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः॥ यस्य पुनः परंकार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथम्। पूर्वा तस्य पुरुषसंज्ञा परा परस्मैपदसंज्ञा। कथम्। एवं स वक्ष्यति। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमा इति। एवं सर्वं पुरुषनियममनुक्रम्य तस्यान्ते लः परस्मैपदमिति। तत्रारम्भसामर्थ्याच्च पुरुषसंज्ञा परंकार्यत्वाच्च परस्मैपदसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि परस्मैपदसंज्ञापूर्विका पुरुषसंज्ञा। कथम्। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः॥ परस्मैपदसंज्ञाप्यनवकाशा सा वचनाद्भविष्यति। सावकाशा परस्मैपदसंज्ञा। कोऽवकाशः। शतृक्वसू अवकाशः** ॥

परवचने सिति पदं भम् ॥ ९ ॥

परवचने सिति पदं भसंज्ञमपि प्राप्नोति†† । अयं ते योनिर्ऋत्वियः‡‡ । प्रजां विन्दाम ऋत्वियाम्। आरम्भसामर्थ्याच्च पदसंज्ञा परंकार्यत्वाच्च भसंज्ञा प्राप्नोति।

गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसंज्ञम् ॥ १० ॥

गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसंज्ञमपि प्राप्नोति§§ । आरम्भसामर्थ्याच्च

* १.४.३-१२. † ६.२.१०९, ८.२.८६ ‡ ६.१.१२; ५.२.१११ § ६.४.५६.
¶ १.४.९९, १०१. ** ३.२.१२४; १०७ †† १.४.१६; १८. ‡‡ ५.१.१०६. (६.४.१४३).
§§ १.४.५२; ५३.

कर्मसंज्ञा परकार्यत्वाच्च कर्तृसंज्ञा प्राप्नोति ॥ नैषः दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न कर्मसंज्ञायां कर्तृसंज्ञा भवतीति यदयं हृक्रोरन्यतरस्याम् [१.४.५३] इत्यन्यतरस्यांग्रहणं करोति ॥

शेषवचनं च घिसंज्ञानिवृत्त्यर्थम् ॥ ११ ॥

शेषग्रहणं च कर्तव्यम् । शेषो घ्यसखि [१.४.७] इति । किं प्रयोजनम् । घिसंज्ञानिवृत्त्यर्थम् । नदीसंज्ञायां घिसंज्ञा मा भूदिति । शकटचै पद्धत्यै बुद्ध्यै धेन्वै* । इतरथा हि परकार्यत्वाच्च घिसंज्ञारम्भसामर्थ्याच्च ङिति ह्रस्वश्च [१.४.६] इति नदीसंज्ञा ॥

न वासंभवात् ॥ १२ ॥

न वा कर्तव्यम् । नदीसंज्ञायां घिसंज्ञा कस्मान्न भवति । असंभवात् । कोऽसावसंभवः ।

ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञायां च गुणः ॥ १३ ॥

ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञायां च गुणेन भवितव्यम्† ।

तत्र वचनप्रामाण्यान्नदीसंज्ञायां घिसंज्ञाभावः ॥ १४ ॥

तत्र वचनप्रामाण्यान्नदीसंज्ञायां घिसंज्ञा न भविष्यति । किं कारणम् । आश्रयाभावात् ।

आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृत्तिरिति चेद्यणादेशाभावः ॥ १५ ॥

आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृत्तिरिति चेदेवमुच्यते । यणादेशोऽपि न प्राप्नोति ॥ नैष दोषः ।

नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसंज्ञाभावः ॥१६ ॥

नद्याश्रयो यणादेशः । यदा नदीसंज्ञया घिसंज्ञा बाधिता तत उत्तरकालं यणादेशेन भवितव्यम् । नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसंज्ञा भविष्यति ॥

बहुव्रीह्यर्थं तु ॥ १७ ॥

बहुव्रीहिप्रतिषेधार्थं तु शेषग्रहणं कर्तव्यम् । शेषो बहुव्रीहिः [२.२.२३] इति ॥ किं प्रयोजनम् ।

* ७१ ११२.(१११) † ७६.१११

प्रयोजनमव्ययीभावोपमानद्विगुकृल्लोपेषु ॥ १८ ॥

अव्ययीभावे । उन्मत्तगङ्गम् लोहितगङ्गम्* । उपमाने । शस्त्रीश्यामा कुमुदश्येनी† । द्विगु । पञ्चगवम् दशगवम्‡ । कृल्लोपे । निष्कौशाम्बिः निर्वाराणसिः§ ॥

तत्र शेषवचनाद्दोषः सङ्ख्यासमानाधिकरणनञ्समासेषु बहुव्रीहि-प्रतिषेधः ॥ १९ ॥

तत्र शेषवचनाद्दोषो भवति । सङ्ख्यासमानाधिकरणनञ्समासेषु बहुव्रीहेः प्रतिषेधः प्राप्नोति । संख्या । द्वीरावतीको देशः । नीरावतीको देशः¶ । समानाधिकरण । वीरपुरुषको ग्रामः** । नञ्समासे । अब्राह्मणको देशः । अनुपलको देशः†† ॥

कृल्लोपे च शेषवचनात्प्रादिभिर्न बहुव्रीहिः ॥ २० ॥

कृल्लोपे च शेषवचनात्प्रादिभिर्बहुव्रीहिर्न प्राप्नोति । प्रपतितपर्णः प्रपर्णकः । प्रपतितपलाशः प्रपलाशक इति‡‡ ॥ अथैकसञ्ज्ञाधिकारे कथं सिध्यति । एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः । एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिर्भविष्यति ॥

एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत् क्कार्ये प्रतिषेधः ॥ २१ ॥

एकसञ्ज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत् क्कार्ये प्रतिषेधो वक्तव्यः । निष्कौशाम्बिः निर्वाराणसिः ॥ तत्पुरुषोऽत्र बाधको भविष्यति ।

तत्पुरुष इति चेदन्यत्र क्कार्यात्प्रतिषेधः ॥ २२ ॥

तत्पुरुष इति चेदन्यत्र क्कार्यात्प्रतिषेधो वक्तव्यः । प्रपतितपर्णः प्रपर्णकः । प्रपतितपलाशः प्रपलाशक इति ॥

सिद्धं तु प्रादीनां क्कार्ये तत्पुरुषवचनात् ॥ २३ ॥

सिद्धमेतत् । कथम् । प्रादीनां क्कार्ये तत्पुरुषो भवतीति वक्तव्यम् ॥
कानि पुनरस्य योगस्य प्रयोजनानि ।

प्रयोजनं ह्रस्वसञ्ज्ञा दीर्घप्लुतौ ॥ २४ ॥

ह्रस्वसञ्ज्ञां दीर्घप्लुतसञ्ज्ञे बाधेते§§ ॥

---

* २.१.१६, (२.१.१ ५४ १२४) † २.१.५५ (५४ १२४, १२१) ‡ २.१.५१ ५१, (६.२.१) § २.२.१८*, (५४ १२१) ¶ (२.१.२०) ** (२.१.५८) †† (२.२.६) ‡‡ (२.२.१८*)
§§ १.२.२७

तिङ्सार्वधातुकं लिङ्लिटोरार्धधातुकम् ॥ २५ ॥

तिङः सार्वधातुकसंज्ञां लिङ्लिटोरार्धधातुकसंज्ञा बाधते* ॥

अपत्यं वृद्धं युवा ॥ २६ ॥

अपत्यं वृद्धं युवसंज्ञा बाधते† ॥

घिं नदी ॥ २७ ॥

घिसंज्ञां नदीसंज्ञा बाधते‡ ॥

लघु गुरु ॥ २८ ॥

लघुसंज्ञां गुरुसंज्ञा बाधते§ ॥

पदं भम् ॥ २९ ॥

पदसंज्ञां भसंज्ञा बाधते¶ ॥

अपादानमुत्तराणि धनुषा विध्यति कंसपात्र्यां भुङ्क्ते गां दोग्धि धनुर्विध्यतीति ॥ ३० ॥

अपादानसंज्ञामुत्तराणि कारकाणि बाधन्ते । क । धनुषा विध्यति । कंसपात्र्यां भुङ्क्ते । गां दोग्धि । धनुर्विध्यति ॥ धनुषा विध्यतीत्यपाययुक्तत्वाच्च ध्रुवमपायेऽपादानम् [१.४.२४] इत्यपादानसंज्ञा प्राप्नोति साधकतमं करणम् [४२] इति च करणसंज्ञा । करणसंज्ञा परा सा भवति ॥ कंसपात्र्यां भुङ्क्त इत्यत्रापाययुक्तत्वाच्च ध्रुवमपायेऽपादानमित्यपादानसंज्ञा प्राप्नोत्याधारोऽधिकरणम् [४५] इति चाधिकरणसंज्ञा । अधिकरणसंज्ञा परा सा भवति ॥ गां दोग्धीत्यत्रापाययुक्तत्वाच्चापादानसंज्ञा प्राप्नोति कर्तुरीप्सिततमं कर्म [४९] इति च कर्मसंज्ञा । कर्मसंज्ञा परा सा भवति ॥ धनुर्विध्यतीत्यत्रापाययुक्तत्वाच्चापादानसंज्ञा प्राप्नोति स्वतन्त्रः कर्ता [५४] इति च कर्तृसंज्ञा । कर्तृसंज्ञा परा सा भवति ॥

क्रुधद्रुहोरुपसृष्टयोः कर्म संप्रदानम् ॥ ३१ ॥

क्रुधद्रुहोरुपसृष्टयोः कर्मसंज्ञा संप्रदानसंज्ञां बाधते** ॥

* १.४.१११, ११५, ११६ † ४.१.१६२, १६३ ‡ १.४.३-७. § १.४ १०, ११.
¶ १.४.१४, १८. ** १.४.३८, ३०

करणं पराणि साध्वासिदिछनत्ति ॥ ३२ ॥

करणसंज्ञां* पराणि कारकाणि बाधन्ते । क्व । धनुर्विध्यति । असिश्छिनत्तीति ॥

अधिकरणं कर्म गेहं प्रविशति ॥ ३३ ॥

अधिकरणसंज्ञां कर्मसंज्ञा बाधते† । क्व । गेहं प्रविशतीति ॥

अधिकरणं कर्ता स्थाली पचति ॥ ३४ ॥

अधिकरणसंज्ञां कर्तृसंज्ञा बाधते‡ । क्व । स्थाली पचतीति ॥

अध्युपसृष्टं कर्म ॥ ३५ ॥

अध्युपसृष्टं कर्माधिकरणसंज्ञां बाधते§ ॥

गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा ॥ ३६ ॥

गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा बाधते¶ ॥

परस्मैपदमात्मनेपदम् ॥ ३७ ॥

परस्मैपदसंज्ञामात्मनेपदसंज्ञा बाधते** ॥

समाससंज्ञाश्च ॥ ३८ ॥

समाससंज्ञाश्च या याः परा अनवकाशाश्च तास्ताः पूर्वाः सावकाशाश्च बाधन्ते ।

अर्थवत्प्रातिपदिकम् ॥ ३९ ॥

अर्थवत्प्रातिपदिकसंज्ञं भवति ॥

गुणवचनं च ॥ ४० ॥

गुणवचनसंज्ञं च भवत्यर्थवत् ॥

समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गा जातिः ॥ ४१ ॥

समास । समाससंज्ञा च वक्तव्या । कृत् । कृत्संज्ञा च वक्तव्या । तद्धित । तद्धितसंज्ञा च वक्तव्या । अव्यय । अव्ययसंज्ञा च वक्तव्या । सर्वनाम । सर्वनामसंज्ञा च वक्तव्या । असर्वलिङ्गा जातिरित्येतच्च वक्तव्यम् ॥

---

* १.४ ४२ † १.४. ४५, ४९. ‡ १.४. ४५; ५८. § १.८. ४६; ४५ ¶ १.४. ५९, ६०, ८३.
** १.४. ९९; १००.

संख्या ॥ ४२ ॥

सख्यासज्ञा च वक्तव्या ॥

डु च ॥ ४३ ॥

डुसंज्ञा च वक्तव्या ॥ का पुनर्डुसंज्ञा । षट्संज्ञा ॥

एकद्रव्योपनिवेशिनी संज्ञा ॥ ४४ ॥

एकद्रव्योपनिवेशिनी सज्ञेत्येतच्च वक्तव्यम् ॥

किमर्थमिदमुच्यते । यथान्यास एव भूयिष्ठाः सज्ञाः क्रियन्ते ॥ सन्ति चेवात्र काश्चिदपूर्वाः सज्ञाः । अपि चैतेनानुपूर्व्येण सनिविष्टानां बाधनं यथा स्यात् । गुणवचनसज्ञायाश्चैताभिर्बाधनं यथा स्यादिति ॥

विप्रतिषेधे परं कार्यम् ॥१।४।२॥

विप्रतिषेध इति कोऽयं शब्दः । विप्रतिपूर्वात्सिधेः कर्मव्यतिहारे घञ् । इतरेतरप्रतिषेधो विप्रतिषेधः । अन्योऽन्यप्रतिषेधो विप्रतिषेधः ॥ क पुनर्विप्रतिषेध. ।

द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः ॥ १ ॥

द्वौ प्रसङ्गौ यदान्यार्थौ भवत एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेधः । क पुनरन्यार्थौ क चैकस्मिन्युगपत्प्राप्नुतः । वृक्षाभ्याम् वृक्षेष्वित्यन्यार्थौ वृक्षेभ्य इत्यत्र युगपत्प्राप्नुतः* ॥ किं च स्यात् ।

एकस्मिन्युगपदसभवात्पूर्वपरप्राप्तेरुभयप्रसङ्ग· ॥ २ ॥

एकस्मिन्युगपदसभवात्पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसङ्ग· ॥ इदं विप्रतिषिद्ध यदुच्यत एकस्मिन्युगपदसभवात्पूर्वपरप्राप्तेरुभयप्रसङ्ग इति । कथं ह्येकस्मिंश्च नाम युगपदसभव· स्यात्पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसङ्गश्च स्यात् । नैतद्विप्रतिषिद्धम् । यदुच्यत एकस्मिन्युगपदसभवादिति कार्ययोर्युगपदसभव· शास्त्रयोरुभयप्रसङ्ग· ॥

तृजादिभिस्तुल्यम् ॥ ३ ॥

तृजादिभिस्तुल्य पर्यायः प्राप्नोति । तद्यथा । तृजादय † पर्यायेण भवन्ति ॥ किं पुन· कारण तृजादय· पर्यायेण भवन्ति ।

* ७ ३ १०३,१०२ † ३ १ १३३

अनवयवप्रसङ्गात्प्रतिपदं विधेश्च ॥ ४ ॥

अनवयवेन प्रसज्यन्ते प्रतिपदं च विधीयन्ते ॥

अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात् ॥ ५ ॥

अप्रतिपत्तिर्वा पुनरुभयोः शास्त्रयोः स्यात् । किं कारणम् । तुल्यबलत्वात् । तुल्यबले ह्युभे शास्त्रे । तद्यथा । द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति । स तयोः पर्यायेण कार्यं करोति । यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदा यद्यसावविरोधार्थी भवति तत उभयोर्न करोति । किं पुनः कारणमुभयोर्न करोति । यौगपद्यासंभवात् । नास्ति यौगपद्येन संभवः ॥

तत्र प्रतिपत्त्यर्थं वचनम् ॥ ६ ॥

तत्र प्रतिपत्त्यर्थमिदं वक्तव्यम् ॥

तव्यदादीनां त्वप्रसिद्धिः ॥ ७ ॥

तव्यदादीनां* तु कार्यस्याप्रसिद्धिः । न हि किंचित्तव्यदादिषु नियमकारि शास्त्रमारभ्यते येन तव्यदादयः स्युः । यश्च भवता हेतुर्व्यपदिष्टो अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तुल्यः स तव्यदादिषु ॥ नैष दोषः । अनवकाशास्तव्यदादय उच्यन्ते च ते वचनाद्भविष्यन्ति । यश्च भवता हेतुर्व्यपदिष्टस्तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तुल्यः स तव्यदादिषु ॥

एतावदिह सूत्रं विप्रतिषेधे परमिति । पठिष्यति ह्याचार्यः । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति† । पुनश्च पठिष्यति । पुनःप्रसङ्गविज्ञानात्सिद्धमिति‡ । किं पुनरियता सूत्रेणोभयं लभ्यम् । लभ्यमित्याह । कथम् । इह भवता द्वौ हेतू व्यपदिष्टौ । तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति च । अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति च । तद्यदा तावदेष हेतुस्तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तदा विप्रतिषेधे परमित्यनेन किं क्रियते । नियमः । विप्रतिषेधे परमेव भवतीति । तदेतदुपपन्नं भवति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति । यदा ह्येष हेतुरप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तदा विप्रतिषेधे परमित्यनेन किं क्रियते । द्वारम् । विप्रतिषेधे परं तावद्भवति तस्मिन्कृते यदि पूर्वमपि प्राप्नोति तदपि भवति । तदेतदुपपन्नं भवति पुनःप्रसङ्गविज्ञानात्सिद्धमिति ॥

विप्रतिषेधे परमित्युक्त्वाङ्गाधिकारे पूर्वमिति वक्तव्यम् । किं कृतं भवति । पूर्वविप्रतिषेधा न पठितव्या भवन्ति । गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम् । नुमचिरतृज्वद्भावेभ्यो नुडिति* । कथं ये परविप्रतिषेधाः । इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेनेति† । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । कथं ये पूर्वविप्रतिषेधाः । विप्रतिषेधे परमित्येव सिद्धम् । कथम् । परशब्दोऽयं बह्वर्थः । अस्त्येव व्यवस्थायां वर्तते । तद्यथा । पूर्वः पर इति । अस्त्यन्यार्थे वर्तते । परपुत्रः परभार्या । अन्यपुत्रः अन्यभार्येति गम्यते । अस्ति प्राधान्ये वर्तते । तद्यथा । परमियं ब्राह्मण्यस्मिन्कुटुम्बे । प्रधानमिति गम्यते । अस्तीष्टवाची परशब्दः । तद्यथा । परं धाम गत इति । इष्टं धामेति गम्यते । तत्र इष्टवाची परशब्दस्तस्येदं ग्रहणम् । विप्रतिषेधे परं यदिष्टं तद्भवति ॥

अन्तरङ्गं च ॥ ८ ॥

अन्तरङ्गं च बलीयो भवतीति वक्तव्यम् ॥ किं प्रयोजनम् ।

प्रयोजनं यणेकादेशौत्त्वोत्त्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः ॥ ९ ॥

गुणाद्यणादेशः । स्योनः स्योना । गुणश्च प्राप्नोति यणादेशश्च‡ । परत्वाद्गुणः स्यात् । यणादेशो भवत्यन्तरङ्गतः ॥ वृद्धेर्यणादेशः । द्यौकामिः स्यौकामिः । वृद्धिश्च प्राप्नोति यणादेशश्च§ । परत्वाद्वृद्धिः स्यात् । यणादेशो भवत्यन्तरङ्गतः ॥ द्विर्वचनाद्यणादेशः । दुद्यूषति सुस्यूषति । द्विर्वचनं च प्राप्नोति यणादेशश्च¶ । नित्यत्वाद्द्विर्वचनं स्यात् । यणादेशो भवत्यन्तरङ्गतः ॥ अल्लोपस्य च यणादेशस्य च नास्ति संप्रधारणा ॥ स्वराद्यणादेशः । द्यौकामिः स्यौकामिः । स्वरश्च प्राप्नोति यणादेशश्च** । परत्वात्स्वरः स्यात् । यणादेशो भवत्यन्तरङ्गतः ॥ गुणादेकादेशः । काश्यपेयो मन्त्रमपश्यत् । गुणश्च प्राप्नोत्येकादेशश्च†† । परत्वाद्गुणः स्यात् । एकादेशो भवत्यन्तरङ्गतः ॥ वृद्धेरेकादेशः । वैक्षमाणिः सौत्थितिः । वृद्धिश्च प्राप्नोत्येकादेशश्च‡‡ । परत्वाद्वृद्धिः स्यात् । एकादेशो भवत्यन्तरङ्गतः ॥ द्विर्वचनादेकादेशः । आया ओदनो ओदनः । ओदनमिच्छति ओदनीयति । ओदनीयतेः सन् ओदिदनीयिषति । द्विर्वचनं च प्राप्नोत्येकादेशश्च§§ । नित्यत्वाद्द्विर्वचनं स्यात् । एकादेशो भवत्यन्तरङ्गतः ॥ अल्लोपादेकादेशः । शुना शुने । अल्लोपश्च प्राप्नोत्येकादेशश्च¶¶ । परत्वादल्लोपः स्यात् ।

---

* ७.१.९६. † ७.१.१०२. ‡ ७.३.८४; ६.१.७७. § ७.२.११७; ६.१.७७. ¶ ६.१.७७.
** ६.१.१९७, ७७. †† ६.४.१४६; ६.१.८७ ‡‡ ७.२ ११७. ६.१.८९. §§ ६.१.१, ८८.
¶¶ ६.४.१३४; ६.१.१०८.

एकादेशो भवत्यन्तरङ्गतः ॥ नैतदस्ति प्रयोजनम् । नास्त्यत्र विशेषो ऽल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन वा । अयमस्ति विशेषः । अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः प्रसज्येत* । नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति । किं कारणम् । न गोश्वन्साववर्ण [६.१.१८२] इति प्रतिषेधात् । नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः । कस्य तर्हि । तृतीयादिस्वरस्य† । यत्र तर्हि तृतीयादिस्वरो नास्ति । शुनः पश्येति । एवं तर्हि न लाक्षणिकस्य प्रतिषेधं शिष्मः । किं तर्हि । येन केनचिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधः । यत्र तर्हि विभक्तिर्नास्ति । बहुशुनीति‡ । यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत । नैवं शक्यम् । इहापि प्रसज्येत । कुमारीति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति यदयं श्वन्शब्दं गौरादिषु पठति§ । अन्तोदात्तार्थं यत्नं करोति । सिद्धं हि स्यान्ङीपैव ॥ स्वरादेकादेशः । सौत्थितिः वैक्षमाणिः । स्वरश्च प्राप्नोत्येकादेशश्च¶ । परत्वात्स्वरः स्यात् । एकादेशो भवत्यन्तरङ्गतः ॥ गुणस्य चेत्त्वोत्त्वयोश्च नास्ति संप्रधारणा ॥ वृद्धेरित्त्वोत्त्वे । स्तैर्णिः पौर्तिः । वृद्धिश्च प्राप्नोतीत्त्वोत्त्वे च** । परत्वाद्वृद्धिः स्यात् । इत्त्वोत्त्वे भवतो ऽन्तरङ्गतः ॥ द्विर्वचनादित्त्वोत्त्वे । आतेस्तीर्यते आपोपूर्यते । द्विर्वचनं च प्राप्नोतीत्त्वोत्त्वे च†† । नित्यत्वाद्द्विर्वचनं स्यात् । इत्त्वोत्त्वे भवतो ऽन्तरङ्गतः ॥ अल्लोपस्य चेत्त्वोत्त्वयोश्च नास्ति संप्रधारणा ॥ स्वरे नास्ति विशेषः ॥

इण्ङशीनामाद्गुणः सवर्णदीर्घत्वात् ॥ १० ॥

इण्ङशीनामाद्गुणः सवर्णदीर्घत्वात्प्रयोजनम् । अयज इन्द्रम् अवप इन्द्रम् । वृक्ष इन्द्रम् प्लक्ष इन्द्रम् । य इन्द्रम् त इन्द्रम् । आद्गुणश्च प्राप्नोति सवर्णदीर्घत्वं च‡‡ । परत्वात्सवर्णदीर्घत्वं स्यात् । आद्गुणो भवत्यन्तरङ्गतः ॥

न वा सवर्णदीर्घत्वस्यानवकाशत्वात् ॥ ११ ॥

न वैतदन्तरङ्गेणापि सिध्यति । किं कारणम् । सवर्णदीर्घत्वस्यानवकाशत्वात् । अनवकाशं सवर्णदीर्घत्वमाद्गुणं बाधेत ॥ नैतदन्तरङ्गे ऽस्त्यनवकाशं परमिति । इहापि स्योनः स्योनेति शक्यं वक्तुं न वा परत्वाद्गुणस्येति ॥

ऊडापोरेकादेश ईत्वलोपाभ्याम् ॥ १२ ॥

ऊडापोरेकादेश ईत्वलोपाभ्यां भवत्यन्तरङ्गतः प्रयोजनम् ॥ ईत्वादेकादेशः

खट्वीयति मालीयति । ईत्वं च प्राप्नोत्येकादेशश्च* । परत्वादीत्वं स्यात् । एकादेशो भवत्यन्तरङ्गतः ॥ लोपादेकादेशः । कामण्डलेयः भाद्रवाहेयः । लोपश्च प्राप्नोत्येकादेशश्च† । परत्वाल्लोपः स्यात् । एकादेशो भवत्यन्तरङ्गतः ॥ अथ किमर्थमीत्त्वलोपाभ्यामित्युच्यते न लोपेत्वाभ्यामित्येवोच्येत । संख्यातानुदेशो‡ मा भूदिति । आपोऽप्येकादेशो लोपे प्रयोजयति । चौडिः बालाकिः§ ॥

आत्त्वनपुंसकोपसर्जनह्रस्वत्वान्ययवायावेकादेशतुग्विधिभ्यः ॥ १३ ॥

आत्त्वनपुंसकोपसर्जनह्रस्वत्वान्ययवायावेकादेशतुग्विधिभ्यो भवन्त्यन्तरङ्गतः ॥ वेञ् वानीयम् । शो शानीयम् । ग्लै ग्लानीयम् । म्लै म्लानीयम् । ग्लाच्छत्त्रम् म्लाच्छत्त्रम् । आत्त्वं च प्राप्नोत्येते च विधयः¶ । परत्वादेते विधयः स्युः । आत्त्वं भवत्यन्तरङ्गतः ॥ नपुंसकोपसर्जनह्रस्वत्वं च प्रयोजनम् । अतिर्यत्र अतिन्वत्र । अतिरिच्छत्त्रम् अतिनुच्छत्त्रम् । आराशस्त्रीदम् धानाशष्कुलीदम् । निष्कौशाम्बीदम् निर्वाराणसीदम् । निष्कौशाम्बिच्छत्त्रम् निर्वाराणसिच्छत्त्रम् । नपुंसकोपसर्जनह्रस्वत्वं च प्राप्नोत्येते च विधयः** । परत्वादेते विधयः स्युः । नपुंसकोपसर्जनह्रस्वत्वं भवत्यन्तरङ्गतः ॥

तुग्यणेकादेशगुणवृद्ध्यौत्त्वदीर्घत्वेत्त्वमुमेत्त्वरीविधिभ्यः ॥ १४ ॥

यणेकादेशगुणवृद्ध्यौत्त्वदीर्घत्वेत्त्वमुमेत्त्वरीविधिभ्यस्तुग्भवत्यन्तरङ्गतः ॥ यणादेशात् । अग्निचिदत्र सोमसुदत्र ॥ एकादेशात् । अग्निचिदिदम् सोमसुदुदकम् ॥ गुणात् । अग्निचिते सोमसुते ॥ वृद्धेः । प्र ऋच्छकः प्राच्छेकः ॥ औत्त्वात् । अग्निचिति सोमसुति ॥ दीर्घत्वात् । जगद्याम् जनगद्याम् ॥ ईत्वात् । जगत्यति जनगत्यति ॥ मुमः । अग्निचिन्मन्यः सोमसुन्मन्यः ॥ एत्त्वात् । जगद्यः जनगद्यः ॥ रीविधेः । सुकृत्यति पापकृत्यति ॥

अनडानड्भ्यां चेति वक्तव्यम् । सुकृत् । सुकृद्भुङ्क्ते ॥

तुक् प्राप्नोत्येते च विधय†† । परत्वादेते विधयः स्युः । तुग्भवत्यन्तरङ्गतः ॥

इयङादेशो गुणात् ॥ १५ ॥

इयङादेशो गुणाद्भवत्यन्तरङ्गतः प्रयोजनम् । धियति रियति । इयङादेशश्च प्राप्नोति गुणश्च‡‡ । परत्वाद्गुणः स्यात् । इयङादेशो भवत्यन्तरङ्गतः ॥

---

* [illegible] † [illegible] ‡ [illegible] § [illegible]
¶ [illegible] ** [illegible]
†† [illegible]
‡‡ [illegible]

उवङादेशश्चेति वक्तव्यम् । प्रादुद्रुवत् प्रासुस्रुवत् ॥

श्वेः संप्रसारणपूर्वत्वं यणादेशात् ॥ १६ ॥

श्वेः संप्रसारणपूर्वत्वं यणादेशाद्भवत्यन्तरङ्गतः प्रयोजनम् । शुशुवतुः शुशुवुः । पूर्वत्वं च प्राप्नोति यणादेशश्च* । परत्वाद्यणादेशः स्यात् । पूर्वत्वं भवत्यन्तरङ्गतः ॥

ह्वं आकारलोपात् ॥ १७ ॥

ह्व आकारलोपात्पूर्वत्वं भवत्यन्तरङ्गतः प्रयोजनम् । जुहुवतुः जुहुवुः । पूर्वत्वं च प्राप्नोत्याकारलोपश्च† । परत्वादाकारलोपः स्यात् । पूर्वत्वं भवत्यन्तरङ्गतः ॥

स्वरो लोपात् ॥ १८ ॥

स्वरो लोपाद्भवत्यन्तरङ्गतः प्रयोजनम् । औपगवी सौदामनी । स्वरश्च प्राप्नोति लोपश्च‡ । परत्वाल्लोपः स्यात् । स्वरो भवत्यन्तरङ्गतः ॥

प्रत्ययविधिरेकादेशात् ॥ १९ ॥

प्रत्ययविधिरेकादेशाद्भवत्यन्तरङ्गतः प्रयोजनम् । अग्निरिन्द्रः । वायुरुदकम् । प्रत्ययविधिश्च प्राप्नोत्येकादेशश्च§ । परत्वादेकादेशः स्यात् । प्रत्ययविधिर्भवत्यन्तरङ्गतः ॥

यणादेशाच्चेति वक्तव्यम्¶ । अग्निरत्र । वायुरत्र ॥

लादेशो वर्णविधेः ॥ २० ॥

लादेशो वर्णविधेर्भवत्यन्तरङ्गतः प्रयोजनम् । पचत्वत्र । पठत्वत्र । लादेशश्च प्राप्नोति यणादेशश्च** । परत्वाद्यणादेशः स्यात् । लादेशो भवत्यन्तरङ्गतः ॥

तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरात् ॥ २१ ॥

तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वराद्भवत्यन्तरङ्गतः प्रयोजनम् । पूर्वशालाप्रियः अपरशालाप्रियः । तत्पुरुषान्तोदात्तत्वं च प्राप्नोति पूर्वपदप्रकृतिस्वरत्वं च†† । परत्वात्पूर्वपदप्रकृतिस्वरत्वं स्यात् । तत्पुरुषान्तोदात्तत्वं भवत्यन्तरङ्गतः ॥

एतान्यस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्तव्या ॥ यदि सन्ति प्रयोजनानीत्येषा परिभाषा क्रियते ननु चेयमपि कर्तव्यासिद्धं बहिरङ्गल-

क्षणमन्तरङ्गलक्षण इति । किं प्रयोजनम् । पचावेदम् । पचामेदम् । असिद्धत्वाद्बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणमैत्त्व* मा भूदिति । उभे तर्हि कर्तव्ये । नेत्याह । अनयैव सिद्धम् । इहापि स्योन स्योनेत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य गुणस्यान्तरङ्गलक्षणो यणादेशो भविष्यति ॥ यद्यसिद्ध बहिरङ्गलक्षणमन्तरङ्गलक्षण इत्युच्यते ऽक्षद्यू हिरण्यद्यू असिद्धत्वाद्बहिरङ्गलक्षणस्योठो ऽन्तरङ्गलक्षणो यणादेशो न प्राप्नोति† । नैष दोष । असिद्ध बहिरङ्गलक्षणमन्तरङ्गलक्षण इत्युक्त्वा ततो वक्ष्यामि नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरिति । सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदय षत्वतुकोरसिद्ध [६.१ ८६] इत्याह ॥ इय तर्हि परिभाषा कर्तव्यासिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति । एषा च न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदय वाह ऊठ् [६ ४ १३२] इत्यूठ शास्ति ॥

तस्य दोष पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात् ॥ २२ ॥

तस्यैतस्य लक्षणस्य दोष पूर्वोत्तरपदयोर्वृद्धिस्वरावेकादेशादन्तरङ्गतोऽभिनिर्वृत्तात्र प्राप्नुत । पूर्वैषुकामशम अपरैषुकामशम ‡ । गुडोदकम् तिलोदकम् । उदकेऽकेवले [६ २ ९६] इति पूर्वोत्तरपदयोर्व्यपवर्गाभावान्न स्यात् ॥ नैष दोष । आचार्यप्रवृत्तिर्ज्ञापयति पूर्वोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति यदय नेन्द्रस्य परस्य [७ ३ २२] इति प्रतिषेध शास्ति । कथ कृत्वा ज्ञापकम् । इन्द्रे द्वावचौ । तत्रैको यस्येति च [६ ४ १४८] इति लोपेन ह्रियते ऽपर एकादेशेन । ततो ऽनच्क इन्द्र सपन्न । तत्र क प्रसङ्गो वृद्धे । पश्यति त्वाचार्य पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति ततो नेन्द्रस्य परस्येति प्रतिषेध शास्ति ॥

यणादेशादियुवौ ॥ २३ ॥

यणादेशादियुवावन्तरङ्गतोऽभिनिर्वृत्तात्र प्राप्नुत । वैयाकरण सौवश्व इति । लक्षण हि भवति य्वोर्वृद्धिप्रसङ्ग इयुवौ भवत इति ॥ नैष दोष । अनवकाशावियुवौ । अतीत्युच्यते ॥ किं पुन कारणमतीत्युच्यते । इह मा भूताम् । वैयाघ्रा औपगव इति । स्नामत्रेयुवौ लोपो व्योर्वलि [६ १ ६६] इति लोपो भविष्यति । यत्र तर्हि लोपो नास्ति । प्रैयमेध प्रैयगव इति ॥

* ६ १ ८७ † ६ १ ८५; ६ १ ७७ ‡ ७ ३ १४; ६ १ ७५

उसि पररूपाच्च ॥ २४ ॥

उसि पररूपाच्चान्तरङ्गतो ऽभिनिर्वृत्तादियादेशो न प्राप्नोति* । पचेयुः यजेयुः ॥ नैष दोषः । नैवं विज्ञायते या इत्येतस्येय्भवतीति । कथं तर्हि । यास् इत्येतस्येय् भवतीति ॥

लुग्लोपयणयवायावेकादेशेभ्यः ॥ २५ ॥

लोपयणयवायावेकादेशेभ्यो लुग्बलीयानिति वक्तव्यम् ॥ लोपात् । गोमान्प्रियो ऽस्य गोमत्प्रियः । यवमत्प्रियः । गोमानिवाचरति गोमत्यते । यवमत्यते ॥ यणादेशात् । ग्रामण्यः कुलं ग्रामणिकुलम् । सेनान्यः कुलं सेनानिकुलम् ॥ अयवायावेकादेशेभ्यः । गवे हितं गोहितम् । रायः कुलं रैकुलम् । नावः कुलं नौकुलम् । वृकाद्भयं वृकभयम् ॥ लुक् प्राप्नोत्येते च विधयः† । परत्वादेते विधयः स्युः । लुग्बलीयानिति वक्तव्यं लुग्यथा स्यात् ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

यू स्त्र्याख्यौ नदी ॥ १ । ४ । ३ ॥

यू इति किमर्थम् । खट्वा माला । किं च स्यात् । खट्वाबन्धुः मालाबन्धुः । नदी बन्धुनि [६. २. १०९] इत्येष स्वरः प्रसज्येत । इह च बहुखट्वक इति नद्यृतश्च [५ ४.१५३]इति नित्यः कप्प्रसज्येत ॥ नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति नापो नदीसंज्ञा भवतीति यदय ङेराम्नद्याम्नीभ्यः [७.३.११६] इति पृथगाम्ग्रहण करोति ॥ इह तर्हि मात्रे मातुरित्याण्नद्याः [११२] इत्याट् प्रसज्येत ॥

किं पुनरिदं दीर्घयोर्ग्रहणमाहोस्विद्ध्रस्वयोः । किं चातः । यदि दीर्घयोर्ग्रहण यू इति निर्देशो नोपपद्यते । दीर्घाद्धि पूर्वसवर्णः प्रतिषिध्यते* ॥ उत्तरत्र† च विशेषण न प्रकल्पेत यू ह्रस्वाविति । यदि यू न ह्रस्वौ । अथ ह्रस्वौ न यू । यू ह्रस्वौ चेति विप्रतिषिद्धम् ॥ अथ ह्रस्वयोर्हि शकटे अत्रापि प्रसज्येत‡ । नैष दोषः । अवश्य-मत्र विभाषा नदीसंज्ञेषितव्या । उभय हीष्यते । हे शकटि हे शकट इति ॥ इह तर्हि शकटिबन्धुरिति नदी बन्धुनीत्येष स्वरः प्रसज्येत । इह च बहुशकटिरिति नद्यृतश्चेति नित्यः कप्प्रसज्येत ॥ नैष दोषः । ङिति ह्रस्वश्च [१.४.६] इत्यय नियमार्थो भविष्यति । ङित्येव यू ह्रस्वौ नदीसंज्ञौ भवतो नान्यत्रेति ॥ कैमर्थ-क्यान्नियमो भवति । विधेयं नास्तीति कृत्वा । इह चास्ति विधेयम् । किम् । नित्या नदीसंज्ञा प्राप्ता सा विभाषा विधेया । तत्रापूर्वो विधिरस्तु नियमो ऽस्त्वित्य-पूर्व एव विधिर्भविष्यति न नियमः ॥ अथायं नित्यो योगः स्यात्प्रकल्पेत निय-मः । बाढं प्रकल्पेत । नित्यस्तर्हि भविष्यति । तत्कथम् । योगविभागः करिष्य-ते§ । इदमस्ति । यू स्त्र्याख्यौ नदी । नेयङुवङ्स्थानावस्त्री [४] । वामि [५] । ततो ङिति । ङिति चेयङुवङ्स्थानौ यू याख्यौ नदीसंज्ञौ न भवत. । ततो ह्रस्वौ । ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः । इयङुवङ्स्थानौ वा नेति च निवृत्तम् ॥ यद्येव शकट्ये अत्र गुणो¶ न प्राप्नोति । द्वितीयो योगविभाग. करिष्यते शेषग्रहण न करिष्यते** । कथम् । इदमस्ति । यू स्त्र्याख्यौ नदी । नेयङुवङ्स्थानावस्त्री । वामि । ततो ङिति । ङिति चेयङुवङ्स्थानौ यू याख्यौ नदीसंज्ञौ न भवत. । ततो ह्रस्वौ । ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवत. । इयङुवङ्स्थानौ वा नेति च निवृत्तम् । ततो घि । घिसंज्ञौ च भवतः स्त्र्याख्यौ यू ह्रस्वौ ङिति । ततो ऽसखि । सखिवर्जितौ च यू ह्रस्वौ घिसंज्ञौ भवतः । स्त्र्याख्यौ ङितीति च निवृत्तम् ॥

---

* ६.१.१०५ | † १.४.८ ‡ ७.३.१०८ § १.४.६ ¶ ७.३.१११ ** १.४.७

यदि तर्हि शेषग्रहणं न क्रियते नार्थ एकेनापि योगविभागेन । अविशेषेण नदीसंज्ञोत्सर्गः । तस्या ह्रस्वयोर्घिसंज्ञा बाधिका । तस्यां नित्यायां प्राप्तायामियं ङिति विभाषारभ्यते ॥ अथवा पुनरस्तु दीर्घयोः । ननु चोक्तं निर्देशो नोपपद्यत इति दीर्घाद्धि पूर्वसवर्णः प्रतिषिध्यत इति । वा छन्दसि [६.१.१०६] इत्येवं भविष्यति । छन्दसीत्युच्यते न चेदं छन्दः । छन्दोवत्सूत्राणि भवन्तीति ॥ यदप्युच्यत उत्तरत्र विशेषणं न प्रकल्पेत यू ह्रस्वाविति यदि यू न ह्रस्वौ अथ ह्रस्वौ न यू यू ह्रस्वाविति विप्रतिषिद्धमिति । नैतद्विप्रतिषिद्धम् । आहायं यू ह्रस्वाविति । यदि यू न ह्रस्वौ । अथ ह्रस्वौ न यू । न एवं विज्ञास्यामः । य्वोर्यौ ह्रस्वाविति । कौ च य्वोर्ह्रस्वौ । सवर्णौ ॥

अथ स्त्र्याख्याविति कोऽयं शब्दः । स्त्रियमाचक्षाते स्त्र्याख्यौ । यद्येवं स्त्र्याख्यायाविति प्राप्नोति* । अनुपसर्गे हि को विधीयते† । न तर्हीदानीमिदं भवति

यस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ ।
ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति ॥

छन्दोवत्कवयः कुर्वन्ति । न ह्येषेष्टिः ॥ एवं तर्हि कर्मसाधनो भविष्यति‡ । स्त्रियामाख्यायेते स्त्र्याख्यौ । यदि कर्मसाधनः कृत्स्त्रिया धातुस्त्रियाश्च न सिध्यति । तन्त्र्यै लक्ष्म्यै श्रियै भुवे ॥ एवं तर्हि बहुव्रीहिर्भविष्यति । स्त्रियमाख्यानयोः स्त्र्याख्यौ । एवमपि कृत्स्त्रिया धातुस्त्रियाश्च न सिध्यति । तन्त्र्यै लक्ष्म्यै श्रियै भुवे ॥ एवं तर्हि विज्भविष्यति§ ॥ अथवा पुनरस्तु क एव । स्त्रियमाचक्षाते स्त्र्याख्याविति । ननु चोक्तं स्त्र्याख्यायाविति प्राप्नोति अनुपसर्गे हि को विधीयत इति । मूलविभुजादिपाठात्को भविष्यति¶ । एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं

यस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ ।
ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवतीति ॥

अथाख्याग्रहणं किमर्थम् ।

नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयार्थम् ॥ १ ॥

नदीसंज्ञायामाख्याग्रहणं क्रियते स्त्रीविषयार्थम् । स्त्रीविषयावेव यौ नित्यं तयोरेव नदीसंज्ञा यथा स्यात् । इह मा भूत् । ग्रामण्ये सेनान्ये स्त्रिया इति ॥

---

* ३.१.१. † ३.१.३. ‡ ३.३.५८*. § ३.२.७४. ¶ ३.२.५*.
10 ५

प्रथमलिङ्गग्रहणं च ॥ २ ॥

प्रथमलिङ्गग्रहणं च कर्तव्यम् । प्रथमलिङ्गे यौ स्त्र्याख्याविति वक्तव्यम् ॥ किं प्रयोजनम् ।

प्रयोजनं क्विब्लुप्समासाः ॥ ३ ॥

क्विप् । कुमार्यै* ब्राह्मणाय । लुप् । सरकुट्यै† ब्राह्मणाय । समास । अतितन्त्र्यै ब्राह्मणाय । अतिलक्ष्म्यै ब्राह्मणाय ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अवयवस्त्रीविषयत्वात्सिद्धम् । अवयवोऽत्र स्त्रीविषयस्तदाश्रया नदीसंज्ञा भविष्यति ।

अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गोऽवयवस्येयङुवङ्स्थानत्वात् ॥ ४ ॥

अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधे‡ यण्स्थानयोरपि स्त्र्योः प्रतिषेधः प्रसज्येत । आध्यै प्रध्यै§ ब्राह्मण्यै । किं कारणम् । अवयवस्येयङुवङ्स्थानत्वात् । अवयवो ऽत्रेयङुवङ्स्थानः¶ ॥

सिद्धं त्वङ्गरूपग्रहणाद्यस्याङ्गस्येयुवौ तत्प्रतिषेधात् ॥ ५ ॥

सिद्धमेतत् । कथम् । अङ्गरूपं गृह्यते । यस्याङ्गस्येयुवौ भवतस्तस्येदं ग्रहणं न चैतस्याङ्गस्येयुवौ भवतः ॥

ह्रस्वेयुवस्थानप्रवृत्तौ च स्त्रीवचने ॥ ६ ॥

ह्रस्वौ चेयुवस्थानौ च प्राक् च प्रवृत्तेः स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यम् । शकट्यै** अतिशकट्यै ब्राह्मण्यै । क मा भूत् । शकटये** अतिशकटये ब्राह्मणाय । धेन्वै अतिधेन्वै ब्राह्मण्यै । क मा भूत् । धेनवे अतिधेनवे ब्राह्मणाय । श्रियै अतिश्रियै ब्राह्मण्यै । क मा भूत् । श्रिये अतिश्रिये ब्राह्मणाय । भ्रुवै अतिभ्रुवै ब्राह्मण्यै । क मा भूत् । भ्रुवे अतिभ्रुवे ब्राह्मणाय ॥

अपर आह । ह्रस्वौ चेयुवस्थानौ च प्रवृत्तावपि स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यम् । शकट्यै अतिशकट्यै ब्राह्मण्यै । क मा भूत् । शकटये अतिशकटये ब्राह्मणाय । धेन्वै अतिधेन्वै ब्राह्मण्यै । क मा भूत् । धेनवे अतिधेनवे ब्राह्मणाय । श्रियै अतिश्रियै ब्राह्मण्यै । क मा भूत् । श्रिये अतिश्रिये ब्राह्मणाय । भ्रुवै अतिभ्रुवै ब्राह्मण्यै । क मा भूत् । भ्रुवे अतिभ्रुवे ब्राह्मणाय ॥

[illegible]

किमर्थं पुनरिदमुच्यते । प्रथमलिङ्गग्रहणं चोदितम् । तद्वक्ष्यं विजानीयात्सर्वमेतद्विकल्पत इति । तदाचार्यः सुहृद्भूत्वान्वाचष्टे ह्रस्वौ चेयुवस्थानौ च प्रवृत्तौ च प्राक् प्रवृत्तेः स्त्रीवचनविवेति ॥

षष्ठीयुक्तश्छन्दसि वा ॥ १ । ४ । ९ ॥

योगविभागः कर्तव्यः । षष्ठीयुक्तश्छन्दसि । षष्ठीयुक्तः पतिशब्दश्छन्दसि घिसंज्ञो भवति । ततो वा । वा छन्दसि सर्वे विधयो भवन्ति । सुपां व्यत्ययः । तिङां व्यत्ययः । वर्णव्यत्ययः । लिङ्गव्यत्ययः । कालव्यत्ययः । पुरुषव्यत्ययः । आत्मनेपदव्यत्ययः । परस्मैपदव्यत्ययः ॥ सुपां व्यत्ययः । युक्ता मातासीद्धुरि दक्षिणायाः । दक्षिणायामिति प्राप्ते ॥ तिङां व्यत्ययः । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते ॥ वर्णव्यत्ययः । त्रिष्टुभौजः शुभितमुग्रवीरम् । सुहितमिति प्राप्ते ॥ लिङ्गव्यत्ययः । मधोर्गृह्णाति । मधोस्तृप्ता इवासते । मधुन इति प्राप्ते ॥ कालव्यत्ययः । श्वोऽग्नीनाधास्यमानेन । श्वः सोमेन यक्ष्यमाणेन । श्व आधाता श्वो यष्टेति प्राप्ते* ॥ पुरुषव्यत्ययः । अधा स वीरैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते ॥ आत्मनेपदव्यत्ययः । ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते ॥ परस्मैपदव्यत्ययः । प्रतीपमन्य ऊर्मिर्युध्यति । अन्वीपमन्य ऊर्मिर्युध्यति । युध्यत इति प्राप्ते ॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गम् ॥ १ । ४ । १३ ॥

यस्मादिति व्यपदेशाय ॥ अथ प्रत्ययग्रहणं किमर्थम् । यस्माद्विधिस्तदादि प्रत्ययेऽङ्गमितीयत्युच्यमाने स्त्री इयती† स्त्रीयतीत्यत्रापि प्रसज्येत‡ । प्रत्ययग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथ विधिग्रहणं किमर्थम् । यस्मात्प्रत्ययस्तदादि प्रत्ययेऽङ्गमितीयत्युच्यमाने दधि अधुना मधु अधुनाऽ अत्रापि प्रसज्येत§¶ । विधिग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ तदेतत्प्रत्ययग्रहणेन विधिग्रहणेन च समुदितेन क्रियते सनियोगः । यस्माद्यः प्रत्ययो विधीयते तदादि तस्मिन्नङ्गसंज्ञं भवतीति ॥ अथ तदादिग्रहणं किमर्थम् ।

* ३ ३ १५ † ५ २ ४०, ७ १ ३, ६ ३ ९० ६ ४ १४८ ‡ ६ ४ १४८
§ ७ ३ १७ ¶ ... १४८, ... ७२

अङ्गसंज्ञायां तदादिवचनं स्यादिनुमर्थम् ॥ १ ॥

अङ्गसंज्ञायां तदादिग्रहणं क्रियते स्याद्यर्थं नुमर्थं च ॥ स्याद्यर्थं तावत् । करिष्यावः करिष्यामः* ॥ नुमर्थम् । कुण्डानि वनानि† ॥

मित्त्वुटोरुपसंख्यानम् ॥ २ ॥

मित्वतः सुड्वतश्चोपसंख्यानं कर्तव्यम् । मित्वतः । भिनत्ति छिनत्ति । अभिनत् अच्छिनत्‡ । सुड्वतः । संचस्करतुः संचस्करुः§ ॥ किं पुनः कारणं न सिध्यति । सुटो बहिरङ्गत्वात् । बहिरङ्गः सुट् । अन्तरङ्गो गुणः । असिद्धं बहिरङ्गमन्तरङ्गे । वक्ष्यत्येतत् । संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम्¶ । यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन । इहापि सस्वरतुः सस्वरुरिति संयोगोपधस्येत्येव सिद्धम् । भवेदेवमर्थेन नार्थः । इदं तु न सिध्यति संचस्करतुः संचस्करुः ॥ किं पुनः कारणं न सिध्यति । इह तस्य वा ग्रहणं भवति तदादेर्वा न चेदं तन्नापि तदादि ।

सिद्धं तु तदाद्यादिवचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । तदाद्याद्यङ्गसंज्ञं भवतीति वक्तव्यम् । किमिदं तदाद्यादीति । तस्यादिस्तदादिः । तदादिरादिर्यस्य तदिदं तदाद्यादीति ॥ स तर्हि तथा निर्देशः कर्तव्यः । न कर्तव्यः । उत्तरपदलोपो ऽत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः । खरमुखः । एवं तदाद्यादि तदादीति ॥

तदेकदेशविज्ञानाद्वा सिद्धम् ॥ ४ ॥

तदेकदेशविज्ञानाद्वा सिद्धमेतत् । तदेकदेशभूतं तद्ग्रहणेन गृह्यते । तद्यथा । गङ्गा यमुना देवदत्तेति । अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते । तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते ॥ विषम उपन्यासः । इह केचिच्छब्दा अव्यवस्थितपरिमाणानामर्थानां वाचका भवन्ति ये एते संख्याशब्दाः परिमाणशब्दाश्च । पञ्च सप्तेत्येकेनाप्यपाये न भवन्ति । द्रोणः खार्याढकमिति नैवाधिके भवन्ति न च न्यूने । केचिद्यावदेव तद्भवति तावदेवाहुर्य एते जातिशब्दा गुणशब्दाश्च । तैलं घृतमिति खार्यामपि भवन्ति द्रोणे ऽपि । शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रे ऽपि द्रव्ये । अङ्गसंज्ञा चाप्यव्यवस्थितपरिमाणानां क्रियते सा केनाधिकस्य स्यात् ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्-

* ३।१।३३ † १।१।२ ‡ [illegible] § [illegible] ¶ [illegible]

हणेन गृह्यत इति यदयं नेदमदसोरकोः [७.१.११] इति सककारयोः प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात् । पश्यति त्वाचार्यस्तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ततः सककारयोः प्रतिषेधं शास्ति ॥

अथ द्वितीयं प्रत्ययग्रहणं किमर्थम् ।

प्रत्ययग्रहणं पदादावप्रसङ्गार्थम् ॥ ५ ॥

प्रत्ययग्रहणं क्रियते पदादावङ्गसंज्ञा मा भूदिति । किं च स्यात् । छ्यर्थम् श्र्यर्थम् भ्र्वर्थम् । अङ्गस्येतीयङुवङौ स्याताम्* ॥

परिमाणार्थं च ॥ ६ ॥

परिमाणार्थं च द्वितीयं प्रत्ययग्रहणं क्रियते । यस्मात्प्रत्ययविधिस्तदाद्यङ्गमितीयत्युच्यमाने दाशतयस्याप्यङ्गसंज्ञा प्रसज्येत ॥

तर्हि कर्तव्यम् । न कर्तव्यम् । केनेदानीमङ्गकार्यं भविष्यति । प्रत्यय इति प्रकृत्याङ्गकार्यमध्येष्ये । यदि प्रत्यय इति प्रकृत्याङ्गकार्यमधीषे प्राकरोत् उपैहिट उपसर्गात्पूर्वावडाटौ माप्नुतः† ।

सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ॥ ७ ॥

सिद्धमेतत् । कथम् । प्रत्ययग्रहणे यस्मात्स प्रत्ययो विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीत्येषा परिभाषा कर्तव्या ॥ कः पुनरत्र विशेष एषा परिभाषा क्रियेत प्रत्ययग्रहणं वा । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः ॥ ८ ॥

धातु । देवदत्तश्चिकीर्षति । सघातस्य धातुसंज्ञा प्राप्नोति‡ ॥ प्रातिपदिक । देवदत्तो गार्ग्यः । सघातस्य प्रातिपदिकसंज्ञा प्राप्नोति§ ॥ प्रत्यय । महान्तं पुत्रमिच्छति । संघातात्प्रत्ययोत्पत्तिः प्राप्नोति¶ ॥ समास । ऋद्धस्य राज्ञः पुरुषः । संघातस्य समाससंज्ञा प्राप्नोति** ॥ तद्धितविधि । देवदत्तो गार्ग्यायणः । संघातात्तद्धितोत्पत्तिः प्राप्नोति†† ॥ स्वर । देवदत्तो गार्ग्यः । संघातस्य ञ्नित्यादिर्नित्यम् [६.१.१९७] इत्याद्युदात्तत्वं

* ६.४.७७, ८२. † ६.४.७१, ७२ ‡ ३.१.३२; २.४.७१. § १.२.४६, २.४.७१
¶ ३.१.८. ** २.२.८ †† ४.१.१०१, २.४.७१

प्राप्नोति ॥ प्रत्ययग्रहणे यस्मात्स तदादेस्तदन्तस्य ग्रहणं भवतीति न दोषो भवति ॥ सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । एवं वक्ष्यामि । यस्मात्प्रत्ययविधिस्तदादि प्रत्यये गृह्यमाणे गृह्यते । ततोऽङ्गम् । अङ्गसंज्ञं च भवति यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ॥

यदि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युच्यते अवतप्तेनकुलस्थितं त एतत् उदकेविशीर्णं त एतत् सगतिकेन सनकुलेन च समासो* न प्राप्नोति । एवं तर्हि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युक्त्वा ततो वक्ष्यामि

कृद्ग्रहणे गतिकारकपूर्वस्यापि ॥ ९ ॥

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीत्येषा परिभाषा कर्तव्या ॥ कान्येतस्याः परिभाषायाः प्रयोजनानि ।

प्रयोजनं समासतद्धितविधिस्वराः ॥ १० ॥

समास । अवतप्तेनकुलस्थितं त एतत् । उदकेविशीर्णं त एतत् । सगतिकेन सनकुलेन च समासः सिद्धो भवति । समास ॥ तद्धितविधि । सांकूटिनम् व्यावक्रोशी । संघातात्तद्धितोत्पत्तिः सिद्धा भवति । तद्धितविधि ॥ स्वर । दूरात् आगतः दूरादागत इति† । अन्तस्थाथघञ्क्ताजबित्रकाणाम् [६.२.१४३:१४४] इत्येष स्वरः सिद्धो भवति ॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति न दोषो भवति ॥ सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं गतिरनन्तरः [६.२.४९] इत्यनन्तरग्रहणं करोति ॥

सुप्तिङन्तं पदम् ॥१।४।१४॥

अन्तग्रहणं किमर्थं न सुप्तिङ् पदमित्येवोच्येत । केनेदानीं तदन्तानां भविष्यति । तदन्तविधिना§ ॥ अत उत्तरं पठति ।

पदसंज्ञायामन्तवचनमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम् ॥ १ ॥

पदसंज्ञायामन्तग्रहणं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्योऽन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवतीति । किमेतस्य ज्ञापने प्रयोज-

* [illegible] † [illegible] ‡ [illegible] § [illegible]

नम् । तरप्तमपौ घः [१.१.२२] तरप्तमबन्तस्य घसंज्ञा न भवति । किं च स्यात् । कुमारी गौरितरा । घादिषु नद्या ह्रस्वो भवतीति* ह्रस्वत्वं प्रसज्येत ॥ यद्येतज्ज्ञाप्यते सनाद्यन्ता धातवः [३.१.३२] इत्यन्तग्रहणं कर्तव्यम् । कृत्तद्धितसमासाश्च [१.२.४६] इत्यन्तग्रहणं कर्तव्यम् । इदं तृतीयं ज्ञापकार्थम् ॥ द्वे तावत्क्रियेते न्यास एव । यदप्युच्यते कृत्तद्धितसमासाश्चेत्यन्तग्रहणं कर्तव्यमिति । न कर्तव्यम् । अर्थवदिति वर्तते[†] कृत्तद्धितान्तं चैवार्थवन्न केवलाः कृतस्तद्धिता वा ॥

नः क्ये ॥१।४।१५॥

किमर्थमिदमुच्यते न सुबन्तं पदमित्येव सिद्धम्[‡] । नियमार्थोऽयमारम्भः । नान्तमेव क्ये पदसंज्ञं भवति नान्यत् । क्व मा भूत् । वाच्यति स्रुच्यति[§] ॥

स्वादिष्वसर्वनामस्थाने ॥ १ । ४ । १७ ॥

असर्वनामस्थान इत्युच्यते तत्र ते राजा तक्षा[¶] असर्वनामस्थान इति पदसंज्ञायाः प्रतिषेधः प्रसज्येत ॥ नाप्रतिषेधात् । नायं प्रसज्यप्रतिषेधः सर्वनामस्थाने नेति । किं तर्हि । पर्युदासोऽयं यदन्यत्सर्वनामस्थानादिति । सर्वनामस्थाने ऽव्यापारः । यदि केनचित्प्राप्नोति तेन भविष्यति । पूर्वेण च प्राप्नोति ॥ अप्राप्तेर्वा । अथवानन्तरा या प्राप्तिः सा प्रतिषिध्यते । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति । ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते । नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥ अथवा योगविभागः करिष्यते । स्वादिषु पूर्वं पदसंज्ञं भवति । ततः सर्वनामस्थाने ऽयचि । पूर्वं पदसंज्ञं भवति । ततो भम् । भसंज्ञं च भवति यजादावसर्वनामस्थान इति ॥ यदि तर्हि सावपि पदं भवत्येचः प्लुतविकारे पदान्तग्रहणं चोदितम्[**] इह मा भूत् भद्रं करोषि गौरिति तस्मिन्क्रियमाणेऽपि प्राप्नोति । वाक्यपदयोरन्त्यस्येत्येवं तत् ॥

भुवद्वद्भ्यः धारयद्वद्भ्यः एतयोः पदसंज्ञा वक्तव्या । भुवद्वद्भ्यः धारयद्वद्भ्यः ॥

---

* ६.३.४३ † १.३.४५ ‡ १.४.१४, २.४.७१; ११.६२. § ८.२.३०, ३९.
¶ ६१.१८; ११.६२ ** ८.२.१०७.

यचि भम् ॥ १ । ४ । १८ ॥

भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधः ॥ १ ॥

भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधो वक्तव्यः । अनुकम्पितः षडङ्गुलिः षडिकः* ॥

सिद्धमचः स्थानिवत्त्वात् ॥ २ ॥

सिद्धमेतत् । कथम् । अचः स्थानिवद्भावाद्भसंज्ञा न भविष्यति ॥ इहापि तर्हि प्राप्नोति । वागाशीर्दत्तो वाचिक इति । वक्ष्यत्येतत् । सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपवचनादिति† । इहापि तर्हि प्राप्नोति । षडङ्गुलिः षडिक इति । वक्ष्यत्येतत् । षषष्ठाजादिवचनात्सिद्धमिति† ॥

नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ॥ ३ ॥

नभोऽङ्गिरोमनुषां वत्युपसंख्यानं कर्तव्यम् । नभस्वत् अङ्गिरस्वत् मनुष्वत्‡ ॥

वृषण्वस्वश्वयोः ॥ ४ ॥

वृषणित्येतस्य वस्वश्वयोर्भसंज्ञा वक्तव्या§ । वृषण्वसुः । वृषणश्वस्य यच्छिर. । वृषणश्वस्य मेने ॥

तसौ मत्वर्थे ॥ १ । ४ । १९ ॥

अर्थग्रहणं किमर्थं न तसौ मतावित्येवोच्येत । तसौ मतावितीयत्युच्यमान इहैव स्यात् पयस्वान् यशस्वान् । इह न स्यात् पयस्वी यशस्वी । अर्थग्रहणे पुनः क्रियमाणे मतुपि च सिद्धं भवति यच्चान्यत्तेन समानार्थं तस्मिंश्च ॥ यद्यर्थग्रहणं क्रियते पयस्वान् यशस्वान् अत्र न प्राप्नोति । किं कारणम् । न हि मतुब्मत्वर्थे वर्तते । मतुबपि मत्वर्थे वर्तते । तद्यथा । देवदत्तशालायां ब्राह्मणा आनीयन्तामित्युक्ते यदि देवदत्तोऽपि ब्राह्मणो भवति सोऽप्यानीयते ॥

अयस्मयादीनि छन्दसि ॥ १ । ४ । २० ॥

उभयसंज्ञान्यपीति वक्तव्यम् । स सुष्टुभा स ऋक्वता¶ गणेन ॥

---

* [illegible] † [illegible] ‡ [illegible]
§ [illegible] ¶ [illegible]

बहुषु बहुवचनम् ॥१।४।२१॥

बहुषु बहुवचनमित्युच्यते । केषु बहुषु । अर्थेषु । यद्येवं वृक्षः प्लक्षः अत्रापि प्राप्नोति । बहवस्ते ऽर्था मूलं स्कन्धः फलं पलाशमिति ॥ एवं तर्ह्येकवचनं द्विवचनं बहुवचनमिति शब्दसंज्ञा एताः । येष्वर्थेषु स्वादयो विधीयन्ते तेषु बहुषु । केषु चार्थेषु स्वादयो विधीयन्ते । कर्मादिषु । न वै कर्मादयो विभक्त्यर्थाः । के तर्हि । एकत्वादयः । एकत्वादिष्वपि वै विभक्त्यर्थेष्ववश्यं कर्मादयो निमित्तत्वेनोपादेयाः । कर्मण एकत्वे कर्मणो द्वित्वे कर्मणो बहुत्व इति ॥ स तर्हि तथा निर्देशः कर्तव्यो न ह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः । इह चैत्येके मन्यन्ते तदेके मन्यन्त इति परत्वादेकवचनं प्राप्नोति* ॥ बहुषु बहुवचनमित्येष योगः परः करिष्यते ॥ सूत्रविपर्यासः कृतो भवति । इह च बहुरोदनः बहुः सूप इति परत्वाद्बहुवचनं प्राप्नोति ॥ नैष दोषः । यत्तावदुच्यते न ह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देश इति तन्न । अन्तरेणापि भावप्रत्ययं गुणप्रधानो भवति निर्देशः । कथम् । इह कदाचिद्गुणो गुणिविशेषको भवति । तद्यथा । पटः शुक्ल इति । कदाचिच्च गुणिना गुणो व्यपदिश्यते । पटस्य शुक्ल इति । तद्यदा तावद्गुणो गुणिविशेषको भवति पटः शुक्ल इति तदा सामानाधिकरण्यं गुणगुणिनोः । तदा नान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः । यदा तु गुणिना गुणो व्यपदिश्यते पटस्य शुक्ल इति स्वप्रधानस्तदा गुणो भवति । तदा द्रव्ये षष्ठी । तदान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः ॥ न चेह वयमेकत्वादिभिः कर्मादीन्विशेषयिष्यामः । किं तर्हि । कर्मादिभिरेकत्वादीन्विशेषयिष्यामः । कथम् । एकस्मिन्नेकवचनम् । कस्यैकस्मिन् । कर्मणः । द्वयोर्द्विवचनम् । कयोर्द्वयोः । कर्मणोः । बहुषु बहुवचनम् । केषां बहुषु । कर्मणामिति ॥ कथं बहुषु बहुवचनमिति । एतदेव ज्ञापयत्याचार्यो नानाधिकरणवाची यो बहुशब्दस्तस्येदं ग्रहणं न वैपुल्यवाचिन इति । किमेतस्य ज्ञापने प्रयोजनम् । यदुक्तं बहुरोदनः बहुः सूप इति परत्वाद्बहुवचनं प्राप्नोतीति स दोषो न भवति ॥ यदप्युच्यते इहैके मन्यन्ते तदेके मन्यन्त इति परत्वादेकवचनं प्राप्नोतीति नैष दोषः । एकशब्दोऽयं बह्वर्थः । अस्त्येव संख्यावाची । तद्यथा । एको द्वौ बहव इति । अस्त्यसहायवाची । तद्यथा । एकाग्नयः एकहलानि एकाकिभिः क्षुद्रकैर्जितमिति । अस्त्यन्यार्थे वर्तते । तद्यथा । सधमादो द्युम्न एकास्ताः । अन्या इत्यर्थः । तद्यो ऽन्यार्थे वर्तते तस्यैष प्रयोगः ॥

* १.४.२२.

किमर्थं पुनरिदमुच्यते ।

सुप्तिङामविशेषविधानादृष्टविप्रयोगत्वाच्च नियमार्थं वचनम् ॥ १ ॥

सुपो ऽविशेषेण प्रातिपदिकमात्राद्विधीयन्ते* । तिङो ऽविशेषेण धातुमात्राद्विधीयन्ते† । तत्रैतत्स्याद्यद्यप्यविशेषेण विधीयन्ते नैव विप्रयोगो लक्ष्यत इति । दृष्टविप्रयोगत्वाच्च । दृश्यते खल्वपि विप्रयोगः । तद्यथा । अक्षीणि मे दर्शनीयानि । पादा मे सुकुमारा इति । सुप्तिङोरविशेषविधानादृष्टविप्रयोगत्वाच्च व्यतिकरः प्राप्नोति । इष्यते चाव्यतिकरः स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वचनम् । एवमर्थमिदमुच्यते ॥ अथैतस्मिन्नियमार्थे सति किं पुनरयं प्रत्ययनियमः । एकस्मिन्नेवैकवचनं द्वयोरेव द्विवचनं बहुष्वेव बहुवचनमिति । आहोस्विदर्थनियमः । एकस्मिन्नेकवचनमेव द्वयोर्द्विवचनमेव बहुषु बहुवचनमेवेति । कश्चात्र विशेषः ।

तत्र प्रत्ययनियमे ऽव्ययानां पदसंज्ञाभावो ऽसुबन्तत्वात् ॥ २ ॥

तत्र प्रत्ययनियमे ऽव्ययानां पदसंज्ञा न प्राप्नोति । उच्चैः नीचैरिति । किं कारणम् । असुबन्तत्वात् ॥

अर्थनियमे सिद्धम् ॥ ३ ॥

अर्थनियमे सिद्धं भवति । अस्त्वर्थनियमः ॥ अथवा पुनरस्तु प्रत्ययनियमः । ननु चोक्तं तत्र प्रत्ययनियमे ऽव्ययानां पदसंज्ञाभावो ऽसुबन्तत्वादिति । नैष दोषः ।

सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम् ।

सुपां संख्या नैवार्थः कर्मादयश्च । तथा तिङाम् ॥

प्रसिद्धो नियमस्तत्र

प्रसिद्धस्तत्र नियमः ॥

नियमः प्रकृतेषु वा ॥

अथवा प्रकृतानर्थानपेक्ष्य नियमः । के च प्रकृताः । एकत्वादयः । एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु । द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु । बहुष्वेव बहुवचनं न द्वयोर्नैकस्मिन्निति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्ते ऽव्ययेभ्यः स्वादय इति यदयमव्ययादाप्सुपः [२.४.८२] इत्यव्ययाल्लुकं शास्ति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् ॥

---

* ४.१.१. † ३.४.७८.

कारके ॥ १ । ४ । २३ ॥

किमिदं कारक इति । संज्ञानिर्देशः । कि वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । इह हि व्याकरणे ये वैते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते पशुरपत्यं देवतेति या वैताः कृत्रिमाटिघुघभसंज्ञास्ताभिः । न चायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दो न खल्वपि कृत्रिमा संज्ञान्यत्राविधानात् । संज्ञाधिकारश्चायं तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः ॥

कारक इति संज्ञानिर्देशश्चेत्संज्ञिनो ऽपि निर्देशः ॥ १ ॥

कारक इति संज्ञानिर्देशश्चेत्संज्ञिनो ऽपि निर्देशः कर्तव्यः । साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम् ॥

इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्य ॥ २ ॥

इतरथा ह्यनिष्टं प्रसज्येत । अकारकस्याप्यपादानसंज्ञा प्रसज्येत । क्व । ग्रामस्य* समीपादागच्छतीति ॥ नैष दोषः । नात्र ग्रामो ऽपाययुक्तः । किं तर्हि । समीपम् । यदा च ग्रामोऽपाययुक्तो भवति भवति तदापादानसंज्ञा । तद्यथा । ग्रामादागच्छतीति ॥

कर्मसंज्ञाप्रसङ्गो ऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति ॥ ३ ॥

कर्मसंज्ञा च प्राप्नोत्यकथितस्य । क्व । ब्राह्मणस्य† पुत्रं पन्थानं पृच्छतीति ॥ नैष दोषः । अयमकथितशब्दो ऽस्त्येवासंकीर्तिते वर्तते । तद्यथा । कश्चित्कंचित्संचक्ष्याह । असावत्राकथितः । असंकीर्तित इति गम्यते । अस्त्यप्राधान्ये वर्तते । तद्यथा । अकथितो ऽसौ ग्रामे अकथितो ऽसौ नगर इत्युच्यते यो यत्राप्रधानो भवति ॥ तद्यदाप्राधान्ये ऽकथितशब्दो वर्तते तदैष दोषः कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति ॥

अपादानं च वृक्षस्य पर्णं पततीति ॥ ४ ॥

अपादानसंज्ञा च प्राप्नोति । क्व । वृक्षस्य* पर्णं पतति । कुड्यस्य पिण्डः पततीति ॥

---

*१.४.२४. †१.४.५१

न वापायस्याविवक्षितत्वात् ॥ ५ ॥

न वैष दोषः । किं कारणम् । अपायस्याविवक्षितत्वात् । नात्रापायो विवक्षितः । किं तर्हि । संबन्धः । यदा चापायो विवक्षितो भवति भवति तदापादानसंज्ञा । तद्यथा । वृक्षात्पर्णं पततीति । संबन्धस्तु तदा न विवक्षितो भवति । न ज्ञायते कङ्कस्य वा कुररस्य वेति ॥

अयं तर्हि दोषः कर्मसंज्ञाप्रसङ्गश्चाकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति । नैष दोषः । कारक इति महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः । कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत । करोतीति कारकमिति ।

अन्वर्थमिति चेदकर्तरि कर्तृशब्दानुपपत्तिः ॥ ६ ॥

अन्वर्थमिति चेदकर्तरि कर्तृशब्दो नोपपद्यते । करणं कारकम् । अधिकरणं कारकमिति ॥

सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभावः ॥ ७ ॥

सिद्धः करणाधिकरणयोः कर्तृभावः । कुतः । प्रतिकारकं क्रियाभेदात्पचादीनाम् । पचादीनां हि प्रतिकारकं क्रिया भिद्यते । किमिदं प्रतिकारकमिति । कारकं कारकं प्रति प्रतिकारकम् ॥ कोऽसौ प्रतिकारकं क्रियाभेदः पचादीनाम् ।

अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः ॥ ८ ॥

अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते । तत्र तदा पचिर्वर्तते । एष प्रधानकर्तुः पाकः । एतत्प्रधानकर्तुः कर्तृत्वम् ॥

द्रोणं पचत्याढकं पचतीति संभवनक्रिया धारणक्रिया चाधिकरणस्य पाकः ॥ ९ ॥

द्रोणं पचत्याढकं पचतीति संभवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते । तत्र तदा पचिर्वर्तते । एषोऽधिकरणस्य पाकः । एतदधिकरणस्य कर्तृत्वम् ॥

एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः ॥१०॥

एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते । तत्र तदा पचिर्वर्तते । एष करणस्य पाकः । एतत्करणस्य कर्तृत्वम् ॥

उद्यमननिपातनानि कर्तुश्छिदिक्रिया ॥ ११ ॥

उद्यमननिपातनानि कुर्वन्देवदत्तश्छिनत्तीत्युच्यते । तत्र तदा छिदिर्वर्तते । एष प्रधानकर्तुश्छेदः । एतत्प्रधानकर्तुः कर्तृत्वम् ॥

यत्तत्र तृणेन तत्परशोश्छेदनम् ॥ १२ ॥

यत्तत्समान उद्यमने निपातने च परशुना छिद्यते न तृणेन तत्परशोश्छेदनम् ॥ अवश्यं चैतदेवं विज्ञेयम् ।

इतरथा ह्यसितृणयोश्छेदने ऽविशेषः स्यात् ॥ १३ ॥

यो हि मन्यत उद्यमननिपातनादेवैतद्भवति छिनत्तीत्यसितृणयोश्छेदने न तस्य विशेषः स्यात् । यदसिना छिद्यते तृणेनापि तच्छिद्येत ॥

अपादानादीनां त्वप्रसिद्धिः ॥ १४ ॥

अपादानादीनां कर्तृत्वस्याप्रसिद्धिः । यथा हि भवता करणाधिकरणयोः कर्तृत्वं निदर्शितं न तथापादानादीनां कर्तृत्वं निदर्श्यते ॥

न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा॥ १५॥

न वैष दोषः । किं कारणम् । स्वतन्त्रपरतन्त्रत्वात् । सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यं च विवक्षितम् । तयोः पर्यायेण वचनम् । तयोः स्वातन्त्र्यपारतन्त्र्ययोः पर्यायेण वचनं भविष्यति । वचनाश्रया च संज्ञा भविष्यति । तद्यथा । बलाहकाद्विद्योतते । बलाहके विद्योतते । बलाहको विद्योतत इति ॥ किं तर्ह्युच्यते ऽपादानादीनां त्वप्रसिद्धिरिति । एवं तर्हि न ब्रूमो ऽपादानादीनां कर्तृत्वस्याप्रसिद्धिरिति । पर्याप्तं करणाधिकरणयोः कर्तृत्वं निदर्शितमपादानादीनां कर्तृत्वनिदर्शनाय । पर्याप्तो हि एकः पुलाकः स्थाल्या निदर्शनाय । किं तर्हि । संज्ञाया अप्रसिद्धिः । यावता सर्वत्रैवात्र स्वातन्त्र्यं विद्यते पारतन्त्र्यं च तत्र परत्वात्कर्तृसंज्ञैव प्राप्नोति* ॥ अत्रापि न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञेत्येव ॥

* १ ४ ५४

यथा पुनरिदं भवता स्थाल्याः स्वातन्त्र्यं निदर्शितं संभवनक्रियां धारणक्रियां च कुर्वती स्थाली स्वतन्त्रेति क्वेदानीं परतन्त्रा स्यात् । यत्तत्प्रक्षालनं परिवर्तनं वा । न वा एवमर्थं स्थाल्युपादीयते प्रक्षालनं परिवर्तनं च करिष्यामीति । किं तर्हि । संभवनक्रियां धारणक्रियां च करिष्यतीति । तत्र चासौ स्वतन्त्रा । क्वेदानीं परतन्त्रा ॥ एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा ॥ ननु च भोः कर्तृस्थेऽपि वै यत्ने कथ्यमाने स्थाली संभवनक्रियां धारणक्रियां च करोति । तत्रासौ स्वतन्त्रा । क्वेदानीं परतन्त्रा ॥ एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा । तद्यथा । अमात्यादीनां राज्ञा सह समवाये पारतन्त्र्यं व्यवाये स्वातन्त्र्यम् । किं पुनः प्रधानम् । कर्ता । कथं पुनर्ज्ञायते कर्ता प्रधानमिति । यत्सर्वेषु साधनेषु संनिहितेषु कर्ता प्रवर्तयिता भवति ॥ ननु च भोः प्रधानेनापि वै समवाये स्थाल्या अनेनार्थो अधिकरणं कारकमिति । न हि कारकमित्यनेनाधिकरणत्वमुक्तमधिकरणमिति वा कारकत्वम् । उभौ चान्योऽन्यविशेषकौ भवतः । कथम् । एकद्रव्यसमवायित्वात् । तद्यथा । गार्ग्यो देवदत्त इति । न हि गार्ग्य इत्यनेन देवदत्तत्वमुक्तं देवदत्त इत्यनेन वा गार्ग्यत्वम् । उभौ चान्योऽन्यविशेषकौ भवत एकद्रव्यसमवायित्वात् ॥ एवं तर्हि सामान्यभूता क्रिया वर्तते तस्या निर्वर्तकं कारकम् ॥ अथवा यावद्ब्रूयात्क्रियायामिति तावत्कारक इति । एवं च कृत्वा निर्देश उपपन्नो भवति कारक इति । इतरथा हि कारकेष्विति ब्रूयात् ॥

ध्रुवमपायेऽपादानम् ॥ १ । ४ । २४ ॥

ध्रुवमिति किमर्थम् । ग्रामादागच्छति शकटेन[*] । नैतदस्ति । करणसंज्ञात्र बाधिका भविष्यति[*] ॥ इदं तर्हि । ग्रामादागच्छन्कंसपात्र्यां[†] पाणिनौदनं भुङ्क्त इति । अत्राप्यधिकरणसंज्ञा बाधिका भविष्यति[†] ॥ इदं तर्हि । वृक्षस्य पर्णं पतति । कुड्यस्य पिण्डः पततीति ॥

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् ॥ १ ॥

जुगुप्साविरामप्रमादार्थानामुपसंख्यानं कर्तव्यम् ॥ जुगुप्सा । अधर्माज्जुगुप्सते । अधर्माद्बीभत्सते ॥ विराम । धर्माद्विरमति । धर्मान्निवर्तते ॥ प्रमाद । धर्मात्प्रमाद्यति । धर्मान्मुह्यति ॥

* १.४.४२ † १.४.४५

इह चोपसंख्यानं कर्तव्यम्। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति ॥

तत्तर्हीदं वक्तव्यम्। न वक्तव्यम्। इह तावदधर्माज्जुगुप्सते अधर्माद्बीभत्सत इति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखो ऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या संप्राप्य निवर्तते। तत्र ध्रुवमपाये ऽपादानमित्येव सिद्धम् ॥ इह च धर्माद्विरमति धर्मान्निवर्तत इति धर्मात्प्रमाद्यति धर्मान्मुह्यतीति य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति नेदं किंचिद्धर्मो नाम नैनं करिष्यामीति। स बुद्ध्या संप्राप्य निवर्तते। तत्र ध्रुवमपाये ऽपादानमित्येव सिद्धम् ॥ इह च सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति यस्तैः साम्यं गतवान्भवति स एतत्प्रयुङ्क्ते ॥

गतियुक्तेष्वपादानसंज्ञा नोपपद्यते ऽध्रुवत्वात् ॥ २ ॥

गतियुक्तेष्वपादानसंज्ञा नोपपद्यते। अश्वात्त्रस्तात्पतितः। रथात्प्रवीतात्पतितः। सार्थाद्गच्छतो हीन इति। किं कारणम्। अध्रुवत्वात् ॥

न वाध्रौव्यस्याविवक्षितत्वात् ॥ ३ ॥

न वैष दोषः। किं कारणम्। अध्रौव्यस्याविवक्षितत्वात्। नात्राध्रौव्यं विवक्षितम्। किं तर्हि। ध्रौव्यम्। इह तावदश्वात्त्रस्तात्पतित इति यत्तदश्वे ऽश्वत्वमाशुगामित्वं तद्ध्रुवं तच्च विवक्षितम्। रथात्प्रवीतात्पतित इति यत्तद्रथे रथत्वं रमन्ते ऽस्मिन्रथ इति तद्ध्रुवं तच्च विवक्षितम्। सार्थाद्गच्छतो हीन इति यत्तत्सार्थे सार्थत्वं सहार्थीभावस्तद्ध्रुवं तच्च विवक्षितम् ॥ यद्यपि तावदत्रैतच्छक्यते वक्तुं ये त्वेते ऽत्यन्तगतियुक्तास्तत्र कथम्। धावतः पतितः। त्वरमाणात्पतित इति। अत्रापि न वाध्रौव्यस्याविवक्षितत्वादित्येव सिद्धम् ॥ कथं पुनः सतो नामाविवक्षा स्यात्। सतो ऽप्यविवक्षा भवति। तद्यथा। अलोमिकैडका। अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुण्डिका। विन्ध्यो वर्धितकमिति ॥

भीत्रार्थानां भयहेतुः ॥ १ । ४ । २५ ॥

अयं योगः शक्यो ऽवक्तुम्। कथं वृकेभ्यो बिभेति दस्युभ्यो बिभेति चौरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति। इह तावद्वृकेभ्यो बिभेति दस्युभ्यो बिभेतीति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति। स बुद्ध्या संप्राप्य निवर्तते। तत्र ध्रुवमपाये ऽपादानम् [१.४.२४] इत्येव

सिद्धम् ॥ इह चोरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति । य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद्भवति स पश्यति यदीमं चौराः पश्यन्ति ध्रुवमस्य वधबन्धनपरिक्लेशा इति । स बुद्ध्या संप्राप्य निवर्तयति । तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम् ॥

पराजेरसोढः ॥ १ । ४ । २६ ॥

अयमपि योगः शक्योऽवक्तुम् । कथम् अध्ययनात्पराजयत इति । य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखमध्ययनं दुर्धरं च गुरवश्च दुरुपचारा इति । स बुद्ध्या संप्राप्य निवर्तते । तत्र ध्रुवमपायेऽपादानम् [१.४.२४] इत्येव सिद्धम् ॥

वारणार्थानामीप्सितः ॥ १ । ४ । २७ ॥

किमुदाहरणम् । माषेभ्यो गा वारयति । भवेद्यस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः । यस्य तु खलु गावो न माषाः कथं तस्य माषा ईप्सिताः स्युः । तस्यापि माषा एवेप्सिताः । आतश्चेप्सिता यदेभ्यो गा वारयति ॥ इह कूपादन्धं वारयतीति कूपेऽपादानसंज्ञा न प्राप्नोति । न हि तस्य कूप ईप्सितः । कस्तर्हि । अन्धः । तस्यापि कूप एवेप्सितः । पश्यत्ययमन्धः कूपं मा प्रापदिति । अथवा यथैवास्यान्यत्रापश्यत ईप्सैव कूपेऽपि ॥ इह अग्नेर्माणवकं वारयतीति माणवकेऽपादानसंज्ञा प्राप्नोति । कर्मसंज्ञात्र बाधिका भविष्यति* । अग्नावपि तर्हि बाधिका स्यात् । तस्माद्वक्तव्यं कर्मणो यदीप्सितमिति । ईप्सितेप्सितमिति वा ।

वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनात् ॥ १ ॥

वारणार्थेषु कर्मग्रहणमनर्थकम् । किं कारणम् । कर्तुरीप्सिततमं कर्म [१.४.४९] इति वचनात् । कर्तुरीप्सिततमं कर्मेत्येव सिद्धम् ॥

अयमपि योगः शक्योऽवक्तुम् । कथं माषेभ्यो गा वारयतीति । पश्यत्ययं यदीमा गावस्तत्र गच्छन्ति ध्रुवं सस्यविनाशः सस्यविनाशेऽधर्मश्च राजभयं च । स बुद्ध्या संप्राप्य निवर्तयति । तत्र ध्रुवमपायेऽपादानम् [१.४.२४] इत्येव सिद्धम् ॥

---

* १.४.४९

अन्तर्धौ येनादर्शनमिच्छति ॥ १ । ४ । २८ ॥

अयमपि योग शक्यो ऽवक्तुम् । कथम् उपाध्यायादन्तर्धत्त इति । पश्यत्यय यदि मामुपाध्याय. पश्यति ध्रुव प्रेषणमुपालम्भो वेति । स बुद्ध्या सप्राप्य निवर्तते । तत्र ध्रुवमपाये ऽपादानम् [१ ४ २४] इत्येव सिद्धम् ॥

आख्यातोपयोगे ॥ १ । ४ । २९ ॥

उपयोग इति किमर्थम् । नटस्य शृणोति । ग्रन्थिकस्य शृणोति ॥ उपयोग इत्युच्यमाने ऽप्यत्र प्राप्नोति । एषोऽपि ह्युपयोग । आतश्चोपयोगो यदारम्भका रङ्ग गच्छन्ति नटस्य श्रोष्यामो ग्रन्थिकस्य श्रोष्याम इति ॥ एव तर्ह्युपयोग इत्युच्यते सर्वश्चोपयोगस्तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो य उपयोग इति । कश्च साधीय । यो ग्रन्थार्थयो ॥ अथवोपयोग· को भवितुमर्हति । यो नियमपूर्वक· । तद्यथा । उपयुक्ता माणवका इत्युच्यन्ते य एते नियमपूर्वकमधीयन्तो भवन्ति ॥

किं पुनराख्यातानुपयोगे कारकमाहोस्विदकारकम् । कश्चात्र विशेष· ।

आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसज्ञाप्रसङ्ग ॥ १ ॥

आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसज्ञा प्राप्नोति* ॥ अस्तु तर्ह्यकारकम् ।

अकारकमिति चेदुपयोगवचनानर्थक्यम् ॥ २ ॥

यद्यकारकमुपयोगवचनमनर्थकम् ॥ अस्तु तर्हि कारकम् । ननु चोक्तमाख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसज्ञाप्रसङ्ग इति । नैष दोष· । परिगणनं तत्र क्रियते । *दुहियाचिरुधिप्रच्छिभिक्षिचिञामिति*† ॥

अयमपि योग शक्यो ऽवक्तुम् । कथम् उपाध्यायादधीत इति । अपक्रामति तस्मात्तदध्ययनम् । यद्यपक्रामति किं नात्यन्तायापक्रामति । सततत्वात् ॥ अथवा ज्योतिर्वज्ज्ञानानि भवन्ति ॥

जनिकर्तुः प्रकृतिः ॥ १ । ४ । ३० ॥

अयमपि योग शक्यो ऽवक्तुम् । कथ गोमयाद्वृश्चिको जायते । गोलोमाविलो-

* १ ४ ५१ † १ ४ ५१*

मभ्यो दूर्वा जायन्त इति । अपक्रामन्ति तास्तेभ्यः । यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति । संततत्वात् ।। अथवान्याश्चान्याश्च प्रादुर्भवन्ति ।।

भुवः प्रभवः ।। १ । ४ । ३१ ।।

अयमपि योगः शक्यो ऽवक्तुम् । कथं हिमवतो गङ्गा प्रभवतीति । अपक्रामन्ति तास्तस्मादापः । यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति । संततत्वात् ।। अथवान्याश्चान्याश्च प्रादुर्भवन्ति ।।

कर्मणा यमभिप्रैति स संप्रदानम् ।। १ । ४ । ३२ ।।

कर्मग्रहणं किमर्थम् । यमभिप्रैति स संप्रदानमितीयत्युच्यमाने कर्मण एव संप्रदानसंज्ञा प्रसज्येत । कर्मग्रहणे पुनः क्रियमाणे न दोषो भवति । कर्म निमित्तत्वेनाश्रीयते ।। अथ यंसग्रहणं किमर्थम् । कर्मणाभिप्रैति संप्रदानमितीयत्युच्यमाने अभिप्रयत एव संप्रदानसंज्ञा प्रसज्येत । यंसग्रहणे पुनः क्रियमाणे न दोषो भवति । यंसग्रहणादभिप्रयतः संप्रदानसंज्ञा निर्भज्यते ।। अथाभिप्रग्रहणं किमर्थम् । कर्मणा यमेति स संप्रदानमितीयत्युच्यमाने यमेव संप्रत्येति तत्रैव स्यात् । उपाध्यायाय गां ददातीति । इह न स्यात् । उपाध्यायाय गामदात् । उपाध्यायाय गां दास्यतीति । अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति । अभिराभिमुख्ये वर्तते प्रशब्द आदिकर्मणि । तेन यं चाभिप्रैति यं चाभिप्रैष्यति यं चाभिप्रागादाभिमुख्यमात्रे सर्वत्र सिद्धं भवति ।।

क्रियाग्रहणमपि कर्तव्यम् । इहापि यथा स्यात् । श्राद्धाय निगर्हते । युद्धाय संनह्यते । पत्ये शेत इति ।। तत्तर्हि वक्तव्यम् । न वक्तव्यम् । कथम् । क्रियां हि लोके कर्मेत्युपचरन्ति । कां क्रियां करिष्यसि । किं कर्म करिष्यसीति । एवमपि कर्तव्यम् । कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति ।। क्रियापि कृत्रिमं कर्म । न सिध्यति । कर्तुरीप्सिततमं कर्म [१.४.४९] इत्युच्यते कथं च नाम क्रियया क्रियेप्सिततमा स्यात् । क्रियापि क्रिययेप्सिततमा भवति । कया क्रियया । संदर्शनक्रियया वा प्रार्थयतिक्रियया वाध्यवस्यतिक्रियया वा । इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्कंचिदर्थं संपश्यति संदृष्टे प्रार्थना प्रार्थनायाम-

ध्यवसायो ऽध्यवसाय आरम्भ आरम्भे निर्वृत्तिर्निर्वृत्तौ फलावाप्तिः । एवं क्रियापि कृत्रिमं कर्म ।।

एवमपि कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य च कर्मसंज्ञा । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः । अग्नौ किल पशुः प्रक्षिप्यते तद्रुद्रायोपह्रियत इति ।।

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।। १ । ४ । ३७ ।।

किमेत एकार्था आहोस्विन्नानार्थाः । किं चातः । यद्येकार्थाः किमर्थं पृथङ्निर्दिश्यन्ते । अथ नानार्थाः कथं कुपिना शक्यन्ते विशेषयितुम् ।। एवं तर्हि नानार्थाः कुपौ त्वेषां सामान्यमस्ति । न ह्यकुपितः क्रुध्यति न चाकुपितो द्रुह्यति न चाकुपित ईर्ष्यति न चाकुपितो ऽसूयति ।।

साधकतमं करणम् ।। १ । ४ । ४२ ।।

तमग्रहणं किमर्थं न साधकं करणमित्येवोच्येत । साधकं करणमितीयत्युच्यमाने सर्वेषां कारकाणां करणसंज्ञा प्रसज्येत । सर्वाणि हि कारकाणि साधकानि । तमग्रहणे पुनः क्रियमाणे न दोषो भवति ।। नैतदस्ति प्रयोजनम् । पूर्वास्तावत्संज्ञा अपवादत्वाद्बाधिका भविष्यन्ति पराः परत्वादनवकाशत्वाच्च ।। इह तर्हि धनुषा विध्यति अपाययुक्तत्वाच्चापादानसंज्ञा* साधकत्वाच्च करणसंज्ञा प्राप्नोति । तमग्रहणे पुनः क्रियमाणे न दोषो भवति ।। एवं तर्हि लोकत एतत्सिद्धम् । तद्यथा । लोके ऽभिरूपायोदकमानेयमभिरूपाय कन्या देयेति न चानभिरूपे प्रवृत्तिरस्ति तत्राभिरूपतमायेति गम्यते । एवमिहापि साधकं करणमित्युच्यते सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरस्ति तत्र साधकतममिति विज्ञास्यते ।। एवं तर्हि सिद्धे सति यत्तमग्रहणं करोति तज्ज्ञापयत्याचार्यः कारकसंज्ञायां तरतमयोगो न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । अपादानमाचार्यः किं न्याय्यं मन्यते यत्र संप्राप्य निवृत्तिः । तेनेहैव स्यात् ग्रामादागच्छति नगरादागच्छतीति । सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात् । कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति ।।

* १.४.२४

तथाधारमाचार्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति । तेनेहैव स्यात् तिलेषु तैलम् दध्नि सर्पिरिति । गङ्गायां गावः कूपे गर्गकुलमित्यत्र न स्यात् । कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति ॥

उपान्वध्याङ्वसः ॥ १ । ४ । ४८ ॥

वसेरश्यर्थस्य प्रतिषेधः ॥ १ ॥

वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः । ग्राम उपवसतीति ॥ स तर्हि वक्तव्यः । न वक्तव्यः । नात्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणम् । कस्य तर्हि । अनुपसर्गस्य । ग्रामे ऽसौ वसंस्त्रिरात्रमुपवसतीति ॥

कर्तुरीप्सिततमं कर्म ॥ १ । ४ । ४९ ॥

तमग्रहणं किमर्थम् । कर्तुरीप्सितं कर्मेतीयत्युच्यमान इह अग्नेर्माणवकं वारयतीति माणवके ऽपादानसंज्ञा प्रसज्येत* । नैष दोषः । कर्मसंज्ञा तत्र बाधिका भविष्यति । अग्नावपि तर्हि बाधिका स्यात् । इह पुनस्तमग्रहणे क्रियमाणे तदुपपन्नं भवति यदुक्तं वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनादिति† ॥

इहोच्यत ओदनं पचतीति । यद्योदनः पच्येत द्रव्यान्तरमभिनिर्वर्तेत । नैष दोषः । तादर्थ्यात्ताच्छब्द्यं भविष्यति । ओदनार्थास्तण्डुला ओदन इति ॥ अथेह कथं भवितव्यम् । तण्डुलानोदनं पचतीति । आहोस्वित्तण्डुलानामोदनं पचतीति । उभयथापि भवितव्यम् । कथम् । इह हि तण्डुलानोदनं पचतीति द्व्यर्थः पचिः । तण्डुलान्पचन्नोदनं निर्वर्तयतीति ॥ इहेदानीं तण्डुलानामोदनं पचतीति व्यर्थश्चैव पचिर्विकारयोगे च षष्ठी । तण्डुलविकारमोदनं निर्वर्तयतीति ॥

इह कश्चित्कंचिदामन्त्रयते सिद्धं भुज्यतामिति । स आमन्त्र्यमाण आह । प्रभूतं भुक्तमस्माभिरिति । आमन्त्रयमाण आह । दधि खलु भविष्यति पयः खलु भविष्यति । आमन्त्र्यमाण आह । दध्ना खलु भुञ्जीय पयसा खलु भुञ्जीयेति । अत्र कर्मसंज्ञा प्राप्नोति । तद्धि तस्येप्सिततमं भवति ॥ तस्याप्योदन एवेप्सिततमो न तु गुणेप्स्यानुरोधः । तद्यथा । भुञ्जीयाहमोदनं यदि मृदुविशदः स्यादिति । एवमिहापि दधिगुणमोदनं भुञ्जीय पयोगुणमोदनं भुञ्जीयेति ॥

---

* १४ २७.. — † १४ २७*.

ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारकत्वे कर्मसंज्ञाप्रसङ्गः क्रियेप्सितत्वात् ॥ १ ॥

ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारकत्वे कर्मसंज्ञा न प्राप्नोति । गुडं भक्षयतीति । किं कारणम् । क्रियेप्सितत्वात् । क्रिया तस्येप्सिता ॥

न वोभयेप्सितत्वात् ॥ २ ॥

न वैष दोषः । किं कारणम् । उभयेप्सितत्वात् । उभयं हि तस्येप्सितम् । आतश्चोभयं यस्य हि गुडभक्षणे बुद्धिः प्रसक्ता भवति नासौ लोष्टं भक्षयित्वा कृती भवति ॥ यद्यपि तावदत्रैतच्छक्यते वक्तुं ये ह्येते राजकर्मिणो मनुष्यास्तेषां कश्चित्कंचिदाह । कटं कुर्विति । स आह । नाहं कटं करिष्यामि घटो मयाहृत इति । तस्य क्रियामात्रमीप्सितम् ॥ यद्यपि तस्य क्रियामात्रमीप्सितं यस्त्वसौ प्रेषयति तस्योभयमीप्सितमिति ॥

तथायुक्तं चानीप्सितम् ॥ १ । ४ । ५० ॥

किमुदाहरणम् । विषं भक्षयतीति । नैतदस्ति । पूर्वेणाप्येतत्सिध्यति । न सिध्यति । कर्तुरीप्सिततमं कर्म [१.४.४९] इत्युच्यते कस्य च नाम विषभक्षणमीप्सितं स्यात् । विषभक्षणमपि कस्यचिदीप्सितं भवति । कथम् । इह य एष मनुष्यो दुःखार्तो भवति सोऽन्यानि दुःखान्यनुनिशम्य विषभक्षणमेव ज्यायो मन्यते । आतश्चेप्सितं यत्तद्भक्षयति ॥ यत्तर्ह्यन्यत्करिष्यामीत्यन्यत्करोति तदुदाहरणम् । किं पुनस्तत् । ग्रामान्तरमयं गच्छंश्चौरान्पश्यत्यहिं लङ्घयति कण्टकान्मृद्नाति ॥

इहेप्सितस्यापि कर्मसंज्ञारभ्यते ऽनीप्सितस्यापि । यदिदानीं नैवेप्सितं नाप्यनीप्सितं तत्र कथं भवितव्यम् । ग्रामान्तरमयं गच्छन्वृक्षमूलान्युपसर्पति कुड्यमूलान्युपसर्पतीति । अत्रापि सिद्धम् । कथम् । अनीप्सितमिति नायं प्रसज्यप्रतिषेध ईप्सितं नेति । किं तर्हि । पर्युदासोऽयं यदन्यदीप्सितात्तदनीप्सितमिति । अन्यच्चेतदीप्सिताद्यन्नैवेप्सितं नाप्यनीप्सितमिति ॥

अकथितं च ॥ १ । ४ । ५१ ॥

केनाकथितम् । अपादानादिभिर्विशेषकथाभिः ॥ किमुदाहरणम् ।

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना ॥

दुहि । गां दोग्धि पयः ।। नैतदस्ति । कथितात्र पूर्वापादानसंज्ञा[*] । दुहि ।। याचि । इदं तर्हि । पौरवं गां याचत इति ।। नैतदस्ति । कथितात्रापि पूर्वापादानसंज्ञा[*] ।। न याचनादेवापायो भवति । याचितोऽसौ यदि ददाति ततोऽपायेन युज्यते । याचि ।। रुधि । अन्ववरुणद्धि गां व्रजम् ।। नैतदस्ति । कथितात्र पूर्वाधिकरणसंज्ञा[†] । रुधि ।। प्रच्छि । माणवकं पन्थानं पृच्छति ।। नैतदस्ति । कथितात्र पूर्वापादानसंज्ञा[*] ।। न प्रश्नादेवापायो भवति । पृष्टोऽसौ यदाचष्टे ततोऽपायेन युज्यते । प्रच्छि ।। भिक्षि । पौरवं गां भिक्षते ।। नैतदस्ति । कथितात्र पूर्वापादानसंज्ञा[*] ।। न भिक्षणादेवापायो भवति । भिक्षितोऽसौ यदि ददाति ततोऽपायेन युज्यते । भिक्षि ।। चिञ् । वृक्षमवचिनोति फलानि ।। नैतदस्ति । कथितात्र पूर्वापादानसंज्ञा[*] ।। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना । ब्रुविशासिगुणेन च यत्सचते संबध्यते तच्चोदाहरणम् । किं पुनस्तत् । पुत्रं ब्रूते धर्मम् । पुत्रमनुशास्ति धर्ममिति ।। नैतदस्ति । कथितात्र पूर्वा संप्रदानसंज्ञा[‡] ।। तस्मात्त्रीण्येवोदाहरणानि । पौरवं गां याचते । माणवकं पन्थानं पृच्छति । पौरवं गां भिक्षत इति ।।

अथ ये धातूनां द्विकर्मकास्तेषां किं कथिते लादयो[§] भवन्त्याहोस्विदकथिते । कथिते लादयः ।। कथिते लादिभिरभिहिते गुणकर्मणि का कर्तव्या ।

कथिते लादयश्चेत्स्युः षष्ठीं कुर्यात्तदा गुणे ।

कथिते लादयश्चेत्स्युः षष्ठी गुणकर्मणि तदा कर्तव्या । दुह्यते गोः पयः । याच्यते पौरवस्य कम्बल इति ।। कथम् ।

अकारकं ह्यकथितत्वात्

अकारकं ह्येतद्भवति । किं कारणम् । अकथितत्वात् ।।

कारकं चेत्तु नाकथा ।

अथ कारकं नाकथितम् ।। अथ कारके सति का कर्तव्या ।

कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत् ॥

कारकं चेद्विजानीयाद्या या प्राप्नोति सा सा कर्तव्या । दुह्यते गोः पयः । याच्यते पौरवात्कम्बल इति ।।

---

* १.४.२४. † १.४.४५. ‡ १.४.३२. § ३.४.६९.

कथिते ऽभिहिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिस्सपरे ।

कथिते लादिभिरभिहिते त्वविधिरेष भवति । किमिदं त्वविधिरिति । तव विधिस्त्वविधिः । त्वमतिः । किमिदं त्वमतिरिति । तव मतिस्त्वमतिः । नैवमन्ये मन्यन्ते ॥ कथं तर्ह्यन्ये मन्यन्ते । गुणकर्मणि लादिविधिः सपरे । गुणकर्मणि लादिविधयो भवन्ति सह परेण योगेन । गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ [१.४.५२] इति ॥

ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत ॥

ध्रुवयुक्तिषु चेष्टितयुक्तिषु चाप्यगुणे कर्मणि लादयो भवन्ति । एतदनल्पमतेराचार्यस्य वचनं स्मर्यताम् ॥

अपर आह ।

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।

प्रधानकर्मण्यभिधेये द्विकर्मणां धातूनां कर्मणि लादयो भवन्तीति वक्तव्यम् । अजां नयति ग्रामम् । अजा नीयते ग्रामम् । अजा नीता ग्राममिति ॥

अप्रधाने दुहादीनाम्

अप्रधाने दुहादीनां कर्मणि लादयो भवन्तीति वक्तव्यम् । दुह्यते गौः पयः ॥

ण्यन्ते कर्तुश्च कर्मणः ॥

लादयो भवन्तीति वक्तव्यम् । गम्यते देवदत्तो ग्रामं यज्ञदत्तेन ॥

के पुनर्धातूनां द्विकर्मकाः ।

नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च ।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः॥

अजां नयति ग्रामम् । भारं वहति ग्रामम् । भारं हरति ग्रामम् । गत्यर्थानाम् । गमयति देवदत्तं ग्रामम् । यापयति देवदत्तं ग्रामम् ॥

सिद्धं वाऽन्यकर्मणः ।

सिद्धं वा पुनरेतद्भवति । कुतः । अन्यकर्मणः । अन्यस्याजा कर्मान्यस्य ग्रामः । अजामसौ गृहीत्वा ग्रामं नयति ॥

अन्यकर्मेति चेद्ब्रूयाल्लादीनामविधिर्भवेत् ॥

अन्यकर्मेति चेद्ब्रूयाल्लादीनामविधिरयं भवेत् । अजा नीयते ग्राममिति । परसाधन उत्पद्यमानेन लेनाजाया अभिधानं न प्राप्नोति ॥

कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् ।

कालभावाध्वगन्तव्या अकर्मकाणां धातूनां कर्मसंज्ञा भवन्तीति वक्तव्यम् । काल । मासमास्ते । मास स्वपिति ॥ भाव । गोदोहमास्ते । गोदोह स्वपिति ॥ अध्वगन्तव्य । क्रोशमास्ते । क्रोशं स्वपिति ॥ देशश्चाकर्मणां कर्मसंज्ञो भवतीति वक्तव्यम् । कुरून्स्वपिति । पञ्चालान्स्वपिति ॥

विपरीतं तु यत्कर्म तत्कल्म कवयो विदु ॥

किमिदं कल्मेति । अपरिसमाप्तं कर्म कल्म । न वा अस्मिन्सर्वाणि कर्मकार्याणि क्रियन्ते । किं तर्हि । द्वितीयैव ॥

यस्मिंस्तु कर्मण्युपजायतेऽन्यद्धात्वर्थयोगादपि च यत्र षष्ठी ।
तत्कर्म कल्मेति च कल्म नोक्तं धातोर्हि वृत्तिर्न हलत्वतोऽस्ति ॥
एतेन कर्मसंज्ञा सर्वा सिद्धा भवत्यकथितेन ।
तत्रेप्सितस्य किं स्यात्प्रयोजनं कर्मसंज्ञायाः ॥
यत्तु कथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थम् ।
ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेन ॥

अथेह कथं भवितव्यम् । नेताश्वस्य स्रुघ्नमिति । आहोस्विन्नेताश्वस्य स्रुघ्नस्येति । उभयथा गोणिकापुत्रः ॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ ॥ १ । ४ । ५२ ॥

शब्दकर्मेति कथमिदं विज्ञायते । शब्दो येषां क्रियेति । आहोस्विच्छब्दो येषां कर्मेति । कश्चात्र विशेषः ।

शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद्ध्वयत्यादीनां प्रतिषेधः ॥ १ ॥

शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद्ध्वयत्यादीनां प्रतिषेधो वक्तव्यः । के पुनर्ह्वयत्यादयः । ह्वयति क्रन्दति शब्दायते ॥ ह्वयति देवदत्तः । ह्वाययति देवदत्तेन ॥ क्रन्दति देवदत्तः । क्रन्दयति देवदत्तेन ॥ शब्दायते देवदत्तः । शब्दाययति देवदत्तेनेति ॥

शृणोत्यादीनां चोपसंख्यानमशब्दक्रियत्वात् ॥ २ ॥

शृणोत्यादीनां चोपसंख्यानं कर्तव्यम् । के पुनः शृणोत्यादयः । शृणोति विजानाति उपलभते ॥ शृणोति देवदत्तः । श्रावयति देवदत्तम् ॥ विजानाति देवदत्तः । विज्ञापयति देवदत्तम् ॥ उपलभते देवदत्तः । उपलम्भयति देवदत्तम् ॥ किं पुनः कारणं न सिध्यति । अशब्दक्रियत्वात् ॥

अस्तु तर्हि शब्दो येषां कर्मेति ।

शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम् ॥ ३ ॥

शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानं कर्तव्यम् । के पुनर्जल्पतिप्रभृतयः । जल्पति विलपति आभाषते ॥ जल्पति देवदत्तः । जल्पयति देवदत्तम् ॥ विलपति देवदत्तः । विलापयति देवदत्तम् ॥ आभाषते देवदत्तः । आभाषयति देवदत्तम् ॥

दृशेः सर्वत्र ॥ ४ ॥

दृशेः सर्वत्रोपसंख्यानं कर्तव्यम् । पश्यति रूपतर्कः कार्षापणम् । दर्शयति रूपतर्कं कार्षापणम् ॥

अदिखादिनीवहीनां प्रतिषेधः ॥ ५ ॥

अदिखादिनीवहीनां प्रतिषेधो वक्तव्यः ॥ अत्ति देवदत्तः । आदयते देवदत्तेन ॥ अपर आह । सर्वमेव प्रत्यवसानकार्यमदेर्न भवतीति वक्तव्यं परस्मैपदमपि* । इदमेकमिष्यते क्तो ऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः [३.४.७६] । इदमेषां जग्धम् ॥ खादि । खादति देवदत्तः । खादयति देवदत्तेन ॥ नी । नयति देवदत्तः । नाययति देवदत्तेन ॥

वहेरनियन्तृकर्तृकस्य ॥ ६ ॥

वहेरनियन्तृकर्तृकस्येति वक्तव्यम् । वहति भारं देवदत्तः । वाहयति भारं देवदत्तेन ॥ अनियन्तृकर्तृकस्येति किमर्थम् । वहन्ति यवान्बलीवर्दाः । वाहयन्ति बलीवर्दान्यवान् ॥

भक्षेरहिंसार्थस्य ॥ ७ ॥

भक्षेरहिंसार्थस्येति वक्तव्यम् । भक्षयति पिण्डीं देवदत्तः । भक्षयति पिण्डीं देवदत्तेन ॥ अहिंसार्थस्येति किमर्थम् । भक्षयन्ति यवान्बलीवर्दाः । भक्षयन्ति बलीवर्दान्यवान् ॥

---

* १.३.८९.

अकर्मकग्रहणे कालकर्मकाणामुपसंख्यानम् ॥ ८ ॥

अकर्मकग्रहणे कालकर्मकाणामुपसंख्यानं कर्तव्यम् ॥ मासमास्ते देवदत्तः । मासमासयति देवदत्तम् ॥ मासं शेते देवदत्तः । मासं शाययति देवदत्तम् ॥

सिद्धं तु कालकर्मणामकर्मकवद्वचनात् ॥ ९ ॥

सिद्धमेतत् । कथम् । कालकर्मका अकर्मकवद्भवन्तीति वक्तव्यम् ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । अकर्मकाणामित्युच्यते न च केचित्कदाचित्कालभावाध्वभिरकर्मकाः । त एवं विज्ञास्यामः । क्वचिद्ये ऽकर्मका इति ॥ अथवा येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणां न चैतेन कर्मणा कश्चिदप्यकर्मकः ॥ अथवा यत्कर्म भवति न च भवति तेनाकर्मकाणां न चैतत्कर्म क्वचिदपि न भवति ॥

हृक्रोरन्यतरस्याम् ॥ १ । ४ । ५३ ॥

हृक्रोर्वावचने ऽभिवादिदृशोरात्मनेपद उपसंख्यानम् ॥ १ ॥

हृक्रोर्वावचने ऽभिवादिदृशोरात्मनेपद उपसंख्यानं कर्तव्यम् ॥ अभिवदति गुरुं देवदत्तः । अभिवादयते गुरुं देवदत्तम् । अभिवादयते गुरुं देवदत्तेन ॥ पश्यन्ति भृत्या राजानम् । दर्शयते भृत्यान्राजा । दर्शयते भृत्यै राजा ॥ कथं चात्रात्मनेपदम् । एकस्य णेरणौ [१.३.६७] इति । अपरस्य णिचश्च [१.३.७४] इति ॥

स्वतन्त्रः कर्ता ॥ १ । ४ । ५४ ॥

किं यस्य स्वं तन्त्रं स स्वतन्त्रः । किं चातः । तन्तुवाये प्राप्नोति ॥ नैष दोषः । अयं तन्त्रशब्दो ऽस्त्येव विताने वर्तते । तद्यथा । आस्तीर्णं तन्त्रम् । प्रोतं तन्त्रम् । वितान इति गम्यते । अस्ति प्राधान्ये वर्तते । तद्यथा । स्वतन्त्रो ऽसौ ब्राह्मण इत्युच्यते स्वप्रधान इति गम्यते । तद्यः प्राधान्ये वर्तते तन्त्रशब्दस्तस्येदं ग्रहणम् ॥

स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानमस्वतन्त्रत्वात् ॥ १ ॥

स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानं कर्तव्यम् । पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति* । किं पुनः कारणं न सिध्यति । अस्वतन्त्रत्वात् ॥

---

*२.३.१८.

न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि कारयतीति स्यात् ॥ २ ॥

न वा कर्तव्यम् । किं कारणम् । स्वातन्त्र्यात् । स्वतन्त्रोऽसौ भवति । इतरथा ह्यकुर्वत्यपि कारयतीति स्यात् । यो हि मन्यते नासौ स्वतन्त्रो ऽकुर्वत्यपि तस्य कारयतीत्येतत्स्यात् ॥

नाकुर्वतीति चेत्स्वतन्त्रः ॥ ३ ॥

न चेदकुर्वति तस्मिन्कारयतीत्येतद्भवति स्वतन्त्रोऽसौ भवति ॥ शक्यं तावदनेनोपसंख्यानं कुर्वता वक्तुं कुर्वन्स्वतन्त्रो ऽकुर्वन्नेति । साधीयो ज्ञापकं भवति । प्रेषिते च किलायं क्रियां चाक्रियां च दृष्ट्वाध्यवस्यति कुर्वन्स्वतन्त्रो ऽकुर्वन्नेति यदि च प्रेषितो ऽसौ न करोति स्वतन्त्रोऽसौ भवतीति ॥

तत्प्रयोजको हेतुश्च ॥ १ । ४ । ५५ ॥

प्रैषे ऽस्वतन्त्रप्रयोजकत्वाद्धेतुसंज्ञाप्रसिद्धिः ॥ १ ॥

प्रैषे ऽस्वतन्त्रप्रयोजकत्वाद्धेतुसंज्ञाया अप्रसिद्धिः । स्वतन्त्रप्रयोजको हेतुसंज्ञो भवतीत्युच्यते न चासौ स्वतन्त्रं प्रयोजयति ॥ स्वतन्त्रत्वात्सिद्धम् । सिद्धमेतत् । कथम् । स्वतन्त्रत्वात् । स्वतन्त्रमसौ प्रयोजयति ।

स्वतन्त्रत्वात्सिद्धमिति चेत्स्वतन्त्रपरतन्त्रत्वं विप्रतिषिद्धम् ॥ २ ॥

यदि स्वतन्त्रो न प्रयोज्यो ऽथ प्रयोज्यो न स्वतन्त्रः प्रयोज्यः स्वतन्त्रश्चेति विप्रतिषिद्धम् ॥

उक्तं वा ॥ ३ ॥

किमुक्तम् । एकं तावदुक्तं न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि कारयतीति स्यादिति* । अपरमुक्तं न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टं स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यमिति† ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम् ॥

---

* १ ४ ५४* † ३ १ २१*

प्राग्रीश्वरान्निपाताः ॥ १ । ४ । ५६ ॥

किमर्थं रेफाधिक ईश्वरशब्दो गृह्यते ।

रीश्वराद्वीश्वरान्मा भूत्

रीश्वरादित्युच्यते वीश्वरान्मा भूत् । शकि णमुल्कमुलावीश्वरे तोसुन्कसुनौ [३.४.१२;१३] इति ॥ नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयत्यनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति* यदयं कृन्मेजन्तः [१.१.३९] इति कृतो मान्तस्यैजन्तस्य चाव्ययसंज्ञां शास्ति ॥

कृन्मेजन्तः परो ऽपि सः ।

परो ऽप्येतस्मात्कृन्मान्त एजन्तश्चास्ति† तदर्थमेतत्स्यात् ॥ यत्तर्ह्यव्ययीभावस्याव्ययसंज्ञां शास्ति‡ तज्ज्ञापयत्याचार्यो ऽनन्तरो य ईश्वरशब्दस्तस्य ग्रहणमिति ॥

समासेष्वव्ययीभावः

समासस्यैतज्ज्ञापकं स्यात् । अव्ययीभाव एव समासो ऽव्ययसंज्ञो भवति नान्य इति ॥ एवं तर्हि लोकत एतत्सिद्धम् । तद्यथा । लोके

आ वनान्तादोदकान्तात्प्रियं पान्थमनुव्रजेदिति

य एव प्रथमो वनान्त उदकान्तश्च ततो ऽनुव्रजति ॥

लौकिकं चातिवर्तते ॥

द्वितीयं च तृतीयं च वनान्तमुदकान्तं वानुव्रजति ॥ तस्माद्रेफाधिक ईश्वरशब्दो ग्रहीतव्यः ॥

अथ प्राग्वचनं किमर्थम् ।

प्राग्वचनं संज्ञानिवृत्त्यर्थम् ॥ १ ॥

प्राग्वचनं क्रियते निपातसंज्ञाया अनिवृत्तिर्यथा स्यात् । अक्रियमाणे हि प्राग्वचने ऽनवकाशा गत्युपसर्गकर्मप्रवचनीयसंज्ञा निपातसंज्ञां बाधेरन् । ता मा बाधिषतेति प्राग्वचनं क्रियते ॥ अथ क्रियमाणेऽपि प्राग्वचने यावतानवकाशा एताः संज्ञाः कस्मादेव न बाधन्ते । क्रियमाणे हि प्राग्वचने सत्यां निपातसंज्ञायामेता अवयवसंज्ञा आरभ्यन्ते तत्र वचनात्समावेशो भवति ॥

---

* १.४.६७. † १.१.३४,३९. ‡ १.१.४१

चादयोऽसत्त्वे ॥ १ । ४ । ५७ ॥

अयं सत्त्वशब्दो ऽस्त्येव द्रव्यपदार्थकः । तद्यथा । सत्त्वमयं ब्राह्मणः । सत्त्वमियं ब्राह्मणीति । अस्ति क्रियापदार्थकः । सद्भावः सत्त्वमिति । कस्येदं ग्रहणम् । द्रव्यपदार्थकस्य । कुत एतत् । एवं हि कृत्वा विधिश्च सिद्धो भवति प्रतिषेधश्च ॥ किं पुनरयं पर्युदासः । यदन्यत्सत्त्ववचनादिति । आहोस्वित्प्रसज्यायं प्रतिषेधः । सत्त्ववचने नेति । किं चातः । यदि पर्युदासो विप्र इत्यत्रापि प्राप्नोति । क्रियाद्रव्यवचनो ऽयं संघातो द्रव्यादन्यश्च विधिनाश्रीयते । अस्ति च प्रादिभिः सामान्यमिति कृत्वा तदन्तविधिना* निपातसंज्ञा प्राप्नोति ॥ अथ प्रसज्यप्रतिषेधो न दोषो भवति ॥ यथा न दोषस्तथास्तु ॥

प्रादय उपसर्गाः क्रियायोगे ॥ १ । ४ । ५८-५९ ॥

प्रादय इति योगविभागः ॥ १ ॥

प्रादय इति योगविभागः कर्तव्यः । प्रादयो ऽसत्त्ववचना निपातसंज्ञा भवन्ति । तत उपसर्गाः क्रियायोग इति ॥ किमर्थो योगविभागः ।

निपातसंज्ञार्थः ॥ २ ॥

निपातसंज्ञा यथा स्यात् ॥

एकयोगे हि निपातसंज्ञाभावः ॥ ३ ॥

एकयोगे हि सति निपातसंज्ञाया अभावः स्यात् । यस्मिन्नेव विशेषे गत्युपसर्गकर्मप्रवचनीयसंज्ञास्तस्मिन्नेव विशेषे निपातसंज्ञा स्यात् ॥

मरुच्छब्दस्योपसंख्यानम् ॥ ४ ॥

मरुच्छब्दस्योपसंख्यानं कर्तव्यम् । मरुद्दत्तो मरुत्तः । अच उपसर्गात्तः [७.४.४७] इति तत्वं यथा स्यात् ॥

श्रच्छब्दस्योपसंख्यानम् ॥ ५ ॥

श्रच्छब्दस्योपसंख्यानं कर्तव्यम् । श्रद्धा[†] ॥

---

*१.१.७२ †३.३.१०६.

गतिश्च ॥ १ । ४ । ६० ॥

कारिकाशब्दस्य ॥ १ ॥

कारिकाशब्दस्योपसंख्यानं कर्तव्यम् । कारिकाकृत्य* ॥

पुनश्चनसौ छन्दसि ॥ २ ॥

पुनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यम् । पुनरुत्स्यूतं† वासो देयम् । पुनर्निष्कृतो‡ रथः । उशिग्दूतश्चनोहितः§ ॥

गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनम् ॥ ३ ॥

गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञा भवन्तीति वक्तव्यम् ॥ किं प्रयोजनम् ।

प्रयोजनं घञ्षत्वणत्वे ॥ ४ ॥

घञ् । प्रवृद्धो भावः प्रभावः । अनुपसर्ग इति प्रतिषेधो मा भूत्¶ ॥ षत्वम् । विगताः सेचका अस्माद्ग्रामाद्विसेचको ग्रामः । उपसर्गादिति षत्वं मा भूत्** ॥ णत्वम् । प्रगता नायका अस्माद्ग्रामात्प्रनायको ग्रामः । उपसर्गादिति णत्वं मा भूत्†† ॥

वृद्धिविधौ च धातुग्रहणानर्थक्यम् ॥ ५ ॥

वृद्धिविधौ च धातुग्रहणमनर्थकम् । उपसर्गादृति धातौ [६.१.९१] इति । तत्र धातुग्रहणस्यैतत्प्रयोजनमिह मा भूत् प्रर्षभं वनमिति । क्रियमाणे चापि धातुग्रहणे प्रर्च्छक इत्यत्र प्राप्नोति । यत्क्रियायुक्तास्तं प्रतीति वचनान्न भवति ॥

वद्विधिनस्भावावीत्त्वस्वाङ्गादिस्वरणत्वेषु दोषो भवति ॥ वद्विधि‡‡ । यदुद्वतो निवतो यासि बप्सत् । वद्विधि ॥ नस्भाव§§ । प्रणसं मुखम् । उन्नसं मुखम् । नस्भाव ॥ अवीत्त्व¶¶ । प्रेपम् परेपम् । अवीत्त्व ॥ स्वाङ्गादिस्वर*** । प्रस्फिक् प्रोदरः । स्वाङ्गादिस्वर ॥ णत्व††† । प्र णः शूद्रः प्र ण आचार्यः प्र णो राजा प्र णो वृत्रहा ॥ उपसर्गादित्येते विधयो न प्राप्नुवन्ति ॥

वद्विधिनस्भावावीत्त्वस्वाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धम् ॥ ६ ॥

अनवकाशा एते विधयस्ते वचनप्रामाण्याद्भविष्यन्ति ॥

---

* ११.२८; ७.१ ३० † १२ १८. ‡ ८.१.७०. § ६.२.४९. ¶ ३.३.२४.
** ८.३.६५ †† ८.४.१४ ‡‡ ५.१ ११८. §§ ५.४ ११९ ¶¶ ६.३.९७.
*** ६.२ १७७. ††† ८.४.२८

सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु ॥ ७ ॥

सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु वक्तव्यः ॥ नुम्विधि । सुलभम् दुर्लभम् । उपसर्गादिति नुम्मा भूदिति* । न सुदुर्भ्यां केवलाभ्याम् [७.१.६८] इत्येतन्न वक्तव्यं भवति ॥ नैतदस्ति प्रयोजनम् । क्रियत एतन्न्यास एव ॥ तत्वम् । सुदत्तम् । अत्र उपसर्गात्तः [७.४.४७] इति तत्वं मा भूदिति ॥ षत्वम् । सुसिक्तं घटशतेन । सुस्तुतं श्लोकशतेन । उपसर्गादिति षत्वं मा भूदिति† । सुः पूजायाम् [१.४.९४] इत्येतन्न वक्तव्यं भवति ॥ नैतदस्ति प्रयोजनम् । क्रियत एतन्न्यास एव ॥ णत्वम् । दुर्नयम् दुर्नीतमिति । उपसर्गादिति णत्वं मा भूदिति‡ ॥

ऊर्यादिच्विडाचश्च ॥ १ । ४ । ६१ ॥

कृभ्वस्तियोग इति वक्तव्यम् । इहैव यथा स्यात् । ऊरीकृत्य ऊरीभूय । इह मा भूत् । ऊरी पक्त्वा ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । क्रियायोग इत्यनुवर्तते§ न चान्यया क्रिययोर्यादिच्विडाचां योगो ऽस्ति ॥

अनुकरणं चानितिपरम् ॥ १ । ४ । ६२ ॥

कथमिद विज्ञायते । इतेः परमितिपरम् न इतिपरमनितिपरमिति । आहोस्विदितिः परो यस्मात्तदिदमितिपरम् न इतिपरमनितिपरमिति ॥ किं चातः । यदि विज्ञायत इतेः परमितिपरम् न इतिपरमनितिपरमिति खाडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोति । अथ विज्ञायत इतिः परो यस्मात्तदिदमितिपरम् न इतिपरमनितिपरमिति श्रौपड्वौपडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोति ॥ अस्तु तावदितिः परो यस्मात्तदिदमितिपरम् न इतिपरमनितिपरमिति । ननु चोक्त श्रौपड्वौपडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोतीति । नैष दोषः । इद तावदयं प्रष्टव्यः । अथेह ते प्राग्धातोः [१.४.८०] इति कथं गतिमात्रस्य पूर्वप्रयोगो भवति । उपोद्धरतीति । गत्याकृतिः प्रतिनिर्दिश्यते । इहापि तर्ह्यनुकरणाकृतिर्निर्दिश्यते ॥

किमर्थमिदमुच्यते ।

अनुकरणस्येतिकरणपरत्वप्रतिषेधो ऽनिष्टशब्दनिवृत्त्यर्थः ॥ १ ॥

अनुकरणस्येतिकरणपरत्वप्रतिषेध उच्यते । किं प्रयोजनम् । अनिष्टशब्दनिवृ-

* ७.१.६० † ८.३.६५ ‡ ८.४.१४ § १.४.६९.

त्त्यर्थः । अनिष्टशब्दता मा भूदिति । इदं विचारयिष्यति तेप्राग्धातुवचनं प्रयोगनियमार्थं वा स्यात्संज्ञानियमार्थं वेति[*] । तद्यदा प्रयोगनियमार्थं तदानिष्टशब्दनिवृत्त्यर्थमिदं वक्तव्यम् । यदा हि संज्ञानियमार्थं तदा न दोषो भवति ॥

आदरानादरयोः सदसती ॥ १ । ४ । ६३ ॥

इदमतिबहु क्रियते आदरे अनादरे सत् असदिति । आदरे सदित्येव सिद्धम् । कथमसत्कृत्येति । तदन्तविधिना भविष्यति[†] । केनेदानीमनादरे भविष्यति । नञादरप्रतिषेधं विज्ञास्यामः । नादरे ऽनादर इति ॥ नैवं शक्यम् । आदरप्रसङ्ग एव हि स्यादनादरप्रसङ्गे न स्यात् । अनादरग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञायते । अविद्यमानादरे ऽनादर इति । तस्मादनादरग्रहणं कर्तव्यमसतस्तु तदन्तविधिना सिद्धम् ॥

अन्तरपरिग्रहे ॥ १ । ४ । ६५ ॥

अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम् ॥ १ ॥

अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानं कर्तव्यम्[†] । अङ् । अन्तर्धा ॥ किविधिः । अन्तर्धिः ॥ समासः । अन्तर्हत्य ॥ णत्वम् । अन्तर्हण्याद्गोभ्यो गाः ॥

साक्षात्प्रभृतीनि च ॥ १ । ४ । ७४ ॥

साक्षात्प्रभृतिषु च्व्यर्थवचनम् ॥ १ ॥

साक्षात्प्रभृतिषु च्व्यर्थग्रहणं कर्तव्यम् । असाक्षात्साक्षात्कृत्वा साक्षात्कृत्य । यदा हि साक्षादेव किंचित्क्रियते तदा मा भूदिति ॥

मकारान्तत्वं च गतिसंज्ञासंनियुक्तम् ॥ २ ॥

मकारान्तत्वं च गतिसंज्ञासंनियोगेन वक्तव्यम् । लवणंकृत्य ॥

नञ च्विप्रतिषेधः ॥ ३ ॥

नञ च्व्यन्तस्य प्रतिषेधो वक्तव्यः । लवणीकृत्य ॥

न वा पूर्वेण कृतत्वात् ॥ ४ ॥

न वा वक्तव्यम् । किं कारणम् । पूर्वेण कृतत्वात् । अस्त्वनेन विभाषा पूर्वेण* नित्यो भविष्यति ॥ इदं तर्हि प्रयोजनम् । मकारान्तत्वं च गतिसंज्ञासंनियुक्तमित्युक्तं तदन्यन्तस्य मा भूदिति । एतदपि नास्ति प्रयोजनम् । लवणशब्दस्यायं विभाषा लवणंशब्द आदेशः क्रियते । यदि च लवणीशब्दस्यापि विभाषा लवणंशब्द आदेशो भवति न किंचिद्दुष्यति । वैशम्यं चेह साध्यम् । तच्चैवं सति सिद्धं भवतीति ॥

ते प्राग्धातोः ॥ १ । ४ । ८० ॥

किमिदं प्राग्धातुवचनं प्रयोगनियमार्थम् । एते प्रागेव धातोः प्रयोक्तव्याः । आहोस्वित्संज्ञानियमार्थम् । एते प्राक्चाप्राक्च प्रयोक्तव्याः प्राक्प्रयुज्यमानानां गतिसंज्ञा भवतीति । कश्चात्र विशेषः ।

प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः ॥ १ ॥

प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधो वक्तव्यः† । किं प्रयोजनम् । अनिष्टशब्दनिवृत्त्यर्थः । अनिष्टशब्दता मा भूदिति ॥

छन्दसि परव्यवहितवचनं च ॥ २ ॥

छन्दसि परेऽपि व्यवहिताश्च [१.४.८१;८२] इति वक्तव्यम् ॥

संज्ञानियमे सिद्धम् ॥ ३ ॥

संज्ञानियमे सिद्धमेतद्भवति । अस्तु तर्हि संज्ञानियमः ॥

उभयोरनर्थकं वचनमनिष्टादर्शनात् ॥ ४ ॥

उभयोरपि पक्षयोर्वचनमनर्थकम् । किं कारणम् । अनिष्टादर्शनात् । न हि कश्चित्पचतीति प्रयोक्तव्ये पचतिप्रेति प्रयुङ्क्ते । यदि चानिष्टं दृश्येत ततो यत्नार्हं स्यात् ॥

---

* १.४.८२ † १.४.६२.

उपसर्जनसंनिपाते तु पूर्वपरव्यवस्थार्थम् ॥ ५ ॥

उपसर्जनसंनिपाते तु पूर्वपरव्यवस्थार्थमेतद्वक्तव्यम् । ऋषभं कूलमुद्रुजम् । ऋषभं कूलमुद्वहम्* । अत्र गतेः प्राग्धातोः प्रयोगो यथा स्यात् ॥ यद्युपसर्जनसंनिपाते पूर्वपरव्यवस्थार्थमिदमुच्यते सुकटंकराणि† वीरणानीत्यत्र गतेः प्राग्धातोः प्रयोगः प्राप्नोति । आचार्यप्रवृत्तिर्ज्ञापयति नात्र गतेः प्राक्प्रयोगो भवतीति यदयमीषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् [३.३.१२६] इति खकारमनुबन्धं करोति । कथं कृत्वा ज्ञापकम् । खित्करण एतत्प्रयोजनं खितीति मुम्यथा स्यादिति‡ । यदि चात्र गतेः प्राक्प्रयोगः स्यात्खित्करणमनर्थकं स्यात् । अस्त्यत्र मुम् । अनव्ययस्येति प्रतिषेधो भविष्यति‡ । पश्यति त्वाचार्यो नात्र गतेः प्राग्धातोः प्रयोगो भवतीति ततः खकारमनुबन्धं करोति ॥ नैतदस्ति ज्ञापकम् । यद्यप्यत्र गतेः प्राक्प्रयोगः स्यात्स्यादेवात्र मुमागमः । कथम् । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति । तस्मान्नार्थ एवमर्थेन प्राग्धातुवचनेन ॥ कथम् ऋषभं कूलमुद्रुजम् ऋषभं कूलमुद्वहम् । नैष दोषः । नैष उदिरुपपदम् । किं तर्हि । विशेषणम् । उदि कूले रुजिवहोः [३.२.३१] उत्पूर्वाभ्यां रुजिवहिभ्यां कूल उपपद इति ॥

कर्मप्रवचनीयाः ॥ १ । ४ । ८३ ॥

किमर्थं महती संज्ञा क्रियते । अन्वर्थसंज्ञा यथा विज्ञायेत । कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति ॥ के पुनः कर्म प्रोक्तवन्तः । ये संप्रति क्रियां नाहुः । के च संप्रति क्रियां नाहुः । ये अप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीयाः ॥

अनुर्लक्षणे ॥ १ । ४ । ८४ ॥

किमर्थमिदमुच्यते । कर्मप्रवचनीयसंज्ञा यथा स्यादत्युपसर्गसंज्ञे मा भूतामिति । किं च स्यात् । शाकल्यस्य संहितामनु प्रावर्षत् । गतिर्गतौ [८.१.७०] इति निघातः प्रसज्येत ॥ यद्येवं वेरपि कर्मप्रवचनीयसंज्ञा वक्तव्या । वेरपि निघातो नेष्यते । प्रादेशं प्रादेशं विपरिलिखति । अस्त्यत्र विशेषः । नात्र वेर्लिखिं प्रति क्रिया-

---

* [illegible] † [illegible] ‡ [illegible]

योगः । किं तर्हि । अप्रयुज्यमानम् । प्रादेशं प्रादेशं विमाय परिलिखतीति ॥ यथै-वमनोरपि कर्मप्रवचनीयसंज्ञया नार्थः । अनोरपि हि न वृषिं प्रति क्रियायोगः । किं तर्हि । अप्रयुज्यमानम् । शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षत् ॥ इदं तर्हि प्रयोजनं द्वितीया यथा स्यात्कर्मप्रवचनीययुक्ते द्वितीया [२.३.८] इति ॥ अत उत्तरं पठति ।

अनुर्लक्षणेवचनानर्थक्य सामान्यकृतत्वात् ॥ १ ॥

अनुर्लक्षणेवचनानर्थक्यम् । किं कारणम् । सामान्यकृतत्वात् । सामान्ये-नैवात्र कर्मप्रवचनीयसंज्ञा भविष्यति लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः [१.४.९०] इति ॥

हेत्वर्थं तु वचनम् ॥ २ ॥

हेत्वर्थमिदं वक्तव्यम् । हेतुः शाकल्यस्य संहिता वर्षस्य न लक्षणम् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गस्यते । लक्षणं हि नाम स भवति येन पुनः पुनर्लक्ष्यते न यः सकृदपि निमित्तत्वाय कल्पते । सकृच्चासौ शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षत् ॥ स तर्हि तथा निर्देशः कर्तव्यो ऽनुर्हेता-विति ॥ अथेदानीं लक्षणेन हेतुरपि व्याप्तो नार्थो ऽनेन । लक्षणेन हेतुरपि व्याप्तः । न ह्यवश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते । किं तर्हि । यत्सकृदपि निमि-त्तत्वाय कल्पते तदपि लक्षणं भवति । तद्यथा । अपि भवान्कमण्डलुपाणिं छात्र-मद्राक्षीदिति । सकृदसौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणं भवति ॥ तदेव तर्हि प्रयोजनं द्वितीया यथा स्यात्कर्मप्रवचनीययुक्ते द्वितीयेति । एतदपि नास्ति प्रयो-जनम् । सिद्धात्र द्वितीया कर्मप्रवचनीययुक्त इत्येव । न सिध्यति । परत्वाद्धेत्वा-श्रया तृतीया प्राप्नोति* ॥

आङ्मर्यादावचने ॥ १ । ४ । ८९ ॥

आङ्मर्यादाभिविध्योरिति वक्तव्यम् । इहापि यथा स्यात् । आकुमारं[†] यशः पाणिनेरिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । मर्यादावचन इत्येव सिद्धम् । एषास्य यशसो मर्यादा ॥

---

* २.१.२१ † ६.२.११ २.१.१३

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ १ । ४ । ९० ॥

कस्य लक्षणादयोऽर्था निर्दिश्यन्ते । वृक्षादीनाम् ॥ किमर्थं पुनरिदमुच्यते । कर्मप्रवचनीयसंज्ञा यथा स्याद्गत्युपसर्गसंज्ञे मा भूतामिति । नैतदस्ति प्रयोजनम् । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न च वृक्षादीन्प्रति क्रियायोगः ॥ इदं तर्हि प्रयोजनं द्वितीया यथा स्यात्कर्मप्रवचनीययुक्ते द्वितीया [२.३.८] इति । वृक्षं प्रति विद्योतते । वृक्षमनु विद्योतत इति ॥

अधिपरी अनर्थकौ ॥ १ । ४ । ९३ ॥

किमर्थमधिपर्योरनर्थकयोः कर्मप्रवचनीयसंज्ञोच्यते । कर्मप्रवचनीयसंज्ञा यथा स्याद्गत्युपसर्गसंज्ञे मा भूतामिति । नैतदस्ति प्रयोजनम् । यत्क्रियायुक्तौ तं प्रति गत्युपसर्गसंज्ञौ भवतो ऽनर्थकौ चेमौ ॥ इदं तर्हि प्रयोजनं पञ्चमी यथा स्यात् । पञ्चम्यपाङ्परिभिः [२.३.१०] इति । कुतः पर्यागम्यत इति ॥ सिद्धात्र पञ्चम्यपादान इत्येव* । आतश्चापादानपञ्चम्येषा यत्राप्यधिशब्देन योगे पञ्चमी न विधीयते तत्रापि श्रूयते । कुतो ऽध्यागम्यत इति ॥ एवं तर्हि सिद्धे सति यदनर्थकयोर्गत्युपसर्गसंज्ञाबाधिकां कर्मप्रवचनीयसंज्ञां शास्ति तज्ज्ञापयत्याचार्यो ऽनर्थकानामप्येषां भवत्यर्थवत्कृतमिति । किमेतस्य ज्ञापने प्रयोजनम् । निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं† तन्न वक्तव्यं भवति ॥ अथवा नैवेमावनर्थकौ । किं तर्ह्यनर्थकावित्युच्यते । अनर्थान्तरवाचिनावनर्थकौ । धातुनोक्तां क्रियामाहतुः । तद्विशिष्टं भवति यथा शङ्खे पयः ॥ यद्येवं धातुनोक्तत्वात्तस्यार्थस्योपसर्गप्रयोगो न प्राप्नोत्युक्तार्थानामप्रयोग इति । उक्तार्थानामपि प्रयोगो दृश्यते । तद्यथा । अपूपौ द्वावानय । ब्राह्मणौ द्वावानयेति ॥

अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ॥ १ । ४ । ९६ ॥

इह कस्मान्न भवति । सर्पिषोऽपि स्यात् । गोमूत्रस्यापि स्यात् । किं च स्यात् । द्वितीयापि प्रसज्येत कर्मप्रवचनीययुक्ते द्वितीया [२.३.८] इति । नैष दोषः ।

---

* ११.१८. † ११०.१५.

नेमेऽप्यर्था निर्दिश्यन्ते । किं तर्हि । परपदार्था इमे निर्दिश्यन्ते । एतेष्वर्थेषु यत्पदं वर्तते तत्प्रत्यपि कर्मप्रवचनीयसंज्ञो भवतीति ॥ अथवा यदत्र कर्मप्रवचनीययुक्तं नाद प्रयुज्यते । किं पुनस्तत् । बिन्दुः । बिन्दोस्तर्हि कस्मान्न भवति । उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यतीति ॥

अधिरीश्वरे ॥१।४।९७॥

अधिरीश्वरवचनं ऽक्तम् ॥ १ ॥

किमुक्तम् । यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम् । प्रथमानुपपत्तिस्तु । स्ववचनात्सिद्धमिति* । अधि स्व प्रति कर्मप्रवचनीयसंज्ञो भवतीति वक्तव्यम् ॥

लः परस्मैपदम् ॥ १ । ४ । ९९ ॥

लादेशे परस्मैपदग्रहणं पुरुषबाधितत्वात् ॥ १ ॥

लादेशे† परस्मैपदग्रहणं कर्तव्यम् । किं कारणम् । पुरुषबाधितत्वात् ॥

इह वचने हि संज्ञाबाधनम् ॥ २ ॥

इह हि क्रियमाणे अनवकाशा पुरुषसंज्ञा‡ परस्मैपदसंज्ञां बाधेत ॥ परस्मैपदसंज्ञाप्यनवकाशा सा वचनाद्भविष्यति । सावकाशा परस्मैपदसंज्ञा । कोऽवकाशः । शतृक्वसू§ अवकाशः ॥

णिचि वृद्धौ तु परस्मैपदग्रहणं ज्ञापकं पुरुषाबाधकत्वस्य ॥ ३ ॥

यदयं सिचि वृद्धिः परस्मैपदेषु [७ २ १] इति परस्मैपदग्रहणं करोति तज्ज्ञापयत्याचार्यो न पुरुषसंज्ञा परस्मैपदसंज्ञां बाधत इति ॥

* १३२८ † १३४० ‡ ३४ ३९३ § ३३ ३३४ ३००

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १ । ४ । १०१ ॥

प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं समसंख्यार्थम् ॥ १ ॥

प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं कर्तव्यम् । आत्मनेपदानां च प्रथममध्यमोत्तमसंज्ञा भवन्तीति वक्तव्यम् । किं प्रयोजनम् । समसंख्यार्थम् । संख्यातानुदेशो* यथा स्यात् । अक्रियमाणे ह्यात्मनेपदग्रहणे तिस्रः संज्ञाः षट् संज्ञिनः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ क्रियमाणेऽपि चात्मनेपदग्रहण

आनुपूर्व्यवचनं च ॥ २ ॥

आनुपूर्व्यवचनं च कर्तव्यम् । अक्रियमाणे हि कस्यचिदेव त्रिकस्य प्रथमसंज्ञा स्यात्कस्यचिदेव मध्यमसंज्ञा कस्यचिदेवोत्तमसंज्ञा ॥

न वैकशेषनिर्देशात् ॥ ३ ॥

यत्तावदुच्यत आत्मनेपदग्रहण कर्तव्यं समसंख्यार्थमिति तन्न कर्तव्यम् । संज्ञा अपि षडेव निर्दिश्यन्ते । कथम् । एकशेषनिर्देशात् । एकशेषनिर्देशोऽयम् ॥ अथैतस्मिन्नेकशेषनिर्देशे सति किमयं कृतैकशेषाणां द्वन्द्वः । प्रथमश्च प्रथमश्च प्रथमौ । मध्यमश्च मध्यमश्च मध्यमौ । उत्तमश्चोत्तमश्चोत्तमौ । प्रथमौ च मध्यमौ चोत्तमौ च प्रथममध्यमोत्तमा इति । आहोस्वित्कृतद्वन्द्वानामेकशेषः । प्रथमश्च मध्यमश्चोत्तमश्च प्रथममध्यमोत्तमाः । प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमा इति । किं चातः । यदि कृतैकशेषाणां द्वन्द्वः प्रथममध्यमयोः प्रथमसंज्ञा प्राप्नोत्युत्तमप्रथमयोर्मध्यमसंज्ञा प्राप्नोति मध्यमोत्तमयोरुत्तमसंज्ञा प्राप्नोति । अथ कृतद्वन्द्वानामेकशेषो न दोषो भवति । यथा न दोषस्तथास्तु ॥ किं पुनरत्र न्याय्यम् । उभयमित्याह । उभयं हि दृश्यते । तद्यथा । बहु शक्तिकिटकम् । बहूनि शक्तिकिटकानि । बहु स्थालीपिठरम् । बहूनि स्थालीपिठराणि ॥ यदप्युच्यते क्रियमाणेऽप्यात्मनेपदग्रहण आनुपूर्व्यवचनं कर्तव्यमिति । न कर्तव्यम् । लोकत एतत्सिद्धम् । तद्यथा । लोके विदग्धस्य द्वाभ्यां द्वाभ्यामधिकमस्थेय इति न चोच्यत आनुपूर्व्येणेत्यानुपूर्व्येण चोपस्थीयत इति ॥

विभक्तिश्च ॥ १ । ४ । १०४ ॥

त्रीणि त्रीणीत्यनुवर्तते* उताहो न । किं चातः । यद्यनुवर्तते ऽष्टन आ विभक्तौ [७.२.८४] इत्यात्वं न प्राप्नोति । अथ निवृत्तं प्रथमयोः पूर्वसवर्णः [६.१.१०२] इत्यत्र प्रत्यययोरेव ग्रहणं प्राप्नोति । यथेच्छसि तथास्तु ॥ अस्तु तावदनुवर्तत इति । ननु चोक्तमष्टन आ विभक्तावित्यात्वं न प्राप्नोतीति । वचनाद्भविष्यति ॥ अथवा पुनरस्तु निवृत्तम् । ननु चोक्तं प्रथमयोः पूर्वसवर्ण इत्यत्र प्रत्यययोरेव ग्रहणं प्राप्नोतीति । नैष दोषः । अचीत्यनुवर्तते न चाजादी प्रथमौ प्रत्ययौ स्तः । ननु चैवं विज्ञायते ऽजादी यौ प्रथमावजादीनां वा यौ प्रथमाविति । यत्तर्हि तस्माच्छसो नः पुंसि [६.१.१०३] इत्यनुक्रान्तं पूर्वसवर्णदीर्घं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति ॥ अथवा वचनग्रहणमेव कुर्यात् । औजसोः पूर्वसवर्ण इति ॥

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १ । ४ । १०५ । अस्मद्युत्तमः ॥ १ । ४ । १०७ ॥ शेषे प्रथमः ॥ १ । ४ । १०८ ॥

किमर्थमिदमुच्यते ।

युष्मदस्मच्छेषवचनं नियमार्थम् ॥ १ ॥

नियमार्थो ऽयमारम्भः ॥ अथैतस्मिन्नियमार्थे विज्ञायमाने किमयमुपपदनियमः ।† युष्मदि मध्यम एव । अस्मद्युत्तम एव । आहोस्वित्पुरुषनियमः । युष्मद्येव मध्यमः । अस्मद्येवोत्तम इति । किं चातः । यदि पुरुषनियमः शेषग्रहणं कर्तव्यं शेषे प्रथम इति । किं कारणम् । मध्यमोत्तमौ नियतौ युष्मदस्मदी अनियते तत्र प्रथमो ऽपि प्राप्नोति । तत्र शेषग्रहणं कर्तव्यं प्रथमनियमार्थम् । शेष एव प्रथमो भवति नान्यत्रेति । अथाप्युपपदनियम एवमपि शेषग्रहणं कर्तव्यं शेषे प्रथम इति । युष्मदस्मदी नियते मध्यमोत्तमावनियतौ तौ शेषे ऽपि प्राप्नुतः । तत्र शेषग्रहणं कर्तव्यं शेषनियमार्थम् । शेषे प्रथम एव भवति नान्य इति ॥ उपपदनियमे शेषग्रहणं शक्यमकर्तुम् । कथम् । युष्मदस्मदी नियते मध्यमोत्तमावनियतौ तौ शेषे ऽपि प्रा-

* १।४।१०१.   † १।१।७७

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १ । ४ । १०१ ॥

प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं समसंख्यार्थम् ॥ १ ॥

प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं कर्तव्यम् । आत्मनेपदानां च प्रथममध्यमोत्तमसंज्ञा भवन्तीति वक्तव्यम् । किं प्रयोजनम् । समसंख्यार्थम् । संख्यातानुदेशो* यथा स्यात् । अक्रियमाणे ह्यात्मनेपदग्रहणे तिस्रः संज्ञाः षट् संज्ञिनः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥ क्रियमाणेऽपि चात्मनेपदग्रहण

आनुपूर्व्यवचनं च ॥ २ ॥

आनुपूर्व्यवचनं च कर्तव्यम् । अक्रियमाणे हि कस्यचिदेव त्रिकस्य प्रथमसंज्ञा स्यात्कस्यचिदेव मध्यमसंज्ञा कस्यचिदेवोत्तमसंज्ञा ॥

न वैकशेषनिर्देशात् ॥ ३ ॥

यत्तावदुच्यते आत्मनेपदग्रहणं कर्तव्यं समसंख्यार्थमिति तन्न कर्तव्यम् । संज्ञा अपि षडेव निर्दिश्यन्ते । कथम् । एकशेषनिर्देशात् । एकशेषनिर्देशोऽयम् ॥ अथैतस्मिन्नेकशेषनिर्देशे सति किमयं कृतैकशेषाणां द्वन्द्वः । प्रथमश्च प्रथमश्च प्रथमौ । मध्यमश्च मध्यमश्च मध्यमौ । उत्तमश्चोत्तमश्चोत्तमौ । प्रथमौ च मध्यमौ चोत्तमौ च प्रथममध्यमोत्तमा इति । आहोस्वित्कृतद्वन्द्वानामेकशेषः । प्रथमश्च मध्यमश्चोत्तमश्च प्रथममध्यमोत्तमाः । प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमा इति । किं चातः । यदि कृतैकशेषाणां द्वन्द्वः प्रथममध्यमयोः प्रथमसंज्ञा प्राप्नोत्युत्तमप्रथमयोर्मध्यमसंज्ञा प्राप्नोति मध्यमोत्तमयोरुत्तमसंज्ञा प्राप्नोति । अथ कृतद्वन्द्वानामेकशेषो न दोषो भवति । यथा न दोषस्तथास्तु ॥ किं पुनरत्र न्याय्यम् । उभयमित्याह । उभयं हि दृश्यते । तद्यथा । बहु शक्तिकिटकम् । बहूनि शक्तिकिटकानि । बहु स्थालीपिठरम् । बहूनि स्थालीपिठराणि ॥ यदप्युच्यते क्रियमाणेऽप्यात्मनेपदग्रहण आनुपूर्व्यवचनं कर्तव्यमिति । न कर्तव्यम् । लोकत एतत्सिद्धम् । तद्यथा । लोके विदध्यस्य द्वाभ्यां द्वाभ्यामभिदपस्येय इति न चोच्यत आनुपूर्व्येणेत्यानुपूर्व्येण चोपस्थीयत इति ॥

---

* १।१।१०.

चेति । तदनुमानमुत्तरयोरपि क्रिययोरेकशेषो न भवतीति । एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति । तत्रापि शेषेण भवितव्यम् । त्वं च देवदत्तश्च पचसि पचति च । अहं च देवदत्तश्च पचामि पचति चेति ॥

यत्तावदुच्यते न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेध इति दृश्यते हि युष्मदस्मदोश्चानेकशेषस्तदधिकरणानां चैकशेषः । तद्यथा । त्वं चाहं च वृत्रहन्नुभौ संप्रयुज्यावहा इति ॥

यदप्युच्यते क्रियापृथक्त्वे च द्रव्यपृथक्त्वादर्शनमनुमानमुत्तरत्रानेकशेषभावस्येति क्रियापृथक्त्वे खल्वपि द्रव्यैकशेषो भवतीति दृश्यते । तद्यथा । अक्षा भज्यन्तां भक्ष्यन्तां दीव्यन्तामिति । एवं च कृत्वा सोऽपि दोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति ॥ नैष दोषः । परिहृतमेतत्सिद्धं तु युष्मदस्मदोः प्रतिषेधादिति ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । शेषे प्रथमो विधीयते न हि शेषश्चान्यश्च शेषग्रहणेन गृह्यते । भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः । किं कारणम् । युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते न च युष्मदस्मदी अन्यश्च युष्मदस्मद्ग्रहणेन गृह्यते । यदत्र युष्मद्यचास्मत्तदाश्रयौ मध्यमोत्तमौ भविष्यतः । यथैव तर्हि यदत्र युष्मद्यचास्मत्तदाश्रयौ मध्यमोत्तमौ भवत एवं योऽत्र शेषस्तदाश्रयः प्रथमः प्राप्नोति ॥ एवं तर्हि शेष उपपदे प्रथमो विधीयते । उपोच्चारि पदमुपपदम् । यश्चात्रोपोच्चारि न स शेषो यश्च शेषो न तदुपोच्चारि । भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः । किं कारणम् । युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते । उपोच्चारि पदमुपपदम् । यच्चात्रोपोच्चारि न ते युष्मदस्मदी ये च युष्मदस्मदी न तदुपोच्चारि ॥ एवं तर्हि शेषेण सामानाधिकरण्ये प्रथमो विधीयते न चात्र शेषेणैव सामानाधिकरण्यम् । भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः । किं कारणम् । युष्मदस्मद्भ्यां सामानाधिकरण्ये मध्यमोत्तमावुच्येते न चात्र युष्मदस्मद्भ्यामेव सामानाधिकरण्यम् ॥ एवं तर्हि त्यदादीनि सर्वैर्नित्यम् [१.२.७२] इत्येवमत्र युष्मदस्मदोः शेषो भविष्यति । तत्र युष्मदि मध्यमोऽस्मद्युत्तम इत्येव सिद्धम् ॥ न सिध्यति । स्थानिवत्पीति प्रथमः प्राप्नोति ॥ त्यदादीनां खल्वपि यद्यत्परं तत्तच्छिष्यत इति यदा भवतः शेषस्तदा प्रथमः प्राप्नोति ॥

युष्मदि मध्यमोऽस्मद्युत्तम इत्येवोच्यते । तर्हि न प्राप्नुतः । परत्वं भवति ।

युतः । ततो वक्ष्यामि प्रथमो भवतीति । तन्नियमार्थं भविष्यति । यत्र प्रथमश्चान्यश्च प्राप्नोति तत्र प्रथम एव भवतीति ॥

तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वात् ॥ २ ॥

तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधो वक्तव्यः । त्वं च देवदत्तश्च पचथः । अहं च देवदत्तश्च पचावः । किं कारणम् । शेषत्वात् । शेषे प्रथम इति प्रथमः प्राप्नोति ॥

सिद्धं तु युष्मदस्मदोः प्रतिषेधात् ॥ ३ ॥

सिद्धमेतत् । कथम् । युष्मदस्मदोः प्रतिषेधात् । शेषे प्रथमो युष्मदस्मदोर्नेति वक्तव्यम् ॥

युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन ॥ ४ ॥

युष्मदि मध्यमादस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन । युष्मदि मध्यम इत्यस्यावकाशः । त्वं पचसि । अस्मद्युत्तम इत्यस्यावकाशः । अहं पचामि । इहोभयं प्राप्नोति । त्वं चाहं च पचावः । अस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन ॥ स तर्हि विप्रतिषेधो वक्तव्यः । न वक्तव्यः । त्यदादीनां यद्यत्परं तत्तच्छिष्यत इत्येवमस्मदः शेषो भविष्यति । तत्रास्मद्युत्तम इत्येव सिद्धम् ॥

अनेकशेषभावार्थं तु ॥ ५ ॥

अनेकशेषभावार्थं तु स विप्रतिषेधो वक्तव्यो यदा नैकशेषो न । कदा नैकशेषो न । सहविवक्षायामेकशेषः । यदा न सहविवक्षा तदैकशेषो नास्ति ॥

न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः ॥ ६ ॥

न वार्थो विप्रतिषेधेन । किं कारणम् । युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामपि युष्मदस्मदधिकरणानामप्येकशेषेण न भवितव्यम् । त्वं चाहं च पचसि पचामि चेति ॥

क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य ॥ ७ ॥

क्रियापृथक्त्वे च द्रव्यपृथक्त्वं दृश्यते । तद्यथा । पचसि पचामि च त्वं चाहं

चेति । तदनुमानमुत्तरयोरपि क्रिययोरेकशेषो न भवतीति । एवं च कृत्वा सो ऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति । तत्रापि चैवं भवितव्यम् । त्वं च देवदत्तश्च पचसि पचति च । अहं च देवदत्तश्च पचामि पचति चेति ॥

यत्तावदुच्यते न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेध इति दृश्यते हि युष्मदस्मदोश्चानेकशेषस्तदधिकरणानां चैकशेषः । तद्यथा । त्वं चाहं च वृत्रहन्नुभौ संप्रयुज्यावहा इति ॥

यदप्युच्यते क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्येति क्रियापृथक्त्वे खल्वपि द्रव्यैकशेषो भवतीति दृश्यते । तद्यथा । अक्षा भज्यन्तां भक्ष्यन्तां दीव्यन्तामिति । एवं च कृत्वा सोऽपि दोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति ॥ नैष दोषः । परिहृतमेतत्सिद्धं तु युष्मदस्मदोः प्रतिषेधादिति ॥ स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । शेषे प्रथमो विधीयते न हि शेषश्चान्यश्च शेषग्रहणेन गृह्यते । भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः । किं कारणम् । युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते न च युष्मदस्मदी अन्यश्च युष्मदस्मद्ग्रहणेन गृह्यते । यदत्र युष्मद्यचास्मत्तदाश्रयौ मध्यमोत्तमौ भविष्यतः । यथैव तर्हि यदत्र युष्मद्यचास्मत्तदाश्रयौ मध्यमोत्तमौ भवत एवं योऽत्र शेषस्तदाश्रयः प्रथमः प्राप्नोति ॥ एवं तर्हि शेष उपपदे प्रथमो विधीयते । उपोच्चारि पदमुपपदम् । यच्चात्रोपोच्चारि न स शेषो यश्च शेषो न तदुपोच्चारि । भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः । किं कारणम् । युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते । उपोच्चारि पदमुपपदम् । यच्चात्रोपोच्चारि न ते युष्मदस्मदी ये च युष्मदस्मदी न तदुपोच्चारि ॥ एवं तर्हि शेषेण सामानाधिकरण्ये प्रथमो विधीयते न चात्र शेषेणैव सामानाधिकरण्यम् । भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः । किं कारणम् । युष्मदस्मद्भ्यां सामानाधिकरण्ये मध्यमोत्तमावुच्येते न चात्र युष्मदस्मद्भ्यामेव सामानाधिकरण्यम् ॥ एवं तर्हि त्यदादीनि सर्वैर्नित्यम् [१.२.७२] इत्येवमत्र युष्मदस्मदोः शेषो भविष्यति । तत्र युष्मदि मध्यमो ऽस्मद्युत्तम इत्येव सिद्धम् ॥ न सिध्यति । स्थानिन्यपीति प्रथमः प्राप्नोति ॥ त्यदादीनां खल्वपि यद्यत्परं तत्तच्छिष्यत इति यदा भवतः शेषस्तदा प्रथमः प्राप्नोति ॥

युष्मदि मध्यमो ऽस्मद्युत्तम इत्येवोच्यते । [illegible] ।

परमाहं पचामीति । तदन्तविधिना* भविष्यति । इहापि तर्हि तदन्तविधिना प्राप्नुतः । अतित्वं पचति । अत्यहं पचतीति । ये चाप्येते समानाधिकरणवृत्तयस्तद्धितास्तत्र च मध्यमोत्तमौ न प्राप्नुतः । त्वत्तरः पचसि मत्तरः पचामीति । त्वद्रूपः पचसि मद्रूपः पचामीति । त्वत्कल्पः पचसि मत्कल्पः पचामीति ॥ एवं तर्हि युष्मद्वत्यस्मद्वतीत्येवं भविष्यति । इहापि तर्हि प्राप्नुतः । अतित्वं पचति । अत्यहं पचतीति ॥

एवं तर्हि युष्मदि साधने ऽस्मदि साधन इत्येवं भविष्यति । एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति ॥ अथवा प्रथम उत्सर्गः करिष्यते तस्य युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावपवादौ भविष्यतः । तत्र युष्मद्वन्धश्चास्मद्वन्धश्चास्तीति कृत्वा मध्यमोत्तमौ भविष्यतः ॥

अथेह कथं भवितव्यम् । अत्वं त्वं संपद्यते त्वद्भवति मद्भवतीति । आहोस्वित्त्वद्भवसि मद्भवामीति । त्वद्भवति मद्भवतीत्येवं भवितव्यम् । मध्यमोत्तमौ कस्मान्न भवतः । गौणमुख्ययोर्मुख्ये संप्रत्ययो भवति । तद्यथा । गौरनुबन्ध्यो ऽजो ऽग्नीषोमीय इति न वाहीको ऽनुबध्यते । कथं तर्हि वाहीके वृद्ध्यात्त्वे भवतः† । गौस्तिष्ठति । गामानयेति । अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्त्वे ॥

परः संनिकर्षः संहिता ॥ १ । ४ । १०९ ॥

परः संनिकर्षः संहिता चेदद्रुतायामसंहितम् ॥ १ ॥

परः संनिकर्षः संहिता चेदद्रुतायां वृत्तौ संहितासंज्ञा न प्राप्नोति । द्रुतायामेव हि परः संनिकर्षो वर्णानां नाद्रुतायाम् ॥

तुल्यः संनिकर्षः ॥ २ ॥

तुल्यः संनिकर्षो वर्णानां द्रुतमध्यमविलम्बितासु वृत्तिषु ॥ किंकृतस्तर्हि विशेषः ।

वर्णकालभूयस्त्वं तु ॥ ३ ॥

वर्णानां तु कालभूयस्त्वम् । तद्यथा । हस्तिमशकयोस्तुल्यः संनिकर्षः प्राणिभूयस्त्वं तु ॥ यद्येवं

* १.१.७२. † [illegible]

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ॥ ४ ॥

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम् । किं कारणम् । कालभेदात् । ये द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायां ये मध्यमायां वृत्तौ वर्णास्त्रिभागाधिकास्ते विलम्बितायाम् ॥

उक्तं वा ॥ ५ ॥

किमुक्तम् । सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्त इति* ॥

अथवा शब्दाविरामः संहितेत्येतल्लक्षणं करिष्यते ।

शब्दाविरामे प्रतिवर्णमवसानम् ॥ ६ ॥

शब्दाविरामे प्रतिवर्णमवसानसंज्ञा प्राप्नोति† । किमिदं प्रतिवर्णमिति । वर्णं वर्णं प्रति प्रतिवर्णम् । येनैव यत्नेनैको वर्ण उच्चार्यते विच्छिन्ने वर्ण उपसंहृत्य तमन्यमुपादाय द्वितीयः प्रयुज्यते तथा तृतीयस्तथा चतुर्थः ॥ एवं तर्ह्यनवकाशा संहितासंज्ञावसानसंज्ञां बाधिष्यते ॥ अथवावसानसंज्ञायां प्रकर्षगतिर्विज्ञास्यते साधीयो यो विराम इति । कथं साधीयः । यः शब्दार्थयोर्विरामः ॥

अथवा ह्रस्वाविरामः संहितेत्येतल्लक्षणं करिष्यते ।

ह्रस्वाविरामे स्पर्शाघोषसंयोगे ऽसंनिधानादसंहितम् ॥ ७ ॥

ह्रस्वाविरामे स्पर्शानामघोषाणां संयोगे ऽसंनिधानात्संहितासंज्ञा न प्राप्नोति । कुक्कुटः पिप्पका पित्तमिति ॥ किमुच्यते संयोग इति । अथ यत्रैकः पतत्येकः पूर्वपरयोर्हि देशे प्रज्ञायते । तद्यथा । द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते । बदरपिटके रिक्तको लोहकंसस्तद्गुण उपलभ्यते ॥

एकेन तुल्यः संनिधिः ॥ ८ ॥

यथैको वर्णो ह्रस्वेन प्रज्ञायत एवमनेकोऽपि ॥

अथवा पौर्वापर्यमकालव्यपेतं संहितेत्येतल्लक्षणं करिष्यते ।

---

* १।१।७०

† १।४।११०

पौर्वापर्यमकालव्यपेतं संहिता चेत्पूर्वापराभावादसंहितम् ॥ ९ ॥

पौर्वापर्यमकालव्यपेतं संहिता चेत्पूर्वापराभावात्संहितासंज्ञा न प्राप्नोति । न हि वर्णानां पौर्वापर्यमस्ति । किं कारणम् ।

एकैकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानाम् ॥ १० ॥

एकैकवर्णवर्तिनी वाक् । न द्वौ युगपदुच्चारयति । गौरिति यावद्गकारे वाग्वर्तते नौकारे न विसर्जनीये यावदौकारे न गकारे न विसर्जनीये यावद्विसर्जनीये न गकारे नौकारे । उच्चरितप्रध्वंसित्वात् । उच्चरितप्रध्वंसिनः खल्वपि वर्णाः । उच्चरितः प्रध्वस्तः । अथापरः प्रयुज्यते न वर्णो वर्णस्य सहायः ॥ एवं तर्हि

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः ।
शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यम् ॥

बुद्धिविषयमेव शब्दानां पौर्वापर्यम् । इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यत्यस्मिन्नर्थे ऽयं शब्दः प्रयोक्तव्यो ऽस्मिंस्तावच्छब्दे ऽयं तावद्वर्णस्ततो ऽयं ततो ऽयमिति ॥

विरामो ऽवसानम् ॥ १ । ४ । ११० ॥

इदं विचार्यते ऽभावो ऽवसानलक्षणं स्याद्विरामो वेति । कश्चात्र विशेषः ।

अभावे ऽवसानलक्षण उपर्यभाववचनम् ॥ १ ॥

अभावे ऽवसानलक्षण उपर्यभावग्रहणं कर्तव्यम् । उपरि यो ऽभाव इति वक्तव्यम् । पुरस्तादपि हि शब्दस्याभावस्तत्र मा भूदिति । किं च स्यात् । रसः रथः । खरवसानयोर्विसर्जनीयः [८.३.१५] इति विसर्जनीयः प्रसज्येत ॥ अस्तु तर्हि विरामः ।

विरामे विरामवचनम् ॥ २ ॥

यस्य विरामो विरामग्रहणं तेन कर्तव्यम् । ननु च यस्याप्यभावस्तेनाप्यभावग्रहणं कर्तव्यम् । परार्थं मम भविष्यति । अभावो लोपः* । ततो ऽवसानं नेति ।

---

* १.१.६०.

ममापि तर्हि विरामग्रहणं परार्थं भविष्यति । विरामो लोपो ऽवसानं चेति । उपरि यो विराम इति वक्तव्यम् । पुरस्तादपि शब्दस्य विरामस्तत्र मा भूत् । किं च स्यात् । रसः रथः । खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत । आरम्भपूर्वको मम विरामः ॥

अथवा नेदमवसानलक्षणं विचार्यते । किं तर्हि । संज्ञी । अभावो ऽवसानसंज्ञी स्याद्विरामो वेति । कश्चात्र विशेषः ।

अभावे ऽवसानसंज्ञिन्युपर्यभाववचनम् ॥ ३ ॥

अभावे ऽवसानसंज्ञिन्युपर्यभावग्रहणं कर्तव्यम् । उपरि यो ऽभाव इति वक्तव्यम् । पुरस्तादपि हि शब्दस्याभावस्तत्र मा भूदिति । किं च स्यात् । रसः रथः । खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत ॥ अस्तु तर्हि विरामो ऽवसानम् ।

विरामे विरामवचनम् ॥ ४ ॥

यस्य विरामस्तेन विरामग्रहणं कर्तव्यम् । ननु च यस्याप्यभावस्तेनाप्यभावग्रहणं कर्तव्यम् । परार्थं मम भविष्यति । अभावो लोपः । ततो ऽवसानं चेति । ममापि तर्हि विरामग्रहणं परार्थं भविष्यति । विरामो लोपो ऽवसानं चेति । उपरि यो विराम इति वक्तव्यम् । ननु चोक्तमारम्भपूर्वक इति । नावश्यमयं रमिः प्रवृत्तावेव वर्तते । किं तर्हि । अप्रवृत्तावपि । तद्यथा । उपरतान्यस्मिन्कुले व्रतान्युपरतः स्वाध्याय इति न च तत्र स्वाध्यायो भूतपूर्वो भवति नापि व्रतानि ॥

भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं न ॥ ५ ॥

भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं नोपपद्यते । किमिदं भावाविरामभावित्वादिति । भावस्याविरामो भावाविरामः । भावाविरामेण भवतीति भावाविरामभावी । भावाविरामभाविनो भावो भावाविरामभावित्वम् ॥

अपर आह । भावभावित्वादविरामभावित्वाच्च शब्दस्यावसानलक्षणं नोपपद्यत इति ॥

तत्पर इति वा वर्णस्यावसानम् ॥ ६ ॥

विरामपरो वर्णो ऽवसानसंज्ञो भवतीति वक्तव्यम् ॥

वर्णोऽन्त्यो वावसानम् ॥ ७ ॥

अथवा व्यक्तमेव पठितव्यमन्त्यो वर्णो ऽवसानसंज्ञो भवतीति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

संहितावसानयोर्लोकविदितत्वात्सिद्धम् ॥ ८ ॥

संहितावसानमिति लोकविदितावेतावर्थौ । एवं हि कश्चित्कंचिदधीयानमाह । शंनोदेवीय संहितयाधीष्वेति । स तत्र परमसंनिकर्षमधीते । अपर आह । केनावस्यसीति । स आह । अकारेणेकारेणोकारेणेति । एवमेतौ लोकविदितावर्थौ तयोर्लोकविदितत्वात्सिद्धमिति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम् ॥ पादश्च समाप्तः ॥

॥ प्रथमो ऽध्यायः समाप्तः ॥

समर्थः पदविधिः ॥ २ । १ । १ ॥

विधिरिति कोऽयं शब्दः । विपूर्वाद्धाञः कर्मसाधन इकारः । विधीयते विधिरिति । किं पुनर्विधीयते । समासो विभक्तिविधानं पराङ्गवद्भावश्च* ॥

किं पुनरयमधिकार आहोस्वित्परिभाषा । कः पुनरधिकारपरिभाषयोर्विशेषः । अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठते । परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत् । तद्यथा । प्रदीपः सुप्रज्वलित एकदेशस्थः सर्वं वेश्माभिज्वलयति । कः पुनरत्र प्रयत्नविशेषः । अधिकारे सति स्वरयितव्यं परिभाषायां पुनः सत्यां सर्वमपेक्ष्यम् ॥ तथेदमपरं द्वैतं भवत्येकार्थीभावो वा सामर्थ्यं स्याद्व्यपेक्षा वेति । तत्रैकार्थीभावे सामर्थ्ये अधिकारे च सति समास एकः संगृहीतो भवति विभक्तिविधानं पराङ्गवद्भावश्चासंगृहीतः । व्यपेक्षायां पुनः सामर्थ्ये अधिकारे च सति विभक्तिविधानं पराङ्गवद्भावश्च संगृहीतः समासस्त्वेको ऽसगृहीतः । अन्यत्र खल्वपि समर्थग्रहणानि युक्तग्रहणानि च कर्तव्यानि भवन्ति । क्वान्यत्र । इसुसोः सामर्थ्ये [८.३.४४] न चवाहाहैवयुक्ते [८.१.२४] इति । व्यपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्यां यावान्व्याकरणे पदगन्धो ऽस्ति स सर्वः संगृहीतो भवति समासस्त्वेको ऽसंगृहीतः । तत्रैकार्थीभावः सामर्थ्यं परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति ॥ एवमपि क्वचिदकर्तव्यं समर्थग्रहणं क्रियते क्वचिच्च कर्तव्यं न क्रियते । अकर्तव्यं तावत्क्रियते समर्थानां प्रथमाद्वा [४.१.८२] इति । कर्तव्यं न क्रियते कर्मण्यण् [३.२.१] समर्थादिति । ननु च गम्यते तत्र सामर्थ्यम् । कुम्भकारः नगरकार इति । सत्यं गम्यत उत्पन्ने तु प्रत्यये । स एव तावत्समर्थादुत्पाद्यः ॥

अथ समर्थग्रहणं किमर्थम् । वक्ष्यति द्वितीया श्रितादिभिः समस्यते† । कष्टश्रितः नरकश्रित इति । समर्थग्रहणं किमर्थम् । पश्य देवदत्त कष्टं श्रितो विष्णुमित्रो

* २.१.३, २.३.१, २.१.२ † २.१.२४.

गुरुकुलम् ॥ तृतीया तत्कृतार्थेन गुणवचनेन [२.१.३०] शङ्कुलाखण्डः किरिकाणः। समर्थग्रहणं किमर्थम् । तिष्ठ त्वं शङ्कुलया खण्डो धावति मुसलेन ॥ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः [३६] गोहितम् अश्वहितम् । समर्थग्रहणं किमर्थम् । सुखं गोभ्यो हितं देवदत्ताय ॥ पञ्चमी भयेन [३७] वृकभयम् दस्युभयम् चोरभयम् । समर्थग्रहणं किमर्थम् । गच्छ त्वं मा वृकेभ्यो भयं देवदत्तस्य यज्ञदत्तात् ॥ षष्ठी सुबन्तेन समस्यते* । राजपुरुषः ब्राह्मणकम्बलः । समर्थग्रहणं किमर्थम् । भार्या राज्ञः पुरुषो देवदत्तस्य ॥ सप्तमी शौण्डैः [४०] अक्षशौण्डः स्त्रीशौण्डः । समर्थग्रहणं किमर्थम् । कुशलो देवदत्तोऽक्षेषु शौण्डः पिबति पानागारे ॥

अथ क्रियमाणेऽपि समर्थग्रहण इह कस्मान्न भवति । महत्कष्टं श्रित इति । न वा भवति महाकष्टश्रित इति । भवति यदैतद्वाक्यं भवति महत्कष्टं महाकष्टम् महाकष्टं श्रितो महाकष्टश्रित इति । यदा त्वेतद्वाक्यं भवति महत्कष्टं श्रित इति तदा न भवितव्यं तदा च प्राप्नोति । तदा कस्मान्न भवति । कस्य कस्मान्न भवति किं द्वयोराहोस्विद्बहूनाम् । बहूनां कस्मान्न भवति । सुप्सुपेति वर्तते† । ननु च भो आकृतौ शास्त्राणि प्रवर्तन्ते । तद्यथा । प्रातिपदिकादिति‡ वर्तमाने ऽन्यस्माच्चान्यस्माच्च प्रातिपदिकादुत्पत्तिर्भवति । सत्यमेवमेतत् । आकृतिस्तु प्रत्येकं परिसमाप्यते । यावत्येतत्परिसमाप्यते प्रातिपदिकादिति तावत उत्पत्त्या भवितव्यं प्रत्येकं चैतत्परिसमाप्यते न समुदाये । एवमिहापि यावत्येतत्परिसमाप्यते सुप्सुपेति तावतः समासेन भवितव्य द्वयोश्चैतत्परिसमाप्यते न बहुषु ॥ द्वयोस्तर्हि कस्मान्न भवति । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति ॥

यदि सापेक्षमसमर्थं भवतीत्युच्यते राजपुरुषो ऽभिरूपः राजपुरुषो दर्शनीयः अत्र वृत्तिर्न प्राप्नोति । नैष दोषः । प्रधानमत्र सापेक्षं भवति च प्रधानस्य सापेक्षस्यापि समासः ॥ यत्र तर्ह्यप्रधानं सापेक्षं भवति तत्र ते वृत्तिर्न प्राप्नोति । देवदत्तस्य गुरुकुलम् देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति । नैष दोषः । समुदायापेक्षात्र षष्ठी सर्वं गुरुकुलमपेक्षते ॥ यत्र तर्हि न समुदायापेक्षा षष्ठी तत्र वृत्तिर्न प्राप्नोति । किमोदनः शालीनाम् । सक्त्वाढकमापणीयानाम् । कुतो भवान्पाटलिपुत्रकः§ इति । इह चापि देवदत्तस्य गुरुकुलम् देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति यद्येषा समुदायापेक्षा षष्ठी स्यान्नैतन्नियोगतो गम्येत देवदत्तस्य यो गुरुस्तस्य यः पुत्र इति । किं तर्हि । अन्यस्यापि गुरुपुत्रो देवदत्तस्य किंचिदित्येषो ऽर्थो गम्येत । यतस्तु नि-

* २.२.८ † २.१.४. ‡ ४.१.१ § ४.२.११.

योगतो देवदत्तस्य यो गुरुस्तस्य यः पुत्र इत्येषो ऽर्थो गम्यते ऽतो मन्यामहे नैषा समुदायापेक्षा षष्ठीति ॥ अन्यत्र खल्वपि समर्थग्रहणे सापेक्षस्यापि कार्यं भवति । क्वान्यत्र । इसुसोः सामर्थ्ये [८.३.४४] ब्राह्मणस्य सर्पिष्करोतीति ॥ तस्माच्चैतच्छक्यं वक्तुं सापेक्षमसमर्थं भवतीति ॥ वृत्तिस्तर्हि कस्मान्न भवति महत्कष्टं श्रित इति । सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यम् ॥ यदि सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इत्युच्यते देवदत्तस्य गुरुकुलम् देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येत्यत्र वृत्तिर्न प्राप्नोति । अगुरुकुलपुत्रादीनामिति वक्तव्यम् ॥

तत्तर्हि वक्तव्यं सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यते ऽगुरुकुलपुत्रादीनामिति । न वक्तव्यम् । वृत्तिस्तर्हि कस्मान्न भवति । अगमकत्वात् । इह समानार्थेन वाक्येन भवितव्यं समासेन च । यश्चेहार्थो वाक्येन गम्यते महत्कष्टं श्रित इति न जातुचित्समासेनासौ गम्यते महत्कष्टश्रित इति । एतस्माद्धेतोर्ब्रूमो ऽगमकत्वादिति न ब्रूमो ऽपशब्दः स्यादिति । यत्र गमको भवति भवति तत्र वृत्तिः । तद्यथा । देवदत्तस्य गुरुकुलम् देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति ॥ यद्यगमकत्वं हेतुर्नार्थः समर्थग्रहणेन । इहापि भार्या राज्ञः पुरुषो देवदत्तस्येति यो ऽर्थो वाक्येन गम्यते नासौ जातुचित्समासेन गम्यते भार्या राजपुरुषो देवदत्तस्येति । तस्मान्नार्थः समर्थग्रहणेन ॥

इदं तर्हि प्रयोजनम् । अस्त्यसमर्थसमासो नञ्समासो गमकस्तस्य साधुत्वं मा भूत् । अकिंचित्कुर्वाणम् अमाषंहरमाणम् अगाधादुत्सृष्टमिति ॥ एतदपि नास्ति प्रयोजनम् । अवश्यं कस्यचिन्नञ्समासस्यासमर्थसमासस्य गमकस्य साधुत्वं वक्तव्यम् । असूर्यंपश्यानि मुखानि । अपुनर्गेयाः श्लोकाः । अश्राद्धभोजी अलवणभोजी ब्राह्मणः । सुडनपुंसकस्य [१.१.४३] इत्येतन्नियमार्थं भविष्यति । एतस्यैवासमर्थसमासस्य नञ्समासस्य गमकस्य साधुत्वं भवति नान्यस्येति ॥ तस्मान्नार्थः समर्थग्रहणेन ॥

अथ क्रियमाणे ऽपि समर्थग्रहणे समर्थमित्युच्यते किं समर्थं नाम ।

पृथगर्थानामेकार्थीभावः समर्थवचनम् ॥ १ ॥

पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते ॥ क्व पुनः पृथगर्थानि क्वैकार्थानि । वाक्ये पृथगर्थानि । राज्ञः पुरुष इति । समासे पुनरेकार्थानि । राजपुरुष

इति ॥ किमुच्यते पृथगर्थानीति यावता राज्ञः पुरुष आनीयतामित्युक्ते राजपुरुष आनीयते राजपुरुष इति च स एव । नापि ब्रूमो ऽन्यस्यानयनं भवतीति । कस्तर्ह्ये- कार्थीभावकृतो विशेषः ।

सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसंबन्धः स्वर

इति ॥ सुपोऽलोपो भवति वाक्ये । राज्ञः पुरुष इति । समासे पुनर्न भवति । राजपुरुष इति ॥ व्यवधानं च भवति वाक्ये । राज्ञ ऋद्धस्य पुरुष इति । समासे न भवति । राजपुरुष इति ॥ यथेष्टमन्यतरेणाभिसंबन्धो भवति वाक्ये । राज्ञः पुरुषः पुरुषो राज्ञ इति । समासे न भवति । राजपुरुष इति ॥ द्वौ स्वरौ भवतो वाक्ये । राज्ञः पुरुष इति । समासे पुनरेक एव । राजपुरुष इति ॥ नैत एकार्थीभावकृता विशेषाः । किं तर्हि । वाचनिकान्येतानि । आह हि भगवान् । सुपो धातुप्रातिपदिकयोः [२.४.७१]। उपसर्जनं पूर्वम् [२ २.३०] । समासस्यान्त उदात्तो भवतीति* ॥ इमे तर्ह्येकार्थीभावकृता विशेषाः ।

संख्याविशेषो व्यक्ताभिधानमुपसर्जनविशेषणं चयोग

इति ॥ संख्याविशेषो भवति वाक्ये । राज्ञः पुरुषः राज्ञोः पुरुषः राज्ञां पुरुष इति । समासे न भवति । राजपुरुष इति ॥ अस्ति कारण येनैतदेवं भवति । किं कारणम् । योऽसौ विशेषवाची शब्दस्तदसांनिध्यात् । अङ्ग हि भवांस्तमुच्चारयतु गंस्यते स विशेषः ॥ ननु च नैतेनैव भवितव्यम् । न हि शब्दकृतेन नामार्थेन भवितव्यम् । अर्थकृतेन नाम शब्देन भवितव्यम् । तदेतदेव दृश्यतामर्थरूपमेवैतदेवंजातीयक येनात्र विशेषो न गम्यत इति । अवश्य चैतदेवं विज्ञेयम् । यो हि मन्यते यो ऽसौ विशेषवाची शब्दस्तदसांनिध्यादत्र विशेषो न गम्यत इतीह तस्य विशेषो गम्येत । अप्सुचरः गोपुचरः वर्षासुज इति ॥ व्यक्ताभिधान भवति वाक्ये । ब्राह्मणस्य कम्बलस्तिष्ठतीति । समासे पुनरव्यक्तम् । ब्राह्मणकम्बलस्तिष्ठतीति । संदेहो भवति संबुद्धिर्वा स्यात्षष्ठीसमासो वेति ॥ एषोऽप्यविशेषः । भवति हि किंचिद्वाक्ये ऽव्यक्त तच्च समासे व्यक्तम् । वाक्ये तावदव्यक्तम् । अर्धं पशोर्देवदत्तस्येति । संदेहो भवति पशुगुणस्य वा देवदत्तस्य यदर्धमथवा योऽसौ संज्ञीभूतः पशुर्नाम तस्य यदर्धमिति । तच्च समासे व्यक्त भवति । अर्धपशुर्देवदत्तस्येति ॥ उपसर्जनविशेषण भवति वाक्ये । ऋद्धस्य राज्ञः पुरुष इति । समासे न भवति ।

राजपुरुष इति ॥ एषोऽप्यविशेषः । समासे ऽप्युपसर्जनविशेषणं भवति । तद्यथा । देवदत्तस्य गुरुकुलम् देवदत्तस्य गुरुपुत्रः देवदत्तस्य दासभार्येति ॥ चयोगो भवति वाक्ये । स्वचयोगः स्वामिचयोगश्च । स्वचयोगः । राज्ञो गौश्चाश्वश्च पुरुषश्चेति । समासे न भवति । राज्ञो गवाश्वपुरुषा इति । स्वामिचयोगः । देवदत्तस्य च यज्ञदत्तस्य च विष्णुमित्रस्य च गौरिति । समासे न भवति । देवदत्तयज्ञदत्तविष्णुमित्राणां गौरिति ॥

अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थाभिधानमाहोस्विद्वाचनिकम् । स्वाभाविकमित्याह । कुत एतत् । अर्थानादेशात् । न ह्यर्था आदिश्यन्ते । कथं पुनरर्थानादिशन्नेवं ब्रूयान्नार्था आदिश्यन्त इति । यदाह भगवान् । अनेकमन्यपदार्थे [२.२.२४] चार्थे द्वन्द्वः [२९] अपत्ये रक्ते निर्वृत्त इति* । नैतान्यर्थादेशनानि । स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते । तद्यथा । कूपे हस्तदक्षिणः पन्थाः । अभ्रे चन्द्रमसं पश्येति । स्वभावतस्तत्रस्थस्य पथश्चन्द्रमसश्च निमित्तत्वेनान्वाख्यानं क्रियते । एवमिहापि चार्थे यः स द्वन्द्वसमासो ऽन्यपदार्थे यः स बहुव्रीहिरिति ॥ किं पुनः कारणमर्था नादिश्यन्ते । तच्च लघ्वर्थम् । लघ्वर्थं ह्यर्था नादिश्यन्ते । अवश्य ह्यनेनार्थानादिशता केनचिच्छब्देन निर्देशः कर्तव्यः स्यात् । तस्य च तावत्केन कृतो येनासौ क्रियते । अथ तस्य केनचित्कृतस्तस्य केन कृत इत्यनवस्था ॥ असंभवः खल्वप्यर्थादेशनस्य । को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम् । न चैतन्मन्तव्यं प्रत्ययार्थे निर्दिष्टे प्रकृत्यर्थो निर्दिष्ट इति । भवति हि गुणाभिधाने गुणिनः संप्रत्ययः । तद्यथा । शुक्लः कृष्ण इति । विषम उपन्यासः । सामान्यशब्दा एत एवं स्युः । सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते । यतस्तु खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदेव विशेषे वृक्षशब्दो वर्तते ऽतो मन्यामहे नेमे सामान्यशब्दा इति । न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययः प्रत्ययार्थे वर्तते ॥ अप्रवृत्तिः खल्वप्यर्थादेशनस्य । बहवो हि शब्दा येषामर्था न विज्ञायन्ते । जर्भरी तुर्फरीतू ॥ अन्तरेण खल्वपि शब्दप्रयोगं बहवो ऽर्था गम्यन्ते ऽक्षिनिकोचैः पाणिविहारैश्च ॥ न खल्वपि निर्ज्ञातस्यार्थस्यान्वाख्याने किंचिदपि प्रयोजनमस्ति । यो हि ब्रूयात्पुरस्तादादित्य उदेति पश्चादस्तमेति मधुरो गुडः कटुकं शृङ्गवेरमिति किं तेन कृतं स्यात् ॥

---

* ४ १ ९२, ४ २ १, ६८, ६९ ७९, ८४ १०७, ५ ४ ३२ ४४ ६९

वावचनानर्थक्यं च स्वभावसिद्धत्वात् ॥ २ ॥

वावचनमनर्थकम् । किं कारणम् । स्वभावसिद्धत्वात् । इह द्वौ पक्षौ वृत्ति- वृत्तिपक्षश्च । स्वभावतश्चैतद्भवति वाक्यं च समासश्च । तत्र स्वाभाविके विषये नित्ये समासे प्राप्ते वावचनेन किमन्यच्छक्यमभिसंबन्द्धुमन्यदतः सं- । न च संज्ञाया भावाभावाविष्येते । तस्मान्नार्थो वावचनेन ॥

थ ये वृत्तिं वर्तयन्ति किं त आहुः । परार्थाभिधानं वृत्तिरित्याहुः । अथ तेषामेवं किं जहत्स्वार्था वृत्तिर्भवत्याहोस्विदजहत्स्वार्था । किं चातः । यदि जहत्स्वार्था राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोत्यौपगवमानयेत्युक्ते ऽपत्यमा- । अथाजहत्स्वार्था वृत्तिरुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति* द्विवचनं ति ॥ का पुनर्वृत्तिर्न्याय्या । जहत्स्वार्था । युक्तं पुनर्यज्जहत्स्वार्था नाम वृत्तिः । बाढं युक्तम् । एवं हि दृश्यते लोके । पुरुषो ऽयं परकर्मणि प्रवर्तमानः स्वं कर्म ति । तद्यथा । तक्षा राजकर्मणि प्रवर्तमानः स्वं कर्म जहाति । एवं युक्तं यद्राजा र्थे वर्तमानः स्वमर्थं जह्यादुपगुश्चापत्यार्थे वर्तमानः स्वमर्थं जह्यात् । ननु चोक्तं पुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोत्यौपगवमानयेत्युक्ते ऽपत्यमात्रस्येति । दोषः । जहदप्यसौ स्वार्थं नात्यन्ताय जहाति । यः परार्थविरोधी स्वा- जहाति । तद्यथा । तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति न हिक्कि- तितकण्डूयितानि । न चायमर्थः परार्थविरोधी विशेषणं नाम तस्मान्न हास्यति ॥ वान्वयाद्विशेषणं भविष्यति । तद्यथा । घृतघटस्तैलघट इति निषिक्ते घृते तैले यद्विशेषणं भवत्ययं घृतघटो ऽयं तैलघट इति । विषम उपन्यासः । भवति तत्र या च यावती चार्थमात्रा । अङ्ग हि भवानतो निरूप्य घृतघटं तृणकूर्चेन ालयतु न गम्यते स विशेषः । यथा तर्हि मल्लिकापुटश्चम्पकपुट इति निष्की- अपि सुमनःस्वन्वयाद्विशेषणं भवत्ययं मल्लिकापुटो ऽयं चम्पकपुट इति ॥ वा समर्थाधिकारो ऽयं वृत्तौ क्रियते । सामर्थ्यं नाम भेदः संसर्गो वा ॥ अपर ः । भेदसंसर्गौ वा सामर्थ्यमिति ॥ कः पुनर्भेदः संसर्गो वा । इह राज इत्युक्ते सर्वे प्रसक्तः पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः । इहेदानीं राजपुरुष इत्युक्ते राजा यं निवर्तयत्यन्येभ्यः स्वामिभ्यः पुरुषो ऽपि राजानमन्येभ्यः स्वेभ्यः । एवमेत- मुभयतो व्यवच्छिन्ने यदि जहाति कामं जहातु न जातुचित्पुरुषमात्रस्यानयनं भवि- ति ॥ अथवा पुनरस्त्वजहत्स्वार्था वृत्तिः । युक्तं पुनर्यदजहत्स्वार्था नाम वृत्तिः

* १ ४ २२

स्यात् । बाढं युक्तम् । एवं हि दृश्यते लोके । भिक्षुकोऽयं द्वितीयां भिक्षामासाद्य पूर्वां न जहाति संचयाय प्रवर्तते । ननु चोक्तमुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोतीति । कस्याः पुनर्द्विवचनं प्राप्नोति । प्रथमायाः । न प्रथमासमर्थो राजा । षष्ठ्यास्तर्हि प्राप्नोति । न षष्ठीसमर्थः पुरुषः । प्रथमाया एव तर्हि प्राप्नोति । ननु चोक्तं न प्रथमासमर्थो राजेति । अभिहितः सोऽर्थो ऽन्तर्भूतः प्रातिपदिकार्थः संपन्नस्तत्र प्रातिपदिकार्थे प्रथमेति* प्रथमाया एव द्विवचनं प्राप्नोति ।

संघातस्यैकार्थ्यात्तत्रावयवसंख्यातः सुबुत्पत्तिः ॥ ३ ॥

संघातस्यैकत्वमर्थस्तेनावयवसंख्यातः सुबुत्पत्तिर्न भविष्यति ॥

परस्परव्यपेक्षां सामर्थ्यमेके ॥ ४ ॥

परस्परव्यपेक्षां सामर्थ्यमेक इच्छन्ति ॥ का पुनः शब्दयोर्व्यपेक्षा । न ब्रूमः शब्दयोरिति । किं तर्हि । अर्थयोः । इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति पुरुषोऽपि राजानमपेक्षते ऽहमस्येति । तयोरभिसंबन्धस्य षष्ठी वाचिका भवति । तथा कष्टं श्रित इति क्रियाकारकयोरभिसंबन्धस्य द्वितीया वाचिका भवति ॥

अथ यद्येवैकार्थीभावः सामर्थ्यमथापि व्यपेक्षा सामर्थ्यं किं गतमेतादियता सूत्रेणाहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम् । गतमित्याह । कथम् । समो ऽयमर्थशब्देन सह समासः । सं चोपसर्गः । उपसर्गाश्च पुनरेवमात्मका यत्र कश्चित्क्रियावाची शब्दः प्रयुज्यते तत्र क्रियाविशेषमाहुः । न चेह कश्चित्क्रियावाची शब्दः प्रयुज्यते येन समः सामर्थ्यं स्यात् । तत्र प्रयोगादेतद्गन्तव्यं नूनमत्र कश्चित्प्रयोगार्हः शब्दो न प्रयुज्यते येन समः सामर्थ्यमिति । तद्यथा । धूमं दृष्ट्वाग्निरत्रेति गम्यते त्रिविष्टब्धकं च दृष्ट्वा परिव्राजक इति । कः पुनरसौ प्रयोगार्हः शब्दः । उच्यते । संगतार्थं समर्थं संसृष्टार्थं समर्थं संप्रेक्षितार्थं समर्थं संबद्धार्थं समर्थमिति ॥ तद्यदा तावदेकार्थीभावः सामर्थ्यं तदैवं विग्रहः करिष्यते संगतार्थः समर्थः संसृष्टार्थः समर्थ इति । तद्यथा । संगतं घृतं संगतं तैलमित्युच्यत एकीभूतमिति गम्यते । संसृष्टो ऽग्निरित्युच्यत एकीभूत इति गम्यते ॥ यदा व्यपेक्षा सामर्थ्यं तदैवं विग्रहः करिष्यते संप्रेक्षितार्थः समर्थः संबद्धार्थः समर्थ इति ॥ कः पुनरिह बद्धार्थः । संबद्ध इत्युच्यते यो रज्ज्वायसा वा कीले व्यति-

---

* २.३.४६

पक्षो भवति । नावश्यं बध्नातिर्व्यतिषङ्ग एव वर्तते । किं तर्हि । अहानावपि वर्तते । तद्यथा । संबद्धाविमौ दम्याविर्त्युच्येते यावन्योऽन्यं न जहीतः ॥ अथवा भवति वैवंजातीयकेषु बध्नातिर्वर्तते । तद्यथा । अस्ति नो गर्गैः संबन्धः । अस्ति नो वत्सैः संबन्ध इति । संयोग इत्यर्थः ॥ अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः ॥

तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः ॥ ५ ॥

तत्रैतस्मिन्व्यपेक्षायां सामर्थ्ये नानाकारकान्निघातयुष्मदस्मदादेशाः प्राप्नुवन्ति तेषां प्रतिषेधो वक्तव्यः ॥ निघातः । अयं दण्डो हरानेन । अस्ति दण्डस्य हरतेश्च व्यपेक्षेति कृत्वा निघातः प्राप्नोति* ॥ युष्मदस्मदादेशाः । ओदनं पच तव भविष्यति । ओदनं पच मम भविष्यति । अस्त्योदनस्य युष्मदस्मदोश्च व्यपेक्षेति कृत्वा वाम्नावादयः प्राप्नुवन्ति† तेषां प्रतिषेधो वक्तव्यः ॥ किमुच्यते नानाकारकादिति यदा तेनैवासज्य ह्रियते । नापि ब्रूमोऽन्येनासज्य ह्रियत इति । किं तर्हि । शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्चेह सत्तामाह । अयं दण्डः । अस्तीति गम्यते । स दण्डः कर्ता भूत्वान्येन शब्देनाभिसंबध्यमानः करणं संपद्यते । तद्यथा । कश्चित्कंचित्पृच्छति । क्व देवदत्त इति । स तस्मा आचष्टे । असौ वृक्ष इति । कतरस्मिन् । यस्तिष्ठतीति । स वृक्षोऽधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्ता संपद्यते ॥

प्रचये समासप्रतिषेधः ॥ ६ ॥

प्रचये समासप्रतिषेधो वक्तव्यः । राज्ञो गौश्चाश्वश्च पुरुषश्च राजगवाश्वपुरुषा इति ॥

समर्थतराणां वा ॥ ७ ॥

समर्थतराणां वा पदानां समासो भविष्यति । कानि पुनः समर्थतराणि । यानि द्वन्द्वभावीनि । कुत एतत् । एषां ह्याशुतरा वृत्तिः प्राप्नोति । तद्यथा । समर्थतरोऽयं माणवको ऽध्ययनायेत्युच्यत आशुतरमन्थ इति गम्यते ॥

अपर आह । *समर्थतराणां वा पदानां समासो भविष्यति । कानि पुनः समर्थतराणि । यानि द्वन्द्वभावीनि । कुत एतत् । एतानि समानविभक्तीन्यन्यविभक्ती राजा । भवति विशेषः स्वस्मिन्भ्रातरि पितृव्यपुत्रे च* ॥

---

* ८.१.२८   † ८.१.३०.

समुदायसामर्थ्याद्वा सिद्धम् ॥ ८ ॥

समुदायसामर्थ्याद्वा पुनः सिद्धमेतत् । समुदायेन राज्ञः सामर्थ्यं भवति नावयवेन ॥

अपर आह । समर्थतराणां वा समुदायसामर्थ्यात् । समर्थतराणां वा पदानां समासो भवति । कुत एतत् । समुदायसामर्थ्यादेव ॥ अस्मिन्पक्षे वेत्येतदसमर्थितं भवति । एतच्च समर्थितम् । कथम् । नैव वा पुनरत्र राज्ञो ऽश्वपुरुषावपेक्षमाणस्य गवा सह समासो भवति । किं तर्हि । गो राजानमपेक्षमाणस्याश्वपुरुषाभ्यां सह समासो भवति । प्रधानमत्र तदा गौर्भवति भवति च प्रधानस्य सापेक्षस्यापि समासः ॥

आख्यातं साव्ययकारकविशेषणं वाक्यम् ॥ ९ ॥

आख्यातं साव्यय सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम् ॥ साव्ययम् । उच्चैः पठति । नीचैः पठति ॥ सकारकम् । ओदनं पचति ॥ सकारकविशेषणम् । ओदनं मृदुविशदं पचति ॥ सक्रियाविशेषणं चेति वक्तव्यम् । सुष्ठु पचति । दुष्ठु पचति ॥

अपर आह । आख्यातं सविशेषणमित्येव । सर्वाणि ह्येतानि क्रियाविशेषणानि ॥

एकतिङ् ॥ १० ॥

एकतिङ्वाक्यसंज्ञं भवतीति वक्तव्यम् । ब्रूहि ब्रूहि ॥

समानवाक्ये निघातयुष्मदस्मदादेशाः ॥ ११ ॥

समानवाक्य इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः । किं प्रयोजनम् । नानावाक्ये मा भूवन्निघातादय इति । अयं दण्डो हरानेन । ओदनं पच तव भविष्यति । ओदनं पच मम भविष्यति ॥

योगे प्रतिषेधश्चादिभिः ॥ १२ ॥

चादिभिर्योगे प्रतिषेधो वक्तव्यः । ग्रामस्तव च स्वं मम च स्वम् ॥ किमर्थमिदमुच्यते । यथान्यासमेव चादिभिर्योगे प्रतिषेध उच्यते* ॥ इदमथापूर्वं क्रियते

* ८.१.२४.

वाक्यसंज्ञा समानवाक्याधिकारश्च । तद्वैष्यं विजानीयात्सर्वमेतद्विकल्पत इति । तदाचार्यः सुहृद्भूत्वान्वाचष्टे चादिभिर्योगे यथान्यासमेव भवतीति ॥

सा चावश्यं वाक्यसंज्ञा वक्तव्या समानवाक्याधिकारश्च वक्तव्यः ।

समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानमसमर्थत्वात् ॥ १३ ॥

समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानं कर्तव्यं स्यात् ॥ समानाधिकरणे । पटवे ते दास्यामि । मृदवे ते दास्यामि । समानाधिकरणे ॥ युक्तयुक्ते । नद्यास्तिष्ठति कूले । वृक्षस्य लम्बते शाखा । शालीनां त ओदनं ददामि । शालीनां म ओदनं ददाति ॥ किं पुनः कारणं न सिध्यति । असमर्थत्वात् ॥

राजगवीक्षीरे द्विसमासप्रसङ्गो द्विषष्ठीभावात् ॥ १४ ॥

राजगवीक्षीरे* द्विसमासप्रसङ्गः । किं कारणम् । द्विषष्ठीभावात् । द्वे ह्यत्र षष्ठ्यौ । राज्ञो गोः क्षीरमिति ॥ किमुच्यते द्विसमासप्रसङ्ग इति यावता सुप्सुपेति† वर्तते । द्विसमासप्रसङ्ग इति नैवं विज्ञायते द्वयोः सुबन्तयोः समासप्रसङ्गो द्विसमासप्रसङ्ग इति । कथं तर्हि । द्विप्रकारस्य समासस्य प्रसङ्गो द्विसमासप्रसङ्ग इति । राजगोक्षीरमित्यपि प्राप्नोति न चैव भवितव्यम् । भवितव्यं च यदैतद्वाक्यं भवति गोः क्षीरं गोक्षीरम् राज्ञो गोक्षीरं राजगोक्षीरमिति । यदा त्वेतद्वाक्यं भवति राज्ञो गोः क्षीरमिति तदा न भवितव्यं तदा च प्राप्नोति । तदा कस्मान्न भवति ॥

सिद्धं तु राजविशिष्टाया गोः क्षीरेण सामर्थ्यात् ॥ १५ ॥

सिद्धमेतत् । कथम् । राजविशिष्टाया गोः क्षीरेण सह समासो भवति न केवलायाः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । यथैवायं गवि यतते न क्षीरमात्रेण संतोषं करोत्येवं राजन्यपि यतते । राज्ञो या गौस्तस्या यत्क्षीरमिति ॥ नैव वा पुनरत्र गो राजानमपेक्षमाणायाः क्षीरेण सह समासः प्राप्नोति । किं कारणम् । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । कथं तर्हि गोः क्षीरमपेक्षमाणाया राज्ञा सह समासो भवति । प्रधानमत्र तदा गौर्भवति भवति च प्रधानस्य सापेक्षस्यापि समासः ॥

अथ किमर्थं पदविधौ समर्थाधिकारः क्रियते ।

---

* ५.४.९२,९१.११ † २.१.४

पदविधौ समर्थवचनं वर्णाश्रये शास्त्र आनन्तर्यविज्ञानात् ॥ १६ ॥

पदविधौ समर्थाधिकारः क्रियते वर्णाश्रये शास्त्र आनन्तर्यमात्रे कार्यं यथा विज्ञायेतेति । तिष्ठतु दध्यशान* त्वं शाकेन । तिष्ठतु कुमारी च्छत्त्रं† हर देवदत्तेति ॥

समर्थाधिकारस्य विधेयसामानाधिकरण्यान्निर्देशानर्थक्यम् ॥ १७ ॥

समर्थाधिकारोऽयं विधेयेन समानाधिकरणः । किं च विधेयम् । समासः । यावद्ब्रूयात्समर्थः समास इति तावत्समर्थः पदविधिरिति । न च राजपुरुष इत्येतस्यामवस्थायां समर्थाधिकारेण किंचिदपि शक्यं प्रवर्तयितुं निवर्तयितुं वा । समर्थाधिकारस्य विधेयसामानाधिकरण्यान्निर्देशो ऽनर्थकः ॥

सिद्धं तु समर्थानामिति वचनात् ॥ १८ ॥

सिद्धमेतत् । कथम् । समर्थानां पदानां विधिर्भवतीति वक्तव्यम् ॥ एवमपि ह्येकयोर्न प्राप्नोति ॥

एकशेषनिर्देशाद्वा ॥ १९ ॥

अथवैकशेषनिर्देशो ऽयम् । समर्थस्य च समर्थयोश्च समर्थानां च समर्थानामिति ॥ एवमपि पट्प्रभृतीनामेव प्राप्नोति पट्प्रभृतिषु ह्येकशेषः परिसमाप्यते । नैष दोषः । प्रत्येक वाक्यपरिसमाप्तिर्दृष्टेति ह्येकयोरपि भविष्यति ॥ एवमपि विविभक्तीनां न प्राप्नोति । समर्थात्समर्थे पदात्पद इति ॥ एवं तर्हि समर्थपदयोरयं विधिशब्देन सर्वविभक्त्यन्तः समासः । समर्थस्य विधिः समर्थविधिः । समर्थयोर्विधिः समर्थविधिः । समर्थानां विधिः समर्थविधिः । समर्थाद्विधिः समर्थविधिः । समर्थे विधिः समर्थविधिः । पदस्य विधिः पदविधिः । पदयोर्विधिः पदविधिः । पदानां विधिः पदविधिः । पदाद्विधिः पदविधिः । पदे विधिः पदविधिः । समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधयः । पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधयः । समर्थविधयश्च पदविधयश्च समर्थः पदविधिः । पूर्वः समास उत्तरपदलोपी यादृच्छिकी विभक्तिः ॥

---

* ६.१. ७७. † ६.१. ७५, ७६

समानाधिकरणेषूपसंख्यानमसमर्थत्वात् ॥ २० ॥

समानाधिकरणेषूपसंख्यानं कर्तव्यम् । वीरः पुरुषो वीरपुरुषः* । किं पुनः कारणं न सिध्यति । असमर्थत्वात् । कथमसामर्थ्यम् ।

द्रव्यं पदार्थ इति चेत् ॥ २१ ॥

यदि द्रव्यं पदार्थो न भवति तदा सामर्थ्यम् । अथ हि गुणः पदार्थो भवति तदा सामर्थ्यम् । अन्यो हि वीरत्वं गुणो ऽन्यो हि पुरुषत्वम् ॥ नान्यत्वमस्तीतीयता सामर्थ्यं भवति । अन्यो हि देवदत्तो गोभ्यश्चाश्वेभ्यश्च न च तस्यैतावता सामर्थ्यं भवति । को वा विशेषो यद्गुणे पदार्थे सामर्थ्यं स्याद्द्रव्ये च न स्यात् । एष विशेषः । एकं तयोरधिकरणमन्यश्च वीरत्वं गुणो ऽन्यः पुरुषत्वम् ॥ द्रव्यपदार्थिकस्यापि तर्हि गुणभेदात्सामर्थ्यं भविष्यति । अशक्यो द्रव्यपदार्थिकेन द्रव्यस्य गुणकृत उपकारः प्रतिज्ञातुम् । ननु चाभ्यन्तरोऽसौ भवति । यद्यप्यभ्यन्तरो न तु गम्यते । न हि गुड इत्युक्ते मधुरत्वं गम्यते शृङ्गवेरमिति वा कटुकत्वम् । गुणपदार्थिकेनापि तर्ह्यशक्यो गुणस्य द्रव्यकृत उपकारः प्रतिज्ञातुम् । अथ गुणपदार्थिकः प्रतिजानीते द्रव्यपदार्थिकोऽपि कस्मान्न प्रतिजानीते । एवमनयोः सामर्थ्यं स्याद्वा न वा ॥ क्व च तावदिदं स्यात्समानाधिकरणेनेति† । यत्र सर्वं समानम् । इन्द्रः शक्रः पुरुहूतः पुरंदरः । कन्दुः कोष्ठः कुशूल इति । नैवंजातीयकानां समासेन भवितव्यं प्रत्ययेन वोत्पत्तव्यम् । किं कारणम् । अर्थगत्यर्थः शब्दप्रयोगः । अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते । तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम् । किं कारणम् । उक्तार्थानामप्रयोग इति । न तर्हीदानीमिदं भवति भृत्यभरणीय इति । नैतौ समानार्थौ । एकोऽत्र शक्यार्थे कृत्यो ऽपरो ऽर्हार्थे । शक्यो भर्तुं भृत्यः । अर्हति भृतिं भरणीयः । भृत्यो भरणीयो भृत्यभरणीय इति ॥ यदि तर्हि यत्र किंचित्समानं कश्चिच्च विशेषस्तत्र भवितव्यमिहापि तर्हि प्राप्नोति । दर्शनीयाया माता दर्शनीयामातेति । अत्रापि किंचित्समानं कश्चिच्च विशेषः । किं पुनस्तत् । सद्भावान्यभावौ ॥ न क्वचित्सद्भावान्यभावौ न स्त उच्यते चेदं समानाधिकरणेनेति तत्र प्रकर्षगतिर्विज्ञास्यते । यत्र साधीयः सामानाधिकरण्यम् । क्व च साधीयः सामानाधिकरण्यम् । यत्र सर्वं समानं सद्भावान्यभावौ

---

* २.१.५८ † २.१.४०,५७.

द्रव्यं च ॥ अथवा समानाधिकरणेनेति तत्समानमाश्रीयते यत्समानं भवति न च भवति न चैतत्समानं क्वचिदपि न भवति ॥ अथवा यावद्ब्रूयात्समानद्रव्येणेति तावत्समानाधिकरणेनेति । द्रव्यं हि लोके ऽधिकरणमित्युपचर्यते । तद्यथा । एकस्मिन्द्रव्ये व्युदितम् । एकस्मिन्नधिकरणे व्युदितमिति । तथा व्याकरणे विप्रतिषिद्धं चानधिकरणवाचि [२.४.१३] इत्यद्रव्यवाचीति गम्यते ॥ एवमपीदमवश्यं कर्तव्यं समानाधिकरणमसमर्थवद्भवतीति । किं प्रयोजनम् । सर्पिः कालकम् यजुः पीतकमित्येयमर्थम्* । यदि समानाधिकरणमसमर्थवद्भवतीत्युच्यते सर्पिष्पीयते यजुष्क्रियत इत्यत्र षत्वं न प्राप्नोति । अथात्वभिहितमित्येवं तत् । एवं च कृत्वा समानाधिकरणेषूपसंख्यानं कर्तव्यम् । वीरः पुरुषो वीरपुरुषः । किं कारणम् । असमर्थत्वात् ॥

न वा वचनप्रामाण्यात् ॥ २२ ॥

न वा कर्तव्यम् । किं कारणम् । वचनप्रामाण्यात् । वचनप्रामाण्यादत्र समासो भविष्यति । किं वचनप्रामाण्यम् । समानमध्यमध्यमवीराश्चेति† ॥

लुप्ताख्यातेषु च ॥ २३ ॥

लुप्ताख्यातेषु चोपसंख्यानं कर्तव्यम् । निष्कौशाम्बिः निर्वाराणसिः ॥ लुप्ताख्यातेषु च । किम् । वचनप्रामाण्यादित्येव । किं वचनप्रामाण्यम् । कुगतिप्रादयः [२.२.१८] इति । अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम् । सुराजा अतिराजेति । न ब्रूमो वृत्तिसूत्रवचनप्रामाण्यादिति । किं तर्हि । वार्तिकवचनप्रामाण्यादिति । सिद्धं तु क्राड्स्वतिदुर्गतिवचनात्प्रादयः क्तार्थ इति‡ ॥

तदर्थगतेर्वा ॥ २४ ॥

तदर्थगतेर्वा पुनः सिद्धमेतत् । किमिदं तदर्थगतेरिति । तस्यार्थस्तदर्थः । तदर्थस्य गतिस्तदर्थगतिः । तदर्थगतेरिति । यस्यार्थस्य कौशाम्ब्या सामर्थ्यं स निसोच्यते । अथवा सोऽर्थस्तदर्थः । तदर्थस्य गतिस्तदर्थगतिः । तदर्थगतेरिति । योऽर्थः कौशाम्ब्या समर्थः स निसोच्यते ॥

अथ यत्र बहूनां समासप्रसङ्गः किं तत्र द्वयोर्द्वयोः समासो भवत्याहोस्विदविशेषेण । कश्चात्र विशेषः ।

---

* ८.१ १४. † २१ १८. ‡ २१.१८*.

समासो द्वयोर्द्वयोश्चेद्द्वन्द्वे ऽनेकग्रहणम् ॥ २५ ॥

समासो द्वयोर्द्वयोश्चेद्द्वन्द्वे ऽनेकग्रहणं कर्तव्यम् । चार्थे द्वन्द्वः [२.२.२९] अनेकमिति वक्तव्यम् । इहापि यथा स्यात् । प्लक्षन्यग्रोधखदिरपलाशा इति ॥ नैष दोषः । अत्रापि द्वयोर्द्वयोः समासो भविष्यति ।

द्वयोर्द्वयोः समास इति चेन्न बहुषु द्वित्वाभावात् ॥ २६ ॥

द्वयोर्द्वयोः समास इति चेत्तन्न । किं कारणम् । बहुषु द्वित्वाभावात् । न बहुषु द्वित्वमस्ति ॥ नावश्यमेव विग्रहः कर्तव्यः प्लक्षश्च न्यग्रोधश्च खदिरश्च पलाशश्चेति । किं तर्हि । एवं विग्रहः करिष्यते । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । खदिरश्च पलाशश्च खदिरपलाशौ । प्लक्षन्यग्रोधौ च खदिरपलाशौ च प्लक्षन्यग्रोधखदिरपलाशा इति ॥ होतृपोतृनेष्टोद्गातारस्तर्हि न सिध्यन्ति* । होतापोतानेष्टोद्गातार इति प्राप्नोति न चैव भवितव्यम् । भवितव्यं च यदेवं विग्रहः क्रियते । होता च पोता च होतापोतारौ । नेष्टा चोद्गाता च नेष्टोद्गातारौ । होतापोतारौ च नेष्टोद्गातारौ च होतापोतानेष्टोद्गातारः । होतृपोतृनेष्टोद्गातारस्तु न सिध्यन्ति ॥

समासान्तप्रतिषेधश्च ॥ २७ ॥

समासान्तस्य च प्रतिषेधो वक्तव्यः । वाक्त्वक्स्रुग्दृषदमिति† । वाक्त्वचस्रुग्दृषदमिति प्राप्नोति ॥ नैष दोषः । अत्रापि परेण परेण सह समासो भविष्यति । स्रुक्च दृषच्च स्रुग्दृषदम् । त्वक्च स्रुग्दृषदं च त्वक्स्रुग्दृषदम् । वाक्च त्वक्स्रुग्दृषदं च वाक्त्वक्स्रुग्दृषदमिति ॥ होतृपोतृनेष्टोद्गातार एवं तर्हि न सिध्यन्ति ॥ इह च

सुसूक्ष्मजटकेशेन सुनताजिनवाससा ।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति ॥

अस्तु तर्ह्यविशेषेण ।

अविशेषेण बहुव्रीहावनेकपदप्रसङ्गः ॥ २८ ॥

यद्यविशेषेण बहुव्रीहावनेकपदप्रसङ्गः । तत्र को दोषः ।

तत्र स्वरसमासान्तपुंवद्भावेषु दोषः ॥ २९ ॥

तत्र स्वरसमासान्तपुंवद्भावेषु दोषो भवति ॥ स्वर । पूर्वशालाप्रियः अपरशा-

* ६ १ ३५ † ५ ४ १०१

लाप्रियः । स्वर ॥ समासान्त । पञ्चगवप्रियः* । समासान्त ॥ पुंवद्भाव । खादिरेतरशम्यम् रौरवेतरशम्यम्† ॥

न वावयवतत्पुरुषत्वात् ॥ २० ॥

न वैष दोषः । किं कारणम् । अवयवतत्पुरुषत्वात् । अवयवोऽत्र तत्पुरुषसंज्ञस्तदाश्रयौ समासान्तपुंवद्भावौ भविष्यतः ॥ स्वरः कथम् ।

तस्यान्तोदात्तत्वं विप्रतिषेधात् ॥ २१ ॥

अन्तोदात्तत्वं क्रियतां पूर्वपदप्रकृतिस्वर‡ इत्यन्तोदात्तत्वं भवति विप्रतिषेधेन । नैष युक्तो विप्रतिषेधः । विप्रतिषेधे परमित्युच्यते§ पूर्वं चान्तोदात्तत्वं परं पूर्वपदप्रकृतिस्वरत्वम् । न परविप्रतिषेधं ब्रूमः । किं तर्हि । अन्तरङ्गविप्रतिषेधम् ॥

निमित्तिस्वरबलीयस्त्वाद्वा ॥ २२ ॥

अथवा निमित्तस्वरान्निमित्तिस्वरो बलीयानिति वक्तव्यम् । किं पुनर्निमित्तं को वा निमित्ती । बहुव्रीहिर्निमित्तं तत्पुरुषो निमित्ती¶ ॥ तत्तर्हि वक्तव्यं निमित्तस्वरान्निमित्तिस्वरो बलीयानिति । न वक्तव्यम् ।

एकशितिपात्स्वरवचनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्य ॥ २३ ॥

यदयं युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठति** तज्ज्ञापयत्याचार्यो निमित्तस्वरान्निमित्तिस्वरो बलीयानिति । कः पुनरर्हति युक्तारोह्यादिष्वेकशितिपाच्छब्दं पठितुम् । एवं किल नाम पठ्यत एकः शितिरेकशितिः एकशितिः पादो यस्येति । तच्च न । एवं विग्रहः करिष्यते । एकः शितिरेषु त इम एकशितयः एकशितयः पादा यस्येति । अथाप्येवं विग्रहः क्रियत एकः शितिरेकशितिः एकशितिः पादो यस्येत्येवमपि नार्थः पाठेन । इगन्ते द्विगाविस्येष स्वरोऽत्र बाधको भविष्यति†† ॥

अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसंज्ञा प्राप्नोति । सुसूक्ष्मजटकेशेन सुनताजिनवाससा समन्तशितिरन्ध्रेणेति । तत्र को दोषः । तस्यान्तोदात्तत्वं विप्रतिषेधादित्यन्तोदात्तत्वं स्याद्विप्रतिषेधेन ॥ नैष दोषः । नेदं बहुव्रीह्यवयवस्य तत्पुरुषस्य लक्षणमारभ्यते । किं तर्हि । यस्य बहुव्रीह्यवयवस्य तत्पुरुषस्य तल्लक्षणमस्ति

---

* ५.४.९२. † ६.३.३४. ‡ ६.१.११९., ६.२.१. § १.४.२. ¶ २.३.५६.
** ६.२.८९. †† ६.२.२९.

तस्यान्तोदात्तत्वं भविष्यति विप्रतिषेधेन । ननु चास्याप्यस्ति । किम् । विशेषणं विशेष्येण बहुलम् [२.१.५७] इति । बहुलवचनान्न भविष्यति ॥

अस्य तर्हि बहुव्रीह्यवयवस्य तत्पुरुषसंज्ञा प्राप्नोति । अधिकषष्टिवर्ष इति * । तत्र को दोषः । तस्यान्तोदात्तत्वं विप्रतिषेधादित्यन्तोदात्तत्वं स्याद्विप्रतिषेधेन ॥ नैष दोषः । इगन्ते द्विगावित्येष स्वरो भविष्यति† ॥ यस्तर्हि नेगन्तः । अधिकशतवर्ष इति ॥ इह चाप्यधिकषष्टिवर्ष इति समासान्तः प्राप्नोति । डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थमिति‡ । नैष दोषः । अव्ययादेरित्येवं तत् । किं पुनः कारणमव्ययादेरित्येवं तत् । इह मा भूत् । गोत्रिंशत् गोचत्वारिंशदिति ॥ बहुव्रीहिसंज्ञा तर्हि प्राप्नोति । संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये [२.२.२५] इति§ ॥ न संख्यां संख्येये वर्तयिष्यामः । कथम् । एवं विग्रहः करिष्यते अधिका षष्टिर्वर्षाणामस्येति ॥ यथा तर्हि स योगः प्रत्याख्यायते तथा पूर्वेण¶ प्राप्नोति । कथं च स योगः प्रत्याख्यायते । अशिष्यः संख्योत्तरपदः संख्येयवाभिधायित्वादिति** ॥ प्रत्याख्याते तस्मिन्योगे संख्यां संख्येये वर्तयिष्यामः । तत्रैवं विग्रहः करिष्यते अधिका षष्टिर्वर्षाण्यस्येति ॥ सर्वथा वयमधिकषष्टिवर्षान्न मुच्यामहे । कथम् । यावता स च योगः प्रत्याख्यायते ऽयं च विग्रहोऽस्ति अधिका षष्टिर्वर्षाणामस्येति ॥ यत्तु तदुक्तमधिकषष्टिवर्षो न सिध्यतीति स सिद्धो भवति । कथम् । यावता स च योगः प्रत्याख्यायते ऽयं च विग्रहोऽस्ति अधिका षष्टिर्वर्षाण्यस्येति ॥ अधिकशतवर्षस्तु न सिध्यति । कर्तव्योऽत्र यत्नः ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

—

सुबामन्त्रिते पराङ्गवत्स्वरे ॥२।१।२॥

सुबिति किमर्थम् । करोष्यटन् । नैतदस्ति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । समानाधिकरणमसमर्थवद्भवतीति ॥ इदं तर्हि । पीढ्ये पीढ्यमान ॥ इदं चाप्युदाहरणम् । करोष्यटन् । ननु चोक्तमसामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं समानाधिकरणमसमर्थवद्भवतीति । नैष दोषः । अधात्वभिहितमित्येवं तत् ॥

आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यामन्त्रितकारकवचनम् ॥ १ ॥

आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यन्तमामन्त्रितकारकं च परस्याङ्गवद्भवतीति वक्तव्यम् ॥ षष्ठ्यन्तं तावत् । मद्राणां राजन् । मगधानां राजन् ॥ आमन्त्रितकारकम् । कुण्डेनाटन् । नास्त्यत्र विशेषः सति पराङ्गवद्भावे ऽसति वा । इदं तर्हि । परशुना वृश्चन् ॥

तन्निमित्तग्रहण वा ॥ २ ॥

तन्निमित्तग्रहणं वा कर्तव्यम् । आमन्त्रितनिमित्तं परस्याङ्गवद्भवतीति वक्तव्यम् ॥ तद्यावश्यमन्यतरद्वक्तव्यम् ।

अवचने हि सुबन्तमात्रप्रसङ्गः ॥ ३ ॥

अनुच्यमाने ह्येतस्मिन्सुबन्तमात्रस्य पराङ्गवद्भावः प्राप्नोति । अस्यापि प्रसज्येत । क्षत्रेणाग्ने स्वायुः संरभस्व मित्रेणाग्ने मित्रधेये यतस्व ॥ किं पुनरत्र ज्यायः । तन्निमित्तग्रहणमेव ज्यायः । इदमपि सिद्धं भवति । गोषु स्वामिन् । अश्वेषु स्वामिन्* । एतद्धि नैव षष्ठ्यन्तं नाप्यामन्त्रितकारकम् ॥

सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात् ॥ ४ ॥

सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानं कर्तव्यम् । तीक्ष्णया सूच्या सीव्यन् । तीक्ष्णेन परशुना वृश्चन् । किं पुनः कारणं न सिध्यति । अनन्तरत्वात् ॥ ननु च परस्य पराङ्गवद्भावे कृते पूर्वस्यापि भविष्यति ।

---

* २.३.३९.

स्वरे ऽवधारणाच्च ॥ ५ ॥

स्वरेऽवधारणाच्च न सिध्यति । स्वरेऽवधारणं क्रियते नानन्तर्यं ॥

परमपि च्छन्दसि ॥ ६ ॥

परमपि च्छन्दसि पूर्वस्याङ्गवद्भवतीति वक्तव्यम् । आ ते पितर्मरुतां सुम्नमेतु । प्रति त्वा दुहितर्दिवः । वृणीष्व दुहितर्दिवः ॥

अव्ययप्रतिषेधश्च ॥ ७ ॥

अव्ययानां च प्रतिषेधो वक्तव्यः । उच्चैरधीयान । नीचैरधीयान ॥

अनव्ययीभावस्य ॥ ८ ॥

अनव्ययीभावस्येति वक्तव्यम् । इह मा भूत् । उपाग्न्यधीयान प्रत्यग्न्यधीयान ॥ अथ किमर्थं स्वरेऽवधारण क्रियते ।

स्वरेऽवधारणं सुब्लोपार्थम् ॥ ९ ॥

स्वरेऽवधारणं क्रियते सुब्लोपो* मा भूदिति । परशुना वृश्चन् ॥

न वा सुबन्तैकान्तत्वात् ॥ १० ॥

न वा कर्तव्यम् । किं कारणम् । सुबन्तैकान्तत्वात् । सुबन्तैकान्तः पराङ्गवद्भावो भवति ॥

प्रातिपदिकैकान्तस्तु सुब्लोपे ॥ ११ ॥

प्रातिपदिकैकान्तस्तु भवति सुब्लोपे कृते† ॥ प्रत्ययलक्षणेन‡ सुबन्तैकान्तता स्यात्तस्मात्स्वरेऽवधारणं न कर्तव्यं सुबलोपार्थम् । प्रातिपदिकस्थायाः सुपो लुगुच्यते । तस्मात्स्वरग्रहणेन नार्थः ॥ इद तर्हि प्रयोजनं पत्वणत्वे§ मा भूतामिति । कूपे सिञ्चन् । चर्म नमन्निति ॥ एतदपि नास्ति प्रयोजनम् । इह तावत्कूपे सिञ्चन्निति स्वाश्रयं पदादित्वं भविष्यति¶ । चर्म नमन्निति पूर्वपदात्संज्ञायामग· [८.४.३] इत्येतस्मान्नियमान्न भविष्यति । ननु च समास एतद्भवति पूर्वपदमुत्तरपदमिति । नेत्याह । अविशेषेणैतद्भवति । पूर्वं पदं पूर्वपदम् । उत्तर पदमुत्तरपदमिति ॥

---

* २४ ७१. † ६२.६८. ‡ ११.६२. § ८३.५९,८.४.२ ¶ ८३.१११.

प्राक्कडारात्समासः ॥ २ । १ । ३ ॥

प्राग्वचनं किमर्थम् ।

प्राग्वचनं संज्ञानिवृत्त्यर्थम् ॥ १ ॥

प्राग्वचनं क्रियते समाससंज्ञाया अनिवृत्तिर्यथा स्यात् । अक्रियमाणे हि प्राग्वचने ऽनवकाशा अव्ययीभावादयः संज्ञाः समाससंज्ञां बाधेरन् । ता मा बाधिषतेति प्राग्वचनं क्रियते ॥ अथ क्रियमाणेऽपि प्राग्वचने यावतानवकाशा अव्ययीभावादयः संज्ञाः कस्मादेव न बाधन्ते । क्रियमाणे हि प्राग्वचने सत्यां समाससंज्ञायामेता अवयवसंज्ञा आरभ्यन्ते तत्र वचनात्समावेशो भविष्यति ॥ समाससंज्ञाप्यनवकाशा सा वचनाद्भविष्यति । सावकाशा समाससंज्ञा । कोऽवकाशः । विस्पष्टादीन्यवकाशः । विस्पष्टं पटुर्विस्पष्टपटुः । नैषो ऽस्त्यवकाशः । एषा ह्याचार्यस्य शैली लक्ष्यते येनैवावयवकार्यं भवति तेनैव समुदायकार्यमपि भवति । येनैवात्रावयवकार्यं स्वरस्तेनैव समुदायकार्यमपि समासो भविष्यति । विस्पष्टादीनि गुणवचनेषु [६.२.२४] इति ॥ इदं तर्हि । काकतालीयम् अजाकृपाणीयम् । अत्रापि येनैवावयवकार्यं प्रत्ययोत्पत्तिः क्रियते तेनैव समुदायकार्यं समाससंज्ञा भविष्यति । समासाच्च तद्विषयात् [५.३.१०६] इति ॥ इदं तर्हि । पुनराजः पुनर्गवः । अत्राप्यवश्यं तत्पुरुषसंज्ञा वक्तव्या तत्पुरुषाश्रयः समासान्तो यथा स्यात्* ॥ इदं तर्हि । पुनराधेयम् । अत्राप्यवश्यं गतिसंज्ञा वक्तव्या† गतिकारकोपपदात्कृत् [६.२.१३९] इत्येष स्वरो यथा स्यात् ॥ इदं तर्हि । पुनरुत्स्यूतं वासो देयम् । अत्राप्यवश्यं गतिसंज्ञा वक्तव्या गतिर्गतौ [८.१.७०] इति निघातो यथा स्यात् । यदि तत्रास्ति पुनश्चनसौ छन्दसीति‡ । सति तस्मिंस्तेनैव सिद्धम् ॥ एवमप्येका संज्ञेति§ वचनान्नास्ति यौगपद्येन संभवः । पर्यायः प्रसज्येत । तस्मात्प्राग्वचनं कर्तव्यम् ॥

सह सुपा ॥ २ । १ । ४ ॥

सहवचनं किमर्थम् ।

सहवचनं पृथगसमासार्थम् ॥ १ ॥

सहग्रहणं क्रियते सहभूतयोः समाससंज्ञा यथा स्यादेकैकस्य मा भूदिति । किं

* ५.४.९१, ९२. † २.२.१८. ‡ १.४.६०*. § १.४.१.

च स्यात् । यद्येकैकस्य समाससंज्ञा स्यादिह ऋक्पाद इति समासान्तः प्रसज्येत* । इह च राजाश्व इति द्वौ स्वरौ स्याताम्† ॥ कथं च कृत्वैकैकस्य संज्ञा प्राप्नोति । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । तद्यथा । वृद्धिगुणसंज्ञे प्रत्येकं भवतः । ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । सत्येतस्मिन्दृष्टान्ते यदि तत्र प्रत्येकमित्युच्यत इहापि सहग्रहणं कर्तव्यम् । अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवत इहापि नार्थः सहग्रहणेन ॥ एवं तर्हि सिद्धे सति यत्सहग्रहणं करोति तस्यैतत्प्रयोजनं योगाङ्गं यथा विज्ञायेत । सति च योगाङ्गे योगविभागः करिष्यते । सह सुप्समस्यते । केन सह । समर्थेन । अनुव्यचलत् अनुप्राविशत् । ततः सुपा । सुपा च सह सुप्समस्यते । अधिकारश्च लक्षणं च । यस्य समासस्यान्यल्लक्षणं नास्तीदं तस्य लक्षणं भविष्यति । पुनरुत्स्यूतं वासो देयम् । पुनर्निष्कृतो रथ इति ॥

इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च ॥ २ ॥

इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् । वाससी इव । कन्ये इव ॥

अव्ययीभावः ॥ २ । १ । ५ ॥

किमर्थं महती संज्ञा क्रियते । अन्वर्थसंज्ञा यथा विज्ञायेत । अनव्ययमव्ययं भवतीत्यव्ययीभावः । अव्ययीभावश्च समासो ऽव्ययसंज्ञो भवतीत्येतन्न वक्तव्यं भवति‡ ॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु ॥ २ । १ । ६ ॥

इह कस्मान्न भवति । सुमद्राः सुमगधाः । सपुत्रः सच्छात्र इति । समृद्धौ साकल्य इति च प्राप्नोति ॥ नैष दोषः । इह कश्चित्समासः पूर्वपदार्थप्रधानः

---

* ५।४।७४ † ६।१।२२३ ‡ १।१।४१

कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । न चात्र पूर्वपदार्थप्राधान्यं गम्यते ॥ अथवा नेमे समासार्था निर्दिश्यन्ते । किं तर्हि । अव्ययार्था निर्दिश्यन्त इमे । एतेष्वर्थेषु यदव्ययं वर्तते तत्सुबन्तेन सह समस्यत इति ॥

यथासादृश्ये ॥ २ । १ । ७ ॥

असादृश्य इति किमर्थम् । यथा देवदत्तस्तथा यज्ञदत्त इति ॥ असादृश्य इत्युच्यते तत्रेदं न सिध्यति । यथाशक्ति यथाबलमिति । किं कारणम् । यथेत्ययं प्रकारवचने थाल्[*] स च सादृश्ये वर्तते ॥ नैष दोषः । अयं यथाशब्दोऽस्त्येवाव्युत्पन्नं प्रातिपदिकं वीप्सावाची । अस्ति प्रकारवचने थाल् । तद्यदव्युत्पन्नं प्रातिपदिकं वीप्सावाचि तस्येदं ग्रहणम् ॥ अथ यः प्रकारवचने थाल् तस्य ग्रहणं कस्मान्न भवति । पूर्वेण प्राप्नोति सादृश्यसंपत्तीति[†] । प्रतिषेधवचनसामर्थ्यान्न भविष्यति ॥

सुप्प्रतिना मात्रार्थे ॥ २ । १ । ९ ॥

सुबिति वर्तमाने[‡] पुनः सुब्ग्रहणं किमर्थम् । अव्ययमित्येवं तद्भूत्सुब्मात्रे यथा स्यात् । माषप्रति सूपप्रति ओदनप्रति ॥

अक्षशलाकासंख्याः परिणा ॥ २ । १ । १० ॥

अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् ।

अक्षादयस्तृतीयान्ताः परिणा सह समस्यन्त इति वक्तव्यम् । पूर्वोक्तस्य यथा न तत् । अयथाजातीयके द्योत्ये । अक्षेणेदं न तथा वृत्तं यथा पूर्वमिति । अक्षपरि शलाकापरि ॥

एकत्वेऽक्षशलाकयोः

अक्षशलाकयोश्चैकवचनान्तयोरिति वक्तव्यम् । इह मा भूत् । अक्षाभ्यां वृत्तम् अक्षैर्वृत्तम् ॥

---

[*] ५.३.२३. [†] २.१.६. [‡] २.१.२

किंतवव्यवहारे च ॥ १ ॥

कितवव्यवहार इति वक्तव्यम् । इह मा भूत् । अक्षेणेदं न तथा वृत्तं शकटेन यथा पूर्वमिति ॥

अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् ।
कितवव्यवहारे च एकत्वेऽक्षशलाकयोः ॥ १ ॥

विभाषापपरिबहिरञ्चवः पञ्चम्या ॥ २ । १ । १२-१२ ॥

योगविभागः कर्तव्यः । विभाषेत्ययमधिकारः । ततोऽपपरिबहिरञ्चवः पञ्चम्येति ॥ पञ्चमीग्रहणं शक्यमकर्तुम् । कथम् । सुबन्तेनेति[*] वर्तते एतैश्च कर्मप्रवचनीयैर्योगे पञ्चमी विधीयते[†] । तत्रान्तरेणापि पञ्चमीग्रहणं पञ्चम्यन्तेनैव समासो भविष्यति ॥ इदं तर्हि प्रयोजनम् । बहिःशब्देन योगे पञ्चमी न विधीयते तत्रापि यथा स्यात् । बहिर्ग्रामम् बहिर्ग्रामात् ॥ अथ क्रियमाणेऽपि पञ्चमीग्रहणे यावता बहिःशब्देन योगे पञ्चमी न विधीयते कथमेवैतत्सिध्यति । पञ्चमीग्रहणसामर्थ्यात् ॥

आङ्मर्यादाभिविध्योः ॥ २ । १ । १३ ॥

मर्यादाभिविधिग्रहणं शक्यमकर्तुम् । कथम् । पञ्चम्यन्तेनेति[‡] वर्तते आङा च कर्मप्रवचनीययुक्ते पञ्चमी विधीयत[§] एतयोश्चैवार्थयोराङ्कर्मप्रवचनीयसंज्ञो भवति नान्यत्र[¶] ॥

यस्य चायामः ॥ २ । १ । १६ ॥

किमुदाहरणम् । अनुगङ्गं हास्तिनपुरम् । अनुगङ्गं वाराणसी । अनुशोणं पाटलिपुत्रम् ॥ यस्य चायाम इत्युच्यते गङ्गा चाप्यायता वाराणस्यप्यायता तत्र कुत एतद्गङ्गया सह समासो भविष्यति न पुनर्वाराणस्येति । एवं तर्हि लक्षणेनेति[**] वर्तते गङ्गा चैव हि लक्षणं न वाराणसी ॥ अथवा यस्य चायाम इत्युच्यते गङ्गा चाप्यायता वाराणस्यप्यायता तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो यस्यायाम इति । साधीयश्च गङ्गाया न वाराणस्याः ॥

---

* २।१।४ † २।१।७; (३९) ‡ २।१।१२ § २।३।१० ¶ १।४।८९ ** २।१।१४

तिष्ठद्गुप्रभृतीनि च ॥ २ । १ । १७ ॥

किमर्थश्चकारः । एवकारार्थः । तिष्ठद्गुप्रभृतीन्येव । क्व मा भूत् । परमं तिष्ठद्गु ॥

तिष्ठद्गु कालविशेषे ॥ १ ॥

तिष्ठद्गु कालविशेष इति वक्तव्यम् । तिष्ठन्ति गावो ऽस्मिन्काले तिष्ठद्गु । वहद्गु ॥

खलेयवादीनि प्रथमान्तान्यन्यपदार्थे ॥ २ ॥

खलेयवादीनि प्रथमान्तान्यन्यपदार्थे समस्यन्ते । खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् ॥

पारे मध्ये षष्ठ्या वा ॥ २ । १ । १८ ॥

वावचनं किमर्थम् । विभाषा समासो यथा स्यात्समासेन मुक्ते वाक्यमपि यथा स्यात् । पारं गङ्गाया इति । नैतदस्ति प्रयोजनम् । प्रकृता महाविभाषा तया वाक्यमपि भविष्यति ॥ इदं तर्हि प्रयोजनमव्ययीभावेन मुक्ते षष्ठीसमासो* यथा स्यात् । गङ्गापारमिति । एतदपि नास्ति प्रयोजनम् । अयमपि विभाषा षष्ठीसमासोऽपि तावुभौ वचनाद्भविष्यतः ॥ अत उत्तरं पठति ।

पारे मध्ये षष्ठ्या वावचनम् ॥ १ ॥

पारे मध्ये षष्ठ्या वेति वक्तव्यम् ॥

अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने ॥ २ ॥

अक्रियमाणे हि वावचने षष्ठीसमासस्याभावः स्याद्यथैकदेशिप्रधाने† । तद्यथा । एकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति । किं पुनः कारणमेकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति । समासतद्धितानां वृत्तिर्विभाषा वृत्तिविषये नित्यो ऽपवादः । इह पुनर्वावचने क्रियमाण एकया वृत्तिर्विभाषापरया वृत्तिविषये विभाषापवादः ॥

---

* २२ ८. † २२ १.

एकारान्तनिपातनं च ॥ २ ॥

एकारान्तनिपातनं च कर्तव्यम् । पारेगङ्गमिति । न कर्तव्यम् । सप्तम्या अलुका सिद्धम्* । भवेत्सिद्धं यदा सप्तमी यदा त्वन्या विभक्तयस्तदा न सिध्यति ॥

नदीभिश्च ॥ २ । १ । २० ॥

नदीभिः संख्यासमासे ऽन्यपदार्थे प्रतिषेधः ॥ १ ॥

नदीभिः संख्यासमासे ऽन्यपदार्थे प्रतिषेधो वक्तव्यः । द्वीरावतीको देशः । त्रीरावतीको देशः । नदीभिः संख्येति प्राप्नोति ॥ न वक्तव्यः । इह कश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः । पूर्वपदार्थप्रधानो ऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । न चात्र पूर्वपदार्थप्राधान्यं गम्यते ॥ ननु च यद्येनोच्यते स तस्यार्थो भवति । अत्र च वयमेताभ्यां पदाभ्यामेतमर्थमुच्यमानं पश्यामः ॥ एतदेव न जानीमो यद्येनोच्यते स तस्यार्थ इति । अपि चान्यपदार्थता न प्रकल्पेत । चित्रगुः शबलगुरिति । किं कारणम् । अत्रापि हि वयमेताभ्यां शब्दाभ्यामेतमर्थमुच्यमानं पश्यामः ॥ यद्यप्यत्रैताभ्यां शब्दाभ्यामेषोऽर्थ उच्यतेऽन्यपदार्थोऽपि तु गम्यते । तत्रान्यपदार्थाश्रयो बहुव्रीहिर्भविष्यति ॥ इहापि तर्हि यद्यप्यन्यपदार्थो गम्यते स्वपदार्थोऽपि तु गम्यते तत्र स्वपदार्थाश्रयोऽव्ययीभावः प्राप्नोति ॥ एवं तर्हीदमिह संप्रधार्यम् । अव्ययीभावः क्रियतां बहुव्रीहिरिति । बहुव्रीहिर्भविष्यति विप्रतिषेधेन । भवेदेकसंज्ञाधिकारे सिद्धं परंकार्यत्वे तु न सिध्यति । आरम्भसामर्थ्यादव्ययीभावः प्राप्नोति परंकार्यत्वाच्च बहुव्रीहिः† ॥ परंकार्यत्वे च न दोषः । नदीभिः संख्यायाः समाहारे ऽव्ययीभावो वक्तव्यः । स चावश्यं वक्तव्यः ।

सप्तमेकनदीतरे‡ ॥

द्विगुश्च ॥ २ । १ । २३ ॥

द्विगोस्तत्पुरुषत्वे कानि प्रयोजनानि । द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम् । पञ्चगवम् दशगवम् । पञ्चराजम् दशराजम्§ ॥

---

* ६.३.१४. † २.२ २४. ‡ (५ ४ ११०, २ ४.१८) § ५ ४ ९२, ९९.

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ २ । १ । २४ ॥

श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् ॥ १ ॥

श्रितादिषु गमिगाम्यादीनामुपसंख्यानं कर्तव्यम् । ग्रामं गमी ग्रामगमी । ग्रामं गामी ग्रामगामी ॥

श्रितादिभिरहीने द्वितीयासमासवचनानर्थक्यं बहुव्रीहिकृतत्वात् ॥ २ ॥

श्रितादिभिरहीनवाचिन्या द्वितीयायाः समासवचनमनर्थकम् । किं कारणम् । बहुव्रीहिकृतत्वात् । इह यः कष्टं श्रितः कष्टमनेन श्रितं भवति । तत्र बहुव्रीहिणा सिद्धम् ॥

अहीने द्वितीयास्वरवचनानर्थक्यं च ॥ ३ ॥

अहीने द्वितीया [६.२.४७] पूर्वपदं प्रकृतिस्वरं भवतीत्येतत्स्वरवचनमनर्थकम् । किं कारणम् । बहुव्रीहिकृतत्वादेव* ॥

जातिस्वरप्रसङ्गस्तु ॥ ४ ॥

जातिस्वरस्तु प्राप्नोति । ग्रामगतः अरण्यगत इति । जातिकालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्ना [६.२.१७०] इति ॥

तत्र जातादिषु वावचनात्सिद्धम् ॥ ५ ॥

यदेतद्वा जाते [१७१] इत्येतद्वा जातादिष्विति वक्ष्यामि । इमे जातादयो भविष्यन्ति ॥ ननु च भेदो भवति । बहुव्रीहौ सति समासान्तोदात्तत्वेनापि भवितव्यं पूर्वपदप्रकृतिस्वरत्वेनापि तत्पुरुषत्वे सति पूर्वपदप्रकृतिस्वरत्वेनैव ॥ नास्ति भेदः । योऽपि हि तत्पुरुषमारभते न तस्य दण्डवारितो बहुव्रीहिः । तत्र तत्पुरुषे सति द्वौ समासौ द्वौ स्वरौ बहुव्रीहौ सत्येकः समासो द्विस्वरत्वम् ॥ एवं तर्हि सिद्धे सति यत्तत्पुरुषं शास्ति तज्ज्ञापयत्याचार्यः समानेऽर्थे केवलं विग्रहभेदाद्यत्र तत्पुरुषः प्राप्नोति बहुव्रीहिश्च तत्र तत्पुरुषो भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । राज्ञः सखा राजसखः । राजा सखास्येति बहुव्रीहिर्न भवति ॥ नैतज्ज्ञापकसाध्यमपवादैरुत्सर्गा बाध्यन्त इति । बाधकेनानेन भवितव्यं सामान्यविहितस्य विशेष-

---

* ६२१

विहितेन । अथ न सामान्यविहितो यदुच्यते बहुव्रीहिकृतत्वादित्येतदयुक्तम् ॥ अस्ति खल्वपि विशेषो बहुव्रीहेस्तत्पुरुषस्य च । किं शब्दकृतो ऽर्थकृतः । शब्दकृतश्चार्थकृतश्च । शब्दकृतस्तावत् । बहुव्रीहौ सति कपा भवितव्यं* तत्पुरुषे सति न भवितव्यम् । अर्थकृतः । तत्पुरुषे सति रुहादीनां क्तः कर्तरि भवति धात्वर्थस्यानपवर्गे । आरूढो वृक्षं देवदत्त इति । बहुव्रीहौ व्यपवृक्ते कर्मणि भवति । आरूढो वृक्षो देवदत्तेनेति ॥ अन्यथाजातीयकः खल्वपि प्रत्यक्षेणार्थसंप्रत्ययो ऽन्यथाजातीयकः संबन्धात् । राज्ञः सखा राजसखः । संबन्धादेतद्गन्तव्यं नूनं राजाप्यस्य सखेति ॥ उभयं खल्वपीष्यते । स्वस्ति सोमसखा पुनरेहि । गवांसख इति ॥

खट्वा क्षेपे ॥ २ । १ । २६ ॥

किमुदाहरणम् । खट्वारूढो जाल्मः । क्षेप इत्युच्यते कः क्षेपो नाम । अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वारोढव्या । य इदानीमतो ऽन्यथा करोति स उच्यते खट्वारूढो ऽयं जाल्मः । नातिव्रतवानिति ॥

अत्यन्तसंयोगे च ॥ २ । १ । २९ ॥

अत्यन्तसंयोगे समासस्याविशेषवचनात्क्तेन समासवचनानर्थक्यम् ॥ १ ॥

अत्यन्तसंयोगे समासस्याविशेषवचनात्क्रान्तेन चाक्रान्तेन च कालाः क्रान्तेनेत्येतत्समासवचनमनर्थकम्† । अत्यन्तसंयोग इत्येव सिद्धम् ॥

अनत्यन्तसंयोगार्थं तु ॥ २ ॥

अनत्यन्तसंयोगार्थं तर्हीदं वक्तव्यम् । षण्मुहूर्ताश्चराचराः । ते कदाचिदहर्गच्छन्ति कदाचिद्रात्रिम् । तदुच्यते । अहर्गताः रात्रिगता इति ॥ नैतदस्ति । गतग्रहणादप्येतत्सिद्धम्‡ ॥ इदं तर्हि । अहरतिसृताः रात्र्यतिसृताः । मासप्रमितश्चन्द्रमाः ॥

तृतीया तत्कृतार्थेन गुणवचनेन ॥ २ । १ । ३० ॥

तत्कृतार्थेनेति किमर्थम् । दध्ना पटुः । घृतेन पटुः । नैतदस्ति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । न हि दध्नः पटुना सामर्थ्यम् ।

* ५।४।१५४. † २।१।२८ ‡ २।१।२४.

केन तर्हि । भुजिना । दध्ना भुङ्क्ते । पटुरिति । इहापि तर्हि न प्राप्नोति । शङ्कुलाखण्डः किरिकाण इति । अत्रापि न शङ्कुलायाः खण्डेन सामर्थ्यम् । केन तर्हि । करोतिना । शङ्कुलया कृतः खण्ड इति । वचनाद्भविष्यति । इहापि तर्हि वचनात्प्राप्नोति । दध्ना पटुः । घृतेन पटुरिति । तस्मात्तत्कृतार्थग्रहणं कर्तव्यम् ॥ गुणवचनेनेति किमर्थम् । गोभिर्वपावान् । धान्येन धनवान् ॥ किं पुनरिहोदाहरणम् । शङ्कुलाखण्डो देवदत्त इति । कथं पुनर्गुणवचनेन समास उच्यमानो द्रव्यवचनेन स्यात् । इह तृतीया तत्कृतार्थेन गुणेनेतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यद्वचनग्रहणं करोति तस्यैतत्प्रयोजनमेवं यथा विज्ञायेत गुणमुक्तवता गुणवचनेनेति ॥ कथं पुनरयं गुणवचनः सन्द्रव्यवचनः संपद्यते । आरभ्यते तत्र मतुब्लोपो गुणवचनेभ्यो मतुपो लुगिति* । तद्यथा । शुक्लगुणः शुक्लः । कृष्णगुणः कृष्णः । एवं खण्डगुणः खण्डः ॥ यद्येवं नार्थस्तत्कृतार्थग्रहणेन । भवति हि शङ्कुलाया खण्डेन सामर्थ्यम् । असामर्थ्याच्चात्र न भविष्यति । दध्ना पटुः । घृतेन पटुरिति । तस्मान्नार्थस्तत्कृतार्थग्रहणेन ॥

तृतीयासमासेऽर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात् ॥ १ ॥

तृतीयासमासेऽर्थग्रहणमनर्थकम् । किं कारणम् । अर्थगतिर्ह्यवचनात् । अन्तरेणापि वचनमर्थगतिर्भविष्यति ॥

निर्देश्यमिति चेत्तृतीयार्थनिर्देशोऽपि ॥ २ ॥

अथैवमपि निर्देशः कर्तव्य इति चेत्तृतीयार्थनिर्देशोऽपि कर्तव्यः स्यात् । तृतीया[1] सदर्थकृतार्थेनेति वक्तव्यम् ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । नायमर्थनिर्देशः । किं तर्हि । योगाङ्गमिदं निर्दिश्यते । सति च योगाङ्गे योगविभागः करिष्यते । *तृतीया तत्कृतेन गुणवचनेन समस्यते । ततोऽर्थेन । अर्थशब्देन च तृतीया समस्यते ।* धान्यार्थः वसनार्थः । पूर्वसदृशसमोनार्थ [२ १ ३१] इत्यर्थग्रहणं न कर्तव्यं भवति ॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ २ । १ । ३१ ॥

पूर्वादिष्ववरस्योपसंख्यानम् ॥ १ ॥

पूर्वादिष्ववरस्योपसंख्यानं कर्तव्यम् । मासावरोऽयम् । संवत्सरावरोऽयम् ॥

---

* ५ २ ९४ *

सदृशग्रहण उक्तम् ॥ २ ॥

किमुक्तम् । सदृशग्रहणमनर्थकं तृतीयासमासवचनात् । षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यमिति* ॥

कर्तृकरणे कृता बहुलम् ॥ २ । १ । ३२ ॥

कर्तृकरणे कृता क्तेन ॥ १ ॥

कर्तृकरणे कृता क्तेनेति वक्तव्यम् । अहिहतः नखनिर्भिन्नः दात्रलूनः परशुच्छिन्नः । कृता क्तेनेति किमर्थम् । इह मा भूत् । दात्रेण लूनवान् । परशुना छिन्नवान् ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । बहुलवचनात्सिद्धम् ॥

कृत्यैरधिकार्थवचने ॥ २ । १ । ३३ ॥

कृत्यैरधिकार्थवचने ऽन्यत्रापि दृश्यते ॥ १ ॥

कृत्यैरधिकार्थवचने ऽन्यत्रापि दृश्यत इति वक्तव्यम् । बुसोपेन्ध्यम् तृणोपेन्ध्यम् घनघात्यम् ॥

साधनं कृतेति वा पादहारकाद्यर्थम् ॥ २ ॥

अथवा साधनं कृता सह समस्यत इति वक्तव्यम् । किं प्रयोजनम् । पादहारकाद्यर्थम् । पादाभ्यां ह्रियते पादहारकः । गले चोप्यते गलेचोपकः ॥

अन्नेन व्यञ्जनम् ॥ २ । १ । ३४ ॥

भक्ष्येण मिश्रीकरणम् ॥ २ । १ । ३५ ॥

अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासः ॥ १ ॥

अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासो ऽयं द्रष्टव्यः । किं कारणम् ॥

कारकाणां क्रियया सामर्थ्यात् ॥ २ ॥

कारकाणां क्रियया सामर्थ्यं भवति न तेषामन्योऽन्येन । तद्यथा । निश्रयण्या

* १२ ११*.

द्वाभ्यां काष्ठाभ्यां सामर्थ्यं न तेषामन्योऽन्येन ॥ एवं तर्ह्याहायमन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमिति न चास्ति सामर्थ्यं तत्र वचनात्समासो भविष्यति ॥

वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधः ॥ ३ ॥

वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधो वक्तव्यः । तिष्ठतु दध्ना ओदनो भुज्यते देवदत्तेनेति ॥

सिद्धं तु समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च ॥ ४ ॥

सिद्धमेतत् । कथम् । समानाधिकरणाधिकारे* वक्तव्य क्तस्तृतीयापूर्वपदः समस्यते सुपोत्तरपदस्य च लोपो भवतीति । दध्नोपसिक्तो दध्युपसिक्तः दध्युपसिक्त ओदनो दध्योदन. । गुडेन संसृष्टा गुडसंसृष्टाः गुडसंसृष्टा धाना गुडधानाः ॥

षष्ठीसमासश्च युक्तपूर्णान्तः ॥ ५ ॥

षष्ठीसमासश्च युक्तपूर्णान्तः समस्यत उत्तरपदस्य च लोपो वक्तव्यः । अश्वानां युक्तो ऽश्वयुक्तः अश्वयुक्तो रथो ऽश्वरथ· । दध्नः पूर्णो दधिपूर्ण· दधिपूर्णो घटो दधिघटः ॥ तत्तर्हि वहु वक्तव्यम् ।

न वासमासे ऽदर्शनात् ॥ ६ ॥

न वा वक्तव्यम् । किं कारणम् । असमासे ऽदर्शनात् । यद्यसमासे दृश्यते समासे न न दृश्यते तल्लोपारम्भ प्रयोजयति । न चासमास उपसिक्तशब्दः संसृष्टशब्दो युक्तशब्द· पूर्णशब्दो वा दृश्यते ॥ कथ तर्हि सामर्थ्यं गम्यते ।

युक्तार्थसंप्रत्ययाच्च सामर्थ्यम् ॥ ७ ॥

दध्ना युक्तार्थता सम्प्रतीयते ॥ कथ पुनर्ज्ञायते दध्ना युक्तार्थता संप्रतीयत इति ।

संप्रत्ययाच्च तदर्थाध्यवसानम् ॥ ८ ॥

सम्प्रत्ययाच्च तदर्थो ऽध्यवसीयते ॥ अवश्य चैतदेवं विज्ञेयम् ।

संप्रतीयमानार्थलोपे ह्यनवस्था ॥ ९ ॥

यो हि मन्यते सम्प्रतीयमानार्थानां शब्दानां लोपो भवतीत्यनवस्था तस्य लोपस्य

* २१ ४९.

स्यात् । दधीत्युक्ते बहवोऽर्था गम्यन्ते मन्दकमुत्तरकं निलीनकमिति तद्वाचिनां शब्दानां लोपो वक्तव्यः स्यात् । तथा गुड इत्युक्ते मधुरशब्दस्य शृङ्गवेरमिति च कटुशब्दस्य ॥ अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यन्ते अक्षिनिकोचैः पाणिविहारैश्च तद्वाचिनां शब्दानां लोपो वक्तव्यः स्यात् ॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥ २ । १ । ३६ ॥

किं चतुर्थ्यन्तस्य तदर्थमात्रेण समासो भवति । एवं भवितुमर्हति ।

चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोऽविशेषात् ॥ १ ॥

चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गः । सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण सह समासः प्राप्नोति । अनेनापि प्राप्नोति । रन्धनाय स्थाली । अवहननायोलूखलमिति । किं कारणम् । अविशेषात् । न हि कश्चिद्विशेष उपादीयत एवंजातीयकस्य चतुर्थ्यन्तस्य तदर्थेन सह समासो भवतीति । अनुपादीयमाने विशेषे सर्वप्रसङ्गः ॥

बलिरक्षिताभ्यां चानर्थकं वचनम् ॥ २ ॥

बलिरक्षिताभ्यां च समासवचनमनर्थकम् । यो हि महाराजाय बलिर्महाराजार्थः स भवति । तत्र तदर्थ, इत्येव सिद्धम् ॥

यदि पुनर्विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यत इत्येतल्लक्षणं क्रियेत ।

विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम् ॥ ३ ॥

विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानं कर्तव्यम् । अश्वघासः श्वश्रूसुरम् हस्तिविधेति ॥

अर्थेन नित्यसमासवचनम् ॥ ४ ॥

अर्थशब्देन नित्यसमासो वक्तव्यः । ब्राह्मणार्थम् क्षत्रियार्थम् ॥ किं विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यत इत्यतोऽर्थेन नित्यसमासो वक्तव्यः । नेत्याह । सर्वथार्थेन नित्यसमासो वक्तव्यो विग्रहो मा भूदिति ॥

सर्वलिङ्गता च ॥ ५ ॥

सर्वलिङ्गता च वक्तव्या । ब्राह्मणार्थं पयः । ब्राह्मणार्थः सूपः । ब्राह्मणार्था यवागूरिति ॥ किमर्थेन नित्यसमास उच्यते इत्यतः सर्वलिङ्गता वक्तव्या । नेत्याह ।

सर्वथा सर्वलिङ्गता वक्तव्या। किं कारणम्। अर्थशब्दो ऽयं पुँल्लिङ्ग उत्तरपदार्थप्रधानश्च तत्पुरुषस्तेन पुँल्लिङ्गस्यैव समासस्याभिधानं स्यात्स्त्रीनपुंसकलिङ्गस्य न स्यात्॥

तर्हीदं बहु वक्तव्यम्। विकृतिः प्रकृत्येति वक्तव्यम्। अश्वघासादीनामुपसंख्यानं कर्तव्यम्। अर्थेन नित्यसमासो वक्तव्यः। सर्वलिङ्गता च वक्तव्या॥ न वक्तव्यम्।

यत्तावदुच्यते विकृतिः प्रकृत्येति वक्तव्यमिति। न वक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यत इति यदयं बलिरक्षितग्रहणं करोति। कथं कृत्वा ज्ञापकम्। यथाजातीयकानां समासे बलिरक्षितग्रहणेनार्थस्तथाजातीयकानां समासः। यदि च विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यते न तदर्थमात्रेण ततो बलिरक्षितग्रहणमर्थवद्भवति॥

यदप्युच्यते ऽश्वघासादीनामुपसंख्यानं कर्तव्यमिति। न कर्तव्यम्। अश्वघासादयः षष्ठीसमासा भविष्यन्ति। यदि यदर्थं भवत्ययमपि तत्राभिसंबन्धो भवत्यस्येदमिति। तद्यथा। गुरोरिदं गुर्वर्थमिति। ननु च स्वरभेदो भवति। चतुर्थीसमासे सति पूर्वपदप्रकृतिस्वरत्वेन भवितव्य* षष्ठीसमासे पुनरन्तोदात्तत्वेन। नास्ति भेदः। चतुर्थीसमासेऽपि सत्यन्तोदात्तत्वेनैव भवितव्यम्। कथम्। आचार्यप्रवृत्तिर्ज्ञापयति विकृतिश्चतुर्थ्यन्ता प्रकृतिस्वरा भवति न चतुर्थीमात्रमिति यदयं चतुर्थी तदर्थे ऽर्थे क्ते च [६.२.४३-४५] इत्यर्थग्रहणं क्तग्रहणं च करोति। कथं कृत्वा ज्ञापकम्। यथाजातीयकानां प्रकृतिस्वरत्वे ऽर्थग्रहणेन क्तग्रहणेन चार्थस्तथाजातीयकानां प्रकृतिस्वरत्वम्। यदि च विकृतिश्चतुर्थ्यन्ता प्रकृत्या भवति न चतुर्थीमात्रं ततो ऽर्थग्रहणं क्तग्रहणं चार्थवद्भवति॥

यदप्युच्यतेऽर्थेन नित्यसमासो वक्तव्य इति। न वक्तव्यः। सर्वप्रत्ययः करिष्यते। किं कृतं भवति। न चैव हि कदाचित्प्रत्ययेन विग्रहो भवति। अपि च सर्वलिङ्गता सिद्धा भवति॥ यदि सर्वप्रत्ययः क्रियत इत्संज्ञा न प्राप्नोति। अथापि कथंचिदित्संज्ञा स्यादेवमपि ऽथर्यम् भ्वर्यमित्यत्रयस्येतीयङुवङौ स्याताम्†॥ एवं तर्हि बहुव्रीहिर्भविष्यति। किं कृतं भवति। भवति वै कश्चिदस्वपदविग्रहो बहुव्रीहिः। तद्यथा। शोभनं मुखमस्याः सुमुखीति। नैवं शक्यम्। इह हि महदर्थमित्यात्त्वकपौ प्रसज्येयाताम्§॥ एव तर्हि तदर्थस्योत्तरपदस्यार्थशब्द आदेशः

* ६.२.४१ † ६.१.२२६ ‡ ६.४.७१ § ६.३.४६ ५.४.१५४

करिष्यते । किं कृतं भवति । न चैव हि कदाचिदादेशेन विग्रहो भवति । अपि च सर्वलिङ्गतापि सिद्धा भवति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । योगविभागः करिष्यते । चतुर्थी । चतुर्थी सुबन्तेन सह समस्यते । ततस्तदर्थार्थ । तदर्थस्योत्तरपदस्यार्थशब्द आदेशो भवति ॥ इहापि तर्हि समासः प्राप्नोति । छात्राय रुचितम् । छात्राय स्वदितमिति* । आचार्यप्रवृत्तिर्ज्ञापयति तादर्थ्ये या चतुर्थी सा समस्यते न चतुर्थीमात्रमिति यदयं हितसुखग्रहणं करोति । कथं कृत्वा ज्ञापकम् । यथाजातीयकानां समासे हितसुखग्रहणेनार्थस्तथाजातीयकानां समासः । यदि च तादर्थ्ये या चतुर्थी सा समस्यते न चतुर्थीमात्रं ततो हितसुखग्रहणमर्थवद्भवति ॥ इहापि तर्हि तदर्थस्योत्तरपदस्यार्थशब्द आदेशः प्राप्नोति । यूपाय दारु यूपदारु । रथदारु । वावचनं विधास्यते ॥ इहापि तर्हि विभाषा प्राप्नोति । ब्राह्मणार्थम् क्षत्रियार्थमिति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति प्रकृतिविकृत्योर्यः समासस्तत्र तदर्थस्योत्तरपदस्य वार्थशब्द आदेशो भवत्यन्यत्र नित्य इति यदयं बलिरक्षितग्रहणं करोति ॥ एवं तर्हि उदकार्थो वीवधः स्थानिवद्भावादुदभावः प्राप्नोति[1] । तस्मान्नैवं शक्यम् । न चेदेवमर्थेन नित्यसमासो वक्तव्यः सर्वलिङ्गता च ॥ नैष दोषः । इदं तावदयं प्रष्टव्यः । अथेह ब्राह्मणेभ्य इति कैषा चतुर्थी । तादर्थ्य इत्याह । यदि तादर्थ्ये चतुर्थ्यर्थशब्दस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति । समासोऽपि तर्हि न प्राप्नोति । वचनात्समासो भविष्यति ॥

यदप्युच्यते सर्वलिङ्गता च वक्तव्येति । न वक्तव्या । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य ॥

पञ्चमी भयेन ॥ २ । १ । ३७ ॥

अल्पमिदमुच्यते भयेनेति । भयभीतभीतिभीभिरिति वक्तव्यम् । वृकाद्भयं वृकभयम् । वृकाद्भीतो वृकभीतः । वृकाद्भीतिर्वृकभीतिः । वृकाद्भीर्वृकभीरिति ॥

अपर आह । भयनिर्गतजुगुप्सुभिरिति वक्तव्यम् । वृकभयम् ग्रामनिर्गतः अधर्मजुगुप्सुरिति ॥

सप्तमी शौण्डैः ॥ २ । १ । ४० ॥

शौण्डादिभिरिति वक्तव्यम् । इहापि यथा स्यात् । अक्षधूर्तः स्त्रीधूर्तः । अक्ष-

* १।४।११

कितव स्त्रीकितव इति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । बहुवचननिर्देशाच्छौण्डादिभिरिति विज्ञास्यते ॥

ध्वाङ्क्षेण क्षेपे ॥ २ । १ । ४२ ॥

ध्वाङ्क्षेणेत्यर्थग्रहणम् ॥ १ ॥

ध्वाङ्क्षेण क्षेपेऽर्थग्रहण कर्तव्यम् । इहापि यथा स्यात् । तीर्थकाक इति ॥ क्षेप इत्युच्यते क इह क्षेपो नाम । यथा तीर्थे काका न चिरं स्थातारो भवन्त्येव यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाक इति ॥

कृत्यैर्ऋणे ॥ २ । १ । ४३ ॥

कृत्यैर्नियोगे यद्ग्रहणम् ॥ १ ॥

कृत्यैर्नियोग इति वक्तव्यम् । इहापि यथा स्यात् । पूर्वाह्णेगेयं साम । प्रातरध्येयोऽनुवाक इति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । ऋण इत्येव सिद्धम् । इह यद्यस्य नियोगतः कार्यमृणं तस्य तद्भवति । तत्र ऋण इत्येव सिद्धम् ॥ यद्ग्रहणं च कर्तव्यम् । इह मा भूत् । पूर्वाह्णे दातव्या भिक्षेति ॥

क्षेपे ॥ २ । १ । ४७ ॥

किमुदाहरणम् । अवतप्तेनकुलस्थितं त एतत् ॥ क्षेप इत्युच्यते क इह क्षेपो नाम । यथावतप्ते नकुला न चिरं स्थातारो भवन्त्येव कार्याण्यारभ्य यो न चिरं तिष्ठति स उच्यतेऽवतप्तेनकुलस्थितं त एतदिति ॥ क्षेपे सप्तम्यन्तं क्तान्तेन सह समस्यत इत्युच्यते तत्र सगतिकेन सनकुलेन च समासो न प्राप्नोति ।

क्षेपे गतिकारकपूर्वं उक्तम् ॥ १ ॥

किमुक्तम् । कृद्ग्रहणे गतिकारकपूर्वस्यापीति* ॥

---

* १।४।१३*

पात्रेसमितादयश्च ॥ २ । १ । ४८ ॥

किमर्थश्चकारः । एवकारार्थः । पात्रेसमितादय एव । क्व मा भूत् । परमपात्रेसमिता इति ॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥ २ । १ । ४९ ॥

इह कस्माद्व्ययीभावो न भवति । एका नदी एकनदी । नदीभिः सङ्ख्येति* प्राप्नोति । इह कश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । न चात्र पूर्वपदार्थप्राधान्यं गम्यते ॥ अथवाव्ययीभावः क्रियतां तत्पुरुष इति तत्पुरुषो भविष्यति विप्रतिषेधेन । भवेदेकसंज्ञाधिकारे सिद्धं परकार्यत्वे तु न सिध्यति । आरम्भसामर्थ्याच्चाव्ययीभावः प्राप्नोति परकार्यत्वाच्च तत्पुरुषः प्राप्नोति । परकार्यत्वे च न दोषः । कथम् । नदीभिः समाहारे ऽव्ययीभावो वक्तव्यः । स चावश्यं वक्तव्यः ।

सर्वैकनदीतरे† ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥

---

* २.१.२०.   † (५.४.११०, २.४.१८.)

तद्धितार्थोत्तरपदसमाहारे च ॥ २ । १ । ५१ ॥

समाहार इति कोऽयं शब्दः । समाङ्पूर्वाद्धरतेः कर्मसाधनो घञ् । समाह्रियते समाहार इति ॥ यदि कर्मसाधनः पञ्च कुमार्यः समाहृताः पञ्चकुमारि दशकुमारि गोस्त्रियोरुपसर्जनस्य [१.२.४८] इति ह्रस्वत्वं न प्राप्नोति द्विगुरेकवचनम् [२.४.१] इत्येतच्च वक्तव्यम् ॥ एवं तर्हि भावसाधनो भविष्यति । समाहरणं समाहारः । अथ भावसाधने सति किमभिधीयते । यत्तदोत्तराधर्यम् । कः पुनर्गवां समाहारः । यत्तदर्जनं क्रयणं भिक्षणमपहरणं वा । यद्येवं विक्षिप्तेषु पूलेषु गोषु चरन्तीषु न सिध्यति ॥ एवं तर्हि समभ्याशीकरणं समाहारः । एवमपि पञ्चग्रामी षण्णगरी त्रिपुरीति न सिध्यति । किं कारणम् । समेकत्ववाच्याङाभिमुख्ये वर्तते हरतिर्देशान्तरप्रापणे । नावश्यं हरतिर्देशान्तरप्रापण एव वर्तते । किं तर्हि । सादृश्येऽपि वर्तते । तद्यथा । मातुरनुहरति । पितुरनुहरति ॥ अथवा पञ्चग्रामी षण्णगरी त्रिपुरीति नैवेदमियत्येवावतिष्ठते । अवश्यमसौ ततः किंचिदाकाङ्क्षति क्रियां गुणं वा । यदाकाङ्क्षति तदेकं स च समाहारः ॥ अयं तर्हि भावसाधने सति दोषः । पञ्चपूल्यानीयतामिति भावानयने चोदिते द्रव्यानयनं न प्राप्नोति । नैष दोषः । इदं तावदयं प्रष्टव्यः । अथेह गौरनुबन्ध्योऽजोऽग्नीषोमीय इति कथमाकृतौ चोदितायां द्रव्य आरम्भणालम्भनप्रोक्षणविशसनानि क्रियन्त इति । असंभवात् । आकृतावारम्भणादीनां संभवो नास्तीति कृत्वाकृतिसहचरिते द्रव्य आरम्भणादीनि क्रियन्ते । इदमप्येवंजातीयकमेव । असंभवाद्भावानयनस्य द्रव्यानयनं भविष्यति ॥ अथवाव्यतिरेकाद्द्रव्याकृत्योः ॥

किं पुनर्द्विगुसंज्ञा प्रत्ययोत्तरपदयोर्भवति । एवं भवितुमर्हति ।

द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः ॥ १ ॥

द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः । केतरेतराश्रयता । द्विगुनिमित्ते प्रत्ययोत्तरपदे प्रत्ययोत्तरपदनिमित्ता च द्विगुसंज्ञा तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते ॥ एवं तर्ह्यर्थ इति वक्ष्यामि ।

अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत् ॥ २ ॥

अर्थे चेत्तद्धितोत्पत्तिर्न प्राप्नोति । पाञ्चनापितिः द्वैमातुरः त्रैमातुरः* । किं कारणम् । द्विगुणोक्तत्वाद्बहुव्रीहिवत् । तद्यथा । चित्रगुः शबलगुरिति बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवति ॥ एवं तर्हि समासतद्धितविधाविति वक्ष्यामि ।

समासतद्धितविधाविति चेदन्यत्र समाससंज्ञाभावः ॥ ३ ॥

समासतद्धितविधाविति चेदन्यत्र समाससंज्ञा न प्राप्नोति । क्वान्यत्र । स्वरे । पञ्चारत्निः दशारत्निः । इगन्ते द्विगावित्येष स्वरो† न प्राप्नोति ॥

सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् ॥ ४ ॥

सिद्धमेतत् । कथम् । प्रत्ययोत्तरपदयोश्चेति वचनात् । प्रत्ययोत्तरपदयोर्द्विगुसंज्ञा भवतीति वक्तव्यम् ॥ ननु चोक्तं द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिरिति । नैष दोषः । इतरेतराश्रयमात्रमेतच्चोदितं सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि सिद्धं तु नित्यशब्दत्वादिति‡ । नेदं तुल्यमन्यैरितरेतराश्रयैः । न हि संज्ञा नित्या ॥ एवं तर्हि भाविनी संज्ञा विज्ञास्यते । तद्यथा । कश्चित्कंचित्तन्तुवायमाह । अस्य सूत्रस्य शाटकं वयेति । स पश्यति यदि शाटको न वातव्यो ऽथ वातव्यो न शाटकः शाटको वातव्यश्चेति विप्रतिषिद्धम् । भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति । एवमिहापि तस्मिन्द्विगुर्भवति यस्याभिनिर्वृत्तस्य प्रत्यय उत्तरपदमिति चैते संज्ञे भविष्यतः ॥ अथवा पुनरस्त्वर्थे इति । ननु चोक्तमर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवदिति ॥ नैष दोषः । नावश्यमर्थशब्दोऽभिधेय एव वर्तते । किं तर्हि । स्यादर्थेऽपि वर्तते । तद्यथा । दारार्थं घटामहे । धनार्थं भिक्षामहे । दारा नः स्युर्धनानि नः स्युरिति । एवमिहापि तद्धितार्थे द्विगुर्भवति तद्धितः स्यादिति ॥

द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः ॥ ५ ॥

अथवा यदयं द्विगोर्लुगनपत्ये [४.१.८८] इति द्विगोरुत्तरस्य तद्धितस्य लुकं शास्ति तज्ज्ञापयत्याचार्य उत्पद्यते द्विगोस्तद्धित इति ॥

---

* ४.१.८८, ११५ † ६.२.२९ ‡ १.१.१*

द्विमासम् द्विमास जातस्येति । नैवं शक्यम् । स्वरे हि दोषः स्यात् । द्विमासजात इति प्राप्नोति* । द्विमासजात इति चेष्यते† । व्यह्नजातश्च न सिध्यति । व्यहजात इति प्राप्नोति न चैवं भवितव्यम् । भवितव्यं च यदा समाहारे द्विगुः । व्यह्नजातस्तु न सिध्यति‡ ॥ किमुच्यते परिमाणिनेति न पुनरन्यत्रापि । पञ्चगवप्रियः दशगवप्रियः ।

अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः ॥ १० ॥

अन्यत्र समुदायो बहुव्रीहिसंज्ञः । अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदं प्रसिद्धम् । उत्तरपदे प्रसिद्ध उत्तरपद इति द्विगुर्भविष्यति ॥

सर्वत्र मत्वर्थे प्रतिषेधः ॥ ११ ॥

सर्वेषु पक्षेषु द्विगुसंज्ञाया मत्वर्थे प्रतिषेधो वक्तव्यः । किं प्रयोजनम् । पञ्चखट्वा दशखट्वा । द्विगोः [४.१.२१] इतीकारो मा भूत् । पञ्चगुः दशगुः । गोरतद्धितलुकि [५.४ ९२] इति टज्मा भूदिति ॥

संख्यापूर्वो द्विगुः ॥ २ । १ । ५२ ॥

किमनन्तरे योगेऽयं संख्यापूर्वः स द्विगुसंज्ञ आहोस्वित्पूर्वमात्रे । किं चातः । यद्यनन्तरे योग एकशाटी¶ द्विगोः [४.१.२१] इतीकारो न प्राप्नोति । अथ पूर्वमात्र एकभिक्षा अत्रापि प्राप्नोति ॥ अस्त्वनन्तरे । कथमेकशाटी । ईकारान्तेन समासो भविष्यति । एका शाटी एकशाटी ॥ इह तर्हि एकापूपी द्विगोरितीकारो न प्राप्नोति । अस्तु तर्हि पूर्वमात्रे । कथमेकभिक्षा । टाबन्तेन समासो भविष्यति । एका भिक्षा एकभिक्षा ॥ इह तर्हि सप्तर्षयः** इगन्ते द्विगावित्येष स्वरः प्राप्नोति†† । अस्तु तर्ह्यनन्तरे । कथमेकापूपी । समाहार इत्येव सिद्धम् । कः पुनरत्र समाहार । यस्तान सभ्रमो वा ॥ इह तर्हि पञ्चहोतारः दशहोतारः इगन्ते द्विगावित्येष स्वरो न प्राप्नोति । अस्तु तर्हि पूर्वमात्रे । कथ सप्तर्षयः । अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दसीत्येवमेतत्सिद्धम्‡‡ । अथवा पुनरस्त्वनन्तरे । कथ पञ्चहोतारः दशहोतारः । आद्युदात्तप्रकरणे दिवोदासादीनां छन्दसीत्येव सिद्धम्§§ ॥

---

* ६ १ २२१ † ६ २ २९ ‡ ६ ४ ०१, ८८,८९ § २ १ ५१ ¶ २ १ ४९
** २ १ ६० †† ६ २ २९ ‡‡ ६ २ १०९*. §§ ६ २ ९१*

कुत्सितानि कुत्सनैः ॥ २ । १ । ५३ ॥

किमुदाहरणम् । वैयाकरणखसूचिः । किं व्याकरणं कुत्सितमाहोस्विद्वैयाकरणः । वैयाकरणः कुत्सितस्तस्मिन्कुत्सिते तत्स्थमपि कुत्सितं भवति ॥

उपमानानि सामान्यवचनैः ॥ २ । १ । ५५ ॥

उपमानानीत्युच्यते कानि पुनरुपमानानि । किं यदेवोपमानं तदेवोपमेयमाहोस्विदन्यदुपमानमन्यदुपमेयम् । किं चातः । यदि यदेवोपमानं तदेवोपमेयं क इहोपमार्थो गौरिव गौरिति । अथान्यदेवोपमानमन्यदुपमेयं क इहोपमार्थो गौरिवाश्व इति ॥ एवं तर्हि यत्र किंचित्सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेये भवतः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । मानं हि नामानिर्ज्ञातज्ञानार्थमुपादीयते ऽनिर्ज्ञातमर्थं ज्ञास्यामीति । तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानम् । गौरिव गवय इति । गौर्निर्ज्ञातो गवयोऽनिर्ज्ञातः ॥ कामं तर्ह्यनेनैव हेतुना यस्य गवयो निर्ज्ञातः स्याद्गौरनिर्ज्ञातस्तेन कर्तव्यं स्याद्गवय इव गौरिति । बाढं कर्तव्यम् ॥

किं पुनरिहोदाहरणम् । शस्त्रीश्यामा । क्व पुनरयं श्यामाशब्दो वर्तते । शस्त्र्यामित्याह । केनेदानीं देवदत्ताभिधीयते । समासेन । यद्येवं शस्त्रीश्यामो देवदत्त इति न सिध्यति । उपसर्जनस्येति* ह्रस्वत्वं भविष्यति । यदि तर्ह्युपसर्जनान्यप्येवंजातीयकानि भवन्ति तित्तिरिकल्माषी कुम्भकपाललोहिनी अनुपसर्जनलक्षण ईकारो† न प्राप्नोति ॥ एवं तर्हि शस्त्र्यामेव शस्त्रीशब्दो वर्तते देवदत्तायां श्यामाशब्दः । एवमपि गुणो ऽनिर्दिष्टो भवति । बहवः शस्त्र्यां गुणास्तीक्ष्णा सूक्ष्मा पृथुरिति । *अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः । तद्यथा ।* चन्द्रमुखी देवदत्तेति बहवश्चन्द्रे गुणा या चासौ प्रियदर्शनता सा गम्यते ॥ एवमपि समानाधिकरणेनेति‡ वर्तते व्यधिकरणत्वात्समासो न प्राप्नोति । किं हि वचनान्न भवति । यद्यपि तावद्वचनात्समासः स्यादिह तु खलु मृगीव चपला मृगचपला समानाधिकरणलक्षणः पुंवद्भावो§ न प्राप्नोति ॥ एवं तर्हि तस्यामेवोभयं वर्तते । एतच्चात्र युक्तं यत्तस्यामेवोभयं वर्तत इति । इतरथा हि बह्वपेक्ष्यं स्यात् । यदि तावदेवं विग्रहः क्रियते शस्त्रीव श्यामा देवदत्तेति शस्त्र्यां श्यामेत्येतदपेक्ष्यं

---

* १.२.४८ † ४.१.२४, ४०, ३९. ‡ २.१.४९ § ६.३.४२

स्यात् । अथाप्यत्र विग्रहः क्रियते यथा शस्त्री श्यामा तद्वदियं देवदत्तेत्यत्रापि देवदत्तायां श्यामेत्येतदपेक्ष्य स्यात् । एवमपि गुणो ऽनिर्दिष्टो भवति । बहवश्च शस्त्र्यां गुणास्तीक्ष्णा सूक्ष्मा पृथुरिति । अनिर्दिश्यमानस्यापि गुणस्य भवति लोके संप्रत्ययः । तद्यथा । चन्द्रमुखी देवदत्तेति बहवश्चन्द्रे गुणा या चासौ प्रियदर्शनता सा गम्यते ॥

उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः ॥ १ ॥

उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनस्याप्रसिद्धिः स्यात् । शस्त्रीश्यामा । श्यामाशब्दोऽयं शस्त्रीशब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते । तत्र सामान्यवचनैरिति समासो न प्राप्नोति ॥

न वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनप्रसिद्धिः ॥ २ ॥

न वैष दोषः । किं कारणम् । श्यामत्वस्योभयत्र भावात् । उभयत्रैवात्र श्यामत्वमस्ति शस्त्र्यां देवदत्तायां च । तद्वाचकत्वाच्च शब्दस्य । तद्वाचकश्चात्र श्यामाशब्दः प्रयुज्यते । किंवाचकः । उभयवाचकः । श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनं प्रसिद्धम् । सामान्यवचने प्रसिद्धे सामान्यवचनैरिति समासो भविष्यति । न चावश्यं स एव सामान्यवचनो यो बहूनां सामान्यमाह द्वयोरपि यः सामान्यमाह सोऽपि सामान्यवचन एव ॥ अथवा सामान्यवचनैरित्युच्यते सर्वश्च शब्दो ऽन्येन शब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते त एव विज्ञास्यामः प्रागभिसंबन्धाद्ये सामान्यवचना इति ॥

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ २।१।५६ ॥

सामान्याप्रयोग इति किमर्थम् । इह मा भूत् । पुरुषोऽयं व्याघ्र इव शूरः । पुरुषोऽयं व्याघ्र इव बलवान् ॥ सामान्याप्रयोग इति शक्यमवक्तुम् । कस्मान्न भवति पुरुषोऽयं व्याघ्र इव शूरः पुरुषोऽयं व्याघ्र इव बलवानिति । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति ॥ एवं तर्हि सिद्धे सति यत्सामान्याप्रयोग इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति वै प्रधानस्य सापेक्षस्यापि

समास इति। किमेतस्य ज्ञापने प्रयोजनम्। राजपुरुषो ऽभिरूपः। राजपुरुषो दर्शनीयः। अत्र वृत्तिः सिद्धा भवति॥

विशेषणं विशेष्येण बहुलम्॥ २। १। ५७॥

विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनाप्रसिद्धिः॥ १॥

विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनस्याप्रसिद्धिः। कृष्णतिला इति। कृष्णशब्दो ऽयं तिलशब्देनाभिसंबध्यमानो विशेषणवचनः संपद्यते। तथा तिलशब्दः कृष्णशब्देनाभिसंबध्यमानो विशेषणवचनः संपद्यते। तदुभयं विशेषणं भवत्युभयं च विशेष्यम्। विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनस्याप्रसिद्धिः*॥

न वान्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसिद्धिः॥ २॥

न वैष दोषः। किं कारणम्। अन्यतरस्य प्रधानभावात्। अन्यतरदत्र प्रधानम्। तद्विशेषकत्वाच्चापरस्य। तद्विशेषकं चापरम्। अन्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनसंज्ञा भविष्यति। यदास्य तिलाः प्राधान्येन विवक्षिता भवन्ति कृष्णो विशेषणत्वेन तदा तिलाः प्रधानं कृष्णो विशेषणम्॥ कामं तर्ह्यनेनैव हेतुना यस्य कृष्णाः प्राधान्येन विवक्षिता भवन्ति तिला विशेषणत्वेन तेन कर्तव्यं तिलकृष्णा इति। न कर्तव्यम्। न ह्यय द्वन्द्वः। तिलाश्च कृष्णाश्चेति। न खल्वपि षष्ठीसमासः। तिलानां कृष्णा इति। किं तर्हि। द्वाविमौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते न च द्वयोः प्रधानशब्दयोरेकस्मिन्नर्थे युगप दवरुध्यमानयोः किंचिदपि प्रयोजनमस्ति तत्र प्रयोगादेतद्गन्तव्य नूनमत्रान्यतरत्प्रधान तद्विशेषकं चापरमिति। तत्र खेतावान्सदेहः किं प्रधान किं विशेषणमिति। स चापि क्व संदेहः। यत्रोभौ गुणशब्दौ। तद्यथा। कुब्जखञ्जः खञ्जकुब्ज इति। यत्र ह्यन्यतरद्द्रव्यमन्यतरो गुणस्तत्र यद्द्रव्य तत्प्रधानम्। तद्यथा। शुक्लमालभेत कृष्णमालभेतेति न पिष्टपिण्डीमालभ्य कृती भवति। असत्त्वं तद्गुणं द्रव्यमाकाङ्क्षति॥ कथं तर्हीमौ द्वौ प्रधानशब्दावेकस्मिन्नर्थे युगपदवरुध्येते वृक्षः शिंशपेति नैतयोरावश्यकः समावेशः। न ह्यवृक्षः शिंशपास्ति॥

* १२४३

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥ २ । १ । ५८ ॥

अथ किमर्थमुत्तरत्रैवमाद्यनुक्रमणं क्रियते न विशेषणं विशेष्येण बहुलम् [२.१.५७] इत्येव सिद्धम् ।

बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम् ॥ १ ॥

अकृत्स्नं बहुलवचनमित्युत्तरत्रानुक्रमणं क्रियते । यदकृत्स्नं यदनेन कृतमकृतं तत् । एवं तर्हि न ब्रूमो ऽकृत्स्नमिति । कृत्स्नं च कारकं च साधकं च निर्वर्तकं च । यद्यनेन कृतं सुकृतं तत् । किमर्थं तर्ह्येवमाद्यनुक्रमणं क्रियते । उदाहरणभूयस्त्वात् । ते खल्वपि विधयः सुपरिगृहीता भवन्ति येषु लक्षणं प्रपञ्चश्च । केवलं लक्षणं केवलः प्रपञ्चो वा न तथा कारकं भवति ॥ अवश्यं खल्वस्माभिरिदं वक्तव्यं बहुलम् अन्यतरस्याम् उभयथा वा एकेषामिति । सर्ववेदपारिषदं हीदं शास्त्रम् । तत्र नैकः पन्थाः शक्य आस्थातुम् ॥

श्रेण्यादयः कृतादिभिः ॥ २ । १ । ५९ ॥

श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगणः ॥

श्रेण्यादिषु च्व्यर्थवचनम् ॥ १ ॥

श्रेण्यादिषु च्व्यर्थग्रहणं कर्तव्यम् । अश्रेणयः श्रेणयः कृताः श्रेणिकृताः । यदा हि श्रेणय एव किंचित्क्रियन्ते तदा मा भूदिति ॥ अन्यत्रायं च्व्यर्थग्रहणेषु च्व्यन्तस्य प्रतिषेधं शास्ति* । तदिह न तथा । किं कारणम् । अन्यत्र पूर्वं च्व्यन्तकार्यं परं च्व्यर्थकार्यम् । इह पुनः पूर्वं च्व्यर्थकार्यं परं च्व्यन्तकार्यमिति† ॥

क्तेन नञ्विशिष्टेनानञ् ॥ २ । १ । ६० ॥

नञ्विशिष्टे समानप्रकृतिवचनम् ॥ १ ॥

नञ्विशिष्टे समानप्रकृतिग्रहणं कर्तव्यम् । इह मा भूत् । सिद्धं चाभुक्तं चेति ॥ *अनञिति च प्रतिषेधो वक्तव्यः । इह मा भूत् । कर्तव्यमकृतमिति ॥*

---

* १.४.७४*. † ३३३८.

नुडिडधिकेन च ॥ २ ॥

नुडिडधिकेन च समासो वक्तव्यः । इहापि यथा स्यात् । अशितानशितेन* जीवति । क्लिष्टाक्लिशितेन[1] जीवतीति ॥

किमुच्यते समानप्रकृतिग्रहणं कर्तव्यमिति यदा नञ्विशिष्टेनेत्युच्यते न चात्र नञ्कृत एव विशेषः । किं तर्हि । प्रकृतिकृतोऽपि ॥ अयं विशिष्टशब्दोऽस्त्येवावधारणे वर्तते । तद्यथा । देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पक्षवन्तौ देवदत्तस्तु यज्ञदत्तात्स्वाध्यायेन विशिष्टः । स्वाध्यायेनैवेति गम्यते ऽन्ये गुणाः समा भवन्ति । अस्त्याधिक्ये वर्तते । तद्यथा । देवदत्तयज्ञदत्तावाढ्यावभिरूपौ दर्शनीयौ पक्षवन्तौ देवदत्तस्तु यज्ञदत्तात्स्वाध्यायेन विशिष्टः । स्वाध्यायेनाधिको ऽन्ये गुणा अविवक्षिता भवन्ति ॥ तद्यदा तावदवधारणे विशिष्टशब्दस्तदा नैवार्थः समानप्रकृतिग्रहणेन । नेह भविष्यति । सिद्धं चाभुक्तं चेति । नाप्यनञिति प्रतिषेधेन । नेह भविष्यति । कर्तव्यमकृतमिति । नुडिडधिकेनापि तु तदा समासो न प्राप्नोति । यदाधिक्ये विशिष्टशब्दस्तदा समानप्रकृतिग्रहणं कर्तव्यम् । इह मा भूत् । सिद्धं चाभुक्तं चेति । अनञिति च प्रतिषेधो वक्तव्यः । इह मा भूत् । कर्तव्यमकृतमिति । नुडिडधिकेनापि तु समासः सिद्धो भवति । तत्राधिक्ये विशिष्टशब्दं मत्वा समानप्रकृतिग्रहणं चोद्यते ॥

अवधारणं नञा चेन्नुडिड्विशिष्टेन न प्रकल्पेत ।
अथ चेदधिकविवक्षा कार्यं तुल्यप्रकृतिकेनेति ॥

कृतापकृतादीनां चोपसंख्यानम् ॥ ३ ॥

कृतापकृतादीनां चोपसंख्यानं कर्तव्यम् । कृतापकृतम् भुक्तविभुक्तम् पीतविपीतम् ॥

सिद्धं तु क्तेन विसमाप्तवचनात् ॥ ४ ॥

सिद्धमेतत् । कथम् । क्तान्तेन क्रियाविसमाप्तावचने क्तान्तं समस्यत इति वक्तव्यम् ॥

गतप्रत्यागतादीनां चोपसंख्यानम् ॥ ५ ॥

गतप्रत्यागतादीनां चोपसंख्यानं कर्तव्यम् । गतप्रत्यागतम् यातानुयातम् पुटापुटिका क्रयाक्रयिका फलाफलिका मानोन्मानिका ॥

युवा खलतिपलितवलिनजरतीभिः ॥ २ । १ । ६७ ॥

अयुक्तोऽयं निर्देशः । समानाधिकरणेनेति* वर्तते कः प्रसङ्गो यद्व्यधिकरणानां समासः स्यात् ॥ एवं तर्हि ज्ञापयत्याचार्यो यथाजातीयकमुत्तरपदं तथाजातीयकेन पूर्वपदेन समस्यत इति । किमेतस्य ज्ञापने प्रयोजनम् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येषा परिभाषा न कर्तव्या भवति ॥

वर्णो वर्णेन ॥ २ । १ । ६९ ॥

इह विचार्यते वर्णेन तृतीयासमासो वा स्यात् । कृष्णेन सारङ्गः कृष्णसारङ्गः । समानाधिकरणो वा । कृष्णः सारङ्गः कृष्णसारङ्ग इति । कश्चात्र विशेषः ।

वर्णेन तृतीयासमास एतप्रतिषेधे वर्णग्रहणम् ॥ १ ॥

वर्णेन तृतीयासमास एतप्रतिषेधे वर्णग्रहणं कर्तव्यम् । तृतीया पूर्वपदं प्रकृतिस्वरं भवति[†] । अनेते वर्ण इति वक्तव्यम्[‡] ॥ अथ द्वितीयेन वर्णग्रहणेनैतविशेषणेनार्थः । बाढमर्थो यद्यवर्ण एतशब्दोऽस्ति । ननु चायमस्ति । आ इत एत· कृष्णेतः लोहितेत इति । नार्थ एवमर्थेन वर्णग्रहणेन । यदि तावदयं कर्मणि क्तस्तृतीया कर्मणि [६.२.४८] इत्यनेन स्वरेण भवितव्यम् । अथापि कर्तरि परत्वात्क्तस्वरेण भवितव्यम्[§] ॥ अथ समानाधिकरण· ।

समानाधिकरणे द्विर्वर्णग्रहणम् ॥ २ ॥

समानाधिकरणे द्विर्वर्णग्रहणं कर्तव्यम् । वर्णो वर्णेष्वनेत इति वक्तव्यम् । एकं वर्णग्रहणं कर्तव्यमिह मा भूत् । परमशुक्लः परमकृष्ण इति । द्वितीयं वर्णग्रहणं कर्तव्यमिह मा भूत् । कृष्णतिला इति ॥ एकं वर्णग्रहणमनर्थकम् । अन्यतरत्र कस्मान्न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥

एवं सति तान्येतानि त्रीणि वर्णग्रहणानि भवन्ति समासविधौ द्वे स्वरविधौ चैकम् । यस्यापि तृतीयासमासस्तस्यापि तान्येव त्रीणि वर्णग्रहणानि भवन्ति समासविधौ द्वे स्वरविधौ चैकम् । सामान्येन मम तृतीयासमासो भविष्यति तृतीया तत्कृतार्थेन

---

* २.१.४९ † ६.२.२ ‡ ६.२.३ § ६.२.१३९

गुणवचनेन [२.१.३०] इति ॥ अथद्यं वर्णेन प्रतिपदं समासो वक्तव्यो यत्र तेन न सिध्यति तदर्थम् । क्व च तेन न सिध्यति । शुक्लबभ्रुः हरितबभ्रुरिति । तथा च सति तान्येव त्रीणि वर्णग्रहणानि भवन्ति समासविधौ द्वे स्वरविधौ चैकम् ॥ अथेदानीं समानाधिकरणः सामान्येन सिद्धः स्यात् । बाढं सिद्धः । कथम् । विशेषणं विशेष्येण बहुलम् [२.१.५७] इति । एवमपि द्वे वर्णग्रहणे कर्तव्ये स्वरविधावेव प्रतिपदोक्तस्याभावात् ॥ तस्मात्समानाधिकरण इत्येष पक्षो ज्यायान् ॥

समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन ॥ ३ ॥

समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं भवति विप्रतिषेधेन । प्रधानानां प्रधानमुपसर्जनानामुपसर्जनम् ॥ प्रधानानां तावत्प्रधानम् । वृन्दारकनागकुञ्जरैः पूज्यमानम् [२.१.६२] इत्यस्यावकाशः । गोवृन्दारकः अश्ववृन्दारकः । पोटायुवती-नामवकाशः* । इभ्ययुवतिः आढ्ययुवतिः। इहोभयं प्राप्नोति । नागयुवतिः वृन्दारकयुवतिः । प्रधानानां परं प्रधानं भवति विप्रतिषेधेन ॥ उपसर्जनानां परमुपसर्जनम् । सन्महत्परमोत्तमोत्कृष्टाः [६१] इत्यस्यावकाशः । सद्गवः सदश्वः । कृत्यतुल्याख्या अजात्या [६८] इत्यस्यावकाशः । तुल्यश्वेतः तुल्यकृष्णः । इहोभयं प्राप्नोति । तुल्यसन् तुल्यमहान् । उपसर्जनानां परमुपसर्जनं भवति विप्रतिषेधेन ॥

समानाधिकरणसमासाद्बहुव्रीहिः ॥ ४ ॥

समानाधिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेन । समानाधिकरणसमासस्यावकाशः । वीरः पुरुषो वीरपुरुषः† । बहुव्रीहेरवकाशः । कण्ठेकालः । इहोभयं प्राप्नोति । वीरपुरुषको ग्रामः । बहुव्रीहिर्भवति विप्रतिषेधेन‡ ॥

कदाचित्कर्मधारयः सर्वधनाद्यर्थः ॥ ५ ॥

कदाचित्कर्मधारयो भवति बहुव्रीहेः । किं प्रयोजनम् । सर्वधनाद्यर्थः । सर्वधनी । सर्वबीजी । सर्वकेशी नटः । गौरखरवदरण्यम् । गौरमृगवदरण्यम् । कृष्णसर्पवान्वल्मीकः । लोहितशालिमान्ग्रामः । किं प्रयोजनम् । कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं यथा स्यात् । किं च कारणं न स्यात् । बहुव्रीहिणोक्तत्वान्मत्वर्थस्य ॥ यद्युक्तत्वं हेतुः कर्मधारयेणाप्युक्तत्वान्न प्राप्नोति । न खल्वपि संज्ञाश्रयो मत्वर्थीयः । किं तर्हि । अर्थाश्रयः । स यथैव बहुव्रीहिणोक्तत्वान्न भवत्येवं

कर्मधारयेणाप्युक्तत्वान्न भविष्यति ॥ एवं तर्हीदं स्यात् । सर्वाणि धनानि सर्वधनानि सर्वधनान्यस्य सन्ति सर्वधनीति । नैवं शक्यम् । नित्यमेवं सति कर्मधारयः स्यात् । तत्र यदुक्तं कदाचित्कर्मधारय इत्येतदयुक्तम् ॥ एवं तर्हि भवति वै किंचिदाचार्याः कार्यवद्बुद्धिं कृत्वा पठन्ति कार्याः शब्दा इति । तद्वदिदं पठितं समानाधिकरणसमासाद्बहुव्रीहिः कर्तव्यः कदाचित्कर्मधारयः सर्वधनाद्यर्थ इति ॥

यदुच्यते समानाधिकरणसमासाद्बहुव्रीहिर्भवति विप्रतिषेधेनेति नैष युक्तो विप्रतिषेधः । अन्तरङ्गः कर्मधारयः । कान्तरङ्गता । स्वपदार्थे कर्मधारयो ऽन्यपदार्थे बहुव्रीहिः । अस्तु । विभाषा कर्मधारयो यदा न कर्मधारयस्तदा बहुव्रीहिर्भविष्यति ॥ एवमपि यत्र कदाचित्कर्मधारयो भवति कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं प्राप्नोति । सर्वश्चायमेवमर्थो यत्नः कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानं मा भूदिति ॥ एवं तर्हि नेदं तस्य योगस्योदाहरणं विप्रतिषेधे परमिति* । किं तर्हि । इष्टिरियं पठिता । समानाधिकरणसमासाद्बहुव्रीहिरिष्टः कदाचित्कर्मधारयः सर्वधनाद्यर्थ इति । यदीष्टिः पठिता नार्थोऽनेन । इह हि सर्वे मनुष्या अल्पेन यत्नेन महतोऽर्थानाकाङ्क्षन्ति । एकेन माषेण शतसहस्रम् । एकेन कुद्दालकेन खारीसहस्रम् । तत्र कर्मधारयप्रकृतिभिर्मत्वर्थीयैरभिधानमस्तु बहुव्रीहिणेति बहुव्रीहिणा भविष्यति लघुत्वात् ॥ कथं सर्वधनी सर्वबीजी सर्वकेशी नट इति । इनिप्रकरणे सर्वादेरिनिं वक्ष्यामि† । तच्चावश्यं वक्तव्यं ठनो‡ बाधनार्थम् ॥ कथं गौरखरवदरण्यम् गौरमृगवदरण्यम् कृष्णसर्पवान्वल्मीकः लोहितशालिमान्ग्रामः । अस्त्यत्र विशेषः । जात्याभिसंबन्धः क्रियते । कृष्णसर्पो नाम सर्पजातिः सास्मिन्वल्मीकेऽस्ति । यदा ह्यन्तरेण जातिं तद्वताभिसंबन्धः क्रियते कृष्णसर्पो वल्मीक इत्येवं तदा भविष्यति ॥

पूर्वपदातिशय आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः ॥ ६ ॥

पूर्वपदातिशय आतिशायिकाद्बहुव्रीहिर्भवति विप्रतिषेधेन । किं प्रयोजनम् । सूक्ष्मवस्त्रतराद्यर्थः । आतिशायिकस्यावकाशः । पटुतरः पटुतमः । बहुव्रीहेरवकाशः । चित्रगुः शबलगुः । इहोभयं प्राप्नोति । सूक्ष्मवस्त्रतरः तीक्ष्णशृङ्गतरः । बहुव्रीहिर्भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । विप्रतिषेधे परमित्युच्यते* पूर्वश्च बहुव्रीहिः पर आतिशायिकः§ । इष्टवाची परशब्दः । विप्रतिषेधे परं यदिष्टं तद्भवति ॥ एवमप्ययुक्तः । अन्तरङ्ग आतिशायिकः । कान्तरङ्गता । ङ्याप्प्रातिपदिकादातिशायिकः¶ सुबन्तानां बहुव्रीहिः । आतिशायिकोऽपि नान्तरङ्गः ।

* १.४.२ † ५.२.१२८* ‡ ५.२.११५ § २.१.२८, ५.३.५५-५७ ¶ ४.१.२१

कथम् । समर्थात्तद्धित उत्पद्यते सामर्थ्यं च सुबन्तेन । एवमप्यन्तरङ्गः । कथम् । स्वपदार्थे आतिशायिको ऽन्यपदार्थे बहुव्रीहिः । एवमपि नान्तरङ्गः । कथम् । स्पर्धायामातिशायिको भवति न चान्तरेण प्रतियोगिनं स्पर्धा भवति ॥ नैव वात्रातिशायिकः प्राप्नोति । किं कारणम् । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । यावता वस्त्राणि तद्वन्तमपेक्षन्ते तद्वन्तं चापेक्ष्य वस्त्राणां वस्त्रैर्युगपत्स्पर्धा भवति । ननु चायमातिशायिक एवमात्मकः सत्यां व्यपेक्षायां विधीयते । सत्यमेवमात्मको यां च नान्तरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिस्तस्यां सत्यां भवितव्यम् । कां च नान्तरेण व्यपेक्षामातिशायिकस्य प्रवृत्तिः । या हि प्रतियोगिनं प्रति व्यपेक्षा । या हि तद्वन्तं प्रति न तस्यां भवितव्यम् ॥ बहुव्रीहिरपि तर्हि न प्राप्नोति । किं कारणम् । असामर्थ्यादेव । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । यावता वस्त्राणि वस्त्रान्तराण्यपेक्षन्ते तद्वता चाभिसंबन्धः ॥

एवं तर्हि नेदं तस्य योगस्योदाहरणं विप्रतिषेधे परमिति* । किं तर्हि । इष्टिरियं पठिता । पूर्वपदातिशय आतिशायिकाद्बहुव्रीहिरिष्टः सूक्ष्मवस्त्रतराद्यर्थ इति । यदीष्टिरियं पठिता नार्थो ऽनेन । कथं यैषा युक्तिरुक्ता वस्त्रान्तराणां वस्त्रान्तरैर्युगपत्स्पर्धा तद्वता चाभिसंबन्ध इति । यदा ह्यन्तरेण वस्त्राणां वस्त्रैर्युगपत्स्पर्धां तद्वता चाभिसंबन्धः क्रियते निष्प्रतिद्वन्द्वस्तदा बहुव्रीहिर्बहुव्रीहेरातिशायिकः ॥ न तर्हीदानीमिदं भवति सूक्ष्मतरवस्त्र इति । भवति । यदान्तरेण तद्वन्तं वस्त्राणां वस्त्रैर्युगपत्स्पर्धा निष्प्रतिद्वन्द्वस्तदातिशायिकः ॥ कथं पुनरन्यस्य प्रकर्षेणान्यस्य प्रकर्षः स्यात् । नैवान्यस्य प्रकर्षेणान्यस्य प्रकर्षेण भवितव्यम् । यथैवायं द्रव्येषु यतते वस्त्राणि मे स्युरित्येवं गुणेष्वपि यतते सूक्ष्मतराणि मे स्युरिति । नात्रातिशायिकः प्राप्नोति । किं कारणम् । गुणवचनादित्युच्यते न च समासो गुणवचनः । समासोऽपि गुणवचनः । कथम् । अजहत्स्वार्था वृत्तिरिति । अथ जहत्स्वार्थायां तु दोष एव । जहत्स्वार्थायां च न दोषः । भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा । शुक्लवाससमानय लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति ॥

उत्तरपदातिशय आतिशायिको बहुव्रीहेर्बाढ्यतराद्यर्थः ॥ ७ ॥

उत्तरपदातिशय आतिशायिको बहुव्रीहेर्भवति विप्रतिषेधेन । किं प्रयोजनम् ।

---

*१४२

बह्वाढ्यतराद्यर्थः । बह्वाढ्यतरः बहुसुकुमारतरः । कः पुनरत्र विशेषो बहुव्रीहेर्वातिशायिकः स्यादातिशायिकान्तेन वा बहुव्रीहिः । स्वरकपोर्विशेषः । यद्यत्रातिशायिकाद्बहुव्रीहिः स्याद्बह्वाढ्यतर एवं स्वरः प्रसज्येत बह्वाढ्यतर इति चेष्यते* । बह्वाढ्यकतर इति च प्राप्नोति बह्वाढ्यतरक इति चेष्यते† ॥

समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च ॥ ८ ॥

समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानं कर्तव्यमुत्तरपदलोपश्च वक्तव्यः । शाकभोजी पार्थिवः शाकपार्थिवः । कुतपवासाः सौश्रुतः कुतपसौश्रुतः । अजापण्यस्तौल्वलिरजातौल्वलिः । यष्टिप्रधानो मौद्गल्यो यष्टिमौद्गल्यः ॥

चतुष्पादो गर्भिण्या ॥ २ । १ । ७१ ॥

चतुष्पाज्जातिरिति वक्तव्यम् । इह मा भूत् । कालाक्षी गर्भिणी । स्वस्तिमती गर्भिणी ॥

मयूरव्यंसकादयश्च ॥ २ । १ । ७२ ॥

किमर्थश्चकारः । एवकारार्थः । मयूरव्यंसकादय एव । क्व मा भूत् । परमो मयूरव्यंसक इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

* ६१ १०५ ३१४. † ५४ १५४

अर्धं नपुंसकम् ॥ २ । २ । २ ॥

इह कस्मान्न भवति । ग्रामार्धः नगरार्धं इति । अर्धशब्दस्य नपुंसकलिङ्गस्येदं ग्रहणं पुँल्लिङ्गश्चायमर्धशब्दः । क्व पुनरयं नपुंसकलिङ्गः क्व पुँल्लिङ्गः । समप्रविभागे नपुंसकलिङ्गोऽवयववाची पुँल्लिङ्गः ॥ इह कस्मान्न भवति । अर्धं पिप्पलीनामिति । न वा भवत्यर्धपिप्पल्य इति । भवति यदा खण्डसमुदयः । अर्धपिप्पली चार्धपिप्पली चार्धपिप्पली चार्धपिप्पल्य इति । यदा त्वेतद्वाक्यं भवत्यर्धं पिप्पलीनामिति तदा न भवितव्यम् । तदा कस्मान्न भवति । एकाधिकरण* इति वर्तते ॥ न तर्हीदानीमिदं भवति अर्धराशिरिति । भवति । एकमेतदधिकरणं भवति यो ऽसौ राशिर्नाम ॥

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ॥ २ । २ । ३ ॥

अन्यतरस्यांग्रहण किमर्थम् । अन्यतरस्यां समासो यथा स्यात्समासेन मुक्ते वाक्यमपि यथा स्यात् । द्वितीयं भिक्षाया इति । नैतदस्ति प्रयोजनम् । प्रकृता महाविभाषा तया वाक्यमपि भविष्यति ॥ इदं तर्हि प्रयोजनमेकदेशिसमासेन मुक्ते षष्ठीसमासोऽपि यथा स्यात्† । भिक्षाद्वितीयमिति । एतदपि नास्ति प्रयोजनम् । अयमपि विभाषा षष्ठीसमासो ऽपि । तावुभौ वचनाद्भविष्यतः ॥ अत उत्तरं पठति ।

द्वितीयादीनां विभाषाप्रकरणे विभाषावचनं ज्ञापकमवयवविधाने सामान्यविधानाभावस्य ॥ १ ॥

द्वितीयादीनां विभाषाप्रकरणे विभाषावचन क्रियते ज्ञापकार्थम् । किं ज्ञाप्यते । एतज्ज्ञापयत्याचार्योऽवयवविधौ सामान्यविधिर्न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । *भिनत्ति छिनत्ति* । श्नमि कृते‡ शप्न भवति ॥ नैतदस्ति प्रयोजनम् । शबादेशाः श्यनादयः करिष्यन्ते । तर्हि शपो ग्रहणं कर्तव्यम् । न कर्तव्यम् ।

---

* २ २ १   † २ २   ‡ ३ १ ७८

प्रकृतमनुवर्तते । क्व प्रकृतम् । कर्तरि शप् [३.१.६८] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । सुपादिभ्य इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [१.१.६७] इति । प्रत्ययविधिरयं न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति । नायं प्रत्ययविधिः । विहितः प्रत्ययः प्रकृतश्चानुवर्तते ॥ एवं तर्हि ज्ञापयत्याचार्यो यत्रोत्सर्गापवादौ विभाषा तत्रापवादेन मुक्ते उत्सर्गो न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । दिक्पूर्वपदान्ङीप् [४.१.६०] । प्राङ्मुखी प्राङ्मुखा । प्रत्यङ्मुखी प्रत्यङ्मुखा । ङीपा मुक्ते ङीप् भवति* ॥ नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत् । दिक्पूर्वपदान्ङीपोऽनुदात्तत्व ङीब्विधाने ह्यन्यत्रापि ङीब्विषयान्ङीप्प्रसङ्ग इति† ॥ इदं तर्हि प्रयोजनम् । अर्धपिप्पली अर्धकोशातकी । एकदेशिसमासेन‡ मुक्ते षष्ठीसमासो न भवति । उन्मत्तगङ्गम् लोहितगङ्गम् । अव्ययीभावेन§ मुक्ते बहुव्रीहिर्न भवति । दाक्षिः दाक्षिः । इञा मुक्ते ऽण्न भवति¶ ॥ यद्येतज्ज्ञाप्यत उपगोरपत्यमौपगवः तद्धितेन मुक्त उपग्वपत्यमिति न सिध्यति । अस्त्यत्र विशेषः । द्वे ह्यत्र विभाषे । दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम् [४.१.८१] इति समर्थानां प्रथमाद्वा [८२] इति च । तत्रैकया वृत्तिर्विभाषापरया वृत्तिविषये विभाषापवादः ॥

क्रियमाणेऽपि वा अन्यतरस्याग्रहणे षष्ठीसमासो न प्राप्नोति । किं कारणम् । पूरणेनेति प्रतिषेधात्** । नैतत्पूरणान्तम् । अनेनैतत्पर्यवपन्नम्†† । एतदपि पूरणान्तमेव । कथम् । पूरण नामार्थस्तमाह तीयशब्दोऽतः पूरणम् । योऽसौ पूरणान्तात्स्वार्थे भागे ऽन्सोऽपि पूरणमेव ॥ एव तर्ह्यन्यतरस्याग्रहणसामर्थ्यात्षष्ठीसमासोऽपि भविष्यति ॥

प्राप्तापन्ने च द्वितीयया ॥ २ । २ । ४ ॥

किमर्थश्चकारः । अनुकर्षणार्थः । अन्यतरस्यामित्येतदनुकृष्यते‡‡ । किं प्रयोजनम् । अन्यतरस्यां समासो यथा स्यात्समासेन मुक्ते वाक्यमपि यथा स्यात् । जीविकां प्राप्त इति । नैतदस्ति प्रयोजनम् । प्रकृता महाविभाषा तया वाक्यमपि भविष्यति ॥ इदं तर्हि प्रयोजनं द्वितीयासमासोऽपि यथा स्यात्§§ । जीविकाप्राप्त इति ।

* ४.१.५४ † ४.१.६०* ‡ २.२.२ § २.१.१ ¶ ४.१.९५, ८१, ९२
** २.२.११ †† ५.३.४८ ‡‡ २.२.३ §§ २.१.२४

एतदपि नास्ति प्रयोजनम् । अयमप्युच्यते द्वितीयासमासोऽपि तदुभयं वचनाद्भविष्यति ॥ एवं तर्हि नायमनुकर्षणार्थश्चकारः । किं तर्हि । अत्वमनेन विधीयते । प्राप्तापन्ने द्वितीयान्तेन सह समस्येते अत्वं च भवति प्राप्तापन्नयोरिति । प्राप्ता जीविकां प्राप्तजीविका । आपन्ना जीविकामापन्नजीविका ॥

कालाः परिमाणिना ॥ २ । २ । ५ ॥

किंप्रधानोऽयं समासः । उत्तरपदार्थप्रधानः । *यद्युत्तरपदार्थप्रधानः सधर्मणानेनान्यैरुत्तरपदार्थप्रधानैर्भवितव्यम् । अन्येषु चोत्तरपदार्थप्रधानेषु यैवासावन्तर्वर्तिनी* विभक्तिस्तस्याः समासेऽपि श्रवणं भवति । तद्यथा । राज्ञः पुरुषो राजपुरुष इति । इह पुनर्वाक्ये षष्ठी समासे प्रथमा । केनैतदेवं भवति । योऽसौ मासजातयोरभिसंबन्धः स समासे निवर्तते । अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्नस्तत्र प्रातिपदिकार्थे प्रथमेति* प्रथमा भवति । न तर्हीदानीमिदं भवति मासजातस्येति । भवति वाक्यमर्थमपेक्ष्य षष्ठी ॥

कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देशः ॥ १ ॥

कालस्य येन समासः सोऽपरिमाणी तस्यापरिमाणित्वादनिर्देशः । अगमको निर्देशोऽनिर्देशः । न हि जातस्य मासः परिमाणम् । कस्य तर्हि । त्रिंशद्रात्रस्य । तद्यथा । द्रोणो बदराणां देवदत्तस्येति । न देवदत्तस्य द्रोणः परिमाणम् । कस्य तर्हि । बदराणाम् ॥

सिद्धं तु कालपरिमाणं यस्य स कालस्तेन ॥ २ ॥

सिद्धमेतत् । कथम् । कालपरिमाणं यस्य स कालस्तेन सह समस्यत इति वक्तव्यम् । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देश इति । कं पुनः कालं मत्वा भवानाह कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देश इति । येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमाहुः । तस्यैव हि कयाचित्क्रियया युक्तस्याहरिति च भवति रात्रिरिति च । कया क्रियया । आदित्यगत्या । तयैवासकृदावृत्तया मास इति भवति संवत्सर इति च । यद्येवं भवति जातस्य मासः परिमाणम् ॥

---

* २.३.४६.

एकवचनद्विगोश्चोपसंख्यानम् ॥ ३ ॥

एकवचनान्तानामिति वक्तव्यम् । इह मा भूत् । मासौ जातस्य । मासा जातस्येति ॥ द्विगोश्चेति वक्तव्यम् । इहापि यथा स्यात् । द्विमासजातः त्रिमासजातः ॥

उक्तं वा ॥ ४ ॥

किमुक्तम् । एकवचने तावदुक्तमनभिधानादिति* ॥ द्विगोः किमुक्तम् । उत्तरपदेन परिमाणिना द्विगोः समासवचनमिति† ॥

नञ् ॥ २ । २ । ६ ॥

किंप्रधानोऽयं समासः । उत्तरपदार्थप्रधानः । यद्युत्तरपदार्थप्रधानोऽब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति ॥ अन्यपदार्थप्रधानस्तर्हि भविष्यति । यद्यन्यपदार्थप्रधानोऽवर्षा हेमन्त इति हेमन्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि प्राप्नोति ॥ पूर्वपदार्थप्रधानस्तर्हि भविष्यति । यदि पूर्वपदार्थप्रधानोऽव्ययसंज्ञा प्राप्नोति । अव्ययं ह्यस्य पूर्वपदमिति । नैष दोषः । पाठेनाव्ययसंज्ञा क्रियते‡ न च नञ्समासस्तत्र पठ्यते । यद्यपि नञ्समासो न पठ्यते नञ्तु पठ्यते । पाठेनाप्यव्ययसंज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भवन्ति यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति ॥ नेदं वाचनिकमलिङ्गतासंख्यता वा । किं तर्हि । स्वाभाविकमेतत् । तद्यथा । समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्तेऽपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति कृत्वा सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम् । यदतः प्राक्समासाल्लिङ्गसंख्याभ्यां योगो नास्ति समासे च भवति स्वाभाविकमेतत् ॥ अथवाश्रयतो लिङ्गवचनानि भविष्यन्ति । गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । तद्यथा । शुभ्रं वस्त्रम् शुभ्रा शाटी शुभ्रः कम्बलः शुभ्रौ कम्बलौ शुभ्राः कम्बला इति । यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति । एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति ॥ अथवा पुनरस्तूत्तरपदार्थप्रधानः । ननु चोक्तमब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीति । नैष दोषः । इदं तावदयं प्रष्टव्यः । अथेह राजपुरुष-

---

* ११९. † २१.५१. ‡ ११ १७

मानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति । अस्त्यत्र विशेषः । राजा विशेषकः प्रयुज्यते तेन विशिष्टस्यानयनं भवति । इहापि तर्हि नञ्विशेषकः प्रयुज्यते तेन नञ्विशिष्टस्यानयनं भविष्यति । कः पुनरसौ । निवृत्तपदार्थकः ॥ यदा पुनरस्य पदार्थो निवर्तते किं स्वाभाविकी निवृत्तिराहोस्विद्वाचनिकी । किं चातः । यदि स्वाभाविकी किं नञ्प्रयुज्यमानः करोति । अथ वाचनिकी तद्वक्तव्यं नञ्प्रयुज्यमानः पदार्थं निवर्तयतीति । एवं तर्हि स्वाभाविकी निवृत्तिः । ननु चोक्तं किं नञ्प्रयुज्यमानः करोतीति । नञ्प्रयुज्यमानः पदार्थं निवर्तयति । कथम् । कीलप्रतिकीलवत् । तद्यथा । कील आहन्यमानः प्रतिकीलं निर्हन्ति । यद्येतन्नञो माहात्म्य स्यान्न जातुचिद्राजानो हस्त्यश्वं विभृयुर्नत्येव राजानो ब्रूयुः ॥ एवं तर्हि स्वाभाविकी निवृत्तिः । ननु चोक्तं किं नञ्प्रयुज्यमानः करोतीति । नञ्निमित्ता तूपलब्धिः । तद्यथा । समन्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनं न च तेषां प्रदीपो निर्वर्तको भवति ॥ यदि पुनरयं निवृत्तपदार्थकः किमर्थं ब्राह्मणशब्दः प्रयुज्यते । एवं यथा विज्ञायेतास्य पदार्थो निवर्तत इति । नेति ह्युक्ते संदेहः स्यात्कस्य पदार्थो निवर्तत इति । तत्रासंदेहार्थं ब्राह्मणशब्दः प्रयुज्यते । एवं चैतत् । अथवा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति ।

तपः श्रुतं च योनिश्चेत्येतद्ब्राह्मणकारकम् ।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥

तथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानप्यभ्यन्तरान्ब्राह्मण्ये गुणान्कुर्वन्ति । समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते । तद्यथा । पूर्वे पञ्चालाः । उत्तरे पञ्चालाः । तैलं भुक्तम् । घृतं भुक्तम् । शुक्लः नीलः कपिल· कृष्ण इति । एवमयं समुदाये ब्राह्मणशब्दः प्रवृत्तो ऽवयवेष्वपि वर्तते जातिहीने गुणहीने च ॥ गुणहीने तावत् । अब्राह्मणोऽयं यस्तिष्ठन्मूत्रयति । अब्राह्मणोऽयं यो गच्छन्भक्षयति ॥ जातिहीने संदेहाद्दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते । संदेहात्तावत् । गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति । ततः पश्चादुपलभते नायं ब्राह्मणो ऽब्राह्मणोऽयमिति । तत्र संदेहाच्च ब्राह्मणशब्दो वर्तते जातिकृता चार्थस्य निवृत्ति· । दुरुपदेशात् । दुरुपदिष्टमस्य भवत्यमुष्मिन्नवकाशे ब्राह्मणस्तमानयेति । स तत्र गत्वा यं पश्यति तमध्यवस्यति ब्राह्मणोऽयमिति । ततः पश्चादुपलभते नायं ब्राह्मणो ऽब्राह्मणोऽयमिति । तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते जातिकृता नार्थस्य निवृत्तिः । आतश्च संदेहाद्दुरुपदेशाद्वा न ह्ययं कालं मापराशिवर्णमापण आसीन

वृद्धाध्यवस्यति ब्राह्मणोऽयमिति । निर्ज्ञातं तस्य भवति ॥ इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये सति संगृहीतं भवति । किम् । अनेकमिति । किमत्र संगृहीतम् । एकवचनम् । कथं पुनरेकस्य प्रतिषेधेन बहूनां संप्रत्ययः स्यात् । प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति । तद्यथा । आसय शायय भोजयानेकमिति । यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र क्रियागुणौ प्रसज्येते यत्र खलु न प्रसज्येते तत्र कथम् । अनेकस्तिष्ठतीति । भवति चैवंजातीयकानामप्येकस्य प्रतिषेधेन बहूनां संप्रत्ययः । तद्यथा । न न एकं प्रियम् । न न एकं सुखमिति ॥

इह अब्राह्मणत्वम् अब्राह्मणता परत्वात्त्वतलौ प्राप्तः* । तत्र को दोषः । स्वरे हि दोषः स्यात् । अब्राह्मणत्वमित्येवं स्वरः प्रसज्येत† । अब्राह्मणत्वमिति चेष्यते‡ ॥

नञ्समासे भाववचन उक्तम् ॥ १ ॥

किमुक्तम् । त्वतल्भ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसिद्ध्यर्थमिति§ ॥

ईषदकृता ॥ २ । २ । ७ ॥

ईषद्गुणवचनेन ॥ १ ॥

ईषद्गुणवचनेनेति वक्तव्यम् । अकृतेति उच्यमान इह न प्रसज्येत । ईषद्गार्ग्य इति । इह च न स्यात् । ईषत्कडार इति ॥

षष्ठी ॥ २ । २ । ८ ॥

कृद्योगा च ॥ १ ॥

कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् । इध्मप्रव्रश्चनः पलाशशातनः ॥ किमर्थमिदमुच्यते । प्रतिपदविधाना च षष्ठी न समस्यत इति वक्ष्यति¶ तस्यायं पुरस्तादपकर्षः । का पुनः षष्ठी प्रतिपदविधाना का कृद्योगा । सर्वा षष्ठी प्रतिपदविधाना शेषलक्षणां** वर्जयित्वा । कर्तृकर्मणोः कृति [२.३.६५] इति या षष्ठी सा कृद्योगा ॥

* ५.१.१२१. † ६.२.२. ‡ २.२.६. § ५.१.११९. ¶ २.२.१०. ** २.३.५०.

तत्स्थैश्च गुणैः ॥ २ ॥

तत्स्थैश्च गुणैः षष्ठीगुणैः षष्ठी समस्यत इति वक्तव्यम् । ब्राह्मणवर्णः चन्दनगन्धः पटहशब्दः नदीघोषः ॥

न तु तद्विशेषणैः ॥ ३ ॥

न तु तद्विशेषणैरिति वक्तव्यम् । इह मा भूत् । घृतस्य तीव्रः । चन्दनस्य मृदुरिति ॥

किमर्थमिदमुच्यते । गुणेनेति प्रतिषेधं वक्ष्यति* तस्यायं पुरस्तादपकर्षः । किं कारणं गुणेन नेत्युच्यते न पुनर्गुणवचनेन नेत्युच्यते । नैवं शक्यम् । इह हि न स्यात् । काकस्य कार्ष्ण्यम् । कण्टकस्य तैक्ष्ण्यम् । बलाकायाः शौक्ल्यमिति । एतदेव तस्मिन्योग उदाहरणम् । यद्दि ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णा इत्यसामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यते दन्ताः । तस्माद्गुणेन नेति वक्तव्यम् । गुणेन नेत्युच्यमाने तत्स्थैश्च गुणैरिति वक्तव्यम् । तत्स्थैश्च गुणैरित्युच्यमाने न तु तद्विशेषणैरिति वक्तव्यम् ॥

न निर्धारणे ॥ २ । २ । १० ॥

प्रतिपदविधाना च ॥ १ ॥

प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यम् । इह मा भूत् । सर्पिषो ज्ञानम् । मधुनो ज्ञानमिति† ॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ २ । २ । ११ ॥

गुणे किमुदाहरणम् । ब्राह्मणस्य शुक्लाः । वृषलस्य कृष्णा इति । नैतदस्ति प्रयोजनम् । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यते दन्ताः ॥ इदं तर्हि । काकस्य कार्ष्ण्यम् । कण्टकस्य तैक्ष्ण्यम् । बलाकायाः शौक्ल्यमिति ॥ इदं चाप्युदाहरणम् । ब्राह्मणस्य शुक्लाः ।

---

* २२ ११ † ३१ ५१

वृषलस्य कृष्णा इति । ननु चोक्तमसामर्थ्यादत्र न भविष्यति कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति द्रव्यमत्रापेक्ष्यते दन्ता इति । नैष दोषः । भवति वै कस्यचिदर्थात्प्रकरणाद्वापेक्ष्यं निर्ज्ञातं तदा वृत्तिः प्राप्नोति ॥

सति किमुदाहरणम् । ब्राह्मणस्य पश्यन् । ब्राह्मणस्य पक्ष्यमाणः । नैतदस्ति । प्रतिषिध्यते ऽत्र षष्ठी लप्रयोगे नेति* । या च श्रूयत एषा बाह्यमर्थमपेक्ष्य भवति । तत्रासामर्थ्यान्न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यत ओदनः ॥ इदं तर्हि । चौरस्य द्विषन् । वृषलस्य द्विषन् । ननु चात्रापि प्रतिषिध्यते । वक्ष्यत्येतत् । द्विषः शतुर्वावचनमिति† ॥

अव्यये किमुदाहरणम् । ब्राह्मणस्योच्चैः । वृषलस्य नीचैरिति । नैतदस्ति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यत आसनम् ॥ इदं तर्हि । ब्राह्मणस्य कृत्वा । वृषलस्य कृत्वेति । एतदपि नास्ति । प्रतिषिध्यते तत्र षष्ठ्यव्ययप्रयोगे नेति* । या च श्रूयत एषा बाह्यमर्थमपेक्ष्य भवति । तत्रासामर्थ्यान्न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यते कटः ॥ इदं तर्हि । पुरा सूर्यस्योदेतोराधेयः । पुरा वत्सानामपाकर्तोः । ननु चात्रापि प्रतिषिध्यतेऽव्ययमिति कृत्वा । वक्ष्यत्येतत् । अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति† ॥

समानाधिकरणे किमुदाहरणम् । राज्ञः पाटलिपुत्रकस्य । शुकस्य माराविदस्य । पाणिनेः सूत्रकारस्य । नैतदस्ति । असामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । समानाधिकरणमसमर्थवद्भवतीति ॥ इदं तर्हि । सर्पिषः पीयमानस्य । यजुषः क्रियमाणस्येति । ननु चात्राप्यसामर्थ्यादेव न भविष्यति । कथमसामर्थ्यम् । समानाधिकरणमसमर्थवद्भवतीति । अधात्वभिहितमित्येवं तत् ॥

कर्मणि च ॥ २ । २ । १४ ॥

कथमिदं विज्ञायते । कर्मणि या षष्ठी सा न समस्यत इति । आहोस्वित्कर्मणि यः क्त इति । कुतः संदेहः । उभयं प्रकृतं‡ तत्रान्यतरच्छक्यं विशेषयितुम् । कश्चात्र विशेषः ।

* २.३.६९ † २.३.६९. ‡ २.२.८.

कर्मणीति षष्ठीनिर्देशश्चेदकर्तरि कृता समासवचनम् ॥ १ ॥

कर्मणीति षष्ठीनिर्देशश्चेदकर्तरि कृता समासो वक्तव्यः । इध्मप्रव्रश्चनः पलाशशातनः* ॥

तृजकाभ्यां चानर्थकः प्रतिषेधः ॥ २ ॥

तृजकाभ्यां चानर्थकः प्रतिषेधः । अपां स्रष्टा† । कर्मणीत्येव सिद्धम् ॥ अस्तु तर्हि कर्मणि यः क्त इति । किमुदाहरणम् । ब्राह्मणस्य भुक्तम् । वृषलस्य पीतमिति ।

क्तनिर्देशे ऽसमर्थत्वादप्रतिषेधः ॥ ३ ॥

क्तनिर्देशे ऽसमर्थत्वादप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । समासः कस्मान्न भवति । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यत ओदनः ॥

प्रतिषेध्यमिति चेत्कर्तर्यपि प्रतिषेधः ॥ ४ ॥

अथैवं सति प्रतिषेधः कर्तव्य इति दृश्यते कर्तर्यपि प्रतिषेधो वक्तव्यः स्यात् । ब्राह्मणस्य गतः । ब्राह्मणस्य यात इति ॥

पूजायां च प्रतिषेधानर्थक्यम् ॥ ५ ॥

पूजायां च प्रतिषेधो ऽनर्थकः । राज्ञां पूजितः‡ । कर्मणीत्येव सिद्धम् ॥

तस्मादुभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः ॥ ६ ॥

तस्मादुभयप्राप्तौ कर्मणि [२.३.६६] इत्येवं या षष्ठी तस्याः प्रतिषेधो वक्तव्यः । स तर्हि वक्तव्यः । न वक्तव्यः । इत्यर्थे ऽयं चः पठितः । कर्मणि च । कर्मणीत्येवं या षष्ठीति ॥

नित्यं क्रीडाजीविकयोः ॥ २ । २ । १७ ॥

किमिह नित्यग्रहणेनाभिसंबध्यते विधिराहोस्वित्प्रतिषेधः । विधिरित्याह । कुत एतत् । विधिर्हि विभाषा नित्यः प्रतिषेधः ॥

---

* ३.१.११७, ३ १ ६०. † २.३.६५ ‡ ३ २.१८८.

कुगतिप्रादयः ॥२।२।१८॥

प्रादिप्रसङ्गे कर्मप्रवचनीयप्रतिषेधः ॥ १ ॥

प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः । वृक्षं प्रति विद्योतते विद्युत् । साधुर्देवदत्तो मातरं प्रति* ॥

व्यवेतप्रतिषेधश्च ॥ २ ॥

व्यवेतानां च प्रतिषेधो वक्तव्यः । आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ॥

सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । क्वाङ्स्वतिदुर्गतयः समस्यन्त इति वक्तव्यम् । कु । कुब्राह्मणः कुवृषलः । आङ् । आकडारः आपिङ्गलः । सु । सुब्राह्मणः सुवृषलः । अति । अतिब्राह्मणः अतिवृषलः । दुर् । दुर्ब्राह्मणः । गति । प्रकारकः प्रणायकः प्रसेचकः ऊरीकृत्य ऊरीकृतम् ॥

प्रादयः क्तार्थे ॥ ४ ॥

प्रादयः क्तार्थे समस्यन्त इति वक्तव्यम् । प्रगत आचार्यः प्राचार्यः । प्रान्तेवासी प्रपितामहः ॥

एतदेव च सौनागैर्विस्तरतरकेण पठितम् ॥ स्वती पूजायाम् ॥ स्वती पूजायामिति वक्तव्यम् । सुराजा अतिराजा ॥ दुर्निन्दायाम् ॥ दुर्निन्दायामिति वक्तव्यम् । दुष्कुलम् दुर्गवः ॥ आङीषदर्थे ॥ आङीषदर्थ इति वक्तव्यम् । आकडारः आपिङ्गलः ॥ कुः पापार्थे ॥ कुः पापार्थ इति वक्तव्यम् । कुब्राह्मणः कुवृषलः ॥ प्रादयो गताद्यर्थे प्रथमया ॥ प्रादयो गताद्यर्थे प्रथमया समस्यन्त इति वक्तव्यम् । प्रगत आचार्यः प्राचार्यः । प्रान्तेवासी प्रपितामहः ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया समस्यन्त इति वक्तव्यम् । अतिक्रान्तः खट्वामतिखट्वः । अतिमालः ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया समस्यन्त इति वक्तव्यम् । अवक्रुष्टः कोकिलयावकोकिलो वसन्तः ॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या समस्यन्त इति वक्तव्यम् । परिग्लानो ऽध्ययनाय पर्यध्ययनः ॥ निरादयः क्रान्ताद्यर्थे पञ्चम्या ॥

---

* १.४.९०

निरादयः क्रान्ताद्यर्थे पञ्चम्या समस्यन्त इति वक्तव्यम् । निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । निर्वाराणसिः ॥

अव्ययं प्रवृद्धादिभिः ॥ अव्ययं प्रवृद्धादिभिः समस्यत इति वक्तव्यम् । पुनःप्रवृद्ध बर्हिर्भवति । पुनर्गवम् पुनःसुखम् ॥ इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च । वाससी इव । कन्ये इव ॥ उदात्तवता तिङा गतिमता चाव्ययं समस्यत इति वक्तव्यम् । अनुव्यचलत् अनुप्राविशत् । यत्परियन्ति[*] ॥

उपपदमतिङ् ॥ २ । २ । १९ ॥

अतिङिति किमर्थम् । कारको व्रजति । हारको व्रजति[†] ॥ अतिङिति शक्यमकर्तुम् । कस्मान्न भवति । कारको व्रजति । हारको व्रजतीति । सुप्सुपेति[‡] वर्तते ॥ अत उत्तरं पठति ।

उपपदमतिङिति तदर्थप्रतिषेधः ॥ १ ॥

उपपदमतिङिति तदर्थस्यायं प्रतिषेधो वक्तव्यः । कस्य । तिङर्थस्य । कः पुनस्तिङर्थः । क्रिया ॥

क्रियाप्रतिषेधो वा ॥ २ ॥

अथवा व्यक्तमेवेद पठितव्यमुपपदमक्रियेति ॥ अथाक्रियेति किं प्रत्युदाह्रियते । कारको गतः । हारको गतः । नैतत्क्रियावाचि । किं तर्हि । द्रव्यवाचि ॥ इद तर्हि । कारकस्य गतिः । कारकस्य व्रज्या । एतदपि द्रव्यवाचि । कथम् । कृदभिहितो भावो द्रव्यवद्भवतीति ॥ एवं तर्हि सिद्धे सति यदतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो ऽनयोर्योगयोर्निवृत्तं[§] सुप्सुपेति । किमेतस्य ज्ञापने प्रयोजनम् । गतिकारकोपपदानां कृद्भिः सह समासो भवतीत्येषा परिभाषा न कर्तव्या भवति । यद्येतज्ज्ञाप्यते केनेदानीं समासो भविष्यति । समर्थेन[¶] ॥ यद्येवं धातूपसर्गयोरपि समासः प्राप्नोति पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति । नैतदस्ति । पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि । अभिनिर्वृत्तस्य चार्थस्योपसर्गेण विशेषः शक्यो वक्तुम् ॥

---

* ८.१.३० † ३.३.१० ‡ २.१.४ § २.२.१८, १९. ¶ २.१.१.

षष्ठीसमासादुपपदसमासो विप्रतिषेधेन ॥ ३ ॥

षष्ठीसमासादुपपदसमासो भवति विप्रतिषेधेन । षष्ठीसमासस्यावकाशः । राज्ञः पुरुषो राजपुरुषः* । उपपदसमासस्यावकाशः । स्तम्बेरमः कर्णेजपः । इहोभयं प्राप्नोति । कुम्भकारः नगरकारः । उपपदसमासो भवति विप्रतिषेधेन ॥

न वा षष्ठीसमासस्याभावादुपपदसमासः ॥ ४ ॥

न वार्थो विप्रतिषेधेन । किं कारणम् । षष्ठीसमासस्याभावादुपपदसमासो भविष्यति । कथम् । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति वचनात् ॥ अथवा विभाषा षष्ठीसमासो यदा न षष्ठीसमासस्तदोपपदसमासो भविष्यति । अनेनैव यथा स्यात्तेन मा भूदिति । कश्चात्र विशेषस्तेन वा स्यादनेन वा । उपपदसमासो नित्यसमासः षष्ठीसमासः पुनर्विभाषा । ननु च नित्य यः समासः स नित्यसमासो यस्य विग्रहो नास्ति । नेत्याह । नित्याधिकारे† यः समासः स नित्यसमासः । नैवं शक्यम् । अव्ययीभावस्य ह्यनित्यसमासता प्रसज्येत । तस्मान्नित्यः समासो नित्यसमासो यस्य विग्रहो नास्ति ॥

अमैवाव्ययेन ॥ २ । २ । २० ॥

एवकारः किमर्थः । नियमार्थः । नैतदस्ति प्रयोजनम् । सिद्धे विधिरारभ्यमाणो ऽन्तरेणाप्येवकारं नियमार्थो भविष्यति ॥ इष्टतोऽवधारणार्थस्तर्हि भविष्यति । यथैव विज्ञायेत । अमैवाव्ययेनेति । मैवं विज्ञायि । अमाव्ययेनैवेति । अस्ति चेदानीं कश्चिदनव्ययमम्शब्दो यदर्थो विधिः स्यात् । अस्तीत्याह । स्वश्वाम्‡ ब्राह्मणकुलमिति । नैतदस्ति प्रयोजनम् । अन्तरङ्गत्वादत्र समासो भविष्यति ॥ इदं तर्हि प्रयोजनममैव यत्तुल्यविधानमुपपदं तत्रैव यथा स्यादमा चान्येन च यत्तुल्यविधानमुपपदं तत्र मा भूदिति§ । अग्रे भोजम् । अग्रे भुक्त्वा ॥ अमादिष्वप्रसिद्धविधेः समासप्रतिषेधं चोदयिष्यति¶ स न वक्तव्यो भवति ॥

शेषो बहुव्रीहिः ॥ २ । २ । २३ ॥

शेष इत्युच्यते कः शेषो नाम । येषां पदानामनुक्तः समासः स शेषः ।

* ११८ † १११० ‡ १२ ११, ९१, ३४. § १४ २६, ३४ ¶ १४ २४०.

शेषवचनं पदतश्चेन्नाभावात् ॥ १ ॥

शेषवचनं पदतश्चेत्तन्न । किं कारणम् । अभावात् । न हि सन्ति तानि पदानि येषां पदानामनुक्तः समासः ॥ अर्थतस्तर्हि शेषग्रहणम् । येष्वर्थेष्वनुक्तः समासः स शेषः ।

अर्थतश्चेदविशिष्टम् ॥ २ ॥

अर्थतश्चेदविशिष्टमेतद्भवति । कुतः । पदतः । न हि सन्ति ते ऽर्था येष्वनुक्तः समासः ॥ त्रिकतस्तर्हि शेषग्रहणम् । यस्य त्रिकस्यानुक्तः समासः स शेषः । कस्य चानुक्तः । प्रथमायाः ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

अनेकमन्यपदार्थे ॥ २ । २ । २४ ॥

पदग्रहणं किमर्थम् । अनेकमन्यार्थे इतीयत्युच्यमाने वाक्यार्थेऽपि बहुव्रीहिः स्यात् । यथा मे माता तथा मे पिता सुस्नातं भो इति । पदग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ अथान्यग्रहणं किमर्थम् । अनेकं पदार्थे इतीयत्युच्यमाने स्वपदार्थेऽपि बहुव्रीहिः स्यात् । राजपुरुषः तक्षपुरुष इति । नैतदस्ति प्रयोजनम् । तत्पुरुषः स्वपदार्थे बाधको भविष्यति । भवेदेकसंज्ञाधिकारे सिद्धं परंकार्यत्वे तु न सिध्यति । आरम्भसामर्थ्याच्च तत्पुरुषः परंकार्यत्वाच्च बहुव्रीहिः प्राप्नोति ॥ परंकार्यत्वे च न दोषः । शेष* इति वर्तते ऽशेषत्वान्न भविष्यति ।

शेषवचन उक्तम् ॥ १ ॥

किमुक्तम् । तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेध इति† ॥ अथैकसंज्ञाधिकारे नार्थोऽन्यग्रहणेन । एकसंज्ञाधिकारे च कर्तव्यम् । अक्रियमाणे ह्यन्यग्रहणे यथैव तत्पुरुषः स्वपदार्थे बहुव्रीहिं बाधत एवमन्यपदार्थेऽपि बाधेत ॥

अथानेकग्रहणं किमर्थम् । अन्यपदार्थे इतीयत्युच्यमान एकस्यापि पदस्य बहुव्रीहिः स्यात् । सर्पिषोऽपि स्यात् । मधुनोऽपि स्यात् । गोमूत्रस्यापि स्यात्‡ । नैतदस्ति प्रयोजनम् । सुप्सुपेति§ वर्तते ॥ इदं तर्हि प्रयोजनं बहूनामपि समासो यथा स्यात् ।

सुसूक्ष्मजटकेशेन सुनताजिनवाससा ॥

उत्तरार्थं चानेकग्रहणं कर्तव्यम् । चार्थे द्वन्द्वः [२.२.२९] अनेकमिति । इहापि यथा स्यात् । प्लक्षन्यग्रोधखदिरपलाशा इति । एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति बहूनामपि समासो भवतीति यदयमुत्तरपदे द्विगुं शास्ति¶ । तत्पुरुषोऽपि तर्हि बहूनां प्राप्नोति । महणेन तत्पुरुष उच्यते तेन बहूनां न भविष्यति ॥ अत उत्तरं पठति ।

अनेकवचनमुपसर्जनार्थम् ॥ २ ॥

अनेकग्रहणं क्रियत उपसर्जनार्थम् । प्रथमानिर्दिष्टं समास उपसर्जनम् [१.२.४३] इत्यनेकस्य सुप उपसर्जनसंज्ञा यथा स्यात् । चित्रगुः शबलगुरिति** ॥

* २.२.२३. † [illegible] ‡ [illegible] § २.१.४ ¶ २.१.५२ ** १.२.४८

न वैकविभक्तित्वात् ॥ ३ ॥

न चैतदपि प्रयोजनमस्ति । किं कारणम् । एकविभक्तित्वात् । एकविभक्ति चापूर्वनिपाते [४४] इत्युपसर्जनसंज्ञा भविष्यति । चित्रगुः शबलगुरिति । चित्रा यस्य गावश्चित्रगुस्तिष्ठति । चित्रा यस्य गावश्चित्रगुं पश्य । चित्रा यस्य गावश्चित्रगुणा कृतम् । चित्रा यस्य गावश्चित्रगवे देहि । चित्रा यस्य गावश्चित्रगोरानय । चित्रा यस्य गावश्चित्रगोः स्वम् । चित्रा यस्य गावश्चित्रगौ निधेहि । चित्रा यस्य गावो हे चित्रगो इति ॥ यदि तर्हि यतः कुतश्चिदेव किंचित्पदमध्याहृत्यैकविभक्त्या योगः क्रियत एतदप्येकविभक्तियुक्तं भवतीहापि प्राप्नोति । राजकुमारी तक्षकुमारी । राज्ञो या कुमारी राजकुमारी तिष्ठति । राज्ञो या कुमारी राजकुमारीं पश्य । राज्ञो या कुमारी राजकुमार्या कृतम् । राज्ञो या कुमारी राजकुमार्यै देहि । राज्ञो या कुमारी राजकुमार्या आनय । राज्ञो या कुमारी राजकुमार्याः स्वम् । राज्ञो या कुमारी राजकुमार्यां निधेहि । राज्ञो या कुमारी हे राजकुमारि इति ॥ एकविभक्तियुक्तमेव यन्नित्यं न चैतन्नित्यमेकविभक्तियुक्तमेव । राज्ञः कुमारीं पश्य राजकुमारीं पश्येत्यपि भवति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एकग्रहणसामर्थ्यात् । यदि हि यदेकविभक्तियुक्तं चानेकविभक्तियुक्तं च तत्र स्यादेकग्रहणमनर्थकं स्यात् । विभक्तियुक्तं चापूर्वनिपात इत्येव ब्रूयात् ॥

पदार्थाभिधाने ऽनुप्रयोगानुपपत्तिरभिहितत्वात् ॥ ४ ॥

पदार्थस्याभिधाने ऽनुप्रयोगस्यानुपपत्तिः । चित्रगुर्देवदत्त इति । किं कारणम् । अभिहितत्वात् । चित्रगुशब्देनाभिहितः सोऽर्थ इति कृत्वानुप्रयोगो न प्राप्नोति ॥

न वानभिहितत्वात् ॥ ५ ॥

न वैष दोषः । किं कारणम् । अनभिहितत्वात् । चित्रगुशब्देनानभिहितः सो ऽर्थ इति कृत्वानुप्रयोगो भविष्यति ॥ कथमनभिहितो यावतेदानीमेवोक्तं पदार्थाभिधाने ऽनुप्रयोगानुपपत्तिरभिहितत्वादिति ।

सामान्याभिधाने हि विशेषानभिधानम् ॥ ६ ॥

सामान्ये ह्यभिधीयमाने विशेषो ऽनभिहितो भवति । तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः । चित्रगुः । कः । देवदत्त इति ॥ अथेत्सिद्धं यदा सामान्ये वृत्तिर्यदा तु खलु विशेषे वृत्तिस्तदा न सिध्यति । चित्रा गावो देव-

दत्तस्य चित्रगुर्देवदत्त इति । तदापि सिद्धम् । कथम् । नेदमुभय युगपद्भवति वाक्यं च समासश्च । यदा वाक्यं न तदा समासः । यदा समासो न तदा वाक्यम् । यदा समासस्तदा सामान्ये वृत्तिः । तत्रावश्य विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः । चित्रगुः । कः । देवदत्त इति ॥ सामान्यस्यैव तर्ह्यनुप्रयोगो न प्राप्नोति । चित्रगु तत् । चित्रगु किंचित् । चित्रगु सर्वमिति । सामान्यमपि यथा विशेषस्तद्वत् । चित्रग्वित्युक्ते संदेहः स्यात्सर्वं वाविश्वं वेति । तत्रावश्यं संदेहनिवृत्त्यर्थं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः ॥

अथवा विभक्त्यर्थोऽभिधीयते । एतच्चात्र युक्तं यद्विभक्त्यर्थोऽभिधीयते तत्र हि सर्वपश्चात्पदं वर्तते ऽस्येति ।

विभक्त्यर्थाभिधाने ऽद्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः ॥ ७ ॥

विभक्त्यर्थाभिधाने ऽद्रव्यस्य लिङ्गसंख्याभ्यामुपचारोऽनुपपन्नः । बहुयवम् बहुयवा बहुयवः बहुयवौ बहुयवा इति ॥

अपर आह । विभक्त्यर्थाभिधाने द्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः । विभक्त्यर्थाभिधाने द्रव्यस्य ये लिङ्गसंख्ये ताभ्यां विभक्त्यर्थस्योपचारोऽनुपपन्नः । बहुयवम् बहुयवा बहुयवः बहुयवौ बहुयवा इति । कथं ह्यन्यस्य लिङ्गसंख्याभ्यामन्यस्योपचारः स्यात् ॥

सिद्धं तु यथा गुणवचनेषु ॥ ८ ॥

सिद्धमेतत् । कथम् । यथा गुणवचनेषु । गुणवचनेषूक्तं गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति । तद्यथा । शुक्लं वस्त्रम् शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ शुक्लाः कम्बला इति । यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति । एवमिहापि यदसौ द्रव्यं श्रितो भवति विभक्त्यर्थस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति ॥

यदि तर्हि विभक्त्यर्थो ऽभिधीयते कृत्स्नः पदार्थः कथमभिहितो भवति सद्रव्यः सलिङ्गः ससंख्यश्च । अर्थग्रहणसामर्थ्यात् । इहानेकमन्यपद इतीयता सिद्धम् । कथं पुनः पदे नाम वृत्तिः स्यात् । शब्दो ह्येव शब्दे ऽसंभवादर्थे कार्यं विज्ञास्यते । सोऽयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत्प्रयोजनं कृत्स्नः पदार्थो यथाभिधीयेत सद्रव्यः सलिङ्गः ससंख्यश्चेति ॥ यदि तर्हि कृत्स्नः पदार्थो ऽभिधीयते [illegible]ग्राः सोत्पाश्च विधयो न सिध्यन्ति ।

उक्तं वा ॥ ९ ॥

किमुक्तम् । लैङ्गेषु तावदुक्तं सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय इति[*] । सांख्येष्वप्युक्तं कर्मादीनामनुक्ता एकत्वादय इति कृत्वा सांख्या भविष्यन्ति[†] ॥ प्रथमा तर्हि न प्राप्नोति । समयाद्भविष्यति[‡] । यदि सामयिकी न नियोगतो ऽन्याः कस्मान्न भवन्ति । कर्मादीनामभावात् ॥ षष्ठी तर्हि प्राप्नोति । शेषलक्षणा[§] षष्ठ्यशेषत्वान्न भविष्यति ॥ एवमपि व्यतिकरः प्राप्नोति । एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतो द्वयोरप्येकवचनबहुवचने बहुष्वप्येकवचनद्विवचने । अर्थतो व्यवस्था भविष्यति ॥ अथवा संख्या नामेयं परप्रधाना । संख्येयमनया विशेष्यम् । यदि चात्र प्रथमा न स्यात्संख्येयमविशेषितं स्यात् ॥ अथवा वक्ष्यत्येतत्तत्र वचनग्रहणस्य प्रयोजनमुक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति[¶] ॥ एवमपि षष्ठी प्राप्नोति । किं कारणम् । व्यभिचरत्येव ह्ययं समासो लिङ्गसंख्ये षष्ठ्यर्थं पुनर्न व्यभिचरति । अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्नस्तत्र प्रातिपदिकार्थे प्रथमेति[**] प्रथमा भविष्यति ॥ न तर्हीदानीमिदं भवति चित्रगोर्देवदत्तस्येति । भवति बाह्यमर्थमपेक्ष्य षष्ठी ॥

परिगणनं कर्तव्यम् ।

बहुव्रीहिः समानाधिकरणानाम् ॥ १० ॥

समानाधिकरणानां बहुव्रीहिर्वक्तव्यः । किं प्रयोजनम् । व्यधिकरणानां मा भूदिति । पञ्चभिर्भुक्तमस्येति ॥

अव्ययानां च ॥ ११ ॥

अव्ययानां बहुव्रीहिर्वक्तव्यः । उच्चैर्मुखः नीचैर्मुखः ॥

सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च ॥ १२ ॥

सप्तमीपूर्वस्योपमानपूर्वस्य च बहुव्रीहिर्वक्तव्य उत्तरपदस्य च लोपो वक्तव्यः । कण्ठेस्थः कालोऽस्य कण्ठेकालः । उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः । खरमुखः ॥

समुदायविकारषष्ठ्याश्च ॥ १३ ॥

समुदायषष्ठ्या विकारषष्ठ्याश्च बहुव्रीहिर्वक्तव्य उत्तरपदस्य च लोपो वक्तव्यः ।

---

[*] ४१३* [†] २३१*. [‡] ३१३* [§] २३६० [¶] २३४६*. [**] २३४६

केशानां समाहारश्चूडा अस्य केशचूडः । सुवर्णस्य विकारोऽलंकारोऽस्य सुवर्णालंकारः ॥

प्रादिभ्यो धातुजस्य वा ॥ १४ ॥

प्रादिभ्यो धातुजस्य बहुव्रीहिर्वक्तव्य उत्तरपदस्य च वा लोपो वक्तव्यः । प्रपतितपर्णः प्रपर्णः । प्रपतितपलाशः प्रपलाशः ॥

नञो ऽस्त्यर्थानाम् ॥ १५ ॥

नञोऽस्त्यर्थानां बहुव्रीहिर्वक्तव्य उत्तरपदस्य च वा लोपो वक्तव्यः । अविद्यमानपुत्रः अपुत्रः । अविद्यमानभार्यः अभार्यः ॥

तत्तर्हीदं बहु वक्तव्यम् ।

न वानभिधानादसमानाधिकरणेषु संज्ञाभावः ॥ १६ ॥

न वा वक्तव्यम् । असमानाधिकरणानां बहुव्रीहिः कस्मान्न भवति । पञ्चभिर्भुक्तमस्येति । अनभिधानात् ॥ तद्यावश्यमनभिधानमाश्रयितव्यम् । क्रियमाणे ऽपि वै परिगणने यत्राभिधानं नास्ति न भवति तत्र बहुव्रीहिः । तद्यथा । पञ्च भुक्तवन्तोऽस्येति ॥

अथैतस्मिन्सत्यनभिधाने यदि वृत्तिपरिगणनं क्रियते वार्तिपरिगणनमपि कर्तव्यम् । तत्कथं कर्तव्यम् ।

अर्थनियमे मत्वर्थग्रहणम् ॥ १७ ॥

अर्थनियमे मत्वर्थग्रहणं कर्तव्यम् । मत्वर्थे यः स बहुव्रीहिरिति वक्तव्यम् । इह मा भूत् । कष्टं श्रितमनेनेति ॥

तथा चोत्तरस्य वचनार्थ. ॥ १८ ॥

एवं च कृत्वोत्तरस्य योगस्य वचनार्थ उपपन्नो भवति । केचित्तावदाहुर्यत्सूत्र इति । संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये [२.२.२५] इति । अपर आह वार्तिक इति ॥

कर्मवचनेनाप्रथमायाः ॥ १९ ॥

कर्मवचनेनाप्रथमाया बहुव्रीहिर्वक्तव्यः । ऊढो रथो ऽनेनोढरथो ऽनड्वान् । उपहृतः पशु रुद्रायोपहृतपशू रुद्रः । उद्धृत ओदनः स्थाल्या उद्धृतौदना

स्थाली ॥ यदि कर्मवचनेनेत्युच्यते कर्तृवचनेन कथम् ॥ प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः । आगता अतिथयो ग्राममागतातिथिर्ग्रामः ।

कर्तृवचनेनापि ॥ २० ॥

कर्तृवचनेनापीति वक्तव्यम् ॥ अप्रथमाया इति किमर्थम् । वृष्टे देवे गतः ॥ अथाप्रथमाया इत्युच्यमान इह कस्मान्न भवति । वृष्टे देवे गतं पश्येति । बहिरङ्गात्राप्रथमा ॥

सुबधिकारे ऽस्तिक्षीरादिवचनम् ॥ २१ ॥

सुबधिकारे ऽस्तिक्षीरादीनामुपसंख्यानं कर्तव्यम् । अस्तिक्षीरा ब्राह्मणी ॥ तत्तर्हि वक्तव्यम् ।

न वाव्ययत्वात् ॥ २२ ॥

न वा वक्तव्यम् । किं कारणम् । अव्ययत्वात् । अव्ययमेषोऽस्तिशब्दो नैषास्तेर्लट् । कथमव्ययत्वम् । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपातसंज्ञा भवन्तीति निपातसंज्ञा निपातोऽव्ययमित्यव्ययसंज्ञा* ॥

अथ किंसब्रह्मचारीति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । के सब्रह्मचारिणोऽस्येति । यद्येवं कठ इति प्रतिवचनं नोपपद्यते । न ह्यन्यत्पृष्टेनान्यदाख्येयम् ॥ एवं तर्ह्येवं विग्रहः करिष्यते केषां सब्रह्मचारी किंसब्रह्मचारीति । प्रतिवचनं चैवं हि नोपपद्यते स्वरे च दोषो भवति । किंसब्रह्मचारीत्येवं स्वरः प्रसज्येत† किंसब्रह्मचारीति चेष्यते‡ ॥ एवं तर्ह्येवं विग्रहः करिष्यते कः सब्रह्मचारी किंसब्रह्मचारीति । भवेत्प्रतिवचनमुपपन्नं स्वरे तु दोषो भवति ॥ एवं तर्ह्येवं विग्रहः करिष्यते कः सब्रह्मचारी तव किंसब्रह्मचारी त्वमिति ॥ अथवा पुनरस्त्वयमेव विग्रहः के सब्रह्मचारिणोऽस्येति । ननु चोक्तं कठ इति प्रतिवचनं नोपपद्यत इति । नैष दोषः । अमीकरवाणिन्यायेन भविष्यति । तद्यथा । कश्चित्कंचिदाह । अमी करवाणीति । कुर्विति कर्तर्यनुज्ञाते कर्माप्यनुज्ञातं भवति । अपर आह । अमी करिष्यन्त इति । क्रियतामिति कर्मण्यनुज्ञाते कर्ताप्यनुज्ञातो भवति । यथैव खल्वपि के सब्रह्मचारिणोऽस्येति कठा इत्युक्ते संबन्धादेतद्गम्यते नूनं सोऽपि कठ इत्येवं कठ इत्युक्ते संबन्धादेतद्गन्तव्यं स्यान्नूनं तेऽपि कठा इति ॥ न खल्वपि ते शक्याः समासेन प्रतिनिर्देष्टुम् । उपसर्जनं हि ते भवन्ति ॥

* १.४.५७, ग०, ११३०. † ६.१.२२२ ‡ ६.२.१.

अथार्धतृतीया इति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । अर्धं तृतीयमेषामिति । कः समासार्थः । समासार्थो नोपपद्यते ऽन्यपदार्थो हि नाम स भवति । येषां पदानां समासस्ततोऽन्यस्य पदस्यार्थोऽन्यपदार्थः ॥ एवं तर्ह्येवं विग्रहः करिष्यते ऽर्धं तृतीयमनयोरिति । एवमपि कः षष्ठ्यर्थः । षष्ठ्यर्थो नोपपद्यते । किं हि तयोरर्धं भवति ॥ अस्तु तर्ह्ययमेव विग्रहो ऽर्धं तृतीयमेषामिति । ननु चोक्तं समासार्थो नोपपद्यत इति । नैष दोषः । अवयवेन विग्रहः समुदायः समासार्थः ।-यद्यवयवेन विग्रहः, समुदायः समासार्थः

असिद्वितीयोऽनुससार पाण्डवम्
संकर्षणद्वितीयस्य बलं कृष्णस्य वर्धतामिति

द्वयोर्द्विवचनमिति* द्विवचनं प्राप्नोति ॥ अस्तु तर्ह्ययमेव विग्रहोऽर्धं तृतीयमनयोरिति । ननु चोक्त षष्ठ्यर्थो नोपपद्यत इति । नैष दोषः । इदं तावदयं प्रष्टव्यः । अथेह देवदत्तस्य भ्रातेति कः षष्ठ्यर्थ इति । तत्रैतत्स्यादेकस्मात्प्रादुर्भाव इति । एतच्च वार्त्तम् । तद्यथा । सार्थिकानामेकप्रतिश्रय उषितानां प्रातरुत्थाय प्रतिष्टमानानां न कश्चित्परस्परं संबन्धो भवति । एवंजातीयक भ्रातृत्वं नाम । अत्र चेद्युक्तः षष्ठ्यर्थो दृश्यत इहापि युक्तो दृश्यताम् ॥ इह तर्ह्यर्धतृतीया आनीयन्तामित्युक्तेऽर्धस्यानयनं न प्राप्नोति ॥ अस्तु तर्ह्ययमेव विग्रहोऽर्धं तृतीयमेषामिति । ननु चोक्तमसिद्वितीयोऽनुससार पाण्डवम् संकर्षणद्वितीयस्य बल कृष्णस्य वर्धतामिति द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोतीति । नैष दोषः । अय तीयान्तः शब्दोऽस्त्येव पूरणमस्ति सहायवाची । तद्यः सहायवाची तस्येदं ग्रहणम् । असिद्वितीय. असिसहाय इति गम्यते ॥ एवमप्यर्धतृतीया इत्येकस्मिन्नेकवचनं प्राप्नोति । एकार्था हि समुदाया भवन्ति । तद्यथा । शतम् यूथम् वनमिति ॥ अस्तु तर्ह्ययमेव विग्रहोऽर्धं तृतीयमनयोरिति । ननु चोक्तमर्धतृतीया आनीयन्तामित्युक्ते ऽर्धस्यानयनं न प्राप्नोतीति । नैष दोषः । भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा । शुक्लवाससमानय लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति ॥ अथवा पुनरस्त्वयमेव विग्रहोऽर्धं तृतीयमेषामिति । ननु चोक्तमेकवचनं प्राप्नोतीति । नैष दोषः । संख्या नामेयं परप्रधाना । संख्येयमनया विशेष्यम् । यदि चानेकवचनं स्यात्संख्येयमविशेषितं स्यात् ॥ इह तर्ह्यर्धतृतीया द्रोणा इत्ययं द्रोणशब्दः समुदाये प्रवृत्तो ऽवयवे नोपपद्यते । नैष दोषः । समुदायेष्वपि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते । तद्यथा । पूर्वे पञ्चालाः ।

*१.४.२१

उत्तरे पञ्चालाः । तैलं भुक्तम् । शुक्लः नीलः कृष्ण इति । एवमयं समुदाये द्रोणशब्दः प्रवृत्तो ऽवयवेष्वपि वर्तते । कामं तर्ह्यनेनैव हेतुना यदा द्वौ द्रोणावर्धाढकं च कर्तव्यमर्धतृतीया द्रोणा इति । न कर्तव्यम् । समुदायेष्वपि हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते । केष्ववयवेषु । योऽवयवस्तं समुदायं न व्यभिचरति । क च समुदायं न व्यभिचरति । अर्धद्रोणो द्रोणम् । अर्धाढकं पुनर्व्यभिचरति ॥

संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये ॥ २।२।२५॥

द्वित्राः त्रिचतुरा इति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । द्वौ वा त्रयो वेति । भवेद्यदा बहूनामानयनं तदा बहुवचनमुपपन्नं यदा तु खलु द्वावानीयेते तदा न सिध्यति । तदापि सिद्धम् । कथम् । केचित्तावदाहुः । अनिर्ज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यमिति । तद्यथा । कति भवतः पुत्राः । कति भवतो भार्या इति । अपर आह । द्वौ वेत्युक्ते त्रयो वेति गम्यते । त्रयो वेत्युक्ते द्वौ वेति गम्यते । सैषा पञ्चाधिष्ठाना वाक्तत्र युक्तं बहुवचनम् ॥

अथ द्विदशाः त्रिदशा इति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । *द्विर्दश द्विदशा इति ।*

संख्यासमासे सुजन्तत्वात्संख्याप्रसिद्धिः ॥ १ ॥

संख्यासमासे सुजन्तत्वात्संख्येत्यप्रसिद्धिः* । न हि सुजन्ता संख्यास्ति ॥ एवं तर्ह्येवं विग्रहः करिष्यते द्वौ दशतौ द्विदशा इति । एवमप्यत्कारान्तत्वात्संख्ययेत्यप्रसिद्धिः† । न ह्यत्कारान्ता संख्यास्ति ॥ अस्तु तर्ह्ययमेव विग्रहो द्विर्दश द्विदशा इति । ननु चोक्तं *संख्यासमासे सुजन्तत्वात्संख्येत्यप्रसिद्धिरिति ।*

न वासुजन्तत्वात् ॥ २ ॥

न वैष दोषः । किं कारणम् । असुजन्तत्वात् । सुजन्तेत्युच्यते न चात्र सुजन्तं पश्यामः ॥ किं पुनः कारण वाक्ये सुज्दृश्यते समासे तु न दृश्यते ।

सुजभावो ऽभिहितार्थत्वात्समासे ॥ ३ ॥

समासे सुचो ऽभावः । किं कारणम् । अभिहितार्थत्वात् । अभिहितः सुजर्थः

---

* ५ ४ १८ † ५ ४ ६०.

समासेनेति कृत्वा समासे सुज्न भविष्यति । किं च भोः सुजर्थ इति समास उच्यते । न खलु सुजर्थ इत्युच्यते गम्यते तु सुजर्थः । कथम् । यावता संख्येयो यः संख्यया संख्यायते स च क्रियाभ्यावृत्त्यर्थः । स चोक्तः समासेनेति कृत्वा समासे सुज्न भविष्यति ॥

अशिष्यः संख्योत्तरपदः संख्येयवाभिधायित्वात् ॥ ४ ॥

अशिष्यः संख्योत्तरपदो बहुव्रीहिः । किं कारणम् । संख्येयवाभिधायित्वात् । संख्येयं वार्थश्चाभिधीयते तत्रान्यपदार्थे* इत्येव सिद्धम् ॥ भवेत्सिद्धमधिकविंशाः अधिकत्रिंशा इति यत्रैतद्विचार्यते विंशत्यादयो दशदर्थे वा स्युः परिमाणिनि वेति । इदं तु न सिध्यति अधिकदशा इति यत्र नियोगतः संख्या संख्येय एव वर्तते ॥ अथोपदशा इति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । दशानां समीप उपदशा इति । कस्य पुनः सामीप्यमर्थः । उपस्य । यद्येवं नान्यपदार्थो भवति ॥ तत्र प्रथमानिर्दिष्टं संख्याग्रहणं शक्यमकर्तुम् ॥

मत्वर्थे वा पूर्वस्य विधानात् ॥ ५ ॥

अथवा मत्वर्थे पूर्वो योगो† ऽमत्वर्थो ऽयमारम्भः ॥

कब्भावार्थं वा ॥ ६ ॥

अथवा कब्मा भूदिति‡ ॥

दिङ्नामान्यन्तराले ॥ २ । २ । २६ ॥

तेन सहेति तुल्ययोगे ॥ २ । २ । २८ ॥

दिक्समाससहयोगयोश्चान्तरालप्रधानाभिधानात् ॥ १ ॥

दिक्समाससहयोगयोश्चाशिष्यो बहुव्रीहिः । किं कारणम् । अन्तरालप्रधानाभिधानात् । दिक्समासे सहयोगे चान्तरालं प्रधानं चाभिधीयते तत्रान्यपदार्थे* इत्येव सिद्धम् ॥ यद्येवं दक्षिणपूर्वा दिक् समानाधिकरणलक्षणः पुंवद्भावो§ न प्राप्नोति । अथ पुनरियं सैव दक्षिणा सेयं पूर्वेति कृत्वा समानाधिकरणलक्षणः पुंवद्भावः

---

* २२.२४ † २२.२४*. ‡ ५.४.१५४. § ६.३.३४.

सिद्धो भवति ॥ न सिध्यति । भावितपुंस्कस्य पुवद्भावो न चैतौ भावितपुंस्कौ । ननु च भो दक्षिणशब्दः पूर्वशब्दश्च पुंसि भाष्येते । समानायामाकृतौ यद्भावितपुंस्कमाकृत्यन्तरे चैतौ भावितपुंस्कौ । दक्षिणा पूर्वेति दिक्शब्दौ दक्षिणः पूर्व इति व्यवस्थाशब्दौ । यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युः । कथं यानि दिगुपदिष्टानि कार्याणि । यदा दिशो व्यवस्थां वक्ष्यन्ति । यदि तर्हि यो यो दिशि वर्तते स स दिक्शब्दो रमणीयादिष्वतिप्रसङ्गो भवति । रमणीया दिक् शोभना दिगिति ॥ अथ मतमेतद्दिशि दृष्टो दिग्दृष्टः दिग्दृष्टः शब्दो दिक्शब्दः दिशं यो न व्यभिचरतीति रमणीयादिष्वतिप्रसङ्गो न भवति पुवद्भावस्तु न प्राप्नोति ॥ एवं तर्हि सर्वनाम्नो वृत्तिमात्रे पुवद्भावो वक्तव्यो दक्षिणोत्तरपूर्वाणामित्येवमर्थम् । एवं च कृत्वास्तु दिक्समाससहयोगयोश्चान्तरालप्रधानाभिधानादित्येव । ननु चोक्तं दक्षिणपूर्वा दिक् समानाधिकरणलक्षणः पुवद्भावो न प्राप्नोतीति । नैष दोषः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेन परिहृतम् ॥

मत्वर्थे वा पूर्वस्य विधानात् ॥ २ ॥

अथवा मत्वर्थे पूर्वो योगो[*] ऽमत्वर्थो ऽयमारम्भः ॥

कप्भावार्थं वा ॥ ३ ॥

अथवा कप्मा भूदिति[†] ॥

तत्र तेनेदमिति सरूपे ॥ २ । २ । २७ ॥

तृतीयासप्तम्यन्तेषु च क्रियाभिधानात् ॥ १ ॥

तृतीयासप्तम्यन्तेषु चाशिष्यो बहुव्रीहिः । किं कारणम् । क्रियाभिधानात् ॥ क्रियाभिधीयते तत्रान्यपदार्थे[‡] इत्येव सिद्धम् ॥

न वैकशेषप्रतिषेधार्थम् ॥ २ ॥

न वाशिष्यः । किं कारणम् । एकशेषप्रतिषेधार्थमिदं वक्तव्यम् ॥

पूर्वदीर्घार्थं च ॥ ३ ॥

पूर्वदीर्घार्थं चेदं वक्तव्यम् । केशाकेशि ॥ स्यादेतत्प्रयोजनं यदि नियोगतो

२२२४. †५४१५४ ‡२२२४.

ऽस्यानेनैव दीर्घत्वं स्यात् । अथेदानीमन्येषामपि दृश्यते [६.३.१३७] इति दीर्घत्वं न प्रयोजनं भवति ॥

मत्वर्थे वा पूर्वस्य विधानात् ॥ ४ ॥

अथवा मत्वर्थे पूर्वो योगो* ऽमत्वर्थो ऽयमारम्भः ॥

कप्भावार्थं वा ॥ ५ ॥

अथवा कप्मा भूदिति† ॥

चार्थे द्वन्द्वः ॥ २ । २ । २९ ॥

चार्थ इत्युच्यते चश्चाव्ययं‡ तेन समासस्याव्ययसंज्ञा प्राप्नोति । नैष दोषः । पाठेनाव्ययसंज्ञा क्रियते न च समासस्तत्र पठ्यते ॥ पाठेनाप्यव्ययसंज्ञायां सत्यामभिधेयवल्लिङ्गवचनानि भवन्ति यश्चेहार्थोऽभिधीयते न तस्य लिङ्गसंख्याभ्यां योगोऽस्ति ॥ नेदं वाचनिकमलिङ्गतासंख्यता वा । किं तर्हि । स्वाभाविकमेतत् । तद्यथा । समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते ऽपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुं कश्चिद्वानर्थक इति सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम् । यत्प्राक्समासाच्चार्थस्य लिङ्गसंख्याभ्यां योगो नास्ति समासे च भवति स्वाभाविकमेतत् ॥ अथवाश्रयतो लिङ्गवचनानि भविष्यन्ति । गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । तद्यथा । शुक्लं वस्त्रम् शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ शुक्लाः कम्बला इति । यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति । एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति ॥

अथेह कस्मान्न भवति । याज्ञिकश्चायं वैयाकरणश्च । कठश्चायं बह्वृचश्च । औक्थिकश्चायं मीमांसकश्चेति । शेष§ इति वर्तते ऽशेषत्वान्न भविष्यति¶ ॥ यदि शेष इति वर्तते

उपास्तातं स्थूलसिक्तं तूष्णींगङ्गं महाह्रदम् ।
द्रोणं चेदद्राक्षो गन्तुं मा त्वा तासां कृताकृते ॥

इत्येतन्न सिध्यति** । नैष दोषः । अन्यद्धि कृतमन्यदकृतम् ॥

* २.२.२४*. † ५.४.१५४. ‡ १.४.५७, १.१.३७. § २.२.२३. ¶ २.१.५७. ** २.१.६०.

चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसंप्रत्ययादनिष्टप्रसङ्गः ॥ १ ॥

चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसंप्रत्ययादनिष्टं प्राप्नोति ।

अहरहर्नयमानो गामश्वं पुरुषं पशुम् ।
वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥

इन्द्रस्त्वष्टा वरुणो वायुरादित्य इति ॥

सिद्धं तु युगपदधिकरणवचने द्वन्द्ववचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । युगपदधिकरणवचने द्वन्द्वो भवतीति वक्तव्यम् ॥

तत्र पुंवद्भावप्रतिषेधः ॥ ३ ॥

तत्रैतस्मिँल्लक्षणे पुंवद्भावस्य प्रतिषेधो वक्तव्यः । पट्वीमृद्व्यौ । समानाधिकरणलक्षणः पुंवद्भावः प्राप्नोति* ॥

विप्रतिषिद्धेषु चानुपपत्तिः ॥ ४ ॥

विप्रतिषिद्धेषु युगपदधिकरणवचनताया अनुपपत्तिः । शीतोष्णे सुखदुःखे जननमरणे । किं कारणम् । सुखप्रतिघातेन हि दुःखं दुःखप्रतिघातेन च सुखम् ॥

यत्तावदुच्यते तत्र पुंवद्भावप्रतिषेध इति । इष्टं तावदयं प्रष्टव्यः । अथेह कस्मान्न भवति । दर्शनीयाया माता दर्शनीयामातेति । अथ मतमेतत्प्राक्समासाद्यत्र सामानाधिकरण्यं तत्र पुंवद्भावो भवतीतीहापि न दोषो भवति ॥ यदप्युच्यते विप्रतिषिद्धेषु चानुपपत्तिरिति । सर्व एव हि शब्दा विप्रतिषिद्धाः । इहापि प्लक्षन्यग्रोधाविति प्लक्षशब्दः प्रयुज्यमानः प्लक्षार्थं संप्रत्याययति न्यग्रोधार्थं निवर्तयति न्यग्रोधशब्दः प्रयुज्यमानो न्यग्रोधार्थं संप्रत्याययति प्लक्षार्थं निवर्तयति । अत्र चेद्युक्ता युगपदधिकरणवचनता दृश्यत इहापि युक्ता दृश्यताम् ॥

एवमपि शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानम् । शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानं प्राप्नोति । अतः किम् । युगपदधिकरणवचनताया अनुपपत्तिः । प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति । यथैव हि शब्दानां पौर्वापर्यं तद्वदर्थानामपि भवितव्यम् ।

शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानमिति चेद्द्विवचनबहुवचनानुपपत्तिः ॥ ५ ॥

शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानमिति चेद्द्विवचनबहुवचनयोरनुपपत्तिः ।

---

* ६।३।३४

प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति । प्लक्षशब्दः सार्थको निवृत्तो न्यग्रोधशब्द उपस्थित एकार्थस्तस्यैकार्थत्वादेकवचनमेव प्राप्नोति ॥

विग्रहे च युगपद्वचनं ज्ञापकं युगपद्वचनस्य ॥ ६ ॥

विग्रहे खल्वपि युगपद्वचनता दृश्यते । द्यावा ह क्षामा । द्यावा चिदस्मै पृथिवी नमेते इति । किमेतत् । युगपदधिकरणवचनताया उपोद्बलकम् । विग्रहे किल नाम युगपदधिकरणवचनता स्यात्किं पुनः समासे ॥

समुदायात्सिद्धम् । समुदायात्सिद्धमेतत् । किमेतत्समुदायात्सिद्धमिति । द्विवचनबहुवचनप्रसिद्धिरिति चोदितं तस्यायं परिहारः ।

समुदायात्सिद्धमिति चेन्नैकार्थत्वात्समुदायस्य ॥ ७ ॥

समुदायात्सिद्धमिति चेत्तन्न । किं कारणम् । एकार्थत्वात्समुदायस्य । एकार्था हि समुदाया भवन्ति । तद्यथा । शतम् यूथम् वनमिति ॥ नैकार्थ्यम् । नायमेकार्थः । किं तर्हि । द्व्यर्थो बह्वर्थश्च । प्लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थः । यदि तर्हि प्लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थस्तयोरनेकार्थत्वाद्बहुवचनप्रसङ्गः । तयोरनेकार्थत्वाद्बहुषु बहुवचनम् [१.४.२१] इति बहुवचनं प्राप्नोति ।

तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेन्न बहुत्वाभावात् ॥ ८ ॥

तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेत्तन्न । किं कारणम् । बहुत्वाभावात् । नात्र बहुत्वमस्ति । किमुच्यते बहुत्वाभावादिति यावतेदानीमेवोक्तं प्लक्षोऽपि द्व्यर्थो न्यग्रोधोऽपि द्व्यर्थ इति । याभ्यामेवार्थाभ्यामेको द्व्यर्थस्ताभ्यामेवापरोऽपि ॥ यद्येवमन्यवाचकेनान्यस्य वचनानुपपत्तिः । अन्यवाचकेन शब्देनान्यस्य वचनं नोपपद्यते ।

अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेत्प्लक्षस्य न्यग्रोधत्वान्न्यग्रोधस्य प्लक्षत्वात्स्वशब्देनाभिधानम् ॥ ९ ॥

अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेदेवमुच्यते तन्न । किं कारणम् । प्लक्षस्य न्यग्रोधत्वान्न्यग्रोधस्य प्लक्षत्वात्स्वशब्देनाभिधानं भविष्यति । प्लक्षोऽपि न्यग्रोधो न्यग्रोधोऽपि प्लक्षः ॥ कथं पुनः प्लक्षोऽपि न्यग्रोधो न्यग्रोधोऽपि प्लक्षः स्याद्यावता कारणाद्द्रव्ये शब्दनिवेशः ।

कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात्सिद्धम् ॥ १० ॥

कारणाद्द्रव्ये शब्दनिवेश इति चेदेवमुच्यते तन्न । तुल्यकारणत्वात्सिद्धम् । तुल्यं

हि कारणम् । यदि तावत्प्लक्षरतीति प्लक्षः स्यान्न्यग्रोधेऽप्येतद्भवति । तथा यदि न्यग्रोहतीति न्यग्रोधः प्लक्षेऽप्येतद्भवति ॥ दर्शनं वै हेतुर्न च न्यग्रोधे प्लक्षशब्दो दृश्यते ।

दर्शनं हेतुरिति चेत्तुल्यम् ॥ ११ ॥

दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति । प्लक्षेऽपि न्यग्रोधशब्दो दृश्यतां तुल्यं हि कारणम् ॥ न वै लोक एष संप्रत्ययो भवति । न हि प्लक्ष आनीयतामित्युक्ते न्यग्रोध आनीयते ।

तद्विषयं च ॥ १२ ॥

तद्विषयं चैतद्द्रष्टव्यं प्लक्षस्य न्यग्रोधत्वम् । किंविषयम् । द्वन्द्वविषयम् ॥ युक्तं पुनर्यन्नियतविषया नाम शब्दाः स्युः । बाढं युक्तम् ।

अन्यत्रापि तद्विषयदर्शनात् ॥ १३ ॥

अन्यत्रापि हि नियतविषयाः शब्दा दृश्यन्ते । तद्यथा । समाने रक्ते वर्णे गौर्लोहित इति भवत्यश्वः शोण इति । समाने च काले वर्णे गौः कृष्ण इति भवत्यश्वो हेम इति । समाने च शुक्ले वर्णे गौः श्वेत इति भवत्यश्वः कर्क इति ॥ यदि तर्हि प्लक्षोऽपि न्यग्रोधो न्यग्रोधोऽपि प्लक्ष एकेनोक्तत्वादपरस्य प्रयोगो ऽनुपपन्नः । एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्रयोगो नोपपद्यते । प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ।

एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ॥ १४ ॥

एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेत्तन्न । किं कारणम् । अनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः । अनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते । कथमनुक्तो यावतेदानीमेवोक्तं प्लक्षोऽपि न्यग्रोधो न्यग्रोधोऽपि प्लक्ष इति । सहभूतावेतावन्योऽन्यस्यार्थमाहतुर्न पृथग्भूतौ । किं पुनः कारणं सहभूतावेतावन्योऽन्यस्यार्थमाहतुर्न पुनः पृथग्भूतौ ।

अभिधानं पुनः स्वाभाविकम् ॥ १५ ॥

स्वाभाविकमभिधानम् ॥ अथवेह कौचित्प्राथमकल्पिकौ प्लक्षन्यग्रोधौ कौचित्क्रियया वा गुणेन वा प्लक्ष इवायं प्लक्षो न्यग्रोध इवायं न्यग्रोध इति । तत्र प्लक्षावि-

त्युक्ते संदेहः स्यात्किमिमौ प्लक्षावेवाहोस्वित्प्लक्षन्यग्रोधाविति । तत्रासंदेहार्थं न्यग्रोधशब्दः प्रयुज्यते ॥

इयं युगपदधिकरणवचनता नाम दुःखा च दुरुपपादा च । यत्राप्यस्या निबन्धनमुक्तं द्यावा ह क्षामेति तदपि च्छान्दसं तत्र सुपां सुपो भवन्तीत्येव सिद्धम् । सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं चार्थे द्वन्द्ववचने ऽसमासेऽपि चार्थसंप्रत्ययादनिष्टप्रसङ्ग इति । नैष दोषः । इह चे द्वन्द्व इतीयता सिद्धम् । कथं पुनश्चे नाम वृत्तिः स्यात् । शब्दो ह्येष शब्दे ऽसंभवादर्थे कार्यं विज्ञास्यते । सोऽयमेवं सिद्धे सति यदर्थग्रहणं करोति तस्यैतत्प्रयोजनमेवं यथा विज्ञायेत नेन कृतो ऽर्थश्चार्थ इति । कः पुनश्चेन कृतोऽर्थः । समुच्चयो ऽन्वाचय इतरेतरयोगः समाहार इति । समुच्चयः । प्लक्षश्चेत्युक्ते गम्यत एतन्न्यग्रोधश्चेति । अन्वाचयः । प्लक्षश्चेत्युक्ते गम्यत एतत्सापेक्षोऽयं प्रयुज्यत इति । इतरेतरयोगः । प्लक्षश्च न्यग्रोधश्चेत्युक्ते गम्यत एतत्प्लक्षोऽपि न्यग्रोधसहायो न्यग्रोधो ऽपि प्लक्षसहाय इति । समाहारेऽपि क्रियते प्लक्षन्यग्रोधमिति । तत्रायमप्यर्थो द्वन्द्वैकवद्भावो न पठितव्यो भवति । समाहारस्यैकत्वादेव सिद्धम् ॥

एकादश द्वादशेति कोऽयं समासः । एकादीनां दशादिभिर्द्वन्द्वः । एकादीनां दशादिभिर्द्वन्द्वः समासः ।

एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनप्रसङ्गः ॥ १६ ॥

एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनं प्राप्नोति । एकविंशतिः द्वाविंशतिः ॥

सिद्धं त्वधिकान्ता संख्या संख्यया समानाधिकरणाधिकारे ऽधिकलोपश्च ॥ १७ ॥

सिद्धमेतत् । कथम् । समानाधिकरणाधिकारे* वक्तव्यमधिकान्ता संख्या संख्यया सह समस्यते ऽधिकशब्दस्य च लोपो भवतीति । एकाधिका विंशतिरेकविंशतिः । व्यधिका विंशतिर्द्वाविंशतिः ॥ यदि समानाधिकरणः स्वरो न सिध्यति । यदि तत्संख्या पूर्वपदं प्रकृतिस्वरं भवतीति† द्वन्द्व इत्येव तत् । किं पुनः कारणं द्वन्द्व इत्येव तत् । इह मा भूत् । शतसहस्रमिति ॥ अस्तु तर्हि द्वन्द्वः । ननु चोक्तमे-

* २ १. ४९ † ६ २ ३५

कादीनां दशादिभिर्द्वन्द्व इति नैर्विंशत्यादिषु वचनप्रसङ्ग इति । नैष दोषः । सर्वो द्वन्द्वो विभाषैकवद्भवति । यदा तदैकवचनं तदा नपुंसकलिङ्गं प्राप्नोति । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य ||

उपसर्जनं पूर्वम् || २ । २ । ३० ||

किमर्थमिदमुच्यते ।

उपसर्जनस्य पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् || १ ||

उपसर्जनस्य पूर्ववचनं क्रियते परप्रयोगो मा भूदिति ||

न वानिष्टादर्शनात् || २ ||

न वैतत्प्रयोजनमस्ति । किं कारणम् । अनिष्टादर्शनात् । न हि किंचिदनिष्टं दृश्यते । न हि कश्चिद्राजपुरुष इति प्रयोक्तव्ये पुरुषराज इति प्रयुङ्क्ते । यदि चानिष्टं दृश्येत ततो यत्नार्हं स्यात् ||

अथ यत्र द्वे षष्ठ्यन्ते भवतः कस्मात्तत्र प्रधानस्य पूर्वनिपातो न भवति । राज्ञः पुरुषस्य राजपुरुषस्येति* ।

षष्ठ्यन्तयोः समासे ऽर्थाभेदात्प्रधानस्यापूर्वनिपातः || ३ ||

षष्ठ्यन्तयोः समासे ऽर्थाभेदात्प्रधानस्य पूर्वनिपातो न भविष्यति । एवं न चेदमकृतं भवत्युपसर्जनं पूर्वमित्यर्थश्चाभिन्न इति कृत्वा प्रधानस्य पूर्वनिपातो न भविष्यति ||

अल्पाच्तरम् || २ । २ । ३४ ||

किमयं तन्त्रं तरनिर्देश आहोस्विदतन्त्रम् । किं चातः । यदि तन्त्रं द्वयोर्नियमो बहुष्वनियमः । तत्र को दोषः । शङ्खदुन्दुभिवीणानामिति न सिध्यति । दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोति । अथातन्त्रं

मृदङ्गशङ्खतूणवाः पृथङ्नदन्ति संसदि

---

* १२८.

प्रासादे धनपतिरामकेशवानामित्येतन्न सिध्यति । यथेच्छसि तथास्तु ॥ अस्तु तावत्तन्त्रम् । ननु चोक्तं द्वयोर्नियमो बहुष्वनियम इति तत्र शङ्खदुन्दुभिवीणानामिति न सिध्यति दुन्दुभिशब्दस्यापि पूर्वनिपातः प्राप्नोतीति । नैष दोषः । यदेतदल्पाच्तरमिति तदल्पाजिति वक्ष्यामि ॥ अथवा पुनरस्त्वतन्त्रम् । ननु चोक्तं मृदङ्गशङ्खतूणवाः पृथङ्नदन्ति संसदि प्रासादे धनपतिरामकेशवानामित्येतन्न सिध्यतीति ।

अतन्त्रे तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन समासः ॥ १ ॥

अतन्त्रे तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन समासः करिष्यते । शङ्खश्च तूणवश्च शङ्खतूणवौ । मृदङ्गश्च शङ्खतूणवौ च मृदङ्गशङ्खतूणवाः । रामश्च केशवश्च रामकेशवौ । धनपतिश्च रामकेशवौ च धनपतिरामकेशवास्तेषां धनपतिरामकेशवानामिति ॥

अथ यत्र बहूनां पूर्वनिपातप्रसङ्गः किं तत्रैकस्य नियमो भवत्याहोस्विदविशेषेण ।

अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु ॥ २ ॥

अनेकप्राप्तावेकस्य नियमो भवति शेषेष्वनियमः । पटुमृदुशुक्लाः पटुशुक्लमृदव इति* ॥

ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम् ॥ ३ ॥

ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्य । शिशिरवसन्तावुदगयनस्थौ । कृत्तिकारोहिण्य ॥

अभ्यर्हितम् ॥ ४ ॥

अभ्यर्हितं पूर्वं निपततीति वक्तव्यम् । मातापितरौ श्रद्धामेधे ॥

लघ्वक्षरम् ॥ ५ ॥

लघ्वक्षरं पूर्वं निपततीति वक्तव्यम् । कुशकाशम् शरशीर्यम् ॥

अपर आह । सर्वत एवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम् । लघ्वक्षरादपीति । श्रद्धातपसी । दीक्षातपसी ॥

वर्णानामानुपूर्व्येण ॥ ६ ॥

वर्णानां चानुपूर्व्येण पूर्वनिपातो भवतीति वक्तव्यम् । ब्राह्मणक्षत्रियविट्शूद्राः ॥

* १११२

भ्रातुश्च ज्यायसः ॥ ७ ॥

भ्रातुश्च ज्यायसः पूर्वनिपातो भवतीति वक्तव्यम् । युधिष्ठिरार्जुनौ ॥

संख्याया अल्पीयसः ॥ ८ ॥

सख्याया अल्पीयसः पूर्वनिपातो वक्तव्यः । एकादश द्वादश ॥

धर्मादिपूभयम् ॥ ९ ॥

धर्मादिपूभय पूर्वं निपततीति वक्तव्यम् । धर्मार्थौ अर्थधर्मौ । कामार्थौ अर्थकामौ । गुणवृद्धी वृद्धिगुणौ । आद्यन्तौ अन्तादी ॥

सप्तमीविशेषणे बहुव्रीहौ ॥ २ । २ । ३५ ॥

बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम् ॥ १ ॥

बहुव्रीहौ सर्वनामसख्ययोरुपसंख्यानं कर्तव्यम् । विश्वदेवः विश्वयशाः । द्विपुत्रः द्विभार्यः ॥ अथ यत्र सख्यासर्वनाम्नोरेव बहुव्रीहिः कस्य तत्र पूर्वनिपातेन भवितव्यम् । परत्वात्सख्यायाः । द्व्यन्याय त्र्यन्याय ॥

वा प्रियस्य ॥ २ ॥

वा प्रियस्य पूर्वनिपातो वक्तव्यः । प्रियगुडः गुडप्रियः ॥

सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम् ॥ ३ ॥

सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परा सप्तमी भवतीति वक्तव्यम् । गडुकण्ठः गडुशिराः ॥

निष्ठा ॥ २ । २ । ३६ ॥

निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम् ॥ १ ॥

निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परा निष्ठा भवतीति वक्तव्यम् । शार्ङ्गजग्धी पलाण्डुभक्षिती । मासजाता सवत्सरजाता । सुखजाता दुःखजाता ॥

न वोत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । उत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य । यदयं जातिकालसुखादिभ्यः परस्या निष्ठाया उत्तरपदस्यान्तोदात्तत्वं शास्ति* तज्ज्ञापयत्याचार्यः परात्र निष्ठा भवतीति ॥

प्रतिषेधे तु पूर्वनिपातप्रसङ्गस्तस्माद्राजदन्तादिषु पाठः ॥ ३ ॥

प्रतिषेधे तु पूर्वनिपातः प्राप्नोति । अकृतमितप्रतिपन्ना इति । तस्माद्राजदन्तादिषु† पाठः कर्तव्यः ॥ न कर्तव्यः । अत्रापि प्रतिषेधवचनं ज्ञापकं परा निष्ठा भवतीति ॥

प्रहरणार्थेभ्यश्च ॥ ४ ॥

प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम् । अस्युद्यतः मुसलोद्यतः । असिपाणिः दण्डपाणिः ॥

द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन ॥ ५ ॥

द्वन्द्वे घि [२.२.३२] इत्यस्मादजाद्यदन्तम् [३३] इत्येतद्भवति विप्रतिषेधेन । द्वन्द्वे घीत्यस्यावकाशः । पटुगुप्तौ । अजाद्यदन्तमित्यस्यावकाशः । उष्ट्रखरौ । इहोभयं प्राप्नोति । इन्द्राग्नी । अजाद्यदन्तमित्येतद्भवति विप्रतिषेधेन ॥

उभाभ्यामल्पाच्तरम् ॥ ६ ॥

उभाभ्यामल्पाच्तरम् [३४] इत्येतद्भवति विप्रतिषेधेन ॥ द्वन्द्वे घीत्यस्यावकाशः । पटुगुप्तौ । अल्पाच्तरमित्यस्यावकाशः । वाग्दृषदौ । इहोभयं प्राप्नोति । वागग्नी । अल्पाच्तरमित्येतद्भवति विप्रतिषेधेन ॥ अजाद्यदन्तमित्यस्यावकाशः । उष्ट्रखरौ । अल्पाच्तरमित्यस्यावकाशः । स एव । इहोभयं प्राप्नोति । वागिन्द्रौ । अल्पाच्तरमित्येतद्भवति विप्रतिषेधेन ॥

कडाराः कर्मधारये ॥ २ । २ । ३८ ॥

कडारादय इति वक्तव्यम् । इहापि यथा स्यात् । गडुलशाण्डिल्यः शाण्डिल्यगडुलः । खण्डवात्स्यः वात्स्यखण्डः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । बहुवचननिर्देशात्कडारादय इति विज्ञास्यते ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥

---

* ६.२.१७०. † २.२.३१.

अनभिहिते ॥ २ । ३ । १ ॥

अनभिहित इत्युच्यते किमिदमनभिहितं नाम । उक्तं निर्दिष्टमभिहितमित्यनर्थान्तरम् । यावद्ब्रूयादनुक्तेऽनिर्दिष्ट इति तावदनभिहित इति ॥

अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते ॥ १ ॥

अनभिहितवचनमनर्थकम् । किं कारणम् । अन्यत्रापि विहितस्याभावादभिहिते । अन्यत्राप्यभिहिते विहितं न भवति ॥ क्वान्यत्र । चित्रगुः शबलगुः । बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवति ॥ गर्गाः वत्साः । विदाः उर्वाः* । यञञ्भ्यामुक्तत्वादपत्यार्थस्य न्याय्योत्पत्तिर्न भवति† ॥ सप्तपर्णः अष्टापदमिति । समासेनोक्तत्वाद्वीप्साया द्विर्वचनं‡ न भवति ॥ यत्तावदुच्यते चित्रगुः शबलगुः बहुव्रीहिणोक्तत्वान्मत्वर्थस्य मत्वर्थीयो न भवतीति । अस्तिना सामानाधिकरण्ये मतुब्विधीयते§ न चात्रास्तिना सामानाधिकरण्यम् ॥ यदप्युच्यते गर्गाः वत्सा विदाः उर्वाः यञञ्भ्यामुक्तत्वादपत्यार्थस्य न्याय्योत्पत्तिर्न भवतीति । समर्थानां प्रथमाद्वा [४.१.८२] इति वर्तते न चैतत्समर्थानां प्रथमम् । किं तर्हि । द्वितीयमर्थमुपसंक्रान्तम् ॥ यदप्युच्यते सप्तपर्णः अष्टापदमिति समासेनोक्तत्वाद्वीप्साया द्विर्वचनं न भवतीति । यदत्र वीप्सायुक्तं नादः प्रयुज्यते । किं पुनस्तत् ॥ पर्वणि पर्वणि सप्त पर्णान्यस्य । पङ्क्तौ पङ्क्तावष्टौ पदानीति ॥ शम्बहुजकक्षु तर्हि । शप् । भिनत्ति छिनत्ति । श्नमोक्तत्वात्कर्तृत्वस्य कर्तरि शप्न भवति¶ । बहुच् । बहुकृतम् बहुभिन्नमिति । बहुचोक्तत्वादीषदसमाप्तेः कल्पबादयो न भवन्ति** । अकच् । उच्चकैः नीचकैरिति । अकचोक्तत्वात्कुत्सादीनां कादयो न भवन्ति†† ॥ ननु च शम्बहुजकचोऽपवादास्ते ऽपवादत्वाद्बाधका भविष्यन्ति ।

शम्बहुजकक्षु नानादेशत्वादुत्सर्गाप्रतिषेधः ॥ २ ॥

समानदेशैरपवादैरुत्सर्गाणां बाधनं भवति नानादेशत्वान्न प्राप्नोति ॥ किं पुन-

---

* ४ १ १०५, १०४, २ ४ ६४ † ४ १.८२, ९९ ‡ ८ १ ४ § ५ २.९४
¶ ३ १ ७८, ६८. ** ५ ३ ६८, ६७ †† ५ ३.७१, ७०

रिहाकर्तव्यो ऽनभिहिताधिकारः क्रियत आहोस्विदन्यत्र कर्तव्यो न क्रियते । इहाकर्तव्यः क्रियते । एष एव हि न्याय्यः पक्षो यदभिहिते विहित न स्यात् ॥

अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम् ॥ ३ ॥

अनभिहितस्तु विभक्त्यर्थः । कः पुनर्विभक्त्यर्थः । एकत्वादयो विभक्त्यर्थास्ते-ष्वनभिहितेषु कर्मादयोऽभिहिता विभक्तीनामुत्पत्तौ निमित्तत्वाय मा भूवन्निति तस्मादनभिहितवचनम् । तस्मादनभिहिताधिकारः क्रियते ॥

अवश्य चैतदेव विज्ञेयमेकत्वादयो विभक्त्यर्था इति ।

अभिहिते प्रथमाभाव ॥ ४ ॥

यो हि मन्यते कर्मादयो विभक्त्यर्थास्तेष्वनभिहितेषु सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्न भविष्यतीति प्रथमा* तस्य न प्राप्नोति । क्व । वृक्षः प्लक्ष । किं कारणम् । प्रातिपदिकेनोक्तः प्रातिपदिकार्थ इति ॥

न क्वचित्प्रातिपदिकेनानुक्तः प्रातिपदिकार्थ उच्यते च प्रथमा सा वचनाद्भविष्यति ॥ तथैव तु खल्वेष दोषो यस्य त एकत्वादयो विभक्त्यर्था अभिहिते प्रथमाभाव इति । प्रथमा ते न प्राप्नोति । क्व । पचत्योदन देवदत्त इति । किं कारणम् । तिङोक्ता एकत्वादय इति । अनभिहिताधिकार च त्व करोषि परिगणन च ॥

न क्वचित्तिङैकत्वादीनामनभिधानमुच्यते च प्रथमा सा वचनाद्भविष्यति । ननु चेहानभिधान वृक्ष. प्लक्ष इति । अत्राप्यभिधानमस्ति । कथम् । वक्ष्यत्येतत् । अस्ति-र्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति† । वृक्षः प्लक्ष । अस्तीति गम्यते ॥ तथैव तु खल्वेष दोषो यस्य ते कर्मादयो विभक्त्यर्था अभिहिते प्रथमाभाव इति । प्रथमा ते प्राप्नोति । क्व । कट करोति भीष्ममुदार शोभन दर्शनीयमिति । कट-शब्दादुत्पद्यमानया द्वितीययाभिहित कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न प्राप्नोति । का तर्हि प्राप्नोति । प्रथमा । तद्यथा । कृत. कटो भीष्म उदार शोभनो दर्शनीय इति करोतेरुत्पद्यमानेन क्तेनाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न भवति । का तर्हि । प्रथमा भवति ॥

नैष दोषः । न हि ममानभिहिताधिकारोऽस्ति नापि परिगणनम् । सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्भविष्यत्यस्ति च सामर्थ्यम् । किम् । कर्मविशेषो वक्तव्यः ॥ अथवा कटो ऽपि कर्म भीष्मादयो ऽपि तत्र कर्मणीत्येव सिद्धम् ॥

---

* २.३.४६ † २.३.१

अथवा कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया भविष्यति ॥ अस्ति खल्वपि विशेषः कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति न कुतः कटो भीष्म उदारः शोभनो दर्शनीय इति न । करोतेरप्रयुज्यमानः कोऽनयत्नेन सर्वं कर्माभिधत्ते कटशब्दादुत्पद्यमानया द्वितीयया यत्कटस्य कर्म तत्स्वमभिधातुं न हि कर्मविशेषः ॥ तत्र तु खल्वेष दोषो यस्य त एकत्वादयो विभक्त्यर्था अभिहिते प्रथमाभाव इति । प्रथमा ते न प्राप्नोति । क्व । एकः द्वौ बहव इति । किं कारणम् । प्रातिपदिकेनोक्ता एकत्वादय इति ॥

कर्मादिष्वपि ये विभक्त्यर्थेष्वव्ययमेकत्वादयो निमित्तत्वेनोपादेयाः । कर्मण एकत्वे कर्मणो द्वित्वे कर्मणो बहुत्व इति । न चैकत्वादीनामेकत्वादयः सन्ति । अथ सन्ति ममापि सन्ति । तेष्वनभिहितेषु प्रथमा भविष्यति ॥ अथवोभयवचना ह्येते । द्रव्यं चाहुर्गुणं च । यस्यासौ गुणस्तस्यानुक्ता एकत्वादय इति कृत्वा प्रथमा भविष्यति ॥ अथवा संख्या नामेयं परप्रधाना । संख्येयमनया विशेष्यम् । यदि चात्र प्रथमा न स्यात्संख्येयमविशेषितं स्यात् ॥ अथवा वक्ष्यति तत्र वचनग्रहणस्य प्रयोजनमुक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति* ॥ अथवा समयाद्भविष्यति† । यदि सामयिकी न नियोगतोऽन्या कस्मान्न भवन्ति । कर्मादीनामभावात् ॥ षष्ठी तर्हि प्राप्नोति । शेषलक्षणा‡ षष्ठ्यशेषत्वान्न भविष्यति ॥ एवमपि व्यतिकरः प्राप्नोति । एकस्मिन्नपि द्विवचनबहुवचने प्राप्नुतः । द्वयोरप्येकवचनबहुवचने प्राप्नुतः । बहुष्वप्येकवचनद्विवचने प्राप्नुतः । अर्थतो व्यवस्था भविष्यति ॥

परिगणनं कर्तव्यम् ।

तिङ्कृत्तद्धितसमासैः परिसंख्यानम् ॥ ५ ॥

तिङ्कृत्तद्धितसमासैः परिसंख्यानं कर्तव्यम् । तिङ् । क्रियते कटः । कृत् । कृतः कटः । तद्धित । औपगवः कापटवः । समास । चित्रगुः शबलगुः ॥

उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिवचनम् ॥ ६ ॥

उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिर्वक्तव्या । क्व । कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति । कटशब्दादुत्पद्यमानया द्वितीययाभिहितं कर्मेति कृत्वा भीष्मादिभ्यो द्वितीया न प्राप्नोति ॥ का तर्हि स्यात् । षष्ठी । शेषलक्षणा षष्ठ्य-

* २ ३ ४६ † २ २ १ ‡ २ ३ ५०

शेषत्वान्न भविष्यति ॥ अन्या अपि न प्राप्नुवन्ति । किं कारणम् । कर्मादीनामभावात् ॥ समयश्च कृतो न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति न चान्या उत्पद्यमाना एतमभिसंबन्धमुत्सहन्ते वक्तुमिति कृत्वा द्वितीया भविष्यति ॥ अथवा कटोऽपि कर्म भीष्मादयोऽपि तत्र कर्मणीत्येव सिद्धम् । अथवा कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया भविष्यति ॥ तस्मान्नार्थः परिगणनेन ॥

द्वयोः क्रिययोः कारके ऽन्यतरेणाभिहिते विभक्त्यभावप्रसङ्गः ॥ ७ ॥

द्वयोः क्रिययोः कारके ऽन्यतरेणाभिहिते विभक्तिर्न प्राप्नोति । क्व । प्रासाद आस्ते । शयन आस्त इति । किं कारणम् । सदिप्रत्ययेनाभिहितमधिकरणमिति* कृत्वा सप्तमी† न प्राप्नोति ॥

न वान्यतरेणानभिधानात् ॥ ८ ॥

न वैष दोषः । किं कारणम् । अन्यतरेणानभिधानात् । अन्यतरेणात्रानभिधानम् । सदिप्रत्ययेनाभिधानमसिप्रत्ययेनानभिधानम् । यतोऽनभिधानं तदाश्रया सप्तमी भविष्यति ॥ कुतो नु खल्वेतत्सत्यभिधाने चानभिधाने चानभिहिताश्रया सप्तमी भविष्यति न पुनरभिहिताश्रयः प्रतिषेध इति ।

अनभिहिते हि विधानम् ॥ ९ ॥

अनभिहिते हि सप्तमी विधीयते नाभिहिते प्रतिषेधः ॥ यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्या चान्या च क्रिया यत्र तु खलु सैव क्रिया तत्र कथम् । आसन आस्ते । शयने शेत इति । अत्राप्यन्यत्वमस्ति । कुतः । कालभेदात्साधनभेदाच्च । एकस्यात्रासेरासिः साधनं सर्वकालश्च प्रत्ययः । अपरस्य वाह्यं साधनं वर्तमानकालश्च प्रत्ययः ॥ किं पुनर्द्रव्यं साधनमाहोस्विद्गुणः । किं चातः । यदि द्रव्यं साधनं नैतदन्यद्भवत्यभिहितात् । अथ हि गुणः साधनं भवत्येतदन्यदभिहितात् । अन्यो हि सदिगुणो ऽन्यथासिगुणः ॥ किं पुनः साधनं न्याय्यम् । गुण इत्याह । कथं ज्ञायते । एवं हि कश्चित्कंचित्पृच्छति । क्व देवदत्त इति । स तस्मा आचष्टे । असौ वृक्ष इति । कतरस्मिन् । यस्तिष्ठतीति । स वृक्षोऽधिकरणं भूत्वान्येन शब्देनाभिसंबध्यमानः कर्ता संपद्यते । द्रव्ये पुनः साधने सति यत्कर्म कर्मैव स्याद्यत्करणं करणमेव यदधिकरणमधिकरणमेव ॥

* १.२ ९९. † २१.११.

अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात् ॥ १० ॥

अनभिहितवचनमनर्थकम् । किं कारणम् । प्रथमाविधानस्यानवकाशत्वात् । अनवकाशा प्रथमा सा वचनाद्भविष्यति* ॥ सावकाशा प्रथमा । कोऽवकाशः । अकारकम् । वृक्षः प्लक्ष इति ।

अवकाशोऽकारकमिति चेन्नास्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति ॥ ११ ॥

अवकाशोऽकारकमिति चेत्तन्न । किं कारणम् । अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते । वृक्षः प्लक्षः । अस्तीति गम्यते ॥

विप्रतिषेधाद्वा प्रथमाभावः ॥ १२ ॥

अथवा द्वितीयादयः क्रियन्तां प्रथमा वेति प्रथमा भविष्यति विप्रतिषेधेन । द्वितीयादीनामवकाशः । कटं करोति भीष्ममुदारं शोभनं दर्शनीयमिति । प्रथमाया अवकाशः । अकारकम् । वृक्षः प्लक्ष इति । इहोभयं प्राप्नोति । कृतः कटो भीष्म उदारः शोभनो दर्शनीय इति । प्रथमा भविष्यति विप्रतिषेधेन ॥ न सिध्यति । परत्वात्षष्ठी प्राप्नोति† । शेषलक्षणा षष्ठ्यशेषत्वान्न भविष्यति ॥

कृत्ययोगे तु परं विधानं षष्ठ्यास्तत्प्रतिषेधार्थम् ॥ १३ ॥

कृत्ययोगे तु परत्वात्षष्ठी‡ प्राप्नोति तत्प्रतिषेधार्थमनभिहिताधिकारः कर्तव्यः । कर्तव्यः कट इति ॥ स कथं कर्तव्यः । यद्येकत्वादयो विभक्त्यर्थाः । अथ हि कर्मादयो विभक्त्यर्था नार्थोऽनभिहिताधिकारेण ॥

कर्मणि द्वितीया ॥ २ । ३ । २ ॥

समयानिकषाहायोगेषूपसंख्यानम् ॥ १ ॥

समयानिकषाहायोगेषूपसंख्यानं कर्तव्यम् । समया ग्रामम् । निकषा ग्रामम् । हायोगे । हा देवदत्तम् । हा यज्ञदत्तम् ॥

अपर आह ॥ द्वितीयाविधाने अभितःपरितःसमयानिकषाध्यधिधिग्योगेषूपस-

---

* २ ३ ४६ † २ ३ ५० ‡ २ ३ ६५

ख्यानम् ॥ द्वितीयाविधानेऽभितःपरितःसमयानिकषाध्यधिधिग्योगेषूपसंख्यानं कर्तव्यम् । अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । अध्यधि ग्रामम् । धिग्जाल्मम् । धिग्वृषलम् ॥

अपर आह ।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

उभय सर्व इत्येताभ्यां तसन्ताभ्यां द्वितीया वक्तव्या । उभयतो ग्रामम् । सर्वतो ग्रामम् ॥ धिग्योगे । धिग्जाल्मम् । धिग्वृषलम् ॥ उपर्यादिषु त्रिष्वाम्रेडितान्तेषु द्वितीया वक्तव्या । उपर्युपरि ग्रामम् । अध्यधि ग्रामम् । अधोऽधो ग्रामम् ॥ ततोऽन्यत्रापि दृश्यते । न देवदत्तं प्रतिभाति किंचित् ।

बुभुक्षितं न प्रतिभाति किंचित् ॥

तृतीया च होश्छन्दसि ॥ २ । ३ । ३ ॥

किमर्थमिदमुच्यते । तृतीया यथा स्यात् । अथ द्वितीया सिद्धा । सिद्धा कर्मणीत्येव* ॥ तृतीयापि सिद्धा । कथम् । सुपां सुपो भवन्तीत्येव । असत्येतस्मिन्सुपां सुपो भवन्तीति तृतीयार्थोऽयमारम्भः । यवाग्वाग्निहोत्रं जुहोति ॥ एवं तर्हि तृतीयापि सिद्धा । कथम् । कर्तृकरणयोरित्येव† । अयमग्निहोत्रशब्दोऽस्त्येव ज्योतिषि वर्तते । तद्यथा । अग्निहोत्रं प्रज्वलयतीति । अस्ति हविषि वर्तते । तद्यथा । अग्निहोत्रं जुहोतीति । जुहोतिश्चास्त्येव प्रक्षेपणे वर्तते अस्ति प्रीणात्यर्थे वर्तते । तद्यदा तावद्यवागूशब्दात्तृतीया तदाग्निहोत्रशब्दो ज्योतिषि वर्तते जुहोतिश्च प्रीणात्यर्थे । तद्यथा । यवाग्वाग्निहोत्रं जुहोति । अग्निं प्रीणाति । यदा यवागूशब्दाद्द्वितीया तदाग्निहोत्रशब्दो हविषि वर्तते जुहोतिश्च प्रक्षेपणे । तद्यथा । यवागूमग्निहोत्रं जुहोति । यवागूं हविरग्नौ प्रक्षिपति ॥

अन्तरान्तरेणयुक्ते ॥ २ । ३ । ४ ॥

इह कस्मान्न भवति । किं ते यागयदात्पुस्तकानामन्तरेण गतेनेति । लक्षण-

* २.३.२. † २.३.१८.

तिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ अथवा यद्यपि तावदयमन्तरेणशब्दो दृष्टापचारो निपातश्चानिपातश्चायं तु खल्वन्तराशब्दो ऽदृष्टापचारो निपात एव तस्यास्य कोऽन्यो द्वितीयः सहायो भवितुमर्हत्यन्यदतो निपातात् । तद्यथा । अस्य गोर्द्वितीयेनार्थ इति *गौरेवानीयते नाश्वो न गर्दभः* ॥

अन्तरान्तरेणयुक्तानामप्रधानवचनम् ॥ १ ॥

अन्तरान्तरेणयुक्तानामप्रधानग्रहणं कर्तव्यम् । अप्रधाने द्वितीया भवतीति वक्तव्यम् । अन्तरा त्वां च मां च कमण्डलुरिति । कमण्डलोर्द्वितीया मा भूदिति । क पुनरेताभ्यां कमण्डलोर्योगः । यत्त्वां च मां चान्तरा तत्कमण्डलोः स्थानम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । कमण्डलोर्द्वितीया कस्मान्न भवति । उपपदविभक्तेः कारकविभक्तिर्बलीयसीति *प्रथमा भविष्यति* ॥

कालाध्वनोरत्यन्तसंयोगे ॥ २ । ३ । ५ ॥

अत्यन्तसंयोगे कर्मवद्भावार्थम् ॥ १ ॥

अत्यन्तसंयोगे कालाध्वानौ कर्मवद्भवत इति वक्तव्यम् । किं प्रयोजनम् । लाद्यर्थम् । लादिभिरभिधानं यथा स्यात्* । आस्यते मासः । शय्यते क्रोशः ॥ अथ वत्करणं किमर्थम् । स्वाश्रयमपि यथा स्यात् । आस्यते मासम् । शय्यते क्रोशम् । अकर्मकाणां भावे लो भवतीति* भावे लो यथा स्यात् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । *प्राकृतमेवैतत्कर्म यथा कटं करोति शकटं करोतीति ॥ एवं मन्यते ।* यत्र कश्चित्क्रियाकृतो विशेष उपजायते तन्न्याय्यं कर्मेति । न चेह कश्चित्क्रियाकृतो विशेष उपजायते ॥ नैव शक्यम् । इहापि न स्यात् । आदित्यं पश्यति । हिमवन्तं शृणोति । ग्रामं गच्छति । तस्मात्प्राकृतमेवैतत्कर्म यथा कटं करोति शकटं करोतीति ॥ यदि तर्हि प्राकृतमेवैतत्कर्माकर्मकाणां भावे लो भवतीति भावे लो न प्राप्नोति । आस्यते मासं देवदत्तेनेति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अकर्मकाणामित्युच्यते न च केचित्कालभावाध्वभिरकर्मकाः । त एवं विज्ञास्यामः । क्वचिद्ये ऽकर्मका इति ॥ अथवा येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणां न चैतेन कर्मणा

* ३ ४ ६९

कश्चिदप्यकर्मकः ॥ अथवा यत्कर्म भवति न च भवति तेनाकर्मकाणां न चैतत्कर्म क्वचिदपि न भवति ॥

न तर्हीदानीमिदं सूत्रं वक्तव्यम् । वक्तव्यं च । किं प्रयोजनम् । यत्राक्रिययात्यन्तसंयोगस्तदर्थम् । क्रोशं कुटिला नदी । क्रोशं रमणीया वनराजिः ॥

अपवर्गे तृतीया ॥ २ । ३ । ६ ॥

क्रियापवर्ग इति वक्तव्यम् । साधनापवर्गे मा भूत् । मासमधीतोऽनुवाको न चानेन गृहीत इति ॥

सप्तमीपञ्चम्यौ कारकमध्ये ॥ २ । ३ । ७ ॥

क्रियामध्य इति वक्तव्यम् । इहापि यथा स्यात् । अद्य देवदत्तो भुक्त्वा द्व्यहाद्भोक्ता द्व्यहे भोक्ता । कारकमध्य इतीयत्युच्यमान इहैव स्यात् । इहस्थोऽयमिष्वासः क्रोशाल्लक्ष्यं विध्यति क्रोशे लक्ष्यं विध्यति । यं च विध्यति यतश्च विध्यत्युभयोस्तन्मध्यं भवति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति । क्रियामध्यं चेत्कारकमध्यमपि भवति तत्र कारकमध्य इत्येव सिद्धम् ॥

कर्मप्रवचनीययुक्ते द्वितीया ॥ २ । ३ । ८ ॥

कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं सप्तमीपञ्चम्योः प्रतिषेधार्थम् ॥ १ ॥

कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं कर्तव्यम्[*] । वृक्षं प्रति विद्योतते विद्युत् । वृक्षं परि । वृक्षमनु । साधुर्देवदत्तो मातरं प्रति । मातरं परि । मातरमनु । किं प्रयोजनम् । सप्तमीपञ्चम्योः प्रतिषेधार्थम् । सप्तमीपञ्चम्यौ मा भूतामिति । साधुनिपुणाभ्यामर्चायां सप्तमीति सप्तमी[†] । पञ्चम्यपाङ्परिभिः [२.३.१०] इति पञ्चमी । तत्रायमप्यर्थो ऽप्रतेरिति न वक्तव्यं भवति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् ।

---

* १.४.९०. † २.३.४३.

उक्तं वा ॥ २ ॥

किमुक्तम् । एकत्र तावदुक्तमप्रतेरिति । इतरत्रापि यद्यपि तावदयं परिदृष्टापचारो वर्जने चावर्जने चार्थे खल्वपशब्दो ऽदृष्टापचारो वर्जनार्थे एव तस्य कोऽन्यो द्वितीयः सहायो भवितुमर्हत्यन्यदतो वर्जनार्थात् । तद्यथा । अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभः ॥

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ २ । ३ । ९ ॥

कथमिदं विज्ञायते । यस्य चैश्वर्यमीश्वरत्वेश्वरभावस्तस्मात्कर्मप्रवचनीययुक्तादिति । आहोस्विद्यस्य स्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादिति । कश्चात्र विशेषः ।

यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम् ॥ १ ॥

यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदन्तरेण वचनं सिद्धम् । अधि ब्रह्मदत्ते पञ्चालाः । अधृतास्ते तस्मिन्भवन्ति । सत्यमेवमेतत् । नित्यं परिग्रहीतव्यं परिग्रहीत्रधीनं भवति ॥

प्रथमानुपपत्तिस्तु ॥ २ ॥

प्रथमा नोपपद्यते । कुतः । पञ्चालेभ्यः । का तर्हि स्यात् । षष्ठीसप्तम्यौ । स्वामीश्वराधिपति [२.३.३९] [illegible] शब्दः पठ्यते । यद्यपि न पठ्यते [illegible] । कथं ज्ञायते । यदयं कस्य- [illegible] देति ॥ षष्ठी तर्हि प्राप्नोति । शेष- [illegible] तर्हि प्राप्नोति कर्मप्रवचनीययुक्ते [illegible] भिसंबन्धस्य द्वितीया न भविष्यति । [illegible] ः स्याद्यस्तु खल्वधिः पञ्चालानां [illegible]

[illegible] ३ ॥

[illegible] कादिति ॥ एवमप्यन्तरेण वचनं [illegible] र तेषु भवति । सत्यमेवमेतत् ।

[illegible] ९०. § १ ८.९०.

नित्यं परिग्रहीता परिग्रहीतव्याधीनो भवति ॥ प्रथमानुपपत्तिस्तु । प्रथमा नोपपद्यते । कुतः । ब्रह्मदत्तात् । का तर्हि स्यात् । षष्ठीसप्तम्यौ । स्वामीश्वराधिपतीति । न तत्राधिशब्दः पठ्यते । यद्यपि न पठ्यतेऽधिरीश्वरवाची । न तत्र पर्यायवचनानां ग्रहणम् । कथं ज्ञायते । यदयं कस्यचित्पर्यायवचनस्य ग्रहणं करोति । अधिपतिदायादेति ॥ षष्ठी तर्हि प्राप्नोति । शेषलक्षणा षष्ठ्यशेषत्वान्न भविष्यति ॥ द्वितीया तर्हि प्राप्नोति कर्मप्रवचनीययुक्ते द्वितीयेति । सप्तम्योक्तत्वात्तस्याभिसंबन्धस्य द्वितीया न भविष्यति । भवेद्योऽधेः पञ्चालानां चाभिसंबन्धः स सप्तम्योक्तः स्याद्यस्तु खल्वधेर्ब्रह्मदत्तस्य चाभिसंबन्धस्तत्र द्वितीया प्राप्नोति ॥ एवं तर्हि स्ववचनात्सिद्धम् । अधिः स्वं प्रति कर्मप्रवचनीयसंज्ञो भवतीति वक्तव्यम्* ॥ एवमपि यदा ब्रह्मदत्तेऽधिकरणे सप्तमी तदा पञ्चालेभ्यो द्वितीया प्राप्नोति कर्मप्रवचनीययुक्ते द्वितीयेति । उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति ॥

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ २ । ३ । १२ ॥

अध्वन्यर्थग्रहणम् ॥ १ ॥

अध्वन्यर्थग्रहणं कर्तव्यम् । इहापि मा भूत् । पन्थानं गच्छति । वीथीं गच्छतीति ।

आस्थितप्रतिषेधश्च ॥ २ ॥

आस्थितप्रतिषेधश्चायं वक्तव्यः । यो ह्युत्पथेन पन्थानं गच्छति पथे गच्छतीत्येव तत्र भवितव्यम् ॥

किमर्थं पुनरिदमुच्यते । चतुर्थी यथा स्यात् । अथ द्वितीया सिद्धा । सिद्धा कर्मणीत्येव† । चतुर्थ्यपि सिद्धा । कथम् । सम्प्रदान इत्येव‡ । न सिध्यति । कर्मणा यमभिप्रैति स सम्प्रदानम् [१ ४.३२] इत्युच्यते क्रियया चासौ ग्राममभिप्रैति । कया क्रियया । गमिक्रियया । क्रियाग्रहणमपि तत्र चोद्यते§ ॥

चेष्टायामनध्वनि स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गः ॥ ३ ॥

चेष्टायामनध्वनि स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गो भवति ॥

सिद्धं त्वसंप्राप्तवचनात् ॥ ४ ॥

सिद्धमेतत् । कथम् । असंप्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ भवत इति वक्तव्यम् ॥

* [illegible] † [illegible] ‡ [illegible] § [illegible]

अध्वनश्चानपवादः ॥ ५ ॥

एवं च कृत्वानध्वनीत्येतदपि न वक्तव्यं भवति । समाप्तं चेत्कर्माध्वानं गच्छतीति ॥

चतुर्थी संप्रदाने ॥ २ । ३ । १३ ॥

चतुर्थीविधाने तादर्थ्य उपसंख्यानम् ॥ १ ॥

चतुर्थीविधाने तादर्थ्य उपसंख्यानं कर्तव्यम् । यूपाय दारु । कुण्डलाय हिरण्यम् ॥ किमिदं तादर्थ्यमिति । तदर्थस्य भावस्तादर्थ्यम् । तदर्थं पुनः किम् । सर्वनाम्नोऽयं चतुर्थ्यन्तस्यार्थशब्देन सह समासः । कथं चात्र चतुर्थी । अनेनैव । यद्येवमितरेतराश्रयं भवति । केतरेतराश्रयता । निर्देशोत्तरकालं चतुर्थ्या भवितव्यं चतुर्थ्या च निर्देशस्तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति भवत्यर्थशब्देन योगे चतुर्थीति यदयं चतुर्थी तदर्थार्थ [२.१.३६] इति चतुर्थ्यन्तस्यार्थशब्देन सह समासं शास्ति ॥ न खल्वप्यवश्यं चतुर्थ्यन्तस्यैवार्थशब्देन सह समासो भवति । किं तर्हि । षष्ठ्यन्तस्यापि भवति । तद्यथा । गुरोरिदं गुर्वर्थमिति ॥ यदि तादर्थ्य उपसंख्यानं क्रियते नार्थः संप्रदानग्रहणेन । योऽपि ह्युपाध्यायाय गौर्दीयत उपाध्यायार्थः स भवति तत्र तादर्थ्य इत्येव सिद्धम् ॥ अवश्यं संप्रदानग्रहणं कर्तव्यं यान्येन लक्षणेन संप्रदानसंज्ञा तदर्थम् । छात्राय रुचितम् । छात्राय स्वदितमिति* ॥

तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति भवति तादर्थ्ये चतुर्थीति यदयं चतुर्थी तदर्थार्थेति चतुर्थ्यन्तस्य तदर्थेन सह समासं शास्ति ॥

क्लृपि संपद्यमाने ॥ २ ॥

क्लृपि संपद्यमाने चतुर्थी वक्तव्या । मूत्राय कल्पते यवागूः । उच्चाराय कल्पते यवान्नमिति ॥

उत्पातेन ज्ञाप्यमाने ॥ ३ ॥

उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या ।

वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता भवति सस्याय दुर्भिक्षाय सिता भवेत् ॥

---

* १ । ४ । ३३

मांसौदनाय व्याहरति मृगः ॥

हितयोगे च ॥ ४ ॥

हितयोगे चतुर्थी वक्तव्या । हितमरोचकिने । हितमामयाविने ॥

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥ २ । ३ । १६ ॥

स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानात् ॥ १ ॥

स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानाद्भवति विप्रतिषेधेन* । स्वस्तियोगे चतुर्थ्या अवकाशः । स्वस्ति जाल्माय । स्वस्ति वृषलाय । कुशलार्थैराशिषि वाविधानस्यावकाशः । अन्ये कुशलार्थाः । कुशलं देवदत्ताय । कुशलं देवदत्तस्य । इहोभयं प्राप्नोति । स्वस्ति गोभ्यः । स्वस्ति ब्राह्मणेभ्य इति । चतुर्थी भवति विप्रतिषेधेन ॥

अलमिति पर्याप्त्यर्थग्रहणम् ॥ २ ॥

अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम् । इह मा भूत् । अलंकुरुते कन्यामिति ॥ अपर आह । अलमिति पर्याप्त्यर्थग्रहणं कर्तव्यम् । इहापि यथा स्यात् । अलं मल्लो मल्लाय । प्रभुर्मल्लो मल्लाय । प्रभवति मल्लो मल्लायेति ॥

मन्यकर्मण्यनादरे विभाषाप्राणिषु ॥ २ । ३ । १७ ॥

अप्राणिष्वित्युच्यते तत्रेदं न सिध्यति । न त्वा श्वानं मन्ये । न त्वा शुने मन्य इति ॥ एवं तर्हि योगविभागः करिष्यते । मन्यकर्मण्यनादरे विभाषा । ततोऽप्राणिषु । अप्राणिषु च विभाषेति । इहापि तर्हि प्राप्नोति । न त्वा काकं मन्ये । न त्वा शुकं मन्य इति ॥ यदेतदप्राणिष्वित्येतदनावादिष्विति वक्ष्यामि । इमे च नावादयो भविष्यन्ति । न त्वा नावं मन्ये यावत्तीर्णं न नाव्यम् । न त्वान्नं मन्ये यावद्भुक्तं न श्राद्धम् । अत्र येषु प्राणिषु नेष्यते ते नावादयो भविष्यन्ति ॥

---

* २.१.७१.

मन्यकर्मणि प्रकृष्यकुत्सितग्रहणम् ॥ १ ॥

मन्यकर्मणि प्रकृष्यकुत्सितग्रहणं कर्तव्यम् । इह मा भूत् । त्वां तृणं मन्ये इति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

कर्तृकरणयोस्तृतीया ॥ २ । ३ । १८ ॥

तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम् ॥ १ ॥

तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानं कर्तव्यम् । प्रकृत्याभिरूपः । प्रकृत्या दर्शनीयः । प्रायेण याज्ञिकाः । प्रायेण वैयाकरणाः । माठरोऽस्मि गोत्रेण । गार्ग्योऽस्मि गोत्रेण । समेन धावति । विषमेण धावति । द्विद्रोणेन धान्यं क्रीणाति । त्रिद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून्क्रीणाति । साहस्रेणाश्वान्क्रीणाति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । कर्तृकरणयोस्तृतीयेत्येव सिद्धम् ॥ इह तावत्प्रकृत्याभिरूपः प्रकृत्या दर्शनीय इति प्रकृतिकृतं तस्याभिरूप्यम् ॥ प्रायेण याज्ञिकाः प्रायेण वैयाकरणा इति । एष तत्र प्रायो येन तेऽधीयते ॥ माठरोऽस्मि गोत्रेण गार्ग्योऽस्मि गोत्रेणेति । एतेनाह संज्ञाये ॥ समेन धावति विषमेण धावतीति । इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते समेन पथा धावति विषमेण पथा धावतीति ॥ द्विद्रोणेन धान्यं क्रीणाति त्रिद्रोणेन धान्य क्रीणातीति । तादर्थ्यात्ताच्छब्द्यम् । द्विद्रोणार्थं द्विद्रोणम् । द्विद्रोणेन हिरण्येन धान्य क्रीणातीति ॥ पञ्चकेन पशून्क्रीणातीति । अत्रापि तादर्थ्यात्ताच्छब्द्यम् । पञ्चपश्वर्थः पञ्चकः । पञ्चकेन पशून्क्रीणातीति ॥ साहस्रेणाश्वान्क्रीणातीति । सहस्रपरिमाणं साहस्रम् । साहस्रेण हिरण्येनाश्वान्क्रीणातीति ॥

सहयुक्तेऽप्रधाने ॥ २ । ३ । १९ ॥

किमुदाहरणम् । तिलैः सह माषान्वपतीति । नैतदस्ति । तिलैर्मिश्रीकृत्य माषा उप्यन्ते तत्र करण इत्येव सिद्धम् ॥ इदं तर्हि । पुत्रेण सहागतो देवदत्त इति । अप्रधाने कर्तरि तृतीया यथा स्यात् । एतदपि नास्ति प्रयोजनम् । प्रधाने कर्तरि लादयो भवन्तीति प्रधानकर्ता लेनाभिधीयते यदप्रधानं सिद्धा तत्र कर्तरीत्येव तृतीया ॥ इदं तर्हि । पुत्रेण सहागमनं देवदत्तस्येति । षष्ठ्यत्र बाधिका भविष्यति ॥ इदं तर्हि । पुत्रेण सह स्थूलः । पुत्रेण सह पिङ्गल इति ॥ इदं चाप्युदाहरणं तिलैः सह माषान्वपतीति । ननु चोक्तं तिलैर्मिश्रीकृत्य माषा उप्यन्ते तत्र करण इत्येव सिद्धमिति । भवेत्सिद्धं यदा तिलैर्मिश्रीकृत्योप्यन्ते । यदा तु खलु

कस्यचिन्माषबीजावापि उपस्थितस्तदर्थं न क्षेत्रमुपार्जितं तत्रान्यदपि किंचिदुप्यते यदि भविष्यति भविष्यतीति तदा न सिध्यति ॥

सहयुक्तेऽप्रधानवचनमनर्थकमुपपदविभक्तेः कारकविभक्तिबलीयस्त्वादन्यत्रापि ॥ १ ॥

सहयुक्तेऽप्रधानवचनमनर्थकम् । किं कारणम् । उपपदविभक्तेः कारकविभक्तिबलीयस्त्वात् । अन्यत्रापि कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति । क्वान्यत्र । गाः* स्वामी व्रजतीति ॥

येनाङ्गविकारः ॥ २ । ३ । २० ॥

इह कस्मान्न भवति । अक्षि काणमस्येति ।

अङ्गादिकृतात्तद्विकारश्चेदङ्गिनो वचनम् ॥ १ ॥

अङ्गादिकृतात्तृतीया वक्तव्या तेनैव चेद्विकारेणाङ्गी द्योत्यत इति वक्तव्यम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अङ्गशब्दोऽयं समुदायशब्दो येनेति च करण एषा तृतीया । येनावयवेन समुदायोऽङ्गी द्योत्यते तस्मिन्भवितव्यं न चैतेनावयवेन समुदायो द्योत्यते ॥

इत्थंभूतलक्षणे ॥ २ । ३ । २१ ॥

इत्थंभूतलक्षणे तत्स्थे प्रतिषेधः ॥ १ ॥

इत्थंभूतलक्षणे तत्स्थे प्रतिषेधो वक्तव्यः । अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति ॥

न वेत्थंभूतस्य लक्षणेनापृथग्भावात् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । इत्थंभूतस्य लक्षणेनापृथग्भावात् । यत्रेत्थंभूतस्य पृथग्भूतं लक्षणं तत्र भवितव्यं न चात्रेत्थंभूतस्य पृथग्भूतं लक्षणम् ॥ किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । तथा ह्ययं प्राधान्येन लक्षणं प्रतिनिर्दिशति । इत्थंभूतस्य लक्षणमित्थंभूतलक्षणम् तस्मिन्नित्थंभूतलक्षण इति ॥

* २३२.(३९)

संज्ञोऽन्यतरस्यां कर्मणि ॥ २ । ३ । २२ ॥

संज्ञः कृत्प्रयोगे षष्ठी विप्रतिषेधेन ॥ १ ॥

संज्ञो ऽन्यतरस्यां कर्मणीत्येतस्मात्कृत्प्रयोगे षष्ठी भवति विप्रतिषेधेन । संज्ञो ऽन्यतरस्यामित्यस्यावकाशः । मातरं संजानीते । मात्रा संजानीते । कृत्प्रयोगे षष्ठ्या अवकाशः । इध्मप्रव्रश्चनः* पलाशशातनः† । इहोभयं प्राप्नोति । मातुः संज्ञाता । पितुः संज्ञातेति । षष्ठी भवति विप्रतिषेधेन ॥

उपपदविभक्तेश्चोपपदविभक्तिः ॥ २ ॥

उपपदविभक्तेश्चोपपदविभक्तिर्भवति विप्रतिषेधेन । अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते [२.३.२९] इत्यस्यावकाशः । अन्यो देवदत्तात् । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च [३९] इत्यस्यावकाशः । गोषु स्वामी । गवां स्वामी । इहोभयं प्राप्नोति । अन्यो गोषु स्वामी । अन्यो गवां स्वामीति । स्वामीश्वराधिपतीत्येतद्भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः । न ह्यत्र गावोऽन्ययुक्ताः । कस्तर्हि । स्वामी ॥ एवं तर्हि तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् [७२] इत्यस्यावकाशः । तुल्यो देवदत्तस्य । तुल्यो देवदत्तेनेति । स्वामीश्वराधिपतीत्यस्यावकाशः । स एव । इहोभयं प्राप्नोति । तुल्यो गोभिः स्वामी । तुल्यो गवां स्वामीति । तुल्यार्थैरतुलोपमाभ्यामित्येतद्भवति विप्रतिषेधेन ॥

हेतौ ॥ २ । ३ । २३ ॥

निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् ॥

निमित्तकारणहेतुषु सर्वा विभक्तयः प्रायेण दृश्यन्त इति वक्तव्यम् । किं निमित्तं वसति । केन निमित्तेन वसति । कस्मै निमित्ताय वसति । कस्मान्निमित्ताद्वसति । कस्य निमित्तस्य वसति । कस्मिन्निमित्ते वसति ॥ किं कारणं वसति । केन कारणेन वसति । कस्मै कारणाय वसति । कस्मात्कारणाद्वसति । कस्य कारणस्य वसति । कस्मिन्कारणे वसति ॥ को हेतुर्वसति । कं हेतुं वस-

---

* ३.३.११७. † ३.१.१४०.

ति । केन हेतुना वसति । कस्मै हेतवे वसति । कस्माद्धेतोर्वसति । कस्य हेतोर्वसति । कस्मिन्हेतौ वसति ॥

अपादाने पञ्चमी ॥ २ । ३ । २८ ॥

पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् ॥ १ ॥

पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानं कर्तव्यम् । प्रासादमारुह्य प्रेक्षते प्रासादात्प्रेक्षते ॥

अधिकरणे च ॥ २ ॥

अधिकरणे चोपसंख्यानं कर्तव्यम् । आसनात्प्रेक्षते । शयनात्प्रेक्षते ॥

प्रश्नाख्यानयोश्च ॥ ३ ॥

प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या ॥ कुतो भवान् । पाटलिपुत्रात् ॥

यतश्चाध्वकालनिर्माणम् ॥ ४ ॥

यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या । गवीधुमतः सांकाश्यं चत्वारि योजनानि । कार्त्तिक्या आग्रहायणी मासे ॥

तद्युक्तात्काले सप्तमी ॥ ५ ॥

तद्युक्तात्काले सप्तमी वक्तव्या । कार्त्तिक्या आग्रहायणी मासे ॥

अध्वनः प्रथमा च ॥ ६ ॥

अध्वनः प्रथमा च सप्तमी च वक्तव्या । गवीधुमतः सांकाश्यं चत्वारि योजनानि । चतुर्षु योजनेषु ॥

तत्तर्हीदं बहु वक्तव्यम् । न वक्तव्यम् । अपादान इत्येव सिद्धम् ॥ इह तावत्प्रासादात्प्रेक्षते शयनात्प्रेक्षत इत्यपक्रामति तत्तस्माद्दर्शनम् । यद्यपक्रामति किं नात्यन्तायापक्रामति । संततत्वात् । अथवान्यान्यप्रादुर्भावात् ॥ प्रश्नाख्यानयोश्च पञ्चमी वक्तव्येति । इदमत्र प्रयोक्तव्यं सद्य प्रयुज्यते कुतो भवानागच्छति पाटलिपुत्रादागच्छामीति ॥ यतश्चाध्वकालनिर्माणे तत्र पञ्चमी वक्तव्येति । इदमत्र प्रयोक्तव्यं सद्य प्रयुज्यते गवीधुमतो निःसृत्य सांकाश्यं चत्वारि योजनानि ॥ कार्त्ति-

क्या आग्रहायणी मास इति । इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणी मास इति ॥ तद्युक्तात्काले सप्तमी वक्तव्येति । इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्त्तिक्या आग्रहायणी गते मास इति ॥ अध्वनः प्रथमा च सप्तमी चेति । इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते गवीधुमतो निःसृत्य यदा चत्वारि योजनानि गतानि भवन्ति ततः सांकाश्यम् । चतुर्षु योजनेषु गतेषु सांकाश्यमिति ॥

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ २ । ३ । २९ ॥

अञ्चूत्तरपदग्रहणं किमर्थं न दिक्शब्दैर्योग इत्येव सिद्धम् । षष्ठ्यतसर्थप्रत्ययेन [२.३.३०] इति वक्ष्यति तस्याय पुरस्तादपकर्षः ॥

षष्ठ्यतसर्थप्रत्ययेन ॥ २ । ३ । ३० ॥

अर्थग्रहणं किमर्थम् । षष्ठ्यतस्प्रत्ययेनेत्युच्यमान इहैव स्यात् । दक्षिणतो ग्रामस्य । उत्तरतो ग्रामस्येति* । इह न स्यात् । उपरि ग्रामस्य । उपरिष्टाद्ग्रामस्येति† । अर्थग्रहणे पुनः क्रियमाणे ऽतस्प्रत्ययेन च सिद्धं भवति यश्चान्यस्तेन समानार्थः ॥ अथ प्रत्ययग्रहणं किमर्थम् । इह मा भूत् । प्राग्ग्रामात् । प्रत्यग्ग्रामात्‡ । अञ्चूत्तरपदस्याप्येतत्प्रयोजनमुक्तं§ तत्रान्यतरच्छक्यमकर्तुम् ॥

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ॥ २ । ३ । ३२ ॥

पृथगादिषु पञ्चमीविधानम् ॥ १ ॥

[पृथगादिषु पञ्चमी विधेया । पृथग्देवदत्तात् । किमर्थम् । न प्रकृत पञ्चमीग्रहणमनुवर्तते । क्व प्रकृतम् । अपादाने पञ्चमी [२.३.२८] इति ।

अनधिकारात् ॥ २ ॥

अनधिकारः सः ॥

अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः ॥ ३ ॥

अधिकारे हि द्वितीयाषष्ठीविषये¶ प्रतिषेधः स्यात् । दक्षिणेन ग्रामम् ।

---

* ५.३.२८ † ५.३.३१ ‡ ५.३.२७ § २.३.२९ ¶ २.३.३१,१२

दक्षिणतो ग्रामस्य ॥ एवं तर्ह्यन्यतरस्याग्रहणसामर्थ्यात्पञ्चमी भविष्यति । अस्त्यन्यदन्यतरस्याग्रहणस्य प्रयोजनम् । किम् । यस्यां नाप्राप्तायां तृतीयारभ्यते सा यथा स्यात् । कस्यां च नाप्राप्तायाम् । अन्ततः षष्ठ्याम्* ॥ -

तर्हि वक्तव्यम् । न वक्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अपादाने पञ्चमीति । ननु चोक्तमनधिकारः सः अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेध इति । एवं तर्हि सबन्धमनुवर्तिष्यते । अपादाने पञ्चमी [२८] । अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते [२९] पञ्चमी । षष्ठ्यतसर्थप्रत्ययेन [३०] अन्यारादिभिर्योगे पञ्चमी । एनपा द्वितीया [३१] अन्यारादिभिर्योगे पञ्चमी । पृथग्विनानानाभिस्तृतीयान्यतरस्याम् । पञ्चमीग्रहणमनुवर्तते ऽन्यारादिभिर्योग इति निवृत्तम् ॥ अथवा मण्डूकगतयोऽधिकाराः । तद्यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः ॥ अथवान्यवचनाच्चकाराकरणात्प्रकृतस्यापवादो विज्ञायते यथोत्सर्गेण प्रसक्तस्य । अन्यस्या विभक्तेर्वचनाच्चकारस्यानुकर्षणार्थस्याकरणात्प्रकृतायाः पञ्चम्या द्वितीयाषष्ठ्यौ बाधिके भविष्यतो यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति ॥ अथवा वक्ष्यत्येतत् । अनुवर्तन्ते च नाम विधयो न चानुवर्तनादेव भवन्ति । किं तर्हि । यत्नाद्भवन्तीति† ॥

दूरान्तिकार्थेभ्यो द्वितीया च ॥ २ । ३ । ३५ ॥

दूरान्तिकार्थेभ्यः पञ्चमीविधाने तद्युक्तात्पञ्चमीप्रतिषेधः ॥ १ ॥

दूरान्तिकार्थेभ्यः पञ्चमीविधाने तद्युक्तात्पञ्चम्याः‡ प्रतिषेधो वक्तव्यः । दूराद्ग्रामस्य ॥

न वा तत्रापि दर्शनादप्रतिषेधः ॥ २ ॥

न वा । तत्रापि दर्शनात्पञ्चम्याः प्रतिषेधोऽनर्थकः । तत्रापि पञ्चमी दृश्यते ।

दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ॥
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपिताद्गुरोः ॥

* २३५० † ५२४* ‡ ३३३/

सप्तम्यधिकरणे च ॥ २ । ३ । ३६ ॥

सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम् ॥ १ ॥

सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानं कर्तव्यम् । अधीती व्याकरणे । परिगणिती याज्ञिक्ये । आम्नाती छन्दसि ॥

साध्वसाधुप्रयोगे च ॥ २ ॥

साध्वसाधुप्रयोगे च सप्तमी वक्तव्या । साधुर्देवदत्तो मातरि । असाधुः पितरि ॥

कारकार्हाणां च कारकत्वे ॥ ३ ॥

कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या । ऋद्धेषु भुञ्जानेषु दरिद्रा आसते । ब्राह्मणेषु तरत्सु वृषला आसते ॥

अकारकार्हाणां चाकारकत्वे ॥ ४ ॥

अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या । मूर्खेष्वासीनेष्वृद्धा भुञ्जते । वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति ॥

तद्विपर्यासे च ॥ ५ ॥

तद्विपर्यासे च सप्तमी वक्तव्या । ऋद्धेष्वासीनेषु मूर्खा भुञ्जते । ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति ॥

निमित्तात्कर्मसंयोगे ॥ ६ ॥

निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या ।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

यस्य च भावेन भावलक्षणम् ॥ २ । ३ । ३७ ॥

भावलक्षणे सप्तमीविधानेऽभावलक्षण उपसङ्ख्यानम् ॥ १ ॥

भावलक्षणे सप्तमीविधानेऽभावलक्षण उपसंख्यानं कर्तव्यम् । अग्निषु हूयमानेषु

प्रस्थितो हुतेष्वागतः । गोषु दुह्यमानासु प्रस्थितो दुग्धास्वागतः । किं पुनः कारणं न सिध्यति । लक्षणं हि नाम तद्भवति येन पुनः पुनर्लक्ष्यते सकृच्चासौ कथंचिद्ग्निषु हूयमानेषु प्रस्थितो हुतेष्वागतो गोषु दुह्यमानासु प्रस्थितो दुग्धास्वागतः ॥

सिद्धं तु भावप्रवृत्तौ यस्य भावारम्भवचनात् ॥ २ ॥

सिद्धमेतत् । कथम् । यस्य भावप्रवृत्तौ द्वितीयो भाव आरभ्यते तत्र सप्तमी वक्तव्या । सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु । ननु चोक्तं भावलक्षणे सप्तमीविधाने ऽभावलक्षण उपसंख्यानमिति । नैष दोषः । न खल्ववश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते । सकृदपि यन्निमित्तत्वाय कल्पते तदपि लक्षणं भवति । तद्यथा । अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति । सकृदसौ कमण्डलुपाणिर्दृष्टश्छात्त्रस्तस्य तदेव लक्षणं भवति ॥

पञ्चमी विभक्ते ॥ २ । ३ । ४२ ॥

इह कस्मान्न भवति । कृष्णा गवां संपन्नक्षीरतमेति । विभक्त इत्युच्यते न चैतद्विभक्तम् । विभक्तमेतत् । गोभ्यः कृष्णा विभज्यते । विभक्तमेव यन्नित्यं तत्र भवितव्यं न चैतन्नित्यं विभक्तम् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । विभक्तग्रहणसामर्थ्यात् । यदि हि यद्विभक्तं चाविभक्तं च तत्र स्याद्विभक्तग्रहणमनर्थकं स्यात् ॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥ २ । ३ । ४३ ॥

अप्रत्यादिभिरिति वक्तव्यम्* । इहापि यथा स्यात् । साधुर्देवदत्तो मातरं परि । मातरमनु ॥

प्रसितोत्सुकाभ्यां तृतीया च ॥ २ । ३ । ४४ ॥

प्रसित इत्युच्यते कः प्रसितो नाम । यस्तत्र नित्यं प्रतिबद्धः कुत एतत् । सिनोतिरयं बध्नात्यर्थे वर्तते । बद्ध इवासौ तत्र भवति ॥

* १.४.९०.

नक्षत्रे च लुपि ॥ २ । ३ । ४५ ॥

इह कस्मान्न भवति । अद्य पुष्यः । अद्य मघा इति । अधिकरण* इति वर्तते ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

---

* २२ ३६

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥२।३।४६॥

प्रातिपदिकग्रहणं किमर्थम् । उच्चैः नीचैरित्यत्रापि यथा स्यात् । किं पुनरत्र प्रथमया प्रार्थ्यते । पदत्वम्* । नैतदस्ति । पष्ठ्यात्र पदत्वं भविष्यति† ॥ इदं तर्हि प्रयोजनम् । ग्राम उच्चैस्ते स्वम् । ग्राम उच्चैस्तव स्वम् । सपूर्वायाः प्रथमाया विभाषा [८.१.२६] इत्येष विधिर्यथा स्यात् ॥ अथ लिङ्गग्रहणं किमर्थम् । स्त्री पुमान् नपुंसकमित्यत्रापि यथा स्यात् । नैतदस्ति प्रयोजनम् । एष एवात्र प्रातिपदिकार्थः ॥ इदं तर्हि । कुमारी वृक्षः कुण्डमिति ॥ अथ परिमाणग्रहणं किमर्थम् । द्रोणः खारी आढकमित्यत्रापि यथा स्यात् ॥ अथ वचनग्रहणं किमर्थम् । इह समुदाये वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । सत्येतस्मिन्दृष्टान्ते यत्रैतानि समुदितानि भवन्ति तत्रैव स्यात् । द्रोणः खारी आढकमिति । इह न स्यात् । कुमारी वृक्षः कुण्डमिति । नैतदस्ति प्रयोजनम् । प्रत्येकमपि वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । वृद्धिगुणसंज्ञे प्रत्येकं भवतः ॥ इदं तर्हि प्रयोजनमुक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात् । एकः द्वौ बहव इति ॥ अथ मात्रग्रहणं किमर्थम् । एतन्मात्र एव प्रथमा यथा स्यात्कर्मादिविशिष्टे मा भूदिति । कटं करोति ॥ नैतदस्ति प्रयोजनम् । कर्मादिषु द्वितीयाद्या विभक्तयस्ताः कर्मादिविशिष्टे बाधिका भविष्यन्ति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति यदयं संबोधने प्रथमां शास्ति‡ । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । सामन्त्रितम् [२.३.४८] इति वक्ष्यामीति । यत्तर्हि योगविभागं करोति । इतरथा हि संबोधन आमन्त्रितमित्येव ब्रूयात् ॥ इद तर्ह्युक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यात् । एकः द्वौ बहव इति । वचनग्रहणस्याप्येतत्प्रयोजनमुक्तम् । अन्यतरच्छक्यमकर्तुम् ॥

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्य उपसंख्यानमधिकृतत्वात् ॥ १ ॥

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्य उपसंख्यानं कर्तव्यम् । वीरः पुरुषः । किं पुनः कारणं न सिध्यति । अधिकृतत्वात् ।

---

* १.४.१४ † २.२.५०. ‡ २.३.४७.

व्यतिरिक्तः प्रातिपदिकार्थे इति कृत्वा प्रथमा न प्राप्नोति । कथं व्यतिरिक्तः । पुरुषे वीरत्वम् ॥

न वा वाक्यार्थत्वात् ॥ २ ॥

न वा वक्तव्यम् । किं कारणम् । वाक्यार्थत्वात् । यदत्राधिक्यं वाक्यार्थः सः ॥

अथवाभिहिते प्रथमेत्येतल्लक्षणं करिष्यते ।

अभिहितलक्षणायामनभिहिते प्रथमाविधिः ॥ ३ ॥

अभिहितलक्षणायामनभिहिते प्रथमा विधेया । वृक्षः प्लक्ष इति ॥

उक्तं वा ॥ ४ ॥

किमुक्तम् । अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति[*] । वृक्षः प्लक्षः । अस्तीति गम्यते ॥

अभिहितानभिहिते प्रथमाभावः ॥ ५ ॥

अभिहितानभिहिते प्रथमा प्राप्नोति । क्व । प्रासाद आस्ते । शयन आस्ते । सदिप्रत्ययेनाभिहितमधिकरणमिति[†] कृत्वा प्रथमा प्राप्नोति ॥ एवं तर्हि तिङ्समानाधिकरणे प्रथमेत्येतल्लक्षणं करिष्यते ।

तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमाविधिः ॥ ६ ॥

तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमा विधेया । वृक्षः प्लक्ष इति ॥

उक्तं पूर्वेण ॥ ७ ॥

किमुक्तम् । अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति । वृक्षः प्लक्षः । अस्तीति गम्यते ॥

शतृशानचोश्च निमित्तभावात्तिङोऽभावस्तयोरपवादत्वात् ॥ ८ ॥

शतृशानचोश्च निमित्तभावात्तिङोऽभावः । क्व । पचत्योदनं देवदत्त इति । किं कारणम् । तयोरपवादत्वात् । शतृशानचौ[‡] तिङपवादौ तौ चात्र बाधकौ न चाप-

---

* ३.१.१* † ३.३.१८ ‡ ३.२.१२४

वादविषय उत्सर्गोऽभिनिविशते । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते । तत्र तावदत्र कदाचित्तिङादेशो भवत्यपवादो तावच्छतृशानचौ प्रतीक्षते ॥ पाक्षिक एष दोषः । कतरस्मिन्पक्षे । शतृशानचोर्द्वैतं भवति । अप्रथमा वा विधिनाश्रीयते प्रथमा वा प्रतिषेधेनेति । विभक्तिनियमे चापि द्वैतं भवति । विभक्तिनियमो वा स्यादर्थनियमो वेति । तद्यदा तावदर्थनियमो ऽप्रथमा च विधिनाश्रीयते तदैष दोषो भवति । यदा हि विभक्तिनियमो यद्येवाप्रथमा विधिनाश्रीयते ऽथापि प्रथमा प्रतिषेधेन न तदा दोषो भवति ॥

षष्ठी शेषे ॥ २ । ३ । ५० ॥

शेष इत्युच्यते कः शेषो नाम । कर्मादिभ्यो येऽन्येऽर्थाः स शेषः । यद्येवं शेषो न प्रकल्पते । न हि कर्मादिभ्यो ऽन्येऽर्थाः सन्ति । इह तावद्राज्ञः पुरुष इति राजा कर्ता पुरुषः संप्रदानम् । वृक्षस्य शाखेति वृक्षः शाखाया अधिकरणम् । तथा यदेतत्स्वं नाम चतुर्भिरेतत्प्रकारैर्भवति क्रयणादपहरणाद्याच्ञाया विनिमयादिति । अत्र च सर्वत्र कर्मादयः सन्ति ॥ एवं तर्हि कर्मादीनामविवक्षा शेषः । कथं पुनः सतो नामाविवक्षा स्यात् । सतोऽप्यविवक्षा भवति । तद्यथा । अलोमिकैडका । अनुदरा कन्येति । असतश्च विवक्षा भवति । समुद्रः कुण्डिका । विन्ध्यो वर्धितकमिति ॥

किमर्थं पुनः शेषग्रहणम् ।

प्रत्ययावधारणाच्छेषवचनम् ॥ १ ॥

प्रत्ययावधारणाच्छेषग्रहणं कर्तव्यम् । प्रत्यया नियता अर्था अनियतास्तत्र षष्ठी प्राप्नोति । तत्र शेषग्रहणं कर्तव्यं षष्ठीनियमार्थम् । शेष एव षष्ठी भवति नान्यत्रेति ॥

अर्थावधारणाद्वा ॥ २ ॥

अथवार्था नियताः प्रत्यया अनियतास्ते शेषेऽपि प्राप्नुवन्ति । तत्र शेषग्रहणं कर्तव्यं शेषनियमार्थम् । शेषे षष्ठ्येव भवति नान्या इति ॥ अर्थनियमे शेषग्रहणं शक्यमकर्तुम् । कथम् । अर्था नियताः प्रत्यया अनियताः । ततो वक्ष्यामि षष्ठी

भवतीति । तन्नियमार्थं भविष्यति । यत्र षष्ठी चान्या च प्राप्नोति षष्ठ्येव तत्र भवतीति ॥

षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः ॥ ३ ॥

षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधो वक्तव्यः । राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यः । तत्र प्रातिपदिकार्थो व्यतिरिक्त इति कृत्वा प्रथमा* न प्राप्नोति । तत्र षष्ठी स्यात्तस्याः प्रतिषेधो वक्तव्यः ॥

तत्र प्रथमाविधिः ॥ ४ ॥

तत्र षष्ठीं प्रतिषिध्य प्रथमा विधेया । राज्ञः पुरुष इति ॥

उक्तं पूर्वेण ॥ ५ ॥

'किमुक्तम् । न वा वाक्यार्थत्वादिति† । यदत्राधिक्यं वाक्यार्थः सः । कुतो नु खल्वेतत्पुरुषे यदाधिक्यं स वाक्यार्थ इति न पुना राजनि यदाधिक्यं स वाक्यार्थः स्यात् । अन्तरेणापि पुरुषशब्दप्रयोगं राजनि सोऽर्थो गम्यते न पुनरन्तरेण राजशब्दप्रयोगं पुरुषे सोऽर्थो गम्यते । अस्ति कारणं येनैतदेवं भवति । किं कारणम् । राजशब्दाद्धि भवान्षष्ठीमुच्चारयति । अङ्ग हि भवान्पुरुषशब्दादप्युच्चारयतु गंस्यते सोऽर्थः ॥ ननु च नैतेनैवं भवितव्यम् । न हि शब्दकृतेन नामार्थेन भवितव्यम् । अर्थकृतेन नाम शब्देन भवितव्यम् । तदेतदेवं दृश्यतामर्थरूपमेवैतदेवंजातीयकं येनात्रान्तरेणापि पुरुषशब्दप्रयोगं राजनि सोऽर्थो गम्यते । किं पुनस्तत् । स्वामित्वम् । किंकृतं पुनस्तत् । स्वकृतम् । तद्यथा । प्रातिपदिकार्थानां क्रियाकृता विशेषा उपजायन्ते तत्कृताश्चाख्याः प्रादुर्भवन्ति कर्म करणमपादानं संप्रदानमधिकरणमिति । ताश्च पुनर्विभक्तीनामुत्पत्तौ कदाचिन्निमित्तत्वेनोपादीयन्ते कदाचिन्न । कदा च विभक्तीनामुत्पत्तौ निमित्तत्वेनोपादीयन्ते । यदा व्यभिचरन्ति प्रातिपदिकार्थम् । यदा हि न व्यभिचरन्त्याख्याभूता एव तदा भवन्ति कर्म करणमपादानं संप्रदानमधिकरणमिति ॥ यथैव तर्हि राजनि स्वकृतं स्वामित्वं तत्र षष्ठ्येवं पुरुषेऽपि स्वामिकृतं स्वत्वं तत्र षष्ठी प्राप्नोति । राजशब्दादुत्पद्यमानया षष्ठ्याभिहितः सोऽर्थ इति कृत्वा पुरुषशब्दात्षष्ठी न भविष्यति ॥ न तर्हीदानीमिदं भवति पुरुषस्य राजेति । भवति राजशब्दात्तु तदा प्रथमा ॥ न तर्हीदानीमिदं भवति राज्ञः पुरुषस्येति । भवति वाक्यमर्थमभिसमीक्ष्य ॥

---

* २१.४६ † ११.४१°

अधीगर्थदयेशां कर्मणि ॥ २ । ३ । ५२ ॥

कर्मादिष्वकर्मकवद्वचनम् ॥ १ ॥

कर्मादिष्वकर्मकवद्भावो वक्तव्यः । किं प्रयोजनम् । अकर्मकाणां भावे लो भवतीति* भावे लो यथा स्यात् । मातुः स्मर्यते । पितुः स्मर्यते ॥ अथ वत्करणं किमर्थम् । स्वाश्रयमपि यथा स्यात् । माता स्मर्यते । पिता स्मर्यत इति* ॥

कर्माभिधाने हि लिङ्गवचनानुपपत्तिः ॥ २ ॥

कर्माभिधाने हि सति लिङ्गवचनयोरनुपपत्तिः स्यात् । मातुः स्मृतम् । मात्रोः स्मृतम् । मातॄणां स्मृतमिति । मातुर्यल्लिङ्गं वचनं च तत्स्मृतशब्दस्यापि प्राप्नोति ॥

षष्ठीप्रसङ्गश्च ॥ ३ ॥

षष्ठी च प्राप्नोति । कुतः । स्मृतशब्दात् । मातुः सामानाधिकरण्यात्षष्ठी प्राप्नोति ॥

अपर आह । षष्ठीप्रसङ्गश्च । षष्ठी च प्रसज्या । कुतः । मातृशब्दात् । स्मृतशब्देनाभिहितं कर्मेति कृत्वा षष्ठी न प्राप्नोति ॥

तर्हि वक्तव्यम् । न वक्तव्यम् । अविवक्षिते कर्मणि षष्ठी भवति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । शेषे† इति वर्तते । शेषश्च कः । कर्मादीनामविवक्षा शेषः । यदा कर्म विवक्षितं भवति तदा षष्ठी न भवति । तद्यथा । स्मराम्यहं मातरम् । स्मराम्यहं पितरमिति ॥

रुजार्थानां भाववचनानामज्वरेः ॥ २ । ३ । ५४ ॥

अज्वरिसंताप्योरिति वक्तव्यम् । इहापि यथा स्यात् । चौरं संतापयति । वृषलं संतापयति ॥ अथ किमर्थं भाववचनानामित्युच्यते यावता रुजार्था भाववचना एव भवन्ति । भावकर्तृकाद्यथा स्यात् । इह मा भूत् । नदी कूलानि रुजतीति ॥

---

* ३.४.६९. † २.३.५०.

द्वितीया ब्राह्मणे ॥ २ । ३ । ६० ॥

किमुदाहरणम् । गां घ्नन्ति गां प्रदीव्यन्ति गां सभासद्भ्य उपहरन्ति । नैतदस्ति । पूर्वेणाप्येतत्सिद्धम्* ॥ इदं तर्हि । गामस्य तदहः सभायां दीव्येयुः ॥

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ॥ २ । ३ । ६१ ॥

हविषो ऽप्रस्थितस्य ॥ १ ॥

हविषो ऽप्रस्थितस्येति वक्तव्यम् । इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य ॥

चतुर्थ्यर्थे बहुलं छन्दसि ॥ २ । ३ । ६२ ॥

षष्ठ्यर्थे चतुर्थीवचनम् ॥ १ ॥

षष्ठ्यर्थे चतुर्थी वक्तव्या । या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीः । तस्या इति प्राप्ते । यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको याभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन्या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको जायते । अहल्यायै जार । मनायै तन्तुः ॥ तच्चार्हं वक्तव्यम् । न वक्तव्यम् । योगविभागात्सिद्धम् । चतुर्थी । ततो ऽर्थे बहुलं छन्दसीति ॥

कर्तृकर्मणोः कृति ॥ २ । ३ । ६५ ॥

ग्रहणं किमर्थम् । इह मा भूत् । पयसोदनं देवदत्त इति ।

---

* २ ३.५५

कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणानर्थक्यं लप्रतिषेधात् ॥ १ ॥

कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणमनर्थकम् । किं कारणम् । लप्रतिषेधात् । प्रतिषिध्यते तत्र षष्ठी लप्रयोगे नेति* ॥

तस्य कर्मकर्त्रर्थं तर्हि कृद्ग्रहणं कर्तव्यम् । कृतो ये कर्तृकर्मणी तत्र यथा स्यादन्यस्य ये कर्तृकर्मणी तत्र मा भूदिति । नैतदस्ति प्रयोजनम् । धातोर्हि द्वये प्रत्यया विधीयन्ते तिङश्च कृतश्च । तत्र कृत्प्रयोग इष्यते तिङ्प्रयोगे प्रतिषिध्यते ॥ न ब्रूम इहार्थं तस्य कर्मकर्त्रर्थं कृद्ग्रहणं कर्तव्यमिति । किं तर्हि । उत्तरार्थम् । अव्ययप्रयोगे नेति षष्ठ्याः प्रतिषेधं वक्ष्यति* स कृतोऽव्ययस्य ये कर्तृकर्मणी तत्र यथा स्यादकृतो ऽव्ययस्य ये कर्तृकर्मणी तत्र मा भूदिति । उच्चैः कटानां स्रष्टेति ।

तस्य कर्मकर्त्रर्थमिति चेत्प्रतिषेधेऽपि तदन्तकर्मकर्तृत्वात्सिद्धम् ॥ २ ॥

कृत एते कर्तृकर्मणी नाव्ययस्य । अधिकरणमत्राव्ययम् ॥

इदं तर्हि प्रयोजनम् । उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधं वक्ष्यति† स कृतो ये कर्तृकर्मणी तत्र यथा स्यात्कृतोर्थे कर्तृकर्मणी तत्र मा भूदिति । आश्चर्यमिदं वृत्तमोदनस्य च नाम पाको ब्राह्मणानां च प्रादुर्भाव इति । अथ क्रियमाणेऽपि कृद्ग्रहणे कस्मादेवात्र न भवति । उभयप्राप्ताविति नैवं विज्ञायत उभयोः प्राप्तिरुभयप्राप्तिः उभयप्राप्ताविति । कथं तर्हि । उभयोः प्राप्तिर्यस्मिन्कृति सोऽयमुभयप्राप्तिः कृत् उभयप्राप्ताविति ॥

अथवा कृतो ये कर्तृकर्मणी तत्र यथा स्यात्तद्धितस्य ये कर्तृकर्मणी तत्र मा भूदिति । कृतपूर्वी कटम् । भुक्तपूर्व्योदनमिति‡ ॥ ननु च वाक्येनैवानेन न भवितव्यम् । द्वितीयया तावन्न भवितव्यम् । किं कारणम् । क्तेनाभिहितं कर्मेति कृत्वा । इनिप्रत्ययेन चापि नोत्पत्तव्यम् । किं कारणम् । असामर्थ्यात् । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति ॥ यत्तावदुच्यते द्वितीयया तावन्न भवितव्यम् किं कारणम् क्तेनाभिहितं कर्मेति कृत्वेति । योऽसौ कृतकटयोरभिसंबन्धः स उत्पन्ने प्रत्यये निवर्तते । अस्ति च करोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति । यदप्युच्यत इनिप्रत्ययेन चापि नोत्पत्तव्यम् किं कारणम् असामर्थ्यात् कथमसामर्थ्यम् सापेक्षमसमर्थं भवतीति । नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च । यदा वाक्यं न तदा प्रत्ययः । यदा प्रत्ययः सामान्येन तदा वृत्तिस्तत्रावश्य विशेषार्थिना

* २.३.६९ † २.३.६६ ‡ ५.२.८७

विशेषोऽनुप्रयोक्तव्यः । कृतपूर्वी । किम् । कटम् । भुक्तपूर्वी । किम् । ओदनमिति ॥

अथवेदं प्रयोजनं कर्तृभूतपूर्वमात्रादपि षष्ठी यथा स्यात् । भेदिका* देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति ॥

उभयप्राप्तौ कर्मणि ॥ २ । ३ । ६६ ॥

उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधे ऽकादिप्रयोगे ऽप्रतिषेधः ॥ १ ॥

उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधे ऽकादिप्रयोगे प्रतिषेधो न भवतीति वक्तव्यम् । भेदिका देवदत्तस्य काष्ठानाम् । चिकीर्षा विष्णुमित्रस्य कटस्य ॥

अपर आह । अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यं शेषे विभाषा । शोभना खलु पाणिनेः सूत्रस्य कृतिः । शोभना खलु पाणिनिना सूत्रस्य कृतिः । शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः । शोभना खलु दाक्षायणेन संग्रहस्य कृतिरिति ॥

क्तस्य च वर्तमाने ॥ २ । ३ । ६७ ॥

क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानम् ॥ १ ॥

क्तस्य च वर्तमाने नपुंसके भाव† उपसंख्यानं कर्तव्यम् । छात्रस्य हसितम् । नटस्य भुक्तम् । मयूरस्य नृत्तम् । कोकिलस्य व्याहृतमिति ॥

शेषविज्ञानात्सिद्धम् ॥ २ ॥

शेषलक्षणात्र षष्ठी‡ भविष्यति । शेष इत्युच्यते कश्च शेषः । कर्मादीनामविवक्षा शेषः । कथं पुनः सतो नामाविवक्षा स्याद्यदा छात्रो हसति नटो भुङ्क्ते मयूरो नृत्यति कोकिलो व्याहरति । सतोऽप्यविवक्षा भवति । तद्यथा । अलोमिकैडका । अनुदरा कन्येति । असतश्च विवक्षा । समुद्रः कुण्डिका । विन्ध्यो वर्धितकमिति ॥ यद्येवमुत्तरत्र§ चातुःशब्द्यं प्राप्नोति । इदमहेः सृप्तम्¶ । इहाहिना सृप्तम् । इहाहिः सृप्तः । इहाहेः सृप्तं ग्रामस्य पार्श्वे ग्रामस्य मध्य इति । इष्यत एव चातुःशब्द्यम् ॥

* ३ ३ १११ † ३ ३.११४ ‡ २ ३ ५० § २ ३ ६८ ¶ ३ ४.७६

न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥ २ । ३ । ६९ ॥

लादेशे सल्लिड्ग्रहणं किकिनोः प्रतिषेधार्थम् ॥ १ ॥

लादेशे सल्लिड्ग्रहणं कर्तव्यम् । सल्लिटोः प्रयोगे नेति वक्तव्यम् । किं प्रयोजनम् । किकिनोः प्रतिषेधार्थम् । किकिनोरपि प्रयोगे प्रतिषेधो यथा स्यात् । पपिः सोमं ददिर्गाः ॥ किं पुनः कारणं न सिध्यति ।

तयोरलादेशत्वात् ॥ २ ॥

न हि तौ लादेशौ ॥ अथ तौ लादेशौ स्यातां स्यात्प्रतिषेधः । यदि स्यात् । लादेशौ तर्हि भविष्यतः । तत्कथम् । आदृगमहनजनः किकिनौ लिट् च [३.२.१७१] इति लिड्वदिति वक्ष्यामि । स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यलिटं लिडित्याह लिड्वदिति विज्ञास्यते ॥

उकारप्रयोगे नेति वक्तव्यम् । कटं चिकीर्षुः । ओदनं बुभुक्षुः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । उकारोऽप्यत्र निर्दिश्यते । कथम् । प्रश्लिष्टनिर्देशोऽयम् । उ उक ऊक ल ऊक लोकेति ॥

उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः ॥ ३ ॥

उकप्रतिषेधे कमेर्भाषायां प्रतिषेधो न भवतीति वक्तव्यम् । दास्याः कामुकः । वृषल्याः कामुकः ॥

अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः ॥ ४ ॥

अव्ययप्रतिषेधे तोसुन्कसुनोः प्रतिषेधो न भवतीति वक्तव्यम् । पुरा सूर्यस्योदेतोराधेयः । पुरा वत्सानामपाकर्तोः । पुरा क्रूरस्य विसृपो विरप्शिन् ॥

शानंश्चानश्शतृणामुपसंख्यानम् ॥ ५ ॥

शानंश्चानश्शतृणामुपसंख्यानं कर्तव्यम् । सोमं पवमानः । नडमाघ्नानः । अधीयन्पारायणम्* । लप्रयोगे नेति प्रतिषेधो न प्राप्नोति । मा भूदेवं तृनित्येवं भवि-

---

* १२. १२८-१३०.

ष्यति । कथम् । तृनिति नेदं प्रत्ययग्रहणम् । किं तर्हि । प्रत्याहारग्रहणम् । क्व संनिविष्टानां प्रत्याहारः । लटः शत्रित्यतः प्रभृत्या तृनो नकारात्[*] ॥ यदि प्रत्याहारग्रहणं चोरस्य द्विषन् वृषलस्य द्विषन् अत्रापि प्राप्नोति[†] ।

द्विषः शतुर्वावचनम् ॥ ६ ॥

द्विषः शतुर्वेति वक्तव्यम् । तच्चावश्यं वक्तव्यं प्रत्ययग्रहणे सति प्रतिषेधार्थम् । तदेव प्रत्याहारग्रहणे सति विध्यर्थं भविष्यति ॥

अकेनोर्भविष्यदाधमर्ण्ययोः ॥ २ । ३ । ७० ॥

अकस्य भविष्यति ॥ १ ॥

अकस्य भविष्यतीति वक्तव्यम् । यवाँल्लावको व्रजति । ओदनं भोजको व्रजति । सक्तून्पायको व्रजति[‡] ॥

इन आधमर्ण्ये च ॥ २ ॥

तत इन आधमर्ण्ये च भविष्यति चेति वक्तव्यम् । शतं दायी । सहस्रं दायी[§] । ग्रामं गमी[¶] ॥

कृत्यानां कर्तरि वा ॥ २ । ३ । ७१ ॥

कर्तृग्रहणं किमर्थम् । कर्मणि मा भूदिति । नैतदस्ति प्रयोजनम् । भावकर्मणोः कृत्या विधीयन्ते[**] तत्र कृत्यैरभिहितत्वात्कर्मणि षष्ठी न भविष्यति ॥ अत उत्तरं पठति ।

भव्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणम् ॥ १ ॥

भव्यादीनां[††] कर्म कृत्यैरनभिहितम् । गेयो माणवकः साम्नाम् । भव्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणं क्रियते ॥ किमुच्यते भव्यादीनां कर्म कृत्यैरनभिहितमिति । नेहाप्यनभिहितं भवति । आक्रष्टव्या ग्रामं शाखेति ॥ एवं तर्हि

* १.२ १३४ ११५ † २.३.१११ ‡ ३.३.१० § ३.३.१७० ¶ ३.१.१११
** १.४.७० †† ३.४.६८

योगविभागः करिष्यते । कृत्यानां प्रयोगे षष्ठी न भवतीति । किमुदाहरणम् । ग्राममाक्रष्टव्या शाखा । ततः कर्तरि वेति ॥ इहापि तर्हि प्राप्नोति । गेयो माणवकः साम्नामिति । उभयप्राप्ताविति* वर्तते । ननु चोभयप्राप्तिरेषा । गेयो माणवकः साम्नामिति च गेयानि माणवकेन सामानीति च भवति । उभयप्राप्तिर्नाम सा भवति यत्रोभयस्य युगपत्प्रसङ्गोऽत्र च यदा कर्मणि न तदा कर्तरि यदा कर्तरि न तदा कर्मणीति ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य तृतीये पादे तृतीयमाह्निकम् ॥ पादश्च समाप्तः ॥

* २ ३ ११

द्विगुरेकवचनम् ॥ २ । ४ । १ ॥

किमर्थमिदमुच्यते ।

प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानम् ॥ १ ॥

प्रत्यधिकरणं वचनोत्पत्तिर्भवति । किमिदं प्रत्यधिकरणमिति । अधिकरणमधिकरणं प्रति प्रत्यधिकरणम् । संख्यासामानाधिकरण्याच्च । संख्यया बह्वर्थया चास्य सामानाधिकरण्यम् । प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च बहुषु बहुवचनम् [१.४.२१] इति बहुवचनं प्राप्नोति । इष्यते चैकवचनं स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति द्विगोरेकवचनविधानम् । एवमर्थमिदमुच्यते ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति ।

तत्रानुप्रयोगस्यैकवचनाभावोऽद्विगुत्वात् ॥ २ ॥

तत्रानुप्रयोगस्यैकवचनं न प्राप्नोति । पञ्चपूलीयमिति । किं कारणम् । अद्विगुत्वात् । द्विगोरेकवचनमित्युच्यते न चात्रानुप्रयोगो द्विगुसंज्ञः ॥

सिद्धं तु द्विग्वर्थस्यैकवद्वचनात् ॥ ३ ॥

सिद्धमेतत् । कथम् । द्विग्वर्थ एकवद्भवतीति वक्तव्यम् ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । नेदं पारिभाषिकस्य वचनस्य ग्रहणम् । किं तर्हि । अन्वर्थग्रहणम् । उच्यते वचनम् एकस्यार्थस्य वचनमेकवचनमिति ॥

एकशेषप्रतिषेधश्च ॥ ४ ॥

एकशेषस्य च प्रतिषेधो वक्तव्यः । पञ्चपूली च पञ्चपूली च पञ्चपूली च पञ्चपूल्यः ॥

न वान्यस्यानेकत्वात् ॥ ५ ॥

न वा वक्तव्यः । किं कारणम् । अन्यस्यानेकत्वात् । नैतद्द्विगोरनेकत्वम् । कस्य तर्हि । द्विग्वर्थसमुदायस्य ॥

समाहारग्रहणं च तद्धितार्थप्रतिषेधार्थम् ॥ ६ ॥

समाहारग्रहणं च कर्तव्यम् । किं प्रयोजनम् । तद्धितार्थप्रतिषेधार्थम् । तद्धितार्थे यो द्विगुस्तस्य मा भूदिति । पञ्चकपाली पञ्चकपाला इति* ॥ किं पुनरयं पञ्चकपालशब्दः प्रत्येकं परिसमाप्यत आहोस्वित्समुदाये वर्तते । किं चातः । यदि तावत्प्रत्येकं परिसमाप्यते पुरस्तादेव चोदितं परिहृतं च । अथ समुदाये वर्तते ।

न वा समाहारैकत्वात् ॥ ७ ॥

न वैतत्समाहारैकत्वादपि सिध्यति । एवं तर्हि प्रत्येकं परिसमाप्यते । पुरस्तादेव चोदितं परिहृतं च ॥

अपर आह । न वा समाहारैकत्वात् । न वा योगारम्भेणैवार्थः । किं कारणम् । समाहारैकत्वात् । एकोऽयमर्थः समाहारो नाम तस्यैकत्वादेकवचनं भविष्यति ॥

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥ २ । ४ । २ ॥

प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणम् ॥ १ ॥

प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणं कर्तव्यम् । प्राण्यङ्गानां प्राण्यङ्गैरिति वक्तव्यम् । तूर्याङ्गानां तूर्याङ्गैः । सेनाङ्गानां सेनाङ्गैरिति । किं प्रयोजनम् । व्यतिकरो मा भूदिति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् ।

योगविभागात्सिद्धम् ॥ २ ॥

योगविभागः करिष्यते । द्वन्द्वश्च प्राण्यङ्गानाम् । ततस्तूर्याङ्गानाम् । ततः सेनाङ्गानामिति ॥ स तर्हि योगविभागः कर्तव्यः । न कर्तव्यः । प्रत्येकमङ्गशब्दः परिसमाप्यते ॥

अनुवादे चरणानाम् ॥ २ । ४ । ३ ॥

इह कस्मान्न भवति । नन्दन्तु कठकालापाः । वर्धन्तां कठकौथुमाः ।

---

* ४ २ २६, ४ १. ८८

स्थेणोः ॥ १ ॥

स्थेणोरिति वक्तव्यम् ॥ एवमपि तिष्ठन्तु कठकालापा इत्यत्रापि प्राप्नोति ।

अद्यतन्यां च ॥ २ ॥

अद्यतन्यां चेति वक्तव्यम् । उदगात्कठकालापम् । प्रत्यष्ठात्कठकौथुमम् । उदगान्मौदपैप्पलादम् ॥

विशिष्टलिङ्गो नदी देशोऽग्रामाः ॥ २ । ४ । ७ ॥

ग्रामप्रतिषेधे नगरप्रतिषेधः ॥ १ ॥

अग्रामा इत्यत्रानगराणामिति वक्तव्यम् । इह मा भूत् । मथुरापाटलिपुत्रमिति ॥

उभयतश्च ग्रामाणाम् ॥ २ ॥

उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः । इह मा भूत् । शौर्यं च केतवता च शौर्यकेतवते । जाम्बवं च शालुकिनी च जाम्बवशालुकिन्यौ ॥

क्षुद्रजन्तवः ॥ २ । ४ । ८ ॥

क्षुद्रजन्तव इत्युच्यते के पुनः क्षुद्रजन्तवः । क्षोत्तव्या जन्तवः । यद्येवं यूकालिक्षम् कीटपिपीलिकमिति न सिध्यति ॥ एवं तर्ह्यनस्थिकाः क्षुद्रजन्तवः । अथवा येषां स्वं शोणितं नास्ति ते क्षुद्रजन्तवः । अथवा येषामा सहस्रादञ्जलिर्न पूर्यते ते क्षुद्रजन्तवः । अथवा येषां गोचर्ममात्रं राशिं हत्वा न पतितो भवति ते क्षुद्रजन्तवः । अथवा नकुलपर्यन्ताः क्षुद्रजन्तवः ॥

येषां च विरोधः शाश्वतिकः ॥ २ । ४ । ९ ॥

किमर्थश्चकारः । एवकारार्थश्चकारः । येषां विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति । किं चान्यत्प्राप्नोति । पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धमित्युक्तं* स पूर्वविप्रतिषेधो न वक्तव्यो भवति ॥

---

* २.४.१२.

शूद्राणामनिरवसितानाम् ॥ २ । ४ । १० ॥

अनिरवसितानामित्युच्यते कुतोऽनिरवसितानाम् । आर्यावर्तादनिरवसितानाम् । कः पुनरार्यावर्तः । प्रागादर्शात्प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । यद्येवं किष्किन्धगन्धिकम् शकयवनम् शौर्यक्रौञ्चमिति न सिध्यति ॥ एवं तर्ह्यार्यनिवासादनिरवसितानाम् । कः पुनरार्यनिवासः । ग्रामो घोषो नगरं संवाह इति । एवमपि य एते महान्तः संस्त्यायास्तेष्वभ्यन्तराश्चण्डाला मृतपाश्च वसन्ति तत्र चण्डालमृतपा इति न सिध्यति ॥ एवं तर्हि याज्ञात्कर्मणोऽनिरवसितानाम् । एवमपि तक्षायस्कारम् रजकतन्तुवायमिति न सिध्यति ॥ एवं तर्हि पात्रादनिरवसितानाम् । यैर्भुक्ते पात्रं संस्कारेण शुध्यति तेऽनिरवसिताः । यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः ॥

गवाश्वप्रभृतीनि च ॥ २ । ४ । ११ ॥

गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम् ॥ १ ॥

गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं द्रष्टव्यम् । गवाश्वम् गवाविकम् गवैडकम् ॥

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ॥ २ । ४ । १२ ॥

बहुप्रकृतिः फलसेनावनस्पतिमृगशकुन्तक्षुद्रजन्तुधान्यतृणानाम् ॥ १ ॥

फलसेनावनस्पतिमृगशकुन्तक्षुद्रजन्तुधान्यतृणानां द्वन्द्वो विभाषैकवद्भवति बहुप्रकृतिरिति वक्तव्यम् । फल । बदरामलकम् बदरामलकानि । सेना । हस्त्यश्वम् हस्त्यश्वाः । वनस्पति । प्लक्षन्यग्रोधम् प्लक्षन्यग्रोधाः । मृग । रुरुपृषतम् रुरुपृषताः । शकुन्त । हंसचक्रवाकम् हंसचक्रवाकाः । क्षुद्रजन्तु । यूकालिक्षम् यूकालिक्षाः । धान्य । व्रीहियवम् व्रीहियवाः । माषतिलम् माषतिलाः । तृण । कुशकाशम्

कुशकाशाः । शरशीर्यम् शरशीर्याः । किं प्रयोजनम् । बहुप्रकृतिरेव यस्तत्र यथा स्यात् । क्व मा भूत् । बदरामलके तिष्ठतः ॥ किं पुनरनेन या प्राप्तिः सा नियम्यत आहोस्विदविशेषेण । किं चातः । यद्यनेन या प्राप्तिः सा नियम्यते प्लक्षन्यग्रोधौ जातिरप्राणिनाम् [२.४.६] इति नित्यो द्वन्द्वैकवद्भावः प्राप्नोति । अथाविशेषेण न दोषो भवति । यथा न दोषस्तथास्तु ॥

पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धम् ॥ २ ॥

पशुशकुनिद्वन्द्वे येषां च विरोधः शाश्वतिकः [२.४.९] इत्येतद्भवति पूर्वविप्रतिषेधेन । पशुशकुनिद्वन्द्वस्यावकाशः । महाजोरभ्रम् महाजोरभ्राः । हंसचक्रवाकम् हंसचक्रवाकाः । येषां च विरोध इत्यस्यावकाशः । श्रमणब्राह्मणम् । इहोभयं प्राप्नोति । काकोलूकम् श्वशृगालमिति । येषां च विरोध इत्येतद्भवति पूर्वविप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । उक्तं तत्र चकारकरणस्य प्रयोजनं येषां च विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्याद्यदन्यत्प्राप्नोति तन्मा भूदिति* ॥

अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकम् ॥ ३ ॥

अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकं भवति पूर्वविप्रतिषेधेन† । अश्ववडवयोः पूर्वलिङ्गत्वस्यावकाशः । विभाषा पशुद्वन्द्वनपुंसकं यदा न पशुद्वन्द्वनपुंसकं सोऽवकाशः । अश्ववडवौ । पशुद्वन्द्वनपुंसकस्यावकाशः । अन्ये पशुद्वन्द्वाः । महाजोरभ्रम् महाजोरभ्राः । पशुद्वन्द्वनपुंसकप्रसङ्ग उभयं प्राप्नोति । अश्ववडवम् । पशुद्वन्द्वनपुंसकं भवति पूर्वविप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः ।

प्रतिपदविधानात्सिद्धम् ॥ ४ ॥

प्रतिपदमत्र नपुंसकं विधीयते । अश्ववडवपूर्वापरेति ॥

एकवचनमनर्थकं समाहारैकत्वात् ॥ ५ ॥

एकवद्भावो ऽनर्थकः । किं कारणम् । समाहारैकत्वात् । एकोऽयमर्थः समाहारो नाम तस्यैकत्वादेकवचनं भविष्यति ॥ इदं तर्हि प्रयोजनम् । एतज्ज्ञास्यामीह नित्यो विधिरिह विभाषेति । नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति सर्वो

* २ ४ ९*. † २ ४. २७, २९.

द्वन्द्वो विभाषैकवद्भवतीति यदय तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् [१.२.६३] इत्याह ॥ इद तर्हि प्रयोजनम् । स नपुंसकम् [२.४ १७] इति वक्ष्यामीति । एतदपि नास्ति प्रयोजनम् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य ॥ न तर्हीदानीमिदं वक्तव्यम् । वक्तव्यं च । किं प्रयोजनम् । पूर्वत्र नित्यार्थमुत्तरत्र व्यभिचारार्थं विभाषा वृक्षमृगेति ॥

विभाषा समीपे ॥ २ । ४ । १६ ॥

किमुदाहरणम् । उपदश पाणिपादम् । उपदशाः पाणिपादाः । नैतदस्ति प्रयोजनम् । अथ द्वन्द्वैकवद्भाव आरभ्यते तत्र क प्रसङ्गो यदनुप्रयोगस्य स्यात् ॥ एवं तर्ह्यव्ययस्य सङ्ख्ययाव्ययीभावोऽप्यारभ्यते बहुव्रीहिरपि* । तद्यदा तावदेकवचनं तदाव्ययीभावोऽनुप्रयुज्यत एकार्थस्यैकार्थ इति । यदा बहुवचनं तदा बहुव्रीहिरनुप्रयुज्यते बह्वर्थस्य बह्वर्थ इति ॥

तत्पुरुषोऽनञ्कर्मधारयः ॥ २ । ४ । १९ ॥

किमर्थमिदमुच्यते । संज्ञाया कन्थोशीनरेषु [२ ४ २०] इति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति । नैतदस्ति प्रयोजनम् । न हि संज्ञायां कन्थान्त उशीनरेष्वतत्पुरुषो नञ्समासः कर्मधारयो वास्ति ॥ उत्तरार्थं तर्हि । उपज्ञोपक्रमं तदाद्याचिख्यासायाम् [२१] इति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति । एतदपि नास्ति प्रयोजनम् । न हि तदाद्याचिख्यासायामुपज्ञोपक्रमान्तोऽतत्पुरुषो नञ्समासः कर्मधारयो वास्ति ॥ उत्तरार्थमेव तर्हि । छाया बाहुल्ये [२२] इति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति । एतदपि नास्ति प्रयोजनम् । न हि च्छायान्तो बाहुल्येऽतत्पुरुषो नञ्समासः कर्मधारयो वास्ति ॥ उत्तरार्थमेव तर्हि । सभा राजामनुष्यपूर्वा [२३] अशाला च [२४] इति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति । एतदपि नास्ति प्रयोजनम् । न हि सभान्तोऽशालायामतत्पुरुषो नञ्समासः कर्मधारयो वास्ति ॥ इदं तर्हि । विभाषा सेनासुरा [२५]

* २ १ ६ २ २ २५

इति वक्ष्यति तदतत्पुरुषस्य नञ्समासस्य कर्मधारयस्य वा मा भूदिति ॥ तत्पुरुष इति किमर्थम् । दृढसेनो राजा ॥ अनञिति किमर्थम् । असेना ॥ अकर्मधारय इति किमर्थम् । परमसेना उत्तमसेना ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ २ । ४ । २६ ॥

किमर्थमिदमुच्यते । द्वन्द्वोऽयमुभयपदार्थप्रधानस्तत्र कदाचित्पूर्वपदस्य यल्लिङ्गं तत्समासस्यापि स्यात्कदाचिदुत्तरपदस्य । इष्यते च परस्य यल्लिङ्गं तत्समासस्य यथा स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति । एवमर्थमिदमुच्यते ॥ तत्पुरुषश्चापि कः प्रयोजयति । यः पूर्वपदार्थप्रधानः । एकदेशिसमासः । अर्धपिप्पलीति* । यो ह्युत्तरपदार्थप्रधानो दैवकृतं तस्य परवल्लिङ्गम् ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधः ॥ १ ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नो जीविकामापन्नजीविकः ॥ अलंपूर्व । अलं जीविकाया अलंजीविकः ॥ गतिसमास । निष्कौशाम्बिः निर्वाराणसिः† ॥

पूर्वपदस्य च ॥ २ ॥

पूर्वपदस्य च प्रतिषेधो वक्तव्यः । मयूरीकुक्कुटौ ॥ यदि पुनर्यथाजातीयकं परस्य लिङ्गं तथाजातीयकं समासादन्यदतिदिश्येत ।

समासादन्यल्लिङ्गमिति चेदश्ववडवयोष्टाब्लुग्वचनम् ॥ ३ ॥

समासादन्यल्लिङ्गमिति चेदश्ववडवयोष्टापो लुग्वक्तव्यः । अश्ववडवौ‡ ॥

निपातनात्सिद्धम् ॥ ४ ॥

निपातनात्सिद्धमेतत् । किं निपातनम् ॥ अश्ववडवपूर्वापरेति§ ॥

उपसर्जनह्रस्वत्वं वा ॥ ५ ॥

अथवोपसर्जनस्येति¶ ह्रस्वत्वं भविष्यति ॥ इहापि तर्हि प्राप्नोति । कुक्कुटमयूर्यौ । अस्तु ।

* २.२.२ † २.२.४,२.२ १८* ‡ २.४.२७ § २.४.२७ ¶ १.२.४८

परवल्लिङ्गमिति शब्दशब्दार्थौ ॥ ६ ॥

परवल्लिङ्गमिति शब्दशब्दार्थावतिदिश्येते । तत्रौपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति ॥ इदं तर्हि । दत्ता च कारीषगन्ध्या च दत्ताकारीषगन्ध्ये । दत्ता च गार्ग्यायणी च दत्तागार्ग्यायण्यौ । द्वौ ष्यङौ द्वौ ष्फौ च प्राप्नुतः* । स्त्राम् । पुंवद्भावेनैकस्य निवृत्तिर्भविष्यति† ॥ इदं तर्हि । दत्ता च युवतिश्च दत्तायुवती । द्वौ तिशब्दौ प्राप्नुतः‡ । तस्मान्नैतच्छक्यं वक्तुं शब्दशब्दार्थावतिदिश्येते इति । ननु चोक्तं समासादन्यल्लिङ्गमिति चेदश्वबडवयोष्टाब्लुग्वचनमिति । परिहृतमेतन्निपातनात्सिद्धमिति ॥ अथवा नैवं विज्ञायते परस्यैव परवदिति । कथं तर्हि । परस्येव परवदिति । यथाजातीयकं परस्य लिङ्गं तथाजातीयकं समासस्यातिदिश्यते ॥ अथ पूर्वपदस्य न प्रतिषिध्यते प्राप्तादिषु कथम् ।

प्राप्तादिषु चैकदेशिग्रहणात्सिद्धम् ॥ ७ ॥

द्वन्द्वैकदेशिनोरिति वक्ष्यामि ॥ तदेकदेशिग्रहणं कर्तव्यम् । न कर्तव्यम् । एकदेशिसमासोऽ नारप्स्यते । कथमर्धपिप्पलीति । समानाधिकरणसमासो भविष्यति¶ । अर्धं च सा पिप्पली चार्धपिप्पलीति । न सिध्यति । परत्वात्षष्ठीसमासः प्राप्नोति** । अथ पुनरयमेकदेशिसमास आरभ्यमाणः षष्ठीसमासं बाधते । इष्यते च षष्ठीसमासोऽपि । तद्यथा । अपूपार्धं मया भक्षितम् । ग्रामार्धं मया लब्धमिति । एवं पिप्पल्यर्धमिति भवितव्यम् । कथमर्धपिप्पलीति । समानाधिकरणो भविष्यति ॥

रात्राह्नाहाः पुंसि ॥ २ । ४ । २९ ॥

अनुवाकादयः पुंसि ॥ १ ॥

अनुवाकादयः पुंसि भाष्यन्त इति वक्तव्यम् । अनुवाकः शंयुवाकः सूक्तवाकः ॥

अपथं नपुंसकम् ॥ २ । ४ । ३० ॥

पुण्यसुदिनाभ्यामह्नो नपुंसकत्वं वक्तव्यम् । पुण्याहम् सुदिनाहम् ॥

---

* ४।१।७८, ७९. † ६।३।३५* ‡ ४।१।७७ § २।२।१-२ ¶ २।१।५७ ** २।२।८

पथः संख्याव्ययादेः ॥ १ ॥

पथः संख्याव्ययादेरिति वक्तव्यम् । द्विपथम् त्रिपथम् चतुष्पथम् । उत्पथम् विपथम् ॥

द्विगुश्च ॥ २ ॥

द्विगुश्च समासो नपुंसकलिङ्गो भवतीति वक्तव्यम् । पञ्चगवम् दशगवम् ॥
अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति वक्तव्यम् । पञ्चपूली दशपूली ॥

वावन्तः ॥ ३ ॥

वावन्तः स्त्रियां भाष्यत इति वक्तव्यम् । पञ्चखट्वम् पञ्चखट्वी । दशखट्वम् दशखट्वी ॥

अनो नलोपश्च वा च स्त्रियां भाष्यत इति वक्तव्यम् । पञ्चतक्षम् पञ्चतक्षी । दशतक्षम् दशतक्षी ॥

पात्रादिभ्यः प्रतिषेधो वक्तव्यः । द्विपात्रम् पञ्चपात्रम् ॥

अर्धर्चाः पुंसि च ॥ २ । ४ । ३१ ॥

अर्धर्चादय इति वक्तव्यम् । अर्धर्चम् अर्धर्चः । कार्षापणम् कार्षापणः । गोमयम् गोमयः । सारम् सारः ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । बहुवचननिर्देशादाद्यर्थो गम्यते ॥

इदमो ऽन्वादेशे ऽशनुदात्तस्तृतीयादौ ॥ २ । ४ । ३२ ॥

अन्वादेशे समानाधिकरणग्रहणम्

अन्वादेशे समानाधिकरणग्रहणं कर्तव्यम् । किं प्रयोजनम् ।

देवदत्तं भोजयेमं चेत्यप्रसङ्गार्थम् ॥ १ ॥

इह मा भूत् । देवदत्तं भोजयेमं च यज्ञदत्तं भोजयेति ॥

अन्वादेशश्च कथितानुकथनमात्रम् ॥ २ ॥

अन्वादेशश्च कथितानुकथनमात्रं द्रष्टव्यम् । तद्धेयं विजानीयादिदमा कथितमिदमैव यदानुकथ्यत इति । तदाचार्यः सुहृद्भूत्वान्वाचष्टे ऽन्वादेशश्च कथितानुकथनमात्रं द्रष्टव्यमिति ॥

अथ किमर्थमशादेशः क्रियते न तृतीयादिष्विरयेवोच्येत । तत्र टायामोसि चैनेन* भवितव्यमन्याः सर्वा हलादयो विभक्तयस्तत्रेद्रूपलोपे कृते† केवलमिदमोऽनुदात्तत्वमेव वक्तव्यम् ॥ अत उत्तरं पठति ।

आदेशवचनं साकच्कार्थम् ॥ ३ ॥

आदेशवचनं साकच्कार्थं क्रियते । साकच्कस्यापीदम आदेशो यथा स्यात् । इमकाभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम् ॥ अथ किमर्थं शित्करणम् ।

शित्करणं सर्वादेशार्थम् ॥ ४ ॥

शित्करणं क्रियते सर्वादेशार्थम् । शित्सर्वस्येति‡ सर्वादेशो यथा स्यात् । इमकाभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतमिति । अक्रियमाणे हि शित्करणे ऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत§ ॥

न वान्त्यस्य विकारवचनानर्थक्यात् ॥ ५ ॥

न वा कर्तव्यम् । किं कारणम् । अन्त्यस्य विकारवचनानर्थक्यात् । अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वान्तरेणापि शकारं सर्वादेशो भविष्यति ॥

अर्थवत्त्वादेशप्रतिषेधार्थम् ॥ ६ ॥

अर्थवत्त्वमकारस्याकारवचनम् । कोऽर्थः । आदेशप्रतिषेधार्थम् । ये ऽन्ये ऽकारस्यादेशाः प्राप्नुवन्ति तद्बाधनार्थम् । तद्यथा । मो राजि समः क्वौ [८.३.२५] इति मकारस्य मकारवचने प्रयोजनं नास्तीति कृत्वानुस्वारादयो बाध्यन्ते ॥

तस्माच्छित्करणम् ॥ ७ ॥

तस्माच्छकारः कर्तव्यः ॥ न कर्तव्यः । प्रश्लिष्टनिर्देशोऽयम् । अ अ इति । अनेकाल्शित्सर्वस्य [१.१.५५] इति सर्वादेशो भविष्यति ॥ अथवा विचित्रा हि तद्धितवृत्तयः । नान्वादेशेऽकजुत्पत्स्यते ॥

* २.४.३४. † ७.२.११३ ‡ १.१.५५ § १.१.५२.

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥२।४।३२ ॥

किमर्थं त्रतसोरनुदात्तत्वमुच्यते । उदात्तौ* मा भूतामिति । नैतदस्ति प्रयोजनम् । लित्स्वरे कृते निघाते† एतदोऽनुदात्तत्वेन सिद्धम् । इदमिह संप्रधार्यम् । अनुदात्तत्वं क्रियतां लित्स्वर इति किमत्र कर्तव्यम् । परत्वाल्लित्स्वरः । नित्यमनुदात्तत्वम् । कृतेऽपि लित्स्वरे प्राप्नोत्यकृतेऽपि । तत्र नित्यत्वादनुदात्तत्वे कृते लिति पूर्वं उदात्तभावी नास्तीति कृत्वा यथाप्राप्तः प्रत्ययस्वरः प्रसज्येत । तद्यथा । गोष्पदप्रं वृष्टो देव इत्यूलोपे कृते‡ पूर्वं उदात्तभावी नास्तीति कृत्वा यथाप्राप्तः प्रत्ययस्वरो भवति । तस्मात्त्रतसोरनुदात्तत्वं वक्तव्यम् ॥

द्वितीयाटौस्स्वेनः ॥ २ । ४ । ३४ ॥

कस्यायमेनो विधीयते । एतदः§ प्राप्नोति । इदमोऽपि स्विष्यते तदिदमो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । इदमो ऽन्वादेशेऽशानुदात्तस्तृतीयादौ [२.४.३२] इति ॥ यदि तदनुवर्तत एतदस्त्रतसोस्त्रतसौ चानुदात्तौ [३३] इतीदमश्चेतीदमोऽपि प्राप्नोति । नैष दोषः । सबन्धमनुवर्तिष्यते । इदमो ऽन्वादेशेऽशानुदात्तस्तृतीयादौ । एतदस्त्रतसोस्त्रतसौ चानुदात्तौ इदमोऽन्वादेशे ऽशानुदात्तस्तृतीयादावश्भवति । ततो द्वितीयाटौस्स्वेन इदम एतदश्च । तृतीयादाविति निवृत्तम् ॥ अथवा मण्डूकगतयो ऽधिकाराः । तद्यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः ॥ अथवैकयोगः करिष्यते । इदमो ऽन्वादेशेऽशानुदात्तस्तृतीयादावेतदस्त्रतसोस्त्रतसौ चानुदात्तौ । ततो द्वितीयाटौस्स्वेन इदम एतदश्च ॥ अथवोभयं निवृत्तं तदपेक्षिष्यामहे ॥

एनदिति नपुंसकैकवचने ॥ १ ॥

एनदिति नपुंसकैकवचने कर्तव्यम् । कुण्डमानय प्रक्षालयैनत्परिवर्तयैनत् ॥ यद्येनच्क्रियत एनो न वक्तव्यः । का रूपसिद्धिः अथो एनम् अथो एने अथो एनानीति । त्यदाद्यत्वेन सिद्धम्¶ ॥ यद्येवमेनच्छ्रितको न सिध्यति । एनच्छ्रितक इति प्राप्नोति । यथालक्षणमप्रयुक्ते ॥

* ३.१.३ † ५.३.७, १०, ६.१.१९३, १५८ ‡ २.४.३२ § २.४.३३. ¶ ७.२.१०२.

आर्धधातुके ॥ २ । ४ । ३५ ॥

जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानम् ॥ १ ॥

जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्नार्धधातुके जग्ध्यादिभिर्भवितव्यम् ॥ किमतो यत्सति भवितव्यम् ।

तत्रोत्सर्गलक्षणप्रतिषेधः ॥ २ ॥

तत्रोत्सर्गलक्षणं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः । भव्यम् प्रवेयम् आख्येयमिति* । ण्यत्यत्रस्थिते† ऽनिष्टे प्रत्यय आदेशः स्यात् । ण्यतः श्रवणं प्रसज्येत‡ ॥ नैष दोषः । सामान्याश्रयत्वाद्विशेषस्यानाश्रयः । सामान्ये ह्याश्रीयमाणे विशेषो नाश्रितो भवति । तत्रार्धधातुकसामान्ये जग्ध्यादिषु कृतेषु यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति ।

सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्गः ॥ ३ ॥

सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यत्प्राप्नोति । लव्यम् पव्यमिति । आर्धधातुकसामान्ये गुणे कृते यि प्रत्ययसामान्ये च वान्तादेशे हलन्तादिति ण्यत्प्राप्नोति§ । इह च दित्स्यम् धित्स्यम् आर्धधातुकसामान्ये ऽकारलोपे कृते हलन्तादिति ण्यत्प्राप्नोति¶ ॥

पौर्वापर्याभावाच्च सामान्येनानुपपत्तिः ॥ ४ ॥

पौर्वापर्याभावाच्च सामान्येन जग्ध्यादीनामनुपपत्तिः । न हि सामान्येन पौर्वापर्यमस्ति ॥

सिद्धं तु सार्वधातुके प्रतिषेधात् ॥ ५ ॥

सिद्धमेतत् । कथम् । अविशेषेण जग्ध्यादीनुक्त्वा सार्वधातुके नेति प्रतिषेधं वक्ष्यामि । सिध्यति । सूत्रं तर्हि भिद्यते ॥

---

* २.४.५२,५६,५४. † ३.१.१२४ ‡ ७.२.११५, ७.३.३३
§ ७.३.८४, ६.१.७९; ३.१.१२४. ¶ ६.४.४८, ३.१.१२४.

यथान्यासमेवास्तु । ननु चोक्तं जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानमिति । परिहृतमेतत्सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति । ननु चोक्तं सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्ग इति । नैष दोषः । वक्ष्यति तत्राज्ग्रहणस्य प्रयोजनमजन्तभूतपूर्वमात्रादपि यथा स्यादिति* ॥ यदप्युच्यते पौर्वापर्याभावाच्च सामान्येनानुपपत्तिरिति । अर्थसिद्धिरेवैषा यत्सामान्येन पौर्वापर्यं नास्ति । असति पौर्वापर्ये विषयसप्तमी विज्ञास्यते । आर्धधातुकविषय इति । तत्रार्धधातुकविषये जग्ध्यादिषु कृतेषु यो यतः प्राप्नोति प्रत्ययः स ततो भविष्यति ॥ अथवार्धधातुकास्विति वक्ष्यामि । कास्वार्धधातुकासु । उक्तिषु युक्तिषु रूढिषु प्रतीतिषु श्रुतिषु संज्ञासु ॥

अदो जग्धिर्ल्यप्ति किति ॥ २ । ४ । ३६ ॥

ल्यब्ग्रहणं किमर्थं न ति कितीत्येव सिद्धम् । ल्यपि कृते† न प्राप्नोति । इदमिह संप्रधार्यम् । ल्यप्क्रियतामादेश इति किमत्र कर्तव्यम् । परत्वाल्ल्यप् । अन्तरङ्ग आदेशः । एवं तर्हि सिद्धे सति यल्ल्यब्ग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत इति । किमेतस्य ज्ञापने प्रयोजनम् । ल्यबादेशे उपदेशिवद्वचनमप्रादिष्टार्थं बहिरङ्गलक्षणत्वादिति वक्ष्यति‡ तन्न वक्तव्यं भवति ॥

जग्धिविधिर्ल्यपि यत्तदकस्मात्सिद्धमदस्ति कितीति विधानात् ।
हिप्रभृतींस्तु§ सदा बहिरङ्गो ल्यब्भरतीति कृतं तदु विद्धि ॥

एष एवार्थः ।

जग्धौ सिद्धेऽन्तरङ्गत्वात्ति कितीति ल्यबुच्यते ।
ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् ॥

लुङ्सनोर्घस्लृ ॥ २ । ४ । ३७ ॥

घस्लृभावेऽच्युपसंख्यानम् ॥ १ ॥

घस्लृभावेऽच्युपसंख्यानं कर्तव्यम् । प्रात्तीति प्रघसः ॥

* १.१.६२ † ७.१.२० ‡ ७.१.३७ § ७.४.४२

हनो वध लिङि ॥ २ । ४ । ४२ ॥ लुङि च ॥ २ । ४ । ४३ ॥

किमयं वधिर्व्यञ्जनान्त आहोस्विददन्तः । किं चातः । यदि व्यञ्जनान्तो

वधौ व्यञ्जनान्त उक्तम् ॥ १ ॥

किमुक्तम् । वध्यादेशे वृद्धितत्वप्रतिषेध इड्विधिश्चेति* । अथादन्तो न दोषो भवति । यथा न दोषस्तथास्तु ॥

इणो गा लुङि ॥ २ । ४ । ४५ ॥

इण्वदिकः ॥ १ ॥

इण्वदिक इति वक्तव्यम् । इहापि यथा स्यात् । अध्यगात् अध्यगाताम् अध्यगुः ॥

णौ गमिरबोधने ॥ २ । ४ । ४६ ॥

इण्वदिक इत्येव । अधिगमयति अधिगमयतः अधिगमयन्ति ॥

सनि च ॥ २ । ४ । ४७ ॥

इण्वदिक इत्येव । अधिजिगमिषति अधिजिगमिषतः अधिजिगमिषन्ति ॥

गाङ्कुटि ॥ २ । ४ । ४९ ॥

ङित्करणं किमर्थम् ।

गाङ्यनुबन्धकरणं विशेषणार्थम् ॥ १ ॥

गाङ्यनुबन्धकरणं क्रियते विशेषणार्थम् । क्व विशेषणार्थेनार्थः । गाङ्कुटादि-

* १ । ५५*.

यथान्यानमेवास्तु । ननु चोक्तं जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानमिति । परिहृतमेतत्सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति । ननु चोक्तं सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्ग इति । नैष दोषः । वक्ष्यति तत्राज्ग्रहणस्य प्रयोजनमजन्तभूतपूर्वमात्रादपि यथा स्यादिति*॥ यदप्युच्यते पौर्वापर्याभावाच्च सामान्येनानुपपत्तिरिति । अर्थसिद्धिरेवैषा यत्सामान्येन पौर्वापर्यं नास्ति । असति पौर्वापर्ये विषयसप्तमी विज्ञास्यते । आर्धधातुकविषय इति । तत्रार्धधातुकविषये जग्ध्यादिषु कृतेषु यो यतः प्राप्नोति प्रत्ययः स ततो भविष्यति ॥ अथवार्धधातुकास्विति वक्ष्यामि । कास्वार्धधातुकासु । उक्तिषु युक्तिषु रूढिषु प्रतीतिषु श्रुतिषु संज्ञासु ॥

अदो जग्धिर्ल्यप्ति किति ॥ २ । ४ । ३६ ॥

ल्यब्ग्रहणं किमर्थं न ति कितीत्येव सिद्धम् । ल्यपि कृते न प्राप्नोति । इदमिह संप्रधार्यम् । ल्यक्रियतामादेश इति किमत्र कर्तव्यम् । परत्वाल्ल्यप् । अन्तरङ्ग आदेशः । एवं तर्हि सिद्धे सति यल्ल्यब्ग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत इति । किमेतस्य ज्ञापने प्रयोजनम् । ल्यबादेश उपदेशिवद्वचनमनादिष्टार्थं बहिरङ्गलक्षणत्वादिति वक्ष्यति† तन्न वक्तव्यं भवति ॥

> जग्धिविधिर्ल्यपि यत्तदकस्मात्सिद्धमदस्ति कितीति विधानात् ।
> हिप्रभृतींस्तु§ सदा बहिरङ्गो ल्यब्भरतीति कृतं तदु विद्धि ॥

एष एवार्थः ।

> जग्धौ सिद्धेऽन्तरङ्गत्वात्ति कितीति ल्यबुच्यते ।
> ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् ॥

लुङ्सनोर्घसॢ ॥ २ । ४ । ३७ ॥

घसॢभावे ऽच्युपसंख्यानम् ॥ १ ॥

घसॢभावे ऽच्युपसंख्यानं कर्तव्यम् । प्रात्तीति प्रघसः ॥

---

* १.१ १०*. † ७.१ ३७ ‡ ७.१ ३७*. § ७.४ ४२.

हनो वध लिङि ॥ २ । ४ । ४२ ॥ लुङि च ॥ २ । ४ । ४३ ॥

किमयं वधिर्व्यञ्जनान्त आहोस्विददन्तः । किं चातः । यदि व्यञ्जनान्तो

वधौ व्यञ्जनान्त उक्तम् ॥ १ ॥

किमुक्तम् । वध्यादेशे वृद्धितत्वप्रतिषेध इड्विधिश्चेति* । अथादन्तो न दोषो भवति । यथा न दोषस्तथास्तु ॥

इणो गा लुङि ॥ २ । ४ । ४५ ॥

इण्वदिकः ॥ १ ॥

इण्वदिक इति वक्तव्यम् । इहापि यथा स्यात् । अध्यगात् अध्यगाताम् अध्यगुः ॥

णौ गमिरबोधने ॥ २ । ४ । ४६ ॥

इण्वदिक इत्येव । अधिगमयति अधिगमयतः अधिगमयन्ति ॥

सनि च ॥ २ । ४ । ४७ ॥

इण्वदिक इत्येव । अधिजिगमिषति अधिजिगमिषतः अधिजिगमिषन्ति ॥

गाङ्किटि ॥ २ । ४ । ४९ ॥

ङित्करणं किमर्थम् ।

गाङ्यनुबन्धकरणं विशेषणार्थम् ॥ १ ॥

गाङ्यनुबन्धकरणं क्रियते विशेषणार्थम् । क विशेषणार्थेनार्थः । गाङ्कुटादि-

भ्योऽञ्णिन्ङित् [१.२.१] इति । गाकुटादिभ्यो ऽञ्णिन्ङिदितीयत्युच्यमान इणादेशस्यापि प्रसज्येत* ॥

ज्ञापकं वा सानुबन्धकस्यादेशवचन इत्कार्याभावस्य ॥ २ ॥

अथवैतज्ज्ञापयत्याचार्यः सानुबन्धकस्यादेश इत्कार्यं न भवतीति ॥ किमेतस्य ज्ञापने प्रयोजनम् ।

प्रयोजनं चक्षिङः ख्याञ्† ॥ ३ ॥

ङित‡ इत्यात्मनेपदं न भवति ॥

लटः शतृशानचौ ॥ ४ ॥

लटः शतृशानचौ§ प्रयोजनम् । पचमानः यजमान इति । टित¶ इत्येत्वं न भवति ॥

युवोरनाकौ ॥ ५ ॥

युवोरनाकौ** च प्रयोजनम् । नन्दनः कारकः नन्दना कारिकेति । उगिल्लक्षणौ ङीम्नुमौ†† न भवतः ॥

मेश्चाननुबन्धकस्याम्वचनम् ॥ ६ ॥

मेश्चाननुबन्धकस्याम्वक्तव्यः‡‡ । अचिनवम् अकरवम् असुनवम्§§ ॥ अत्यल्पमिदमुच्यते मेरिति । तिप्सिब्मिपामिति वक्तव्यम् । इहापि यथा स्यात् । वेद वेत्थ¶¶ ॥

अस्य ज्ञापकस्य सन्ति दोषाः सन्ति प्रयोजनानि । दोषाः समा भूयांसो वा । तस्मान्नार्थोऽनेन ज्ञापकेन । कथं यानि प्रयोजनानि । नैतानि सन्ति । इह तावच्चक्षिङः ख्याञिति ञित्करणसामर्थ्याद्विभाषात्मनेपदं भविष्यति*** । लटः शतृशानचाविति । वक्ष्यत्येतत्प्रकृतानामात्मनेपदानामेत्वं भवतीति††† । युवोरनाकाविति । वक्ष्यत्येतत्सिद्धं तु युवोरनुनासिकत्वादिति‡‡‡ ॥

चक्षिङः ख्याञ् ॥ २ । ४ । ५४ ॥

किमयं कशादिराहोस्वित्खयादिः ।

---

* २.४.४५ (६.४.६६). † २.४.५४. ‡ १.३.१२. § ३.२.१२४ ¶ ३.४.७९.
** ७.१.१. †† ४.१.६, ७१. ७०. ‡‡ ३.४.१०९. §§ ७.३.८४, (१.२४, १.१५).
¶¶ ३.४.८३. *** १.३.७२ ††† ३.४.७९. ‡‡‡ ७.१.१.

चक्षिङः ख्याञ्ख्याञौ ॥ १ ॥

चक्षिङः स्याञ्क्शादिः खयादिश्च ॥

ख्शादिर्वा ॥ २ ॥

अथवा ख्शादिर्भविष्यति । केनेदानीं क्शादिर्भविष्यति । चर्त्वेन* । अथ खयादिः कथम् ।

असिद्धे शस्य यवचनं विभाषा ॥ ३ ॥

असिद्धे† शस्य विभाषा यत्वं वक्तव्यम् ॥ किं प्रयोजनम् ।

प्रयोजनं सौमख्ये वुञ्विधिः ॥ ४ ॥

सौमख्य इति योपधलक्षणो‡ वुञ्विधिर्न भवति । सौमख्यीयः । वृद्धाच्छः [४.२.११४] इति च्छो भवति ॥

निष्ठानत्वमाख्याते ॥ ५ ॥

आख्यात इति निष्ठानत्वं§ न भवति ॥

रुविधिः पुंख्याने ॥ ६ ॥

पुंख्यानमिति रुविधिर्न¶ भवति ॥

णत्वं पर्याख्याने ॥ ७ ॥

पर्याख्यानमिति णत्वं** न भवति ॥

सस्थानत्वं नमःख्यात्रे ॥ ८ ॥

नमःख्यात्र इति सस्थानत्वं†† न भवति ॥

वर्जने प्रतिषेधः ॥ ९ ॥

वर्जने प्रतिषेधो वक्तव्यः । अवसंचक्ष्याः परिसंचक्ष्याः ॥

असनयोश्च ॥ १० ॥

असनयोश्च प्रतिषेधो वक्तव्यः। नृचक्षा रक्षः । विचक्षण इति ॥

---

* ८.४.५५. † ८.२.६ ‡ ४.२.१२१. § ८.२.४२. ¶ ८.३.६ ** ८.४.२९. †† ८३.३७.

बहुलं तणि ॥ ११ ॥

बहुलं तणीति वक्तव्यम् । किमिदं तणीति । संज्ञाछन्दसोर्ग्रहणम् । किं प्रयोजनम् ।

अन्नवधकगात्रविचक्षणाजिराद्यर्थम् ॥ १२ ॥

अन्न । आन्नम् । वधक । वाधकम् । गात्र । गात्रं पश्य । विचक्षण । वैचक्षणः । अजिर । आजिरे तिष्ठति* ॥

अजेर्व्यघञपोः ॥ २ । ४ । ५६ ॥

घञपोः प्रतिषेधे क्यप उपसंख्यानम् ॥ १ ॥

घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम् । इहापि यथा स्यात् । समजनं समज्येति ॥ तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अपीत्येव भविष्यति । कथम् । अपीति नेदं प्रत्ययग्रहणम् । किं तर्हि । प्रत्याहारग्रहणम् । क्व संनिविष्टानां प्रत्याहारः । अपो ऽकारात्प्रभृत्या क्यपः पकारात्† । यदि प्रत्याहारग्रहणं संवीतिर्न सिध्यति‡ ॥ एवं तर्हि नार्थ उपसंख्यानेन नापि घञपोः प्रतिषेधेन । इदमस्ति चक्षिङः ख्याञ् वा लिटि [२.४.५४;५५] इति । ततो वक्ष्यामि । अजेर्वी भवति वा व्यवस्थितविभाषा चेति । तेनेह च भविष्यति प्रवेता प्रवेतुम् प्रवीतो रथः संवीतिरिति । इह च न भविष्यति समाजः उदाजः समजः उदजः समजनम् उदजनम् समज्येति । तत्रायमप्यर्थ इदमपि सिद्धं भवति प्राजितेति । किं च भो इष्यत एतद्रूपम् । बाढमिष्यते । एवं हि कश्चिद्वैयाकरण आह । कोऽस्य रथस्य प्रवेतेति । सूत आह । आयुष्मन्नहं प्राजितेति । वैयाकरण आह । अपशब्द इति । सूत आह । प्राप्तिज्ञो देवानांप्रियो न त्विष्टिज्ञ इष्यत एतद्रूपमिति । वैयाकरण आह । अहो खल्वनेन दुरुतेन बाध्यामह इति । सूत आह । न खलु वेञः सूतः सुवतेरेव सूतो यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम् ॥ न तर्हीदानीमिदं वा यौ [२.४.५७] इति वक्तव्यम् । वक्तव्यं च । किं प्रयोजनम् । नेयं विभाषा । किं तर्हि । आदेशोऽयं विधीयते । वा इत्ययमादेशो भवत्यजेर्यौ परतः । वायुरिति ॥

---

* २.४.३६,४३;४५;५४,५६. † १.२.५७-५८. ‡ ३.३.९४.

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥ २ । ४ । ५८ ॥

अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानम् ॥ १ ॥

अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानं कर्तव्यम् । बौधिः पिता बौधिः पुत्रः । औदुम्बरिः पिता औदुम्बरिः पुत्रः* ॥

अपर आह । अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं कर्तव्यमिति । जाबालिः पिता जाबालिः पुत्रः† ॥

अपर आह । अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानं कर्तव्यम् । किं प्रयोजनम् । इदमपि सिद्धं भवति । भाण्डिजङ्घिः पिता भाण्डिजङ्घिः पुत्रः । कार्णखरकिः पिता कार्णखरकिः पुत्रः† ॥

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

---

† ४१ १०३, १०१ † ४२ ९५, १०१.

तद्राजस्य बहुषु तेनैवास्त्रियाम् || २ | ४ | ६२ ||

तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः || १ ||

तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधो वक्तव्यः | प्रिय आङ्गा एषां त इमे प्रियाङ्गाः | प्रियो वाङ्ग एषां त इमे प्रियवाङ्गा इति || किमुच्यते समासबहुत्वे प्रतिषेध इति यावता तेनैव चेत्कृतं बहुत्वमित्युच्यते न चात्र तेनैव कृतं बहुत्वम् | भवति वै किंचिदाचार्याः क्रियमाणमपि चोदयन्ति | तद्वा कर्तव्यं तेनैव चेद्बहुत्व-मिति समासबहुत्वे वा प्रतिषेधो वक्तव्य इति ||

अबहुत्वे च लुग्वचनम् || २ ||

अबहुत्वे च लुग्वक्तव्यः | अतिक्रान्तोऽङ्गानत्यङ्ग इति | बहुवचने परतो य-स्तद्राज इत्येव च कृत्वा चोद्यते || अथ किमर्थं पुनरिदं न बहुवचन इत्येव सि-द्धम् | न सिध्यति | बहुवचन इत्युच्यते न चात्र बहुवचनं पश्यामः* | प्रत्ययलक्ष-णेन भविष्यति† | न लुमता तस्मिन्निति‡ प्रत्ययलक्षणस्य प्रतिषेधः | न लुमता-ङ्गस्य [१.१ ६३] इति वक्ष्यामि | नैवं शक्यम् | इह हि दोषः स्यात् | पञ्च-भिर्गार्गीभिः क्रीतः पटः पञ्चगार्ग्यः दशगार्ग्य इति§ ||

द्वन्द्वे ऽबहुषु लुग्वचनम् || ३ ||

द्वन्द्वे ऽबहुषु लुग्वक्तव्यः | गर्गवत्सवाजा इति || इह च लुग्वक्तव्यः | गर्गेभ्य आगतं गर्गरूप्यम् गर्गमयमिति || इह च अत्रय इत्युदात्तनिवृत्तिस्वरः प्राप्नोति¶ ||

सिद्धं तु प्रत्ययार्थबहुत्वे लुग्वचनात् || ४ ||

सिद्धमेतत् | कथम् | प्रत्ययार्थबहुत्वे लुग्वक्तव्यः || यदि प्रत्ययार्थबहुत्वे लुगुच्यते ऽस्त्रियामिति वक्तव्यम् | इह मा भूत् | आङ्ग्यः स्त्रियः वाङ्ग्यः स्त्रिय इति | यस्य पुनर्बहुवचने परतो लुगुच्यते तस्येकारेण व्यवहितत्वान्न भविष्यति | यस्यापि बहुवचने परतो लुगुच्यते तेनाप्यस्त्रियामिति वक्तव्यम् | आम्बष्ठ्याः स्त्रियः सौवीर्याः स्त्रिय इत्येवमर्थम्** | अत्रापि चापा व्यवधानम् | एकादेशे कृते नास्ति व्यवधानम् | एकादेशः पूर्वविधौ स्थानिवद्भवतीति†† स्थानिवद्भावाद्व्यवधानमेव ||

२ ४ ७१ †१ १ ६२ ‡१ १ ६२ §२ ४ ७१ ५ १ २८, १ २ ४२;(२ ४ ६४)
¶ ४ १ १२० ६१ १६५ २ ४ ६५;(६ १ १६१) ** ४ १ १०१ ७४ †† १ १ ५०*

द्वन्द्वेऽबहुषु लुग्वचनम् ॥ ५ ॥

द्वन्द्वेऽबहुषु लुग्वक्तव्यः । गर्गवत्सवाजा इति ॥

गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् ॥ ६ ॥

गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः । विदानामपत्यं माणवको वैदः । वैदौ* ॥ किमर्थमिदं नाचीत्येवालुक्सिद्ध† । अचीत्युच्यते न चात्राजादिं पश्यामः । प्रत्ययलक्षणेन । वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥

एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि ॥ ७ ॥

एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्यः । वैदस्यापत्यं बहवो माणवका विदाः । वैदयोर्वा विदाः । अञ्यो बहुषु यञ्यो बहुष्विन्त्युच्यमानो‡ लुग्न प्राप्नोति । मा भूदेवम् । अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति । नैवं शक्यम् । इह हि दोषः स्यात् । काश्यपप्रतिकृतयः काश्यपा इति§ ॥

ततोऽयमाह यस्य प्रत्ययार्थबहुत्वे लुक् । द्वन्द्वेऽबहुषु लुग्वचनमित्यस्य परिहारो

न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात् ॥ ८ ॥

न वैष दोषः । किं कारणम् । सर्वेषां द्वन्द्वे बह्वर्थत्वात् । सर्वाणि द्वन्द्वे बह्वर्थानि । कथम् । युगपदधिकरणविवक्षायां द्वन्द्वो भवति ॥

ततोऽयमाह यस्य बहुवचने परतो लुक् । यदि सर्वाणि द्वन्द्वे बह्वर्थान्यहमपीदमचोद्यं चोद्ये द्वन्द्वेऽबहुषु लुग्वचनमिति । यद्यपि ह्यत्र सर्वत्र बहुवचनं परं भवति । लुकि कृते न प्राप्नोति । प्रत्ययलक्षणेन । न लुमता तस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः । न लुमताङ्गस्येति वक्ष्यामि । ननु चोक्तं नैवं शक्यमिह हि दोषः स्यात् पञ्चभिर्गार्गीभिः क्रीतः पटः पञ्चगार्ग्यः दशगार्ग्य इति । इष्टमेवैतत्सगृहीतम् । पञ्चगर्गः दशगर्ग इत्येव भवितव्यम् ॥ तथेदमपरमचोद्यं चोद्ये गर्गरूप्यम् गर्गमयम् । अत्रापि बहुवचनं इत्येव सिद्धम् । कथम् । समर्थात्तद्धित उत्पद्यते सामर्थ्यं च सुबन्तेन ॥

ततोऽयमाह यस्य प्रत्ययार्थबहुत्वे लुक् । यदि समर्थात्तद्धित उत्पद्यतेऽहमपीदमचोद्यं चोद्ये गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुगिति । अद्वयम् । यस्यापि बहुवचने परतो लुक्तेनाप्यत्रालुग्वक्तव्यः । तस्यापि ह्यत्र बहुव-

* ४.१.१०४, २.४.५८ (२४) † ४.२.८० ‡ २.४.६४ § ४.१.१०५, २.४.६४

चनं परं भवति ॥ न वक्तव्यः । अचीत्येवालुक्सिद्धः[*] । अचीत्युच्यते न चात्राजादिं पश्यामः । प्रत्ययलक्षणेन । ननु चोक्तं वर्णाश्रये नास्ति प्रत्ययलक्षणमिति । यदि वा कानिचिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवन्ति तथेदमपि भविष्यति ॥ अथवाविशेषेणालुकमुक्त्वा हलि नेति वक्ष्यामि ॥ यद्यविशेषेणालुकमुक्त्वा हलि नेत्युच्यते विदानामपत्यं बहवो माणवका विदाः अत्राप्यलुक्प्राप्नोति । अस्तु । पुनरस्य युवबहुत्वे वर्तमानस्य लुग्भविष्यति[†] । पुनरलुक्कस्मान्न भवति । समर्थानां प्रथमस्य गोत्रप्रत्ययान्तस्यालुगुच्यते[‡] न चैतत्समर्थानां प्रथमं गोत्रप्रत्ययान्तम् । किं तर्हि । द्वितीयमर्थमुपसंक्रान्तम् ॥ अवश्यं चैतदेवं विज्ञेयमत्रिभरद्वाजिका वसिष्ठकश्यपिका भृग्वङ्गिरसिका कुत्सकुशिकिकेत्येवमर्थम्[§] ॥ गर्गभार्गविकाग्रहणं[¶] वा क्रियते[**] तन्नियमार्थं भविष्यति । एतस्यैव द्वितीयमर्थमुपसंक्रान्तस्यालुग्भवति नान्यस्येति ॥ यदप्युच्यत एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि वक्तव्य इति । मा भूदेवमञ्यो बहुषु यञ्यो बहुष्विति । अञन्तं यद्बहुषु यञन्तं यद्बहुष्वित्येवं भविष्यति । ननु चोक्तं नैवं शक्यमिह हि दोषः स्यात्काश्यपप्रतिकृतयः काश्यपा इति । नैष दोषः । लौकिकस्य तत्र[†] गोत्रस्य ग्रहणं न चैतल्लौकिकं गोत्रम् ॥

यस्य बहुवचने परतो लुक्समासबहुत्वे तेन प्रतिषेधो वक्तव्यस्तेनैव चेत्कृतं बहुत्वमिति वा वक्तव्यम् । यस्य प्रत्ययार्थबहुत्वे लुक्तेनास्त्रियामिति वक्तव्यम् । यस्य बहुवचने परतो लुक्तस्यायमधिको दोषो ऽत्रय इत्युदात्तनिवृत्तिस्वरः प्राप्नोति । तस्मात्प्रत्ययार्थबहुत्वे लुगित्येष एव पक्षो ज्यायान् ॥

अथेह कथं भवितव्यम् । गार्गी च वात्स्यश्च वाज्यश्चेति । यदि तावदस्त्री विधिनाश्रीयते ऽस्त्यत्रास्त्रीति कृत्वा भवितव्यं लुका । अथ स्त्री प्रतिषेधेनाश्रीयते ऽस्त्यत्र स्त्रीति कृत्वा भवितव्यं प्रतिषेधेन । किं पुनरत्रार्थसतत्त्वम् । देवा एतज्ज्ञातुमर्हन्ति ॥

अथ यो लोप्यलोपिनां समासस्तत्र कथं भवितव्यम् । उभयं हि दृश्यते । शार्ङ्गरवशुनकदर्भाग्रुगुवत्साग्रायणेषु [४. १. १०२] नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् [८.४.६७] इति ॥

---

* ४१ ८०. † २४ ६४ ‡ ४१ ८९, ८२ § ४१ १२१ (११४) १०४, ९९, १४ ५८, ६५ ६४, ४३ १२५, ७१ १, (४१ ८९) ¶ ४१ १०५, १२४, ९५, २४ ५८, ४३ १२५, ७११, २४ ६४ (६५) ६७ ** २४ ६०, ग०

यञञोश्च ॥ २ । ४ । ६४ ॥

यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् ॥ १ ॥

यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानं कर्तव्यम् । गार्ग्यस्य कुलं गार्ग्यकुलं गर्गकुलं वा । गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलं वा । वैदस्य कुलं वैदकुलं विदकुलं वा । वैदयोः कुलं वैदकुलं विदकुलं वा ॥ यञादीनामिति किमर्थम् । आङ्गस्य कुलमाङ्गकुलम् । आङ्गयोः कुलमाङ्गकुलम्* ॥ एकद्वयोरिति किमर्थम् । गर्गाणां कुलं गर्गकुलम् ॥ तत्पुरुष इति किमर्थम् । गार्ग्यस्य समीपमुपगार्ग्यम्† ॥ षष्ठ्या इति किमर्थम् ॥ शोभनगार्ग्यः परमगार्ग्यः ॥

बह्वच इञः प्राच्यभरतेषु ॥ २ । ४ । ६६ ॥

किमयं समुच्चयः । प्राक्षु भरतेषु चेति । आहोस्विद्भरतविशेषणं प्राग्ग्रहणम् । प्राञ्चो ये भरता इति । किं चातः । यदि समुच्चयो भरतग्रहणमनर्थकं न ह्यन्यत्र भरताः सन्ति । अथ प्राग्ग्रहणं भरतविशेषणं प्राग्ग्रहणमनर्थकं न ह्यप्राञ्चो भरताः सन्ति । एवं तर्हि समुच्चयः । ननु चोक्तं भरतग्रहणमनर्थकं न ह्यन्यत्र भरताः सन्तीति । नानर्थकम् । ज्ञापकार्थम् । किं ज्ञाप्यते । एतज्ज्ञापयत्याचार्यो ऽन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । इञः प्राचाम् [२.४.६०] भरतग्रहणं न भवति । औद्दालकिः पिता औद्दालकायनः पुत्र इति ॥

न गोपवनादिभ्यः ॥ २ । ४ । ६७ ॥

गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यः ॥ १ ॥

गोपवनादिभ्यः प्रतिषेधः प्राग्घरितादिभ्यो‡ द्रष्टव्यः । हारितः हारितौ । बहुषु हरिताः ॥

---

* २ ४ ६२ † २ १ ६ ‡ ४ १ १०४, ग०

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ॥ २ । ४ । ६९ ॥

किमर्थमद्वन्द्व इत्युच्यते । द्वन्द्वे मा भूदिति । नैतदस्ति प्रयोजनम् । इष्यत एव द्वन्द्वे । भ्राष्टककपिष्ठला भ्राष्टकिकापिष्ठलय इति ॥ अत उत्तर पठति ।

अद्वन्द्व इति द्वन्द्वाधिकारनिवृत्त्यर्थम् ॥ १ ॥

अद्वन्द्व इत्युच्यते द्वन्द्वाधिकारनिवृत्त्यर्थम् । द्वन्द्वाधिकारो* निवर्त्यते । तस्मिन्निवृत्ते ऽविशेषेण द्वन्द्वे चाद्वन्द्वे च भविष्यति ॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥ २ । ४ । ७० ॥

आगस्त्यकौण्डिन्ययो प्रकृतिनिपातनम् ॥ १ ॥

आगस्त्यकौण्डिन्ययो प्रकृतिनिपातन कर्तव्यम् । अगस्तिकुण्डिनजित्येतौ प्रकृत्यादेशौ भवत इति वक्तव्यम् ॥ किं प्रयोजनम् ।

लुक्प्रतिषेधे वृद्ध्यर्थम् ॥ २ ॥

लुक्प्रतिषेधे† वृद्धिर्यथा स्यात् ॥

प्रत्ययान्तनिपातने हि वृद्ध्यभाव ॥ ३ ॥

प्रत्ययान्तनिपातने हि सति वृद्ध्यभाव स्यात् । आगस्तीया‡ कौण्डिना§ इति ॥ यदि प्रकृतिनिपातन क्रियते केनेदानीं प्रत्ययस्य लोपो भविष्यति ।

अधिकारात्प्रत्ययलोप ॥ ४ ॥

अधिकारात्प्रत्ययलोपो भविष्यति¶ ॥

तर्हि प्रकृतिनिपातन कर्तव्यम् । न कर्तव्यम् । योगविभाग करिष्यते । आगस्त्यकौण्डिन्ययोर्बहुषु लुग्भवति । ततोऽगस्तिकुण्डिनजित्येतौ च प्रकृत्यादेशौ भवत आगस्त्यकौण्डिन्ययोरिति ॥ एवमपि प्रत्ययान्तयोरेव प्राप्नोति प्रत्ययान्ताद्धि भवान्षष्ठीमुच्चारयति** । आगस्त्यकौण्डिन्ययोरिति । नैष दोष । यथा हि परि-

* २ ४ ६८ † ४ १ ८९ ‡ ४ २ ११४ § ४ २ १११ ¶ २ ४ ५८
** २ १ ४९

भावित प्रत्ययस्य लुक्श्लुलुपो भवन्तीति* प्रत्ययस्यैव भविष्यत्यवशिष्टस्यादेशो भविष्यत ॥

यङोऽचि च ॥ २ । ४ । ७४ ॥

ऊतोऽचि ॥ १ ॥

ऊतोऽचीति वक्तव्यम् । इह मा भूत् । सनीस्रस दनीध्वस इति† ॥ अथोत इत्युच्यमान इह कस्मान्न भवति । योयूय: रोरूय ‡। विहितविशेषणमूकारान्तग्रहणम् । ऊकारान्ताद्यो विहित इति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । इष्टमेवैतत्संगृहीतम् । सनीस्रस दनीध्वस इत्येव भवितव्यम्§ ॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ २ । ४ । ७७ ॥

गापोर्ग्रहण इण्पिबत्योर्ग्रहणम् ॥ १ ॥

गापोर्ग्रहण इण्पिबत्योर्ग्रहण कर्तव्यम् । इणो यो गाशब्द पिबतेर्य पाशब्द¶ इति वक्तव्यम् । इह मा भूत् । अगासीन्नट । अपासीद्धनमिति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । इणो ग्रहणे तावद्वार्त्तम् । निर्देशादेवेद व्यक्त लुग्विकरणस्य ग्रहणमिति । पाग्रहणे चापि वार्त्तम् । वक्तव्यमेवैतत्सर्वत्रैव पाग्रहणे ऽलुग्विकरणस्य ग्रहणमिति ॥

तनादिभ्यस्तथासोः ॥ २ । ४ । ७९ ॥

तथासोरात्मनेपदवचनम् ॥ १ ॥

तथासोरात्मनेपदस्य ग्रहण कर्तव्यम् । आत्मनेपद यौ तथासाविति वक्तव्यम् ॥

एकवचनग्रहण वा ॥ २ ॥

अथवैकवचने ये तथासी इति वक्तव्यम् ॥ तद्यावश्यमन्यतरत्कर्तव्यम् ।

* १, १, ६१ † ६, ४, २४ ४८ ४९; १, १, ६२ ‡ ७, ४, २५ § १, १, ६१ ¶ २, ४, ४५ ७२ ७८

अवचने ह्यनिष्टप्रसङ्गः ॥ २ ॥

अनुच्यमाने ह्येतस्मिन्ननिष्टं प्रसज्येत । अतनिष्ट यूयम् । असनिष्ट यूयमिति ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । यद्यपि तावदयं तशब्दो दृष्टापचारोऽस्त्यात्मनेपदमस्त्येव परस्मैपदमस्त्येकवचनमस्ति बहुवचनमय खलु थासूशब्दो ऽदृष्टापचार आत्मनेपदमेकवचनमेव तस्यास्य कोऽन्यः सहायो भवितुमर्हत्यन्यदत आत्मनेपदादेकवचनाच्च । तद्यथा । अस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभः ॥

आमः ॥ २ । ४ । ८१ ॥

आमो लेर्लोपे लुङ्लोटोरुपसंख्यानम् ॥ १ ॥

आमो लेर्लोपे लुङ्लोटोरुपसंख्यानं कर्तव्यम् । तां वैजवापयो विदामक्रन् । अत्र भवन्तो विदांकुर्वन्तु ॥ तर्हि वक्तव्यम् । न वक्तव्यम् । लिग्रहणं* निवर्तिष्यते । यदि निवर्तते प्रत्ययमात्रस्य लुक्प्राप्नोति । इष्यत एव प्रत्ययमात्रस्य । अतश्चेष्यत एव ह्याह कृञ्चानुप्रयुज्यते लिटि [३.१.४०] इति यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति ॥

आमन्तेभ्यो णलः प्रतिषेधः ॥ २ ॥

आमन्तेभ्यो णलः प्रतिषेधो वक्तव्यः । शशाम तताम । वृद्धौ† कृतायामाम इति लुक्प्राप्नोति ॥ आमन्तेभ्योऽर्थवद्ग्रहणाण्णलो ऽप्रतिषेधः । आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेधः । अनर्थकः प्रतिषेधो ऽप्रतिषेधः । लुक्कस्मान्न भवति । शशाम ततामेति । अर्थवद्ग्रहणात् । अर्थवत आम्शब्दस्य ग्रहणं न चैषोऽर्थवान् ॥

आमन्तेभ्यो ऽर्थवद्ग्रहणाण्णलोऽप्रतिषेध इति चेदमः प्रतिषेधः ॥ ३ ॥

आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेध इति चेदमः प्रतिषेधो वक्तव्यः । आम ॥

उक्तं वा ॥ ४ ॥

किमुक्तम् । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति‡ ॥

किं पुनर्लुगादेशानामपवाद आहोस्वित्कृतेष्वादेशेषु§ भवति ।

* २४ ८०. † ७२ ११६ ‡ ११ १९ § ३४ ७०

लुगादेशापवादः ॥ ५ ॥

लुगादेशानामपवादः ॥

तिङ्कृताभावस्तु ॥ ६ ॥

तिङ्कृतस्य स्वभावः । कस्य । पदत्वस्य* ॥

सुबन्तपदत्वात्सिद्धम् ॥ ७ ॥

सुबन्तं पदमिति* पदसंज्ञा भविष्यति ॥ कथं स्वाद्युत्पत्तिः ।

लकारस्य कृत्त्वात्प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम् ॥ ८ ॥

लकारः कृत्कृत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा तदाश्रयं प्रत्ययविधानम् । प्रातिपदिकाश्रयत्वात्स्वाद्युत्पत्तिर्भविष्यति† ॥ सुपः श्रवणं प्राप्नोति । अव्ययादिति लुग्भविष्यति‡ । कथमव्ययत्वम् ।

अव्ययत्वं मकारान्तत्वात् ॥ ९ ॥

कृदन्तं मान्तमव्ययसंज्ञं भवतीत्यव्ययसंज्ञा भविष्यति§ ॥ स्वरः कथम् । यत्प्रकारयांचकार ।

स्वरः कृदन्तप्रकृतिस्वरत्वात् ॥ १० ॥

कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो¶ भविष्यति ॥

तथा च निघातानिघातसिद्धिः ॥ ११ ॥

तथा च निघातानिघातसिद्धिर्भवति । चक्षुष्काम याजयांचकार । तिङतिङः [८.१.२८] इति तस्य चानिघातस्तस्माच्च निघातः सिद्धो भवति ॥

नञा तु समासप्रसङ्गः ॥ १२ ॥

नञा तु समासः प्राप्नोति । न कारयाम् । न हारयाम् । नञ्सुबन्तेन सह समस्यत इति समासः प्राप्नोति** ॥

उक्तं वा ॥ १३ ॥

किमुक्तम् । असामर्थ्यादिति†† । नात्र नञ आमन्तेन सामर्थ्यम् । केन तर्हि । तिङन्तेन । न चकार कारयाम् । न चकार हारयामिति ॥

---

* १.४.१४. † १.१ ९२, १.२.४६, ४.१.२ ‡ २.४.८२. § १.१.३९. ¶ ६.२.१३९. ** २.१.६, (६.३.७३) †† २.१.१.

अव्ययादाप्सुपः ॥ २ । ४ । ८२ ॥

अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात् ॥ १ ॥

अव्ययादापो लुग्वचनमनर्थकम् । किं कारणम् । लिङ्गाभावात् । अलिङ्गमव्ययम् ॥ किमिदं भवान्सुपो लुकं मृष्यत्यापो लुकं न मृष्यति । यथैव ह्यलिङ्गमव्ययमेवमसंख्यमपि । सत्यमेतत् । प्रत्ययलक्षणमाचार्यः प्रार्थयमानः सुपो लुकं मृष्यति । आपः पुनरस्य लुकि सति न किंचिदपि प्रयोजनमस्ति ॥ उच्यमानेऽप्येतस्मिन्स्वाद्युत्पत्तिर्न प्राप्नोति । किं कारणम् । एकत्वादीनामभावात् । एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते न चैषामेकत्वादयः सन्ति । अविशेषेणोत्पद्यन्त उत्पन्नानां नियमः क्रियते ॥ अथवा प्रकृतानर्थानपेक्ष्य नियमः । के च प्रकृताः । एकत्वादयः । एकस्मिन्नेवैकवचनं न द्वयोर्न बहुषु । द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु । बहुष्वेव बहुवचनं नैकस्मिन्न द्वयोरिति ॥ अथवाचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यन्तेऽव्ययेभ्यः स्वादय इति यदयमव्ययादाप्सुप इति सुब्लुकं शास्ति ॥

नाव्ययीभावादतोऽम्त्वपञ्चम्याः ॥ २ । ४ । ८३ ॥

नाव्ययीभावादत इति योगव्यवसानम् ॥ १ ॥

नाव्ययीभावादत इति योगो व्यवसेयः । नाव्ययीभावादकारान्तात्तिरसुपो लुग्भवति । ततोऽम्त्वपञ्चम्या इति ॥ किमर्थो योगविभागः ।

पञ्चम्या अम्प्रतिषेधार्थम् ॥ २ ॥

पञ्चम्या अमः प्रतिषेधो यथा स्यात् ॥

एकयोगे ह्युभयोः प्रतिषेधः ॥ ३ ॥

एकयोगे हि सत्युभयोः प्रतिषेधः स्यादमोऽलुकश्च ॥ स तर्हि योगविभागः कर्तव्यः । न कर्तव्यः ।

तुर्नियामकः ।

तुः क्रियते स नियामको भविष्यति । अमेवापञ्चम्या इति ॥

अमि पञ्चमीप्रतिषेधे ऽपादानग्रहणम् ॥ ४ ॥

अमि पञ्चमीप्रतिषेधे ऽपादानग्रहणं कर्तव्यम् । अपादानपञ्चम्या इति वक्तव्यम्* । किं प्रयोजनम् ।

कर्मप्रवचनीययुक्तेऽप्रतिषेधार्थम् ॥ ५ ॥

कर्मप्रवचनीययुक्ते मा भूत् । आपाटलिपुत्रं† वृष्टो देवः ॥

न वोत्तरपदस्य कर्मप्रवचनीययोगात्समासात्पञ्चम्यभावः ॥ ६ ॥

न वा वक्तव्यम् । किं कारणम् । उत्तरपदमत्र कर्मप्रवचनीययुक्तम् । उत्तरपदस्य कर्मप्रवचनीययोगात्समासात्पञ्चमी न भविष्यति । यदा च समासः कर्मप्रवचनीययुक्तो भवति तदा प्रतिषेधः । तद्यथा । आ उपकुम्भात् । आ उपमणिकादिति‡ ॥

तृतीयासप्तम्योर्बहुलम् ॥ २ । ४ । ८४ ॥

सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम् ॥ १ ॥

सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यमिति वक्तव्यम् । ऋद्धि । सुमद्रम् सुमगधम् । नदीसमास । उन्मत्तगङ्गम् लोहितगङ्गम् । संख्यावयव । एकविंशतिभारद्वाजम् त्रिपञ्चाशद्गौतमम्§ ॥

लुटः प्रथमस्य डारौरसः ॥ २ । ४ । ८५ ॥

टितां टेरेविधेर्लुटो डारौरसः पूर्वविप्रतिषिद्धम् ॥ १ ॥

टितां टेरेविधेर्लुटो डारौरसो भवन्ति पूर्वविप्रतिषेधेन । टेरेत्वस्यावकाशः¶ । पचते पचेते पचन्ते । डारौरसामवकाशः । श्वः कर्ता श्वः कर्तारौ श्वः कर्तारः । इहोभयं प्राप्नोति । श्वो ऽध्येता श्वो ऽध्येतारौ श्वो ऽध्येतार इति । डारौरसो भवन्ति पूर्वविप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः ।

आत्मनेपदानां चेति वचनात्सिद्धम् ॥ २ ॥

आत्मनेपदानां च डारौरसो भवन्तीति वक्तव्यम् ॥

---

* ११ २८. † २२.१०. ‡ २२१६, २२.२०. § २.१.६; २१.१९ ¶ १४ ७२.

तच्च समसंख्यार्थम् ॥ ३ ॥

तच्चावश्यमात्मनेपदग्रहणं कर्तव्यं समसंख्यार्थम् । संख्यातानुदेशो* यथा स्यात् । अक्रियमाणे ह्यात्मनेपदग्रहणे षट् स्थानिनस्त्रय आदेशाः । वैषम्यात्संख्यातानुदेशो न प्राप्नोति ॥

पूर्वविप्रतिषेधार्थेन तावन्नार्थ आत्मनेपदग्रहणेन । इदमिह संप्रधार्यम् । डारौरसः क्रियन्तां टेरेत्वमिति किमत्र कर्तव्यम् । परत्वादेत्वम् । नित्या डारौरसः । कृते ऽप्येत्वे प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति । टेरेत्वमपि नित्यम् । कृतेष्वपि डारौरस्सु प्राप्नोत्यकृतेष्वपि प्राप्नोति । अनित्यमेत्वम् । अन्यस्य कृतेषु डारौरस्सु प्राप्नोत्यन्यस्याकृतेषु शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । डारौरसोऽप्यनित्याः । अन्यस्य कृत एत्वे प्राप्नुवन्त्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्तोऽनित्या भवन्ति । उभयोरनित्ययोः परत्वादेत्वम् । एत्वे कृते पुनःप्रसङ्गविज्ञानाड्डारौरसो भविष्यन्ति ॥ समसंख्यार्थेन चापि नार्थ आत्मनेपदग्रहणेन । स्थानेऽन्तरतमेन† व्यवस्था भविष्यति । कुत आन्तर्यम् । अर्थतः । एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थः ॥ अथवादेशा अपि षडेव निर्दिश्यन्ते । कथम् । एकशेषनिर्देशात् । एकशेषनिर्देशोऽयम् ॥ अथैतस्मिन्नेकशेषनिर्देशे सति किमयं कृतैकशेषाणां द्वन्द्वः । डा च डा च डा । रौ च रौ च रौ । रश्च रश्च रः । डा च रौ च रश्च डारौरस इति । आहोस्वित्कृतद्वन्द्वानामेकशेषः । डा च रौ च रश्च डारौरसः । डारौरसश्च डारौरसश्च डारौरस इति । किं चातः । यदि कृतैकशेषाणां द्वन्द्वो ऽनिष्टः समसंख्यः प्राप्नोति । एकवचनद्विवचनयोर्डा प्राप्नोति बहुवचनैकवचनयो रौ प्राप्नोति द्विवचनबहुवचनयोश्च रस्प्राप्नोति । अथ कृतद्वन्द्वानामेकशेषो न दोषो भवति । यथा न दोषस्तथास्तु ॥ किं पुनरत्र ज्यायः । उभयमित्याह । उभयं हि दृश्यते । बहु शक्तिकिटकम् । बहूनि शक्तिकिटकानि । बहु स्थालीपिठरम् । बहूनि स्थालीपिठराणि ॥

डारौरसः कृते टेरे यथा द्वित्वं प्रसारणे‡ ।
समसंख्येन नार्थोऽस्ति सिद्धं स्थानेऽर्थतोऽन्तराः ॥
आन्तर्यतो व्यवस्था त्रय एवेमे भवन्तु सर्वेषाम् ।
टेरेत्वं च परत्वात्कृतेऽपि तस्मिन्निमे सन्तु ॥

---

* १.३.१०. † १.१.५०. ‡ ६.१.८,१७.

डाविकारस्य शित्करणं सर्वादेशार्थम् ॥ ४ ॥

डाविकारः शित्कर्तव्यः । किं प्रयोजनम् । सर्वादेशार्थम् । शित्सर्वस्येति* सर्वादेशो यथा स्यात् । अक्रियमाणे हि शकारे ऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत† ॥

निघातप्रसङ्गस्तु ॥ ५ ॥

निघातस्तु प्राप्नोति । श्वः कर्ता । तासेः परं लसार्वधातुकमनुदात्तं भवतीत्येष स्वरः‡ प्राप्नोति§ ॥

यत्तावदुच्यते डाविकारस्य शित्करणं सर्वादेशार्थमिति ।

सिद्धमलोऽन्त्यविकारात् ॥ ६ ॥

सिद्धमेतत् । कथम् । अलोऽन्त्यविकारात् । अस्त्वयमलोऽन्त्यस्य । का रूपसिद्धिः । कर्ता ।

डिति टेर्लोपाल्लोपः ॥ ७ ॥

डिति टेर्लोपेन¶ लोपो भविष्यति । अभत्वान्न प्राप्नोति । डित्करणसामर्थ्याद्भविष्यति ॥

अनित्त्वाद्वा ॥ ८ ॥

अथवानित्त्वादेतत्सिद्धम् । किमिदमनित्त्वादिति । अन्त्यस्यायं स्थाने भवन् प्रत्ययः स्यात् । असत्यां प्रत्ययसंज्ञायामित्संज्ञा न । असत्यामित्संज्ञायां लोपो न । असति लोपे ऽनेकाल् । यदानेकाल्तदा सर्वादेशः । यदा सर्वादेशस्तदा प्रत्ययः । यदा प्रत्ययस्तदेत्संज्ञा** । यदेत्संज्ञा तदा लोपः†† ॥

प्रश्लिष्टनिर्देशाद्वा ॥ ९ ॥

अथवा प्रश्लिष्टनिर्देशोऽयम् । डा आ डा । सोऽनेकाल्शित्सर्वस्य [१.१.५५] इति सर्वादेशो भविष्यति ॥

यदा तर्ह्ययमन्त्यस्य स्थाने भवति तदा तिङ्ग्रहणेन ग्रहणं न प्राप्नोति ।

तिङ्ग्रहणमेकदेशविकृतस्यानन्यत्वात् ॥ १० ॥

एकदेशविकृतमनन्यवद्भवतीति तिङ्ग्रहणेन ग्रहणं भविष्यति ॥

स्वरः कथम् ।

स्वरे विप्रतिषेधात्सिद्धम् || ११ ||

डारौरसः क्रियन्तामनुदात्तत्वमिति किमत्र कर्तव्यम् । परत्वादनुदात्तत्वम् । नित्या डारौरसः । कृतेऽप्यनुदात्तत्वे प्राप्नुवन्त्यकृतेऽपि प्राप्नुवन्ति । अनुदात्तत्वमपि नित्यम् । कृतेष्वपि डारौरस्सु प्राप्नोत्यकृतेष्वपि प्राप्नोति । अनित्यमनुदात्तत्वम् । अन्यस्य कृतेषु डारौरस्सु प्राप्नोत्यन्यस्याकृतेषु शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । डारौरसो ऽप्यनित्याः । अन्यथास्वरस्य कृते ऽनुदात्तत्वे प्राप्नुवन्त्यन्यथास्वरस्याकृते स्वरभिन्नस्य च प्राप्नुवन्तो ऽनित्या भवन्ति । उभयोरनित्ययोः परत्वादनुदात्तत्वम् । अनुदात्तत्वे कृते पुनःप्रसङ्गविज्ञानाड्डारौरसः । टिलोप उदात्तनिवृत्तिस्वरेण* सिद्धम् || न सिध्यति । किं कारणम् । अन्तरङ्गत्वाड्डारौरसः । तत्रान्तरङ्गत्वाड्डारौरस्सु कृतेष्वनुदात्तत्वं क्रियतां टिलोप इति किमत्र कर्तव्यम् । परत्वाट्टिलोपेन भवितव्यम् || एवं तर्हि स्वरे विप्रतिषेधात्सिद्धम् । न्याय्य एवायं स्वरे विप्रतिषेधः । इदमिह संप्रधार्यम् । अनुदात्तत्वं क्रियतामुदात्तनिवृत्तिस्वर इति किमत्र कर्तव्यम् । परत्वादनुदात्तत्वम् । अनुदात्तत्वे कृते पुनःप्रसङ्गविज्ञानादुदात्तनिवृत्तिस्वरो भविष्यति || तदेतत्क सिद्धं भवति । यत्पिद्वचनम्† । यदपिद्वचनं तत्र न सिध्यति । तत्रापि सिद्धम् । कथम् । इदमद्य लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः‡ । न चापवादविषय उत्सर्गोऽभिनिविशते । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते । तत्र तावदत्र कदाचित्प्रत्ययस्वरो भवत्यपवादं लसार्वधातुकानुदात्तत्वं प्रतीक्षते । तत्रानुदात्तत्वं क्रियतां लोप इति यद्यपि परत्वाल्लोपः सोऽसावविद्यमानोदात्तत्वेऽनुदात्त उदात्तो लुप्यते ||

प्रत्ययस्वरापवादो लसार्वधातुकानुदात्तत्वम् ।
तेन तत्र न प्रसक्तः प्रत्ययस्वरः कदाचित् ||
प्रत्ययस्वरश्च तासेर्वृत्तिसंनियोगशिष्टः ।
तेन चाप्यसावुदात्तो लोप्स्यते तथा न दोषः ||

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये द्वितीयस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् || पादश्च समाप्तः ||

|| द्वितीयोऽध्यायः समाप्तः ||

---

* ६.१.१६१ † ३.१.४. ‡ ३.१.३.

॥ अथ पाठभेदः ॥

पृ० पं०

१, १ Before अथ, G श्रीगणेशाय नम, E श्रीगणेशाय नम ॥ श्रीगुरवे नम B श्रीगणेशाय नम ॥ योगेन चित्तस्य पदेन वाचा मलं शरीरस्य तु वैद्यकेन । योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोस्मि ॥ १ ॥ ओं, C स्वस्ति श्रीगणेशाय नम ॥ अाम् & in marg अधेत्यतः पूर्वं योगेन चित्तस्येति पद्यं क्वचित्पठ्यते तच्छिष्यै प्रक्षिप्तम् ।

२ G अथ शब्दानुशासन महाभाष्य लिख्यते

६ G किं यत्तर्हि सा° °षाणरूप, D°विषाणार्थ° A °विषाणार्थरूप शब्द

८ G D A यत्तर्हि शुक्लो, B यस्तर्हि (originally यत्तर्हि) शुक्लो नील कृष्णकपिल E g om कृष्ण; A C om कृष्ण कपिल,

९ G D A B यत्तर्हि भि°,

११ G °विषाणाना

१३ G D A क्वचुच्यते

१९ A om ज्ञेय

१९ G B षड्गेषु

२० A om च.

२३ G तस्या

२, १ G ऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरतो ऽध्यवस्यति यदि पूर्वपद°

१७ G तस्मादविज्ञातार्थमनर्थक

२४ A गाना गोपोतालि°

२५ D E g B & C in marg शरणम् । विषम उपन्यास । मास्यतायां°.

२७ G ण्वं हि सो

२८ A om यो

३, २८ G A om गुहाया नेङ्गयन्ति

४, १ तद्यथा जाया h, G D A जायव C g B तद्यथा जायेव

७ G D A & originally C विद्गुयादि त्यध्येयं

११ G परिपठनं लि सदा सुनयहा

५, २ G शोभना गुर्भ्यं सुविरामभिरतं प्रविश इति

पृ० पं०

५, ५ G D A व्याकरणमधि°.

६ G पठति

७ E g B तेभ्यस्तत्तस्त्या°.

८ °करणानुप्रदान° Bhartrihari, MSS. °करणनाशानुप्रदान°

९ E g B वैदिका शब्दा सिद्धा.

१० g ऽध्येतृभ्य सुहृद्भूत्वाचार्य, C सुहृद्भूत्वा in marg

२१ G गावीगोणीगोपोतलिकादयो, C गाव्यादयो

२७ G D A °स्पतिश्च वक्ता°.

२८ G चतुर्भि प्र°

२८ G °युक्तो A °युक्तोपयुक्तो

६, २ C पर्यवपन्न

३ G D A येन येनाल्पेन

६ G विशेषापवाद

१८ G सिद्ध ।

७, ६ G om पश्यति

२२ G A °योगि तन्नि°

८, ८ G प्रयोक्तव्ये लौकिक°

१९ G E C धर्मस्य, in g the word is struck out

२१ G °मर्थावगतो.

९, ४ G D A B यल्लोके ऽप°.

५ G D A चाह

१० G प्रयोग ए°

१६ G °सहस्राणि

१६ A कश्चिदभ्याहरति

१९ A g न चैवोप°, K न चै ते उप°.

२३ G D A इत्यतावन

१०, २ E यद्वो रेवती रेवत्यात्तमूप, C तद्यथा । यद्वो रेवती रवत्यं समूप, & in marg यद्वास्ये रेवती रेवद्रूप, g तद्यथा । यद्वो रेवती रेवत्यसमूप, B तद्यथा । रेवत्य समूप

१२ G om प्रयोगे

१७ G कृत्स्वयप्रा°.

पृ० पं०

१०,१८ G D A om वै
२६ G om ननु चोक्त
११ १ G °धर्म एव
४ G तद्दोपाय
८ G D A स दोषो
९ G यद्यपशब्द°
१० G A g भूयसाभ्युदयेन
११ D E g B & C in marg. अन्यत्रानियम, after नियमः
२१ G om च
२६ E g B व्याक्रियते शब्दा अनै°, C व्याक्रियते अनै°, & शब्दा in marg
१२ ५ G आपिशिल B शाकलमिति altered from काशकृत्स्नमिति
१० G D यदप्युच्यते
१४ G om इति
१६ G पुनर्लक्षण लक्ष्य च
१७ E g B एवमप्यय दोष समुदाये, C has दोष in marg
१८ G °धीयमान
१९ G om हि
२१ G A °वेध्वपि वर्तते D B °वेध्वपि वर्तते
१३ १३ G om इष्टबुद्धयर्थश्च।
१९ A E C g B om आकृत्युपदेशात्सिद्धमेतत
१९ G D °पदिष्टा सा स°
२३ G ऽम्बुकृतो
२५ G °मम्बुकृत
२६ G सदृष्ट° वृत, D A वृत
१४ १४ G D A E वाक्यानि हि°
१९ G °नार्थं उप° C °नार्थमुप°
१५,१३ G om विवृतस्य
१७ B om वा G °ख्यायते °मानस्य विवृताश्चोद्यतेति D सवृतोपदिश्यमानस्य विवृतश्चोद्यतेति A °मानस्य विवृतश्चाद्यतेति C °त्यायते °स्य वा विवृतोपदशचोद्यते E °त्यायेत सवृतस्य वा उपदिश्यमानस्य विवृतश्चोद्येतेति
२६ G D °शरे अकारग्रहण
१६ ३ G वोत्र विशेष
३ G सर्वत्र
६ G D A om च
८ G om सवृतौ
१६ G वक्ष्यते
१७ १४ G om one विषये
१७ १८ E C g B जग्लिो A जडी॰
२३ G D A भविष्यतीति
२५ G D A B & originally L °वृत्तिकार्ये
२७ G D A om कथम्
१८, १ G D भवति instead of सपत्ना, A E सपत्ना भवति
२ G D A E g B प्राप्नुयाति
३ G °त्करोतीति, D A °त्करोति इति
१० G D °पृथक्त्वेषु इ°, A पृथक्त्वषु इ°
१२ A मधुराया
१३ G C इ इत्यत्र
२० G om च
२६ G प्रत्याख्यायते हि त°
१९ ४ G om
५ A मधुरी°
६ A यन्मधु°
७ G अन्यास्मिश्च रूप°
१४ G भविष्यतीति
२० G °श्वतुर्द्धा
२४ G D A have प्रकृष्टवान् after प्रकृत
२०, ७ G लडिड इति । एषोपि हि काकिड कपिडश्च D A लृकिडश्चेति । एषो
९ G D A °शब्दा न सति यदृच्छाशब्दा इति॰
१२ G D °दित्तशब्द
१५ G D A om हि
१५ G नैतद्दाषाय
१८ G D A येरे च
२२ G पिबति
२३ A यश्चैव
२७ G om स्यात्
२८ G °यो ऽपशब्दार्थक॰
२१ ५ G भविष्यतीति
६ G यदर्थमुप°
११ G न चापशब्दे न ह्य°, D A न चापशब्द न ह्य°
१२ G D A °दिष्टा शास्त्रे प्रकृ°
१६ E C g B om इति वक्ष्यामि
२० G D A E g B om लाप
२१ G g B सम्प्रसारणे
२८ G °द्वाकृष्यते D °टा निकृष्यते A °द्वा नि कृष्यते
२२ ११ G D सिध्यतीति
१३ G अतपर, C अतपरस्य
१८ B °वर्णो भूरिति
२३ ६ G D A have योतरतमो before दीर्घश्च C has the same originally in marg

पृ० पं०

२३,२३ G अप . ऽपि twice
२५ G स्यात् न वेति
२४. ३ G om. दीर्घ इति
१० G वक्ष्यतीति
१० G इतरथा दीर्घात्सिद्धातादित्येव
११ G भिसैस्भाव
१२ G D °ऽर्थादेव न.
१८ G किंत्करणस्यैतत्प्र°
२७ G D A om तस्य निमित्त
२५. ३ g नाप्यपदृक्तस्यावयवस्य
४ G अप्यत्र° . विधिर्न भवति
९ G D A तैल न विक्रेतव्य घृत न विक्रेत व्यमिति
१३ G विवृतत्वात्सप्यस्तरेषु.
२६, १ G °भयत्र रश्रुतिर्लि°, D °भयत्र
३ G ऋवर्णाचेति
५ G इत्येव तस्य सि°
६ E यचात्र रे°
११ G D A °कारणत्व°
१२ G D A om स्यात्
२७, २ G पूर्वश्च परश्च
२८,१२ G सतीति द्विर्वचनेपि हि ने°, D द्विर्वच नेपि हि ने°.
१८ E g B °ऽानुनासिकयमा C om °नु- नासिक्य°, K °स्थानीयानुनासिकयमा
१८ Kaiyata mentions the reading °नुप दिष्टा श्रूयन्ते, without च
२१ E उर ंकेण उर ंकेण उर वेण उरंपेण C has उर ंकेण उर ंपेण in marg
२९ २३ G D A E g B K उक्ते
३ G om ततो
४ G °नीति तर्हि व°
४ G °देव तस्मि° C °वतस्मि°
११ G वक्तव्य भवति
१० G D A सयोगसज्ञा च प्र°
१८ G D A भविष्यति
२२ G भवतीत्यस्य सत्व
२४ उरक । उरप, D उर । क । उर ंप G in marg उर×प्रक उर प
२५ G D A स्थानिवद्भावप्रतिषेध, after °षेधश्च
३० ३ g अर्थवतो वर्णा कृत धातु.. दर्शनात् धातव एकवर्णा
३ G प्रातिपदिकान्यप्येक°
९ G D A उ अपक्राम, G in marg अ निष्ट । उ उत्तिष्ठति पाठातर
64 M

पृ० प०

३०, ११ °पजने, G in marg °पसजने पाठातर.
१२ MSS. तेन मन्यामहे
१३ G यकारस्य तस्मादर्थवतो वर्णा इति ; D यकारस्य
१८ G °च्यते ह्यनर्थगतेरिति न साधीयोत्रा- प्यर्थस्य , D A न साधीयोऽत्राप्यर्थस्य
२० G om न तदर्थगति
२५ A om
३१. ११ MSS except A कृत्नैस्तर्कै:
३२ ११ वक्ष्यति, G in marg करिष्यति पाठातर
१० G D A भवतीति
१८ G आचार्याणामुपदेशात् तथा ह्याचार्या- णामुपचार नै°; in marg उपचारात् पाठातर
२० G om
२१ D A om अप्रधानत्वाच्च
३३ १ G D A E g om ह्रस्वदीर्घप्लुत
२ G D A & originally C पूर्व एव
९ G D A तावत्पूर्वे भ°
१८ G विभाषा कथ
२२ G in marg नित्योपि हि लोपे पाठातर
३४, २ G om अनुवर्तते D A °व्यमाचार्याणा वर्तते विभाषा न वेति
९ G कतरस्तस्मि°, C कतमस्मि°, origin- ally कतरस्मि°
१८ G सदेह स्यात्
२४ MSS except A, °त्येव स
२६ G D A भवति यद°.
३५ १ भविष्यति, G in marg भवतीति पाठातर
३ G D A जिहीर्षति
८ g B सवर्णग्रहण त°.
११ G D A दृष्टोविरयत्र, D in marg इत्यत्र पाठ
१७ G D A प्रयत्नमा°.
२० G & originally D एवानुवक्ष्यते
३६. ९ G A सत्प्रत्यय , D सर प्रत्यय
११ G A & originally D योयम°.
१७ G दधिप्रहराविति । सर्वपुण्य°.
२० G adds पदसङ्गा चैयत् २ मयामध ८००, in marg पदसज्ञा नाम प्रयागाद्दिकम
३७, १ D om pag 37, 1 up to pag 106,25;
७ G दृष्ट्वसि
१२ एष विधि . G in marg स्वरविधि, पाठातर

पृ० पं०

३७, ११ G भार्या यस्य स ता°.

२० G प्राप्नोति.

२३ G °निमित्त वृद्धिनिमित्तं किं च कृ°.

३८, १६ G संप्रवृत्ते, A B सप्रवृत्ते.

१७ G A °श्रखालमिति.

२० MSS. except A, तेन मन्या°.

२२ G om इति.

३९, ४ G °त्येतावद्यु°.

७ C g राज्ञा राज्ञिन प्रत्याख्य स्वयं निवर्तते; E B the same without स्वय.

११ A E C g B प्रयत्नेन.

१५ G A वृद्धि°.

२४ E g om. लोके.

२७ A E C g B om यद्यपु.

४०, २ G A वृद्धिर्था°.

५ G om इति.

१० E g B राज्ञा क्रियते.

१२ G °क्रियते सतो.

१४ E C g B कृतस्तत्र पु°

१५ G A om पूर्वेतभिसावन्ध

१६ G सस्था कृत इति, E the same by alteration, C सस्याकृत

२२ E नेतरमाणाय

२३ G A om तद्यथा.

२५ G मनाप्यगत

४१, १ E B चेत न नि°

३ G A मृत्ते प्रसंग

४२, ३ G स्यात्मा

६ °ङ्रहासते G in marg उहासगुणक पाठांतर.

९ G A °भेमीति म

११ G A om इति

२० G निरमात मर्व गुणवृद्धी नतु

४३, ८ G परस्य

४४, ५ A E C B °ज्ञा प्रमाति

७ G प्रसंगात्तु°, A g आदेश°

१० C B °स्त्यात न

१० G in marg. [illegible] पाठांतर

११ [illegible]°, G in marg [illegible] पाठांतर

१२ G C [illegible] G in marg [illegible] पाठांतर

१३ E [illegible], C B [illegible]

२० A E C g B [illegible]

२२ A E C g B [illegible]°

२३ A E C g B after [illegible]

[illegible]

४१, ३ G स्थाने षष्ठी.

४ G ऽन्त्यस्य पठ्य°.

६ E g B om किं तर्हि.

७ A E C g B मिदिगुणितपुग°.

९ A E C B ऽर्लोदियस्योति

१३ G °ह्रस्वाद्भेयो°.

४६, १ G °रिति भवेदिह नियमोऽनन्त्यस्य न स्यात्.

९ G om. स्यात्.

१९ G सभवो द्वयो

२१ A E C g B om विप्रतिषेध.

२३ E C g B प्राप्नोति । नाप्राप्ते नियमेन योग आरभ्यते । यावता च नाप्राप्ते.

२४ E C g om. ऽनत्य

२७ G om. गुणो भवति

४७, १ A E C g B मिदिगुणितपुग°.

५ G A मिद् ए, g मिद ए मिदेरिति.

९ G A E B म्रच्छति च म्रताम्

१७ G °पर, in marg पर इत्यपि पाठः.

२० G नित्य°

२३ G A om सद्य.

२५ G भूत

४८, १० A E C g B om परिमृजन्तु परिमार्जन्तु.

१४ G B om वा.

२६ G नन्वस्ति पु°.

४९ ६ MSS here and below, त्वान्त°.

११ E C g B तत्सत्त्वं न यत्नस्य मिधि°.

२१ G °स्तानि गमयति दर्शयति

२१ G A B om ऽपि

२२ G om

२४ २६ G स्थानियोगात्, in marg. योगरचात् पाठांतर

५१ ३ G A om पूत्र

६ G om इति

७ G A E C [illegible] अपारि.

८ G A om [illegible]

१० G A om इद.

११ G has [illegible] after इति.

१४ G om.

१५ G °[illegible]

१६ G [illegible] ally A C [illegible].

१७ G [illegible]

२० G A [illegible]

२१ G A [illegible]

५२ ५ G [illegible], E C [illegible] [illegible].

पृ० पं०

५२, ८ G जीवे रस्तु°.
९ A E C g सम्प्रसारणं.
१० E C g B संप्रसारणं; C g B add भवति.
१३ G अजादावपि दृश्यते.
१७ तस्मादिग्लक्षणयोर्गुणवृद्धयोः प्रतिषेध K and A, G adds तस्मादिग्लक्षणा वृद्धिः; E C g B have only तस्मादिग्लक्षणा वृद्धिः.
२४ G तत्राप्य°.
५३, १० G बाध्येत.
१४ g B om. प्रत्यया° .. सिद्धम्.
१९ E C g B सम्प्रसारणं.
१९ A E C g B °प्युक्तं किं स°.
२२ G गुणो भाव्य°; g गुणभावीनास्ति.
२४ C g °पधस्य चांगस्य; E B अगस्य in marg.
५४, १ A G पुगंत च.
४ g B & originally E अत्र न प्राप्नोति.
६ G °तुपधत्वा°.
७ G न क्ङि°.
५५, ९ A E C B स्थानिवत्प्रसंगः.
१६ Kaiyata: केषांचित्पाठः सुपर्याम्श्वैर इति.
२२ B छंदस· छन्दस्यपी°
२३ G गुणस्य दर्श°.
२४ E C g B दीर्घोनैर्यो छंदोविषयो दृष्टानुविधिश्च[g om. च]च्छंदसि भवति दीर्घात्वेच्योदछंदोविषयत्वाद्दृष्टानुविधित्वाच्च° च्छंदसः.
२४ G दृष्टानुविधित्वाछंदस
५६, ४ A E C g B बाधेत ।
९ E C g B दीध्यंशिति च इय° Kaiyata क्वचित्तु शब्दयत्वयोनेति पाठः.
१० g दीध्यशिति च इयन एव, E C दीध्यशिति च इयनप्य°, B originally दीध्यशिति इयन एव घ्य°, afterwards एव has been struck out.
१९ G A g B अतरा एषा°; C K अतरा येषा°, E originally अतरा येषा°, altered to एषा°.
२१ G A E g अंतरा एषा°, C K अतरा येषा°, B originally अतरा एषा°, altered to येषा°.
५७, ७ G A om च.
५७, ९ G शब्दुच्यत
१३ G A om च
१८ G A om. च.
१८ G om. संयोगा°...इति.
१९ G om. सोऽयं, E C B have ऽसौ instead, A °र्थस्यासौ.
२७ G om. किं.
५८, ६ G A om च.
७ E C & by alteration g संयोगसंज्ञा.
८ G द्वयोर्द्वयो. स°, A हलोः स°.
१४ G A B यथैव.
१४ G °सन्नायेना ह°.
१७ G A यत्र द्वयोस्त°.
१७ G A g B अतरा एषा°; C K अतरा येषा°, E originally येषा°, altered to एषा°.
१९ G निर्दिशति; in marg. प्रतिनिर्दिशति पाठांतर.
२४ G A प्राप्नोति.
२४ G संयोगादि.
२६ G A संयोग वि°.
२७ G A om इति.
५९, १ G प्राप्नोति
१३ C in marg. चत्रोक्त.
१४ G A °तीयस्य घ्य°.
१६ G भवति ।.
१७ G om इति.
२१ G वाक्यपरिसेपे.
२२ २३ G स्थंडिलके.
६०, २ G भवति
९ G सुलमहण पुन श°.
१४ G om ते, ते
१५ G A om ते
१८ G B om. the first च.
१८ G तर्हि इतरे°; g B & by alteration E तर्हीतरे°.
१८ G A °श्रयाणि न च प्रक°.
२० G °वसुकम्
२१ G om. चित्रुकम्
२१ G om. च शार्दैतु
२२ G न च गत°.
२४ G तत्तस्य सर्व°; A E तत्र सर्व°.
२५ G A B तस्यानेन, E तस्या अनेन.
२६ G A B °श्रयाणि
६१, ८ G and originally A नत्रत्ययः.

पृ० पं०

६१, १९ E C g B सिद्धा भवति; A सिद्धेति.
 १६ G in marg. °द्घोषवता पाठांतर.
 २० A E C g om. किं कारणम्.
 २१ K °मेके इच्छन्ति.
 २७ G कथं तर्हि प्रयतनं प्रयत्नः नाय भावसाधनः प्रयत्नः किं तर्हि.
६२, ४ G A B प्रयत्न इति किं तर्हि प्रयतन°.
 २७,२८ G ऋकारऌकारयो सवर्णसंज्ञाविधि ॥ ऋकारऌका°; A E both times ऋकारऌकार°, C thus only in l. 27.
६३, २ E C g B ऋति ऋत्वा . ऌति ऌत्वा°.
 ४ G E ऌकारे च वा ऌ भ°, C ऌकारे परे च वा ऌ भ°, g ऌकारे परत ऌकारो वा भ°; B ऌकारे वा ऌ भ°.
 ६ G ऋकारः ऌकारो, E ऋकारः ऌकारो; C B ऋकार ऌकारो; g ऋकार ऌकारो.
 ६ G ऋकारस्य ऌकारस्य अच्त्वं ; E ऋकारस्य ऌकारस्य चाच्त्वं, C B ऋकारस्य ऌकारस्य चाच्त्वं, g ऋकारस्य ऌकारस्याच्त्वं.
 ६ G A कर्तव्यं; B कर्त्तव्यं.
 ७ G होतृ ऋकार होतृइकारः होतृ ऌकारः होतृइकार.; E होतृ ऋकारः होतृकार होतृलकार., C होतृ ऋकारः होतृइकार होतृकार होतृ ऌकारः होतृ इकार होतृकार.; g होतृ ऋकार होतृकार होतृ इकारः इति होतृ ऌकार. होतृकार होतृ इकारः, B=g, but om. इति, & has at the end होतृइकार इति.
 १४ G कर्तव्यमसत्यां.
 २३ G A om. इति.
६४, ७ E C g स्पृष्टं करणं स्पर्शानां.
 ८ G स्वराणां विवृतस्य; C g स्वराणां च विवृत; A B स्वराणां च विवृतस्य.
 १९ G गृह्णातीति
 १७ G om. कुमारीहते.
 २४ G A प्राप्नोतीति.
 २६ G वा एतद्°.
६५ १ G A & originally B वा मा भूत्.
 २ G A B प्राप्नोति.
६६, २ G किमर्थमिदानीं त°.
 ७ E C g B यस्य गुण. मकृत्योने गुणस्य
 १२ G मगृह्य म°.
 १८ and २० MSS. °च्यते.
६७, ११ G एकदेशाय°.

पृ० पं०

६७, २२ G E °भैवति.
 २३ E g B दीर्घादि च द्विवचनं, Kaiyata mentions the reading ईदादयन्तं च श्रूयते
६८, ९ G 'विधे प्रति°.
 ६ G खल्वस्मिन्पक्ष; E खल्वप्यस्मिन्पक्ष
६९, ३ G B सतो हि.
 १० G आङ्गुणासिद्धिः.
 १० G E C तस्मादत्राप्र°.
 १३ G अदस परं ईदा°; E has परे in marg.; C has परे obliterated.
 २० Nāgojibhatta assumes that Patañjali in the words l. 12 अथवा प्रगृह्यसंज्ञा°. अथवा योगविभाग, l. 19 अथवाहायम°, is commenting on the three Vārttikas वचनसामर्थ्याद्वा. योगविभागाद्वा, माथादीनाचार्याणां वा. & he adds अन्ये त्वथवा वचनसामर्थ्यादित्यादि भाष्ये भाष्यकृत एवोक्तिरत एव सांप्रतपुस्तकेषु वार्तिकापाठ इत्याहुः। अन्ये त्वन्त्य उक्तवैल्यस्य वार्त्तिकत्वं मत्वा कोशे वार्तिकपाठो भ्रष्ट इत्याहु ॥.
७०, १३ G एकाजित्युच्यमाने, B एकाजित्युच्यमाने हि.
 १८ G यदि ह्यचान्यद्य ; g हि योचान्यश्च.
७१, ७ G विद्या°.
 ११ प्रतिषिद्धार्थो, G in marg °षेधार्थो पाठांतरं.
 १२ G बृहती च शक्करी च , g B बृहती च शक्करी.
 १३ G पदृस्या.
 १६ E C g B °पदोस्कारयेस्येवं.
 १७ G अत्रापि प्राप्नोति.
 १८ G °संप्रत्यय इति सिद्धम्.
७२, १ G न च उभे°, E न च उभे°, altered to नोभे°; C B नोभ ए°; g न उभे°.
 २ G E प्रतिषेधा°.
 १२ G ऊँ वा यथा.
७३, ७ G भवति.
 २३ G ननु भूयि°.
 २५ g प्रणिदयते प्रणिद्याति प्रणिध°.
७४, १ E कर्तव्यं for क्रियते.
 १३ G रातिरातिराभातिराशतिरायतिरातिशर्यति°.
 १४ G तस्मान् न कर्तव्य मेव वाक्यं.
 २८ E C °धर्मग्रहणात् न चै°.

१० पृ०

७८, २ E C om प्रश्न .
२ E g B °सत्ता भवति
७ G आगमो हार्थ°
११ G प्रतीतिर्सु°.
११ G उपादान स्य
२२ G न वक्तव्य
२५ G हैप्रतिषधा.

७९, २ G अप्राप्तो हि अनुपधा, C अप्राप्तो-नुपधा, B अनुपधा अप्राप्ता
४ G °इद कर्तव्य
१२ G g व्यतिहारे
१७ Kaiyata कश्चित्तावन्तभावादिति पाठ
२० G °न्तोपदिष्टानि
२० G च तानि स्तुरिति

७१, ६ G करिष्यतीति, E g करिष्यति हरिष्य तीति
१५ G स्थडिलके
/ १६ G B स्थडिलके
२० G उपयह पुत्रौ

७८, २ °न्तावदिष्टानि G in marg तोप पाठ
६ G आहितुप्रकायानि
८ None of the MSS. compared give the Varttikas 8—15 separately but the MS A has everywhere except in the case of V 10 a stop before the word प्रयोजनम् in the line following the Varttika
१७ ऐत, C g ऐट, B reads ऐट but appears originally to have read ऐत
२० G °वचनात प्र°, in marg अतवचने द्विवचनात्प्रगृह्यत्वे पाठ

७९ १९ G °नियहश्च
२२ G प्रसज्यत

८०, ४ B सख्यासंज्ञाया सख्याग्रहण सख्यास प्रत्ययार्थे
९ G प्रतीयते in marg प्रतीता इति वा पाठ.
१० E C B कर्तव्यम् । किं प्रयोजनम् ।
१६ C g कृत्रिमे कार्यसप्रत्ययो
१८ G अत्रापि instead of एव तर्हि
२२ G om च
२४ G om च

८१, ४ G पाथुर°, E C g B पासल°
१८ g न कर्तव्य after कर्तव्यो, E B the same in marg
१९ ते A the other MSS तेन

१० पं०

८२ ४ G I प्रवृत्तमनुवर्तनादन्यार्थे
६ G I द्वन्यन्य°
७ G °भवति भ°
७ G om, one यो
१५ G तुकि च प्र°

८३ १३ G B दातायदनो तु°
२२ G शुक्ष्य इति एवा°, A शुक्ष्य एकारत्ता एका इति

८४, १ G A शुक्ष्य
१२१५ G om निद्रासंज्ञाया, A om line 11 and निद्रासंज्ञाया of line 15
२३ G काक उत्पतति उत्पतितेति

८५ १ G सानुबधस्ये°
२ G काक उत्पतति उत्पतितेति
१२ G A प्राकाद°.

८६, ७ G om फलविज:
१६ G निधीयो
१७ G श्रूयते, in marg श्रूयेत पाठातर
१८ G निर्वर्तयति
२० G °यथाप्राप्त च
२२ G षष्ठीनिर्देशेन

८७, ४ G °नाद मतो°, C °नाद ला°, g B °नाल्लो°
९ G वक्तव्य C originally कर्तव्य, altered to वक्तव्य
११ G & originally C °नि च न सर्वादीनि
१७१८ G g °मड्ढावे C °मड्ढावे, E C om उत्तरादीनामड्ढावे प्रयोजनम्; B om l 17 and प्रयोजनम् in l 18
२० E om

८८, २ Nagojibhatta प्रायेण भाष्येऽपि अकारादकारादकाराविचत्र पाठ
५ G ब्राह्मणकुलन
७ G सप्तमीनिर्दिष्टे यदुच्यते before तथापि
७ G तावददड्डुत°, E C तावदड्डुत° g तावदडत°
८ G °स्यति स्थानषष्ठी
८ G °शक्य विभक्ति°.

८९ २ G भवतीति
१० G C °वचनविपर्यये°
१३ G °शब्दोन्यत्र

९०, २ G तृतीयापी दृश्यते, C अपि दृश्यते
३ G after हेतोरिति उभयाभ्यया उभाभ्या हेतुभ्या उभयाईत्वारिति

पृ० प०

९१ १५ प्रियविश्वाय, G in marg प्रियसर्वायेति पाठान्तर
१८ E त्यत्र साद°
२२ B om
९२ ९ E सद्यत्र साद°
११ E C g यथा विज्ञायेत
१२ G om T
१३ G om सर्वादीनि
२१ G पूर्वपाठे
२२ G पूर्वपाठे
२३ G यद् पूर्वादिभ्यो नवभ°
९३ ११ G in marg °ग्रहणार्थस्य पाठ°
१७ G प्रेक्ष्यपू°
१८ G वसतित C g B वसति
१९ B om
९४, ५ G om सा
५ G प्रसज्यते अ इव एव ॥
६ G गतचा°
१४ C सर्वा विभक्तिर्लोपा भवति
१६ G om यत
१६ G E विशेष गते
१८ G °भक्तिशब्दा
१९ MSS °च्यत
२३ G °भयाणि वार्याणि न क°
९५ २ G om अथवा
५ G °सज्यता था
६ G om तत्र °मतत
१० G सिद्धमतत् तथ पाठात पाठ क°
१२ G भवति ।
१४ G C ये स्वतेभ्या ये°
१५ G g B om इति
१७ G तदंय स°
१८ G om °वैतद°
१८ G भवति
९६, २ G चापि मता
२ G याग
३ G b °श्रिता A °गृहीता C F g B °निश्रिता
७ G अत्युर्धेरसौ अत्युधे रा B अत्युर्धेसौ अत्युर्धे रा
९ G भयूतमसिवध
२१ G om भय विज्ञायते
९७ ९ G om इति
१० F g B संनिपातस्येति
९८ ५ G दीपस्या°

पृ० प०

९८ ११ °तीरत E °ति किरत Nagojibhatta mentions this reading
१५ G °सृत्रमनिमित्त कस्य डीविधे तिस°
२० G व्यान्ता
२३ उचोद Nagojibhatta mentions the reading उवाख
९९ ८ G om क
२२ G om किं कारणम्
२३ Nagojibhatta यावद्गो दीर्घत्वस्येति अन्यो भाष्यपुस्तकेषु भ्रम
१००, १ G न हि मृगा B नापि मृगा
६ E अव्ययीभावस्याव्ययत्वे किं प्रयोजन अव्ययीभावस्याव्ययत्वे प्रयोजन लुङ्मुखस्वरोपचारा । लुक ।
१३ G A अपि खल्वाहु
१३ G यद्व्यया°
१४ G om इति
१४ G किं च पुन°
१७ १९ g B °येषथोंयते
२१ G °त्तत्र वाय
१०१ १ G here & below शि सर्व°
२ G शे प्रति°
३ E g B शिप्रति°
६ G शे प्रति°
६ g B न व्यापार
१४ C g बाधते
२२ G om one अन्यत्र
१०२ ४ G गतमितिना°
७ G शब्दपदार्थकता in marg पदार्थक वा पाठ
१७ G तेन लार्थे प्रति°
२३ G C भुजिना स°
१०३ ८ G 1 on प्रसज्यप्रतिषेधात् C in marg विधाय for प्रसज्य in the text B कथ । विधाय F originally कथ । प्रसज्यप्रतिषेधात । विधाय but प्रसज्य प्रतिषेधात् struck out
१० C om
१८ G °सामर्थ्यांप्रति°
२० G B विज्ञायत, g स्यात
१०४ ८ E g B अस्मिन् शास्त्र यस्य.
१६ G यस्यापि तु नि°
२० F B कार्येतु
२१ G °व्ययत यदुच्यत सस्य च यु°
२० G नैव शब्दः before नापि

पृ० पं०

१०५, ४ G °न तद्विषयता, in marg. °नेत्येति पा
 ठान्तरं g तद्विषयत्वं B °नेन च तद्विषयत्व
 ५ G in marg शीलने च, इत्यपि C g B
 आचार्यशीलनेन देशशीलनेन च L origi
 nally शीलने च, in marg न देशशीलने
 ८ G पश्चाद्वर्त्तुः g पश्चाद्वर्त्त
 ११ g B om च; in L it is struck out
 १२ G °महणेषु च देश°.
 २० G प्रत्याययति
१०६, ३ G & originally L प्रत्याहार, instead
 of प्रत्याहारग्रहणम
 ५ G अनुवर्तन
 ५ G °मानापि
 ६ G प्रत्याहारम°, F B प्रत्याहार म°
 ७ E C B उणादिविभाषा
 ८ G B om च
 १२ G om हि
 १३ G प्रोर्णु°
१०७, १ G प्रत्ययातादिति निरये
 ३ G D प्रत्ययातानि
 ८ G D om हि, L has it in marg
१०८,२४ G D C अधिरीश्वर इति वा
१०९ ३ G D E दिवस्तदर्थस्येति रि
 १७ G everywhere वाद्मीर° and तत्रोद्रा°,
 C g B everywhere तत्रोदाम L यस्क
 द्मीरान्गमिष्याम य न दशारान्गच्छाम
१११, ५, ६ E C g B वाक्यस्य स°
 ८ उपपद्यते, D & G in marg उपपन्न
 १३ G D om कार्याणि, G g °कल्प्यत
 १४ G ज्ञापकमुभ°
 १६ G D दीर्घो भवतीति च्यड
 २३ G पिडा, in marg पिडी पाठः°
११२ ११ G om यदि
 १७ L E C g B साधुत्वमन्वाख्यायते
 २१ E g B & C in marg इत्यतस्यापितुपु°
 २१ E अस्ति वेद Nagojibhatta reads
 this and says चपाठस्त्वयुक्तस्तस्य प्रश्ने
 ऽयुक्तत्वात्
 २३ G पुनर्नित्येषु
११३ १ G D ककार कारो च इता°
 ३ G °पस्थित भव°
 ६ E C g B °मिह तु यथ
 १० E C g B °नोपदेष्टु शक्नोति
 १२ A D g B °ग्र्धुं°
 १३ g B & by alteration C ककारवा°

११३,१४ D द्यादशानुपदि°.
 १६ G प्रत्ययस्य म°.
 २४ L C g B इह तु पु°
११४ ३ G यत्पर स्या°.
 ११ G °प्रत्यय स्यात
 १२ G B om षष्ठ्या अभावे.
 १५ G तेन म°
 १९ B °स्वर स्थानपरप्रत्ययस्यापवाद .
 २४ E C g B यद्ययमचो
११५, १ Nagojibhatta अनयाइरित्यस्यासम्भव
 इत्यादि । क्वचित्तथैव पाठ ।
 ३ G om भवति
 ५ G A D °स्पूर्ते, g मस्जेर्मिदनु°.
 ६ A D °स्पूर्ते
 ७ G °लोपार्थ च सयोगा°
 १४ G D om स्यात
 २० G om इत्
 २१ G °स्नुग्रात्त°.
 २२ G om च
 २४ L B क्रियत एतस्या°
११६ ४ C by alteration °यथा D °र प्रतिषेध .
 १७ G om श्रीभाविनवारप्रतिषेध
 २२ G om द्विश° °ह्रस्वत्वम्
 २४ C कृते अनजतत्वविति
११७ २ G विज्ञातुमिति
 ५ g एन इग्वचन राव°
 १४ G निवर्तते
 १५ G तत्रानेनैकौ निवर्तेते
 १९ G D E om इकारोकारौ भविष्यतो, C
 has the words in marg
 २० D °री अर्द्ध एकारार्द्ध औकारो, C °राव
 र्द्धैकारोकारौ G E B °रावर्द्ध एकारोर्द्ध
 ओकारौ
 २३ G om पार्षद° नार्थ
११८ १ D om
 ६ G सेय स्थानेयोगीति
 ९ C षष्ठीस्थान°
 १० E C B & g in marg यावतो वा सति ते
 १९ G om त्व
११९ ३ G °वर्तीति
 १० G वेदमाभिज्वाल°
 १२ G उपतिष्ठति
 १४ G °मान एत°
 १५ G तत्प्रकृतमा°
 २१ G सौनाश्वेति, in marg ओचाश्वेति
 पाठः°, A D सौवाश्वेति

पृ० पं०

१२० ६ E B मधूष्ण
८ D E C g यत्रानेकमा°
१० G °वेकारा भ°
१६ E g B & C in marg °वचन नियमार्थम्
२४ D E C B उभयथा हि तु°
२५ G यणो ये in marg यणा पाठा°
२६ E C g B कुमार्यर्थ
१२१, १ G भवतीति
१० E om °र्तव्य । up to pag 204 19 ह्रस्व
१९ G om इति before एतन्नि°
२१ Nagojibhatta reads रा यि च्छा°
२५ D C g क्रियते न्यास एव
२५ G D g इत्यादिशता
२८ C g °न्तरेणापि तका°
१२२ ३ C °म निर्वर्तके सर्वस्था° g °न्तरतमे नि°
B °क सर्वस्था°
४ C g °तम नि°
१३ G सिद्धा न भवति
१७ G भुक्था
१२३ ८ G D g तद्यथा गार्यो
१० C g B °न्योन्यमपदय°
११ G यद्° D वद्°
१४ C g & originally B नार्याग°
१५ D C समज्वलित
१५ C g नागाग°
२१ C कुमार्यर्थं
२१ G A मालिकादिमा°
१२४ ३ B om च
१० G नि ङभावे
११ C g B एतद्मा°
१२ C B एजास्ति, g एनास्ति
१३ G om सव
१४ C om °क्ष्वर्णे° °प्रसङ्ग
१९ G रेफवानकाराऽन्तर° in marg °कार एवा° पाठा°
२२ G सर्वादयप्रसगस्तु
१२५ १ G भविष्यतीति
९ C B & g in marg °वत्सह साम°
११ G D मालिलया f r मालीयगत्र
१९ Kaiyata ment ons the reading ऽण् भवति स्वरश्च
१८ C g °प्रपरत्वमावमनन
२० C °धामिति चतु°
१२६ १ २ C g B य चः स्थानेण् स
६ C g B वाप इति स इह वापा

१२६, ८ g B यद्यप्यणोऽपि प्राति°
११ G B अत एव दोषो
१४ १५ C प्रसगेण्परं°
१८ G द्वितीय स्थान प्र°
१२७, २ C & by alteration g उदात्तादिषु स्वर त्वस्य
१० B चेद्वादेशेषु रा°
१३ C g B इह न प्रसज्येत कर्ता
१७ G on या
२२ G D लुप्यते तत्र C लुप्यतेत्र प्रत्ययविस र्जनीयो रास°
१२८ १ G om स्यात, in marg पूर्वात स्यान पाठा°
२ G निर्वृत्त
१८ G D भवतीत्यजा°, g भवतीति अजा°
२२ C g B om च
२४ B & C in marg प्रत्यये च व्यव°
२४ g प्रकल्पेत
१२९ १ D C g B om रेफस्य
३ G g om इति विसर्जनीय
५ Kaiyata mentions the reading कल्पपद°
६ C g B om कृत्वा
६ G D तीर्यत
९ G °लाप भीत्वशु° D g B °लोप औरव पु°
१२ G om the second वर्तते
१७ G D यत्तर्हि
१८ G D om च
१८ G आतर शु°
२१ G om इतोऽव्यवस्था
२३ G D अभ्यासलोपश्च । अभ्यासलो°
२४ G C om अभ्यस्तस्वर
२५ G D g & originally C भवतीत्यजा°
१३० १ G C g B om दीर्घत्वम् D has दीर्घत्व
३ G D om च
६ MSS °स्युच्यत
६ G D तत्रायमर्थो
१३ G D have इतरथा ह्यादिप्रसङ्ग imme diately after °संहार
१६ G ऽप्यंतस्य
१३१ ६ G °तदय ज्ञा°
७ G om तत्र
१० G °स्यस्थेतरथा°
१४ G °श्चविष्यति
१६ G °स्यैतद्भवति
२१ g B विशपनार्थं ककार

पृ० पं०

१३३ २३ G न विशेषणार्थे

१३४ २ G °भावितमित्युच्य°.

७ G C आदेशस्य.

११ G विरोधात्

१८ B °वाक्यानु

२१ G °पूर्व विशिष्यते

१३५, ३ D g इत्यादय प्र°.

६ G D भवति अग

७ G D स इममिति

१४ G प्रत्यादि.

१६ C सामान्यविशेषौ हि वि°.

२३ G D g अप्यनेन

१३६,१२ g A B in marg °अपकर्षिका

१४ G A originally D C °पाठसुभाव

१९ G D स्थानिवद्भावादसत्ता पूर्वस्य च स्थाध°.

२१ G कृतं कृतमिति°

२३ G D इत्युक्तम् C इत्याह

२४ G विशिष्टस्था°, D om विशिष्टं

१३६ २ G °मादेशिन्यादि°.

१० G छित्

११ G न भवातदस्या°, D B om तद्तुस्य दर्शनम्

२० G भेत्र I.

२१ आश्रय इति, G in marg आ (?) श्रियत इति पाठान्तर.

१३७, ३ D & G in marg नित्यशब्दत्वात

५ G स्थानी नाम

७ G on यथा, D g °पूर्वेष्वपि

१० G om च

१८ G °पूर्वं स्थानिवा°, स्थानिवा°

२४ After प्रसक्ता, G has पश्यत्तह आर्धधातुके अस्तेर्भू भवतीत्यस्तिबुद्ध्या C अस्ते र्भूरित्यनेन रितबुद्ध्या, B सौस्तेर्भूरित्यने नास्तिबुद्ध्या

२४ B बुद्ध्या अस्ति.

२६ G भवति तु°.

१३८,११ १२, G उभयो प्रतिषेधः

१२ G मात्रमित्येव, C मात्रच इत्येव

१८ G तैलमात्रा २ घृतमात्रा २

२० B वचनादिसे, C by alteration बहुवचनादिदेश

२९ G नास्थानि°

१३९, ९ G पूर्वभूत

७ D g B न वहींवर्गा

८ K om प्रशिष्टनिर्देशात्सिद्धम्

पृ० पं०

१३९, ३ G आ भाप.

२० G A पुनरपि भवेत्

२१ G A इत्यपत्नीति

२६ Kaiyaṭa कश्चित्तु यशाविधीनां पाठ..

१४०, ४ G भापयति

१४ G om पूर्वे

११ G om

२० G आदिश्यते च्छद°.

२४ G om विप्रतिषेधे.

१४१, १ g इदं च पराविति, C adds प्रतिषेधः in marg

९ G °इदंतु प्रतिषेध

१८ १९ C g B करोतिनित्यो.

१९ G निमित्ति, C निम इति

११ G °यज्ञभावात्°

२१ C उक्त च.

२२ G D B सपदनि°; g सपदकरणाविति°.

२३ B om. the Bhāshya on I, 1, 57.

२४ G C g प्रभो शिव पूजा

२४ C g सुत्रा सुत्रा

१४२, १ G तत् तर्हि

९ अतिगत्य, D अतिगत्य, G has this in marg, g om

२१ D °धिवर्ण

१४३ ६ G प्राप्नोति

८ G om पूर्वविधि

९ वद्भावस्य, G in marg °भावे पाठान्तरे

१२ G प्राप्नोतीति

१४ G °भवते

१४४, ६ G om तुल स्थानिवद्भवति.

२० G नेतरा°

२० २१ G धारणि पारणि

२५ G इत्यनेनापि सि°

१४५, ८ G हन्याः उदात्त°

१७ D C g om कथं च सिध्यति

१९ G तर्हि यनोदात्त°

२२ G om ननु चेयमपि कर्तव्या.

२७ G C यथैव, C तथैव

१४७, ३ G D g तस्मात्स्थानिवद्वचनम्

४ G असिद्धत्वं च असिद्धत्वं च वक्तव्य.

१९ G मातृवदस्य

१७ G D भवतीति एवमा°.

२०, २१ G °कातुसात्त°, in marg एकानु दात्त पाठान्तर

१४८,१६ C g सिध्यति

पृ० पं०

१४८, २१ C ऽन्यतरतो व्य°.
२२ G ग्रामे गुरु°
२२ G °निमित्त च वसाम इति.
१४९, ४ C K om निश, in g it is struck out, Nāgojibhatta निश इति तु प्रक्षिप्त शतसहस्रयोरेव इस्येष्टत्वात
१३ G °यद्गुरद
२१ G °णादिशेयोगु°.
१५०, १ C om प्रतिषेधे
१२ D °कात्वानिषेध
१३ G D g om यलोप
१४ G D उलोप.
१६ G g ईत्व.
१७ G अनुनासिकात्व
२० G राया आत्व°, D C रायात्व°.
१५१,१४ G न पदान्तविधिं प्रति स्था°.
१९ G om च
२१ G कानि सति यानि कौ
२२ G D वा श्रूयते स.
१५२, ७ G om न
८ G अवर्णलोपविधिं प्रतीति यलो°.
१४ क्वित्; G in marg क्वित पाठः°
१६ G °लोपे लो°, g °लोपविधिषु लो°.
१९ G प्रतिशीत प्र°
२३ g प्रतिनिर्दि°
१५३, १ G °मप्राक्षी°.
४ B om.
६ G कडूतिरिति
२२ B शर्तेन्द्र शतानि
१५४, ९ कशब्द°, G शब्द°, B कप्रत्यय°
९ g B om प्रयोजन
१२,१३ D वध भावात्लोप आदिवत् र्थत्वे २, G C g B om l 12, A om, but has a stop before प्रयोजनम् in l 13
१५,१६ G D हलो यमां यमि लोपे २; A C g B om l 15
१८,१९ G D अझो. तिषु २, C g B om l. 18, A om., but has a stop before प्रयोजनम् in l 19
२२ C °शांति च प्रयोजनानि न, B °दीनि च प्रत्याख्यानि भ°.
१५५,१४ g भ्रमरस्य न ता°.
१९ G गाष्ट गति°.

पृ० पं०

१५५, २२ G here and below, कृस्ये°.
१५६, ८ °त्रपुस, Nāgojibhatta त्रपुसमिति पाठान्तर त्रपुसमिति च.
१५७, ७ G औशीरा°, g औशीर°.
१५८, ३ D तत्तिरि°.
८ G विभाष्यते.
२१ C लोपसंज्ञत्वात्
२४ D भवतीति पर्शा°; G भवतीत्युच्यमाने कथमेतत्सिध्यति को हि शब्दस्य प्रसंग यत्र गम्यते चार्थो न च प्रयुज्यते अस्तु तर्हि प्रसक्तादर्शन लोपसंज्ञ भवतीति प ष्ठानिर्दिष्टस्य यदि
१५९, १ G A D K °धारणे.
२ K B कथमिवै°, other MSS कथमेवै°.
७ B °प्रत्यये स°, g °ज्ञानिषे°.
१० G D om कर्ता° . °वृत्त्यर्थम्.
२० G om ऽपि.
१६०, २१ D C g B om न कर्तव्यम्
२३ G रायस्पोषेण सम्मीयेति
१६१, २ कथं तर्हि, G D g B किं तर्हि.
८ C g B °काल
१६२, १ D न स्याद्°
३ G क्रियते.
६ G om
१० G om पृथक्संज्ञाकरणात
११ G °नस्य सामान्या लो°.
१४ G om. न वा.
१६ G लोपसंज्ञा लु°.
२४ G अनिमित्तत्व
१६३, ७ G om कार्याणि
७ G g पर्यवसन्नानि.
८ G D भवतीति
८ G om the second च.
१६४, ९ G वचनात् भवति
१२ B लुमामी C °वृद्धी
१५ G हे अनड्वान्
२३ G यच तर्हि न स्या°.
१६५, १ D g B om.
१९ G सर्वस्वर.
२० G इत्याद्युदात्तं.
२४ G B om प्रयोजनं, C क्विकि°.
२५ G लुकि प्रयोजन.
२९ C B उद्गमीया.
१६६, ३ D C g B °स्थाने लुकि
४ D C g B after प्रयोजनम्, लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्य.

पृ० पं०

१६६, ११ C g B कतरस्मिन्.

१६७, २ G D om. पूर्वे.

३ G तर्हि वाक् पर°.

११ G D सा प्राप्ति प्रति°.

१३ G C B बाधित.

१८ G °योरंतस्ये°.

२२ g B & by alteration C स्वादिपरत्वेन.

२६ G om. च ; C बहुच्पूर्वस्य च twice, once in marg , g बहुच्पूर्वस्य बहुच्पूर्वस्य च.

१६८, १ G इह मा भू°.

२ C g B सिचि जुसोऽम°.

३ C B सिचि जुसोऽम°, g सिचि सिज्निमित्तस्य जुस अम°.

३ G D °प्रकरणत्वात्.

३ C आत इति वर्तते तन्नि°.

५ G °लक्षणत्वेन.

६ G °वादय आदेशाः प्रा°.

११ G सविभक्तिकस्य भ°.

१२ C B om. जनपदो ..नौ दीयते.

१६ G D C B om.

१६९, १ G C °त्युच्यते.

१९ C शिष्टात् शिष्टः; g शिष्ट शिष्टवान, B शिष्ट शिष्टात.

२० All MSS. except K h °त्युच्यते.

१७०, १ C g om ; G om अन्त्य° .. चेत्, D has अन्त्य° .. चेत् in marg.

२ G अलोन्त्यवि°, and om नानर्थके , °विकारे ; D has अन्त्यविज्ञानादित्युक्तम् in marg., and om इति .. °विकारे C has अन्त्यवि° . कारणम् in marg , B om. अन्त्यवि° ..°विकारे

१३ G शिलो°.

२० G इत्यत्र

१७१, ८ D om. कथम् ..भविष्यति.

१७२, ११ G °क्यात्तर्या°.

१६ g om. आनन्तर्यार्थम्.

१९ g °योर्योगावि°.

२२ C om. इको यणाचि.

२४ G इष्यतेचि, D इष्यते चात्रापि, C इष्यते चाचि.

२५ G वचन नियमार्थम्, B om. वचनम्

१७३, २३ G आ उच्च°.

१७४, ४ G सर्वत्रैव कृ°.

१७ G D तत्र इत्संज्ञा.

१७४, २१ B पंचमीसप्तम्यो°.

२२ G D इति प°; g एषा प°.

२५ G उभयकार्यं तत्र ; C g तत्र उभयोः कार्यं.

१७५, ७ G D C B भविष्यति.

८ G D C om. इति.

८ G °स्सज्ञा दोष प्र°.

८ D तत्र न खलु.

११ C अत्रापि प्रकृतौ.

१३ C g B तावदिमौ यणिति.

१३ G यत्र च नाम.

२० G न शब्दस्या°, B न शब्दस्य स्वमित्येव.

२५ C originally स्वंरूप°, altered to स्वरूप°, g स्वं रूपं व°; B स्वरूप°.

२६ C अर्थे कार्यस्यास°.

१७६, १ C B °र्थे कार्यस्यास°.

३ G C B स्वरूप°; g स्वं रूपं व°.

५ C g B om शब्दपूर्वको ह्यर्थस्य संप्रत्ययः.

६ g B & added in C नाम च य°.

६ G यदा तेन.

८ D g om. and C adds in marg. अर्थे ऽसंभव .

११ C g B शब्दसंज्ञा°

१२ C B शब्दसंज्ञायां प्रतिषेधोऽनर्थक., g शब्दसंज्ञाया· प्रतिषेधो ऽनर्थकः; D appears to read शब्दसंज्ञा°.

१३ G om. च.

१९ G ण्वान्ता

२५ B °शेषाणां च वृ°.

१७७, ६ G D विद्यापोष रैपोष; g रै° धन° विद्या° अश्व° गो°; B = g, but om. अश्व°; C has only रै° विद्या°.

१० G A D C g B पुष्य°; G A D om. चन्द्रगुप्तसभा.

१२ G om कर्तव्यः.

१३ G D मासिक .

१४ G शाष्कुलिक.

१५ G तत्र भवतीति.

१५ D हंति, C अजिह्मान्हंति ऽनिमिषान्हंतीति ; g B the same without इति

१७ G अ' सा°.

२१ G °लिटि इति दी°, g °लिटि दीर्घ इति दी°.

२३ g B & G in marg. सर्वेषामिप.

१७८, ४ G & originally C रिरिषु .

पृ० पं०

१७८, १४ G दीर्घं सह इति
१८ C g °माणशब्दसम°.
२२ B वर्णपाठक्रम उप°.
२३ g B & C in marg. °पाठक्रम उ°.
१७९, १ g °परकाला अपरकाला सती ; B om. °परकाला सती, C सैषापरकाला उपदे शोत्तरकाला वर्णा°.
३ B om.
१८ G °नन्यत्वकार..
१८०, १ G तद्दुल्लम°.
२ G om च.
५ g om
१० D om.
११ G क्रियते इत्यें°, D C क्रियते न्या°
१८ G उद्गस्य मु°.
१९ G in marg तत्काल कालोऽस्य सो ऽय तत्काल तत्कालस्येति पाठो°.
२४ B °भिन्नानामम°
२६ MSS °स्वरितानुनासिकाना, g has नुनासिका in marg, Nagojibhatta उदात्तानुदात्तस्वरितानामित्येव पाठ, k °त्तानुदात्तानुनासिकानाम्
१८१, १० G सिध्यति
१३ G g विशेष्यते
१४ G °मध्यवि°.
१५ G g विशेष्यते
२२ k °द्विशति . °चिशत कश्चिच्चत्वारिंशतम कश्चित्पारस्वरूपम्.
२३ C g B स्फोटस्तावा°
१८२, ४ G निर्दिश्यते. [पाठ
७ G in marg तन्मध्यपतितानामित्यपि
९ G om सबन्धिशब्दा
११ G D °रत इति
१२ C g B य प्रति य आदि°
१९ D g यदि चैव
१९ G क्वचित द्वे°.
१९ After स्यात्, C ब्रह्मेंद्र ब्रह्मोदक, in marg ब्रह्मोदन, g ब्रह्मेंद्र ब्रह्मोदन, B ब्रह्मेंद्र ब्रह्मोदन
२१ D C g B ऊनशब्दमाश्रि°.
२४ G चान्यस्य च विधिर्न भ°, D चान्यस्य च विधिर्भ°
१८३, ४ G om देन . °बाधितायशङ्कः, D °बा धिपसग
१८३,१७, १८ G समासप्रत्ययविधौ च प्रतिषेधो २ वक्तव्यः.
१८४, १ g अकच्श्म° . °पसङ्ख्यानं २ कर्तव्य.
३ g सर्वके स्वके
७ G om. & C has in marg. सिद्धमेतत् । कथम् । तदन्तान्तवचनात् ।.
१२ C om.
१८ G यावद्भवति
२२ G D om इति.
२६ G °स्य प्रयोगस्य प्र.
१८५, २ D C g B om. सर्वनामाव्ययसंज्ञाया प्रयोजनम्.
४ C g B om, B °ह्यादिषु म°.
७ G C g B om.
९ G C g B om
११ C g B om.
१३ g om द्वयाचिता द्विपरमाचिता, B om. त्रिचिता . द्विपरमाचिता
१५ C g B om.
१९ C g B सैहिकरोणः.
२१ g B & C in marg. न तदन्ताच.
२२ G सिद्ध भवति के°.
१८६, १० C g B om, B स्यासीता°.
१३ C g B om.
१४ C om सु सर्व, G B om. सर्व.
१६ C adds अपरपाचालकः अपरमागधक.
१७ C g B om, B कर्तोर्वृद्धिमद्वय°.
२० C g B om.
२१ G द्विषाष्ठिक त्रिषाष्ठिक.
२२ C g B om
२३ G अधर्मे चरति अधार्मि. .
२४ G न वक्तव्य भवति twice
१८७, १ B तस्य तद्°.
७ G प्रयोजन मह° . °विधौ २, C g B the same without २.
९ G आप स्वा°.
१० G D C g B om स्वस्.
१२ G D पद्यु° सुम२
२३ C g B om, G °च्चतुरतङ्श्चि°.
२४ B °पुसोऽसुङ गो°
२५ G D after सुपन्था, परमपथा, D in marg अपप्रयोग .
२५ D C g B om सुमन्थाः
२५ G D C in marg after सुगौ, परम- गा, D in marg अपपाठोऽय.
१८८, ३ C g B om.

पृ० पं०

१८८, ४ C om. च.
७ G C B om.
८ B वर्णग्रहणं च प्रयोजनं.
११ C B om.
१३ C adds दाक्षायणः परमदाक्षायण.
२० g B °ग्रहणान्यर्थ°, D चानर्थकेन च २ तद्°.
२१ G D C g B om. the second अन्.
२२ G सुपयासा इ°.
२५ C g B om अल्पग्रहणेषु.
१८९, ७ D B om. ऐतिकायनीया..
१३ D C g B उञोवादिरिति.
१५ G सर्वत्र प्रसगः.
१८ C अच आकृ°.
२० B °विद्यमानत्वं.
२३ C B om.
१९०, १ g B om
२ g om. च.
४ B om.
१० B after °काण्वाः, एतानि वृद्धसंज्ञानि स्युः.
१३ C om मातृपुत्रा..
१८ C निष्क्रांतकांतारो भवति.
२० A om. एङ् प्राचां देशे ; G A D सौपु° सौपु°, K k सौपु° सौपु°.
१९१, २ G °द्वचन त°.
३ G D तयोर्ङकारककारयोर्भावान्न कित्त्वङित्त्वयो प्रसिद्धि.
४ G शक्य क°.
५ G & C in marg. स ताभ्यां शब्दाभ्यां C originally स एताभि. शक्यते
८ G om.
९ G °शप्रतिषेधो.
९ G °कारादेवादिशादिती मा°, D °वादेशादिती मा°.
१३ G D °ङ्किद्विदिति किरत्°.
१९ C कर्तव्य । न कर्तव्य । न ह्य°.
२० G D गम्यते यथा एव
२२ G D ङिद्वद्भवतीति गम्यते अकिते किदित्याह किद्वद्भवतीति.
१९२, ४ G प्रसज्यनिषे°.
७ B °ति । गुकु°.
७ G D °पति इति ङित आ°.
११ G D °ति यथा म°.
११ C B मधुरायामिव मधु
१९२, १२ G D add कितीव किद्वत्.
१९ G °ङ्गुङ्.
१९ G D गुणवान् एव°.
२१ G सुप्तः सुमगत्रा°.
२२ G D B °थ इति अत्रापि.
२३ G D B यत्र इत्यत्रा°.
१९३, २ G जागृयः अत्रा°.
३ D om.
४ G कितीद्रम°.
७ D C g B om. क्त्वायां . प्रयोजनम्.
९ G शुदित्वा.
१० C g B उशाहृतः.
१३ G धूत्वेति भ°.
१९ C g B अपिन्ङिदितीय°.
२० C B आर्धधातुक, g °कीया .
२६ G D °बैकादेशम°.
१९४, ४ C g B न पिन्ङिदिति चे°.
४ G °देशम°.
५ G D आदिवत्त्वात्.
६ D शेष इति । सिद्ध तु स्थानिवत्त्वाद्गुभयथापि न
१३ G D बाधेत इह.
१४ C g B वर्तिता वर्धिता.
२० g ताभ्यां लिट. कि°, B नित्यत्वाच ताभ्यां लिट. कि°.
१९५, १ G D ताभ्यां किन्वच्च°.
४ G किमुच्यते
९ G यथाजातीया , D B °जातीयो.
१० G D B °जातीयश्च
१९६, २ G नानर्थक्ये
४ G °भ्रस्वादीनां.
७ G om खलु.
१० G कृतश्मश्रु पु°.
१२ g B and N (gojibhatta) शिल्पवि°.
१५ G D °वत् यथा प°.
२५ G om इह तर्हि प्रयोजन.
१९७, ५ B प्रतिनिमित्तानि.
७ G बाधते
१९८, ६ G D om यो.
७ G सिञ्चिरोषित इति लिङ विरोधित कथ.
११ g B & originally C अवाप्सीत्.
२१ G om दीर्घो मा भूदिति.
१९९, १ B om. निद्रायामवधारणात्.
१८ G °शिकत्वं
२१ G D °यो नातिदेशिकस्य किन्वस्य भवति प्रतिषेध औपदेशिकस्य भवतीति.

पृ० पं०

२००, ८ G D g किरतिदेशात्; B वस्वर्थं किरतिदेशात्.
११ G °तुकमवित् भ°.
११ G °ङ्गवतीत्युपधा°; B °ङ्गवत्युपधा°.
१३,१४ G निगृहीति २ म°; D C g B निगृहीति. प्रयोजनं.
१९ G सेण्न भवति.
२४ G D किरतिदेशान्निगृहीति, C g B किरतीदेशाद्गृहीतिः
२०२, ३ G om. हि.
५ B om.; C originally om., afterwards by alteration रल क्त्वासनोः किरवारम्भः। क्त्वासनो किरवं वि°.
६ G D ननूक्तं.
२०३, १ G D कुतश्चैतदे°.
१ D C g B भविष्यतीति.
२ G D द्विमात्रिक...त्रिमात्रिक.
३ G D वांत्ये, द्विमात्रिक ; त्रिमात्रिक.
४ G D °मात्रिकस्त्वशक्य.
६ G अय त्रिमात्रिको ; D अयं तावात्रिमात्रिको.
७ G D B om. हि.
८ G D °संज्ञैव न.
११ G वांतो.
१२ g एवमेषां.
१८ G मध्य .
१९ G द्विमात्रिकस्त°.
२४ G D g एवमेषां.
२६ G om. किं कारणम्.
२०४, ५ G g विशेष्य°.
६ G om. तर्हि.
९ G D भवतीति.
१४ G D om. ह्रस्वसज्ञया... स्वरितेति.
२०५,११ G °न्त्यस्य म°.
१५ C B सूयते.
२५ G नपुंसकस्याक्°.
२०६, ९ G D °र्थे च क्रियते.
१४ G हल स्व°.
१८ G °लभ्यते.
२२ G B om. इति.
२०७, १ B °धकस्याध्यवस्थि°.
२ G °र्भेवेदिह कं°.
३ E C B °यतो शनैर्व°.
१२ E B °प्रक्रमे य°.
२१ E C °ह्णसम°.
२०८, २ तद्यथा; G D g तथा च.

२०८, २ G पुष्पका एतेषां पुष्पकाः ; D E g पुष्पका एषां ते पुष्पका.
२ G कालका एतेषां ते.
३ तद्यथा ; G D g यथा.
५ G त्रि म°.
११ G D & E in marg. तत्र ते दीर्घ°.
१२ G D om. ऽत्र.
१९ G छंदसा°.
२३ E C B & g in marg °तौदयमगार्ग्यकाद्यपगालवानामिति एतदपि नास्ति प्रयोजनं संज्ञा°.
२०९, २ E B कथं अन्वर्थग्रहणात् अन्वर्थं°.
३ G ऊर्ध्वमनुदात्त°; D ऊर्ध्वमुदात्त°.
४ G ततः स्वरि°.
५ G °ह्रस्वोदात्तादुदा°...°मुदात्तानुदात्तस्य.
१३ G g वक्तव्यम्.
१५ D C °मिंद्राग°.
१७ C इंद्राग°.
२१ G D om. च.
२२ C B om.
२१०,११ G D om. ज्ञायते.
१२ G D om. वा वषट्कार.
२१ E B om. ; C in marg ; D om., but has in l. 22 परादिश्च S. उदा°.
२२ E om. हरिव आगच्छ.
२३ G D E g B om., C in marg.
२४ g om. one ह्वे.
२११, ६ G D om. भवति.
७, ८ G D अमुष्येतः.
८ G D om. भवति.
९ G D g स्यांतोपो°.
१० D C B °त्यत्यश्च.
१२ B om., C in marg.
१३ g has देवदत्तस्य.. यजते only once ; G देवदत्तस्य पिता यजते वात्सस्य पिता यजते देवदत्तस्य पिता यजते वात्स्यस्य पिता यजते.
१६ G om.
१९ B om. चेद्.
२० G D °भुर्त्य च व°.
२१२, २ G बहुवचनानि°.
३ तद्यथा ; G D g यथा.
५ G °हरतीति.
६ G D E °द्ववचनानि°.
१२ G g & originally E °श्रुतिर्भ°.
१३ G D ननूक्तं.

पृ० पं०

२१२, १४ G दोषे व्य°,
१६ G °तीनामपि प्रा°
२३ D C om अपि° °हणम
२५ G °त्यैव सिद्धम्
२१३, ७ G पैलादिषु वा पा°, C B & by alteration E पैलादिष्वेवास्य पा°
८ G D g °र्भविष्यति
११ G before अल्म°, अपृक्तग्रहण कर्तव्यम्
२० G D हलचान्यच
२० G अस्त्वन्य°
२१४, १० D तद्यत्तद°,
१८ G D g °पसर्जन भव°
२१५ १ E C B °स्ततोऽन्यत्रोप°
१० G D g तत्र प्रधा°
११ G D g यस्यति
१४ G °र्जनत्वमुक्तम
१६ E C g B भवति उप°
१६ G D g प्रधानस्य उपसर्जनसज्ञा पूर्व°, g प्रधानस्योपसर्जनसज्ञा न E originally पूर्वनिपातो, in marg instead उपसर्जनसज्ञा
१८ G °र्जनस्य ह्रस्वेति ह्रस्वत्व
२४ G D °प्रतिषेध इति
२१६, १४ g B add दशसु E सप्तसु
१४ G D B om ग्रामापन्न
२१७, २ Kaiyata वर्णाता मा but mentions the reading वर्णाता च मा
७ G D °मेतद्भवति
० G om इति after ह्येनायते
१० G & originally D E भवतीति.
१२ E C g B अर्थवदिति प्राप्ति°
१२ G D स्यात् for प्राप्नोति
१५ D adds in marg नाम after चरवयवा
१६ E C g B नेदवयवार्थवत्त्वात्समुदायार्थ वत्त्वम अवयवे°
१७ G D नगरमित्युच्यते गोम°
२२ G १ originally E तावद्राष्ट्र नग° C B तावद्राष्ट्रमित्यकारो
२१ G D शुक्ता इडेन
२१८, ३ E & g in marg °त्वविपत्तस्मात्प्रतिपद
८ G गामभ्याजे
९ E C g B गामेव अभ्याजैव
१६ E C B उचकै नीचकैरिति
२१ G °माया चान्या
२५ E g ननु चावदय मा°.

पृ० पं०

२१९, ५ E C g B °मुदायस्यापि मा°
५ G D °र्ते। हि क°
६ G मव तत्रि°, D E एतन्नि°
७ G D E भवतीति ना°
२० E कथम्। अन्वयव्यतिरेकाभ्याम्। अन्वया°
२२०, १ G शक्र
१ C B om & E in marg पुरुहूत
१० G D °र्थकत्वमुक्तम
१२ G सघातस्यार्थवत्त्वात्तु°, g °स्यैकार्थत्वात्तु°, B °स्य चैकार्थ्यात्तु° C °स्यै चैकार्थ्यात्तु°
१४ G °र्थवत्त्वाचैतस्य प°
२० D B कश्चित्स्य°
२२१ ११ E अथाप्रत्यय इति किं पर्युदासो.
१३ G °त्तिवेकारेणम°
१७ १८ G °डकादशम°
१८ After ब्रह्मबन्धू, D वीरबन्धू, E जीवबन्धू
१९ G ऊड आदिवत्त्वात्
२२२ १० G om समासग्रहण
१७ G C B & originally E °प्रतिषेधश्च
१८ g in marg च after अव्ययाना
१९ G अधिकरणमात्रा°
२२३ ७ G सर्वेतयो°
८ G om हि E om ऽपि
१० E °भाभ्यामेव g °भाभ्यामिति
१० वक्तव्य G D कर्तव्य
१३ गुणवत्त्वाय G in marg गुणवत्त्वाभ्यामित्यपि पाठ
१८ १९ G D उपसर्जनह्रस्वत्वे च २ E C g B only once उपसर्जनह्रस्वत्वे च
२० G उपसर्जनह्रस्वत्वे च २
२२४, १ E अतितत्री अतिलक्ष्मी अतिभू अतिश्री
२ C B स्वरायिष्यते g om तत्र
२ E °भवतीति
४ G °भवति
१० G D & originally E °त्र्यर्थ
११ G D om च
१२ C om गोक्षीरम, C B °पालकामिति.
१३ G D सनानिकु°.
१६ C B ऽन्तवद्द°
२१ C B अप्रधानत्°.
२१ G D om च.

पृ० पं०

२२४, २२ C B वक्ष्यति
२३ G C B om. हि.
२५ C om.
२२५, १ g om.
७ G om. यावती; all MSS om. the second च.
७ G प्रतिषेध इहा°.
९ C B भविष्यतीति.
१२ G °मन्यवद्भवति.
१२ G कथ ता°; D कथ ता°.
१२ E प्रतीक्षते.
१६, १७ G प्रतिषेधो २ वक्तव्य , D E C g B om. l. 16.
२२६, २ G गोण्या नेति तु वक्तव्यं, D गोण्या नेति वक्तव्य.
५ G om. ह्रस्वत्वमत्र विधीयते.
१३ C g B न तु सूच्याः.
१६ G गोण्या नेति च वक्तव्य.
२१ C B & g in marg. कटुकवदर्या
२२७, ८ G °सङ्ख्ये ते शक्यते अतिदेष्टुं
१० g in marg after प्राग्वृत्तेर्य, अथवा प्राग्वृत्तेर्ये लिङ्गसंख्ये न अतिदेश्येते। षष्ठी कस्मान्न भवति। सामान्यातिदेशो विशेषानतिदेश, Kaiyata mentions this reading.
१२ E C g B अन्यत्राभिधेयस्य व्य°.
२० G °सत्त्वाद°.
२५ E & g in marg अन्यस्यादर्शनेन, g om च.
२२८, २ ३ E मधुरा°.. °मधुरे.
१७ G मधुरा.
२१ G E भवति.
२२९, १ C B om.
७ C g B om च, E in marg.
१६ G सिध्यति जा°.
१७ G D तर्हि.
१८ G उक्तम् २.
१९ G D E g प्राप्नोति.
२३०, ३ C om.
४ E C g B . करोति। एको यव. सपत्न. सुभिक्षं करोति।.
२० G तद्यथा.
२३१, १५ G om. च.
१९ E °स्यामपि यत्निष्य°.
२१ G पुनर्नशत्वस्येत°.

२३२, १ G D पुष्यपु°, g तिष्यपु°, E तिष्यपु°, in marg. पु°, C B यथा स्यात्पुष्यपु°
२३३, ६, ७ G °वितीत्युच्य°.
१४ G om. the first च , D om. the second च.
२० G तत्र नैका°.
२१ G °धानं अने°.
२५ G इत्येतदृष्टांतमवस्थाय, D इत्येतदृ°, E इत्येव दृ°.
२३४, १ G D इत्येतदृ°, E इत्येनं दृ°.
४ g सुकर मन्यते; E originally सुकरक मते, altered to सुकरतरकं मन्यते, C B k सुकरतरक मन्यते, but obliterated in B, G D om.
१२ MSS. उच्यते
१८ G om. च.
२१ G सत्य सद्यो°.
२१ G सककारयो..
२४ MSS. उच्यते.
२३५, ५ G D समासात .
१३ G °मनर्थम्
१८ MSS उच्यते.
२० G ननु चोच्येत नैव व°, in marg चोत्प-तत्नैवेति पाठो°.
२३ G om. वृक्षश्च वृक्षश्च वृक्षौ.
२३६, ६ E om. पृथक्, all MSS except A उच्यते.
८, ९ B विभक्तयतानामेकशेषे विभक्तयताना-मेकशेषे वि°, G D विभक्तयतानामेकशेषे। वि°, E C g k विभक्तयतानामेकशेषे वि°.
९ G °भविष्यति
१२ G D E च देहि ब्राह्मणाभ्यां च कृतम्.
१४ कर्ता, G D E करण.
२३७, ६ G om.
९ G om. स्त्री.
१० G रोहितस्यापि.
१३ G रूपानिम°.
१७ G g रूपनिम°.
२२ G यानि रूपाणि.
२५ G in marg. after कथम्, विभक्ति सा-रूप्येणाश्रीयते.
२६ G यानि रूपाणि.
२३८, ६ C B & originally E नैष दोषः परिहृ-तमेतत् अनवकाश.
८ G g प्रयोगसा°.

पृ० पं०

२३८, १० E क्रिया । तस्या एके°.
  १० G E द्वितीयस्य पदस्य प्रयोगेण.
२३९, ९ D यस्योत्तरार्ध°, E यस्योत्तरः स्व°.
  १२ G D एकार्थेकथ एकां.
  १२ G द्वौ च द्वौ च द्वे, in marg. चेति पाठा° D द्वौ च द्वौ च द्वौ चेति.
  १३ G °र्थकत्वाचानेकश ; D °र्थकत्वाचा°,
  २३ G g भवति.
  २४ तद्यथा, G D B यथा; g om.
२४०, २ g om पिता
  ११ °क्षाम्नु, G in marg. क्षा स्युः.
  १६ E g B °प्रसिद्धिरेकार्थ°.
  २२ G °द्वाचनिको च.
  २६ G °श्चेति वक्तव्यम् । न च°.
२४१, ३ G तेन मन्या°.
  ४ G D °कृत येना°.
  ५ Nâgojibhatta mentions the reading बहुर्थता च.
  १३; १६ E g B k °निवृत्त्यर्थे केनाने°.
  १६ G °प्रत्यर्थे चे°.
  २३ G D एकेनोक्तत्वात्तस्यापरस्य.
  २७ G om न्यग्रोधार्थ.
२४२, १ MSS. यदिदं°.
  ८ G D & originally E द्यावाक्षामा.
  ८ G °वी सतमेते.
  ११ G एकशब्द.
  १५ G om एका.
  १८ g B कपोतेति.
  २१ G D om. च.
२४३, ५ G D E °लभ्यते । अस्तीत्याह । किम् ।.
  ९ G नैकोस्मि°
  १२ g B °त्यैकशेषे शेष .
  २१ G ननु यस्याप्याकृतिस्तस्यापि.
  २६ G D g B च समाप्यते
२४४, ५, ६ G D g B निष्क°.
  ६ G g B om. च.
  १५ G आरम्भसौवर°, in marg. आरम्भणालम्भनसौ° पाठः°.
  २२ D मधुरा°, G in marg. धु पाठः°.
२४५, १४ G om. च.
  १७ G D E °कृतिरिति च न°.
२४६, १ G स्त्र्यादर्सऽस्यां.
  १ G गुणे .
  ७ G om यत्तु भय तर्ग्ग्व

२४६, २० g om. शुक्लं वस्त्रम्
  २० G D पट्टी.
  २२ G om. the first च; G g om. the second च.
  २७ g B युगपद्यादित्य°.
२४७, ४ g B भवेदिति.
  १३ g B om. च.
  १४ G भिन्नार्थे°.
  १६ G कार्षा°.
  १६ All MSS. except K षोडशपलाश्च, K षोडशफलाश्च ; G °सवत्य ; D °शावट्य ; E. °सवट्य, in marg ढी जस्, g °शंवटयस्तच; g Kaiy. मापसतवट्य इति, B °शांवटयस्तत्र, B Kaiy. मापसरथ इति my MS. of Kaiy. मापशबट्य इति ; Nâgojibhatta in I. O. MS. & in my own MS. माषशंवट्यो माषः षो°.
  १९ G विशेष उच्यते.
  २० G यत सामान्ना°.
  २३ G om. शब्दग्रहण वा.
२४८, १ G केन च य°.. भूयते.
  ८ E g B कुलिश्च
  ९ G D °ह्वसणी होव वि°.
  १२ G °स्येतरेतरद्रम्.
  १६ E कुलिश्च
  २० B om. च.
२४९, ३, ५ B °लिङ्गस्यावि°.
  ९ G °वाचकम् । किं तर्हि । इत्यमपि । कथं
  १४ G इह तु न.
  १६ g B & originally E स्त्री सज्ञार्थेन, E altered to तज्ञार्थेन.
२५०, ४ इव, G in marg इह इव पाठः°.
  ५ E originally अन्यत्र रूप.
  ८ G om.
  १३ G om न सिद्धम्.
  १५ G शब्दाभिनिर्वृत्तो.
  १६ G °कारणास्ति°, g °कारणास्या°.
  २० G °इदागत°.
  २४ G D न चैव.
  २४ G om. हि.
२५१, १० E भवन्तीति वचनाच्चम्.
२५२, १२ G om. च.
  ४ G B अस्तीत्ता.
  २१ G D मग्लता इमे: E originally मग्लता इमे altered to उग्लता इमे

पृ० पं०

२५२, २१ G वर्णैरक्षा इति

२३ B om गईभाश्वस्तीति

२५३ ३ G पठति

६, ७ I °पुरुषकाणि

२५४, २ G D तत्र अपि श्रुधातुरिति श्रु°

६ L g B यः प्राति°

१० D om.

१२ E g B °भेंधश°

१५ B °जातीयका

१६ Nāgojibhatta °परवृत्ता

१६ g B अशक्या पिंडी° L originally अशाक्या च नाम पिंडी°.

१८ g B om. साधने.

२१ G कारिष्यते

२५५ ३ निदर्शित, G D B दर्शित g प्रदर्शित

३ G D g निर्दिश्यते, B निदर्शने

९ g पङ्क्ति, L originally पक्ता, altered to पङ्क्ति.

१२ E g B K om सिद्धं तु

१८ G ते नन्या°

२० G D om तद्यथा.

२१ G शुक्ल

२१ B om पुरदर

२३ G D ऽर्थवत्तापि न

२१ E k विशेष, the other MSS विशेषण

२५६ १ g B पचशब्दो E originally पचतिश° altered to पचश°

१३ G D °मीढ मे मरु°

१८ A B क्रियेत, E originally क्रियते, altered to क्रियेत the other MSS. [क्रियते

२१ G D विप्रतिषिद्धार्थाना

२५ G D निर्दिश्यते B निर्दश्यत

२७ G D पश्यति च भ°

२७ G D एषा वार्चा°

२५७, २ G अथान्यन्य° D अथनान्य°.

७ g B & added in E °ज्ञानामपि तु मा°

१२ E g B °णवर्ग°

१२ G स्यादिपादनिवृ°

१६ g B & added in E भाववचने धातौ तदर्थ°

२० G D °श्रय भवति

२५ G D & originally E उपपद्यते

२५८, २ प्राधान्य ; G प्रथमं, D प्राधम

४ G यत्रीयाति

६ G D g om किं तर्हि

२५८, १ G किमिव यत्त°.

१० L ज्ञापयिष्य°.

१६ G D °र्किञ्चित्सु°.

२२ G g यद्येव, D यद्येत.

२७ G D मन्यते.

२५९, ४ I g B here & below °णवयस्या°

७ D वहति वटतीति, g वहति वहयति, B वदयति वट्यति, I originally वहति वट्यति इहतीति, altered to वहति वहतीति.

९ L ज्ञापयिष्यामीति

१० G स्वरानुबधा वा.

१४ B किरिसि.

१४ g विसि, B क्षिसि, E originally किरिरि. altered to किरिसि, G A D K किरिरि,

१७ Kaiyata mentions the reading प्रत्यक्षमाख्यात°

१९ G D g °माख्यानमाह

२० G D g °दत्त मम भ°

२१ g om किरीटी

२५ G सर्वस्य प्र°

२६०, ४ g & originally E लक्षणेनापि सुप°, B लक्षणेनाप्युप°.

४ I B °क्षमप्याख्या°.

६ g B & added in E °द्वैतीयक्रम°.

७ G °माख्यानमाह

१४ g इह अश्र

१६ B °देशनेऽजनुना°

१७ B योजनुना°

२२ G D न प्रायवचना°

२६१ २ G न कश्चि°

५ G हलंते

७ G सर्वोपि D सर्वोपि हि

७ g तं समवर्धि घृत्वात्यो, Nāgojibhatta reads सर्वो हि हलन्त्यो भवति and mentions the readings त समवर्धि प्राति and स समवर्धाकृत्य

९ G °हातस्यात्.

१२ G °मिस्राज्ञो भ°

१५ MSS तेन; I g B व्यवसितान्तेषा°

१६ G °बधज्ञापित°.

२० I प्रथम । लकारनिर्देशात् । लकारनिर्देश त°.

२३ G भवति

२६२ ८ g °गमादिभेस°

पृ० पं०

२६२, ८ G °स्त्वरित इति

९ D g B इह तर्हि

१२ G D इह तर्हि.

१६ E g B भविष्यति instead of भवति भवति

२१ G क्व प्रेप्स दीव्यसे, in marg. क्वा प्रप्स पाठः, D E g B क्व प्रेप्सन्दीव्यसे.

२६३, ९ Nâgojibhatta says with regard to किं° ..°स्पृति, वस्तुतो ऽयमपाठः.

७ G तर्हि भव

११ G here & below चक्षु°, in marg. चु° पाठः°.

१२ G om. केशाचण

२३ g चेदिहिधि°

२६४, १ G E B विज्ञायते.

२ G श्रोत्रियपुत्र इ°, in marg श्रोत्रिय इत्युच्यते पाठः°.

६ D E g °मिरन्भू°; B °मित्याविरभू°.

८ G °मिरित

८ G पठति.

८ G उबुरिदृ, D उतदु°, E उदिदृ निशामने स्कान्दिदृ इति, B बुदिदृ.

१६ Nâgojibhatta reads वैधेय (मूर्ख).

१६ B °मागेपि वै, in E वै is added; g °माणेपि.

२५ G om. & D adds in marg. निष्ठा शेष्न किइ वाति

२६५ २ G णिङ्गहणेन न गृ°, E न णिङ्गहणेन गृ°

४ G g om.

५ E निर्दिष्टलोपाद्वा सिद्धमेतत् in marg

११ G °विधिमति°

१३ G D केनाभिप्रायेण नि°

२१ E °स्था शाला वृत्ते कांता उपलभ्यते, G D g B °कांता उपलभ्यते, K °कान्त उपलभ्यते

२२ D here & below °वामति°.

२६६, २ वक्तव्यम्; G D वार्त्तिक.

८ B चेत्पूर्वोत्तर°.

११ D E g व्यवसित पा°.

१२ G व्यवसित पा°, g B om. व्यवसित पाठः, in E it is struck out

१४ G om. अक्रिय° . गहेर

२२ G एकान्ता एकताय; D एकतता एक त्याय

२६७, ९ G उन्तरतम इत्यनेनाप्ये°, B उन्तरतम इत्यत.

२६७, ९ G D आनर्यत

१२ D E g B here & below °सलातुर°.

२० G सर्वतोनुदेश, E g सर्वानुदेशः.

२६८, ४ D g सङ्ख्यासाम्य .°देश twice.

१६ G D °शिलाश्यामणञी.

१९ g आत्मनेपदनिष्ठाविधि°.

२० G g om विधि

२१ G अनुदात्तङितो द्वा°.

२६९, १ B पूर्वरूपत्वे

६ G D आनर्यत

१० G तत्तर्हि गकार°.

१२ G D क्विति गिति

१७ G धातुषु विप्र°.

१८ G D g B om तत्र

१९ B घमादिग्रह°.

२२ G अकर्तरि च कारके twice.

२७०, ४ G °वृत्तौ द्वौ.

८ G D om तत्र.

१३ G °व्याख्यातौ, E °व्याख्यात इति.

१४ B om.

१७ G °शब्दौ

२७१, ४ E om.

९ G अत्र सख्या°

१० E om

१२ G अर्थेन

१४ G D ε स्वरितत्व. [पाठ°.

२२ G प्रतियोग तस्य, in marg योगे योग

२२ G गतमियता

२७२, ८ G नेति, E g B विरुद्धमिवाय गतल इति

८ G गोनि°.

१० G D °र्थे एव, B °र्थे एव.

१९ D in marg लौकिकोति मार इति च-तुर्क पाठः.

२० G D °र्थमेव

२१ G °ज्ञानं नेति.

२४ G तत्र वक्तव्य

२८ B om

२६ G °च न वक्तव्य.

२६ तर्हि, G तर्हि

२७३, ४ 1 K °लगणीति इत्युप°; the other MSS °लगणमित्युचनम् इत्युप°

७ G B विज्ञायते

७,८ G अधिकार कार्यं अधिक कार अधि-कार ; D the same, and अधिकारकार्य E अधिकारगतिरधिक नार अधिकार

पृ० पं०

अधिकं कार्यं, but धिकारगति struck out; g अधिकारगतिः अधिक कार्यं अधिकः कारः, B the same, but अधिका कार्यं twice.

२७३, ९ G स्त्रियामिवं.
१० g B om. प्रत्यया; in E struck out.
११ G स्वरयिष्यते.
२२ G om. ऽर्थ.
२५ G अथान्यो यो.
२५ D पूर्वप्रतिषे°.

२७४, ७ G षष्ठीनिर्दिष्टेन.
९ G D om. च; E in marg.
१० E द्वितीयानिर्दिष्टं प्रथमानिर्दिष्टं च.
१५ G °धानाच्च वि°, in marg. °नाद्विहितं पार्द°.
१६ G °धानाचात्म°, in marg. °द्विधा° पा°.
२६ G om. परस्मैपद.

२७५, २६ G D तद्वत्.
२६ G उच्यते न च.

२७६, ५ G g तव्यदादयस्तु तर्हि; B तव्यदादयस्तु.
९ G न खल्वन्य°.
११ G भवतीति
१९ G D परस्मैपदमिति ना°.
२० g B om; in E struck out.
२३ G g om प्रकृत्यर्थनियमे, B प्रकृत्यर्थनियमपक्षे.

२७७, १ G धान्यच न प्रा°.
२ G यत्तर्हि.
४ G D भवतीति.
५ G कर्तरि कर्मणि.
६ G रजतीति रोग इ°, E originally रजति रोग इति.
८ G भवतीति.
९ G D & originally E कर्मणीत्यपि नि°.
११ G °भागारित°.
१२ G & originally E प्राप्ते. संपादिति गा गो°.
१६ G om one कर्तरि both times
२० G क्रियाव्यतिहारे २ इति.
२१ G & originally E क्रियाया ईप्सि°; B क्रियेप्सा.

२७८, १ गा. E g B न.
४ G निवृत्ति निवृत्तौ.
५ G व्यतीहारे.
११ G D & originally E इतरेषां व्यतिरेक

२७८, १२ G भावकर्मणोरनेना°.
२३ B om.

२७९, १ g & originally E हवद्यो°.
२ g B om. हरि°.. वक्तव्यम्; E originally हव°.
५ g B K om.
७ G °लुनंति.
११ E स्यादिति.
२० G D & originally E °यका अत्रापि.

२८०, ६ G माणवक, E g B माणवक आगमयस्व तावत्.
८ g om. धनुषि शिक्षते.
१० G B वृषो.
११ G भक्ष्यार्थी; D भिक्षार्थी.
१५ G D B °पृच्छ्यो:.
१६ G D E B °पृच्छ्यो°. [1. 15.
१७,१८ B has आशिषि...नाथते before
२४ G om. विचारी...°इते, E in marg.

२८१, ५,६,७ G & originally E °संगति°.
१२ E देवपूजासंगतकरणयोरुदाहृते.
२० K om.

२८२, ४ G D भवंतीति.
८ K om.
११ E गम्यादिषु
११,१२ D g B °पृष्टि°.
२१ E D ज्योतिषामुद्गमन.
२१ B °तलादिति; Nāgojibhatta तलादिस्येव पाठः सांप्रदायिकः.

२८३, १ G एते स्याद्दः, in marg एवं वा पाठः.
९ B om. कुक्कुरा.
१८ G संचरतीम, g B संचरसीमं.
१८ G देवलः.
१९ G B om. हि.
२२ D तृतीयया योः भू°, E g B तृतीया भू°.

२८४, ४ E ब्राह्मण्ये स°.
५ G यद्येवं तर्हि गा°.
१० G स्वदाद°.
१४, १५ G सकर्मक°; सकर्मक°.
२१ G om. कार्य...आरम्भ.

२८५, ५ g B om. दीव्यते; in E struck out.
७ विचार्यते G in marg. विचारयते पाठः°.
११ न एवं; G नेन विषयं; E originally मन एवं; g originally न एवं, altered to मन एवं.
११ G om. इदे.

पृ० पं०

२९८, १० G D एकसञ्ज्ञेति.
१२ G ऊर्यादिरत्व°, in marg ऊर्यादिन्यिव-काश इति पाठः, E g ऊर्यादिच्विरत्व°.
१३ G D B om. इति.
१६ G सिद्धो भवति.
१८ G कर्मसंज्ञा भविष्यति परं°
२० G om. कथम्। अ ; D om. कथम्
२० G क्रियेत.
२० G एकसञ्ज्ञेति.
२७ G °स्यात्कर्तृ°.

२९९, १ G D om. कथम्
१ G क्रियेत.
२ G एकसञ्ज्ञेति.
४ G वाधीयाताम्। अनन्तरार्थे नदीघिसञ्ज्ञे। गार्गी°.
८ G D om. कथम्
९ G क्रियेत.
१२ G °सञ्ज्ञायाभाव.
१७ G D om. कथम्
१८ G क्रियेत.
१९ G g B om. सा.
२३ E g करिष्य.
२४ G कर्तृसंज्ञा
२९ G कर्तृसंज्ञापि

३००, ५ G D B om इति.
१२ g om.
१४ g सन्न च य°.

३०१, १ g om. प्रयोजनम्.
६ G चद्यर्थीहिप्रतिषेध..
९ g शेषग्रहणास्मा°
११ G om. इति.
२२ G °सञ्ज्ञा.

३०२, १ G लिङः सा°, in marg लिङ्सार्वं° पाठः.
३ g अपस्पृ°.
५ D E B पि
११ All MSS except K om धनुषा विध्यति कानपाश्यां भुङ्क्ते गां दोग्धि धनुर्विध्यमीति.
१२ G °सञ्ज्ञा उप°.
१२ G कांस्यपात्र्यां भुंक्त ; E orig कांस्य°.
१० G D B सा पर.
१० G & originally E कांस्यपा°.
२० G D g B om. च

३०३, १ E g B om साध्वसिच्छिनत्ति

३०३, २ K om. धनुर्विध्यति, and has साध्वसिच्छिनत्ति
३ All MSS except K om गेहं प्रविशति.
४ G गृह.
५ All MSS except K om. अधिकरण कर्ता स्थाली पचति.
१० E om.

३०४, ५ G B K om., D एकद्रव्योपनिवेशनी सञ्ज्ञा २ इत्ये°, A एकद्रव्योपनिवेशनी सञ्ज्ञा। इत्ये°.
६ G B °वेशनी.

३०५, १२ G om तु.
१३ G हेतुर्भवता च्य°.
१४ G स तुल्यस्त°.
१५ G om भवता.
२० G om. the first च.
२१ G प्राप्नोति.
२२ G तदेतदुपपन्नं.
२३ G om. विप्रतिषेधे.

३०६, १ E विप्रतिषेधे परमित्युच्यमानेऽङ्गाधिकारे पूर्वं (in marg मिति वक्तव्य) twice
३ G परे वि°.
६ E originally सर्वथा before परत्वात्..
१७ g om. सुदन्नपति.
२२ G वैक्षमाणि.
२३ G om. ज्ञौदनः, D in marg.

३०७, १३ G रामधारण, D & originally E पौर्विर्णं.
१९ G इदमयज, in marg अयजा
१९ D g B अयय.
२० g B om सम इन्द्रम् and त इन्द्रम्
२३ G °इतरेणापि
२५ G om. दृशीन.

३०८, ४ G °धीयते.
८ E सो मानीय
१५ G om स्वर्गीये
१९ G आगंगद्वा
२१-२३ D om.
२३ E वर्त्तिष्यव I अनेकानप्यां शुभयस्य मरगतो सुकृत
२४ स्यिति; G पीयताति, D वियतति, E originally स्यति altered to स्यति; g B स्त्रि ति.

३०९, ७ G °पूर्वतर्य च त°, E °पूर्वपतर्य त°.
९ G सांशामिति.
१५ G D E यथा इताप। यथाविरासीत.

पृ० प०

३०९, २४ G बहिरंगमतरंग इति, in E लक्षण struck out

३१०, २ कर्तव्ये G वक्तव्ये
४ G °च्येत
१४ B om अपरेषु नामग्राम
१८ G क्रियत E °नापक्रियत, g B °नापाक्रियते
२० G परस्य चेति
२२ G °निवृत्तौ न

३११, २ G °निवृत्ता°
३ G om तर्हि
७ D E g B om यत्रमात्रिय.
७ E g om यत्रमत्यते
१० परत्वा° E g B अंतरंगत्वा°

३१२, ३ E बहुलहु
७ G पुनर्दी°, in marg किं पुनरिदं दी° पाणा
११ G om इह
१५ G om किम्
२० G om न
२३, २४ G D ततो नेय° ततो वाभि
२४ G D om न

३१३, ८ G अत एव in marg त एव पाठा°
८ G D कौ च टौ ह्रस्वौ

३१४ २ G °लिंगौ यौ
४ g B om प्रयोजन
११ B om प्रथ्यै in E struck out; g in marg
१४ G om तस्येदं भवत
१६ G ह्रस्वेयुवङ्स्थाने, D E °यड्वङ्स्थान°
१७ G °युवङ्स्था° D E °यड्वङ्स्था°
१७ Kaiyata क्वचित्तु भाष्ये पठ्यते अस्त्री वचन एवं नदीसंज्ञौ भवत इति वक्तव्यम् । शाकन्ध्यै अतिशकट्यै ब्राह्मणाय । क मा भूत । शाकन्ध्य अतिशकट्यै ब्राह्मण्यै इत्यादि । एवं स्वपपाद इत्याह ।
२२ g B अपर आह । ' ह्रस्वेयुवस्थानप्रवृत्तौ स्त्रीवचन । ह्रस्वौ चे°
२२ G °युवङ्स्था°
२२ g B नद्यौ स्त्री°

३१५ २ G & originally E °यड्वङ्स्था°
६ G नखाल
१० B सुभित°
१० G °वीर
१० G शुद्धि° D शुधि°, Nāgojibhatta mentions the reading सुधितमि°

३१५ १२ G om श्व
१३ G भाषा
१५ L om अन्वी° °सुध्यति
१७ G यस्माद्ग्रहण किमर्थम् । यस्मादि°
२१ G K समुदितन किं क्रियते

३१६, ४ G °ख्यान कर्तव्यम्
५ G D om अभिनत् अच्छिनत
६ १० g om किं पुन सचस्करु
७ G पठ्यते । सयो°
८ कुमर्थम, G कर्तव्य
९ G सयागस्येति सि° [एके°.
२२ G ससेति तत एके°, D g B ससाति त
२२ G °यन न भ°
२३ G केचिद्यावङ्गवति
२४ D E g B भवति
२४ G कृष्णमिति; E g B कापिल इति

३१७, ७ क्रियते G किमर्थं
९ D om.
१५ g B & originally E तदादेस्तद°
१७ G g B ९ originally E क्रियते
२४ G B °विधि

३१८, ९ G °स्तस्तस्येति म°, D °स्तस्तस्य त म°
५ ६ G तव एतत्
८ G om
१२ G तव एतत्
१३ G °विधि
१३ Nāgojibhaṭṭa mentions the reading साक्रन्दिम
१४ G °विधः स्वरः
२० G °परमेवा°
२१ G पश्यति
२२ E g B °न्तग्रहणमन्यत्र

३१९ ६ G om वा, D कृत्वादिता
९ g सुच्यति in marg B om सुच्यति E स्वच्यति struck out
१६ G D बाधेत
२० g B नोदयिष्यति, F the same, altered to चोदयिष्यति
२१ G °स्तस्यैव
२५ B धारयदङ्गः पदसंज्ञा । एतया, in E पदसंज्ञा is added, K om एतयोः

३२० ५ g B & originally L स्थानिवद्भावात
१२ B °भयाश्च
१३ L g पूर्वविस्थितस्य
१९ L g B om यदास्यात्

पृ० पं०

३२१, ३ Kaiyata कचित्तु पाठ एव तर्हि वेत्वर्थे विशति । एकवचनमित्यादि तु भाष्य नास्त्येव ।
११ g om & E has in marg तत्र
१३ E g B शुक्ल पट इति
१७ E g तदातरणापि
१८ E g कर्मादीनि वि°
१८ g °त्यादीनि वि°
१९ g B K कस्यैकस्य [बहूनाम्
२० G g K १ by alteration E केषा
२१ G एतज्ज्ञा°
२६ G °कैर्निर्जित°
२७ G D शुम्भ्य ८ शुम्भा
३२२ २ B °श्रवण विधानाद्गुणविप्रयोगाच्च
५ B विप्रयोगाच्च
६ g & originally E सुकुमारतरा.
६ B विप्रयोगाच्च
१४ D om
१४ G °रस्तु नियम
१८ G तथा लिङ्गसंख्या चैवार्थे कर्मादयश्च
२४ G adds after °कस्मिन्निति, अथवानि शपणात्पश्चात उत्पत्तानां च नियम
३२३ ३ G D शब्दास्ते नि°
४ G वेददत्तेति E g B om पशुरपत्य वेदतेति
७ B om ऽपि
८ G निवर्तक
१८ G °प्रधान्य D °प्रधाने
२० G D °प्रधान्य
२३ G ग्रामातीति
२३ G D पततीति
३२४ ३ G g B om one भवति
२० G °त्युत्पत्ति
२१ G g वाधिकर°
३२५, १ D om [एतत्
६ G F g प्रधानस्य क°, D om प्रधान
७ G तृणा प°
११ D I g B °पतनाद्°
१२ G पि लिप्यत
१९ B °चाद्विपातत विशुन्
२२ G ह्यस्तु°
३२६ १ स्यामन्य F g B यर्हेरत
३ G °ने च पारदर्शन क° D om च
I °ने च परिरतना च य°
४ G °या च पारणक्रिया त°
४ I g B om कर्तारं तरस्ता
३२६, २० G कास°
२० G om इति
२५ G g B & originally E अधर्मादि°
२५ G D g B अधर्मात्रि°
३२७ १ इति G इह
२ G D g & originally E इति इह य एव
४ g B अधर्मादि° अधर्मात्रि°
५ D g B १ added in E इह before य
११ D E g B om. सिद्धम
२४ D E B चोरे°
२४ G om & E in marg दस्युभ्यस्त्रायत
३२८, १ B चौरे°
२ E g B चारा
१३ G किं तर्हि
१८ g om कर्तुरी° °नर्थकम
१९ g om कर्तुरी° वचनात
२२ D B & by alteration E ध्रुव
३२९ ७ G ह्युपयोग इत्युच्यते
३३०, १ G तास्ताभ्य
५ G नात्यतात्यताया°
१२ G & originally D अथामिम°
१३ G D om स
१९ g & originally E सनह्यति
२५ G om प्रार्थना
३३१ १३ G D तमप्रग्रहणे
१५ G °सज्ञा पुन साध°, & om पुन in I 16
२२ B अपायमानार्थः
२३ G I g ग्रामादागच्छतीति D L g B om नगरादागच्छतीति
३३२, १ G कुरुसमाधा°
३ G om त
७ G कस्य पुरस्तादि
१२ G भवनीति
२४ G °विदार्द°
३३३ ३ G om ब्रात्य रे
१४ G D om च
२० G D धामातर ग°
३३४ ४ G D om °त्सर्दति
७ G पृच्छतीति
११ G D °मपभिरीति
१३ G कून पुर्व
१७ g यधित । यधित त्वय ।; B om त्वय
२१ G अप्रत्यमन° B °यधिनाम्
२५ G °या या म°

पृ० पं०

३३५, २ G °शिथिरत
५ B लाङ्या भ°, G सहचरेण
१३ G नयति नीयता ग्राममिति
१५ g & originally E पय । कुम्भा गो पय इति
१७ D E g B om वक्तव्यम
२० B om द्रष्टव्यमिति निश्चय
२३ G सिद्ध चाप्य°, D सिद्धत्वाप्य°

३३६, १ Kaiyata केचिदश्वगरयन्ता इति प ठन्ति
४ G देशाश्चाकर्मणा २ कर्म° D देशाश्चा कर्मणा । कर्म°, E g B देशाश्चाकर्मकाणा कर्म°
७ G कल्मेति
७ E g न वै तस्मि° [रिति
१० Kaiyata कश्चित् पाठो धातोर्निवृत्ति-
११ B om सर्वा
१४ G यस्मात्तस्य
१५ G both times सन्न°
२३ g & originally E क्रयति
२४ g & originally E शब्दाययते

३३७ १ B °दीनामुप°
१४ १५ D B आदि°
१५ D B आदयति
२२ E g B वाहयति
२४ B om , E in marg
२६ E g B भक्षयति च°

३३८, १ G D B अकर्मम°, B कालकर्मणाम्
२ G अकर्मम°
४ E g by alteration °कर्मकाणाम°
६ E g कांचिदपि क्रो° D B केचित्का°
८ G सकर्मका अक°
९ g यत्कर्म क्वचि भवति
९ E g कानिद्भवनि क्वचित्र भवति
१२ G °दृष्टोऽस्पृष्टे°
१८ D om, प्रीतं सन्नम
१९ E g B वितानमिति D वितानं इति
२० G om वर्तते

३३९ ३ G om तस्य
५ E & originally F °इति न°
८ G g दृष्टा व्यवस्थति
९ E g प्रतिनापि न.
९ E g भवति
११ G D om भवतन्नराज B °तबन्ता मिज्जमतत्.

३४०, ३ g & originally F भुङ्क्ते इति.
९ G D B कृन्तेजतश्चास्ति
११ D समासेऽत्र्यर्थो°
१२ E समास एत°, g समासश्वेत्त°
१४ Nāgojibhatta प्रिय प्रोथमिति क्वचि त्पाठ, Haradatta & Hemachandra read प्रोथम
१५ G °श्व ततो न व्रजति, E °व्रजति, g °श्व ततोनुव्रजति, B °श्व तावदनुव्रजति.
१६ G याति°
१७ D E g B °व्रजति
२२ G ता ना बाधिष्यतेति, g K ता मा
२४ G °सद्भायामेत अत°

३४१, ४ D E g B एव च कृत्वा
६ G & originally E °वचन नेति, G in marg न नेति वा पाठ, D °नो नति
११ D g & originally E °विभागो निपात-सज्ञार्थ
२० E g उपसर्गात्त इति
२२ D om , E in marg , g °ब्दस्य चोप°.

३४२ २ D E g K °ब्दस्योपसख्या
५ E has पुनश्चनसौ in marg , g instead of it २ , K om
६ G °निष्क्रासो, in marg स्कु पाठ°, E °निकृता
७ G D °सज्ञा
१० D g om प्रयोजन B K om पश्च E has it originally, g & originally E °णत्वानि. [nally
११ B K om पश्च भूत , F has it origi
१३ G नायका तस्मा°
१८ G has २ after शर्या
१८ G D E च उद्धता
१९ G in marg यासि वा पाठ
२१ E सूर्य for आचार्य G D & originally E om प्र णो before इन्द्र

३४३ ८ g & originally E दुर्नय , D only दुर्नयमिति
१३ G उता
१० G °न्तादितिपर
१६ G °दि दृश्य D g & originally F श्रावस्तिप्यश्चापि
१८ १९ G °न न मानानि g & originally E चापि ग्रामा
२२ , B & by alteration E वृति इतिनि .

पृ० पं०

३४४, १ g B °व्यते प्रा°.
५ G सतीस्येव.
९ G अविद्यमान आदरे.
१३ G अङ्गि.
१८ G °क्षादेव हि किं° ; B °क्षादेव सर्किं° ; E originally = B, but देव स struck out.
२१ B & added in E तत्र च चिर°, g च्छ्यंतस्य प्र°.
३४५, ३ B & by alteration E नित्या.
४ G D तच च्व्य°.
९ G धातो वक्तव्या.
१२ B °स्येतिपरप्राप्तिं°.
१६ g om. च, in E struck out.
१७ G D om. ऽपि.
२२ G यत्राहे.
३४६, २ G D °स्यार्थे वचनमेतद्°.
२ g पृथम.
३ G तत्र गतेः.
४ g adds कुत्कटकराणि बीरणानि ; in E this is struck out.
४ G om गते
११ G om one स्यात्
२१ B शाकल्यसहि°
२३ D प्रादेशेषु प्रादेशं, E B om one प्रादेशं, in g one प्रादेश struck out
३४७, १ G °युक्यमान विमान E °युक्यमान प्रति, but प्रति struck out
१ प्रादेश प्रादेश G प्रादेश २, g B om one प्रादेश in E one struck out.
३ G °युक्यमान निशाममिति, g निशामि प्रति.
१० D om. तु.
११ G कि च वक्त
१४ G वृत्तां.
२३ E आत्मर्यादाभिविध्यो आत्मर्यादाभिविध्योरिति, but आ°..°ध्यो struck out.
२४ D E g आत्मर्या°. G °वचनमित्येव.
३४८, ६ E g विप्रतिने विपुत्र पुत्र पति प्रत्यते मेविपुत्र पुत्रमत्र विप्रतिने विपुत्र.
११ विप्राय ; G D B विप्र तु.
१३ D g B & added in E तथापि च पु°.
२२ D om मातृपरस्यापि स्यात ; G in marg मातृपरस्य स्यात वा पाट.
३४९, ५ G om विपुत्र

३४९, ८ D B °चनात्तु सि°.
११ g om परस्मै, E originally °परवचन.
१७ G D om. तु ; g & originally E °परवचनं ज्ञापक पुरुषसंज्ञाया°.
१८ G D om परस्मैपदेष्विति.
३५०, २ G D om समसख्यार्थम्, in E struck out.
६ G om. वैषम्यात्.
२० G D K °किटिकम्, °किटिकानि.
२१ G °माणे आत्म°, g °माणेपि चात्म°.
२३ G ह्राभ्यामुभ्यामुभिरुप° D ह्राभ्यामुभ्याममिरुप°.
३५१, २३ G D om. ऽपि
३५२, २ G भवति.
३ B om. here & below प्रथम
१६ g om.
२२ E g पचसि च प°.
२४ G has २ after °भारस्य.
२५ E g पचसि च प°.
३५३, १ G °त्यापि.
२ G D यत्तदुक्तं.
२ G om. तत्र.
२ G B तत्राप्येवं.
३ E पचसि च प°.
३ G B पचति चेति.
३ G D g पचामि च प°.
९ G पृथक्त्वेऽप्यपि.
९ E g om. भवतीति.
१० G & originally E संप्रत्ययो°.
१३ G D गृह्यत, g गृह्येते
१३-१५ B om भवेद् - गृह्यते.
१५ G D अन्यथा.
१९ २२ G D & added in E °त्यमार्थ तु न.
२४ G °नियमेनमध.
२८ G एवोच्यते, in marg. इत्येषो पाठ ; E इत्येतावुच्येते ; g इत्येमावेवोच्येते ; B इत्येवोच्येते.
३५४, १ E g भविष्यत.
१ G B om. च.
४ G D B मद्रूपः पचामि.
७ G D om. तत् ; in E struck out.
१२ D B °पुरुषो.
१३ g B ऽपुरुषो.
२० D om.
२१ G दृष्टविलक्षितस्य सत्याद g दृष्टवलपि.

पृ पं०

३५४,२१ Kaiyata mentions the reading वृत्ति विशेष E has this originally
३५५, २ G om the first ये
६ K विशेष्य°
१३ G om यो.
१५ G करिष्यति
१६ G °सयोगाऽस° D A °सयोगास°
१७ A D E g B °घोषाणा च सयोगे
१८ g पिप्पली B पिप्पक, G चित्तभिति
१९ G पूर्वापर°
२३ E B here & below °व्यवत
३५६ १ D पूर्वपरा°.
४ B एकवर्ण°, in E कै struck out, E g °प्रध्वसितस्या°
९ G तन्त्रश्रीति Kaiyata mentions this reading
१५ D g B & added in E ऽभावो वाक्सा°
१६ D om
२२ G D B °भावस्तस्याप्य°
२३ G °लोपोऽवसा° in marg लापस्तता वा पा°
३५७ १ G om विरामग्रहण
३ G om इति विसर्जनीय.
१६ E g °पूर्वैर्ण विराम इति
१७ g & originally E °तानि ह्यस्मिन्ना ह्मणकुले Kaiyata mentions the reading धनानि for व्रतानि
१९ B & originally E om न
२१ g & originally E °रामेण भविष्य शी लमस्यति भा°
२० E तत्त्वग्रा वा वर्णावसान
२६ G विरामे परा, om वक्तव्यम्
३५८, १ B om वा,
४ G g °विहित°.
६ D परसनि°, E g पर सनि°
६ G अपरश्चाह
३५९, ६ G om प्रतीपदत, in E added
१२ G समासश्चासगृ°
१२ G om खल्वपि च, भवन्ति
१४ G om च्
१४ G यावद्वाक्यं ...
१५ G समास एकत्वस°
१९ B & Nagojibhatta उत्पन्ने हि म°
२२ B नगरभि°
२२ G अथ समर्थ°

पृ० पं०

३६०, १ B उपादानविकल before शष्कुला°, Nagojibhatta has the same
१ B om त्रिदिकाण, E गिरि°
२ g instead of तिष्ठ मुसलेन किं क रिष्यसि शष्कुलया खड्गो धावति उपले न D the same, but विष्णुमित्र for धावति
३ g गोहित वृषभहित D the same, and गोहित अश्वहित
४ D B om दस्युभयम D E चौर°
५ G देवदत्त यत्त°, D E g °दत्तायज्ञदत्तस्य
१५ G सत्यमेतत
२१ G om नैष दोषः
२१ G भवति वै प्र°
२२ E om त, D तत्र तेन वृ°
२७ G गम्यते
२७ G गुरु स तस्य, D g om य
३६१ ४ G om वक्तु
७ D g अगुरुपुत्रा°, in E B कुल added
९ D g B ऽगुरुपुत्रा° in E कुल added
१४ G om देवदत्तस्य गुरुकुलम्
१८ g B अयमरत्यस° in E श्म added
२० G °नञ्समासस्य चासम° °स्व च वक्त°
२१ D g om अलवणभोजी in E added, B अश्राद्धभोजी ब्राह्मण अलवण भोजी ब्राह्मण
२७ G समर्थत्युच्यत
३६२ १ G om राजपुरुष आनीयते
४ g स्वर इत्येकार्थीभावकृता विशेषा
१० G भवान्
१४ G इति एकार्थीभावकृता विशेषा अ र्थाऽनादेशात् the same in E but struck out D इति एकार्थीभावकृता विशेषा
२१ D तर्पाद्युत्तर
२२ G E B °मित्रहति
२६ G °दत्तश्रेति
३६३ ८ E g B अर्थानादेशनात्
१० G निवत्त
१६ E g B °ऽकृत्स्नार्थनिर्देश
१७ G केनचित्कृतस्य कार्यस्य ... B ... स्कृत तस्य कर्तानिस्कृत
१७ D E °यथा स्यात B °यथा च स्यात्
२१ E विशेषण
२२ G विशेषयति°
२० G महयापि श°, E B महयापि वि श°
२० G गर्भरी सुपर्क° g गर्भरीतु

पृ० पं०

३६३, २८ D E g B °स्तं गच्छति.

३६४, १ D om. च.

२ G वावचनमनर्थकं स्वभावसिद्धत्वात् । वावचनम° , D om. वावचन° . °सिद्धत्वात् , E g °चनं चानर्थ°.

६ G D E g °श्वस्येति.

९ G °स्वार्थयोर्द्विर्वचनमिति द्विर्वच°.

११ G वर्तमान .

१६ D E g B न तु द्वि°.

१७ g °तश्वसितकण्डू° , D E °तश्वासितहासितकण्डू°.

१७ G D °विरोध

१७ G तस्मान्न द्वा°, B तस्माच्चन द्वा°.

१८ G om. तद्यथा.

२१ G प्रक्षालयितुं संस्यन्ते ; g न in marg.

२४ D g om. the first वा , in B added

२५ D E g B राजपुरुषमानयेत्युक्ते.

२७ G in marg. व्यवच्छिन्नं पाठ°.

२७ D g B यदि स्वार्थं जहाति

३६५, २ G °मानयो स्वा°.

५ G सार्थो

९;१० G °व्यपेक्षायां.

१४ G भविष्यति

१५ G गतमियता.

१८ G चेह शब्द क्रियायान्वी प्र°

२२ G संगतार्थं समर्थं संसृष्टार्थं समर्थं . समर्थ इति , in marg. सार्थ एव पुल्लिंगा

२४ D K संगत घृत तैलमित्युच्यते , G in marg. संगतसंघृत तैलमिति पाठांतर

२५ G °भूतमिति in marg. इति पाठ

२९ D कालेन E originally कालि न added , g कालेन वा B यथा कालेयकान.

३६६, १ G भवानाह यपि

२ G om. तद्यथा

३ G °आर्तायेषु

४ E g B om. संसोम इत्यर्थ

६ B तव च भाता°.

८ G om. भेदां

८ G इत्यर्थं°.

९ B पचौदनं मम भविष्यति मम भविष्यति

११ G सम्पन्ने.

१८ B K added in E शब्दे च म°.

२८ G आतुरस्य च , g आतुर सं .

२९ G द्विमुत्त ष .

३६७, १ D E g B कथं नर्हि

३६७, ७ G om. सह.

८ G किं कारणं before प्रधान°, om. तदा.

१० G साव्ययसकारकं°.

११ G om सकारकं.

१३ B सक्रियाविशेषण च । सक्रियाविशेषणं चेति.

१७ D E g ब्रूहि ब्रूहि देवदत्त.

२० G D भूयजिति निघातादयः.

२१ G om. ओदनं पच , B पचौदनं तव भविष्यति पचौदनं मम भविष्यति.

२२ D योगेन प्रति°.

२४ D E g B यथान्यासं एव , K यथान्यास एव.

३६८, ४ G °ख्यानसमथ°, B °ख्यानसमर्थ°, g म in marg.

६ G E g समानाधिकरण II.

७ D g B शाखायां.

८ D E g om. शालीनां.. ददाति.

११ G E यदा सुप्सुपेति वर्तते तदा द्विसमा°, g the same, but adds न before तदा; D यावता सुप्सुपेति वर्तते तदा . . , and न added before तदा, B या यदावता सुप्सुपेति वर्तते तदा...., K यावता सुप्सुपे वर्तते द्विस°.

१३ B तर्हि । द्वयोः समासयोः प्रसंगो द्विसमासप्रसंग इति । द्विप्रकारस्य.

१४ G नैवं भविष्यति ।

१५ G D राज्ञो गौः क्षीरं.

१६ G तदा च समा°.

१६ G D after भवति. असामर्थ्यात् प्रथमसामर्थ्यम् सापेक्षमसमर्थं भवतीति

२० G राजन्यपि प्र य°.

२१ G D om. किं कारं° भवतीति

३६९, १ G °वचन ..°नर्थं वि°.

६ G °कारणः क्रियते ।.

१० G समानार्था°.

१६ G सर्वमपि दिव°.

२४ G समर्थपद°.

३७०, ३ G असामर्थ्यान

५ D g न भवति तदा सामर्थ्यं नवाभान.

६ G om. तदा.

६ G °सर्वांयता.

९ G B उन्मत्त गु°

१० G om. नहि

११ G भविष्यति

१२ G मद्दुतं.

पृ० पं०

३७०, ११ G कुशूल कोठ इति.
१८ G °त्वा प्रयुज्यते.
२१ G भर्तुं शक्यौ.
२१ G om. भृत्यौ भरणीयौ, g om. भृत्यौ .. °भरणीय, D om. भृत्यौ ... इति.
२३ G °मातीति दर्श°.
३७१, ६ G कर्तव्यं भवति समाना°.
८ G °क्रियते अन.
८ G B एवं च कृत्वा समानाधिकरणेषूपसंख्यानमसमर्थत्वात् समानाधिकरणेषु°, D एवमसमर्थत्वात् समानाधिकरणेषूपसंख्यानं । एवं च कृत्वा समा°.
१४ D om.
१८ g originally वृत्तिः सूत्र°; Nāgojibhatta mentions this reading.
१८ G वार्तिककारवचन°.
३७२, १ D g B समासो द्वयोर्थे°.
२ D g समासो द्वयोर्थे°.
७ G D & originally E किंच before नारद्यं.
११ G न चेद भवि°; D E g B न चैतदेव भवि°.
११ G करिष्यते.
१३ G B °ज्ञातारस्तर्हि न सि°.
१४ D समासांतस्य प्र°.
१५ G °त्पूरद ।.
१६ D & E in marg परेण परेण; G g B om. one परेण.
१८ E तत्र तर्हि.
१९ G तुल्यानि° in marg तुल्यता पाठः
२२ D om. अविशेषेण
२८ E om.
३७३, १ B पञ्चपर्यायं पंचपर्यायं
२ E g om. संवैतरस्माच्च in B struck out.
७ G अन्तोदात्तत्वं ..°त्वा इति twice
१० G निमित्तस्य°.
१४ G om. तु, B ज्ञानाको निमित्तत्वर्थात निमि
१७ G नाम नंद°; g नाम सब्द°
१९ G B वाक्ये स्वेति°.
२० G om. उप
२१ G तुनिनाति°, in marg तुल्यमानेभ पाठः°.
२४ G वाल्य वाक्य वद, g वाक्य वद°.

पृ० पं०

३७३, २४ G B °पदस्य लक्षण°.
३७४, १ G B भवति.
११ D यदा तर्हि . तदा; Nāgojibhatta mentions this reading.
१३ G °द्वयेयानि°, D °द्वयेयवार्थानि°, but यवा altered to या; E originally °द्वयेयवानि°, and र्था added, g °द्वयेयार्थानि°; B °द्वयेयवार्थानि°, and र्थ struck out.
१३ G संख्या.
१४ Nāgojibhatta वयमधिकपदस्य°; G °पदिर्व°, D E g B K °पदिव°.
१६ G यस्तु°.
३७५, ८ E om मद्राणां राजन्.
१२ G B om. वक्तव्यम्, g adds मद्राणां राजन्.
१७ D E g om. अश्वेषु स्वामिन्, added in G.
३७६, १ E om.
३ E om.
५ B om. प्रति स्वा सुहितार्थैः.
८ K om.
९ E g अव्ययीभावस्य नेति; D अनव्ययीभावस्य नेति.
१० G सुवंतैकांतस्यात्तस्मा°, in marg. तना स्यात् पाठः°, D B °कांत. स्यात्
२० २१ G चर्मतम°.
३७७, ३ g प्राग्वचन समाससंज्ञा°.
४ G B स्यादिति.
६ G तां मा
७ G क्रियमाणेऽपि मा°.
१० g adds च्यन्तं पदं. च्यन्तपदं..
११ G नैव समुदाय. कार्यं भवति; D °कार्यं भवतीति; E भवतीति, g भवती
१२ G D g B एतदपि नाभिमद्योगमन after °नामीयम्, in E struck out.
१९ G B करोति नातिम
२० G adds अनुवृत्ति. क्रियेत, D अनुवृत्ति क्रियेत. after पाद्य .
३७८, ३ G om. महाया.
३ G न्यायप्राप्ति
४ G °गमानि ।.
४ G दृष्टांतं ।.
८ G प्रयोजन योगविभागार्थं च धातोर्म यथा न स्यात् E has योगविभागार्थं च originally.

पृ० पं०

३७८, ९ G °विभागो भविष्यति।.
१० G सह समस्यते.
१४ G °त्वं कर्तव्यम्, D g °त्वं वक्तव्यम्.
३७९, १ G कश्चित्परपदार्थ°.
८ G D यथेऽव्ययं.
१० g B वीप्सावाचि.
११ G वीप्सावाची.
११ G तस्येदं ग्रहणं क°.
१७ E g B अक्षादयस्तृतीयांताः परिणा पूर्वोक्तस्य यथा न तत् अयथाद्योतने; D the same, but अतथार्थो°.
२१ D E g B अक्षशलाकयोश्चैकवचनांतयो-
३८०, १ E om.
२ E अक्षेणेदं वृत्तं शकटेन (originally शकटेन न) यथा; B अक्षेणेदं तथा.
४,५ G added in marg.; D E B om., g अक्षादयस्तृतीयांता परिणा पूर्वोक्तस्य यथा न तत् कितवव्यवहारे वाक्षशलाकयोश्चैकवचनांतयो॰.
७ D E g पञ्चम्येति। अपपरिबहिरंचवः पञ्चम्या। पंचमी°.
१४ G पंचम्यंतेति; D g B पंचम्येति.
१८ E अनुगङ्गं वाराणसी struck out.
१९ D वाणस्यप्यायता हास्तिनपुरमप्यायतम्; in E वारणस्यप्यायता altered to हास्तिनपुरमप्यायत.
२० G भविष्यति तद्धास्तिनपुरेणेति न पुनर्वा°, D न हास्तिनपुरेणेति पुनर्वा°, E न हास्तिनपुरेणेति न वाराणस्येति, but न वाराणस्येति struck out. Below E has वाराणसी, altered to हास्तिनपुर
२२ G यस्य चाया°.
३८१, २ G एवकारार्थश्चकार.
२ G D परमतिष्ठद्गु; in g the Anusvâra over म struck out.
३ G om.; D °विशेषेति
४ G °विशेषेष्विति.
४ G B यस्मिन्; g B काले स ति°.
५ D E B om.; g प्रथमांतान्यदार्थे
६ G g om. °ति प्रथमान्ता°; B प्रथमांतान्यपदार्थे; D E om. समस्यन्ते; D E g add इति वक्तव्यम्
७ g om. सूयमानयवम्; it is added in E; g पूयवं.
११ G भविष्यति.

३८२, १ D om.
११ G om. च.
१२ D E g °पदार्थप्रधानता न क°; B °पदार्थो न प्रक°.
१४ G °मेतदर्थम्°.
१६ G g om. तु.
२० G संख्यासमा°, D संख्या in marg; E om. संख्यायाः.
२१ D °नदीतीरे.
२३ D E g add after प्रयोजनम्, द्विगोस्तत्पुरुषत्वे समासांता प्रयोजयंति; K adds द्विगोस्तत्पुरुषो सत्तां समासान्ता प्रयोजयन्ति.
२४ D B om. दशराजम्
३८३, २ D om.
५ G °हीनाद्धि°.
६ G °नर्थक्यं.
१३ G ग्राम गतो ग्रामगत इति, without अरण्यगत.
१५ g °सु वाचना°.
१६ G वक्ष्यामीति
१८ G °स्वरत्वेनापि भवितव्यम्
१९ G om. हि.
१९ G बहुव्रीहिर्भवति.
२१ D E g समानार्थे.
३८४, ३ G तत्पुरुषत्वे.
५ G व्यपदृक्तेः.
६ G D E g B अन्यथाजातीय
१० D E g om. जाल्म.
११ G D इदानीमन्यथा G in marg. इदानीमतोन्यथा पाठो वा
१२ D E g नातिव्रतयाम्।.
१७ g om. क्रान्तेन चा, G क्रांतेनाक्तां°.
१९ D E g B om. तदुच्यते and इति.
३८५, १ B शंकुलया खं, G D किरिणा का°.
५ D om. धान्येन धनवान्.
७ G om. इह
११ G नार्थसद्भूरणेन.
१२ G असामर्थ्यात्तव.
१३ G तत्कृतमहणेन.
१४ G कर्तव्यर्थ°.
१८ D तृतीयार्थस्तत्कृता°; G तृतीया तदर्थकृतार्थेन गुणवचनेनेति। एवं मार्हि.
१९ G °निर्देश विज्ञायते।
२१ G अर्थेन.

पृ० पं०

३८५, २२ D E om यसमार्थः, D E g have हिरण्यार्थ .

३८६, ५ g om.
६ B om. अहिहतः नखनिर्भिन्नः.
११ G इति च यत्त°.
१८ g om.
२१ E g क्रियासमर्थत्वात्; D क्रियया सामर्थत्वात्.

३८७, ७ G °पूर्वपद.
८ G °पसिक्तः ओदनः यथ्युप°.
१८ B °संप्रत्ययात्‌ साम°.

३८८, १ G सद्वाचनानां.
२ G °विरमित्युक्तं ग°.
३ D E कटुकशब्दस्य.
४ G °रिहारः तद्वा°.
७ G °मार्नेणेति चे°.
८ G °मात्रेण समासासमसगो भवति समासः प्राप्नोति . D E g B °मात्रेण सह मसंगो भवति समास प्राप्नोति.
११ G तादर्थ्येन. above it तदर्थेन.
१३ G योपि म°.
१५ G क्रियते.
१७ G स्वसृ°
२१ G उर्धशब्देन.
२३ B om.
२४ E B om. उच्यत ; G in marg
२५ G B सर्वलिंगता च व°

३८९, १ G सर्वलिंगता च व°
२ G कारणम सावता अर्थशब्दो
४ G B om. कर्तव्यम
११ G °समानमिति कर्तव्यमन क° B यथा नमिति । न कर्तव्यम
१२ G D सर्वादि स° B सर्वादिस
१३ D E सर्वं नेति
१८ G °समासो भवति भन्ता°
२० G D नैव हि ; B न चैव
२० E g भवति नैव क° . B भवति न क°

३९०, १ G न चैव वधित्वा° . B न हि वधित्वा°
३ G चतुर्थी ग्रहणेन twice ; D E g om. चतुर्थी ।
३ G °र्थार्थ .
३ G दशसहस्रार्थे°.
७ G °स्यन इति न भवु°.
८ G °कार्तां स्वस्ताय.
९ G om. उक्त

पृ० पं०

३९०, ९ D E g om. रथदारु, B रथाय दारु रथदारु.
९ D E g B K वावचनं वा च वि°.
१३ g विवधः; D वीधः.
१३ G om. न चैवेदम्.
१४ G इह सावदयं.
२१ G °च्यते पंचमी भयेनेति
२३ G °ग्प्सुभीतभीतिभीभिरिति.

३९१, ५ g om स्या°...°मरणं.
७ G °कुलं गत्वा.
१० g B & by alteration D °योगे य-
स्वस्त्ययेनेति व°.
१२ D E g om. च.
१७ G तत्र एतदिति.
१९ g शेषे उक्तम्.

३९२, २ G परमपा°, g परमपा°: Kaiyaṭa prefers the reading परमः पा°.
९ G तत्पुरुषो वा इति.
११ G °कार्यतरे तु म.
१३ G वक्तव्यं.

३९३, ३ Nāgojibhaṭṭa says that some read पञ्चकुमारिः (दशकुमारिः).
५ G om. भविष्यति.
७ G मूलेषु , in marg. निशिमेषु मूलेषु इति पाठ° , D om मूलेषु
९ D E g om त्रिपुरी , G has त्रिपुरी.
१० G °प्रापणे वर्तते ।.
१२ Nāgojibhaṭṭa mentions the reading नैवयमि°
१४ G °नीयतामित्युक्तो भावा°.
१५ E गौरत्व°.
२२ D om द्विगु° - कि°.
२३ G om. च
२३ G महदमित°

३९४, २ B om. धैमातुर .
७ g om इत्यादि. : E in marg.
९ G om. प्रत्यर्थो° .. पचनात्.
१० G प्रत्ययोत्तरपदयोर्हि गुणता नो°.
११ G B om. निर्दिष्ट.
११ G °तदर्थम्.
१८ G °नोमत्यर्थेन पं°.
२० G सार्थं पशुभेद सार्थं निकामं प्र-
मा° : D सार्थं सार्थं निकामं प्रमा°.
२१ G °मेवमानुपपत्र नहि , g B °मेवमानि नहि°.

पृ० पं०

३९५ २ g om समाहार कृतत्वात्
५ E दशमूली
६ G प्रतिषेध माप्नुवति
९ G नान्यत्र ।
१२ D om
१७ G सर्वाणि पुन परि°
१९ g om पञ्चगवप्रिय
१९ G समुदायवृत्तायययाना
२४ g वक्तव्य । द्वौ मासौ जातस्य यस्य स द्विमा°
३९६ ३ G D B नैव भवि°.
६ G °सज्ञक
८ G मत्वर्थम्°
९ G मत्वर्थे द्विगुसज्ञाया
१३ G द्विमातरयोगे
१४ G B °नतरयोग
१८ G इह सम° D L g इह तर्हि सम°
२० B om दशशतार
३९७, १ G कुत्सितानि कुत्सनै । पापाणके कुत्सितै ।
३ G om वैयाकरण
६ G इहापामानार्थो D इहापनार्थो
७ G अथान्यद्यापमय अन्यदुपमान य इहापमानार्थ B अथान्यदुपमा अन्यद्यापमे°
८ G यथिद्वि°
११ G तर्हीतनैव
१६ G °लाशिति
२२ G B सत्यनि गु°
२१ G om हि
३९८ ७ G °वचनस्य म°
७ I om स्यात्
८ G B °शब्दस्य सर्व°
११ G D I °वचनरतन° g °वचनारयस्य म°
१७ g °वचनार्थ म°
१७ G वचन सि g °वचनारस्य म°
१९ D I g B नादस्य
३९९ ४ g °कुनयविशप्य
७ G om पूर्वनिपा दा
११ D B द्वयान्यारम्° G °चाहित्वचस्या°
१७ D g विशदस्वरा
१८ D [illegible] इति
२१ G अवर्णाभयर्थ
४०० ४ D °ममवृत्त्यारा G वृत्त्याना°
६ D om [illegible] G [illegible]

पृ० पं०

४००, ७ G किं तर्हि°
९ D L g खरञ्चयरमा°
१० G om हीव
११ G शक्यो ऽस्त्यातुम् B शक्यत आ°
२० D L g B °प्रकृतिग्रहणम्
४०१, १ G om
२ G om च
३ G जीवतीति
३ E g °क्लिशितेनति । D B °क्लिशिता ।
५ D असमानप्रकृतिवृत्तोऽपि G gives this reading in marg
१९ g om , G °र्दीनागुप°
२६ D E g om गत° वर्तव्यम
२७ D क्रियाक्रियका
४०२ ११ g B after वक्तव्यम् ॥ इह मा भूत् हेम नैतो हिमेत I the same i marg but struck out
१२ G एत शब्दा
१४ G अथ कर्तरि
१९ Before अन्यारन्त D अवर्णस्य या वर्णे I अवर्णस्य या वर्णे वर्णस्यावर्णं g अवर्णस्य वर्णे यस्य चावर्णे B marg अवर्णस्य वर्णे वर्णस्यावर्णे वा
४०३ २ G शुक्रपथु; I originally शुक्र° g शुक्रपथुरिति
४ G om सामान्यन
४ G यादि सिद्ध
४ G om प्रथम
७ B om one पर्
११ g इभगुयति आप्ये° i marg रथोगुयति B इभ्यगुयति अश्वगुयति [illegible] who [illegible] the reading in the text says that some read इभगुयति अश्वगुयति I e reads इभयगुयति भय[आय गुयात I आय इयात
१८ B [illegible] पुत्रपुत्र G पुत्रप्रमान I पुत्रमत्र D पुत्र पुत्र g om
१८ G इत्यर्थं भवति
२२ G सवकारी
२२ I g om गौरगुणदत्तवत्
४०४ ७ G नामविशा स्यात् ।
८ G °र्थवति ॥
११ D I B [illegible] g [illegible]

पृ० पं०

४०४, १४ D कुद्दालकेन ; E कुद्दालपदेन ; g कुलकेन, in marg. कुद्दालपदेन, B कुद्दालपदेन.
१६ G सर्वक्रोशी नद.
१९ G D & originally E यथा तद्धितेण
२० D E g B इत्येव तदा भवति.
२३ g om. पटुतरः. [gतम.
२४ D adds सूक्ष्मतरमुत्तम and तीक्ष्णशृ-
२५ G परमुच्यते.
२६ G परश्चातिशा°.
४०५, २ G अन्यपदार्थो.
५ G भवति ।.
१० G D °संबंधः क्रियत इति.
१६ B तद्धनाभिस°.
२२ G तु वृत्ती शेष.
२३ G भवति हि बद्द°.
२४ D E g B om. ऋत्विज..
२५ G प्रचरंतीति.
४०६, १ G D °तराद्यर्थम्.
१३ E परम.
४०७, १० G °तुरीयाग्य°.
१६ B विभाषाप्रकरणे.
१९ G ऽव्ययनविधाने.
४०८, ५ G उत्सर्गोऽपि न.
७ g om. माङ्गुला.
८ G E °धानेऽन्यत्रापि.
१० D g पूरणगुणेति.
११ G पूरण भवति ॥.
२५ G om. ऽपि.
४०९, ७ G अन्येषु वै चो°.
१० G °स्तत्रापि प्रा°.
१२ D E g B °र्थमनिसमीक्ष्य षष्ठी
१६ G देवदत्तस्येति ब्रो°
१८ G काल. परि°; added in g; D om. स
१९ G काल· परि°.
२२ G मुर्त्ताना°
४१०, १ B एकवचन हि°
२ E B एकवचनान्तमिति.
३ G इहापि च यथा.
१० G तत्समासस्य प्रा°.
११ G अव्ययत्वस्य पूर्व°.
१३ G D पाठेनाव्यय°..
१६ G om. तद्यथा.
१६ G °मानानामधी°.
१८ G कर्तुम नप्र°.

पृ० पं०

४११, २ G भविष्यति.
५ G स्वाभाविकी निवृत्तिः किं.
६ G om. एव तर्हि
७ G g करोति.
७ G निवर्तयतीति.
७ G कीलकप्रतिकीलकवद यथा कीलक... प्रतिकीलक.
८ G B निहंति.
८ G यथैव नभो
११ G मेषु तेषां
१२ G D g निवर्त°.
१३ D E g B ब्राह्मणशब्द· विमर्थे.
१४ G D, g B एवं चेतत् ; E K एवं चेतत्.
१५ G °समुदाये च°.
१८ Nāgojībhaṭṭa mentions the reading पिङ्गलकपिल°.
१८ G D इत्येतानभ्यंत°.
१९ G om. च.
२० g om. उत्तरे पञ्चाला·.
२१ G समुदायेत्र प्रयुक्तो ब्राह्मणशब्दोऽवय°.
२२ G यण्ठाग भक्ष°, E g B यस्तिष्ठन्भक्ष°.
२८ G D E g after ऽयमिति, निवृत्तं तस्य भवति, Nāgojībhaṭṭa rejects this reading.
२९ G अतश्च.
४१२, ४ G °निवृत्ति.
४ G E आश्रय.
५ G °गुणो वा म°
९ G °मित्येष स्वर·
१५ G अकृतेतीत्युच्य°; D अकृते ह्युच्य°.
१७ G om. च.
१८,१९ G कृद्योगे.
१९ G दध्नप्रश्नन:.
२१ G °कर्म. क्रियते ।.
४१३, २ D E g B om. षष्ठीगुणे..
५ G E g तीव्रो गन्ध. ।.
७ E g B गुणेन नेति.
८ E g B नेत्युच्येत ।.
९ D E g B om. कण्टकस्य तैक्ष्ण्यम्.
११ G भवति.
१२ G °पेक्षते, g °पेक्षते.
१५ G °धानाच
१६ G om. च.
२१ G पेक्षते
४१४, २ G पेक्षते ; g °पेक्षते.
७ G °पेक्षते

पृ० पं०

४१४, ७ D E g B चोरस्य.
८ G °विध्यते षष्ठी ।.
१४ D om. पुरा च° ...°र्ती..
१५ B om. अव्ययमिति कृत्वा ; G in marg. अन्यये नेति पाठां°.
१७ G मारांविद्रकस्य ; D मारीविदस्य , E माराविक्रस्य ; g B माराविकस्य ; K & Hemachandra; माराविदस्य ; Haradatta knows both readings माराविकस्य & माराविदस्य.
४१५, १ D कर्मणि ष° ; g कर्मणि षष्ठीति निर्दे°.
२ g कर्मणि षष्ठीति निर्दे°.
४ G has तृज°...°वेध only once ; D has it once & after it भवति ; E has it once & २ added after it ; g B तृज°...°वेधः । तृजकाभ्यां चानर्थकः कर्तरि प्रतिषेधो भवति
५ D g B add पुरां भेत्ता यवानां लावकः.
६ B भुक्तः ; E by alteration भुक्तः .. पीतः.
७ D E g om.
१२ दृश्यते , g B मन्यते.
१३ D E ज्ञात , g ज्ञान.
१४ g °षेधोनर्थकः.
१५ G ऽनर्थको वक्तव्यः ।.
१५ g B add सत्तामर्थित इति.
१७ G om. इत्येव या , B om इत्येवं
१८ G om कर्मणि च.
४१६, २ E originally om., in 1. 3 प्रयच्छनीयानां is altered to प्रयच्छनीय, and २ added after वक्तव्य .
५ D स्यन°.
६ D स्पोमानां.
६ E g B om. मयूरोमभिः.
७८ g om. शाद्र [illegible] कथम
१० D om अभिहृदयः.
१० E adds दुर्दृश.
११ D E g प्रीयक D adds निवेशक प्रवेशया.. g भेदक.. G उरोकृत्य G D B उरीकृतं, g उरीकृत्य उररीकृत्य उररीकृत्य.
१२ D [illegible]
१३ G om च
१४ G [illegible]
१६ G B om. पुनिराप्रतिनि [illegible]
१७ G पुरस्कृत पुरस्य

४१६, १७ D g om. आडीषदर्थे ; G om. आडीषदर्थ इति वक्तव्यम्.
१८ G om. कुः पापार्थ इति वक्तव्यम्.
१९ g om. प्रादृ°.. प्रथमया.
२२ g om. अवा°.. तृतीयया.
२३ g om. वसन्तः ; D E B have it after कोकिलया.
२४ g om. पर्या°.. चतुर्थ्या.
२५ g om निरा°. पञ्चम्या.
४१७, २ E g om निर्वाराणसिः.
३ g om. अव्यय प्रवृद्धादिभिः ; K only once अव्यय प्रवृद्धा.. सम°.
४ G om बहिर्भवति.
४ G A D E g पुनर्गवं , K om.
४ G पुनःस्वरं ; K om.
५ G च २ वक्तव्यम् , D च २.
५ After कान्ये इव, D g अव्ययमव्ययेन समस्यत इति वक्तव्यम् । प्रप्र यज्ञपतिम ; B & E in marg अव्ययमव्ययेनेति अव्ययमव्ययेन समस्यत इति वक्तव्यम् । प्रप्र यज्ञपतिमिति , G K om.
५ B °मता च तिङाव्ययं ; K °भता च समासो वक्तव्य ।.
६ G अनुप्राविशत् ; D E व्याकरोति ; g अनुव्याकरोति, B अनुव्याकरोत्.
८ D E B om. शरदो व्रजति.
९ D E B om. दर°. तीति.
१० D E g B om. वक्तव्या.
१६ G शरदो गत , D E B शारदो गतः ; g om.
१७ G मनद्रव्य°
२० G समासवचन प्राकृगुरुपचोदितेयमा, B समासो भवति प्राकृगुरुपचोदितेयमा ; E has प्राकृगुरुपचो. in marg.
४१८, ५ D I B समासाभावा° ; g om. न वा .. विप्रतिषेधेन.
७ D E g B om. कथम .
८ D E g B इति समासवचनात्.
९ D om. यथा.
९ G भुन .
११ G °पांत्यंतरे°.
१४ G °नीय नहि स°.
२० G g °नान्नेन स°.
२१ G द्वार्मनिषेध समास°.
२४ G °पन्ने से°.
४१९, ५ g om.

पृ॰ पं॰

४१९, ७ G om. स होप.
४२०, ३ G विनिनि ह°.
८ G यथैव न.
१० D om. विमुक्तम.
१० G D °ग्रहिः प्र°.
११ G भिक्षार्थि क°.
१३ G याचति.
१५ D E B om. मधुनो ऽपि स्यात, g om मधुनो... °स्यापि स्यात.
१६ G adds समस्तविधिविप्रेण ह्यांश्नो न सिध्यति.
१८ G उत्तरार्थे च। उत्तरार्थं चा°.
१९ G D °न्यमेधमपदादि°.
२० D E g B om. अनेकस्य सुप.
४२१, २ G वैकल्पते°.
२ G om. गृहाविनिक्षिप्तत्.
४ G पदयति
७ D E g B om यत्र.
७ D E g B °कारिणनियोगः.
८ D E g B om भवति
१५ G om. the last च.
१६ G इत्येव.
२२ K यात्रेतरानी°, G यदि इतरानी°, other MSS. यदिदानी°.
२७ G विशेषवचित्त्वतस्तु न.
४२२, २ G यावयं तदा न ग°.
६ D om. स्यादसर्व up to p 423, l 8 सावर्ण्ये°.
६ G संदेहानिवृत्त्यर्थं, E g B K om.
९ G g सर्वे प°.
९ ऽर्थेति, G in marg यस्येति विभक्त्यर्थेति वा पाठ, K om
११ G °सद्याभ्या विभक्त्यर्थस्यार्थे उ°.
१३ G अपरस्थाह.
१५ G प्रथमऽन्वस्य
१८ G °पृक्तम् किमुक्तम् गुणवचनानाहि रा°.
२२ G भवति.
२५ g स्यात पर नाम शब्द शब्दो ह्येष शब्दे ह्यसम°.
२६ G यथाभिधीयते.
४२३, २ G प्रातिपदिकस्यवि°
३ E g B °व्युक्तम् किमुक्तम् कर्मा°.
४ G भविष्यतीति.
१२ G पष्ठ्यर्थे
१२ G सपन्न इति तथापि प्रा°.
४२३, २१ B K °पूर्वस्योचार°.
२२ G °पश्य हांयो
२३ G ऽर्थेति; D E K कण्ठेश्याः काला अस्य.
२४ G °विकारस्य च°; D g om. the line.
४२४, १ G अर्थेति व°.
४ G E लोपो वा.
६ g °धानो च.
७ G om. वा.
११ G °भिकरणेषु.
१२ G °श्रवणीयम्.
१५ G B °गुणिपरिगणनमपि.
१६ G om. कर्तव्यम्.
१७ D G om.
२३ G वह्वातिक्रतुष इति.
२४ G कर्मवचन°.
२५ G °हितिति स°.
४२५, १ G कर्मप्रवच°.
३ K k om
४ G हितं |.
९ G om अथ.
८ D E g B ऽभिनिर्वीरिद्युत°.
११ नैवास्ते° all MSS except K.
१२ D E g B निपाता भव°.
१९ G °चारी तरंतत्त°.
१९ G स्वरे च हो°.
२३ G after करणानीति, स प्रत्याह g स आह
२४ D g B & by alteration E कारिष्य इति.
२६ G इत्युक्तेऽपि स°.. तें कथ.
४२६ ३ g om. स.
१३ D E g °त्वरस्परमभिस°, B °स्परस्परस°.
२१ G गुण इति
२४ G प्रचरतीति.
२५ G प्राप्नोति.
४२७ १ D B om उत्तरे पञ्चाला..
१ D E g B नील कपिल इति
२ G प्रवृत्तो द्रोणशब्दो.
८ G B om. तु.
९ G तत्रापि सिध्यति.
१० G om. तद्यथा
१७ G दशतातिति द्वि°.
२३ D g om. तत्रापि.
४२८, २ G सुजर्थे उच्यते
५ D g om., but g has the following अभिप्राय . °धायित्वात् twice.

पृ० पं०

४२८, ६ g °वार्यानिधायित्वात्.
९ G om. एव.
१० D has not been collated regularly after this line.
११ G समीपे दृशा
१२ E g B तत्र च प्र°.
१२ G कर्तुमशक्यम्.
१४ E ऽमस्त्वर्थार्थो.
२९, २ G om. गो.
४ G व्यवस्थाशब्दः ।.
५ G A K त्रिगुण°, other MSS. द्विगुण°.
७ G °शब्द इति द्विर्.
११ G om. लक्षण.
१४ G E °ऽमस्त्वर्थार्थो.
१५ G E g B करणभावार्थो ; K °वार्थ
१९ G om. क्रियानिधानात्.
२४ G पूर्व वा°.
२४ G om. केशाकेशि.
४३०, १ G दीर्घः स्यात्.
४ G पूर्वता°.
९ G D K पाठेनाप्ययसंज्ञायां.
१२ G °नानां अपी°.
१६ g B यथा गुणवचनेषु before गुणवचनानां.
१७ G केवल इति सूत्रे.
१८ G om. च.
१८ G भवतीति
१९ G स्त्रियो गमा°.
२१ G प्रकृत्यर्थेति for मीमांसकार्थेति.
२१ G उपचारो.
२४ G गतां
४३१, ४ g & by alteration B सुरया
६ G g & originally E °करणे इ°.
७ g °करणे इ°.
११ G °[illegible]°.
११ G [illegible].
२०-२१ G om.
४३२, १ G [illegible], in marg. [illegible] पाठः
१ E B °[illegible]°.
३ G om. च.
४ G in marg. [illegible] पाठान्तरं
५ G g B [illegible].
६ G [illegible]°; g B [illegible]
११ G [illegible]

४३२, ११ G E °मेत्रोर्थः.
१७ G बहुवचनमस्ति
१७ E यदिदा°; other MSS. यदा इदा°.
१९ G after नोपपद्यते, प्रक्षेण न्यग्रोधार्थे.
२० G °धेन शब्देनान्यस्य ; E B °धस्य च प्रक्ष°.
२२ G °केन शब्देनान्यस्य.
२२ G चेदेतदुच्यते.
४३३, १ G °त्यस्तिरतीति ; g °तीति व्युत्पत्त्या प्रक्षः.
१ G °धोऽप्येत°.
२ G प्रक्षोऽप्येत°.
१० G & originally E पुनर्निय°.
१३ G °हित इति आश्व:.
१६ G om. न्यग्रोधप्रयोगः ; in E struck out.
२२ G °भूमावयोन्यो°.
२२ G °भूमावेयन्यो°.
४३४, १ G °त्रिरामतां.
१ g शास्त्रावेव अश्वोरिवन्यग्रोधावेव अहोस्वि°.
१ G °मोधावेव ।
३ E g B सोयं सु°.
४ G in marg. [illegible] पाठान्तरं.
४ G एतदपि ; om. तत्र.
५ G om. ऽपि.
७ G शब्दे न्यार्थस्यास°; E शब्दे न्यार्थास°
१० g B [illegible] ।.
१० E g B अन्यार्थे ।.
११ g B इति [illegible] ।.
११ G [illegible].
१२ g B इति । [illegible]
१३ G [illegible].
१४ G °[illegible].
१४ g B om. [illegible].
२४ G °[illegible]°.
२० G [illegible]; in marg. [illegible] पाठः.
४३५, १ E g B [illegible]°.
७ G °[illegible].
११ E g B °[illegible].
१८ G [illegible]°.
१९ G °[illegible]°.
२० [illegible], G [illegible]
४३६, १ [illegible]°, G [illegible]°.
१ G °[illegible]°

पृ० पं०

४३६ ६ G सत्यामि° °ज्ञा सह सा°
१२ I g B आरस्य मा°; L by alteration दाप
१८ g B L originally I om
२१ g o n मत्व° I 22 वनाव्यम्
२१ G I & a MS of Deccan College वार्तिर्य B वास्पाल; D कुत्सीर्य (?) K वृत्तीर्यम Hemachandra वार्ती र्यम् see page 170 l 1
४३७ २ g B om मातुश्च पताम्यम
३ G & originally I अल्पीयस्या; Haradatta knows both readings
४ G om सत्याया अल्पीयसा
६ B om
१० G विपर्यया
१३ g B o n
२१ G °भगिनी; I °भिगिनी Haradatta वाङ्र्ज्जम्या
२१ g B o n सवस्तारजाता g om सत्य जाता
४३८ ३ G पराया
६ G om तु
७ g B न मा वर्त° I originally न च वर्त° altered to न वा वर्त°
१० G असिपाणि मुनलाद्यत
१२ G ६ originally L °हन्तं उभाभ्याम °पाचतर वि°; g B om विप्रतिपधन
१३ १८ G उदृस्तर
४३९ ८ g B अन्यपद इति
१४ I g B अन्यपद इति
१६ g B पत्न्यस्य
१८ G भवतीति
२० G भविष्यतीति
४४० ४ E g B om अनभिहितस्तु विभक्त्यर्थ
८ E adds हि after अभिहित
९ G g B तेष्वनभिहितेषु °पत्तिर्भविष्य° L originally तथ्वनभिहितेषु त्पत्ति भविष्य° K तेष्वभिह पु °त्पत्तिन भविष्य° Nagoji bhatta reads तष्व भिहितेषु
१० G मामलाति
१५ G g त्व च करोति
२० G इयनीय नाभनमिति
२१ हि मता° G in marg स ममेति पाठ
४४१,२ ३ G om च
४ E g B om हि

पृ० पं०

४४१, ९ G om तु
१५ G सामायजी विभक्ति न नि°
२५ G इशीय दाभेनामिति
४४२ ३ G एवमनि°
१० B om G & originally I न वान्यतर णाभिधानात्
११ G °धाऽअनभिहिताश्रया, in marg ऽनभिधाना पाठ°, g om चानभिधान
२४ G वसितइति
४४३ १० G on हि
२० K A o n
२३ G द्वितीयाभिधाने
४४४ १ G B द्वितीयाभिधान
७ I g B उभयय
१० K इह इदमुत्तम for म विचित्र
१३ G कर्मणीत्यत्र
१५ G भवतीत्यत्र वसी°
१५ I g यथावाग्वा°
२० G अमान् म्री°
२१ G प्रक्षेपणे वर्तते।
२१ तद्यथा I यथा G om
२१ G °शालकायनाम°
४४५ २ G °शब्दो न दृष्टा°
२ G L तस्य का
३ E g B सहायो द्वितीया
७ g B त्वा मा च
१४ g B स्यादिति। लान्नैरभिहिते द्वितीया मा भूत। आस्यते
१६ E g B इह हि साप स्यात्
२० G om करोति शाकट
२४ G शकमका अक°
४४६ २ G भवतीति
४ G °स्तन्थे वनमम।
३ G क्रियापवर्गे २ इति
६ K क्रियामध्य इति च क्रियामध्य इति च वक्तव्यम
११ E g B विध्यति तयास्तन्न°
१७ E g B वृक्ष परि वि om विद्युत्। वृक्षं परि। वृक्षमनु।
१८ g B om प्रति मातर
२१ G तत्रायमर्थो
४४७ १९ E g B °त्स्वात्तस्यार्थस्य हि°
२० E g B om स
२२ E g B स्ववचनात्तु सि°
४४८ ७ G E g B om स K has it

पृ० पं०

४४८, ८ E g B स्ववचनात्तु सिद्धमिति.
१३ G om.
१४ E g B om. वीवधं गच्छतीति.
१७ G om. तत्र.
२२ E °नध्वनीति स्त्रियं.
४४९, १ g B अध्वनश्चायमनपवादः.
६ G E g चतुर्थ्या वि°.
१६ G °यते सोपि ह्युपाध्यायार्थो भवति.
१८ G भवति हि तद°.
१९ G तदर्थेन शब्देन सह.
२१ g B om. the second कल्पते.
२६ E g & originally B om.
४५०, २ E om.
११ B om.
१२ G om. अलमिति...कर्तव्यम्.
१४ E om. मल्लाय प्रभवति मल्लो.
१९ शुनं, E शृगालं.
१९ G °लिम्पिति तद°; इमेऽनावा°.
२० E K °र्त्तार्ण नाच्यम्.
२० G स्या अत्र.
२१ E K °त्तृर्ण आ°, E g B आद्धामिति.
२१ G ये प्राणिषु नेष्यते ते ऽना°
४५१, १ Kaiyata mentions the reading प्रति-कृष्य ; G °ग्रहण कर्तव्यम्.
२ G न स्या त्ह°, E तृण स्या म°.
४५२, २ g B om.
४ G g B याज्ञिक, वैयाकरणः.
५ g B om विग्रे°...°णाति.
७ G इह तर्हि प्रकृ°.
८ B याज्ञिकः.
८ g B वैयाकरण.
९ G तेनाह ज्ञात्वे.
१० G °व्य स्यान्न प्रयु°.
११ E g B समेन पयेति ॥.
११ G क्रीणातीति.
१२ E g B om. वि°...°णातीति.
१३ G क्रीणाति.
१४ G om. सा°...°णातीति.
२० G प्रधानं कर्ता.
२१ G इदं तर्हि प्रयोजनम्.
४५३, १ G °वापजात उपस्थिते तद°.
२ g B om. भविष्यति.
३ G °विभक्तिर्बली°, g °भक्तेर्बली°; B °क्तेः उपपदविभक्तेः बलीयस्त्वात् भवति.

४५३, ६ G °विभक्तिर्बली°; K अन्यत्राप्युपपदविभक्तेः कारकविभक्तिर्बलीयसी भवति । क्वान्यत्र ।, E originally कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति । अन्यत्राप्युपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भवति । क्व°, altered thus: कारकविभक्तिर्बलीयस्त्वादन्यत्राप्युपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भवति । अत्राप्युपपद°..... भविष्यति । क्व°, g कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति । अन्यत्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भवति । एवमत्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति । क्व°, B कारकविभक्तिर्बलीयस्त्वात् । अन्यत्रापि.. like g, but एवम° .. भविष्यति struck out.
६ भविष्यति, G भवति, in marg. भविष्यतीति इति पाठः.
१० g & originally B अंगादिकारतश्चे°.
१६ G om.
१९ E g °भूतलक्ष°.
२१ G °भ्भूतलक्षणं तत्र.
२१ G °भूतस्य लक्षणं पृथग्भूतं ल°.
२३ G °भूतस्य लक्षण इति.
४५४, २ G षष्ठी भवति विप्रति°.
७ g B °विभक्तेरुपपद°.
१९ E g B om विभक्तयः.
४५५, ५ G प्रासादात्प्रेक्षत प्रासादमारुह्य प्रेक्षत इत्यर्थः.
७ B & originally E om.
१२ सत्र, E g B ततः.
१३ G मासे इति.
१७ G om. the first च.
२० G om. कि.
२१ B after °भाषान्, अन्या चान्या प्रादुर्भवति.
२४ g B निहृत्य.
२४ g B om. कांचित्कया...प्रयुज्यते.
४५६, ४ g B निहृत्य.
५ g B °षेषु सतः सां°, E °षेषु सत्सु सत सां°.
८ G °स्तात्प्रसादः.
११ G मासस्य ।.

पृ० पं०

४५६, १२ G °येन सिद्धं.
१४ G °योक्तानम सद्या°.
१७ किमर्थम्; G in marg. किमिर्दं न प्रकृतमिति पाठः.
१९ g B अनधिकाराय.
४५७, ० G om. पञ्चमी.
० G g B अन्यादि°.
१० E g B °वद्कृतमयो.
११ g & originally B om. यथासंभेण ... नविष्यति.
१२ G °न्यविन°.
१३ G प्रवृत्तस्यापवादो.
१८ G °सांधर्मीप्र°.
२० g B K दर्शनादनर्थकः प्रासि°.
२१ K om. न वा.
४५८, ३ g B असावधीती.
४ G परिगृणीता वार्तिके.
५ G च सप्तमी.
६ G om. च.
६ असाधु. पितरि; g असाधुर्मातुले कृष्ण.
० A B om.
८ हरिद्रा; K A & originally E मूर्वा.
११ G °संनिद्ध दृष्टा दृष्टा, E originally °संनिद्ध दृष्टा, G in marg. हरिद्रेवासंनिद्ध मत्ता भवति पाठ.
१३ A E om.
१४ मूर्वा; G in marg. हरिद्रा पाठांतर.
१६ g B om.
१९ E पुष्पवन्तौ, g B युफलको
४५९, १ प्रस्थितो, g B गत both times
५ G वक्यति वक्तव्यम्, in marg. तत्र सप्तमी वक्तव्या
७ G सत्वप्यपदस्य
१८ G मातर परीति; g B मातर प्रति
४६०, २ g B om. the first इति
४६१, २ Kaiyata प्रातिपदिकार्थग्रहण किमर्थमिति क्वचित्पाठ..
२ G भीचैरत्रापि
४ G प्रथमा वि°
१० g B यद्येतानि सर्वाणि सम°.
१४ G E एवमात, G in marg. एतस्मात एवेति पाठः.
१५ G °विशिष्टेषु
२० G & originally E संबोधनमामन्त्रि°
२६ g B वीर पुरुष इति, E वीर पुरुष वीरपुरुष इति.

४६२, १० G & originally E °स्तीति गम्यते ।.
१२ E °हित हि प्र°.
१३ G E °हित हि प्र°.
१९ G om. किमुक्तम्.
२३ g B नावत.
२३ G g न यात°.
४६३, २ G g B प्रकल्प्य न्याय°.
४ G om. वा, वा
० E g B °नियमस्तदा यदि°.
१२ E g B °प्राद्ध्यया.
१४ G नाम वि°.
१५ E g B तद्यथा, before समुद्र..
४६४, १ G भविष्यतीति.
११ G om. इति.
१२,१३,१७ E g B °शब्दस्य प्र°.
१८ Kaiyata तदर्थेति । प्रातिपदिकार्थानामित्यर्थ । क्वचित्तु प्रातिपदिकार्थानामित्येव पाठ ॥, G & originally E प्रातिपदिकानां.
२१ G ता कदा; B om. च.
२१ g B निमित्तत्वेन गोपा°.
२४ E g B षष्ठी भवति एव.
२६ G om. तु.
२७ G वाह्यार्थ°, K वाह्यमर्थमपेक्ष्येति.
४६५, १२ G मातृशब्दात्पितृशब्दात्
१४ E g B भवतीति.
१६ E g B यदा च कर्म
१९ L g B चात.
४६६, २ B वा तिष्ठति, g तिष्ठति (without वा).
२ G प्रतिदीव्यति
३ G K & Haradatta मासस्य.
९ A E g B K om.
१० E रात्रीरिति, g तस्यै खर्वो जायते यां मलवद्वाससंभव तिस्रो रात्रीरिति, B तस्यै खर्वो जायते मलवद्वास संभवति तिस्रो रात्रीरिति
११ G या अरण्ये अनक्ति तस्यै.
११ G या पराची तस्यै सुरत्यऽगल्भो. & हीन written over the line, g B °प्रगल्भो
१२ G या व्यभ्यक्ते
१२ G E g प्रम्लिखति.
१३ G °पस्मारी
१३ G E धावति.
१४ G निकृन्तति.

पृ० प०

४६६, १४ G कृतति
१५ G B उन्मादकौ
१५ G मनार्थ.
४६७, २ किं कारणम्, G कुत
५ G धातोर्हि ये प्र°
९ G भूत
१० g & originally B तत्कृतकर्म°
१४ G अथाक्रिय°
१६ G किं तर्हि
१९ G g om न in B it is added
२४ g B निर्वर्तते
२६ G °ज्ञतीति
४६८, १ G कटमिति।
८ E देवदत्तस्य यज्ञदत्तस्य का°
९ g B om. प्रयोगे
१७ B om ईप्र.
१९ G किं पुन, in marg कथ पुन वा पाठ
२१ G तद्यथा before समुद्र
२२,२३ G सुप्रम सुप्र,, in marg सुप्रनिति स्यात्चतुष्टये पाठांतर
४६९, २ E किंकिनो प्रतिषेधार्थम् struck out
४ G परि सोम
१२ g B °शिति ज्ञास्यते
१९ G न ल ऊक न लोक इति in marg ल ऊक लोक
२३ g B & originally E नम्मा°
४७०, ३ E g B चोरस्य
३ g B & originally E om वृषलस्य द्विषन्
५ प्रत्ययग्रहणे, G प्रत्याहारग°, but प्रत्यय written over it
६ प्रत्याहारग्रहणे, G प्रत्ययग्रहणे; g B प्रत्याहारे
१० g B om
१२ G om तत, in marg तत इन इति पाठांतरं
१३ G after गमी किं प्रयोजनम् संख्याता-नुदेशो मा भूदिति
४७१, १ G भवतीत वक्तव्यम्।
२ G यामा इति
२ g B सर्हि निषेध प्र°.
३ G यामा।
३ g B १ by alteration E °ग्रामिरेवैषा
५ G यथासंयोगुणपत्प्रयोगो

पृ० प०

४७१, ६ G कर्मणीति भवति, E कर्मणीति भवतीति
४७२ ५ G °भविष्यति
५ G प्रत्ययधिकरणम्।.
६ G बहुथयास्य
१३ G चानुप्रयोगो
१५ G तत्तर्हीति व°.
१९ g B एकशेषे च
२२ G वक्तव्यम्
४७३ १ G तद्धितप्रति°.
६,७ g B om समाहारैकत्वात न वैतत्
१० E g B om एको तस्यैकत्वात्
१० G भविष्यतीति
१७ E g B om. द्वन्द्वश्च
४७४, ५३ g B om
३ A E g B K om
५ g उदगारग्रामोद°, B उदगारकौमोद°.
७ K om, G उनगर°.
८ मथुरा°: G in marg मथुरा° पा°
९ g B K om in E struck out
१० G कैतवता च शौर्यकैतवत्
११ B शालुकिनी °शालुकिन्यौ
१६ E g B पतति ते शु°.
४७५ ३ G °कालवना°, A प्रागादर्शनात्प्रत्यककालवचना°, K प्रागदर्शात्प्रत्यककालवचना°
४ G किष्किधिगदिक above the line ध पा° E g B °गधिक, A किष्किधगन्दिक K किष्किन्दगन्दिकम
४ G °क्रौध्यमिति, A °क्रौध्यमिति; K °क्रौ-न्यामिति
९ G वैर्मुक्ते पा°
१३ G & originally E गवेलकम
१७ g B °शाकुनिक्षुद्र°
१९ B om बदरामलकानि; Kaiyata gives both readings
२१ g B शकुनि.
४७६ १ G in marg दारशीर्षे दारशीर्षा पाठ°.
१ G यत्तथ
४ G अथवाविशे°
६ G & originally E पूजनिमितिपथ
७ E g B °हृद्रे विराधिना यथा
१५ G & originally E भवति विप्रतिषेधेन
१६ G E g °लिंगस्याय°
१८ G & originally E पद्मुद्दे नपुंसक°.
१८ G after अभ्युदयम, पद्मवद्य

पृ० पं०

४७६, १९ G पशुवद् नपुंसक
२१ G twice
२३ G एकवद्वचन°
२९ g B तथ विज्ञास्यामि इह

४७७ २ G om स
३ G °लिंगस्येति
८ G °प्रयोगे स्यात्
९ G तद्व्ययाना स°.

४७८ २ G अनर्थीति
२ G कर्मधारय
६ G परस्य लिंग
७ g om यथा B °स्समासस्यापि स्या°
१० ११ B om
१३ G om अलपूर्व
१४ G °समासपु
१६ MSS °दिश्यते
२० G om
२३ G °पसर्जनह्रस्वत्व

४७९ १ G om
२ G °दिश्यते
४ G प्यादौ च द्वौ
६ G °जैरे शक्य
८ G परस्यत्र परवदिति । कथ तर्हि । पर स्यैव
१३ E g B °स्यते
१३ E g B समानाधिकरणो भ°
१९ A om K om the rest the following अनु
२० E g B om सूक्तवार
२३ G नपुसकत्व २ व° A °मह । नपु

४८० १ A g B K om (पथ स°
४ A om
६ G स्त्रिया २ भा° A स्त्रिया ॥ भा
७ G E K om A वावत । स्त्रिया
१० G नलापश्च २ वा A स्त्रोपश्च । वा न
१० B om दशतक्षम् दशतक्षी
१२ G न पात्रादिभ्य पात्रादिभ्यश्च प्रतिषेधो २ व° A न पात्रादिभ्य । पात्रा° E न पात्रादिभ्य पात्रादिभ्य प्रतिषेधो व° K om पात्रा° वक्तव्य
१४ G अधचारय २ इति
१४ g & in marg E कपाय कपाय
१५ g B & by alteration E सारक सारक

पृ० पं०

४८०, १९ G तत्तर्हि तथा निर्देश कर्तव्य । न क र्तव्य । बहुवचन°

४८१ १ g B here & below °नुकथितमात्रम
३ G °मेव यदनु° g B °मैवानु°
६ G °वेद्रूपस्य लोप
७ G °शास्तमेव व°, B °शास्तत्व व°
८ g B & by alteration E here & below अधादेश°
१३ G om दिस्करण क्रियते सवादेशार्थम्
१६ B न वात्यवि°
२० G अर्थवत् अकार°
२२ G °वचनप्रयोजन

४८२ ३ g B om कृते in E struck out
३ g B & by alteration E एतदनुदात्त°
६ G पूर्व उदात्त°
७ G कृत प्रत्यय पूर्व उदात्त°
१६ G अधिकारा भवति ।
२० E g B om
२१ कर्तव्यम् E वक्तव्य g B वक्तव्य

४८३ ९ G °दिषु आदेशेषु कृतपु
१९ B om धिस्स्यम
२२ G वक्ष्यामाति

४८४ ६ E g B आर्धधातुक रि° G °विषय एव । तत्रा°
१३ G यदय ल्य°
१९ C तत्र कर्तव्य भवति
२४ G प्रघस इति

४८५ ४ G यथादशे
७ g B K om
१७ G °नुबंध क्रियत
१७ G क विशषणायम B विशषणार्थ

४८६ १ E g B गाकुन्यादिभ्य इति लुच्य
६ G om प्रयोजन स्याञ्जि
७ G भवतीति
८ G E g B om but A has a stop before the word प्रयोजनम of the ?
११ G om
१२ G & originally E कारकेति
१६ G मिरितीति
१७ G समा शापा
२० B °पदाना स्त्रैत्व

पृ० प०

४८६ २३ G क्त्वादि आहोस्वित्ख्यादि

४८७ १ G ख्याञ्क्शाञौ g काशाञ्ख्याञौ

२ G ख्याञिति क्शाञिश्च ख्याञिश्च

४ G क्शादिर्भ° ख्यादि

७ G यत्र भविष्यति ।

८ G om प्रयोजन E g B & Kaiyata ऽनुब्विधि

९ G सौप्रख्येय इति सौप्रख्येय

१० E g om च्छो भवति G वृद्धाच्छो भव तीति

१३ G A E पुत्त्यान

१५ G A E पर्यात्त्यान

२० g B om परित चक्ष्या

४८८ १ E om

८ G om प्रतिपधे

१० G ऽनपीस्येय

१३ G नाप्यपभ्रपो F g नाप्यपभ्रंशो

१५ G भवति

१६ B om उरंजनम

४८९ ७ B om

५ G om अपर आह । अतिमा

९ G in marg सर्वाणि पा°

५ यानता MSS यदा

६ G जनव्य तेनेऽत्युक्तमिति

७ I g B om यत्तव्य

८ I g B om च

१० G °त्र एव च B om च

१२ F g B om भविष्यति

१७ G गर्गीनय

२० G आग्य वाग्य क्षिय

४९० २ B om गगवत्स्ययामा इति

१० G भवति

१५ G भवतीति

१७ G भवतीति

४९१ ३ F सदस्मादि

४ I g B स्थयमणिगा र°

५ I g B अभाणि मा°

७ G °गादयस्त्रिा

९ A I g B K गर्गभागाविरामहणं वा ति यमापन । गगभागविरामहण वा भियन मार्थ°

पृ० प०

४९२ १४ G om नैष दोष

१८ ऽन्वय G in marg ऽन्वय पा°.

२१ G भाव्य लुका

२२ G भाव्य प्रति°

२२ G in marg अर्थतत्त्वम , g B °त्रार्थ स्य त°

४९३, ५ G यत्रा हीनामिति क्रिम ।

६ G om आङ्गयो कुलमाङ्गकुलम्

६ G एकद्व्यावेति

१० G समुदाय

११ G om य

१४ G ज्ञापनाथम in marg त्रा

१५ G प्राग्ग्रहण

१५ G इम् मा°

१९ F g B गोपवनादिमिति°

४९४, ३ E g B om एव G in marg वृद्ध च्चाद्वे नाति पाठान्तर

३ g B भन्क°, भाद्रकि°

८ G om , E g B om the following आगस्त्य° कर्तव्यम् K has both

२० G प्रत्ययान्तयोरपि मा°

२१ L g B om हि

४९५ ६ g B निराकृय

६ g B ऌ by alteration E °मूकारग्रहणम

१३ I g B निर्देशादेव व्यक्त

१४ K वक्तव्यमवतत् other MSS उक्त मतत

१८ G °पदस्य वचन त्र°

१८ G ऌ by alteration I आरम्भवचन यो

२० G गकारवचनं य तथात्वो इति वा वक्तव्य तत्रापदस्य°

४९६ ४ I g B °मय तु सतु

११ I g B अन्य भवता

१३ G om इति

२० g B om

२२ g ( ) ना

२४ C भवति इति

४९७ ७ g om

४ G पदस्य

५ g B शुपगच्छतीत°

१४ g B om रस

१० पं०

४९७ १६ g नियातसिद्धि B निघातासिद्धि
१७ g B नियातसिद्धि°
२४ L g B लिडसेन
२४ G न जहार हार° B न जाहार हा°; g न चकारथा न च —हारयामति

४९८ १७ G L g B °देधर्त्य K धधर्त्यम्
१९ g B om

४९९ १ G अपाशने पं°
५ कर्मप्रवचनीययुक्त G ९ originally E इह
९ G ९ originally E तत्र पंचमीप्रतिषेध
१३ G नन्दिसभास
१६ G पूर्वनिमितिपेधेन
२२ G om च

५०० १ B om
९ G °कृतत्तु प्राप्नोति शब्दा°
१० G प्राप्नुवविधिरानिस्या भवति
१२ G समसख्यार्थेना पि
१४ E g B om पञ्चदापनिर्देशात्
१९ E g B °स्मिन्न सप्त सति

१४ पं०

५०० २१ E g B om उभयामि याह
२२ E g B °क्रिङ्क्रम त्रिङ्कानि
२३ G after °विग्राणि ॥ अथवातर्यता स्य यस्या भविष्याति । आतर्यान्तरायस्यै कार्यो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थ इति ॥
२५ G ऽन्तरा
२६ E g B भवति

५०१ २ G किंप्रयोजनं शिल्करणम् ।
१३ G र्लोपाल्लापो
१३ G & originally E अनगत्वान्न
२१ G डा.आ.डा.टी. in marg डा.आ. आरी पान्तरं
२३ G भविष्याति

५०२ ६ G om भवति
७ G & originally E om च
१६ G उत्सर्गो ह्यभि°
१८ G न तात्र° g तेन न तात्र°
२१ G °पवाश ल°
२४ G लोप्स्यत तत्तश न

BOMBAY SANSKRIT SERIES.

Edited under the Superintendence of Dr P Peterson and Dr R. G Bhândârkar.

	Rs.	a	p.
No. I —Pañchatantra, Books IV. and V Edited, with Notes, by Dr. Bühler ...	0	4	0
No. II —Nâgojibhatta's Paribhâshendusekhara Edited and explained by Dr. Kielhorn The Sanskrit Text and various Readings, Part I,	0	8	0
No. III —Pañchatantra, Books II. and III. Edited, with Notes, by Dr. Bühler ...	0	4	0
No IV.—Pañchatantra, Book I. Edited, with Notes, by Dr F. Kielhorn.	0	7	0
No. V —The Raghuvamśa of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S P. Pandit, M.A Part I, Cantos I —VI.	1	0	0
No VI.—Mâlavikâgnimitra a Sanskrit Play by Kâlidâsa Edited, with Notes, by Shankar P. Pandit, M A.	2	2	0
No. VII —Nâgojibhatta's Paribhâshendusekhara Edited and explained by Dr. Kielhorn Part II (Translation and Notes), Paribhâshâs I —XXXVII.	0	8	0
No. VIII —The Raghuvamśa of Kalidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M A Part II, Cantos VII —XIII.	0	12	0
No. IX —Nâgojibhatta's Paribhâshendusekhara Edited and explained by Dr. Kielhorn Part II. (Translation and Notes), Paribhâshâs XXXVIII.—LXIX	0	8	0
No. X.—The Dasakumâracharita of Dandin Part I Edited, with Critical and Explanatory Notes, by Dr Buhler	0	8	0
No. XI —The Nîtiśataka and Vairâgyaśataka of Bhartrihari, with extracts from two Sanskrit Commentaries Edited, with Notes, by Kâshinâth Trimbak Telang, M A.	0	12	0
No XII. Nâgojibhatta's Paribhâshendusekhara Edited and explained by Dr. Kielhorn Part II (Translation and Notes), Paribhâshâs LXX —CXXII	0	8	0
No XIII —The Raghuvamsa of Kalidasa with the Commentary of Mallinâtha Edited, with Notes by S P Pandit, M A, Part III, Cantos XIV —XIX	0	8	0
No XIV —Vikramânkadeva-Charita Life of King Vikramâditya Tribhuvanamalla of Kalyâna, composed by his Vidyapati Bilhana. Edited, with an Introduction, by Dr G Buhler	0	12	0
No XV.—Malatî Mâdhava a Drama by Bhavabhûti Edited, with Critical and Explanatory Notes, by Dr R G Bhandarkar, M A (Second Edition in the Press)			
No XVI —Vikramorvasî a Drama by Kalidâsa Edited with Notes, by Shankar P Pandit, M A	1	4	0
No XVII —Hemachandra's Desinamamâlâ Edited, with Critical Notes, a Glossary and a Historical Introduction, by Professor R. Pischel and Dr G Buhler Part I Text and Critical Notes by Professor Pischel	1	0	0

	Rs.	a.	p.
No. XVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. I. complete. Parts. I, II. and III.	9	0	0
No. XIX. Ditto ditto by ditto. Vol. I. Part II.	1	0	0
No. XX. Ditto ditto by ditto. Vol. I. Part III.	1	0	0
No. XXI. Ditto ditto by ditto. Vol. II. Part I.	1	0	0
No. XXII. Ditto ditto by ditto. Vol. II. Part II.	1	0	0
No. XXIII. Vâsishthadharmaśâstram. Edited, with Notes, by Dr. A. A. Führer	0	8	0
No. XXIV.—Kâdambarî, by Bâṇa and his son. Vol. I. Sanskrit Text, complete. Edited by Dr. P. Peterson	1	0	0
Ditto Vol. II. Introduction and Notes, by do.	2	0	0
No. XXV.—Kîrti-Kaumudî. Edited, with Notes, by Prof. A. V. Kathavate.	0	12	0
No. XXVI.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. II. Part III.	1	0	0
No. XXVII.—Mudrârâkshasa, by Viśâkhadatta, with the Commentary of Dhuṇḍhirâja. Edited, with Notes, by K. T. Telang. (Copyright restored to the author.)			
No. XXVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. III. Part I.	1	0	0
No. XXIX.—Ditto do. of do. by do. Vol. III. Part II....	1	0	0
No. XXX.—Ditto do. of do. by do. Vol. III. Part III.	1	0	0
No. XXXI.—Subhâshitâvali of Vallabhadeva. Edited by Dr. P. Peterson and Pandit Durgaprasad	2	8	0
No. XXXII.—Tarka-Kaumudî of Laugâkshi Bhâskara. Edited by Professor M. N. Dvivedi	0	12	0
No. XXXIII.—Hitopadeśa of Nârâyaṇa. Edited by Dr. P. Peterson ...	0	14	0
No. XXXIV.—The Gauḍavaho, by Vâkpati. Edited by S. P. Pandit.	3	0	0
No. XXXV.—Mahânârâyaṇa Upanishad. Edited by Colonel G. A. Jacob.	0	7	0
No. XXXVI.—University Selections of Hymns from the Rigveda. Edited by Dr. P. Peterson	4	0	0
No. XXXVII.—Śârṅgadharapaddhati. Edited by Dr. P. Peterson. Vol. I.	3	0	0
No. XXXVIII.—Naishkarmyasiddhi. Edited by Col. G. A. Jacob.	2	0	0
No. XXXIX.—A Concordance to the principal Upanishads and Bhagavadgîtâ, by the same author	8	0	0
No. XL.—Eleven Atharvaṇa Upanishads, with dîpikâs, by the same author	2	8	0
No. XLI.—Handbook to the Study of the Rigveda, by Dr. P. Peterson. Part I....	3	0	0
No. XLII.—The Daśakumâracharita of Daṇḍin, Part II. (completing Dr. Bühler's Edition) Edited with Critical and Explanatory Notes, by Dr. P. Peterson	0	8	0
No. XLIII.—Handbook to the Study of the Rigveda, by Dr. P. Peterson Part II. comprising the Seventh Maṇḍala with the commentary of Sâyaṇa...	5	0	0
No. XLIV.—Aphorisms of the Sacred Law of the Hindus, an Index of the Sutras and the various Readings of the Hiraṇyakeshi-Dharmasutra, by Dr. G. Bühler	2	12	0
No. XLV.—Rajataranginî Edited by Pandit Durgaprasad, Part I. containing the first 7 (seven) Tarangas	3	0	0

WORKS IN THE PRESS.

Harshacharita, edited by Dr A A Fuhrer

Atharva-Veda, edited by Mr S P Pandit

Bhimâchârya's Nyayakosa, 2nd Edition

An Edition of the Mrichchhakatika, by Mr N B Godbole

An Edition of Patañjali's Yogasûtras, with the Scholium of Vyâsa and the Commentary of Vachaspati, by Mahâmahopâdhyâya Rajârâm Shâstri Bodas

Parâsara Smriti with the Commentary of Sâyana Mâdhavacharya, by Messrs Vaman Shâstri Islâmpurkar and Shamrao Vithal

An Edition of Kumârapâlacharita by Mr S P Pandit

An Edition of Padmagupta's Navasâhasânkacharita by Messrs Vaman Shâstri Islâmpurkar and S R Bhândârkar

An Edition of the Rekhâ Ganita, by Mr H H Dhruva

WORKS UNDERTAKEN.

An additional Part of the Vyâkarana Mahâbhâshya of Patañjali, containing an introduction and indices, by Dr F Kielhorn

An Edition of the Kavya-prakâsa, by Professor A V Kathavate

An Edition of Tarkasañgraha, by Mr Y V Athalye

An Edition of the Shatprâbhritatikâ by Mr K B Pathak

An Edition of the Uttararâmacharita, by Dr R G Bhandarkar and Mr S R Bhândârkar

Kesava Misra's Tarkabhâshya with the Commentary of Chinnabhatta, edited with Notes, Critical and Explanatory, by Dr R G Bhândârkar

Varadarâja's Târkikaraksha, with the Perpetual Commentary edited with Notes, Critical and Explanatory, by Dr R G Bhândârkar

Krishnamisra's Prabodhachandrodaya, with a Commentary and Notes, edited by Mr Shridhar Ganesh Joshi

An Edition of the Syadvâdamañjari of Hemachandra by Mr Manilal N. Dvivedi

An Edition of the Bhatti Kavya, by Mr Kamalashankar Trivedi

An Index to the Taittiriya Samhita by Mr M M Kunte

An Edition of Hemchandra's Dvyâsraya Kosha, by Mr K H Dhruva